महामतिश्रीमाधवकरप्रणीतं

माधवनिदानम्

महामहोपाध्याय-श्रीविजयरक्षित-श्रीकण्ठदत्ताभ्यां विरचितया मधुकोशाख्यव्याख्यया तथा श्रीवाचस्पति-वैद्यविरचितया आतङ्कदर्पणव्याख्याया विशिष्टांशेन च समुल्लसितम् ।

आचार्योपाह्वेन त्रिविक्रमात्मजेन यादवशर्मणा संशोधितम् ।

तस्येदं चतुर्थं संस्करणम्

आयुर्वेदाचार्येत्युपाधिधारिणा तांबवेकरेत्युपाह्व-रघुनाथशर्मणा संस्कृतम् ।

मुम्बय्यां
पाण्डुरङ्ग जावजी इत्येतैः,
स्वीये निर्णयसागरमुद्रणयन्त्रालये मुद्रापयित्वा प्रकाशितम् ।

शाके १८६१ वत्सरे, सन १९३९

(तृतीयसंस्करणस्य) भूमिका।

विमलविपुलबुद्धिरिन्दुकरात्मजः **श्रीमाधवकर**श्चरकसुश्रुतविदेहवाग्भटादीनामनेकतन्त्राणां वचनानि संगृह्य **माधवनिदान**मितिनाम्ना प्रसिद्धं रोगविनिश्चयाख्यमिमं ग्रन्थं निर्मितवान्। अस्मिन् ग्रन्थे आयुर्वेदोक्तानां प्रायः सर्वेषां रोगाणां निदानपूर्वरूपरूपोपशयसंप्राप्त्युपद्रवसाध्यासाध्यविचारप्रभृतयो विषयाः संक्षेपेणातिस्पष्टतयोपवर्णिताः। अयं च मन्दबुद्धीनामल्पेनापि परिश्रमेण रोगसमूहज्ञानसंपादनविधावद्वितीयो वरीवर्ति। भिषजामतीवोपयुक्तोऽयं ग्रन्थः, यदिमं भिषजः सर्वदा कण्ठोपस्थितमेव परिरक्षन्ति, अस्य च निर्मलज्ञानेन रोगसमूहान् विनिर्णयन्ति। अस्य महतीं लोकोपयोगितां निरीक्ष्य विद्वद्भिर्भिषग्भिर्बह्वयष्टीका व्यरचिषत। यासु मधुकोशातङ्कदर्पणाख्ये द्वे टीके समुपलभ्येते। विमलविपुलबुद्धिः श्रीमाधवकरष्टीकाकारः श्रीविजयरक्षितः श्रीकण्ठदत्तश्च कस्मिन् समये कतमं जनपदं जन्मना अलञ्चक्रुरिति दृढेन प्रमाणेन निश्चेतुमतीव दुःशकम्। किन्तु **श्रीगोपीमोहनकविराज**कृतमुक्तावल्याख्यग्रन्थस्थेन "पूर्वं लोकहिताय माधवकराभिख्यो भिषक् केवलं कोषान्वेषणतत्परः प्रविततायुर्वेदरत्नाकरात्। मालां रत्नमयीं चकार स यथालाभं न शोभाधिका साऽस्माभिः कमनीयभक्तिरचनद्वाराऽन्यथा ग्रथ्यते" इति पद्येनैतावदेव निश्चीयते यन्माधवकरो निदानातिरिक्तं रत्नमालाभिधमन्यमपि ग्रन्थं निर्मितवानिति। अयं च माधवकरो वेदभाष्यकर्तुः सायणोपनामकात् माधवाचार्यतो भिन्न एवेतीतिहासवेत्तॄणां सुविदितमेव। मधुकोशव्याख्याव्यतिरिक्तः श्रीविजयरक्षितविरचितोऽन्यग्रन्थो न क्वाप्युपलभ्यते। श्रीकण्ठदत्तेन वृन्दकृत**सिद्धयोगा**ख्यग्रन्थोपरि **कुसुमावल्य**भिधाना व्याख्या प्रणीता, येदानीं पुण्यपत्तने आनन्दाश्रमग्रन्थावल्यां मुद्रिताऽस्ति। पुस्तकस्यास्य शुद्धिकरणार्थं मत्संग्रहे मधुकोशव्याख्यासहितमाधवनिदानस्यैकं हस्तलिखितं शुद्धं पुस्तकमासीत्, तस्य तथा आतङ्कदर्पणव्याख्याया एकं हस्तलिखितं पुस्तकमस्मत्परमसुहृदां स्व. व. वैद्य **मुरारजी नथुभाई वासु** इत्येतेषां पुस्तकसंग्रहात् प्राप्तं, तस्य च साहाय्यमवलम्बितं, संदेहस्थलेषु चरकसुश्रुतादीन् ग्रन्थानवलोक्य निश्चिताः

---

१ स चायं माधवकरः खिस्तीयसप्तमशतके विजयरक्षितश्च त्रयोदशशतके संबभूवेति प्रत्यक्षशारीरोपोद्धाते म. म. कविराजश्रीगणनाथसेनमहोदयाः।

पाठभेदाः, मुद्रितपुस्तकेषु यत्र क्वचिन्मूलातिरिक्तः पाठ उपलब्धः स प्रक्षिप्त इति मत्वा ( ) एतादृक्चिह्नमध्ये संनिवेशितः, ग्रन्थादौ माधवनिदानान्तर्गतानां विषयाणामनुक्रमणिका संयोजिता, तथा मधुकोशव्याख्यायां प्रमाणतयोपन्यस्तानां ग्रन्थग्रन्थकर्तॄणां तत्तत्स्थानोल्लेखपूर्वकं नामानि, तथा संप्रति भारतवर्षे यावन (युनानी) चिकित्साया आङ्ग्लचिकित्सायाश्च प्रचारबाहुल्यात् माधवनिदानोक्तानां रोगाणां यथोपलब्धानि अरबीभाषया आङ्ग्लभाषया च पर्यायनामानि संनिवेशितानि। प्रथमसंस्करणे आतङ्कदर्पणव्याख्या समग्रैव मुद्रिता आसीत्। परमातङ्कदर्पणव्याख्यायां बहवोंऽशा मधुकोशव्याख्यातोऽविकला एवोद्धृताः सन्ति, अतः पुनरुक्तिदोषनिवारणाय पुस्तकस्याकारणकलेवरवृद्धिनिवारणाय चास्मिन् द्वितीये संस्करणे मधुकोशव्याख्यातो यावानंश आतङ्कदर्पणव्याख्यायामधिक आसीत्तावानेवोद्धृत्य मुद्रितः। एवं पुस्तकस्यास्य शुद्धिं विधाय निर्णयसागरयन्त्रालयाधिपतये 'पाण्डुरङ्ग जावजी' इत्यभिख्यया प्रसिद्धाय श्रेष्ठिने दत्तमिदं पुस्तकं, तेन च स्वकीये निर्णयसागरयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतम्। एवं महता यत्नेन संपादितेऽस्मिन्कार्ये प्रमादेन भ्रमेण वा जातं स्खलनं क्वचिद्दृश्येत, तर्हि गुणैकपक्षपातिभिर्विद्वद्भिः क्षन्तव्यं, सफलयितव्यश्च ममायं प्रयासो ग्रन्थस्यास्य पठनपाठनपर्यालोचनादिनेत्यभ्यर्थ्यते

कालबादेवीरोड,
मुंबई.

भिषजामनुग्राह्यो
यादवशर्मा।

माधवनिदानोक्तानां रोगाणामरबीभाषानामसंपादने मदीययावन (युनानी)-वैद्यकशास्त्राध्यापकैः परममाननीयैः स्वर्गवासिभिः **'हकीम श्रीरामनारायणजी'** इत्येतैः, तथा तत्पुत्रैः स्वर्गवासिभिः **'हकीम श्रीरामलालजी'** इत्येतैः; तथा आङ्ग्लभाषा–नामसंपादने मदीयपरमसुहृद्भिः **'डॉक्टर श्रीदुर्गाशङ्कर गोविंदराम दवे'** इत्येतैः महानायासोऽङ्गीकृतः तन्निमित्तं तेषां चिरमुपकारपराबद्धोऽस्मि।

भिषजामनुग्राह्यो
यादवशर्मा।

मधुकोशव्याख्यायां प्रमाणत्वेन समुपन्यस्तानां ग्रन्थानां ग्रन्थकर्तृणां च नामानि ॥

निदानोक्तानां रोगाणामरव्वीभाषायामाङ्ग्लभाषायां च नामानि ॥

ज्वर	हुम्मा	Pyrexia पायरेक्सिआ. Fever फीवर.
सामान्यज्वर	हुम्मा योमी	Febricula फेब्रिक्युला.
सन्निपातज्वर		Typhoid State टायफॉइड स्टेट.
विषमज्वर	हुम्मा खिलतिया	Malarial fever मॅलेरियल फीवर.
सन्ततज्वर	हुम्मा दायमी	Malarial Remittent fever मॅलेरिअल् रिमिटन्ट फीवर.
सततज्वर		Double Quotidian Fever डबल क्वॉटिडियन् फीवर.
अन्येद्युष्कज्वर		Quotidian Fe. क्वॉटिडियन् फी.
तृतीयकज्वर	हुम्मा गिव खालिस दायरा	Tertian Fever टर्शियन् फीवर.
चतुर्थकज्वर	हुम्मा रावेआ	Quartan Fever क्वार्टन् फीवर.
चातुर्थकविपर्यय		Double Quartan Fever डबल क्वार्टन् फिवर.
अभिघातज्वर	हुम्मा जरबी	Traumatic fever ट्रॉमॅटिक् फी.
विदाहज्वर	हुम्मा वरमी	Inflammatory fe. इन्फ्लॅमेटरी फी.
सूतिकाज्वर	हुम्मा झचगी	Puerperal fever प्युएर्पेरल् फी.
स्तन्योत्थज्वर		Milk fever मिल्क फीवर. Fever of Lactation फीवर ऑफ् लेक्टेशन्.
आगन्तुकज्वर		Adventitious fever ॲड्व्हेन्टिशिअस् फीवर.
ओषधिगंधज		Hay fever हे फीवर.
काम-भय-शोक-क्रोधज्वर		Pyrexia of emotions पायरेक्सिआ ऑफ् इमोशन्स्.
भूताभिषङ्गज्वर		Fever of Evil Spirits फीवर ऑफ् ईविल स्पिरिट्स्.
प्रलेपकज्वर		Hectic fever हेक्टिक् फीवर.
अतिसार	इसहाल	Diarrhœa डायरिया.
आमातिसार	झहीर	Mucous-colitis म्युकस् कोलायटिस्.
प्रवाहिका	इसहाल उल दम	Dysentery डिसेन्ट्री.
ग्रहणी	झलक उल अमआ	Chronic Diarrhœa, Sprue क्रॉनिक डायरिया, स्प्रू.

अर्श	बवासीर	Piles, Hæmorrhoids, पाइल्स; हिमरॉइड्स.
रक्तार्श	बवासीर उल दम	Bleeding piles ब्लीडिंग पाइल्स.
अग्निमान्द्य	ज़ोफ उल मेअदा	Dyspepsia डिस्पेप्सिया.
अजीर्ण	तुख्मा	Indigestion इन्डिजेशन.
विसूचिका	हैज़ा	Cholera कॉलेरा.
आध्मान	नफ़ख	Tympanitis टिम्पॅनाइटिस. Metiorism मीटिऑरिज़म्.
कृमि	दीदान उल अमआ	Worms वर्म्स.
पाण्डुरोग		Anæmia ॲनिमिया.
रक्तपित्त		Hæmorrhagic diseases हिमॉ-न्हेजिक डिसीजेस. Scurvy स्कर्वी.
कामला	यरकान अस्फर	Jaundice जॉन्डिस.
हलीमक	यरकान असवद	Chlorosis क्लोरॉसिस.
राजयक्ष्मा	हुम्मा दिक़	Phthisis, consumption, Pulmonary tuberculosis थायसिस्, कंज़म्प्शन, पल्मनरी ट्युबर्क्युलोसिस्.
उरःक्षत	सिल	Pulmonary Cavitation पल्मनरी कॅविटेशन.
कास	सोआल	Cough कॉफ.
हिक्का	फवाक	Hiccup, हिकप्.
श्वास	रिबु, ज़ीक उल नफ़्स	Dyspnœa डिस्निया.
तमकश्वास		Asthma ॲस्थ्मा.
क्षुद्रश्वास		Breathlessness ब्रेथ्लेस्नेस्.
महाश्वास		Dyspnœa of failing heart or respiration डिस्निआ ऑफ् फेलिंग हार्ट ऑर रेस्पिरेशन्.
स्वरभङ्ग	फसाद उल सोत	Hoarseness होर्सनेस्.
अरोचक		Loss of taste & appetite लॉस ऑफ् टेस्ट ॲन्ड ॲपेटाइट. Anorexia ॲनोरेक्सिआ.
छर्दि	के	Vomiting व्होमिटिंग.
तृषा	अतश मुफरत	Thirst थर्स्ट.
मूर्च्छा	गशी	Cyncope, fainting, सिंकपी, फेन्टिङ्ग.
भ्रम	सदर, दवार.	Giddiness, गिडिनेस.
संन्यास	सक्ता	Apoplexy ॲपॉप्लेक्सी. Catalepsy कॅटॅलेप्सी.

मदात्यय	खुम्र	Alcoholism ॲल्कॉहोलिझम्.
उन्माद	जनुन	Insanity इन्सॅनिटी.
अपस्मार	सरआ	Epilepsy एपिलेप्सी.
आक्षेपक	तशन्नुज	Convulsions, कन्व्हल्शन्स्.
धनुःस्तम्भ		Tetanus, टिटॅनस्.
पक्षवध	इस्तिरखा, फालीज	Hemiplegia, हेमिप्लेजिआ.
सर्वाङ्गवात		Diplegia डायप्लेजिआ.
अर्दित	लकवा	Facial Paralysis, फेसियल पॅरॅलिसिस्.
मन्यास्तम्भ	इस्तिरखाय् उल चम्बर	Stiff neck स्टिफ् नेक्. Torticolis, Wry neck. टॉर्टिकॉलिस्, राय नेक्.
जिह्वास्तम्भ	इस्तिरखाय् उल लसान	Paralysis of the Tongue, Glossal palsy. पॅरॅलिसिस् ऑफ् दि टंग्; ग्लॉसल् पॅल्सी.
पादहर्ष		Numbnes of feet, नम्नेस् ऑफ् फीट्.
ऊरुस्तम्भ	इस्तिरखाय् उल फख्झ	Paraplegia पॅरॅप्लेजिआ.
अंतरायाम		Emprosthotonos एम्प्रोस्थोटोनस्
बाह्यायाम		Opisthotonos ओपिस्थोटोनस्.
दण्डापतानक		Plenosthotonos प्लेनोस्थोटोनस्.
हनुग्रह		Trismus, Lock jaw. ट्रिस्मस्, लॉक् जॉ.
खञ्ज		Limp लिम्प्.
पङ्गु		Paraplegia पॅरॅप्लेजिआ.
कलायखञ्ज		Lathirism लेथिरिझम्.
अंसशोष		Osteoarthritis of the shoulder joint ऑस्टिओआर्थ्राइटिस् ऑफ धी शोल्डर जॉइन्ट.
क्रोष्टुकशीर्ष		Inflamed knee इन्फ्लेम्ड नी.
वेपथु	राअशा	Paralysis Agitans पॅरॅलिसिस् ॲजिटॅन्स.
अपतन्त्रक	इख्तनाक उल रहम	Hysteria हिस्टेरिया.
गृध्रसी	अरकुन्निशा	Sciatica. सायाटिका.
विश्वाची	इस्तिरखाय् उल यद	Radio-ulnar paralysis रेडिओ-अल्नर पॅरॅलिसिस्.
मूकत्व	बुकम	Aphasia ॲफेजिया.
वातरक्त		Gout गाऊट.

ओष्ठभेद	शक उल शिफतेन	Cracks of Lip क्रॅक्स् ऑफ् लिप्.
दन्तभेद	शक उल असनान	
नखभेद	शक उल अझफार	Onychia ऑनिकिया.
अरसज्ञता	बुतलान उल झौक	Loss of sensibility to taste लॉस् ऑफ् सेन्सिबिलिटी टु टेस्ट.
घ्राणनाश		Loss of Smell लॉस् ऑफ स्मेल्.
जृम्भा	तशाऊब	Yawning यॉनिंग्.
अस्वप्न (निद्रानाश)	सहर	Insomnia इन्सॉम्निया.
अतिप्रलाप	हीझयान्	Delirium डिलिरियम्.
आमवात	वजअ ऊल् मुफासील	Rheumatism र्‍यूमॅटिझम्.
शूल	वजअ उल मेअदा	Colic कॉलिक्.
परिणामशूल		Gastralgokenosis Hunger pain गेस्ट्रॅल्गोकेनोसिस हंगर पेन्.
हृद्रोग	वजअ उल कल्ब	Diseases of the Heart डिसीजेस् ऑफ् धी हार्ट. Angina Pectoris ॲन्जाइना पेक्टोरिस्.
अम्लपित्त		Acidity ॲसिडिटी.
आनाह		Constipation कॉन्स्टिपेशन्.
गुल्म		Abdominal tumour ॲब्डॉमिनल ट्यूमर.
रक्तगुल्म		Ovarian or uterine tumour ऑव्हेरियन् ऑर युटेराइन ट्यूमर.
मूत्रकृच्छ्र	तकतीर उर बौल	Dysuria डिस्यूरिया. Stranguary स्ट्रॅंग्युअरी. Painful micturition. पेनफुल् मिक्च्युरिशन्.
मूत्राघात	एहतेबास उल बौल	Obstructed micturition. ऑब्स्ट्रक्टेड् मिक्च्युरिशन्.
वातकुण्डलिका		Spasmodic stricture स्पॅस्मॉडिक् स्ट्रिक्चर.
अष्ठीला		Enlargement of Prostate एनलार्जमेन्ट् ऑफ् प्रॉस्टेट्.
वातवस्ति		Retention of urine रिटेन्शन् ऑफ् यूरिन.
मूत्रातीत	इस्तिरखाय् उल मसाना	Incontinence इन्कोन्टिनन्स.
मूत्रजठर	इन्तिफाख उल मसाना	Distended bladdar डिस्टेन्डेड ब्लॅडर.

मूत्रोत्संग		Stricture of Urethra स्ट्रिक्चर ऑफ़ यूरेथ्रा.
मूत्रक्षय		Supression of Urine सप्रेशन ऑफ यूरिन.
मूत्रग्रन्थि		Tumour of the bladder ट्यूमर ऑफ दि ब्लॅडर.
मूत्रसाद		Cystitis सिस्टायटिस्.
विड्विघात		Vesico-Intestinal Fistula वेसायको-इन्टेस्टायनल् फिश्चुला.
वस्तिकुण्डल		Atony of bladder एटनी ऑफ् ब्लॅडर.
खल्ली		Muscular Spasm of Hand and feet. मस्क्युलर स्पॅझम् ऑफ् हॅन्ड् ॲन्ड् फीट्.
वातकण्टक		Sprain Ankle स्प्रेन ॲंकल्.
अश्मरी	हीसआत	Calculus कॅल्क्युलस्.
वाताश्मरी		Uric acid calculus युरिक एसिड कॅल्क्युलस्.
पित्ताश्मरी		Mixed calculus मिक्स्ड् कॅ.
कफाश्मरी		Stone of Phosphates, स्टोन ऑफ् फॉस्फेट्स्.
शुक्राश्मरी		Seminal calculus सेमिनल कॅ.
शर्करा	रमल	Gravel ग्रॅवल.
प्रमेह	जीरयान	Diseases of the urine डिसीजेस् ऑफ् दि यूरिन.
उदकमेह		Diabetes Insipidus डायबिटिस् इन्सिपिडस्.
पिष्टमेह		Chylurea काइल्यूरिया.
हस्तिमेह		Anuresis ॲन्युरेसिस्. Incontinence of urine इन्कोन्टिनन्स् ऑफ् यूरिन.
लाला-वसा-मज्जा-मेह		Albuminuria ॲल्ब्यूमिन्यूरिया.
रक्तमेह	बौल उल दम	Hæmaturea हिमॅच्युरिया.
शुक्रमेह	जीरयान मनी	Spermatorrhœa स्पॅर्मटोरिया.
इक्षुमेह	ज़याबीतुस	Diabetes Mellitus, डायबिटिस् मेलिटस्.
सान्द्रमेह		Mucous in urine म्युकस इन् यूरिन.

सुरामेह		Phosphaturia फोस्फेचूरिआ.
सिकतामेह		Urates in urine यूरेट्स् इन् यूरिन.
क्षारमेह		Alkaline urine एल्कलाइन यूरिन.
हारिद्रमेह		Bile in urine बाईल इन यूरिन.
प्रमेहपिडिका		Carbuncle कार्बन्कल.
मेदोवृद्धि	समन मुफरत	Obesity ओबेसिटि.
ऊर्ध्ववात		Eructation इरक्टेशन.
प्रत्यष्ठीला		Ovaritis ओवेरायटिस्.
वाताष्ठीला		Typhlitis टायफ्लायटिस्.
प्लीहोदर	वरम उल तिहाल	Splenitis, splenic enlargement स्प्लिनायटिस, स्प्लेनिक् एन्लार्जमेन्ट.
यकृद्दाल्युदर	वरम उल कबिद	Hepatitis, Hepatic enlargement हेपेटाइटिस, हेप्याटिक् एन्लार्जमेन्ट.
जलोदर	इस्तिस्का	Ascites ॲसायटिस्.
बद्धगुदोदर		Intestinal obstruction इन्टेस्टायनल ऑब्स्ट्रक्शन्.
शोथ	वरम	Swelling, Dropsy, Anasarca, Œdema स्वेलिंग, ड्रॉप्सी, ॲनासार्का, इडीमा.
क्षतोदर	कुरुह उल अमआ	Ulceration of the bowel अलसरेशन् ऑफ् धी बॉवेल.
वृद्धि		Scrotal Enlargement स्क्रोटल् एन्लार्जमेंट्.
मूत्रजवृद्धि	किल्लतुल मेआ	Hydrocele हायड्रोसील.
दोषजवृद्धि	वरम उल उन्सियेन	Orchitis ऑरकायटीस्.
रक्तजवृद्धि		Hæmatocele हिमॅटोसील.
वातजवृद्धि		Chronic orchitis क्रॉनिक् ऑर्काइटिस्.
पित्तजवृद्धि		Acute orchitis ॲक्यूट ओर्काइटिस्.
कफजवृद्धि		Tubercle Testes ट्युबरकल् टेस्टिझ्.
मेदोजवृद्धि	अझीम उल उन्सियेन	Elephantiasis of Scrotum एलिफन्टिॲसिस् ऑफ् स्क्रोटम्.
अन्त्रवृद्धि	किल्लतुल अमआ	Inguinal Hernia इन्ग्वायनल हर्निया.

गलगण्ड		Goitre, Bronchocele गॉयटर, ब्रॉन्कोसील.
गण्डमाला अपची	खनाज़ीर	Scrofula, स्क्रॉफ्यूला. Tubercle glands ट्युबरकल् ग्लॅन्डस्.
मेदोर्बुद		Fatty tumour फॅटी ट्यूमर.
मांसार्बुद	सरतान	Myoma मायोमा.
रक्तार्बुद		Cancer कॅन्सर्.
अर्बुद	वश्रूर	Malignant Tumour मॅलिग्नन्ट ट्यूमर.
ग्रन्थि		Enlarged lymphatic Gland एन्लार्जड् लिंफॅटिक् ग्लॅन्ड.
श्लीपद	दाय् उल फील	Elephantiasis एलिफन्टीॲसिस.
विद्रधि	दुबेला	Abscess ॲब्सेस्.
व्रणशोथ	आबला	Inflammation इन्फ्लॅमेशन्.
शारीरव्रण		Idiopathic Ulcer इडियोपॅथिक् अल्सर.
सद्योव्रण		Traumatic Wound ट्रोमॅटिक [वुन्ड.
छिन्न		Slashed स्लॅश्ड.
भिन्न		Punctured पंक्चर्ड.
विद्ध		Stab स्टॅब्.
क्षत		Contused wound कन्टयूज्ड वुन्ड.
पिच्चित		Crushed क्रश्ड.
घृष्ट		Excoriated एक्स्कोरिएटेड.
अस्थिभग्न	कस्र	Fracture फ्रॅक्चर.
सन्धिविश्लेष	खलआ	Dislocation डिस्लोकेशन्.
अश्वकर्ण		Spiral Fracture स्पायरल फ्रॅ.
मज्जागत		Impacted Fracture इम्पॅक्टेड फ्रॅक्चर्.
अस्थिच्छल्लिका		Green Stick fracture ग्रीन् स्टिक् फ्रॅक्चर्.
नाडीव्रण	नासूर	Sinus, Fistula सायनस्, फिस्चुला.
भगन्दर	नवासीर	Fistula in Ano फिस्चुला इन् एनो.
लिङ्गार्श	सालील उल कुजिब	Warts वॉर्ट्स्.
कुष्ठ		Diseases of the skin डिसीजेस् ऑफ् दि स्कीन्.
महाकुष्ठ	जुज़ाम	Leprosy, लेप्रसि.

सिध्म	खल्फ	Cloasma, क्लोआज्मा. Ptyriasis टिरिॲसिस्.
चर्मकुष्ठ		Zeroderma, झेरोडर्मा.
किटिभ		Psoriasis, सोरायासिस्.
वैपादिककुष्ठ		Rhagades, ऱ्हेगेड्स.
अलसक		Lichen, लीचेन्.
कच्छु		Scabies, Itch स्केबीस, इच्.
विस्फोटक		Impetigo, इम्पेटिगो.
शतारु		Rupia, रुपिया.
विचर्चिका		Pemphigus, पॆंफिगस्.
दद्रु	कुवा	Ringworm रिंगवर्म.
किलास	वरस अबिजय	Leucoderma ल्युकोडर्मा.
पामा	जर्व	Eczema एग्झीमा.
विसर्प	हुमरा	Erysipelas एरिसिपेलस्.
ग्रन्थिविसर्प		Erythema-Nodozum एरीथिमा-नोडोझम्.
कर्दमविसर्प		Cellulitis सेल्युलाइटिस्.
क्षतविसर्प		Traumatic erysipelas ट्रॉमॅटिक एरिसिपेलस्.
शीतपित्त		Urticaria, अर्टिकेरिया.
विस्फोट		Exenthymeta एक्झेन्थीमेटा.
मसूरिका	जुदरी	Small Pox स्मॉल् पॉक्स्.
रोमान्तिका		Measles, मीझल्स्.
इन्द्रलुप्त	इन्तशार उल शअर	Falling of Hair, Baldness फॉलिंग् ऑफ् हेअर, बॉल्डनेस्.
पाषाणगर्दभ		Mumps मम्प्स्.
विदारिका		Bubo ब्यूबो.
पलित	शेब	Premature grey hair प्रिमेच्युअर ग्रे हेअर.
मुखदूषिका	बथूर उल लुबन	Acne ॲक्नी.
मषक	शालील	Mole मोल.
गुदभ्रंश	खरुज उल मुकअद	Prolapsus Ani प्रोलॅप्सस एनाय
तिलकालक	खाल	
चिप्प	दाखस	Whitlow व्हिट्लो.
सन्निरुद्धगुद		Stricture of the Rectum स्ट्रिक्चर ऑफ् दि रेक्टम्.
कक्षा		Herpes Zoster हर्पीझ झोस्टर.

कदर		Corn कॉर्न.
निरुद्धप्रकश		Phimosis फायमॉसिस्.
परिवर्तिका		Paraphimosis पॅराफायमॉसिस.
अवपाटिका		Tear in the prepuce टेअर इन् दि प्रेप्यूस्
अहिपूतना	हक उल मुकअद	Pruritus anii प्रुरायटस एनाय.
उपदंश	जुम्राह	Soft chancre सॉफ्ट शँकर.
फिरङ्गोपदंश		Hard chancre, syphilis हार्ड शँकर, सिफिलिस.
खलिवर्धन	असनान उल ज़ायदा	Extra Tooth एक्स्ट्रा टूथ.
दन्तनाडी	कुरूह उल लशा	Sinus in the Gums सायनस् इन् दि गम्स्.
क्रिमिदन्तक	दीदान उल लशा	Caries of Teeth कॅरीज़ ऑफ् टीथ.
दन्तहर्ष	जर्स	Irritation in the Tooth इरिटेशन् इन् दि टूथ.
दन्तशर्करा	हजर	Tartar टार्टर.
श्यावदन्त		Black or Necrosed Tooth ब्लॅक ऑर नेक्रोझ्ड टूथ.
कण्ठशुण्डी		Elongated Uvula एलोंगेटेड युव्युला.
उपजिह्वा	ज(द)फ्दू उल लसान	Ranulla रॅन्युला.
मुखरोग(स्रवैसर)		Stomatitis स्टोमेटाइटिस्.
शीताद		Spongy gums स्पन्जी गम्स्.
दन्तवेष्ट		Pyorrhœa पायोरिआ.
दन्तपुप्पुट, शौषिर		Gum boil गम् बॉइल्.
अलास		Sublingual abscess सब्लिन्ग्वल ॲब्सेस्.
तालव्वर्बुद		Palatal cancer पॅलेटल कॅन्सर.
कर्णनाद	तनीन, वदी	Noises in the Ear नॉयझेस् इन् दि इअर.
कर्णस्राव	इन्फजार उल उज्ञल	Otorrhœa ओटोऱ्हिआ.
कर्णशूल	वजअ उल उज्ञन	Otitis, Otalgia ओटायटिस्, ओटॅल्जिआ.
कर्णपाक	कुर्हतुल उज्ञन	Suppuration in the ear सप्युरेशन इन् दि इअर.
पूतिकर्ण		Fætid discharge from the ear फीटिड डिस्चार्ज फ्रॉम् दि इअर.

क्रिमिकर्णक	दीदान उल उज्ञन	Worms in ear वर्म्स इन् इअर.
कर्णशोथ	वरम उल उज्ञन	Inflammation of the ear इन्फ्लेमेशन ऑफ् दि इअर.
बाधिर्य	कर	Deafness डेफ्नेस्.
अपीनस		Ozœna ओज़ीना.
नासापाक	वस्रूर उल अनफ	Pustule in the Nose, Suppurative Rhinites पुस्चुल दि नोज़, सप्युरेटिव हाय्नायटिस्.
क्षवथु	अतूस	Sneezing स्नीज़िंग.
नासाशोष	जफाफ उल अनफ	Dryness of Nose ड्रायनेस् ऑफ् नोज़.
प्रतिश्याय	ज़ुकाम	Catarrah or Cold in the Nose कॅटॅरा ऑर कोल्ड इन् दि नोज्
अभिष्यन्द	दमआ	Ophthalmia ऑफ्थॅल्मिआ.
अक्षिपाकात्यय	रमद	
शिरोत्पात	सबल	Pannus पॅनस.
शुक्र	व्याज	Corneal Ulcer कॉर्नियल् अल्सर.
पित्तविदग्ध-दृष्टि	जहर	Day Blindness, डे ब्लाइन्डनेस, Hemaralopia हिमॅरॅलोपिया.
पाददारी		Cracks in the sole. क्रॅक्स् इन् दि सोल.
पद्मिनीकण्टक		Papilloma of the skin पेपीलोमा ऑफ् दि स्किन्.
कर्णगुथक		Wax in the ear. वॅक्स् इन् धी इअर.
तुण्डीकेरी, अध्रुष		Abscess of the palate. ॲब्सेस् ऑफ दी पॅलेट.
मांसतान		Diphtheria. डिफ्थेरिया.
श्लेष्मविदग्ध-दृष्टि	अशा	Night Blindness, Nyctalopia नाइट ब्लाइण्डनेस, निक्टॉलोपिया.
अर्म		Pterygium टेरिजियम्.
नेत्रनाडी	नासूर उल अइन्	Lachrymal Fistula लॅक्रिमल फिस्च्युला.
लिङ्गनाश	नझुल उल-मेआ	Cataract कॅटॅरॅक्ट.
क्रिमिग्रन्थि		Parasites on Suppurated glands. पॅरॅसाइट्स, ऑन् सुपरेटेड ग्लॅन्ड्स्.

वर्त्मार्दा		Granular Conjunctivitis ग्रॅन्युलर कन्जन्कृटिव्हायटिस्.
अञ्जननामिका		Stye स्टाय.
वातहतवर्त्म	इस्तिर्खाय् उल जुफ्न	Ptosis टोसीस.
निमेष		Blepharosposm ब्लेफेरोस्पॅज़म्
कुञ्चन	इलतिसाक उल जुफ्न	Atrophy ॲट्रोफी.
पक्ष्मकोप	शअर मुन्कलब	Trichiasis ट्रिकियासिस्.
उपपक्ष्म	शअर ज़ायद	
पक्ष्मशात	इन्तशारउल अह्दाब	Tinea Tarsi टिनिया टार्साय.
शिरःशूल	सुदाअ	Headache हेडएक्.
अर्धावभेद	शकीका	Hemicrania हेमिकेनिआ.
रक्तप्रदर	इस्तहाजा	Menorrhagia मेनोहेजिआ.
श्वेतप्रदर		Leucorrhea ल्युकोन्हिआ.
वन्ध्यात्व	अक्र	Sterility, Barrenness स्टेरिलिटी, बॅरनेस.
योनिकन्द		Vaginal Polypus व्हॅजायनल् पॉलिपस्.
गर्भस्राव	इस्कात हमल	Abortion, ॲबॉर्शन्.
मूढगर्भ		Difficult labour. डिफिकल्ट लेबर.
मध्यल्लशूल		After pains आफ्टर् पेन्स्.
स्तनरोग-कोप		Mammary Inflammation मॅमरी इन्फ्लॅमेशन.
स्तन्यदुष्टि		Diseased Milk डिसीज्ड मिल्क्.
सूतिकारोग		Peurperal fever प्युएर्पेरल् फी.
गति		Presentation प्रेझेंटेशन.
संकीलक		Vertex. व्हर्टेक्स.
प्रतिखुर		Hands & feet हॅंडस् अँड फीट्.
बीजक		Head with both hands.
परिघ		Transverse. ट्रान्सवर्स.
बालरोग		Diseases of children. डिसीजेस् ऑफ् चिल्ड्रन्.
कुकूणक		Ophthalmia in Children. ऑफथॅल्मिआ इन् चिल्ड्रन्.
पारिगर्भिक		Pining पायनिंग.
तालुकंटक		Polypus on hard palate.
महापद्म विसर्प		Cellulitis सेल्युलाइटिस.

योनिव्यापद्	Disease of Vagina डिसीज् ऑफ् व्हजायना.
आर्तव	Menstruation मेनस्ट्रुएशन.
सर्पविष	Snake poisoning स्नेक पॉइझनिंग्
आखुविष	Rat bite fever or poisoning रॅट बाइट् फीवर ऑर पॉइझनिंग्.
वृश्चिकविष	Scorpion bite or poisoning स्कॉरपीअन् बाइट् ऑर पॉइझनिंग्.
स्नायुक	Guinea worm गिनीवर्म.

माधवनिदानान्तर्गतविषयाणामनुक्रमणिका

२३ वातरक्तनिदानम् ।

३४ मेदोरोगनिदानम् ।

३५ उदरनिदानम् ।

३६ शोथनिदानम् ।

५६ मुखरोगनिदानम्।

६० शिरोरोगनिदानम् ।

६१ असृग्दरनिदानम् ।

६२ योनिव्यापन्निदानम् ।

६३ योनिकन्दनिदानम् ।

श्रीः

मधुकोशव्याख्यया आतङ्कदर्पणव्याख्याया विशिष्टांशेन च

सहितं

रोगविनिश्चयापरनामकं

माधवनिदानम् ।

पञ्चनिदानलक्षणम् १ ।

*प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम् ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥ १ ॥

श्रीगणेशाय नमः ।

शशिरुचिरहरार्धव्यक्तलक्ष्मार्धदेहो दिशतु घनघनाभः पद्मनाभः श्रियं वः ।
त्रिदशसरिदशीतद्योतजावारिमध्यभ्रमिभवमिव नाभौ वारिजं यस्य रेजे ॥ १ ॥

भट्टारजेज्जटगदाधरवाप्यचन्द्रश्रीचक्रपाणिबकुलेश्वरसेनभोजैः ।
ईशानकार्तिककुकीरसुधीरवैद्यमैत्रेयमाधवमुखैर्लिखितं विचिन्त्य ॥ २ ॥

तन्त्रान्तराण्यपि विलोक्य ममैष यत्नः सद्भिर्विधेय इह दोषविधौ समाधिः ।
मर्त्यैरसर्वविदुरैर्विहिते क नाम ग्रन्थेऽस्ति दोषविरहः सुचिरन्तनेऽपि ॥ ३ ॥

तत्तद्ग्रन्थतरुभ्यो व्याख्याकुसुमरसलेशमाहृत्य ।
भ्रमरेणेव मयाऽयं व्याख्यामधुकोश आरब्धः ॥ ४ ॥

उपयुक्तमिहानुक्तं निदानं माधवेन यत् ।
ग्रन्थव्याख्याप्रसङ्गेन मया तदपि लिख्यते ॥ ५ ॥

अथ प्रथितसर्वायुर्वेदबोधविशुद्धबुद्धिः श्रीमाधवकरो विकारनिकरहेत्वादितत्त्वबुभुत्सोत्सुकचिकित्सकजनानुजिघृक्षया विधित्सितग्रन्थसंदर्भारम्भे तत्प्रत्यूहव्यूह-

---

* 'तत्र ग्रन्थारम्भे प्रारब्धग्रन्थपरिसमाप्त्यर्थं ग्रन्थश्रोतृणामपि प्रत्यूहव्यूहव्युदासार्थं शिष्टाचारपरिपालनार्थं ग्रन्थकारः प्राग्विशिष्टेष्टदेवताप्रणामं निबद्धवान्—प्रणम्येत्यादि । युग्मम् । मया रोगविनिश्चयो ग्रन्थो निबध्यत इति संबन्धः । किं कृत्वा? प्रणम्य । अत्र प्रकर्षार्थद्योतकेन प्रशब्देन ग्रन्थकृद्भक्त्यतिशयं ख्यापयति । कं? शिवम् । सकलभुवनपतेर्महेश्वरस्य नामबाहुल्येऽपि तदध्यापकाध्येतॄणां कल्याणमभिलषन् ग्रन्थकारः शिवपदं निबद्धवान् ।' इति (आ० द०) ॥ १ ॥

---

१ "वाप्यचन्द्र" इति क. । २ "सुधीश्वरवीरवैद्य" इति क. । ३ "लेशमाकृष्य" इति क. ।

व्यपोहहेतुं परमाप्ताचारपरम्परापरिप्राप्तं स्वेष्टदेवताप्रणामं प्राक् प्राणैषीत्; ग्रन्थश्रोतॄणामपि विश्वेश्वरमहेश्वरस्य प्रणामानुवादमात्रादपि सर्वविघ्नोपशमो भवतीत्यभिप्रायेण तं ग्रन्थादौ निबद्धवान्—प्रणम्येत्यादि । अत्र प्रशब्दो भक्त्यतिशयख्यापकः । निबन्धनक्रियापेक्षया प्रणामस्य पूर्वकालभावित्वात् प्रणमेः क्त्वाप्रत्ययः । जगच्छब्देनोत्पत्तिमन्तः पृथिव्यादयोऽभिधीयन्ते; तेषामुत्पत्तौ स्वकारणसमवाये, स्थितौ कतिचित्कालावस्थाने, संहारे प्रध्वंसे, कारणं कर्तारम् । स्वर्गः सुखं, अपवर्गो मोक्ष आत्यन्तिकदुःखनिवृत्तिलक्षणः, तयोर्द्वारमुपायं प्रधानकारणम् । एतेन सकलपुरुषार्थहेतुत्वमुक्तं, सुखावाप्तिदुःखहानिव्यतिरिक्तस्य पुरुषार्थस्याभावात् । अत एव त्रैलोक्यशरणं त्रैलोक्यरक्षितारम् । न चोक्तजगत्स्थितिकारणत्वेन पौनरुक्त्यं, जगच्छब्देनोत्पत्तिमतामेवाभिधानात् । अत्र तु त्रैलोक्यशब्दो भुवनत्रयवर्तिचेतनाचेतनसमूहवाची, लोकशब्दस्य भुवनजनयोरभिधायकत्वात् । तथा चाऽमरः,—"लोकस्तु भुवने जने (अ. को. ३ का. ३ व.)"—इति । त्रैलोक्यमिति स्वार्थे ष्यञ्, चातुर्वर्ण्यवत् । हरादिपर्यायान् परित्यज्य शिवपदनिर्देशेन ग्रन्थस्य तदध्येतॄणां च सकलकल्याणमभिलषन् शिवपदं निबद्धवान्; शिवकारित्वेनैव महेश्वरस्य शिवपदाभिधानमिति ॥ १ ॥

*नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम् ॥ २ ॥
नानातन्त्रविहीनानां भिषजामल्पमेधसाम् ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ॥ ३ ॥

अभिधेयसंबन्धप्रयोजनोपदेशमन्तरेण प्रेक्षावतां न प्रवृत्तिः, अतस्तदभिधानार्थं श्लोकद्वयमाह—नानेत्यादि । रोगाणां विशेषेण वातजत्वादिसाध्यासाध्यत्वादिरूपेण निश्चयो ज्ञानं येन स रोगविनिश्चयो ग्रन्थो निबध्यतेऽभिधीयते, 'अस्माभिः' इति शेषः । तस्य विशेषणं—सोपद्रवेत्यादि ।—सह उपद्रवादिभिर्वर्तते यः स तथा; एतेनास्य विशेषणद्वारा उपद्रवारिष्टनिदानलिङ्गस्वरूपमभिधेयमुक्तं भवति, एतद्व्यतिरिक्तस्याभिधेयस्याभावात्; तथोपद्रवादिभिरभिधेयैः सह ग्रन्थस्य वाच्य-

* 'अयं रोगविनिश्चयो ग्रन्थो निबध्यते विधीयते, रोगाणां विनिश्चयो ज्ञानं यस्मात् स तथा निश्चीयते प्रतिपाद्यते व्याधिरनेनेति निदानम् । इदानीमिति—अस्माभिरेव प्राथम्येन नानामुनीनां वचनैरेवंविधो ग्रन्थः क्रियते; अन्यैराचार्यैरेवंविधो ग्रन्थो न कृत इत्यर्थः । ग्रन्थस्यास्योत्कृष्टत्वमाह—नानेत्यादि । उक्तं च,—"रोगज्ञानार्थमेवादौ यत्नः कार्यो भिषग्वरैः । सति तस्मिन् क्रियारम्भः पुण्याय यशसे श्रियै ॥" इति (आ० द०) ॥ २ ॥ ३ ॥

१ 'ग्रन्थाध्येतॄणामपि' इति क. । २ 'सर्वविघ्नोपरमः' इति क. । ३ 'चत्वारो वर्णाश्चातुर्वर्ण्यं' इति क. पुस्तकेऽधिकः पाठः । ४ 'वातादिजत्व°' इति ख. । ५ 'एतद्व्यतिरेकेणास्य ग्रन्थस्य' इति क.; 'एतद्व्यतिरेकेणाभिधेयाभावात्' इति ख. ।

वाचकलक्षणः संबन्धोऽप्यभिहितः । तत्र, उपद्रवो रोगारम्भकदोषप्रकोपजन्योऽन्यविकारः, उक्तं च चरके(?)—"व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः । उपक्रमाविरोधी च स उपद्रव उच्यते"—इति; नियतमरणख्यापकं लिङ्गमरिष्टं; निदानं रोगोत्पादको हेतुः; लिङ्गं रोगख्यापको हेतुः । तेन 'लिङ्ग्यन्ते ज्ञायन्ते व्याधयोऽनेन' इति व्युत्पत्त्या पूर्वरूपरूपोपशयसंप्राप्तयोऽभिधीयन्ते । यद्यपि निदानमपि रोगविशेषं बोधयति, तथाऽप्युत्पत्तिज्ञप्तिहेतुत्वेन कारणद्वैविध्यप्रतिपादनार्थं तस्य पृथगभिधानम् । एषां चोपद्रवादीनां विस्तराभिधानं यथावसरं करिष्यते । ननु, रोगनिदानादितत्त्वमतिसूक्ष्मत्वेन नासर्वज्ञस्य ज्ञानविषयं, तत् कथं तदुपदेशे प्रेक्षावतां प्रवृत्तिरित्यत आह—नानामुनीनां वचनैरिति । एतेन ग्रन्थस्य प्रामाण्यं प्रवृत्त्यङ्गमुक्तं भवति; मुनयो हि तपोयोगर्धिवलात्त्रैकालिकनिखिलज्ञानशालिनः पुरुषातिशया उच्यन्ते । ननु, यद्येवंभूतः कस्यचिद्ग्रन्थोऽन्योऽप्यस्ति, तेनैव व्यवहारसिद्धेः कृतकार्यत्वेनास्य निष्प्रयोजनता स्यादित्यत आह—इदानीमिति ।—इदानीमस्माभिरेव प्रथमं नानामुनीनां वचनैरेवंविधो निबन्धः क्रियते । समासत इति संक्षेपतः । एतेनाल्पबुद्धीनामतिविस्तरत्वेनाप्रवृत्त्यङ्गतादोषः[2] परिहृतो भवति । ननु, कृतेऽपि ग्रन्थेऽनुपादेयपुरुषप्रणीतत्वेन न कश्चिद्भिषक् प्रवर्तिष्यत इति ग्रन्थस्य वैयर्थ्यं स्यादित्यत आह—सद्भिषजां नियोगादिति । नियोगो नियोजनं 'अस्मदुपकाराय ग्रन्थः क्रियताम्' इत्येवं प्रार्थनेत्यर्थः; अथवा नियोग आज्ञा, एतेनात्मनः सविनयत्वमुक्तं भवतीत्यर्थः । ननु, नानामुनिवचनबाहुल्यादल्पमेधसां कथं प्रवृत्तिरित्यत आह—नानातन्त्रेत्यादि । सुखं यथा भवति तथा आतङ्कं रोगं विज्ञातुमयमेव ग्रन्थो भविष्यति, 'कारणं' इति शेषः । एतेन रोगज्ञानं प्रयोजनमित्युक्तं, फलं चास्य चिकित्सितमिति मन्तव्यम् । यदुक्तं चरके,—"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् । ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत्"—इति (च. सू. स्था. अ. २०) । ननु, नानामुनीनां वचनैरेव रोगज्ञानं भविष्यति, किमनेन तदुपजीविना ग्रन्थेनेत्यत आह—अल्पमेधसामिति ।—अल्पबुद्धीनामित्यर्थः; महाबुद्धयो हि अतिविस्तरदुरधिगमनानातन्त्राध्ययनक्षमा भवन्ति न त्वल्पबुद्धय इति । महाधियामप्यालस्यानासादितदुरुपपादाशेषसंहितानामयमेव रोगज्ञानाय भविष्यतीत्याह—नानातन्त्रविहीनानामिति ॥ २ ॥ ३ ॥

*निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥ ४ ॥
(वा. नि. अ. १)

व्याधेर्ज्ञातव्यस्य पञ्च ज्ञानोपाया भवन्तीति तानाह—निदानमित्यादि । एते

---

* "रोगाणां विज्ञानं विशिष्टज्ञानं, पञ्चधा पञ्चप्रकारेण, स्मृतं कथितं, 'मुनीन्द्रैः' इति शेषः । उपशयस्तथेति तथाशब्दस्तुल्यकक्षतां द्योतयति, एवं संप्राप्तिश्चेत्यत्र चकारोऽपि । इति

---

१ अस्याग्रे 'न प्राक्' इत्यधिकं पठ्यते क. पुस्तके । २ 'अप्रवृत्तिदोषः' इति क. । ३ यथा निदानपूर्वरूपरूपाणि रोगाणां विज्ञानाय तथोपशयोऽपीति ।

पञ्च व्यस्ताः समस्ताश्च व्याधिबोधकाः । न च समस्तपक्षे कृतकरणत्वं वाच्यं, प्रमाणसंप्लवस्यापि दृष्टत्वात् । न यो ह्यनुमानेन प्रतीतो वह्निः स एव प्रत्यक्षागमाभ्यां नोपलभ्यते । न वा निदानादीनि प्रेक्षावन्तो ये नैवमालोचयेयुः; एकेनैव प्रतिपादितो व्याधिरिति वयमिहोदास्महे । किंच, एकेन प्रतिपादितेऽपि व्याधावपरेऽवश्यमभिधातव्याः, भिन्नप्रयोजनत्वात् । तथाहि—यदि निदानं नोच्यते तदा तत्परिवर्जनं कथं लभ्येत । उक्तं हि सुश्रुते,—"वातादीनां प्रतीकारः प्रोक्तो विस्तरतः पुनः । संक्षेपतः क्रियायोगो निदानपरिवर्जनम्"—इति (सु. उ. तं. अ. १) । किंच, यथा—मृद्भक्षणात् पाण्डुरोगः, मक्षिकाभक्षणाच्च छर्दिरवसीयते; न तु तथा निदानेन सर्वत्र नियतरोगाध्यवसायः, ज्वरगुल्मादीनामेककारणत्वात् । यदाह चरकः,—"एको हेतुरनेकस्य तथैकस्यैक एव हि । व्याधेरेकस्य वहवो वहूनां बहवस्तथा"—इति (च. नि. स्था. अ. ८) । अपिच कदाचित् प्रत्यासन्नं निदानं वाधित्वा विप्रकृष्टनिदानकृतो दोषसंचयो व्याधिं कुर्यात्, तस्मात् केवलान्निदानान्न व्याधिज्ञानं भवतीति पूर्वरूपादीनामुपादानमिति वाप्यचन्द्रः । असति पूर्वरूपाभिधाने तत्रोक्तः क्रियाविशेषो न संगच्छते । उक्तं हि चरके,—"ज्वरस्य पूर्वरूपे लघ्वशनमपतर्पणं वा"—इति (च. नि. स्था. अ. १) । तथा च सुश्रुते—वातिकज्वरपूर्वरूपे घृतपानमिति । तथाऽसाध्यत्वं च नोपलभ्येत । उक्तं च चरके,—"पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया । यं विशन्ति विशत्येनं मृत्युर्ज्वर-

परिसमाप्तौ । तच्च निदानं सन्निकृष्टविप्रकृष्टभेदेन द्विधा भवति । सन्निकृष्टं यथा—वातादयः कुपिता ज्वरादिरोगमुत्पादयन्ति । विप्रकृष्टं यथा—हेमन्ते निचितः श्लेष्मा वसन्ते च प्रकुप्यति; तथाऽऽहारादिरपि, तत्र कटुकाम्लदध्यादिकं पित्तज्वरस्य । पूर्वरूपं यथा—ज्वरस्यालस्यादयः । रूपं यथा—स्वेदावरोध इत्यादि; "आगमापगमक्षोभमृदुतावेदनोष्मणाम् । वैषम्यं तत्र तत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः"—इत्यादि च । उपशयो यथा—वातः स्नेहनमर्दनादिनोपशान्त उपलभ्यते, स 'उपशय' इत्युच्यते । संप्राप्तिर्यथा—यथा दुष्टेनेत्यादिलक्षणात् । नन्वेकेनैव रोगनिश्चयेऽन्येषामुपादानं व्यर्थं ? उच्यते—भिन्नप्रयोजनत्वान्नान्यतरवैयर्थ्यम् । उपशयेन विना संकीर्णलक्षणेऽनभिव्यक्तलक्षणे वा व्याधौ विशेषावबोधो न स्यात्, तथा च सुश्रुते,—"अभ्यङ्गस्नेहस्वेदाद्यैर्वातरोगो न शाम्यति । विकारस्तत्र विज्ञेयो दुष्टमत्रास्ति शोणितम्"—इति; शोणितसेकस्तत्रोपशम इति । तस्मान्निदानादिपञ्चकविज्ञानेन सर्वे रोगा विशेषेणावबुध्यन्त इति" (आ० द०) ॥ ४ ॥

---

१ प्रमाणसंप्लवस्यापि दृष्टत्वादिति यतः प्रमातुः प्रमातव्येऽर्थे प्रमाणानां प्रत्यक्षानुमानोपमानशब्दानां संप्लवः समूहो दृष्टः, अतः समस्तपक्षे कृतकरणत्वं न च वाच्यम् । २ अनुमानेन प्रतीतो यो वह्निः स किं प्रत्यक्षागमाभ्यां नोपलभ्यते ? नहि, अपि तूपलभ्यत एव । ३ "स च निदानादीनि प्रेक्षावन्ति, येनैवमालोचयेयुरेकेनैव प्रतिपादितमिति, वयमिहोदास्महे" इति इति क. पुस्तके पाठः । ४ 'चानेको बहूनां बहवोऽपि च' इति चरके पाठः । ५ 'वाष्पचन्द्रः' इति क. । ६ 'तत्र पूर्वरूपदर्शने ज्वरादौ वा हितं लघ्वशनमपतर्पणं वा' इति चरके पाठः । ७ "ज्वरस्य पूर्वरूपेषु वर्तमानेषु बुद्धिमान् । पाययेत घृतं स्वच्छं ततः स लभते सुखम्"—इति (सु. उ. तं. अ. ३९) सुश्रुते पाठः ।

पुरःसरः ॥ अन्यस्यापि च रोगस्य पूर्वरूपाणि यं नरम्। विशन्त्यनेन कल्पेन तस्यापि मरणं ध्रुवम्"–(च. इं. स्था. अ. ५) इति। तथा रक्तपित्तप्रमेहयोर्विशेषज्ञानं च न जायते। उक्तं च **चरके**,–"हारिद्रवर्णं रुधिरं च मूत्रं विना प्रमेहस्य हि पूर्वरूपैः। यो मूत्रयेत्तं न वदेत् प्रमेहं रक्तस्य पित्तस्य हि स प्रकोपः"–इति (च. चि. स्था. अ. ६)। असति रूपाभिधाने व्याधेरशेषविशेषेण स्वरूपमेव न व्यवच्छिद्यते; किंच साध्यासाध्यत्वं च न ज्ञायते। तथाहि सुखसाध्यलक्षणे **चरकः**,–"हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य वै। न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत्"–इति (च. सू. स्था. अ. १०); कष्टसाध्यलक्षणे **चरकः**,–"निमित्तपूर्वरूपाणां रूपाणां मध्यमे बले"–(च. सू. स्था. अ. १०) इति; तथा;–"सर्वसंपूर्णलक्षणः। सन्निपातज्वरोऽसाध्यः"–(च. चि. स्था. अ. ३) इति। असत्युपशयाभिधाने संकीर्णलक्षणेऽनभिव्यक्तलक्षणे वा व्याधौ विशेषबोधो न स्यात्। तदुक्तं **चरके**,–"गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां"–(परीक्षेत) (च. वि. स्था. अ. ४) इति। असत्यां च संप्राप्तौ पूर्वरूपादिप्रतीतस्यापि व्याधेश्चिकित्सोपयोगिनोंऽशांशविकल्पनाबलकालादेरप्रतीतेश्चिकित्साविशेषो न स्यात्। तस्मात् पञ्चापि निदानादयो वक्तव्याः। पञ्चविधमप्येतद्व्याध्युत्पत्तिज्ञप्तिहेतुभूतं निदानशब्देनोच्यते। यदाह **सुश्रुतः**,–"हेतुलक्षणानिर्देशान्निदानानि"–(सु. सू. स्था. अ. ३). इति। तत्रैवं निदानशब्दनिरुक्तिः,–'निर्दिश्यते व्याधिरनेनेति निदानं'; "दिशेः पृषोदरादित्वाद्रूपसिद्धिः"–इति **गदाधरः**; "निश्चित्य दीयते प्रतिपाद्यते व्याधिरनेनेति निदानम्"–इति **जेज्जटः**। **भट्टारहरिचन्द्रे**णापि तन्त्रयुक्त्यादिविवरणप्रस्तावे एवैव निरुक्तिरुक्ता। निशब्दो निश्चये। तथा च वररुचेरुपसर्गसूत्रं,–"नि निश्चयनिषेधयोः"–इति। लोकेऽपि 'अद्य ते निदानं करिष्यामि' इत्युक्ते निश्चयं करिष्यामीत्यर्थो गम्यते। निदानमिति करणे ल्युट्; तेन 'व्याधिनिश्चयकरणं निदानम्' इति निदानादिपञ्चकसामान्यलक्षणम्। निदानशब्दोऽयं निदानविशेषे जातौ च वर्तते; यथा–तृणशब्दः तृणविशेषे तृणजातौ च वर्तते। यत्तु, **भट्टारहरिचन्द्रेण** निदानस्थाने–"या गौः सुदोह्या भवति न तां निर्दर्दीत"–इति व्यासप्रयोगमुपन्यस्य निबन्धार्थो निदानशब्दो व्याख्यातः 'निदीयते निबध्यते हेत्वादिसंबद्धो व्याधिरनेन' इति कृत्वा; तत्तु निदानस्थानरूपग्रन्थाभिप्रायेण, नहि हेत्वादयो हेत्वादिसंबद्धं व्याधिं प्रतिपादयन्ति ॥ ४ ॥

***निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।**
निदानमाहुः पर्यायैः,

(वा. नि. अ. १)

एषां निदानादीनां मध्ये समानासमानजातीयव्यावर्तकं कारणरूपनिदानस्य लक्षणमाह–निमित्तेत्यादिना पर्यायैरित्यन्तेन। एतैः शब्दैर्योऽर्थोऽभिधीयते तन्नि-

* 'निदानस्य पर्यायशब्दानाह–निमित्तेत्यादि। पर्यायैरिति निमित्तादिभिः षड्भिरेव पर्यायैर्निदानमाहुः, 'मुनयः' इति शेषः; तत्र तत्र शास्त्रप्रदेशे निदानमेतैः पर्यायैर्बोद्धव्यमिति।' (आ० द०)।

१ 'प्रदीयते' इति क.। २ 'निदीयेत' इति क.। ३ स्वात्मनि क्रियाविरोधादित्यर्थः।

दानं; यथा—"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" (न्या. द. प्र. आ. सू. १५) इति। ननु, किं मिलितैरेकैकशो वा? नाद्यः, एकार्थाभिधायिनां शब्दानां मिलितानामप्रयोगात्; द्वितीयश्चेत्तदा सव्यभिचारः, निमित्तस्य शकुनादौ, हेतोः प्रयोजके कर्तरि, आयतनस्य स्थाने, प्रत्ययस्य लडादौ, उत्थानस्य उद्गमनोत्सर्गयोश्च[2] दर्शनात्। नैवं, शकुनादीनां निमित्तादिभिः सर्वैरनभिधानात्। अत एवाह—पर्यायैरिति। नहि तेषां ते पर्यायाः, यतः क्रमेणैकार्थवाचकाः शब्दाः परस्परं पर्याया उच्यन्ते। तस्मान्निमित्तादिशब्दैः पर्यायैर[3]भिधीयमानत्वं निदानत्वम्। एतच्च पर्यायकथनं शास्त्रे व्यवहारार्थम्। इदं तु संक्षेपतो लक्षणं—'सेतिकर्तव्यताको रोगोत्पादकहेतुर्निदानम्' इति। यन्मते दोषेतिकर्तव्यतारूपा संप्राप्तिरिष्यते तन्मते संप्राप्तिव्युदासार्थं 'सेतिकर्तव्यताक' इति पदं, तस्या दोषेतिकर्तव्यतारूपायाँ[4] इतिकर्तव्यतान्तराभावात्। यन्मते व्याधिजन्म संप्राप्तिः, तन्मते 'व्याध्युत्पत्तिहेतुर्निदानम्' इति लक्षणम्। उभयत्रापि 'उत्पत्ति'पदं ज्ञप्तिहेतुपूर्वरूपादिव्यवच्छेदार्थम्। स च हेतुरनेकधा; तत्र प्रथमं चतुर्विधः, यदाह उपकल्पनीयाध्याये **हरिचन्द्रः**,—"सन्निकृष्ट-विप्रकृष्ट-व्यभिचारि-प्राधानिकभेदाच्चतुर्धा"—इति। सन्निकृष्टो यथा—नक्तंदिनर्तुभुक्तांशा दोषप्रकोपस्य हेतवः, न ते चयादिकमपेक्षन्ते। विप्रकृष्टो यथा—"हेमन्ते निचितः श्लेष्मा वसन्ते कफरोगकृत्" (सु. उ. तं. अ. ६४); किंवा[5] सन्निकृष्टो ज्वरस्य रूक्षादिसेवा, विप्रकृष्टो रुद्रकोपः। व्यभिचारी यथा—यो दुर्बलत्वाद्व्याधिकरणासमर्थः। यदाह **चरकः**—"(निदानादिविशेषा[6]) अबलीयांसोऽथवाऽनुबध्नन्ति, न तदा विकाराभिनिर्वृत्तिः"—इति (च. नि. स्था. अ. ४)। प्राधानिको यथा—विषादिः; त्रिविधो वा, असात्म्येन्द्रियार्थसंयोग-प्रज्ञापराध-परिणामभेदात्। तत्र, असात्म्येन्द्रियार्थसंयोगोऽयोगातियोगमिथ्यायोगयुक्ता रूपरसादयः, प्रज्ञापराधो मिथ्याज्ञानादिः, परिणामोऽयोगादियुक्ता ऋतुस्वभावजाः शीतादयः। "अधर्मस्य च रोगहेतोरत्रैवान्तर्भावः"—इति **भट्टारहरिचन्द्रः**, तस्यापि कालान्तरपरिणतस्य दुःखकर्तृत्वात्। चरकस्तु प्रज्ञापराधे तस्यान्तर्भावमाह; मिथ्याज्ञानकृतब्रह्मवधादिजन्मनोऽधर्मस्य प्रज्ञापराध एव मूलं; बलाबलं[7] तत्र न निरूप्यते, रोगकारणत्वेनाधर्मस्य सर्वथा सिद्धत्वादिति। दोषव्याध्युभयहेतुभेदाच्च स त्रिविधः। दोषहेतवो यथा—चयप्रकोपप्रशमनिमित्ता यथर्तूत्पन्ना मधुरादयः। व्याधिहेतवो यथा—मृद्भक्षणं पाण्डुरोगस्य कारणम्। यद्यपि मृदपि दोषं प्रकोपयत्येव; यदुक्तं **चरके**,—"कषाया मारुतं, पित्तमूषरा, मधुरा कफम्"—इति (च. चि. स्था. अ. १६); तथाऽपि तज्जैर्दोषैः पाण्डुरोग एवारभ्यते न त्वन्यो विकार इति व्याधिहेतुता भवति। उभयहेतुर्यथा—वातरक्ते,—"हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च" (सु. नि. स्था. अ. १)—इत्यादि। तत्र यद्यपि दोष-

---

१ 'धूमवत्त्वादित्यादिवचने' इति क.। २ 'उद्गमनोत्स्रवयोः' इति क.। ३ 'पर्यायेण' इति क.। ४ 'तस्यां दोषेतिकर्तव्यतारूपायां' इति ख.। इतिकर्तव्यतान्तराभावादिति इतिकर्तव्यता व्यापारः, इतिकर्तव्यतान्तरस्य व्यापारान्तरस्याभावात्, व्यापारे व्यापारान्तरं न तिष्ठतीति भावः। ५ 'किंच' इति क.। ६ 'दोषा अबलीयांसो यदा वाऽनुबध्यन्ते न तदाऽवश्यं विकाराभिनिर्वृत्तिर्भवतीति' इति क.। ७ 'बलाबलत्वं तत्र' इति क. 'बलाबलत्वमत्र च' इति ख.।

प्रकोपपूर्वकमेव व्याधिजननं, तथाऽपि दोषवृद्ध्यावपि तस्य कारणत्वमिति बोधयति। तेन तत्र न व्याधिहरमात्रं भेषजं प्रयोज्यं, किंतूभयप्रत्यनीकम्। न च वाच्यं कारणभूतदोषनिवृत्त्यैव कार्यभूतस्य व्याधेर्निवृत्तिरिति; यतः प्रतिनियतशक्तिकानि भेषजद्रव्याणि भवन्ति; कथमन्यथा श्लैष्मिकतिमिरे श्लेष्महरमेव वमनं न प्रयुज्यते। यदुक्तं सुश्रुते,–"न वामयेत्तैमिरिकं न गुल्मिनं न चापि पाण्डूदररोगपीडितम्"–(सु. चि. स्था. अ. ३३) इति। स एवोत्पादकव्यञ्जकभेदाच्च द्विधा। तत्रोत्पादको यथा—हेमन्तजो मधुररसः कफस्य। व्यञ्जको यथा–तस्यैव कफस्य व्यञ्जको वसन्ते सूर्यसन्तापः–इति भट्टारहरिश्चन्द्रः। तत्र व्यञ्जकः प्रेरक इत्यर्थः। बाह्याभ्यन्तरभेदाच्च द्विधा। तत्र बाह्या आहाराचारकालादयः। एतदभिप्रायेण तीसटाचार्यः,–"व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागराद्वेगानां च विधारणादतिशुचः शैत्यादतित्रासतः। रूक्षक्षोभकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेद्वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च॥ कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसंपर्कतिलातसीदधिसुराशुक्तारनालादिभिः। भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे सति प्राणिनां मध्याह्ने च तथाऽर्धरात्रिसमये पित्तं प्रकोपं व्रजेत्॥ गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिष्प्रपूरैः। तुहिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" (चि. क. श्लो. २९–३१)–इति। आभ्यन्तरा यथा–दोषा दूष्याश्च। तत्र, दोषोऽपि प्रकुपितः प्राकृतादिभेदादनेकधा। प्राकृतो यथा–वसन्ते श्लेष्मा, शरदि पित्तं, प्रावृषि वायुः। वैकृतस्तु यथा–वसन्ते पित्तं वायुर्वा, वर्षासु कफः पित्तं वा, शरदि कफो वायुर्वा। अस्य प्रयोजनं सुखसाध्यत्वादि। यदुक्तं चरके,–"प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भवः" (च. चि. स्था. अ. ३)–इत्यादि। अनुबन्ध्यानुबन्धभेदाच्च द्विधा। अनुबन्ध्यः प्रधानम्, अनुबन्धोऽप्रधानम्। यदाह चरकः,–"स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानोपशमो भवत्यनुबन्ध्यः, तद्विपरीतलक्षणस्त्वनुबन्धः"–(च. चि. स्था. अ. ६) इति। अस्य प्रयोजनं संसर्गजे व्याधावनुबन्ध्यो विशेषेण चिकित्स्योऽनुबन्धाविरोधेन। तदुक्तं चरके,–"तत्रोपद्रवस्य प्रायः प्रधानप्रशमात् प्रशमः"–(च. चि. स्था. अ. २१) इति। उपद्रवोऽनुबन्धः। प्रकृतिविकृतितो यथा–वातप्रकृतेर्वातरोगः कष्टसाध्यो भवति, कफपित्तप्रकृतेस्तु सुखसाध्यः। यदाह सुखसाध्यलक्षणे चरकः,–"न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत्–" (च. सू. स्था. अ. १०) इति। आशयापकर्षतो यथा–यदा स्वमानस्थितमेव दोषं स्वाशयादाकृष्य वायुः स्थानान्तरं गमयति तदा स्वमानस्थोऽपि स विकारं जनयति। यदाह चरकः–"प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये। स्थानादादाय गात्रेषु यत्र यत्र विसर्पति॥ तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः। गात्रदेशे भवत्यस्य श्रमो दौर्बल्यमेव च"–इति (च. सू. स्था. अ. १७)। अस्य प्रयोजनं वातस्यैव तत्र विगुणस्य स्वस्थानानयनं कार्यं, नतु पित्तस्य ह्रासनं; "ये त्वेनां पित्तस्य स्थाना-

---

१ 'कार्यस्य' इति क.। २ 'कफचयस्य' इति क.। ३ 'अभिव्यक्तिकारकः' इति क. ख.। ४ 'वर्षासु' इति क.। ५ 'तोदश्च' इति क.। ६ 'नतु पित्तस्य ह्रासनेन स्वाशयापकर्षणम्' इति क. ख.।

वृद्धिं न विदन्ति, ते दाहोपलम्भेन पित्तवृद्धिं मन्यमानाः पित्तं ह्रासयन्तः पित्तक्षयलक्षणं रोगान्तरमेवोत्पादयन्त आतुरमतिपातयन्ति" इति **भट्टारहरिचन्द्रः** । अन्ये त्वाहुः—भ्राजकादिभेदेन सर्वदेहस्थिते पित्ते यदा स्वाशयाकृष्टं पित्तमवयवान्तरमनिलेन प्रापितं तदा तदवयवान्तरस्थं पित्तमागन्तुपित्तसंबन्धेनाधिकमेव जातं, ततो वृद्धिलक्षणैवेयं दुष्टिर्न दुष्ट्यन्तरम्, अन्यथा दाह एव न स्यात्; नहि स्वमानस्थो दोषो विकारं जनयतीति । **भट्टारहरिचन्द्रस्य** त्वयमभिप्रायः—यद्यप्येवं तथाऽपि चिकित्साभेदार्थं वृद्धिक्षयव्यतिरिक्तस्थानान्तरगतिरूपो दुष्टिविशेषोऽवश्यमेवेष्टव्यः, अन्यथा वृद्धं पित्तमिति मत्वा विरेचनं पित्तह्रासनं वा कार्यं, नच तत्तत्र योग्यं, किं तु स्वस्थानानयनम् । यच्चोक्तं **चरकेण**,—"क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः"—(च., सू. स्था. अ. १७) इत्यादि, तत् प्रायिकमिति । गतितो यथा—गतिर्दोषाणां क्षीणवृद्धत्वादयः । यदुक्तं **चरके**,—"क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः । ऊर्ध्वं चावश्च तिर्यक्च विज्ञेया त्रिविधा परा ॥ त्रिविधा चापरा कोष्ठशाखामर्मास्थिसन्धिषु" (च. सू. स्था. अ. १७)—इति । अत्र स्थानमिति समत्वम् । तत्र क्षयादिलक्षणं यथा,—"दोषाः प्रवृद्धाः स्वं लिङ्गं दर्शयन्ति यथाबलम् । क्षीणा जहति स्वं लिङ्गं, समाः स्वं कर्म कुर्वते" (च. सू. स्था. अ. १७)—इति । स्वं लिङ्गमिति कुपितस्य वायो रौक्ष्यादयो धर्माः, कर्माणि च संसशूलादीनि । यदाह चरकपाठसंवादी **सुदान्तसेनः**[1]—"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः कण्ठध्वंसावसादौ श्रमकविलपनं[2] संसशूलप्रभेदाः । पारुष्यं कर्णनादो विषमपरिणतिभ्रंशदृष्टिप्रमोहा,[3] विस्पन्दोद्वेष्टनानि[4] स्खलनमशयनं ताडनं पीडनं च ॥ नामोन्नामौ विषादो भ्रमपरिपतनं[5] जृम्भणं रोमहर्षौ, विक्षेपाक्षेपशोषग्रहणशुषिरताच्छेदनं वेष्टनं च । वर्णः श्यावोऽरुणो वा तृडपि च महती स्वापविश्लेषसङ्गा, विद्यात् कर्माण्यमूनि प्रकुपितमरुतः स्यात् कषायो रसश्च ॥ विस्फोटाम्लकधूमकाः प्रलपनं स्वेदस्रुतिर्मूर्च्छनं, दौर्गन्ध्यं दरणं मदो विसरणं[6] पाकोऽरतिस्तृड्भ्रमौ । ऊष्माऽतृप्तितमःप्रवेशदहनं कट्वम्लतिक्ता रसा, वर्णः पाण्डुविवर्जितः कथितता कर्माणि पित्तस्य वै ॥ तृप्तिस्तन्द्रा गुरुता स्तैमित्यं कठिनता मलाधिक्यम् । स्नेहापक्त्युपलेपाः शैत्यं कण्डूः प्रसेकश्च ॥ चिरकर्तृत्वं शोथो निद्राधिक्यं रसौ पटुस्वादू । वर्णः श्वेतोऽलसता कर्माणि कफस्य जानीयात् ॥ द्विदोषलिङ्गः संसर्गः सन्निपातस्त्रिलिङ्गकः"—इति । लिङ्गज्ञानप्रयोजनं च चिकित्साभेदार्थम् । यदाह **सुश्रुतः**,—"क्षीणा वर्धयितव्याः, वृद्धा ह्रासयितव्याः, समाः पालयितव्या" (सु. चि. स्था. अ. ३३)—इति । ऊर्ध्वादिगतिर्यथा—ऊर्ध्वगं रक्तपित्तमित्यादि । अस्य प्रयोजनं रक्तपित्तस्योर्ध्वगस्य विरेचनम्, अधोगस्य वमनम् । यथोक्तं **चरके**,—"प्रतिमार्गं[7] च हरणं रक्तपित्ते विधीयते"—(च. नि. स्था. अ. २) इति । यस्तु गतिभेदानभिज्ञः सः "विरेकः पित्तहराणां" (च. सू. स्था. अ. २५) इति वचनादधोगे रक्तपित्ते विरेकं प्रयुञ्जान आतुरस्यानर्थमेवापादयति; ज्वरा-

---

१ 'सुदत्तसेनः' इति क. । २ 'तकमविलपनं' इति क. । ३ 'विषयपरिणतिभ्रंश' इति क. । ४ 'विस्पन्दाच्छादनानि' इति क. । ५ 'भ्रमपरिसदनं' इति क. । ६ 'विशरणं' इति क. ख. । ७ 'प्रतिलोमं' इति क. ।

दिषु तिर्यग्दोषगतिषु यथोक्तं चिकित्सितमिति। वृद्धा दोषाः कदाचित् कोष्ठं कदाचिच्छाखाः कदाचिन्मर्मास्थिसन्धीनाश्रित्य रुजन्ति; मर्मास्थिसन्धिषु गतिः कृच्छ्रसाध्यत्वापादकत्वादेकत्वेन निर्दिष्टा। कोष्ठ आमाशयादिः, शाखा रक्तादयो धातवस्त्वक्चेति, चरककृतैवैता संज्ञाः। कोष्ठाद्यभिधानप्रयोजनं चिकित्साभेदार्थम्। यथोक्तं **चरके**,— "आमाशयगते वाते कफे पक्वाशयाश्रिते। रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च" (च. सू. स्था. अ. १४); तथा,—"सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः"— (सु. उ. तं. अ. ३९) इत्यादिः; तथा,—"नाभिकर्मोपदेष्टव्यं स्नायुमर्मव्रणेषु च"— (च. चि. अ. २५) इति। एते च दोषाः सामत्वनिरामत्वाभ्यामपि ज्ञातव्याः। यदुक्तं,— "ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्। दुष्टमामाशयगतं रसमामं प्रचक्षते॥ आमेन तेन संयुक्ता दोषा दूष्याश्च दूषिताः। सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः॥ स्रोतोरोधबलभ्रंशगौरवानिलमूढताः। आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः॥ लिङ्गं मलानां सामानां निरामाणां विपर्ययः।" (वा. सू. स्था. अ. १३)। वायुः सामो विबन्धाग्निसादस्तन्द्रान्त्रकूजनैः॥ वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत्। विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम्। स्नेहाद्यैर्वृद्धिमाप्नोति सूर्यमेघोदये निशि। निरामो विशदो रूक्षो निर्विबन्धोऽल्पवेदनः॥ विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः। दुर्गन्धं हरितं श्यावं पित्तमम्लं स्थिरं गुरु॥ अम्लिकाकण्ठहृद्दाहकरं सामं विनिर्दिशेत्। आताम्रं पीतमत्युष्णं रसे कटुकमस्थिरम्॥ पक्वं विगन्धं विज्ञेयं रुचिपक्तृबलप्रदम्। आविलस्तन्तुलः स्त्यानः कण्ठदेशेऽवतिष्ठते। सामो बलासो दुर्गन्धः क्षुदुद्गारविघातकृत्॥ फेनवान् पिण्डितः पाण्डुर्निःसारोऽगन्ध एव च। पक्वः स एव विज्ञेयश्छेदवान् वक्त्रशुद्धिकृत्"—इति। अस्य प्रयोजनं सामे पाचनं, निरामे शमनमिति। एते च दोषाः परस्परसंबद्धास्तरतमादिभेदेन द्विषष्टिधा भवन्ति। तदुदाहरणानि विस्तरत्वापत्तेरत्र न लिख्यन्ते, सौश्रुतदोषभेदविकल्पाध्याये (उ. तं. अ. ६६) द्रष्टव्यानि। उक्तहेतुदोषभेदयोः संग्रहश्लोकौ—"चत्वारो व्यभिचारिदूरनिकटप्राधानिकत्वात्, पुनस्तेऽसात्म्येन्द्रियकार्थयुक्परिणतिप्रज्ञापराधात्त्रिधा। रुग्दोषोभयकारणादपि तथा, द्वौ व्यञ्जकोत्पादकौ, बाह्याभ्यन्तरभेदतोऽपि कथिता हेतोः प्रभेदा अमी॥ दोषस्य च प्राकृतवैकृताभ्यां, भेदोऽनुबन्ध्यादपि चानुबन्धात्। तथा प्रकृत्यप्रकृतिलयोगात्तथाऽऽशयाकर्षवशाद्गतेश्च"—इति निदानम्॥—

***प्राग्रूपं येन लक्ष्यते॥ ५॥**

उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्॥ ६॥

(वा. नि. अ. १.)

---

* प्राग्रूपलक्षणमाह—प्राग्रूपमित्यादि। येन जृम्भालस्यारुच्यादिना उत्पित्सुरुद्बुभूषुरामयो

१ "यथायथं यथास्वं व्याधेर्ज्वराद्यन्यतमस्य आत्मीयमात्मीयम्; अतश्च प्राग्रूपं त्रिधा दृश्यते किंचिच्छारीरं, किंचिन्मानसं, किंचिच्छारीरमानसं चेति। तत्र शारीरं यथा—ज्वरस्यालस्यास्यवैरस्यगात्रगौरवजृम्भासास्राकुलाक्षतेत्येवंप्रायं; मानसं च—"अरतिर्हितोपदेशेष्वक्षान्तिः" इत्येवंप्रायं; किंचिच्छारीरमानसं यथा—"प्रीतिरम्ले पटूषणे, द्वेषः स्वादुषु भक्ष्येषु" इत्येवंप्रायं, शारीरमानसदोषजनितत्वात्" इति वाग्भटटीकायामरुणदत्तः (वा. नि. स्था. अ. १)॥

निदानानन्तरीयकत्वात् पूर्वरूपादीनां तदनन्तरं प्राग्रूपमाह—प्राग्रूपमित्यादि । द्विविधं हि पूर्वरूपं भवति, सामान्यं विशिष्टं च । तत्र सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते, न तु वातादिजनितत्वादिविशेषः । यथा,—'श्रमोऽरतिर्विवर्णत्वं'—(सु. उ. तं. अ. ३९); इत्यादि, तथा गुरुवाक्यवालप्रद्वेषादि; सामान्याभिप्रायेणैव तन्त्रान्तरं,—"व्याधेर्जातिर्बुभूषा च पूर्वरूपेण लक्ष्यते । भावः किमात्मकत्वं च लक्ष्यते लक्षणेन हि"—इति । तथाऽऽह **पराशरः**,—"पूर्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेषः"—इति । विशिष्टं यथा—उरःक्षतादौ लिङ्गान्येव वातादिजान्यव्यक्तानि । यदुक्तं तत्रैव—"अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतम्"—(च.चि.अ.११) इति । तथा **सुश्रुतः**,—"सामान्यतो, विशेषात्तु जृम्भाऽत्यर्थं समीरणात् । पित्तान्नयनयोर्दाहः कफादन्नारुचिस्तथा"—इति (सु. उ. तं. अ. ३९)। **हारिते**ऽप्युक्तं,—"इति पूर्वरूपमष्टानां ज्वराणां सामान्यतः, विशेषतस्तु जृम्भाङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजम्"—इत्यादि । ननु, चात्यर्थं व्यक्तत्वं ततश्च जृम्भादेरपि रूपत्वं प्रसज्येत; यद्वक्ष्यति,—"तदेव व्यक्ततां यातं रूपमित्यभिधीयते"—(वा.नि.अ.१) इति । उच्यते, यथा श्रमादय इतररोगव्यतिरिक्तं भाविज्वरमात्रं बोधयन्ति न तु वातजत्वादिविशेषमित्यतस्तेषामव्यक्तत्वं, तथा पित्तादिज्वरव्यतिरिक्तं भविष्यद्वातज्वरमात्रं बोधयन्ति जृम्भादयः, न तु वातस्य रूक्षशीतधातुक्षयावरणादिजन्यत्वरूपविशेषं बोधयन्ति; इत्यतोऽव्यक्तवातज्वरबोधकत्वादव्यक्तत्वमेव जृम्भादीनामिति **जेज्जट-वाप्यचन्द्र-माधवकर-कार्तिककुण्डादयो** व्याचक्षते । अन्ये त्वाहुः—प्रभूताव्यक्तपूर्वरूपसहचरितस्य व्यक्तस्यापि जृम्भादेः पूर्वरूपव्यपदेशः; यथा—माषराशिः; छत्रिणो गच्छ-

---

ज्वरादिर्लक्ष्यते ज्ञायते तत् प्राग्रूपं भाविव्याधिबोधकलिङ्गमित्यर्थः । किंभूत आमयः? दोषविशेषेण वातादिना, अनधिष्ठितः अनासादितः । तर्हि वातादिदोषेणानधिष्ठितस्य व्याधेरुत्पत्तिरेव न घटते, कारणाभावात्; न हि वातादीन् विहाय व्याधेः प्रायेणान्यतः संभवः संभाव्यते, तथाहि—"सर्वेषामेव रोगाणां निदानं कुपिता मलाः"—इति; तस्माद्दोषविशेषेणानधिष्ठितत्वमुत्पित्सोरामयस्य यदुच्यते तदव्यक्तरूपदोषापेक्षयाऽवगन्तव्यमिति । तत् प्राग्रूपम् । उत्पित्सूनां ज्वरादीनामल्पत्वादनासादितबलवत्त्वादव्यक्तलिङ्गमस्पष्टलक्षणम् । यथायथमिति यथा यस्य व्याधेः ज्वराद्यन्यतमस्यात्मीयमात्मीयमवगन्तव्यम् । तच्च प्राग्रूपं द्विविधं—सामान्यं विशिष्टं च । येन दोषदूष्यधातुसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते, न तु वातादिजनितत्वादिविशेषः, तत् सामान्यं, यथा ज्वरस्य 'श्रमोऽरतिर्विवर्णत्वं' इत्यादि; येन भाविव्याध्यारम्भकदोषचिह्नप्रदेशमात्रं प्रतीयते तद्विशिष्टं, यथा—"जृम्भाऽत्यर्थं समीरणात् । पित्तान्नयनयोर्दाहः, कफान्नान्नाभिनन्दनम्"—इति । अत्र तु विशिष्टे प्राग्रूपे जृम्भादिरूपं दृष्ट्वा रूपत्वमेव न वक्तव्यं, व्याध्यारम्भकदोषमात्रसूक्ष्मचिह्नरूपत्वात्; तथाहि तृणादिचये पतितेऽग्निकणे सूक्ष्मत्वाद् धूममात्रव्यक्तिं ज्ञात्वा करवस्त्रादिताडनप्रतीकारैस्तदुपशमः कर्तुं शक्यते, न तु प्रज्वलिते वह्नौ; तथा—भविष्यद्रोगारम्भकदोषलक्षणैकमात्रं व्यक्तं विशिष्टं प्राग्रूपं ज्ञात्वा भाविव्याधेरुपशमः कर्तुं पार्यत इति । अतस्तु पूर्वरूपरूपयोर्भेद एव । तद्द्वयमपि क्वचिच्छारीरं दृश्यते, क्वचिन्मानसं च । तत्र शारीरं यथा—ज्वरस्य—आलस्यास्यवैरस्यगात्रगौरवसास्राकुलाक्षतेत्यादिकम् । मानसं यथा—अरतिर्हितोपदेशेष्वक्षान्तिरित्यादिकम्" (आ० द०) ॥ ५ ॥ ६ ॥

न्त्येवमादि । न च व्यक्तत्वेन रूपादभेदः, नियमेन पूर्वरूपरूपयोर्भाविवर्तमानव्याधिबोधकत्वादिति । तत्र विशिष्टं प्राग्रूपं रूपावस्थायामनुवर्तत एव, तस्यैवाभिव्यक्तस्य रूपत्वात्; न तु दोषदूष्यसंमूर्च्छनावस्थाजनितं रोमहर्षगुरुवाक्यबालप्रद्वेषादिकं नियमेनानुवर्तते, यद्यनुवर्तेत तदा सर्वज्वराणामसाध्यत्वं प्रसज्येत । एतदभिप्रायेण, "पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया । यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसरः" (च. इ. स्था. अ. ५)–इति चरकवचनमित्याहुः । तदेवं द्विविधे पूर्वरूपे व्यवस्थिते सामान्यपूर्वरूपमाह–प्राग्रूपमित्यादि । येन श्रमादिना, उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुः, आमयो रोगः, दोषविशेषेण वातादिजन्यासाधारणवेपथ्वादिना, अनधिष्ठितोऽसंबद्धो, लक्ष्यते ज्ञायते, तत् प्राग्रूपमिति । विशिष्टप्राग्रूपमाह–लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथमिति । प्राग्रूपमित्यनेन पूर्वोक्तेन संबन्धः । लिङ्गं लक्षणम्, अव्यक्तं नात्यभिव्यक्तम्, अत्र हेतुरल्पत्वादणुत्वात्, नखावरणादियोगादव्यक्तमित्यर्थः; यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्वरूपमित्यर्थः । अन्ये तु पूर्वरूपलक्षणमाहुः–"स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते"–इति । तन्नातियुक्तं, राजयक्ष्मणः पूर्वरूपस्य तृणकेशनिपातादेरदृष्टजन्यस्याव्यापकत्वात् । यदाह चरकः,–"यक्ष्मिणां घूणकेशानां तृणानां पतनानि च । प्रायोऽन्नपाने, केशानां नखानां चातिवर्धनम्"–(च. चि. स्था. अ. ८) इति । न च तदपि दोषजं, दोषाणां तृणादिभिरसंबन्धात्, असंबद्धस्य च भावस्य कारणत्वेनादृष्टत्वात्, परम्परया तु संबन्धकल्पनयाऽतिप्रसङ्गात्, सर्वं सर्वस्य कारणं स्यात् । एतद्दोषपरिजिहीर्षयैव परमकुशलेन वाग्भटेनादृष्टदोषजसकलपूर्वरूपसंग्राहकं येनेतिपदं निबद्धमिति मत्वा तदीयपूर्वरूपलक्षणमेव माधवकरो लिखितवान् । संक्षेपतस्तु लक्षणं "भाविव्याधिबोधकमेव लिङ्गं पूर्वरूपम्" इति । एवकारेण निदानोपशययोः संप्राप्तेश्च दोषेतिकर्तव्यतारूपाया व्यवच्छेदः, तेषां तज्जातीयानामुत्पन्नानुत्पन्नव्याधिबोधकत्वात् । तथा हि–निदानं मृद्भक्षणरूपं भाविपाण्डुरोगमनुपशयरूपं च वर्तमानविशिष्टव्याधिं बोधयति; उपशयोऽपि पूर्वरूपावस्थाप्रयुक्तो भाविविशिष्टव्याधिं रूपावस्थाप्रयुक्तश्च वर्तमानविशिष्टव्याधिं ज्ञापयति, संप्राप्तिश्च पूर्वरूपस्य मध्याह्नाद्यनुत्पत्तिप्रकोपाभ्यां भविष्यद्विशिष्टव्याधिं, रूपैस्च च मध्याह्नप्रकोपादिना वर्तमानविशिष्टव्याधिं ज्ञापयति; इत्येषामुत्पन्नानुत्पन्नव्याधिबोधकत्वम् । ननु, यदा पूर्वरूपविशेषं स्मृत्वोत्पन्नव्याधेर्विशेषावधारणं तदा पूर्वरूपमपि वर्तमानव्याधिबोधकं, यथोक्तं रक्तपित्तप्रमेहरूपसंदेहे चरकेण—"हारिद्रवर्णं रुधिरं च मूत्रं विना प्रमेहस्य हि पूर्वरूपैः" (च. नि. स्था. अ. ६)–इत्यादि । अत्रोच्यते–किं व्याधिजन्मनः पूर्वं पूर्वरूपं गृहीतं न वा ? आद्ये भाविव्याधिबोधकत्वमेव; द्वितीये स्मरणोत्पत्तिरेव न स्यात्, अनुभवाभावात् । अथोच्यते–पूर्वरूपं दन्तादीनां मलाढ्यत्वादिरूपं स्वरूपेणानुभूतमेव, किंतु प्रमेहपूर्वरूपतया न प्रतिभातम्; उत्पन्ने तु व्याधौ तत् स्मृतं प्रमेह-

---

१ 'गमयति' इति क. । २ 'रूपं' इति क. 'रूपे' इति ख. । ३ 'पूर्वरूपं' इति क. । ४ 'प्रमेहलिङ्गतया' इति क. ख. ।

विशेषमवधारयति । एवं पूर्वरूपस्मरणं तर्हि कारणं न तु पूर्वरूपं, रूपावस्थायां तस्य व्यपगतत्वात् । स्मरणं न प्रमाणमिति चेत्, सत्यं; किंतु पूर्वानुभवजनितसंस्कारोपस्थितस्मरणसहकृतं पूर्वरूपं व्याधिविशेषबोधकं, न तु केवलं स्मरणं; यथा–संस्कारोपस्थापितस्मरणसहकृतं चक्षुः प्रत्यभिज्ञायां प्रागवस्थाविशिष्टघटावबोधकं–सोऽयं घट इति । एवं स्मरणवदाप्तोपदेशोऽपि वाच्यं, तस्य च लिङ्गपदेन व्युदासः; भाविपदेन रूपस्य; लिङ्गपदेन चक्षुरादेः; तस्य घटज्ञानादिसाधारणत्वेनालिङ्गत्वात्; असाधारणं हि लिङ्गं भवति । एतच्च पूर्वरूपमविद्यमानस्यापि व्याधेर्लिङ्गं भवत्येव; यथा–विशिष्टमेघोदयो वृष्टेः । इति पूर्वरूपम् ॥ ५ ॥ ६ ॥

*तदेव व्यक्ततां यातं रूपमित्यभिधीयते ।
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ॥ ७ ॥
(वा. नि. अ. १)

यद्यपि पूर्वरूपानन्तरं संप्राप्तिर्भवति, तथाऽपि व्याधिस्वरूपज्ञानार्थं रूपमाह–तदेवेत्यादि । तदेव पूर्वरूपमेव । व्यक्ततामुद्भूतताम् । ननु व्यक्तत्वं पूर्वरूपस्य किं कार्त्स्न्येन, एकदेशेन वा ? आद्ये सर्वज्वराणामसाध्यत्वं स्यात्, यदुक्तं **चरके**,–"पूर्वरूपाणि सर्वाणि" (च. इं. स्था. अ. ५)–इत्यादि; द्वितीये हि "जृम्भाऽत्यर्थं समीरणात् । पित्तान्नयनयोर्दाहः" (सु. उ. तं. अ. ३९)–इत्यादेरपि पूर्वरूपस्य रूपत्वप्रसङ्गः । नैवम्, अनभ्युपगमात्र कृत्स्नस्य नाप्येकदेशस्य, किंत्वनिर्धारितैकत्वानेकत्वविशेषस्य पूर्वरूपमात्रस्य व्यक्तस्य व्याधिलिङ्गत्वं; यथा–तार्णपार्णादिविशेषविरहेण धूममात्रस्य वह्निबोधकत्वम् । एवं व्यवस्थिते यदा सर्वस्याभिव्यक्तिस्तदा न साध्यत्वम्, अन्यथा तु साध्यत्वम् । न च जृम्भादे रूपत्वप्रसङ्गः; तस्य प्रागेव व्यक्तत्वात्; अव्यक्तं सद्व्यक्ततां यातं तस्य रूपत्वेनाभिधानात्, अपरप्रभूताव्यक्तलिङ्गसहचरितत्वेन पूर्वरूपयोरसमानकालत्वेन च रूपत्वायोगादिति । **ईश्वरसेन**स्त्वाह–"व्याधेः स्वरूपमव्यक्तं पूर्वरूपं, यद्व्यक्तं तद्रूपम्"–इति । तन्न, विकल्पासहत्वात् । तथा हि–स्वरूपमिति किं स्वं रूपं स्वरूपम् ? आहोस्वित् स्वीयं रूपं स्वरूपम्? स्वीयमपि धर्मः कार्यं वा ? । न तावत् स्वरूपं, स्वात्मनि क्रियाविरोधात्; रूपं हि व्याधिप्रतिपत्तिनिमित्तमुक्तं, तच्चेद् व्याधिस्वभाव एव तर्हि व्याधिस्वभावादेव व्याधिस्वभावः प्रतीयत इति व्यक्तः स्वात्मनि क्रियाविरोधः । नापि धर्मः, चरकोक्तकृष्णत्वङ्नखविण्मूत्रनेत्रत्वादेरशोरूपत्वा-

* 'संस्थानमित्यादि । संस्थानाद्याकृत्यन्ताः षड्रूपस्य पर्यायवाचकाः, तथा पूर्वरूपस्यापि; यथा–पूर्वसंस्थानं, पूर्वव्यञ्जनमित्याद्यपरेऽपि' (आ० द०) ॥ ७ ॥

१ 'नैवं' इति क. । २ 'रूपं' इति क. ख. । ३ "तदेवेत्येवशब्देनैतद् द्योतयति—यदेव शारीरं प्राग्रूपं पूर्वोपवर्णितं तदेवेह ग्रहीतव्यं, स्थायित्वात्; तद्व्यामयानुबन्धि । मानसं शारीर मानसं वाऽस्थायित्वान्न ग्रहीतव्यं, तद्धि द्वयमुत्पित्सुव्याधिसमनन्तरं प्रायेण नश्यतीति तद्व्यक्ततां न याति । अतः शारीरमेवोत्पित्सुव्याधिप्राग्रूपमिह तदा परात्रष्टुं युक्तम्"—इति वाग्भटटीकायामरुणदत्तः (वा. नि. स्था. अ. १) । ४ 'सर्वज्वरादेः' इति क.। ५ 'रूपाभिधानत्वाभ्युपगमात्' इति क. ।

नुपपत्तेः । नहि कृष्णत्वरूक्षत्वविण्मूत्रनेत्रत्वादिकमशेषधर्मः, अतन्निष्ठत्वात्; धर्माणां च धर्मिनिष्ठत्वात्, अन्यथाऽतिप्रसङ्गात् । नापि कार्यम्, उपद्रवादेरपि रूपत्वप्रसङ्गात् । तदपि कृच्छ्रसाध्यासाध्यव्याधेर्लिङ्गमिति चेत् । नैवम्, असाध्यत्वादेरेव तल्लिङ्गं, न तु व्याधेः; तस्य पूर्वमेव ज्ञातत्वात्, भेदेनोपादानाच्च; तदुक्तं,-"सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम्"-इति । ननु, उपद्रवो न व्याधेः कार्यं किंतु व्याध्यारम्भकदोषस्य; यदुक्तं सुश्रुते,-"स तन्मूल एवोपद्रवसंज्ञकः"-इति (सु. सू. स्था. अ. ३५); व्याचक्षते च टीकाकृतः,-"तन्मूलं तद्दोषरूपं मूलं यस्य स तन्मूलः"-इति । नैवम्, अपचारेण मूलभूतदोषोपबृंहणलब्धबलत्वेद्व्याधिरुपद्रवं करोति तेन 'तन्मूल' इत्युक्तवान् । अत एवाह चरकः,-"कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति" (च. नि. स्था. अ. ८) इत्यादि । सर्वमेवैतत्स्वरूपशब्दवाच्यं क्वचित्किंचिदिति; तथा सति न व्यभिचार इति केचित् । तदपि व्यवस्थामात्रं स्यान्न तु लक्षणम्, एकस्य सकलरूपसंग्राहकस्य धर्मस्याभावात्, उपद्रवस्य च व्याधिस्वरूपत्वापत्तेश्चेति । तस्मात् 'उत्पन्नव्याधिबोधकमेव लिङ्गं रूपम्' इति लक्षणम् । 'उत्पन्न'इति पदं पूर्वरूपव्यवच्छेदार्थम्; एवकारोऽपि निदानसंप्राप्त्युपशयान् व्यवच्छिनत्ति, तेषामुत्पन्नानुत्पन्नव्याधिबोधकत्वात्; तच्च दर्शितमेव; लिङ्गपदेन चक्षुरादेर्व्युदासः; यन्मते व्याधिजन्मरूपा संप्राप्तिस्तन्मते तस्या लिङ्गपदेन व्यवच्छेदः, न हि सा व्याधिज्ञाने लिङ्गं, किंतु कारणमात्रम् । शास्त्रे व्यवहारार्थं निदानवल्लक्षणार्थं च रूपपर्यायानाह—संस्थानमित्यादि । ननु, रूपैर्व्याधिर्ज्ञायते, न च रूपव्यतिरेकेण व्याधिरुपलभ्यते; यतो मिलिता अरुच्यादय एव ज्वरः, कासाद्येकादशरूपाण्येव राजयक्ष्मा । उच्यते—नैवं, तथाविधदोषदूष्यसंमूर्च्छनाविशेषो ज्वरादिरूपो व्याधिः, तत्कार्याश्चारुच्यादयः; किंच अरुच्यादय एव प्रत्येकशो रूपाणि, तत्समुदायो व्याधिः, यतः समुदायिभ्योऽन्य एव समुदायः, यथा—खदिरतरूणां वनमिति; अन्ये तु राहोः शिरः, शिलापुत्रस्य शरीरमितिवदसत्यपि भेदे भेदविवक्षया समर्थयन्ते; नैयायिकास्तु तत्रापि भेदमापादयन्ति । ननु, "विकारो दुःखमेव च"-इति (च. सू. स्था. अ. ९) चरकवचनाद्दुःखस्यात्मगुणस्य कथमरुच्यादिसमुदायत्वं? नैवं, दुःखयतीति दुःखमिति व्युत्पत्त्या दुःखहेतोर्धातुवैषम्यादेर्व्याधित्वस्वीकारात् । अरुच्यादयस्तु स्वरूपेण विकारा एव, यदा त्वन्यप्रतिपादकास्तदा लिङ्गान्येवोच्यन्ते । यदाह चरकः—"ज्ञानार्थं यानि चोक्तानि व्याधिलिङ्गानि संग्रहे । व्याधयस्ते तदात्वे तु लिङ्गानीष्टानि नामयाः"-इति (च. नि. स्था. अ. ८) । इति रूपलक्षणम् ॥ ७ ॥

---

१ 'तस्य कृच्छ्रसाध्यासाध्यस्य पूर्वरूपेणैव ज्ञातत्वात्' इति क. । २ 'तद्दोषरूपं' इति ख. पुस्तके न पठ्यते । ३ 'स्वरूपशब्दवाच्यं कार्यं क्वचित्किंचिदाश्रीयते' इति क. । ४ 'धर्मस्याभावात्; धर्मस्यान्वयव्यतिरेकेण तन्निष्ठत्वात्; उपद्रवस्य च' इति क. । ५ 'लक्षणार्थं च निदानवत्' इति क. ख. । ६ 'ननु रूपेण व्याधिर्ज्ञायेत, यदि रूपव्यतिरेकेणान्यो व्याधिरुपलभ्येत' इति क. । ७ अस्याग्रे कपुस्तके 'एवं कासादिरूपातिरेकेणैव यक्ष्मा, तत्कार्याणि कासादय इति' इत्यधिकः पाठ उपलभ्यते ।

*हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ।
औषधान्नविहाराणामुपयोगं सुखावहम् ॥ ८ ॥
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ।
विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥ ९ ॥
(वा. नि. अ. १)

उपशयमाह—हेतुव्याधीत्यादि । हेतुर्बाह्य आभ्यन्तरश्च, व्याधिर्ज्वरादिः, एतयोर्हेतुव्याध्योर्व्यस्तसमस्तयोर्विपर्यस्ता विपरीताः, एतयोरेव व्यस्तसमस्तयोर्विपर्यस्तार्थकारिणो निदानसमानधर्मिणोऽपि प्रभावाद्रोगप्रशमकारिणः, एवंविधा ये औषधान्नविहारा भेषजाहाराचारास्तेषामुपयोगमाचरणं सुखावहं सुखकरमुपशयं विद्यादुपशयाख्यं जानीयाद्व्याधेः । तस्य पर्यायमाह—स हि सात्म्यमिति स्मृत इति । चरकेऽप्युक्तं,—"सात्म्यार्थो ह्युपशयार्थः" इति (च. नि. स्था. अ. १) । हिशब्दः पाद-

* "अथोपशयलक्षणमाह—हेतुव्याधिविपर्यस्तेत्यादि । सुगमम् । उपयुज्यत इत्युपयोगः । सुखमावहति सम्यगनुबन्धेन सुखमुत्पादयतीति सुखावहः । ईदृशो य उपयोगः सुखावहस्तमुपशयं विद्यात् जानीयात् । केषामुपयोगः सुखावहः? औषधान्नविहाराणाम् ।—औषधं हरीतक्यादि, अन्नं रक्तशाल्यादि, विहारो वाग्देहमनोनिर्वर्तितचेष्टाविशेषो व्यायामजागरणाध्ययनादिरूपः; औषधं च अन्नं च विहारश्च औषधान्नविहाराः, तेषाम् । किंभूतानाम्? हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ।—हेतुश्च व्याधिश्च हेतुव्याधी, तयोर्व्यस्तसमस्तयोर्विपर्यस्ता निदानरोगयोर्विपरीताः; तथा विपर्यस्तानामर्थो विपर्यस्तार्थः, तयोर्व्यस्तसमस्तयोरेव विपरीतमर्थं कुर्वन्तीति विपर्यस्तार्थकारिणः, हेतुव्याधिविपर्यस्ताश्च विपर्यस्तार्थकारिणश्च हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणः, तेषाम् । तेषां विपर्यस्तानामर्थं कुर्वन्तीति प्रकृतत्वाद्धेतुव्याधिविपर्यस्तानाम् । तदाऽयमर्थः—निदानरोगयोर्व्यस्तसमस्तयोर्विपरीता अपि कारणरूपा इव भासमाना व्याधिरूपा इव भासमाना हेतुव्याधिविपरीतानामर्थं व्याध्युपशमलक्षणं कुर्वन्तीति । यथा हेतुविपरीतैरौषधान्नविहारैर्व्याध्युपशमः क्रियते प्रतिपक्षत्वात्, एवं विपर्यस्तार्थकारिभिरपीत्यर्थः । तथा च हेतुविपरीतानां, व्याधिविपरीतानां, हेतुव्याधिविपरीतानां, हेतुविपरीतार्थकारिणां, व्याधिविपरीतार्थकारिणां, हेतुव्याधिविपरीतार्थकारिणाम्, औषधान्नविहाराणां यः सुखावह उपयोगः स उपशय इति पिण्डार्थः । अथ क्रमेणोदाहरणानि...... । व्याधिविपरीतो विहारो यथा—उदावर्ते प्रवाहणं; सशब्दं हृत्कण्ठबलेन वायोरधोऽधो नयनं प्रवाहणम् । हेतुव्याधिविपरीतमन्नं यथा—वातकफग्रहण्यां तक्रं वातकफहरं ग्रहणीहरं च । हेतुव्याधिविपरीतो विहारो यथा—स्निग्धायां दिवास्वप्नजायां तन्द्रायां तन्द्राविपरीतं स्निग्धताहरं च रात्रौ जागरणमिति । व्याधिविपरीतार्थकारी विहारो यथा—छर्द्यामङ्गुल्युत्पलनालादिना वमनम् । वमनविरेकाभ्यां छर्द्यतीसारयोर्वृद्धिरेव कर्तुं युक्ता, इह तु शमनकरणाद्विपरीतार्थकारित्वम् । हिशब्दः पादपूरणे । स उपशयो व्याधेरामयस्य सात्म्यमिति स्मृतः । एवंविधगुणविपरीतो य आहारो विहारश्च स व्याधिसात्म्यः । उक्तं च चरके—"देशानामामयानां च विपरीतगुणं गुणैः । सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च"—इति । उपशयकथनप्रस्तावादनुपशयोऽपि वाच्य इत्याह—विपरीत इत्यादि । अतो यथानिर्दिष्टलक्षणादुपशयाख्याद्यो विपरीतलक्षण औषधान्नविहाराणामुपयोगोऽसुखावहः सोऽनुपशय इत्युच्यते, स एव व्याधेरसात्म्यमिति संज्ञितः आभिमुख्येन संकेतित इति" (आ० द०) ॥८॥९॥

१ 'केषां' इति ग. । २ 'समानकारित्वात्' इति ग. ।

पूरणे । सुखावहमिति सुखं रोगनिवृत्तिलक्षणं; यथा व्यपदिशन्ति लोके—भारापगमे सुखिनः संवृत्ताः स इति, तत् सुखमावहति सम्यगायत्याऽनुबन्धेन च करोतीति सुखावहम् । एतेन सदाहतृष्णानवज्वरिणः शीतलजलपानं तदात्वसुखकरमपि नोपशय इति तात्पर्यार्थः । अत्र, औषधान्नविहाराणामित्युपलक्षणं; तेन देशकालावपि बोद्धव्यौ । अत एव वृद्धवाग्भटेन व्याध्यादिविपरीतमभिधाय "एतेन देशकालावपि व्याख्यातौ"—(वृ. वा. नि. स्था. अ. १) इत्याख्यातम् । सुदान्तसेनोऽप्याह— "सुखानुबन्धो यो हेतुव्याध्यादिविपरीतकः । देशादिकश्चोपशयो ज्ञेयोऽनुपशयोऽन्यथा"—इति । संक्षेपतस्तु लक्षणम्—'औषधादिजनितः सुखानुबन्ध उपशयः' इति । स्रक्चन्दनवनितादिजनितसुखनिवृत्त्यर्थमौषधादिपदम्, अनुबन्धशब्दश्चापथ्यजनित-तदात्वसुखव्यवच्छेदार्थः । एतदप्युदाहरणदर्शनपरं, न तु लक्षणम्; औषधादीनां हेतुविपरीतादीनां च परस्परव्यभिचारेण लक्षणत्वायोगात् । तस्मात् 'सम्यग्व्याधिजदुःखोपशमहेतुरुपशयः', 'सात्म्यमुपशयः' इति वा लक्षणम्; 'औषधजनितः सुखानुबन्ध उपशयः' इति वा लक्षणं; चरके आहाराचारदेशकाललङ्घनादीनां द्रव्याद्रव्यभूतानामौषधत्वेनाभिधानात् । अथैषामुदाहरणानि; तत्र हेतुविपरीतानि । औषधं यथा—शीतज्वरे शुण्ठ्याद्युष्णं भेषजम् । यदुक्तं,—"शीतेनोष्णकृतान्रोगान् शमयन्ति भिषग्वराः । ये तु शीतकृता रोगास्तेषामुष्णं भिषग्जितम्"—इति (च. वि. स्था. अ. ३) । अन्नं यथा—श्रमानिलजे ज्वरे रसौदनः । विहारो यथा— दिवास्वप्नोत्थे कफे रात्रौ जागरणमिति । अथ व्याधिविपरीतानि । औषधं यथा— अतिसारे स्तम्भनं पाठादि, तथा शिरीषो विषं हन्ति, खदिरः कुष्ठं, हरिद्रा प्रमेहमिति; नैते दोषमपेक्षन्ते प्रभावाद्रोगप्रशमकारिणं इति । वाप्यचन्द्रस्त्वाह— "ज्वरादिव्याधिहरं यद्द्रव्यं तदपि दोषप्रत्यनीकं, किंतु दोषप्रत्यनीकादस्यायं भेदः— यद्दोषप्रत्यनीकं तन्नावश्यं व्याधिहरं; यथा—वमनलङ्घने कफहरे न कफगुल्मं हरतः; उक्तं हि—"कफे लङ्घनसाध्ये तु कर्तरि ज्वरगुल्मयोः । तुल्येऽपि देशकालादौ लङ्घनं न च संमतम्"—इति; तथा,—"न वामयेत्तैमिरिकं न गुल्मिनं न चापि पाण्डूदररोगपीडितम्"—इति (सु. चि. स्था. अ. ३३); "यत्तु व्याधिहरं तदवश्यं दोषहरं, तद्व्याधिं शमयेत्तदारम्भकदोषमपि शमयतीति; अन्यथा स रोगो जित एव न स्यात्, कारणस्य तादवस्थ्यात्" इति । तन्नातिसङ्गतमित्यन्ये; यतो दोषस्तत्र समवायी निमित्तं वा; न च समवायिनिमित्ताभावप्रयुक्तो नियमेन कार्याभावः, किंत्वसमवायिकारणाभाव-प्रयुक्तोऽपि, यथा—कपालमालासंयोगस्यासमवायिकारणस्य विनाशादपि घटाभावः; तथा—रोगेऽपि संप्राप्तिलक्षणस्य संयोगस्य विनाशाद्रोगस्यापि विनाशः, दोषस्तु स्वतः क्रियान्तरेण वा निवर्तते; यदि व्याधिप्रत्यनीकमवश्यं दोषं निवर्तयेदिति स्वीक्रियते, तदोभयप्रत्यनीकाद्भेदो दुरुपपादः स्यादिति । ननु, यदि निमित्तकारणं दोषस्तत्कथं तदारब्धविकारे वमनादिना दोषहरणं विधीयते ? नहि दण्डकुलालाद्यु-

१ 'नोपशयकरं' इति क. । २ 'सुदत्तसेनोऽप्याह' इति क. । ३ 'हेत्वादिविपरीतानां' इति क. । ४ 'रोगप्रशमकारिणः' इति क. ख. पुस्तकयोर्नोपलभ्यते । ५ 'किंतु' इति क. ख. पुस्तकयोर्नोपलभ्यते । ६ 'शमयेदेतदारम्भकदोषं च' इति क. । ७ 'विनाशादपि' क. ख. ।

च्छेदे घटोच्छेद इति। उच्यते, यत्र यावन्निमित्तकारणस्थायि कार्यं तत्र निमित्तकारणोच्छेदादपि कार्यनाशः; यथा—वर्तितैलनाशादपि प्रदीपनाशः; तथाभूताश्च दोषाः प्रायश इति। अन्नं यथा—अतिसारे स्तम्भनं मसूरादि। विहारो यथा—उदावर्ते प्रवाहणं; मन्त्रौषधिधारणवल्युपहारनियमप्रायश्चित्तहोमगुरुदेवशुश्रूषादयोऽपि व्याधिविपरीता विहारा इति **वाप्यचन्द्रः**। अथ हेतुव्याधिविपरीतानि।—औषधं यथा—वातशोथे दशमूलं वातहरं शोथहरं च। यदुक्तं **चरके** षड्विरेचनशताश्रितीयेऽध्याये—"पाटला"—इत्यादि यावत्—"दशेमानि शोथहराणि"—इति (च. सू. स्था. अ. ४)। अन्नं यथा—वातकफग्रहण्यां तक्रं, शीतवातोत्थे ज्वरे पेया; सा क्षुण्णवीर्यत्वाद्वातं हन्ति प्रभावाज्ज्वरं च। यदुक्तं **चरके**,—"ज्वरघ्यो ज्वरसात्म्यत्वात्—" इति (च. चि. स्था. अ. ३); **सुश्रुते**ऽपि,—"ज्वरे चैवातिसारे च यवागूः सर्वदा हिता"—इति (सु. उ. तं. अ. ४०)। विहारो यथा—स्निग्धदिवास्वप्नप्रजातायां तन्द्रायां रूक्षं तन्द्राविपरीतं रात्रिजागरणमिति। अथ हेतुविपरीतार्थकारीणि।—औषधं यथा—पित्तप्रधाने व्रणशोथे पित्तकर उष्ण उपनाहः। अन्नं यथा—पच्यमाने व्रणशोथेऽन्नं विदाहि। विहारो यथा—वातोन्मादे त्रासनमिति। अथ व्याधिविपरीतार्थकारीणि। औषधं यथा—छर्द्यां वमनकारकं मदनफलादि। अन्नं यथा—अतिसारे विरेचनं क्षीरम्¹। विहारो यथा—छर्द्यां वमनार्थं प्रवाहणमिति। अथ हेतुव्याधिविपरीतार्थकारीणि। औषधं यथा—अग्निप्लुष्टे उष्णोऽगुर्वादिलेपः, विषे वा विषम्। अन्नं यथा—मद्यपानोत्थे मदात्यये मदकारकं मद्यम्। विहारो यथा—व्यायामजनितसंमूढवाते जलप्रतरणरूपो व्यायाम इति। ननु, छर्द्यां बहुश्लेष्मजायां वैमनयोग्यायां³ यदि वमनं न क्रियते तदा चिरानुवर्ती⁴ रोगोऽनुच्छेदो वा स्यात्, ततश्च वमनं प्रयुक्तं दोषप्रत्यनीकमेव भवति; यदुक्तं **सुश्रुते**,—"छर्दिषु बहुदोषासु वमनं हितमुच्यते" (सु. उ. त. अ. ४९) इति, तथा आमातिसारे क्षीरस्य विरेकित्वेनामनिःसरणाद्धेतुप्रत्यनीकमेव भवति; एवमग्निप्लुष्टेऽप्युष्णक्रियया रक्तस्य विलयनेन स्थानान्तरगमनाद्धेतुप्रत्यनीकतैव; अन्यथा दाहप्रकुपितं रक्तं तत्रस्थं पाकमारभेत; यदुक्तं **सुश्रुते**,—"अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति। ततस्तेनैव वेगेन पित्तमस्याप्युदीर्यते"—इति (सु. सू. स्था. अ. १२); शीतक्रिया च तत्र निषिद्धा, रक्तस्य स्त्यानत्वहेतुत्वात्; यदाह **सुश्रुतः**—"प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितम्। तस्मात् सुखयति ह्युष्णं नतु शीतं कथंचन"—इति (सु. सू. स्था. अ. १२), स्कन्दयति स्त्यानीकरोति; तथा जङ्गमविषे ऊर्ध्वगस्वरूपे मौलविषमधोगस्वरूपं हेतुविपरीतमेव, यदुक्तं **चरके**—"विषं विषघ्नमुक्तं यत् प्रभावस्तत्र कारणम्। ऊर्ध्वानुलोमिकं यच्च तत् प्रभावप्रभावितम्⁵"—इति (च. सू. स्था. अ. २६); अस्यायमर्थः—

---

१ 'प्रायशः' इति क. ख. पुस्तकयोर्न पठ्यते। २ उक्तं हि,—"बहुदोषस्य दीप्ताग्नेः सप्राणस्य न तिष्ठति। पैत्तिको यत्तीसारः पयसा तं विरेचयेत्"—इति (च. चि. स्था. अ. १९)। ३ 'संशमनायोग्यायां' इति क. ख.। ४ 'चिरानुवृत्तिः, रोगानुच्छेदो वा'—इति क.; 'विकारानुवर्ती दोषो रोगानुच्छेदो वा' इति ख.। ५ 'प्रभावति' इति क. ख.।

विपल्लाविशेषेऽपि कुतो गतिभेद इत्यत उक्तं—तत् प्रभावप्रभावितमिति; तथा मद्यकृते मदात्यये यन्मद्यं तदपि मातुलुङ्गचुक्रादियुतं सुश्रुतादिभिर्विहितं केवलाच्च द्रव्यान्तर-संयुक्तमन्यदेव, अथवा वातमदात्यये रूक्षमाध्वीकादिना जनिते स्निग्धपैष्टिकादिमद्यं प्रयुज्यमानं हेतुविपरीतमेव; यच्चोक्तं सुश्रुते—"यथा नरेन्द्रोपहतस्य कस्यचिद्भवेत् प्रसादस्तत एव नान्यतः। ध्रुवं तथा मद्यहतस्य देहिनो भवेत् प्रसादस्तत एव नान्यतः"-इति (सु. उ. तं. अ. ४७), तन्मद्यजातीयाभिप्रायेणैव; यच्चोरुस्तम्भे जलप्रतरणं, तत्रापि जलस्य शैत्येन वहिरगच्छन् देहोष्मा कुम्भकारपवनन्यायेनान्तः-पिण्डितौ मेदःश्लेष्माणौ विलाययति, व्यायामश्च तौ शोषयति, ततस्तु निरावरणो वायुः स्वमार्गप्रतिपन्नो भवतीति हेतुप्रत्यनीकतैव; अनेन न्यायेन सर्वमेव तदर्थ-कारि यथासंभवं हेतुप्रत्यनीकादावेवान्तर्भवतीति। उच्यते—यद्यप्येवं तथाऽप्यवान्त-रवैधर्म्यप्रतिपादनार्थमाचार्यैः पृथग्दर्शितम्। तथा चरकेऽप्युक्तं—"उपशयः पुन-र्हेतुव्याधिविपरीतानां विपरीतार्थकारिणां चौषधाहारविहाराणामुपयोगः सुखानु-बन्धः"-इति (च. नि. स्था. अ. १)। वैधर्म्यं च हेतुसमानधर्मकत्वेऽपि रोगप्रश-मकत्वमिति। विपरीतोऽनुपशय इति औषधादीनां दुःखकर उपयोगोऽनुपशय इत्यर्थः। तत्पर्यायमाह—व्याध्यसात्म्यमिति स्मृत इति। व्याधिग्रहणेन दोषोऽपि बोध्यः। ननु, अनुपशयः किं व्याधिविशेषं बोधयति नो वा? नेति चेत्, निदाने तदुपन्यासो व्यर्थः; प्रतिपादयतीति चेत्, 'विज्ञानं रोगाणां पञ्चधा स्मृतम्'—इति व्याहन्यते, तस्य षष्ठत्वापत्तेः। नैवं, प्रतिपादयत्येव; यदाह चरकः,—"गूढलिङ्गं व्याधिमुपशयानु-पशयाभ्यां परीक्षेत"-इति (च. वि. स्था. अ. ४)। किंतु निदाने तस्यान्तर्भावः, दोषस्य रोगस्य वा वर्धकत्वात्। (इत्यनुपशयस्य निदानेऽन्तर्भावान्न षष्ठत्वापत्तिः, वक्ष्यति च—"निदानोक्तानुपशयः"-इति।) इत्युपशयलक्षणम्॥ ८॥ ९॥

*यथा दुष्टेन दोषेण यथा चानुविसर्पता।
निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः॥ १०॥
(वा. नि. अ. १)

---

* "अथ संप्राप्तिलक्षणमाह—यथेत्यादि। येन प्रकारेण दुष्टः कुपितो वाताद्यन्यतमो दोषो यथादुष्टस्तेन यथादुष्टेन दोषेण यथा चानुविसर्पता देहमनुधावता सन्निवेशविशेषेण गच्छता प्रत्याभयं या निर्वृत्तिरुत्पत्तिर्निर्दिष्टा सा संप्राप्तिः। सा च जातिरागतिश्च कथ्यते पर्यायशब्देन। व्याधिजन्म संप्राप्तिरित्येके। यथा—ज्वरस्य "मलास्तत्र" (वा. नि. अ. २) इत्यादिलक्षणलक्षिता, अत्र मलानामामाशयप्रवेशेन, तथा चामानुगमनेन, तथा स्रोतोनि-रोधेन, तथा च पक्तिस्थानाज्ज्वलननिरसनेन, तथा च तेनैव जाठरेण वह्निना तेषामभिसरणेन, तथा सकलदेहतापेन सकलं गात्रमत्युष्णं कुर्वता, एवंविधया संप्राप्त्या ज्वरोऽयमिति निश्चीयते। एवमतीसारादिष्वप्येवंविधैव चिन्त्या संप्राप्तिः" (आ० द०)॥ १०॥

---

१ अस्याग्रे 'यथा शाल्यर्थं प्रवृत्तया कुल्यया क्रियमाणं बीजान्तराधानं तन्नान्तरीयकं, तदुभयहेतुत्वं साधर्म्योदाहरणवत्' इति क. पुस्तकेऽधिकः पाठः। २ 'औषधादीनां दुःख-वैधर्म्यं' इति क.। ३ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते।

संप्राप्तिमाह—यथेत्यादि । नानाविधा हि दोषाणां दुष्टिः प्राकृती वैकृती वा, अनुबन्ध्यरूपा अनुबन्धरूपा वा, एकशो द्विशो वा समस्ता वा, रौक्ष्यादिभिः सर्वैर्भावैरल्पैर्वा, एवमादिदुष्टिदुष्टेन दोषेण या आमयस्य रोगस्य निर्वृत्तिरुत्पत्तिः सा संप्राप्तिरुच्यते । यथा चानुविसर्पतेति अनेकधा दोषाणां विसर्पणं गतिरूर्ध्वाधस्तिर्यगादिभेदेन, तथा विसर्पता । संप्राप्तिपर्यायावाह शास्त्रे व्यवहारार्थं लक्षणार्थं च—जातिरागतिरिति ।—जात्यादिभिः शब्दैर्याऽभिधीयते सा संप्राप्तिरिति । "जातिरागतिरिति जन्मापि ज्ञानकारणम्, अजातस्य ज्ञानाभावात्" इत्याह **भट्टारहरिचन्द्रः।** एतेनैतदुक्तं भवति—नहि निदानादिवद्बोधकत्वेन ज्ञानकारणत्वं, किंतु बोधविषयत्वेन[2] । तन्न—इत्यन्ये, आलोकचक्षुरादेरिव एवंविधसंप्राप्तेश्चिकित्सायामनुपयोगात् । न चास्ति नियमः जातमेव विज्ञायत इति, अजातस्य व्याधेर्निदानपूर्वरूपाभ्यां वृष्ट्यादेरिव मेघादिना ज्ञायमानत्वात् । अथ जातमिति जन्मावच्छिन्नमुच्यते, वृष्ट्यादिकं च भविष्यज्जन्मावच्छिन्नमेव, यस्य तु कालत्रयेऽपि जन्म नास्ति तन्न ज्ञायत एव; तथाऽपि न व्याधिजन्म संप्राप्तिः[3], जन्मवदालोकचक्षुरादेरपि वाच्यत्वापत्तेः[4]; तैरपि विना ज्ञानाभावात्[5] । तस्माद्दोषेतिकर्तव्यतोपलक्षितं व्याधिजन्म संप्राप्तिः नतु केवलं जन्मेति भट्टारहरिश्चन्द्राभिप्रायः। **वाग्भटेनापि** "यथा दुष्टेन"—(वा. नि. स्था. अ. १) इत्यादि वदता विशिष्टमेव व्याधिजन्म संप्राप्तिरुक्ता; तथा च सति क्रियाविशेषो लभ्यते; यथा—ज्वरे आमाशयदूषणाग्निहननादिबोधे लङ्घनपाचनस्वेदादिकरणमिति । संप्राप्तिश्चैवंविधा यद्यपि दोषाणामवान्तरव्यापारत्वेन दोषग्रहणेनैव प्राप्यते, तथाऽपि चिकित्साविशेषार्थमेव पृथक् क्रियते; यथा—ज्ञापकत्वाविशेषेऽपि पूर्वरूपमेव रूपात् पृथगिति । तस्माद्दोषेतिकर्तव्यतोपलक्षितं व्याधिजन्म संप्राप्तिरित्येव लक्षणम् ॥ १० ॥

---

१ "अन्नेके व्याधिजन्ममात्रमन्त्यकारणव्यापारजन्यं संप्राप्तिमाहुः। इयं च संप्राप्तिर्यद्यपि निदानादिवद्व्याधिबोधिका न भवति, तथाऽपि नानुत्पन्नस्य व्याधेर्लिङ्गं भवतीति कृत्वा उत्पत्तेर्व्याध्युपलम्भकत्वं वर्णयन्ति। एतच्चान्ये नानुमन्यन्ते, यतो नैवं सति संप्राप्तितः कश्चिद्विशेषो व्याधेरधिगम्यते। न चायं नियमः—यदुत्पन्न एव परं व्याधिरुपलभ्यते, यतो निदानपूर्वरूपाभ्यामनुत्पन्नोऽपि व्याधिर्भावित्वेनोपलभ्यते; तस्माद्व्याधिजनकदोषव्यापारविशेषयुक्तं व्याधिजन्मेह संप्राप्तिशब्देन वाच्यम्, अत एव पर्याये 'आगतिः' इत्युक्तम्। आगतिर्हि उत्पादककारणस्य व्याधिजननपर्यन्तं गमनम्। इयं च संप्राप्तिर्व्याधिविशेषं बोधयत्येव, यथा ज्वरे "स यदा प्रकुपितः प्रविश्यामाशयम्"—इत्यारभ्य "तदा ज्वरमभिनिर्वर्तयति"—इत्यन्तेन या संप्राप्तिरुच्यते, तया ज्वरस्यामाशयदूषकत्वाग्न्युपघातकत्वरसदूषकत्वादयो धर्माः प्रतीयन्ते। नच वाच्यं—दोषाणामयमामाशयदूषकत्वादिर्धर्मः, ततश्च कारणधर्माणां निदानग्रहणेनैव ग्रहणं भवतीति; यतः कारणधर्मोऽप्ययं व्याधिजनकदोषव्यापाररूपः संप्राप्तिशब्देन विशेषबोधनार्थं पृथक्कृत्वोच्यते; यथा—लिङ्गत्वाविशेषेऽपि भाविव्याधिबोधकत्वविशेषात् पूर्वरूपं पृथगुच्यते। अत एव वाग्भटेनाप्येवमेव संप्राप्तिलक्षणमुक्तं,—"यथा दुष्टेन दोषेण यथा चानुविसर्पता। निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः"—इति चरकटीकायां निदानस्थाने (अ. १,) संप्राप्तिविवरणे चक्रः। २ 'विषयत्वेन' इति क.। ३ 'तथाऽपि न व्याधिजन्मसंप्राप्तिः—इत्यत्र 'न' इत्येव क. ख. पुस्तकयोः पठ्यते। ४ 'वाध्यत्वापत्तेः' इति क.। ५ 'जातमिति विज्ञानाभावात्' इति क.।

*संख्याविकल्पप्राधान्यबलकालविशेषतः ।
सा भिद्यते यथाऽत्रैव वक्ष्यतेऽष्टौ ज्वरा इति ॥ ११ ॥
दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ॥ १२ ॥
हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम् ।
नक्तंदिनर्तुभुक्तांशैर्व्याधिकालो यथामलम् ॥ १३ ॥
(वा. नि. अ. १)

तस्या औपाधिकभेदमाह—संख्येत्यादिना सा भिद्यत इत्यन्तेन । अत्र च प्राधान्योपादानादप्राधान्यं च तत्प्रतियोगितया बोद्धव्यम्, अत एव च विवरणे स्वातन्त्र्यपारतन्त्र्याभ्यामिति वक्ष्यति । एवं बलेऽपि व्याख्येयम् । संख्यादिकमेव विवृणोति—यथेत्यादि । अष्टौ ज्वरा इति संख्याविवरणम् । अष्टत्वं च वातादिकारणभेदात्; एकजास्त्रयो, द्वन्द्वजास्त्रयः, सन्निपातज एक, आगन्तुजश्चैकं इति । यद्यपि वृद्धैर्दोषैः सन्निपातास्त्रयोदश, यदुक्तं चरकेण,—"क्षुल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च षट् । समैश्चैको विकारास्ते सन्निपातास्त्रयोदश"—(च. सू. स्था. अ. १७) इति; तथाऽप्यत्र त्रिदोषजत्वसामान्यात् सान्निपातिक एकत्वेन गणितः । एवं कामशोकभयाद्यनेककारणजोऽप्यागन्तुज आगन्तुजत्वसामान्यादेकत्वेन निर्दिष्ट इत्यष्टौ ज्वरा इति ।

* "अथ संप्राप्तेर्भेदानाह—संख्येत्यादि । सा च संप्राप्तिः संख्यादिविशेषेण भिद्यते । संख्या च विकल्पश्च प्राधान्यं च बलं च कालश्च त एवं, तेषां विशेषः संख्याविकल्पप्राधान्यबलकालविशेषः, तस्माद् संप्राप्तिर्बहुधा भिद्यते । तत्र संख्याविशेषो यथा–इहैवास्मिन् ग्रन्थे वक्ष्यते–अष्टौ ज्वरा इति, एवं पञ्च कासा इति, पञ्च गुल्मा इत्यादि, एवमादयः संख्याविशेषाः संप्राप्तिभेदाः । संख्यानन्तरं विकल्पं विवृणोति–दोषाणामित्यादि । दोषाणां वातादीनां, समवेतानामेकस्मिन् व्याधौ संघट्टितानां, यः अंशांशविभागेन कार्यानुमेयेनानुमानेन निरूपणं स विकल्पः । अंशश्च अंशश्च अंशांशौ, ताभ्यां कल्पना अनेकविधो विशेषो वातादिगतरौक्ष्यादिकः, यथा–किमयं वातः सर्वैर्गुणैः कुपितः किं द्वाभ्यां किं वैकेन; किमिदं पित्तं सर्वैर्गुणैः कुपितं किं द्वाभ्यां किमेकेन; किमयं श्लेष्मा सर्वैर्भावैः कुपितः किं द्वाभ्यां किमेकेनेत्यादिका कल्पना । दोषाणामिति बहुत्वं पृथग्ग्रहणार्थम् । समवेतानामिति द्वन्द्वसन्निपातयोर्ग्रहणम् । अथ प्राधान्यं विवृणोति–स्वातन्त्र्येत्यादि । स्वातन्त्र्यं च पारतन्त्र्यं च ताभ्यां व्याधेः प्राधान्यमादिशेत्, 'अप्राधान्यं च'इति शेषः । तत्र स्वतन्त्रस्य व्याधेः स्वनिर्दिष्टोपक्रमसाध्यत्वात् प्राधान्यं, यथा ज्वरस्य । अथ बलाबलं विवृणोति–हेत्वादीत्यादि । कृत्स्नस्य भावः कार्त्स्न्यं, कार्त्स्न्यं च अवयवाश्च कार्त्स्न्यावयवाः, तैः । बलं च अबलं च बलाबले व्याधिसंबन्धिनी, तयोर्विशेषणं विशिष्टता बलाबलविशेषणम् । तद्यथासंख्येन कार्त्स्न्यावयवैरादिशेत् । आदिशब्देन प्राग्रूपादयो गृह्यन्ते । तेषां साकल्याद् व्याधेर्बलत्वं, तेषामेवावयवैकदेशेनाबलत्वम् । तत्र प्रतिरोगं यन्निदानमुद्दिष्टं तत् किं कार्त्स्न्येन व्याधेरुत्पादकमुतैकदेशेन ? एवं प्राग्रूपमपि किं समस्तव्याधेर्लक्ष्यते उतावयवेन च?, उपशयोऽप्यस्य व्याधेस्तर्पणातर्पणरूपः, स किं कार्त्स्न्येन सुखानुबन्धं करोति उतावयवेन ?; तत्र कार्त्स्न्येन यथा—रक्तशाल्यादिमांसघृतक्षीरदधिवसामज्जातैलादिना, अवयवेन यथा–रक्तशालिना मांसाद्यन्यतमेकेन वा; एवमन्यदपि चिन्त्यम्" (आ० द०) ॥ ११–१३ ॥

१ 'एकजा द्वन्द्वजाश्च त्रयः' इत्येव पठ्यते क. ख. पुस्तकयोः ।

विकल्पं विवृणोति—दोषाणामित्यादि । समवेतानां परस्परसंबद्धानां; तेन द्वन्द्व-सन्निपातयोर्ग्रहणम् । अंशांशकल्पनेति अंशा वातादिगतरौक्ष्यादयः, तैरेकद्वित्र्यादिभिः समस्तैर्वा वातादिकोपावधारणकल्पना । यदुक्तं सुश्रुते,—"सर्वैर्भावैस्त्रिभिर्वाऽपि द्वाभ्यामेकेन वा पुनः । संसर्गे कुपितः क्रुद्धं दोषं दोषोऽनुधावति—" इति (सु. सू. स्था. अ. २१) । एवंविधश्च दोषकोपो निदानवैचित्र्याद्भवति । तद्यथा—वातस्य रौक्ष्यशैत्यलाघववैशद्यादिगुणस्य एवंगुणः कषायरसः कलायश्च सर्वैर्भावैर्वर्धकः, रौक्ष्य-शैत्यलाघवैस्तण्डुलीयकः, रौक्ष्यशैत्याभ्यां काण्डेक्षुः, रौक्ष्येण सीधुः; तथा पित्तस्य सर्वैर्भावैर्वर्धकः कटुको रसो मद्यं च, हिङ्गु कटूष्णतीक्ष्णत्वैः, दीप्यकस्तैक्ष्ण्यौष्ण्याभ्याम्, औष्ण्येन तिलाः; तथा श्लेष्मणः सर्वैर्भावैर्वर्धको मधुरो रसो माहिषं च पयः, स्नेहगौरवमाधुर्यै राजादनफलं, कशेरुः शैत्यगौरवाभ्यां, शैत्येन क्षीरिणां फलानीति । अपरगुणोदाहरणप्रकारा जेज्जटगदाधरवाप्यचन्द्रव्याख्याविशेषाश्च विस्तरत्वा-पत्तेरत्र न लिखिताः । प्राधान्यं विवृणोति—स्वातन्त्र्यपारतन्त्र्याभ्यामिति ।—अनुबन्ध्यानुबन्धभावेनेत्यर्थः । अत्रापि 'दोषाणां समवेतानाम्' इत्यनुवर्तनीयम् । 'अप्राधान्यं च' इति शेषः, गम्यमानत्वाच्चोपदर्शितम् । तेन स्वातन्त्र्यात् प्राधान्यं, पारतन्त्र्यादप्राधान्यमिति सिध्यति । बलं विवृणोति—हेत्वादीत्यादि ।—हेतुपूर्वरूपरू-पाणां साकल्याद्यथेष्टबलवत्त्वं, तेषामवयवैनैकदेशेनाबलवत्त्वम् । कालं विवृणोति—नक्तमित्यादि ।—नक्तं रात्रिः, दिनमहः, ऋतवो वसन्तादयः, भुक्तमाहारः, एषा-मंशैरेकदेशैः; व्याधिकालो व्याधिवृद्धिहानिहेतुः कालः । अत्र, ऋतोरंशैः कतिपया-न्यहोरात्राणि, यदाह वाग्भटः—"ऋत्वोरन्त्यादिसप्ताहावृतुसंधिरिति स्मृतः"—इति (वा. सू. स्था. अ. ३); संवत्सररूपस्य कालस्य ऋतुरूपोंऽशः ऋत्वंश इत्येवमपि योज्यं, नत्वेकस्य ऋतोर्दिनादिवदादिमध्यान्ता ऋत्वंशाः, ऋतोः समुदितस्य तत्र कारणत्वेनोक्तत्वात् । यथामलं यथादोषं; तद्यथा—रात्रेरादौ श्लेष्मा, मध्ये पित्तं, शेषे वायुः; एवं दिनस्य; वसन्ते कफस्य, शरदि पित्तस्य, वर्षासु वायोः; एवं भुक्तादौ भुक्तमात्रे कफस्य, मध्ये पच्यमानावस्थायां पित्तस्य, अन्ते सम्यक्परिणते भुक्ते वायोः प्रकोप इति । तदुक्तं वाग्भटेनैव—"ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः । वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात्—" इति (वा. सू. स्था. अ. १) । अत्र ते इति क्रमेण वातपित्तश्लेष्माणः । ननु, संप्राप्तिभेदे चरकेण संख्यादिवद्वि-धिरप्युक्तः; यथा—"द्विविधा व्याधयो निजागन्तुभेदेन" (च. नि. अ. १); "त्रिविधं रक्तपित्तम्" (च. सू. स्था. अ. १९)—इत्यादि; तत् कुतोऽत्र विधिर्नोक्तः ? उच्यते, संख्याग्रहणेन विधेरवरोधः, तस्याव्यभिचरितसंख्यायोगित्वात् । विधिसंख्ययोश्चायं

१ 'कट्वम्लतीक्ष्णोष्णगुणस्य पित्तस्य' इत्यातङ्कदर्पणे । २ 'स्नेहमाधुर्यशैत्यगुणस्य श्लेष्मणः' इत्यातङ्कदर्पणे । ३ 'शैत्येनैकेन मृणालं' इति आतङ्कदर्पणे । ४ 'जेज्जटादीनां ग्रन्थे ज्ञातव्याः । "सर्वैरंशैः कषायश्च कलायो वातवर्धनः । पित्तस्य कटुको दीप्यः, श्लेष्मणो माहिषं पयः"; विशेषेण ग्रन्थस्य विस्तरत्वापत्तेरत्र न लिखिताः ।' इति क. । ५ 'ऋत्वोरंशाः' इति क. ख. । ६ 'ननु ऋतुरूपकालस्यांशा व्याध्युत्पादका न भवन्ति, विशिष्टस्य व्याधिहेतुत्वात्; ततोंऽश-शब्दस्य कथमृतुशब्दप्रयोगः ? तन्न, संवत्सररूपस्य च कालस्य ऋतुरूपोंऽशः ऋत्वंश इति योज्यं, नत्वेकस्य ऋतोर्दिनानि मध्यान्ताद्यंशाः' इति क. ।

भेदः—विधिर्हि प्रकारः, स चाभिन्नजातीयानामेव कस्यचिद्धर्मान्तरस्यान्वयाद्भवति, यथा—रक्तपित्तलाविशेषेऽप्यूर्ध्वगादिप्रकारो भवति; संख्या तु भिन्नत्वमात्रेऽपि; यथा—चत्वारो घटाः, अष्टौ ज्वरा इति। अत्रैव विधिर्हि प्रकारः, स च भिन्नेषु न युक्तः, अतः संख्यादिभिन्नेषु व्याधिषु कारणधर्मानुगतः प्रकारो युज्यते। तथा च न्यायविदो ब्रुवते—"समानेन धर्मेण परिग्रहो भेदानां यत्र क्रियते स विधिः, संख्या तु भेदमात्रम्" इति; वैयाकरणा अपि व्याचक्षते—"अन्वयवान् प्रकारः, निरन्वयो भेदः" इति बाप्यचन्द्रो लिखितवान्। ननु, यथांऽशांशविकल्पनादिना ज्वरो ज्ञायते न तथा संख्यया। उच्यते–संख्याभेदेन व्याधेर्दोषभेदो ज्ञायते, यतो ज्वरादिकं स्वरूपतो ज्ञात्वा चिकित्सार्थं विशेषो जिज्ञास्यः, कतमोऽयं ज्वरः? इति; तस्मिन् ज्ञाते विशेषो भवतीति परंपरया कारणत्वं संख्यायाः। तत्र यद्युत्पद्यमान एवासौ दोषभेदाद्भिन्नो जा(ज्ञा)तस्ततो युक्तमस्य पर्येषणं–कतमोऽयमिति। कुतः? चिकित्साविशेषार्थम्। इति संप्राप्तिलक्षणम्॥ ११–१३॥

*इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते।

(वा. नि. अ. १)

उक्तं निदानपञ्चकमुपसंहरति—इतीत्यादि। इतिशब्दः समाप्तौ। निदानशब्दोऽत्र सामान्यवचनः, अर्थोऽभिधेयः। तन्निदानं संक्षेपेण स्वरूपलक्षणमात्रेणोक्तम्, अधुना व्यासेन विस्तरेणोपदेक्ष्यते कथयिष्यते; सकलेन ग्रन्थेन प्रतिरोगं निदानपूर्वरूपादय एव तत्तद्विशेषैर्वक्तव्या इत्यर्थः॥—

†सर्वेषामेव रोगाणां निदानं कुपिता मलाः॥ १४॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।

(वा. नि. अ. १)

द्विविधं हि रोगस्य कारणं विप्रकृष्टं सन्निकृष्टं च; तत्र विप्रकृष्टं विरुद्धाहारादि, सन्निकृष्टं वातादि, तस्य वातादेः सर्वरोगेष्वव्यभिचरितकारणत्वमाह—सर्वेषामित्यादि। यदुक्तं सुश्रुते–"नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्"–इति (सु. सू. स्था. अ. ३५)। आगन्तुव्याधिषु

* "इतिशब्दः प्रकारे, अनेन संक्षेपाख्येन प्रकारेण, यथानिर्दिष्टो निदानार्थो निदानाभिधेयः, समासतः संक्षेपतः कथितः। निदानशब्दोऽत्र सामान्यः प्राग्रूपादिषु। य एव निदानार्थः समासेन प्रोक्तस्तमेव व्यासेन विस्तरेण उपदेक्ष्यते कथयिष्यते" इति (आ० द०)।–

† "सन्निकृष्टकारणत्वेन वातादीनां सर्वरोगेष्वव्यभिचरितकारणत्वमाह—सर्वेषामित्यादि। कुपितत्वेन हि धातूनां मलिनीकरणाद्दोषा एव 'मला' इत्युच्यन्ते। कुपिता विकृतिमापन्ना वातपित्तकफाः सर्वेषामपि रोगाणां निदानं कारणम्। तत्प्रकोपस्येति तदित्यनेन वातादयः परामृश्यन्ते; तस्य तु वातादिप्रकोपस्य, निदानं कारणं, विविधं नानाप्रकारम्, अहितसेवनमहितानुष्ठानं, प्रोक्तं कथितमिति" (आ० द०)॥ १४॥—

१ 'आहारादि' इति क. ख. २ अस्याग्रे क. पुस्तके 'ननु, आगन्तुके कथं दोषपूर्वकत्वं? यतस्तत्प्रकोपकारणमाहारादिकं नास्ति? उच्यते—अभिचाराभिघातादिना व्यथोत्पद्यते, तेन दोषोत्पत्तिः, तथा च व्याधिरिति; तथाऽभिचारादिनाऽदृष्टप्रेरितदोषोत्पत्तिः, एवंप्रकारेण दोषपूर्वकत्वम्' इत्यधिकः पाठ उपलभ्यते। ३ 'संक्षेपेण' इति ग.।

यद्यप्युत्पत्तौ दोषकोपो नास्ति, तथाऽप्युत्पत्त्यनन्तरमवश्यंभावी; उत्पन्नद्रव्ये गुणयोगवत् । यदुक्तं **चरके**—"आगन्तुर्हि व्यथापूर्वसमुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति"—इति (च. सू. स्था. अ. २०)। निदानं कारणम् । मला दोषाः, मलिनीकरणात् । ननु, वातादीनां किमिदं दोषत्वम्?; अत्राहुरेके—स्वातन्त्र्येण दूषकत्वं दोषत्वं; रसादिदूष्यव्यवच्छेदार्थं 'स्वातन्त्र्येण' इति पदं, ते हि वातादिदुष्टाः सन्तो दूष्यान्तरदूषकाः । अत्राहुरन्ये—किमिदं स्वातन्त्र्यं ? किं दोषान्तरनिरपेक्षत्वं ? हेत्वन्तरनिरपेक्षत्वं वा ? आद्ये वातस्यैव दोषत्वं स्यात्, ननु वातसापेक्षयोः कफपित्तयोः; यदुक्तं,—"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्"—इति; द्वितीये वातस्यापि न दोषत्वं, कफपित्तयोरिव निदानसापेक्षस्यैव तस्य दूषकत्वात्; तस्मात् 'प्रकृत्यारम्भकत्वे सति दुष्टिकर्तृत्वं[1] दोषत्वम्' इति लक्षणम् । रसरक्तादिनिवृत्त्यर्थं 'प्रकृत्यारम्भकत्वं' इति विशेषणम् । नहि वातादिप्रकृतिवच्छास्त्रे रसरक्तादिप्रकृतिरुक्ता[2]; वातादिप्रकृतित्वं च शरीरस्य वातादिदूषितशुक्रशोणितारब्धत्वम्[3] । यदाह **चरकः**,—"दोषानुशायिता ह्येषां देहप्रकृतिरुच्यते"; तथा,—"वातलाद्याः सदाऽऽतुराः" इति (च. सू. स्था. अ. ७)। **सुश्रुतेनापि** प्रकृतिलक्षणे "वातप्रकृतिः स्फुटितकरचरणो जागरूकोऽनवस्थितचित्तः—" (सु. शा. स्था. अ. ४) इत्याद्युक्तम् । प्रकृतिरोगयोश्चायं भेदः—प्रकृतिरपथ्यसेवया नात्यन्तं बाधते, यदुक्तं—"विषजातो यथा कीटो विषेण न विपद्यते । तद्वत् प्रकृतिभिर्देहस्तज्जातत्वान्न बाध्यते" (सु. शा. स्था. अ. ४) इति संक्षेपः । विस्तरस्तु सुश्रुतश्लोकवार्तिके **प्रश्नविधानाख्ये**[4] टीकासु च द्रष्टव्यः । ननु, 'प्रकृत्यारम्भकत्वं दोषत्वम्, इत्येवास्तु । सत्यं, विपक्षाद्व्यावृत्तिर्भवत्येव, किंतु दोषस्वरूपं नोक्तं स्यादिति । सुश्रुतादिभिर्वातादेरिव प्रकोपकाल-प्रकोपण-निर्हरण-स्थानविशेष-रोगविशेष-लिङ्गविशेष-चिकित्साविशेषाणामभिधानाद्रक्तस्यापि दोषत्वं पूर्वटीकाकारै**राषाढवर्म-स्वामिदासा**दिभिः स्वीकृतं तदप्येतेन व्यवच्छिन्नम्, अधुनातनैरस्वीक्रियमाणत्वात् । ननु, दोषाश्चेत् कारणं तर्हि तेषां सर्वदा देहे सद्भावात् सर्वदा रोगोत्पादकत्वप्रसङ्ग इत्यत आह—कुपिता इति, विकृतिमापन्नाः । ननु, तत्प्रकोपः स्वभावात्, कारणान्तराद्वा ? नाद्यः, पूर्ववत्प्रसङ्गात्; अथ कारणान्तरादिति किं तदित्याह—विविधाहितसेवनमिति ।—विविधस्य नानाविधस्य, अहितस्य असात्म्येन्द्रियार्थसंयोग-प्रज्ञापराध-परिणामलक्षणस्य सेवनमिति ॥ १४ ॥

---

१ 'दुष्टिकारणत्वं' इति क. ख. । २ 'रसरक्तादिप्रकृतिरुक्तः पुरुषः, रक्तदूषितशुक्रादेरसाध्यत्वेन देहारम्भकत्वं नास्ति, रक्तस्य देहारम्भकत्वे सत्यपि प्रकृत्यारम्भकत्वं नास्ति, अनभिधानात्; शास्त्रे न रक्तप्रकृतिरुक्तः पुरुषः' इति क. । ३ अस्याग्रे क. पुस्तके 'तत्र वातादिदूषितत्वं नाम शुक्रशोणितसंयोगकाले शुक्रशोणितयोरधिकतरदोषाधिकरणत्वम्, अन्यथा दुष्टयोस्तयोर्देहारम्भकत्वमेव न स्यात्, चरके च,—"वातपित्तकफादिदुष्टरेतसः प्रजोत्पादने न समर्थाः" इति । तत्रोभयोरेकाधिकरणत्वेन एकदोषा प्रकृतिः, भिन्नाधिकरणत्वेन द्वन्द्वजा त्रिदोषजा वा । वातादिप्रकृतित्वं शरीरस्य वातादिदूषितशुक्रशोणितारब्धत्वात्' इत्यधिकः पाठ उपलभ्यते । ४ 'प्रश्नसहस्रनिदानाख्ये' इति क. ख. ।

निदानार्थकरो रोगो रोगस्याप्युपजायते ॥ १५ ॥
*तद्यथा ज्वरसन्तापाद्रक्तपित्तमुदीर्यते ।
रक्तपित्ताज्ज्वरस्ताभ्यां शोषश्चाप्युपजायते ॥ १६ ॥
प्लीहाभिवृद्ध्या जठरं जठराच्छोथ एव च ।
अर्शोभ्यो जाठरं दुःखं गुल्मश्चाप्युपजायते ॥ १७ ॥
(दिवास्वापादिदोषैश्च प्रतिश्यायश्च जायते ।)
प्रतिश्यायादथो कासः कासात् संजायते क्षयः ।
क्षयो रोगस्य हेतुत्वे शोषस्याप्युपजायते ॥ १८ ॥
(च. अ. नि. ८)

ननु, किमेतदेव निदानम्, उतान्यदप्यस्तीत्यतश्चरकवचनमुपन्यस्यति–निदानार्थकर इत्यादि । अपिशब्दो भिन्नक्रमः । रोगोऽपि निदानार्थकरो रोगस्य । अस्यायमर्थः–निदानेन योऽर्थः क्रियते व्याध्याख्यः, स रोगेणापीति । रोगो रोगकर इति वाच्ये यन्निदानार्थकर इत्यकरोत्, तेनैवं गमयति–रोगोऽपि रोगान्तरं कुर्वाणो निदानान्तरोपबृंहितबल एव करोतीति; (एवं रोगो रोगस्य निदानमुपजायत इत्येव योजना) । अत्रैव दृष्टान्तमाह—तद्यथेत्यादि । ताभ्यामिति रक्तपित्तात् ज्वराच्च । दुःखमिति दुःखयतीति दुःखं पीडाकरम् । अयं च दुःखशब्दो लिङ्गविपरिणामेन सर्वेष्वेव ज्वरादिषु योज्य इति वाप्यचन्द्रः । गुल्मश्चाप्युपजायत इति अर्शोभ्य एव । कासात् संजायते क्षय इति 'ओजःप्रभृतीनां' इति शेषः । स च क्षयो रोगस्य हेतुत्वे उपजायते । कस्य रोगस्येत्याह—शोषस्येति, राजयक्ष्मणः । अत्र केचित् हरिचन्द्रादिभिर्व्याख्यातं पाठान्तरं पठन्ति,–"क्षयो रोगस्य हेतुत्वे शोषश्चाप्युपजायते"–इति । अस्यार्थः—क्षयो राजयक्ष्मा, उरोग उरःक्षतं, समाहारद्वन्द्वेनैकवचनं, तस्य हेतुत्वे शोषो धातुक्षय उपजायत इति । ननु, चरके सर्वं निदानं त्रैविध्येन संगृहीतं "असात्म्येन्द्रियार्थसंयोग"–(च.सू.अ.११) इत्यादिना, ततश्च रोगस्यापि निदानत्वमाचक्षाणः स्वोक्तं निदानत्रैविध्यसंग्रहं कथं न विरुणद्धि ?; अत्रैके समाधिमभिदधति–त्रिविधं यन्निदानमुक्तं तत् सर्वव्याधिविषयम्, इदं तु प्रतिनियतविषयं, यतो न सर्वे रोगा रोगाज्जायन्ते किं तर्हि कश्चिदेव व्याधिः कुतश्चिद्रोगादिति चतुर्थमेवैतन्निदानं रोगाख्यमिति । अन्ये त्वाहुः—रोगोऽपि रोगस्य निदानं भवत्त्रिविधनिदानव्यतिरेकेण न भवत्येव; यतो यावदयं ज्वरोऽसात्म्येन्द्रियार्थसंयोगादिभिरुपबृंहितबलो न भवति न तावद्रक्तपित्तमारभते, तस्माद् व्याध्युत्पादे त्रिविध एव हेतुः साक्षात् पारम्पर्येण चेति ॥ १६—१८ ॥

* "कारणभूतात् ज्वरसन्तापात् रक्तपित्तमुदीर्यते उत्पद्यते, कारणभूताद्रक्तपित्ताज्ज्वरः समुपजायते, ताभ्यां रक्तपित्तज्वराभ्यां शोषश्चोपजायते; प्लीहाभिवृद्ध्या जठरमुदरविकारः, तस्माज्जठरात् शोथः, अर्शोभ्य एव जठरं गुल्मश्चाप्युपजायते, अथ प्रतिश्यायात् कासो जायते, कासात् क्षयः संजायते, स च क्षयः रोगस्य हेतुत्वे उपजायते, कस्य रोगस्येत्याह–शोषस्येति" (आ० द०) ॥ १५–१८ ॥

१ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते । २ 'त्रैविध्यं कथं' इति क. ।

ते पूर्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः ।
(च. अ. नि. ८)

ननु, य इमे रोगा रोगान्तरस्य निदानत्वेनोक्तास्ते किमुत्पन्नमात्रा एव रोगं जनयन्ति, उतानन्तरकालमित्यत आह—ते पूर्वमित्यादि ।—ते व्याधय उपबृंहकहेत्वलाभात् प्राक् केवलाः स्वतन्त्राः सन्तो रोगा एव रुजाकर्तृत्वात्, पश्चादुपबृंहकहेतुलाभात्, हेतोर्निदानस्य योऽर्थो यत् प्रयोजनं व्याधिजननाख्यं तत् कुर्वन्ति । यथा ज्वरो रक्तपित्तमिति ॥—

*कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति ॥ १९ ॥
न प्रशाम्यति चाप्यन्यो हेतुत्वं कुरुतेऽपि च ।
एवं कृच्छ्रतमा नृणां दृश्यन्ते व्याधिसंकराः ॥ २० ॥
(च. अ. नि. ८)

तस्यैव रोगजनकस्य व्याधेर्वैचित्र्यमाह—कश्चिदित्यादि । एवमुक्तप्रकारेण, व्याधिसंकरा व्याधिमेलकाः, दृश्यन्ते । यथा—प्रतिश्यायो न निवर्तते कासश्चोत्पद्यते, अर्शो न निवर्तते जठरगुल्मौ भवत इति । कृच्छ्रतमत्वं चैषां बहुविधदुःखजनकत्वात्, प्रायो विरुद्धोपक्रमाच्चेति ॥ १९ ॥ २० ॥

†तस्माद्यत्नेन सद्वैद्यैरिच्छद्भिः सिद्धिमुद्धताम् ।
ज्ञातव्यो वक्ष्यते योऽयं ज्वरादीनां विनिश्चयः ॥ २१ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चनिदानलक्षणं समाप्तम् ॥ १ ॥

उक्तनिदानपञ्चकस्य रोगनिवृत्तिलक्षणसिद्धिहेतुत्वेनावश्यं ज्ञातव्यतामाह—तस्मादित्यादि । उद्धतां बहुविषयत्वेन महतीम् । विनिश्चयो निदानमिति । अथ वक्ष्यमाणविकारेषु प्रकृतिसमसमवायविकृतिविषमसमवायादिज्ञानार्थं चरकोक्ता वातादिगुणा लिख्यन्ते,—"रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः । विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥ सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु । विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति ॥ गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः । श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः"—इति (च. सू. स्था. अ. १) ॥ २१ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां पञ्चनिदानलक्षणं समाप्तम् ॥ १ ॥

अथ ज्वरनिदानम् ।

‡दक्षापमानसंक्रुद्धरुद्रनिःश्वाससंभवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥ १ ॥

---

* "कृच्छ्रतमा नृणां दृश्यन्ते; कथं ? कश्चिद्रोगो रोगान्तरस्य कारणं भूत्वा स्वयं प्रशाम्यति अन्यश्च न प्रशाम्यति" (आ० द०) ॥ १९ ॥ २० ॥

† "तस्मादित्यादि । तस्मात् कारणात्, उद्धतां बहुविषयत्वेन महतीं, सिद्धिमिच्छद्भिर्वैद्यैर्योऽयं ज्वरादीनां विनिश्चयो वक्ष्यते कथ्यते स यत्नेन ज्ञातव्यः" (आ० द०) ॥ २१ ॥

‡ "बहुविधमपि ज्वरं संक्षेपेणाह—ज्वरोऽष्टधेति । अष्टधात्वं विवृणोति—वातिकः, पैत्तिकः, श्लैष्मिकः, एवं पृथक्त्रयः; वातपैत्तिकः, वातश्लैष्मिकः, पित्तश्लैष्मिकः, एवं द्वन्द्वजास्त्रयः; सांनिपातिक एकः; आगन्तुज एकः; एवमष्टौ ज्वरा इति" (आ० द०) ॥ १ ॥

अथ सर्वरोगप्राधान्यात् प्रथमं ज्वरो वाच्यः । प्राधान्यं चास्य सर्वशारीररोगेषु प्रथमोत्पन्नत्वात्, बलवत्त्वात्, देहेन्द्रियमनस्तापित्वात्, जन्मनिधनयोरवश्यंभावित्वात्, स्थावरजङ्गमरूपसर्वभूतव्यापित्वाच्च; नैवमन्ये विकाराः । यदुक्तं **चरके**—"देहेन्द्रियमनस्तापी सर्वरोगाग्रजो बली । ज्वरः प्रधानो रोगाणामुक्तो भगवता पुरा ॥ तस्य प्राणिसपत्नस्य ध्रुवस्य प्रलयोदये"—(च. चि. स्था. अ. ३) इत्यादि यावद् "भगवन् ! वक्तुमर्हसि" (च. चि. स्था. अ. ३)–इति । तथा–"ज्वरेणाविशता भूतं न हि किंचिन्न तप्यते"–(च. चि. स्था. अ. ३) इत्यादि । उक्तं च **पालकाप्ये**[1]–"पाकलः स तु नागानामभितापस्तु वाजिनाम् । गवामीश्वरसंज्ञश्च मानवानां ज्वरो मतः ॥ अजावीनां प्रलापाख्यः करभे चालसो भवेत् । हारिद्रो महिषीणां तु मृगरोगो मृगेषु च ॥ पक्षिणामभिघातस्तु मत्स्येष्विन्द्रमदो मतः । पक्षपातः पतङ्गानां व्याडेष्वक्षिकसंज्ञितः"–इत्यादि । तथाऽन्यत्र–"जलस्य नीलिका भूमेरूषरो वृक्षस्य कोटरः"—इत्यादि । तस्य प्रागुत्पत्तिमाह—दक्षापमानेत्यादि ।–दक्षापमानेन दक्षप्रयुक्तपरिभवेन क्रुद्धस्य रुद्रस्य निःश्वासात् संभव उत्पत्तिर्यस्य स तथा । निःश्वासोऽत्र क्रोधलिङ्गत्वेन निर्दिष्टः, अत एव सुश्रुतेन "रुद्रकोपाग्निसंभूतः" (सु. उ. तं. अ. ३९)–इत्युक्तम् । क्रुद्धेन रुद्रेण ललाटे तृतीयमाग्नेयं चक्षुः सृष्ट्वा ततोऽप्याग्नेयो बाणो निर्मितः । यदाह **चरकः**–"सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः । बाणं क्रोधाग्निसन्तप्तमसृजत् सत्रनाशनम्" (च. चि. स्था. अ. ३) इति; अत्र सत्रनाशनं यज्ञनाशनम् । एषा ज्वरोत्पत्तिकथा चरकचिकित्सिते सविशेषा[2] श्रोतव्या । एतेन रुद्रकोपस्य विप्रकृष्टकारणत्वमुक्तं; यदि हि ततो ज्वरो नोदपत्स्यत[3] तदधुनाऽप्यपचारान्नोत्पत्स्यते[4] इति **भट्टारहरिचन्द्रः** । एतदभिधानस्य चिकित्सानुपयोगित्वेनान्ये टीकाकृतोऽन्यथा व्याचक्षते–कोपोद्भवत्वेन तैजसत्वं प्रकाश्यते; क्रोधो ह्याग्नेयः; यदाह **चरकः**–"क्रोधात् पित्तं" (च. चि. स्था. अ. ३) इति । तेन सर्वज्वरे पित्ताविरोधिनी क्रिया कार्येति सिध्यति । यदुक्तं **वाग्भटेनैव**,–"ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना । तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्"[5] (वा. चि. स्था. अ. १)–इति । अत एव चरके कट्वम्ललवणान् परित्यज्य तरुणज्वरे पाचकत्वेन तिक्तको रसः पित्तघ्नो निर्दिष्टः । यदाह–"लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः । पाचनान्यविपक्वानां दोषाणां तरुणज्वरे" (च. चि. स्था. अ. ३) इति । (कालोऽत्रेोष्टाह इति) । अन्ये त्वाहुः—रुद्रकोपसंभवत्वेन देवतात्मकत्वात् पूजार्हत्वमुपदर्शितम् । यदाह **विदेहः**—"ज्वरस्तु पूजनैर्वाऽपि सहसैवोपशाम्यति"–इति । **हरिवंशे**ऽपि—"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो

---

१ पालकाप्यविरचिते हस्त्यायुर्वेदे महारोगस्थाने नवमाध्यायेऽयं विषयो गद्येन पठ्यते ।
२ 'सावशेषा' इति क. ख. । ३ 'नोदपतत्' इति क. । ४ 'नोदपत्स्यते, उत्पन्नश्च तस्मात्, ततो रुद्रसंतोषार्थं जपहोमपूजाशिवार्चनादिकं कार्यं, तेन स न पीडयिष्यति' इति क. । ५ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते. । ६ "मूर्तिमान् हरजो ज्ञेयः पापिनां नाशकारकः" इति क पुस्तके पाठः । ख पुस्तके उत्तरार्धो न पठ्यते ।

रौद्रः कालान्तकयमोपमः"—इति मूर्तिमानेवोक्तः । बहुविधमपि ज्वरं संक्षेपेणाह–ज्वरोऽष्टधेत्यादि । अष्टत्वं विवृणोति–पृथगित्यादि । तच्च संप्राप्तौ विवृतम् ॥ १ ॥

*मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥ २ ॥

संप्राप्तिमाह—मिथ्येत्यादि । आहारस्य[1] मिथ्यात्वं प्रकृत्यादीनामाहारोपयोगहेतूनां विरुद्धत्वेनोपयोगः । यदाह **चरकः**—"तत्र खल्विमान्यष्टावाहारविधिविशेषायतनानि भवन्ति; तद्यथा–प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्त्रष्टमानि" (च. वि. स्था. अ. १)–इति । अत्र प्रकृतिर्द्रव्याणां स्वाभाविकगुरुत्वलघुत्वादिगुणयोगः, यथा माषमुद्गयोः; करणं संस्कारः, यथा—व्रीहेर्गुरोर्लघवो लाजाः; संयोगः संहतीभावः, यथा–क्षीरमत्स्ययोः; राशिराहारद्रव्यस्यावयवेन समुदायेन च परिमाणं; देशो द्रव्योत्पत्तिप्रचारादिस्थानं; कालो नित्यगश्चावस्थिकश्च; उपयोगसंस्था उपयोगनियमः, यथा–जीर्णान्न एव भुञ्जीत; उपयोक्ता स्वयं निरूपितात्मप्रकृत्यादिकः पुरुष इति । विहारस्य मिथ्यात्वमयथाबलमारम्भादि । आमाशयाश्रया इत्यनेनामाशयप्राप्तिव्यतिरेकेण दोषा ज्वरं नारभन्त इति प्रतिपादयति । आमाशयश्च "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः"–(च. वि. स्था. अ. २)–इति **चरकेणोक्तः** । बहिर्निरस्य कोष्ठाग्निमिति कोष्ठाग्निरेव दोषोत्क्षिप्तो बहिर्निर्गत ऊष्मतया प्रतिभाति । कोष्ठाग्निमिति धात्वाद्यग्निनिरासार्थम् । ज्वरदा ज्वरकारिणः । रसानुगा रससंबद्धाः, अवश्यं रसं दूषयित्वा ज्वरोत्पादका इति । एषा च संप्राप्तिः शारीराणामेव नत्वागन्तूनां, तेषां व्यथापूर्वकत्वं ततो वाताद्यनुबन्धः, इति **जेज्जटः** । अत एव सुश्रुते आगन्तुसंप्राप्तिः पृथगेव पठ्यते । यथा–"श्रमक्षताभिघातेभ्यो देहिनां कुपितोऽनिलः । पूरयित्वाऽखिलं देहं ज्वरमापादयेद्भृशम्" (सु. उ. तं अ. ३९)–इति । अत्र न आमाशयगत एव वायुः किंतूर्ध्वाधस्तिर्यग्रसवाहिस्रोतश्चरः । **चरकेऽप्युक्तं**–"तत्राभिघातजो वायुः प्रायो रक्तं प्रदूषयन् । सव्यथाशोथवैवर्ण्यं करोति सरुजं ज्वरम्" (च. चि. स्था. अ. ३)–इति । ननु, आगन्तुज्वरेऽप्यूष्मोपलभ्यते, ऊष्मा च पित्तादृते नास्ति (वा. चि. स्था. अ. १)–इत्युक्तम्, अत आगन्तुरपि शारीरः स्यात् । नैवम्, उत्तरकालं तदुत्पत्तेः । यदुक्तं—"आगन्तुर्हि[2] व्यथापूर्वो ज्वरोऽष्टमो भवति; स किंचित्कालमागन्तुः केवलो भूत्वा पश्चाद्दोषैरनुबध्यते" (च. नि. स्था. अ. १); तथा–"आगन्तुरन्वेति निजं विकारं निजस्तथाऽऽगन्तुमतिप्रवृद्धः" (च. सू. स्था. अ. १९)–इति ।

---

* "ज्वरस्य संप्राप्तिमाह–मिथ्याहारेत्यादि । "अकाले चातिमात्रं च ह्यसात्म्यं यच्च भोजनम् । विषमं चापि यद्भुक्तं[3] मिथ्याहारः स उच्यते"–इति, मिथ्याहारो देशकालप्रकृत्यादिविरुद्धः संयोगविरुद्धश्च क्षीरमत्स्ययोरिव । मिथ्याविहारोऽयथाबलमारम्भः । "अशक्तः कुरुते कर्म शक्तिमात्रं करोति यः । मिथ्याविहार इत्युक्तः सदा तं परिवर्जयेत्"–इति । ईदृशस्य पुरुषस्य आमाशयाश्रया दोषा वातपित्तश्लेष्माणः कोष्ठाग्निं बहिर्निरस्य ज्वरदाः स्युः ज्वरकारिणो भवेयुः ।" (आ० द०) ॥ २ ॥

---

१ 'आहारस्य द्रवाद्रवस्य' इति मु. । २ 'आगन्तुर्हि व्यथापूर्वो जायते, पश्चान्निजैर्दोषैरनुबध्यते' इति क. ख. । ३ 'विषमाशनं च यच्चोक्तं' इति ग.

ननु, मिथ्याहारेत्यादिनैकैव संप्राप्तिरुक्ता, एतच्च न युक्तं, यतः संप्राप्तिः संयोगभेदः, संयोगभेदश्च संयोगिभेदनिबन्धनः, संयोगिनश्चात्र वातादयो नानाविधाः, ततश्च संप्राप्तेरपि नानात्वं स्यात्; न हि वातपित्तयोर्यः संयोगः स एव कफपित्तयोरिति । उच्यते—अनेकैव संप्राप्तिः किंत्वेकजातीया, आशयदुष्ट्यादेः सर्वत्राविशेषेणाभिधानात्; एवमागन्तुसंप्राप्तिरपि संयोगभेदाद्भिन्नेति ॥ २ ॥

*खेदावरोधः संतापः सर्वाङ्गग्रहणं तथा ।
युगपद्यत्र रोगे च स ज्वरो व्यपदिश्यते ॥ ३ ॥
(सु. उ. तं. अ. ३९)

ज्वरलक्षणमाह—खेदावरोध इत्यादि । खेदावरोधो घर्मानिर्गमः । ताप इति वक्तव्ये[1] संतापग्रहणाद्देहेन्द्रियमनसां तापं लक्षयति । तदुक्तं चरके—"देहेन्द्रियमनस्तापी—"(च. चि. स्था. अ. ३) इति; "इन्द्रियाणां च वैकृत्यं ज्ञेयं संतापलक्षणम्" (च. चि. अ. ३) इति; तथा,—"वैचित्त्यमरतिर्ग्लानिर्मनःसन्तापलक्षणम्" (च. चि. स्था. अ. ३)—इति । सर्वाङ्गग्रहणं सर्वाङ्गवेदना । युगपदिति मिलितमेतल्लक्षणं, प्रत्येकशो व्यभिचारात्; खेदावरोधो हि कुष्ठपूर्वरूपे, तथा संतापो दाहाख्ये[2] रोगे, सर्वाङ्गग्रहणं सर्वाङ्गवातरोगे, इति । ननु पैत्तिके खेदागमात्, वातिके विषमारम्भविसर्गित्वात् सर्वाङ्गग्रहणाव्यवस्थितेश्चाव्यापकं लक्षणमिति । अत्र जेज्जटकार्तिककुण्डादयः समादधुः—उत्सर्गापवादभावेन व्यवस्थेति । तन्न संगतमित्यन्ये; विधौ ह्युत्सर्गापवादभावो न तु लक्षणे, अव्याप्त्यतिव्याप्त्योर्लक्षणदोषात्; तस्मात् खेदोऽग्निः 'खिद्यतेऽनेन' इति व्युत्पत्त्या; तस्यावरोधो दोषव्याप्तिः । वातज्वरे यद्यपि वायोश्चलत्वेनारम्भविसर्गयोर्वैषम्यं, तथाऽपि सर्वदेहगतज्वरारम्भकदोषदुष्ट्यनिवृत्तेरनुद्भूतसर्वाङ्गग्रहणस्य[3] विद्यमानत्वैवेति न व्यभिचारः । चरके तु ज्वरलक्षणं "ज्वरप्रत्यात्मिकं[4] लिङ्गं सन्तापो देहमानसः" (च. चि. स्था. अ. ३) इति । ननु, "शारीरो जायते पूर्वं देहे मनसि मानसः" (च. चि. स्था. अ. ३)—इति चरकवचनाद्देहमनसोरन्योन्यव्यभिचारादलक्षणमिति चेत्; न, सूक्ष्मतरकालव्यवहितस्यान्यतररूपस्यावश्यंभावित्वात् । यथा—गुणवद्द्रव्यमिति द्रव्यलक्षणमिति ॥ ३ ॥

†श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥ ४ ॥
जृम्भाऽङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे ॥ ५ ॥

* "ज्वरलक्षणमाह—खेदेत्यादि । यत्र यस्मिन् रोगे, युगपदेककाले, ईदृशलक्षणं दृश्यते स ज्वरः कथ्यते । संतापेत्यत्र संशब्दो देहेन्द्रियमनसां तापं लक्षयति । 'खेदावरोध' इत्यत्र 'वेगावरोध' इत्यन्ये पठन्ति । तत्र वेगावरोधो वातमूत्रपुरीषादीनामनिर्गमनं; तदयुक्तं, पित्तज्वरे पुरीषादीनां निर्गमनेन तत्राव्याप्तेः" (आ० द०) ॥ ३ ॥

† "पूर्वरूपमाह—श्रम इत्यादि । शीतवातातपादिषु विषयेषु इच्छाद्वेषौ अभिलाषविद्वेषौ । जृम्भा जृम्भणम् । अङ्गमर्दोऽङ्गमोटनम् । गुरुता गात्राणाम् । रोमहर्षो रोमाञ्चः । अरुचिर्भोज्ये । अप्रहर्षः आनन्दाभावः । शीतमिति शीतादौ मुहुर्मुहुरिच्छाद्वेषाविति सिद्धे

१ 'कर्तव्ये' इति क. ख. । २ 'दाहाख्यो रोगः' इति क. ख. । ३ "°दोषदूष्यानुवृत्तेः" इति क. । ४ 'ज्वरप्रत्यायकं' इति क. । 'ज्वरप्रत्यात्मकं' इति ख. ।

(सामान्यतो विशेषात्तु जृम्भाऽत्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफादन्नारुचिर्भवेत् ॥ ६ ॥
रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः।
सर्वलिङ्गसमवायः सर्वदोषप्रकोपजे ॥ ७ ॥)

(सु. उ. तं. अ. ३९)

पूर्वरूपमाह—श्रम इत्यादि। श्रमः श्रान्तत्वमिव। अरतिरनवस्थितचित्तत्वम्, अरतिः क्रीडाभाव इति कार्तिकः। विवर्णत्वं म्लानगात्रत्वम्। यत्तु "दुष्टाः स्वहेतुभिर्दोषाः"—इत्यारभ्य "स्वकालेषु ज्वरागमम्। जनयन्त्यथ वृद्धिं च स्ववर्णाश्च त्वगादिषु—" (सु. चि. स्था. अ. ३९) इति संप्राप्तौ वृद्धसुश्रुतवचनं, तदत्यर्थजृम्भादिवद्विशिष्टपूर्वरूपाभिप्रायेण, संप्राप्त्यवस्थापन्नदोषजन्यत्वात् पूर्वरूपस्येति। वैरस्यमिति मुखस्य विरुद्धरसता। नयनप्लवोऽश्रुपूर्णनेत्रत्वम्। यदुक्तं चरके—"आलस्यं नयने सास्रे"—(च. चि. स्था. अ. ३) इत्यादि। आदिशब्दादम्बुज्वलनयोरप्यनिश्चितेच्छाद्वेषयोर्ग्रहणम्। उक्तं हि चरके—"ज्वलनातपवाय्वम्बुभक्तिद्वेषावनिश्चितौ"—(च. चि. स्था. अ. ३) इति। अन्ये तु शैत्यौष्ण्यसाधर्म्याज्जलानलौ ग्राहयन्ति, आदिशब्देन च शयनादिकम्। तमः अन्धकारप्रविष्टस्येवासंवित्तिः। अप्रहर्षः प्रीत्यभावः। ज्वलनेच्छया शीते लब्धे शीतं चेति वचनं शीतस्य विशेषेण बोधनार्थम्। चकारेण बालविद्वेषादिग्रहणमित्याहुः। उत्पत्स्यतीति भविष्यति ज्वरे। उत्पत्स्यतीति आत्मनेपदानित्यत्वेन; तच्च चक्षिङ ङकारेण "अनुदात्तङित आत्मनेपदम्" (पा. अ. १।३।१२) इत्यात्मनेपदे सिद्धे तदर्थं ङित्करणेन ज्ञापितमिति शाब्दिकाः। गदाधरस्तु—'उत्पित्सति'—इति पठित्वा 'पद गतौ' इत्यस्य सन्नन्तस्य "सनि मीमाघुरभलभशकपतपदाम्" (पा. अ. ७ पा. ४ सू. ५४)—इत्यादिना इस्ति कृते 'पूर्ववत् सनः' (पा. अ. १ पा. ३ सू. ६२) इत्यत्र भिन्नवाक्यतया परस्मैपदमिति व्याचष्टे इति ॥ ४–७ ॥

*वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥ ८ ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्कता।
शूलाध्माने जृम्भणं च भवन्त्यनिलजे ज्वरे ॥ ९ ॥

(सु. उ. तं. अ. ३९)

पुनरपि शीतवचनं विशेषेण शीतप्रादुर्भावदर्शनार्थम्। उत्पत्स्यति भाविनि ज्वरे एतानि लक्षणानि भवन्ति। अत्र तु माधवेन सामान्यपूर्वलक्षणं सुश्रुतोक्तं लिखितं, न तु विशिष्टं पूर्वरूपलक्षणं; तच्चास्माभिरिहैव लिख्यते—सामान्यत इत्यादि। सामान्यत इति पूर्वपद्येन संबध्यते। भाविनि वातिके ज्वरेऽत्यर्थं जृम्भा, पैत्तिके नयनयोर्दाहः, कफजे नान्नाभिनन्दनमिति नान्नाभिलाषः" (आ० द०) ॥ ४–७ ॥

* "वेपथुः कम्पः। विषमो वेगो ज्वरस्य हीनाधिकभावेन, अङ्गेषु चोष्माद्यनियतत्वम्।

---

१ 'कफाच्चान्नाभिनन्दनम्' इत्यातङ्कदर्पणसंमतः पाठः। २ 'द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः' इति मुद्रितसुश्रुतपुस्तके पाठः। ३ 'विरुद्धमुखरसता' इति क.। ४ "गौरवं" इति क. ख.। ५ 'दह्यमाने' इति पा०। ६ 'क्षुतः स्तम्भः' इति डल्हणसंमतः पाठः। ७ 'शिरोरुक् गात्ररुक्' इति क. पुस्तके पाठः; "शिरसः पृथगुपदानमत्यर्थं शिरसि सा भवतीति ज्ञापनार्थम्, अन्यथा गात्ररुगित्यनेनैव तत्प्राप्तेः" इति सुश्रुतटीकायां डल्हणः।

वातपित्तकफानां यथापूर्वं भूरिदारुणविकारकर्तृत्वेन प्राधान्यं; यदुक्तं चरके– "अशीतिर्वातविकाराश्चत्वारिंशत्पित्तविकारा विंशतिः श्लेष्मविकाराः" (च. सू. स्था. अ. २०) इति; तथा दारुणाश्च वातविकारा आक्षेपकपक्षाघातादयः; अतः प्राधान्यात् प्रथमं वातज्वरलक्षणमाह–वेपथुरित्यादि । एवमन्यत्रापि वातादिक्रमनिर्देशे वेदितव्यम् । विषमो वेग इति वेगो ज्वरस्य प्रवृत्तिर्वृद्धिर्वा, तस्य वैषम्यमनियतकालत्वम्, अङ्गेषु चौष्ण्याद्यनियतत्वम् । क्षवश्छिक्का, स्तम्भो गात्राणां जडिमा, रौक्ष्यमपि गात्राणामेवेति गदाधरादयो व्याचक्षते; तच्चानवधानाद्व्याख्यातमिति लक्ष्यते; क्षवस्य स्तम्भः क्षवस्तम्भ इत्येकपदताऽत्र युज्यते । यदाह वाग्भटः—"हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः । भ्रमः प्रलापो घर्मेच्छा विलापश्चानिलज्वरे"– (वा. नि. स्था. अ. २) इति । चरकेऽपि निदाने "क्षवथूद्गारविनिग्रहः" (च. नि. स्था. अ. १) इति पठितम् । विनिग्रहशब्दस्तु तत्र तत्र निरोधार्थ एवाचार्येण निर्दिष्टः; यथा वातगुल्मनिदाने—"रूक्षान्नपानं विषमातिमात्रं विचेष्टितं वेगविनिग्रहश्च" (च. चि. स्था. अ. ५) इति; तथाऽन्तर्वेगज्वरलक्षणे "दोषवर्चोविनिग्रहः–" (च. चि. स्था. अ. ३) इति । एतेन, ज्वरमुक्तिलक्षणे क्षवस्य पाठात् कथमेतल्लक्षणमिति यदाशङ्कितं कार्तिककुण्डेन तदपि निरस्तम् । आध्मानं वायुना सवेदनमुदरपूर्णत्वम् । शिरोहृद्गात्ररुगित्यत्र गात्रग्रहणेन शिरोहृद्ग्रहणे सिद्धे तदभिधानं विशेषेण शिरसि हृदि च वेदनार्थम् । एतानि रूपाणि प्रायोभावित्वेन निर्दिष्टानि सुश्रुतेन, तेन चकारेणान्यान्यपि चरकोक्तानि बोद्धव्यानि । तान्येव गद्येनोक्तानि सुखग्रहणार्थं श्लोकेन मया प्रदर्श्यन्ते—'भवन्ति विविधा वातवेदनाः पादसुप्तता । पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता ॥ ऊरुसादो हनुस्तम्भो विश्लेषः संधिजानुनोः । शुष्ककासो वमिर्लोमदन्तहर्षः श्रमभ्रमौ ॥ अरुणं नेत्रमूत्रादि तृट्प्रलापोष्णकामिताः' इति ॥८॥९॥

*वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥ १० ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ११ ॥
(सु. उ. तं. अ. ३९)

तथा क्षवस्तम्भः क्षवः छिक्का तस्याः स्तम्भोऽनिर्गमनम् । केचित्तु 'क्षवः स्तम्भः' इति भिन्नं पदं पठन्ति, तन्मते क्षवः छिक्का, स्तम्भो गात्राणामिति व्याख्यानयन्ति; तन्न युक्तम् । रौक्ष्यं गात्राणामेव । चकारात् कृष्णविण्मूत्रनेत्रत्वं समुच्चीयते । अन्ये तु 'गात्राणां रौक्ष्यमेव च' इत्यत्र स्थाने 'श्यावाङ्गमलमूत्रता' इति पठन्ति । शिरसि हृदि गात्रेषु रुक् पीडा । वैरस्यं विरसता । गाढविट्कता बद्धमलता । शूलाध्माने शूलमुदरशूलम् । जृम्भणं जृम्भाबाहुल्यम् । अनिलजे ज्वरे एतानि लक्षणानि भवन्ति । एतानि प्रकृतिसमसमवेतानि" (आ० द०) ॥ ८ ॥ ९ ॥

*"पैत्तिकमाह–वेग इत्यादि । वेगस्तीक्ष्णः तीव्रवेगः । कण्ठौष्ठमुखनासानां पाक इति सुगमम् । वक्त्रकटुता मुखतिक्तत्वम् । यदुक्तमभिधाने,–"कटुः स्यात् कटुतिक्तयोः"–इति । पैत्तिके ज्वरे एतानि लक्षणानि भवन्ति" (आ० द०) ॥ १० ॥ ११ ॥

१ 'कथमत्र लक्षणत्वं' इति क. ख. । २ 'शिरोरुग्गात्ररुगित्यत्र गात्रग्रहणेन शिरोग्रहणे सिद्धे तदभिधानं विशेषेण शिरसि वेदनासूचनार्थम्' इति क. ।

पित्तज्वरलक्षणमाह—वेगस्तीक्ष्ण इत्यादि । अतिसारः पित्तस्य सरत्वेन सद्रवा प्रवृत्तिर्न त्वतिसार एव, तस्य ज्वरोपद्रवत्वात् । निद्राल्पत्वं स्वल्पनिद्रात्वम् । उक्तं हि सुश्रुते—"निद्रानाशोऽनिलात् पित्तात्" (सु. शा. स्था. अ. ४) इत्यादि । वमिः पित्तस्य कफस्थानगमनात् । स्वेदो घर्मागमनं, प्रायेण सामदोषेण स्रोतसां निरोधात् सर्वज्वरेषु घर्मनिरोधः, अत्र तु पित्तस्य तैक्ष्ण्याज्ज्वरप्रभावाद्वा स न भवति । प्रलापोऽसंबद्धभाषणम् । वक्त्रकटुता मुखतिक्तत्वं, चरके हि पैत्तिकनानात्मजचत्वारिंशद्विकारेषु तिक्तास्यतायाः पाठादनुभवाच्च । कार्तिकस्त्वरोचके "कट्वम्ललुष्णं विरसं च पूति पित्तेन विद्याल्लवणं च वक्त्रम्" (च. चि. अ. २६)—इति वचनं दृष्टान्तमुपन्यस्य कटुमुखत्वमपीच्छति । तन्न, तत्रापि संदेहात् । यदुक्तं,—"कटु स्यात् कटुतिक्तयोः"—इति । तस्मात् "योऽम्लं भृशोष्णं कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा । सदाहचोषज्वरवक्त्रशोषं सा पित्तकोपप्रभवा हि छर्दिः" (सु. उ. तं. अ. ४९)—इति सुश्रुतवचनात् कटुमुखत्वमप्येष्टव्यमिति । मूर्च्छेति मूर्च्छा रूपाद्यविज्ञानं, तमःप्रवेशो विस्मृतिरित्याहुः । मदो मत्तत्वमिव, यथा—पूगकोद्रवधत्तूरभक्षणादौ । भ्रमश्चक्रस्थितस्येव भ्रमद्वस्तुदर्शनमित्याहुः; अन्ये तु स्वदेहभ्रमणज्ञानम् । ननु, भ्रमस्याशीतिवातविकारपठितस्य वातनानात्मजत्वात् कथं पित्तविकारे पाठः ? उच्यते, "न रोगोऽप्येकदोषजः" इति वचनात् पैत्तिके वातानुबन्धाद्भ्रम इति जेज्जटः समाधानमुक्तवान् । अथवा दोषदूष्यसंमूर्च्छनप्रभावात् कारणादृष्टस्यापि रूपस्य कार्ये उपलम्भः; यथा—अल्पवातारब्धातिसारादावविवारुणत्वं, हरिद्राचूर्णसंयोगे इव लौहित्यम् । यत्तूक्तं सुश्रुते—"रजःपित्तानिलाद्भ्रमः" (सु. शा. स्था. अ. ४)—इति, तत्रापि वातानुगतपित्तजत्वमेव बोद्धव्यम्, अन्यथा भ्रमस्य वातिकनानात्मजत्वमेव न स्यादिति । अपरे तु पित्तदूषितनेत्रत्वेन विपर्यस्तज्ञानं भ्रमः, पीतः शङ्ख इत्यादिवत् । चकारः पूर्ववदनुक्तसमुच्चयार्थः । तद्यथा—तीव्रोष्मता रक्तकोठाः शीतेच्छताऽरुचिरिति ॥ १० ॥ ११ ॥

*स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥ १२ ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
[स्रोतोरोधो रुगल्पत्वं प्रसेको लवणास्यता ।
नात्युष्णगात्रता च्छर्दिर्लालास्रावोऽविपाकता ॥]
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥ १३ ॥

* "मधुरास्यता मधुरवक्त्रत्वम् । मूत्रपुरीषयोः शौक्ल्यम् । गौरवं गुरुगात्रता । शीतं शीताविर्भावः । उत्क्लेदः श्लेष्मनिष्ठीवनम् । रोमहर्षो रोमाञ्चः । अतिनिद्रता निद्राधिक्यम् । प्रतिश्यायः नासास्रवणम् । स्रोतोरोधो रसवाहिनां स्रोतसां रोधः । कासः प्रसिद्धः । अविपाकता अन्नाविपाकः । कफजे ज्वरे एतानि लक्षणानि भवन्ति" (आ० द०) ॥१२॥१३॥

१ 'पठित्वा, तदुपन्यस्य' इति क. ख. । २ 'कारणादृष्टदोषस्यापि' इति क. । ३ 'यथा' इति क. ख. पुस्तकयोर्न पठ्यते । ४ '°संयोगतो यथा' इति क. ख. । ५ आतङ्कदर्पणसंमतोऽयं पाठः ।

कफज्वरलक्षणमाह—स्तैमित्यमित्यादि । स्तैमित्यमङ्गानामार्द्रपटावगुण्ठितत्वमिव । स्तिमितो वेगो मन्दो वेगः । आलस्यमिति "समर्थस्याप्यनुत्साहः कर्मस्वालस्यमुच्यते" (सु. शा. स्था. अ. ४)-इत्यालस्यलक्षणमाहुः । स्तम्भः अङ्गस्तब्धता । तृप्तिः तृप्तस्येवान्नानभिलाषः । उत्क्लेदः कण्ठोपस्थितवमनत्वमिव । अरुचिरत्र सत्यप्यभिलाषे अभ्यवहारासामर्थ्यमिति भेदः । चकारः पूर्ववत् । तेन "तथाऽङ्गे पीडकाः शीतं प्रसेकश्छर्दितन्द्रिके । हृदुपलेप उष्णाभिलाषिता वह्निमार्दवम्-" इति ॥ १२ ॥ १३ ॥

*तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥ १४ ॥
पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ।
(सु. उ. तं. अ. ३९)

वातपित्तज्वरलक्षणमाह—तृष्णेत्यादि । पर्वाणि भिद्यन्त इव वेदना पर्वभेदः । एतानि च लिङ्गानि विकृतिविषमसमवायारब्धस्य बोद्धव्यानि । विकृतिविषमसमवायारब्धत्वं चैषां केवलवातिकपैत्तिकज्वरलक्षणानां मध्ये केषांचिदेव नियमेन पाठात्तदतिरिक्तलक्षणपाठाच्च बोद्धव्यम् । यथा—अत्रैव वातपैत्तिकेऽरुचिरोमहर्षौ, वक्ष्यमाणवातश्लैष्मिके स्वेदः संतापश्च, एवं कफपैत्तिके अनवस्थितशीतदाहौ, एवं सन्निपातजे सास्रकलुषादिनेत्रत्वशिरोलोटनादि । प्रकृतिसमवायारब्धे तु वातजादिज्वरलिङ्गान्येव समस्तानि कतिपयानि वा भवन्ति । अत एव चिकित्सिते चरको विकृतिविषमसमवायारब्धानां द्वन्द्वसन्निपातज्वराणां लक्षणानि साक्षात् पठित्वा निदानस्थानोक्तवातादिज्वरलिङ्गातिदेशेन प्रकृतिसमसमवेतानां द्वन्द्वसन्निपातज्वराणां लक्षणमुक्तवान् । यदाह—"निदाने त्रिविधा प्रोक्ता या पृथग्[३]ज्ज्वराकृतिः । संसर्गसन्निपातानां तया चोक्तं स्वलक्षणम्" (च. चि. स्था. अ. ३)-इति । एवं वक्ष्यमाणं द्वन्द्वसन्निपातलक्षणं व्याख्येयम् । प्रकृतिसमसमवायविकृतिविषमसमवाययोश्चायमर्थः—प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्यकारणभावसंबन्धः प्रकृतिसमसमवायः, कारणानुरूपं कार्यमित्यर्थः, यथा—शुक्लतन्तुसमवायारब्धस्य पटस्य शुक्लत्वम् ।

*"तृष्णाद्याः शिरोरुजान्ताः सुगमाः । कण्ठास्यशोषः कण्ठशोषो मुखशोषश्च । वमथुश्छर्दिभेदः शुगशुगीति लोके । रोमहर्षः रोमाञ्चः । अरुचिः प्रसिद्धा । तमः अन्धकारप्रविष्टस्येवार्थासंवित्तिः । पर्वभेदः पर्वाणि भिद्यन्त इति संधिषु वेदनाभेदः । द्वन्द्वजेषु सान्निपातिकेषु च कानिचिल्लक्षणानि विकृतिविषमसमवायारब्धानि भवन्ति, कानिचित्प्रकृतिसमसमवायारब्धानि भवन्ति । दोषाणामेव लक्षणानि दृश्यन्ते प्रकृतिसमसमवायारब्धानि, विपरीतानि तु विकृतिविषमसमवायारब्धानि । प्रकृतिसमसमवायो यथा—कफपित्तजे लिप्ततिक्तास्यत्वं; वातपित्तयोर्लक्षणेषु अरुचिरोमहर्षौ तु विकृत्यारब्धौ दृश्येते, वातश्लेष्मणोर्लक्षणेषु संतापो नास्ति, सान्निपातिकज्वरलक्षणे दृश्यते सोऽपि विकृत्यारब्धः, शिरसो लोटनं वातपित्तश्लेष्मणां लक्षणेषु न दृश्यते सान्निपातिकज्वरलक्षणे दृश्यते तदपि विकृत्यारब्धम् । एवं द्वन्द्वजसन्निपातजेषु सर्वेष्वपि रोगेषु बोद्धव्यम्" (आ० द०) ॥ १४ ॥—

१ 'इति पर्वभेदः पर्ववेदना' इति क. ख. । २ 'द्वन्द्वसन्निपातज्वराणां' इति क. ख. पुस्तकयोर्न पठ्यते । ३ 'पृथक्त्वात्' इति ख. ।

विकृत्या हेतुभूतया विषमः कारणाननुरूपः समवायो विकृतिविषमसमवायः, यथा—हरिद्राचूर्णसंयोगजं लौहित्यमिति ॥ १४ ॥—

*स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च ॥ १५ ॥
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनम्।
संतापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥ १६ ॥
(सु. उ. तं. अ. ३९)

वातश्लेष्मज्वरलक्षणमाह—स्तैमित्यमित्यादि। स्वेदाप्रवर्तनं स्वेदस्य आ समन्तादकारणेन प्रवर्तनं विकृतविषमसमसमवायारब्धत्वादिति कार्तिकः। युक्तं चैतत्; यदाह हारीतः—"शिरोग्रहः स्वेदभवो ज्वरस्य कासश्च लिङ्गं कफवातजस्य"—इति। स्वेदभवः स्वेदोत्पत्तिः। मध्यवेगो नातितीक्ष्णो नातिमृदुरिति ॥ १५ ॥ १६ ॥

†लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
मुहुर्दाहो मुहुः शीतं श्लेष्मपित्तज्वराकृतिः ॥ १७ ॥
(सु. उ. तं. अ. ३९)

श्लेष्मपित्तज्वरलक्षणमाह—लिप्तेत्यादि। श्लेष्मणा लिप्तं पित्तेन तिक्तं च आस्यं मुखं यस्य, तस्य भावो लिप्ततिक्तास्यता। तन्द्रा निद्रावत्क्लान्तिः[1]। मोहो मूर्च्छा। एतानि लिङ्गानि प्रायोभावित्वेन निर्दिष्टानि, तेनान्यान्यपि चरकोक्तानि बोद्धव्यानि[2]। यथा—"तथा स्तम्भश्च संस्वेदः कफपित्तप्रवर्तनम्"—इति ॥ १७ ॥

‡क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ १८ ॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः।
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ॥ १९ ॥
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ २० ॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ २१ ॥
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ २२ ॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ २३ ॥
(च. चि. अ. ३)

*"स्तैमित्यमार्द्रवस्त्रावगुण्ठितत्वमिव, अन्ये निश्चलत्वं ज्वरितस्य। पर्वणां भेदो वेदनाविशेषः संधिषु। निद्रा प्रसिद्धा। गौरवमङ्गानाम्। शिरोग्रहः शिरो गृहीतमिव मन्यते। प्रतिश्यायो नासास्रावः। स्वेदाप्रवर्तनम् इदमपि लक्षणं विकृतिविषमसमवायारब्धम्। संतापोऽपि विकृतिविषमसमवायारब्धः" (आ० द०) ॥ १५ ॥ १६ ॥

† तन्द्रा निद्रावत्क्लान्तिः। तन्द्रालक्षणमाह—"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः। निद्रार्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्"—इति (आ० द०) ॥ १७ ॥

‡ "रुजाशब्दोऽस्थ्यादिभिः संबध्यते। कर्णौ सस्वनौ सशब्दौ, सरुजौ पीडान्वितौ

१ 'लोचनक्लान्तिः' इति क. ख.। २ 'लिखितानि' इति क. ख.।

सान्निपातिकज्वरलक्षणमाह—क्षणे दाह इत्यादि । रुजा शूलम्, अस्थ्यादिभिः संबध्यते । सास्रावे साश्रुणी । कलुषे आविलवर्णे । निर्गतं भुग्नं संकुचितता ययोस्ते निर्भुग्ने, "विस्फारिते इत्यर्थः" इति जेज्जटः; "अन्तःप्रविष्टे"-इत्यन्ये, "अतिकुटिले"-इति चक्रः। शूकैः शूकशिम्बि(म्बा)धान्यादेः । परिदग्धा दग्धवत्कृष्णवर्णा। खरस्पर्शा खरो गोजिह्वावत् स्पर्शो यस्यां सा तथा। स्रस्ताङ्गता निःसहावयवता। ष्ठीवनं रक्तस्य पित्तस्य वा मुखेन स्वल्पोद्गिरणम् । शिरसो लोठनमितस्ततश्चालनम्। कृशत्वं नातिगात्राणां दोषपूर्णत्वेन । प्रततं निरन्तरम्। कोठो भालुकितन्त्रे पठितः। तद्यथा-"वरटीदष्टसंकाशः कण्डूमांल्लोहितोऽस्रकफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः"-इति । मूकत्वं मन्दवचनता, अवचनता वा। गुरुत्वमुदरस्य च उदरगौरवम्, चिरात् पाकश्च दोषाणामिति अतिसामतारब्धत्वेन । चकारादन्यान्यपि बोद्धव्यानि । यदाह वाग्भटः-"तद्वच्छीतं महानिद्रा दिवा जागरणं निशि । सदा वा नैव वा निद्रा महान् स्वेदोऽथवा न वा ॥ गीतनर्तनहास्यादिविकृतेहाप्रवर्तनम्"-(वा. नि. स्था. अ. २) इति । एतच्च लक्षणं त्रयोदशसन्निपातेषु मध्ये समानातुल्यैर्दोषैस्तुल्यैरारब्धस्य ज्वरस्य चरकेण पठितं; तुल्यर्णकोल्बणादीनां च द्वादशानां लक्षणं तत्रैव द्रष्टव्यम् । तथाच काश्मीरपाठे चरकः,-"भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक् । वातपित्तोल्बणे विद्याल्लिङ्गं मन्दकफे ज्वरे ॥ शैत्यं कासोऽरुचिस्तन्द्रापिपासादाहरुग्व्यथाः । वातश्लेष्मोल्बणे व्याधौ लिङ्गं पित्तावरे विदुः ॥ छर्दिः शैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना। मन्दवाते व्यवस्यन्ति लिङ्गं पित्तकफोल्बणे ॥ सन्ध्यस्थिशिरसः शूलं प्रलापो गौरवं भ्रमः । वातोल्बणे स्याद्द्व्यनुगे तृष्णा कण्ठास्य-

---

भवतः। कण्ठः शूकैर्धान्याग्रतीक्ष्णकण्टकाकारैः, अन्ये कपिकच्छूशूकैरिवावृतः व्याप्त इव। तन्द्रा प्रसिद्धा, मोहोऽचैतन्यं, प्रलापोऽसंबद्धभाषणम्। भ्रमश्चक्रारूढस्येव, अन्ये तु विपरीतपदार्थज्ञानं स्थाणौ पुरुषज्ञानवत् । खरस्पर्शा कर्कशा। स्रस्ताङ्गता विकलाङ्गत्वम्। ष्ठीवनं मुखेन रक्तपित्तस्यैव रक्तकफमिश्रितस्योद्गिरणम्। तृष्णा पिपासा। स्वेदमूत्रपुरीषाणां चिरेणाल्पशो दर्शनं चिरात् स्रुतिः। कण्ठकूजनं कण्ठेनाव्यक्तशब्दः। कृशत्वं नाति नातिदुर्बलत्वम् । कोठानां श्यावरक्तानां दर्शनं शरीरे, मण्डलानां सकलानां च दर्शनम्। स्रोतसां मुखनासाकर्णादिषु पाकः। चिरात् पाकश्च दोषाणामिति अतिसामत्वारब्धेन दोषाणामेकत्र मिलितानां चिरकालेन पाको निरामता । प्रकृतिसमसमवाये सन्निपाते पृथग्वातादिज्वरस्यैव लक्षणं ज्ञेयम्। हीनमध्याधिकक्रमेण सन्निपाताः षट्, तुल्बणेन त्रयः, एकोल्बणेन त्रयः, समत्वेनैकः, एवं त्रयोदशसन्निपाताः प्रकृतौ । अत्र सुश्रुतस्तु दोषोत्कर्षापकर्षतारतम्येन धात्वाद्यावरणभेदेन च सन्निपातभेदानामानन्त्यात् पृथक्पृथग्लक्षणं नोक्तवान्; किंतु तुल्यकुपितैर्दोषैरेकमेव सन्निपातलक्षणं पठितवान् । तद्यथा-"नात्युष्णशीत" इत्यादि । अथ भालुकितन्त्रे एवंपैत्तोल्बणादिलक्षणमन्यथा पठितम् । तद्यथा-"आमो ह्याहारदोषात् प्रथममुपचितो हन्ति वह्निं शरीरे श्लेष्मत्वं याति भुक्तं सकलमपि ततोऽसौ कफो वायुदुष्टः। स्रोतांस्यापूर्य रुन्ध्यादनिलमथ मरुत् कोपयेत् पित्तमन्तः संमूर्च्छयान्योन्यमेते प्रबलमिति नृणां कुर्वते सन्निपातम्" इति; तथा 'वातपित्ताधिको यस्य सन्निपातः प्रकुप्यति' इत्यादि" (आ० द०) ॥ १८-२३ ॥

---

१ 'लक्षणं बोद्धव्यम्' इति क. ख.। २ "दाहरुक् तथा' इति क. ख.। ३ 'असंबद्धभाषणम्' इति ग.।

शुष्कता ॥ रक्तविण्मूत्रता दाहः स्वेदस्तृष्णा बलक्षयः। मूर्च्छा चेति त्रिदोषे स्याल्लिङ्गं पित्ते गरीयसि ॥ आलस्यारुचिहृल्लासदाहवम्थ्यरतिभ्रमैः। कफोल्बणं सन्निपातं तन्द्राकासेन चादिशेत् ॥ प्रतिश्या छर्दिरालस्यं तन्द्राऽरुच्यग्निमार्दवम्। हीनवाते पित्तमध्ये लिङ्गं श्लेष्माधिके मतम् ॥ हारिद्रमूत्रनेत्रत्वं दाहस्तृष्णा भ्रमोऽरुचिः। हीनवाते मध्यकफे लिङ्गं पित्ताधिके मतम् ॥ शिरोरुग्वेपथुश्वासप्रलापच्छर्द्यरोचकाः। हीनपित्ते मध्यकफे लिङ्गं वाताधिके मतम् ॥ शीतता गौरवं तन्द्रा प्रलापोऽस्थिशिरोतिरुक्। हीनपित्ते वातमध्ये लिङ्गं श्लेष्माधिके विदुः ॥ वर्चोभेदोऽग्निदौर्बल्यं[1] तृष्णा दाहोऽरुचिर्भ्रमः। कफहीने वातमध्ये लिङ्गं पित्ताधिके विदुः ॥ श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक्। कफहीने पित्तमध्ये लिङ्गं वाताधिकें मतम्"–(च. चि. स्था. अ. ३) इति। विकृतौ नियमो नास्ति; तेन विकृतिविषमसमवायादनेकप्रकारा भवन्ति[2]। अतः सुश्रुतेनाप्यन्यादृशं सन्निपातलक्षणं पठितम्–"नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतप्रभः। खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः ॥ साश्रुनिर्भुग्ननयनो भक्तद्वेषी हतस्वरः। श्वसन्निपतितः शेते प्रलापोपद्रवान्वितः ॥ अभिन्यासं तु तं प्राहुर्हतौजसमथापरे। सन्निपातज्वरं कृच्छ्रमसाध्यमपरे जगुः"–(सु. उ. तं. अ. ३९) इति। तथा भालुकितन्त्रे ह्युल्बणैकोल्बणादिलक्षणमन्यथा पठितम्। तद्यथा[3],–"वातपित्ताधिको यस्य सन्निपातः प्रकुप्यति। तस्य ज्वरोऽङ्गमर्दस्तृट्तालुशोषप्रमीलकाः ॥ आध्मानतन्द्रारुचयः श्वासकासभ्रमश्रमाः। पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति ॥ अन्तर्दाहो बहिः शीतं तस्य तन्द्रा च बाधते। तुद्यते दक्षिणं पार्श्वमुरःशीर्षगलग्रहाः ॥ निष्ठीवेत् कफपित्तं च तृष्णा कण्डूश्च जायते। विड्भेदश्वासहिक्काश्च बाधन्ते सप्रमीलकाः ॥ विभुफल्गू[4] च तौ नाम्ना सन्निपातावुदाहृतौ। श्लेष्मानिलाधिको यस्य सन्निपातः प्रकुप्यति ॥ तस्य शीतज्वरो निद्रा क्षुत्तृष्णा[5] पार्श्वनिग्रहः। शिरोगौरवमालस्यमन्यास्तम्भप्रमीलकाः ॥ उदरं दह्यते चास्य कटिर्वस्तिश्च दूयते। सन्निपातः स विज्ञेयो मकरीति सुदारुणः ॥ वातोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति। तस्य तृष्णाज्वरग्लानिपार्श्वरुग्दृष्टिसंक्षयाः ॥ पिण्डिकोद्वेष्टनं दाह ऊरुसादो बलक्षयः। सरक्तं चास्य विण्मूत्रं शूलं निद्राविपर्ययः ॥ निर्भिद्यते गुदं चास्य वस्तिश्च परिकृत्यते। आयम्यते भिद्यते च हिक्कते विलपत्यपि ॥ मूर्च्छते स्फायते रौति नाम्ना विस्फुरकः स्मृतः। पित्तोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति ॥ तस्य दाहो ज्वरो घोरो बहिरन्तश्च वर्धते। शीतं च सेवमानस्य कुप्यतः कफमारुतौ ॥ ततश्चैनं प्रधावन्ते हिक्काश्वासप्रमीलकाः। विसू-

---

१ 'पर्वभेदोऽग्निदौर्बल्यं' इति क. ख.। २ अस्याग्रे क. पुस्तके "प्रकृतिसमसमवाये तु सन्निपाते पृथग्वातादिज्वरलक्षणं ज्ञेयं; हीनमध्याधिकक्रमेण सन्निपाता एव षट्, ह्युल्बणत्वेन त्रयः, एकोल्बणत्वेन त्रयः, समत्वेनैकः, एवं त्रयोदश प्रकृतौ" इत्यधिकः पाठ उपलभ्यते। ३ अस्याग्रे क. पुस्तके 'वातः पित्ताधिकोऽयं प्रथममुपचितो हन्ति वह्निं शरीरे श्लेष्मत्वं याति भुक्तं सकलमपि ततोऽसौ कफो वायुदुष्टः। स्रोतांस्यापूर्य रुन्ध्यादनिलमथ मरुत् कोपयेत् पित्तमन्तः संमूर्च्छयान्योन्यमेते प्रबलमिति नृणां कुर्वते संनिपातम्' इत्यधिकः पाठ उपलभ्यते। ४ 'विभुः फल्गुश्च' इति क. ख.। ५ ख. पुस्तके तृष्णेत्यत्र चिन्तेति पाठः।

चिका पर्वभेदः प्रलापो गौरवं क्रमः ॥ नाभिपार्श्वरुजा तस्य खिन्नस्याशु विवर्धते । खिद्यमानस्य रक्तं च स्रोतोभ्यः संप्रवर्तते ॥ शूलेन पीड्यमानस्य तृष्णा दाहश्च वर्धते । असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते ॥ नहि जीवत्यहोरात्रमेतेनाविष्टविग्रहः । कफोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति ॥ तस्य शीतज्वरस्वप्नगौरवालस्यतन्द्रयः । छर्दिमूर्च्छातृषादाहतृड्यरोचकहृद्ग्रहाः ॥ ष्ठीवनं मुखमाधुर्यं श्रोत्रवाग्दृष्टिनिग्रहः । श्लेष्मणो निग्रहं चास्य यदा प्रकुरुते भिषक् ॥ तदा तस्य भृशं पित्तं कुर्यात् सोपद्रवं ज्वरम् । निगृहीते तु पित्ते च भृशं वायुः प्रकुप्यति ॥ निराहारस्य सोऽत्यर्थं मेदोमज्जास्थि बाधते । अथान्नं नाति भुङ्क्ते या त्रिरात्रं न हि जीवति ॥ मेदोगतः सन्निपातः [१]फफ्फणः स उदाहृतः । कामान्मोहाच्च लोभाच्च भयाच्चापि प्रपद्यते ॥ मध्यहीनाधिकैर्दोषैः सन्निपातो यदा भवेत् । तस्य रोगास्त एवोक्ताः प्रायो दोषबलाश्रयाः"—इत्यादि । ननु, वातादयः परस्परं विरुद्धगुणाः; विरुद्धगुणानां च संभूयैककार्यारम्भकत्वं नोपपद्यते, परस्परोपघातात्तुहिनदहनयोरिव; तत् कथं सान्निपातिकविकारोत्पत्तिरिति[३] । अत्र समाधानमुक्तं दृढबलेन; यथा,—"विरुद्धैरपि

१ 'धावति' इति क. ख. ।   २ 'फफ्फगः' इति क. ख. ।   ३ अस्याग्रे क. पुस्तके 'तद्यथा—वातस्य शीतरूक्षादिगुणयुक्तस्य उष्णस्निग्धादिगुणयुक्तेन पित्तेन, तथा कफस्य गौरवस्निग्धात्मकत्वोभाभ्यां विरोधः । "तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः । पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् । स्निग्धः शीतो गुरुर्मन्दः श्लक्ष्णो मृत्स्नः स्थिरः कफः ॥ कट्वम्ललवणं पित्तं स्वाद्वम्ललवणः कफः । कषायतिक्तकटुको वायुर्दृष्टोऽनुमानतः"—इति । किंच, मिथ्याहारविहाराभ्यां दोषा युगपदुत्पद्यन्ते आहोस्वित्कालव्यवधानेन ? आद्ये समबलत्वेन तारतम्येन वा ? नाद्यः, सर्वेषां समबलत्वेन परस्परघातकानां युगपदुत्पत्तिर्न स्यात् । अथ भिन्नाश्रयतया साऽस्तु; तदपि न, कुपितानां सर्वदेहव्यापित्वेन परस्परसंबन्धात् । तदुक्तं,—"व्याप्नोति सहसा देहमापादतलमस्तकम्"—इति । किंच ज्वरोत्पत्तौ तावत् कुपितानामामाशयगतानां रसदूषकाणां ज्वरोत्पादकत्वं, तन्मिलितानामेव स्वाधधादुष्टेनेति । न द्वितीयः, पूर्वदोषाधिकत्वात्[१] । किंच तारतम्येनोत्पत्तौ मूषकमार्जारवद्विरोधे प्रागेव तेन प्रबलेन दुर्बलाघातः सुकरः; दृश्यते च मात्स्यो न्यायः । अथ युगपदुत्पादका आहारादयो न भवन्ति; तत्र युगपदुत्पादकद्रव्यमेकमनेकं वा ? तस्य पाञ्चभौतिकत्वेन विरुद्धगुणाधिकार(कारण)स्य त्रिदोषोत्पादकत्वं न स्यात् । अस्तु वाऽविचारितरमणीयम् । एकमेवाभ्यवहीयत इति कथम् ? अस्तु वा साधकत्वेन सहकारिणि द्रव्याभ्यवहारे तस्य विरुद्धगुणवत्त्वेन दोषान्तरघातकत्वेनानुत्पत्तिः तदवस्थतयैव जायमानः कैवल्यैकदोषजो न संसर्गसन्निपातजो ज्वर इति । अथादृष्टाधीनत्वेन सहकारिणो भावे (संभवे) एकाभ्यवहारे सन्निपातः, तर्हि सर्वेषां समबलत्वेनेत्यत्रोक्तदोषः स्यात् । अथानेकद्रव्याणामभ्यवहारे त्रिदोषप्रकोपणं न संभवति । तत्र तुल्यानामेवाभ्यवहारः कथं ? यतो भिन्नरुचित्वात् । यथारुच्यभ्यवहारे तारतम्यसंबन्धात् । तारतम्येनैव भवति प्रकोपो न युगपदिति प्रतिज्ञाहानिः । अत्राप्यदृष्टाधीनत्वात्तुल्याभ्यवहारे प्रतिघातकत्वाभावेऽपि यौगपद्यं; तर्हि स एव दोषः । अथ कालव्यवधानेन, तत्र पूर्वस्मादुत्तरस्य

१ 'पूर्वदोषोऽधिकः स्यात्' इति वा पाठः ।

न त्वेते गुणैर्घ्नन्ति परस्परम्। दोषाः सहजसात्म्यत्वाद्घोरं विषमहीनिव"—इति (च. चि. स्था. अ. २६)। एतच्चान्ये दूषयन्ति—सहजत्वादित्यनैकान्तिकं, यतः सहजानपि धातून् दोषा उपघ्नन्ति; सात्म्यत्वादित्यपि साध्याविशिष्टं, यतः सात्म्यत्व-मबाधकत्वं, तदेव च दोषाणामिह साध्यम्। अत्रोच्यते—दोषा नोपघ्नन्तीति कोऽय-मनुपघातः साध्यते? विकृतेरकारकत्वं वा, अविनाशकत्वं वा? नाद्यः, दोषाणां परस्परं विकृतिकर्तृत्वात्। यथोक्तं चरके—"विशोषयेद्बस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा। यदा तदाऽश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः"—इति (च. चि. स्था. अ. २६); तथा चोक्तं वाग्भटेन—"सश्लेष्ममेदः पवनः साममत्यर्थ-संचितम्। अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते॥ सक्थ्यस्थिनी प्रपूर्यान्तः श्लेष्मणा स्तिमितेन च। तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ" (वा. नि. स्था. अ. १५) इति[2]। अविनाशकत्वं तु विद्यत एव, धातुदोषयोः परस्परं च दोषाणां सर्व-

---

भिन्नः कालो भवेत्; समबलो वा न्यूनाधिकबलो वा? नाद्यः, उपसंजातविरोधित्वेनोत्पत्तुमेव न शक्नोति। न द्वितीयः, न्यूनबलत्वेन पूर्वप्रबलेनैव विनाशितत्वात्, अकिंचित्करत्वाच्च। न तृतीयः, विचारासहत्वात्। तत्र वक्तव्यमधिकबलत्वमुत्पत्तेः पूर्वं पश्चाद्वा? नाद्यः, अनुत्पन्न-स्याधिक्याभावात्। अधिकत्वं धर्मः, स तु सति धर्मिणि चिन्त्यः। अथ पश्चात्? तत्र, उत्पत्त्य-धिके अधिकेन घातस्योपसंजातविरोधिन उत्पत्तिरेव न, कुतोऽधिकत्वम्। अत्राप्यधिकत्वं न संभवति। तस्माद्विरुद्धगुणानां संभूय कर्तृत्वं घटघटाभावयोरिव घटघटप्रध्वंसयोरिव सहावस्था-यित्वं नास्ति दहनतुहिनवत्। अत्रोच्यते—सर्वे विकल्पा अनङ्गीकारपाशहताः, सन्निपातस्तु स्यादेव, मिथ्याहारादिना कुपिता दोषा युगपत् कालव्यवधानेन वा समबलत्वेन तारतम्येन वा परस्परविरुद्धा अपि स्वस्थानादामाशयमागत्य रसं दूषयित्वा द्वन्द्वसन्निपातोत्पादका भवन्ति, उक्तं च—मिथ्याहारेत्यादि। कालव्यवधानेनोत्पन्नानामपि कालान्तरेण यौगपद्यमेव भवतीति न कदा(का)चिदनुपपत्तिः। ननु, कथमादिपश्चाद्भावेनोत्पन्नानां यौगपद्यमिति चेत्? न, दोषाद्दोषान्तरोत्पत्तेः। तदुक्तं—"एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्। एकः प्रशमितो दोषः सर्वान् दोषान्निवारयेत्"—इति। तथाच चरकः,—"कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति"—इति। अत्र रुजाकरत्वाद्दोषोऽपि रोग इति टीकाकृतो व्याचक्षते, 'विकृतो दोषो रोग' इति समुदायसमुदायिनोरभेदवादिनां मतं पूर्वमेवोक्तम्। अन्यच्च तथा,—"विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च"—इति। विकृतानां घातकत्वं रोगरूपेणैव भवति, या विकृतिः स एव रोग इति न दोषरोगयोर्भेदः। अस्तु वा भेदः, मिलितैर्दोषै रोगः क्रियत इति। कथंचिदपि एकानेकद्रव्याभ्यवहारे सहकारिणो दैवान्नयाणां प्रकोपो भवत्येव। उक्तं च,—"दृष्टापराधजः कश्चित्कश्चित्पूर्वापराधजः। तत्सङ्कराद्भवत्यन्यो व्याधिरेवं त्रिधा स्मृतः"—इति। तथा,—"पित्तक्षोभे तिलाभ्यङ्गो रात्रौ च दधिभोजनम्। अनिद्रा मैथुनं यस्य सन्निपातो भवेद्ध्रुवम्"—इति। ननु दोषाणां बाध्यबाधकभावेनादिपश्चाद्भावेनोत्पत्तिर्दोषाद्दोषा-न्तरोत्पत्तिर्वा न संभवतीत्यनुपदमेवोक्तं" इत्यधिकः पाठ उपलभ्यते।

---

१ 'पित्तादिव' इति क.। २ अस्याग्रे क. पुस्तके—'न द्वितीयः, दोषाद्दोषान्तरोत्पत्तिर्दर्शि-तैवानुपदम् 'एकः प्रकुपितो दोष'इत्यादिना, अतो दोषस्य देशान्तरविल(ग)ति (?)-कारणत्वादन्य एवानुपघातः' इत्यधिकः पाठ उपलभ्यते।

थोच्छेदप्रतिपादकागमाभावात्, मरणप्रसङ्गाच्च; दोषाणामपि देहधारकत्वात्; तस्मात् सर्वथोच्छेदनिरासाभिप्रायेणैव दृढबलवचनमिह द्रष्टव्यं; ततः कुतोऽनैकान्तिकता । न चैवं सति विषस्य विषादकर्तृत्वेन दृष्टान्तविफलत्वं, विषस्य विषादादवान्तरव्यापारस्य प्राणविनाशकत्वात्; न च सर्वात्मना दृष्टान्तो भवतीति । सात्म्यत्वादित्ययमर्थः—सात्म्यत्वेन प्रतीयमानत्वात् । दोषाः परस्परं नोपघ्नन्ति, अनुपघातकत्वेन प्रतीयमानत्वात्; यद्यथा प्रतीयते तत्तथा निर्दिश्यते, यथाऽग्निकार्यो धूमोऽग्निकार्यत्वेनेति, तत् कुतः साध्याविशिष्टत्वमिति । चक्रस्तु सहजसात्म्यत्वादित्येकमेव हेतुं व्याख्यातवान्—सहजं स्वाभाविकं दोषाणां सात्म्यत्वमिति । दृढबलोक्तहेतुद्वयाक्षरसेन गयदासस्तु हेत्वन्तरमुक्तवान्,—"दैवाद्दोषस्वभावाद्वा दोषाणां सान्निपातिके । विरुद्धैः स्वगुणैः कश्चिन्नोपघातः परस्परम्"—इति संक्षेपः ॥ १८–२३ ॥

*दोषे विबद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणः ।
सन्निपातज्वरोऽसाध्यः, कृच्छ्रसाध्यस्ततोऽन्यथा ॥ २४ ॥
(च. चि. अ. ३)

तस्य सन्निपातज्वरस्यासाध्यलक्षणमाह—दोषे विबद्ध इत्यादि । दोषो मलं पित्तादिश्च; जेज्जटस्तु मलमेवाह, विबद्ध इति वचनात् । नष्टाग्नित्वमाहारापाकगम्यम् । यदुक्तं चरके—"अग्निं जरणशक्त्या"—(च. वि. स्था. अ. ४)—इति । असाध्यकृच्छ्रसाध्याभिधानेन सुखसाध्यो न भवतीति दर्शितम् । उक्तं हि चरके—"सन्निपातो

* 'संक्षेपतः सन्निपातज्वरस्यासाध्यलक्षणमाह—दोषे इत्यादि । सर्वाणि संपूर्णानि लक्षणानि यस्य स तथा । ईदृशोऽसाध्यः, ततोऽन्यथा विसदृशः अविबद्धदोषोऽल्पलक्षणः कृच्छ्रसाध्यः । उक्तं च भालुकिना—"मृत्युना सह योद्धव्यं संनिपातं चिकित्सता । यस्तु तत्र भवेज्जेता स जेताऽऽमयसंकुले ॥ संनिपातार्णवे मग्नं योऽभ्युद्धरति मानवम् । कस्तेन न कृतो धर्मः कां वा पूजां न सोऽर्हति"—इति । सुश्रुतेऽपि सन्निपातज्वरस्य मोक्षवधयोरवधिकालो दर्शितः—"सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा । पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा" (सु. उ. तं. अ. ३९)—इति । भालुकिनाऽप्युक्तं—"सप्तमी द्विगुणा यावद्दशम्येकादशी तथा । एषा त्रिदोषमर्यादा मोक्षाय च वधाय च"—इति । उक्तं च—"पित्तकफानिलवृद्ध्या दशदिवसद्वादशाहसप्ताहात् । हन्ति विमुञ्चति वाऽपि त्रिदोषजो धातुमलपाकात्"—इति । वाताधिकः सप्तमे दिने, पित्ताधिको दशमे, श्लेष्माधिको द्वादशे, मलपाकाद्विमुञ्चति, धातुपाकाद्धन्ति । धातुपाकलक्षणं तन्त्रान्तरोक्तं—"संबाध्यमानो हृदि नाभिदेशे गात्रेषु वा पाकरुजान्वितेषु । पक्वेषु वा तेषु रुजाज्वरार्तः स धातुपाकी कथितो भिषग्भिः"—इति । तन्त्रान्तरेऽप्युक्तम्—"दशद्वादशसप्ताहैः पित्तश्लेष्मानिलाधिकः । [6]पक्त्वोष्मणा धातुमलान् हन्ति मुञ्चति वा ज्वरः" इति (आ० द०) ॥२४॥

१ अस्याग्रे क. पुस्तके 'अतः सात्म्यत्वात् सहजत्वादविरोधित्वमिति यदुक्तमनैकान्तिकत्वं तन्न, उपघातशब्दस्य न्यूनाधिकपर्यायविरोधित्वात् । आहारं दोषा उपघ्नन्तीति दूष्यरसधातुदूषकत्वं दोषाणां; तच्च रसदूष्यप्रकृत्यन्यथापादकत्वं नान्यदिति कुतो नाशः । साध्याविशिष्टता तु निरस्ता स्पष्टतरा' इत्यधिकः पाठ उपलभ्यते । २ 'विषादावान्तरव्यापारस्य' इति क. । ३ 'मलं पुरीषमाह' इति आ० द० । ४ 'आहारापाचकत्वम्' इति क. । ५ 'नेत्रेषु' इति ग. । ६ 'दग्ध्वोष्मणा' इति ग. ।

दुश्चिकित्स्यानाम्'' (च. सू. स्था. अ. २५)–इति। तथा भालुकिः–''मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता''–इति। सर्वसंपूर्णलक्षण इति सर्वाणि समग्राणि, संपूर्णानि बलीयांसि, लक्षणानि यस्य स तथा॥ २४॥

*सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते॥ २५॥
(च. चि. अ. ३)

सन्निपातज्वरोपद्रवमाह—सन्निपातेत्यादि॥ २५॥

†अभिघाताभिचाराभ्यामभिशापाभिषङ्गतः।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्॥ २६॥
श्यावास्यता विषकृते तथाऽतीसार एव च।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया॥ २७॥
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः।
कामजे चित्तविभ्रंशस्तन्द्राऽऽलस्यमभोजनम्॥ २८॥
हृदये वेदना चास्य गात्रं च परिशुष्यति।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः।
अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते॥ २९॥
भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम्।
(सु. उ. तं. अ. ३९)

आगन्तुज्वरमाह—अभिघातेत्यादि। अभिघातोऽभिहननं शस्त्रलोष्टमुष्टिलगुडादिभिः; अभिचारः श्येनादियागकृतः, अथवा विपरीतैर्मन्त्रैर्लोहस्रुचा सर्षपादिहोम इत्याहुः। अभिषङ्गः कामादीनां भूतानां च संबन्धः, यदुक्तं चरके–''कामशोकभय-

* 'सन्निपातज्वरस्य अन्ते अवसाने सन्निपातक्षपितशरीरस्य पुंसः कर्णमूले कर्णपर्यन्ते सुदारुणः कष्टतमो रागरुजादियुक्तः शोफः संप्राप्तिविशेषात् कर्मवैचित्र्याद् संजायते, तेन शोफेन कश्चिदेवातुरो विमुच्यते, प्रायो मारयतीत्यर्थः' (आ० द०)॥ २५॥

† 'अथागन्तुकज्वरलक्षणमाह–अभिघातेत्यादि। अभिघातो लोहशस्त्रकाष्ठादिना। आगन्तुज्वराणां वैचित्र्यमाह–श्यावेत्यादि। विषस्य त्रिदोषकर्तृत्वेऽप्यत्यन्तपित्तकरत्वाच्छ्यावमुखत्वम्। अतिसारः स्थावरविषस्याधोगत्वात्। तोदो व्यथा। शेषं सुगमम्। तीव्रौषधिगन्धघ्राणे वमथुः छर्दिः, क्षवः छिक्का। चित्तविभ्रंशः किंकर्तव्यतामूढत्वम्। यदुक्तं वाग्भटे—''कामाद्भ्रमोऽरतिर्दाहो ह्रीनिद्राधीधृतिक्षयः। ध्याननिःश्वासबहुलं लिङ्गं कामज्वरे स्मृतम्''–इति। शेषं सुबोधम्। भयशोककोपाभिषङ्गज्वरमाह–भयादित्यादि। प्रलापः असंबद्धभाषणम्। वेपथुः कम्पः। अभिचाराभिशापाभ्यां जाते ज्वरे मोहोऽचैतन्यं जायते; अभिचारो मन्त्रादिभिर्मारणप्रयोगः, अभिशापो महर्षिगुरुसिद्धादीनामभिशपनमाक्रोशः। भूतानां देवादिग्रहाणामभि समंततो भावेन संगः भूताभिषङ्गः' (आ०द०)॥२६–२९॥—

१ 'शोथोऽतीसार एव च' इति ग.। २ 'प्रकृतिकर्मवशादित्यर्थः' इति ग.।

क्रोधैरभिषक्तस्य यो ज्वरः। सोऽभिषङ्गज्वरो ज्ञेयो यश्च भूताभिषङ्गजः" (च. चि. स्था. अ. ३)—इति। अभिशापो ब्राह्मणगुरुवृद्धसिद्धानामनिष्टाभिशपनम्। तं चागन्तुज्वरं यथास्वं दोषैर्जानीयात्। यदुक्तम्—"कामशोकभयाद्वायुः"—इत्यादि। अयं च दोषसंबन्धः पश्चाद्भावी नत्वारम्भक इति संप्राप्त्यवसरे निरूपितम्। श्यावास्यतेत्यादि। श्यावः शुक्लानुविद्धः कृष्णो वर्णः; श्यामवर्ण इत्यन्ये। विषकृते स्थावरविषभक्षणादिकृते; अतीसारः तद्विषस्याधोगत्वात्। ओषधिगन्धज इति तीव्रौषधिगन्धघ्राणजे, "पुष्पेभ्यो गन्धरजसी ओजस्विभ्यो यदाऽनिलः" (सु. उ. तं. अ. ३९)—इत्यादिना वृद्धसुश्रुतेन पठितं तृणपुष्पाख्यं ज्वरमत्रैवान्तर्भावयन्ति। कामज इत्यादि अभिमतकामिन्यप्राप्तिनिमित्ते। चित्तविभ्रंशो प्रमादिः। यदाह **वाग्भटः**—"कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः" (वा. नि. स्था. अ. २) इति। भयादिति भयाज्जाते ज्वरे। एवं शोकात् कोपादित्येतयोर्बोद्धव्यं; शोकात् प्रलाप इति संबन्धः; प्रलापश्चात्र वातकार्यः, तस्य वातपित्तकार्यत्वात्। (विशेषनिश्चयस्तु निदानात्, निदानमपि लक्षणं भवति।) उक्तं च,—"कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः" (च.चि.स्था.अ. ३)—इत्यादि। यद्येवं तत् कुतः क्रोधजे वेपथुः? तस्य वातकार्यत्वात्। उच्यते,—"एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्" इति वचनात् पित्तकोपितवातजन्य एवात्र वेपथुः, क्रुद्धश्च वेपमानो दृश्यत इति न हि दृष्टेरनुपपन्नं नामेति **जेज्जटः**। क्रोधः पित्तमिव वातं च कोपयतीति, तद्युक्तम्। यदाह **विदेहः**—"क्रोधशोकौ स्मृतौ वातरक्तपित्तप्रकोपणौ"—इति। कोपाच्चेति चकारेण शिरोरुजं समुच्चिनोति। यदाह **वाग्भटः**—"क्रोधात् कम्पः शिरोरुक् च, प्रलापो भयशोकजः" (वा. नि. स्था. अ. २)—इति। मानसत्वाविशेषेऽपि भयजादीनां पृथगुपादानं हेतुभेदात्, हेतुभेदाच्च भेदाभिधानं हेतुप्रत्यनीकचिकित्सार्थमिति। अभिचारेत्यादि। तृष्णा चेति चकारेणाभिचारजे दाहादिकं समुच्चिनोति। यदुक्तं हारीतार्थानुवादिना **वाग्भटेन**—"तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते। पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः॥ सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्धते ज्वरः" (वा. नि. अ. २)—इति। भूताभिषङ्गादिति भूता देवग्रहादय उन्मादनिदाने वक्ष्यमाणाः, तेषामभिषङ्गः संबन्धः। उद्वेग उद्विग्नचित्तता ॥२६–२९॥—

***कामशोकभयाद्वायुः, क्रोधात्पित्तं, त्रयो मलाः ॥ ३० ॥**
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः।

(च. चि. अ. ३)

आगन्तुज्वरेष्वपि प्रतिनियतदोषानुबन्धदर्शनार्थमाह—कामशोकेत्यादि। त्रयो मला भूताभिषङ्गात् कुप्यन्तीति भूतप्रभावात्। यच्च **चरकेण** निदानस्थाने "अभिषङ्गजः पुनर्वातपित्ताभ्यां" (च. नि. स्था. अ. १)—इत्युक्तं, तत् प्रायिकं मन्तव्य-

* 'कामशोकभयैर्वायुः कुप्यति, क्रोधेन पित्तं, भूताभिषङ्गात्त्रयो दोषाः कुप्यन्ति। भूतसामान्यलक्षणं वक्ष्यमाणे उन्मादनिदाने द्रष्टव्यम्' (आ० द०) ॥ ३० ॥—

१ 'शाकवर्णः' इति ख.। २ 'औषधिगन्धघ्राणजे' क. ख.। ३ 'ओषधीभ्यः' इति क. ख.। ४ अयं पाठः क. ख. पुस्तकयोः नोपलभ्यते। ५ 'पित्तमथ च' इति क.। ६ 'हेतुभेदाभिधानं च' इति क. ख.।

मिति जेज्जटः । चक्रस्त्वाह—"अभिपङ्गज इत्यनेन कामाद्यभिपङ्गज उच्यते ननु भूताभिपङ्गजः"—इति । भूतसामान्यलक्षणा इति यस्य भूतस्य देवग्रहादेरभिपङ्गात् कुप्यन्ति तस्य यल्लक्षणं रोदनादि तेन सह सामान्यं लक्षणं येषां ते तथा, इति व्याचक्षते जेज्जटादयः; दोषलक्षणानि भूतलक्षणानि च भवन्तीत्यर्थः ॥ ३० ॥—

†दोषोऽल्पोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः ॥ ३१ ॥
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ।
(सु. उ. तं. अ. ३९)

अथ विषमज्वरसंप्राप्तिमाह—दोषोऽल्प इत्यादि । अल्प इत्यनेनाबलत्वात् कालविशेषमवाप्य लब्धबलो ज्वरयति, यस्तु बलवान् स नित्यज्वरमेव करोति । अहितसंभूत इति अहिताहाराचारादिसंभूतो वृद्धः । ज्वरोत्सृष्टस्य सहसा निवृत्तज्वरस्य । वाशब्देन प्रथमतोऽपि विषमज्वरो भवतीति दर्शयति । यदुक्तं—"आरम्भाद्विषमो यस्तु"—इत्यादि । धातुमन्यतमं रसरक्तादिकम् । विषमज्वरं तृतीयकादिकम् । विषमज्वरसामान्यलक्षणं च भालुकिना पठितं,—"यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः" इति ॥ ३१ ॥

‡सन्ततं रसरक्तस्थः, सोऽन्येद्युः पिशिताश्रितः ॥ ३२ ॥
मेदोगतस्तृतीयेऽह्नि, त्वस्थिमज्जगतः पुनः ।
कुर्याच्चतुर्थकं घोरमन्तकं रोगसंकरम् ॥ ३३ ॥
(सु. उ. तं. अ. ३९)

सन्ततादिज्वराणां प्रतिनियतदूष्यान् धातूनाह—सन्ततमित्यादि । सन्ततशब्दः सततस्योपलक्षणः । तेनैतदुक्तं भवति—रसस्थः सन्ततं, रक्तस्थः सततकमिति; यदुक्तं चरके—"रक्तधात्वाश्रयः प्रायो दोषैः सततकं ज्वरम्" (च. चि. स्था. अ. ३) इति । (प्रायोग्रहणात् सततको रक्तव्यतिरिक्तं रसधातुमाश्रयते ।) रसग्रहणं चात्र विशेषपरं, सर्वज्वरेषु रसस्यावश्यदूष्यत्वात् । अन्ये तु सततग्रहणार्थं 'सन्ततौ रसरक्तस्थौ'—इति पठन्ति । तन्नातियुक्तम्, अत्र हि सन्ततसततशब्दौ संज्ञापरौ, न तु सातत्यवचनौ; तेन सन्ततशब्देन सततकस्यानभिधानात् कथमेकशेष इति दोषः । अन्येद्युरिति अन्येद्युष्कम् । घोरं दुःसहम् । अन्तकं यममिव, मारकत्वात् । रोगसंकरम् अनेकरोगसंकुलम् ॥ ३२ ॥ ३३ ॥

---

† 'ज्वरोत्सृष्टस्य पुंसोऽल्पो दोषः पुनरहितसंभूतः सन् अन्यतमं धातुं प्राप्य विषमज्वरं करोति । एवं धातुगताः' (आ० द०) ॥ ३१ ॥—

‡ 'रसस्थो दोषः संततं कुर्यादित्यन्येन संबन्धः । यो दोषो रक्ताश्रयः स सततं ज्वरं करोति । अन्ये तु सततं सातत्यार्थकं मन्यमानाः 'संततौ रसरक्तस्थौ' इति पठन्ति । तन्न युक्तम् । अत्र हेतुः—संततसततशब्दौ चात्र संज्ञापरौ न तु सातत्यवचनौ, तेन संततशब्देन सततकस्यानभिधानात् कथमेकशेषः ? भिन्नरूपयोः समानार्थयोरेवैकशेषविधानात् । तथा च वार्तिकं,—"विरूपाणामपि समानार्थानाम्"—इति । केचित्तु 'सततं रसरक्तस्थः' इति पाठं पठित्वा रसरक्तस्थो दोषः सततकं ज्वरं करोतीति । अन्ये त्वत्र सततमिति लुप्तं वर्णयित्वा संततं

---

१ "चारादिजनितः' इति क. ख. । २ 'उपलक्षणम्' इति क. ख. । ३ 'रक्तधात्वाश्रितो दोषः कुर्यात्' इति क. । ४ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते ।

*सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते ॥ ३४ ॥
अहोरात्रे सततको द्वौ कालावनुवर्तते ।
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्तते ॥ ३५ ॥
तृतीयकस्तृतीयेऽह्नि, चतुर्थेऽह्नि चतुर्थकः ।

(सु. उ. तं अ. ३९)

अथैषां लक्षणान्याह—सप्ताहमित्यादि । एते विकल्पा यथाक्रमं वातपित्तकफोल्वणत्वेन ज्ञेयाः । यथोक्तं,—"पित्तकफानिलवृद्ध्या दशदिवसद्वादशाहसप्ताहात् । हन्ति विमुञ्चति वाऽऽशु त्रिदोषजो धातुमलपाकात्"—इति । अयं च सन्ततस्त्रिदोषज एव द्वादशाश्रयत्वेन । यदुक्तं चरकेण—"यथा धातूंस्तथा मूत्रं पुरीषं चानिलादयः । युगपच्चानुपद्यन्ते नियमात् सन्तते ज्वरे" (च. चि. स्था. अ. ३)—इति । सन्तत्या अविच्छेदेन सप्ताहादीन् व्याप्य अविसर्गी अपरित्यागी, अत्यन्तसंयोगे द्वितीया । ननु, यद्येवं कथमस्य विषमज्वरे पाठः ? मुक्तानुबन्धित्वं विषमत्वं, तच्चात्र नास्ति । नैवम्, अस्यापि तथाभावात् । तथा च तल्लक्षणे चरकः—"विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणः । दुर्लभोपशमः कालं दीर्घमप्यनुवर्तते" (च. चि. स्था. अ. ३)—इति । यत्तूक्तं खरनादेन,—"ज्वराः पञ्च मयोक्ता ये पूर्वं सन्ततकादयः । चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः"—इति; तत् सन्तते मुक्तानुबन्धित्वस्यैकदाभावित्वेनाल्पत्वाच्च तद्व्यपदेशः, एकतण्डुलाभ्यवहारेऽनशनशब्दस्य व्यपदेशवत्, न हि तृतीयकादिवदावृत्त्या मुक्तानुबन्धित्वमस्येत्यभिप्रायेण द्रष्टव्यम् ।

रसस्थः सततं रक्तस्थः कुर्यादित्याचक्षते । सोऽन्येद्युरिति स इति दोषः, पिशिताश्रितो मांसाश्रितः । दोषोऽस्थिमज्जगतश्चतुर्थेऽह्नि चातुर्थकं कुर्यात् । घोरं कष्टकारकम् । रोगसंकरं प्रभूतरोगोत्पादकं, यतो गम्भीरस्थानत्वाच्चिरक्लेशनत्वाच्च रोगानन्यानप्यावहति' (आ० द०) ॥ ३२ ॥ ३३ ॥

* 'इदानीमेकदोषजस्य संततज्वरस्य विसर्गकालावधिद्वारेण लक्षणमाह—सप्ताहमित्यादि । संतत्या नैरन्तर्येण सप्ताहादीन् व्याप्य अविसर्गी अत्यागशीलः स ज्वरः संततः । अयं सुखसाध्यः; तदुक्तं तन्त्रान्तरे—"संततज्वर एवान्यः स्वल्पदुर्बलकारणः । एकदोषो द्विदोषो वा सुखसाध्यः प्रकीर्तितः"—इति । तथा च—"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः । श्लैष्मिको द्वादशाहेन ज्वरः पाकं[1] प्रगच्छति"—इति, प्रकृतिसमसमवेतत्वात् । ननु कथमस्य विषमज्वरे पाठः ? यदुक्तं खरनादेन—"ज्वराः पञ्च मयोक्ता ये पूर्वं संततकादयः । चत्वारः संततं हित्वा ज्ञेयास्ते विषमज्वराः"—इति; मुक्तानुबन्धित्वं विषमत्वं, विमुच्यानुबध्नातीति, तच्चात्र नास्ति । नैवं, अस्यापि तथाभावात् । सततकादीनां कालानुवर्तनत्वेन लक्षणमाह—अहोरात्र इत्यादि । कालाः षट् पूर्वाह्णमध्याह्नापराह्णप्रदोषार्धरात्रप्रत्यूषाः; पूर्वाह्णप्रदोषयोः कफस्य कालः, मध्याह्नार्धरात्रयोः पित्तस्य, अपराह्णप्रत्यूषयोर्वातस्य । पूर्वाह्णादीनां षण्णां कालानां मध्ये कालद्वयमनुवर्तते वेगं करोति स सततः, अह्नि एककालं रात्रावेककालं वा, अह्नि द्वौ कालौ रात्रौ द्वौ कालौ वा, एवं द्वौ कालावितीशानो यदुक्तवान् तत्र दोषोत्कर्षापकर्षाभ्यामधिककालत्वं हीनकालत्वमपि ज्ञातव्यं न तु नियमः । अन्येद्युष्को ज्वर एककालमनुवर्तते वेगं करोति अहोरात्रादन्यस्मिन्नहोरात्रे एककालमागच्छतीत्यर्थः । तृतीयकः तृतीयेऽह्नि एककालमिति संबध्यते । चातुर्थकश्चतुर्थेऽह्नीत्यत्राप्येकं कालमिति । एते चत्वारो विषमज्वराः । यदुक्तं खरनादेन—

---

१ 'नियच्छति' इति ग. ।

अथाव विषमज्वरोल्लेखेन या चिकित्सोक्ता सा सन्ततवर्जं सततादिषु कार्येति प्रति-पादनार्थम्। **हरिचन्द्रेणापि** किल "कर्म साधारणं जह्यात्तृतीयकचतुर्थकौ"-इति (च. चि. स्था. अ. ३) चरकवचनाद्विषमज्वरोक्तचिकित्सा तृतीयकचतुर्थकयोरेव, अन्येषु दोषप्रत्यनीकचिकित्सा कार्येत्यभिव्याख्यातम्। अस्यां हरिचन्द्रव्याख्यायां कर्म साधारणं सर्वत्रैव विषमज्वरे कार्यं, विशेषेण तृतीयकचतुर्थकयोरिति द्रष्टव्यम्; अन्य-थोक्ततन्त्रान्तरविरोधः। अहोरात्रे सततको द्वौ कालावनुवर्तत इति अह्नि द्वौ कालौ रात्रौ कालौ वा; अह्नि एककालं रात्रावेककालमेवं वा; द्वौ कालौ-इतीशानदेवः, नियमान-भिधानात्तथा दर्शनाच्च। अनुवर्तते वेगं करोति। तृतीयेऽह्नि तृतीयक इति वेगदिनापेक्षया तृतीयेऽह्नि यो भवति स तृतीयको भवति, एवं चतुर्थकेऽपि वाच्यम्॥३४॥३५॥—

***केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम्॥ ३६॥**

(सु. उ. तं अ. ३९)

विषमज्वरस्यैकीयमतेन भूताभिषङ्गजत्वमाह—केचिदित्यादि। परवचनमप्रति-षिद्धमनुमतं सुश्रुतेन; अत एव विषमज्वरे दैवव्यपाश्रयं बलिहोमादि भूतोचितं, युक्तिव्यपाश्रयं कषायपानादि दोषोचितं च विधीयते। यदाह **चरकः**-"कर्म साधा-रणं जह्यात्तृतीयकचतुर्थकौ। आगन्तुरनुबन्धो हि प्रायशो विषमज्वरे"-इति (च. चि. स्था. अ. ३)। अत्र साधारणमिति दैवयुक्तिव्यपाश्रयमिति व्याचक्षत इति॥३६॥

'ज्वराः पञ्च मयोक्ताः' इत्यादिना। एषां चोत्पत्तिक्रमो वृद्धसुश्रुतादवगन्तव्यः, स यदाह— "अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। ततश्चामाशयं प्राप्य करोति विषमज्वरम्॥ कृशानां ज्वरमुक्तानां मिथ्याहारविहारिणाम्। दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः॥ कफस्थानविभागेन यथासंख्यं करोति हि। सततान्येद्युष्कत्र्याख्यचतुर्थान्सप्रलेपकान्" (सु. उ. तं. अ. ३९)-इति। अस्यायमर्थः—आमाशयहृदयकण्ठशिरःसंधय इति पञ्च कफस्थानानि, एषु स्थितैर्दोषैर्यथासंख्यमहोरात्रात् स्थानात् स्थानं प्रपद्य आमाशयं गत्वा सततादयः क्रियन्ते। तत्रामाशयस्थितेन दोषेण सततः क्रियते परं द्विकालं नच सर्वदा; न चामाशयप्राप्त्या सर्व-दाऽस्य संभवप्रसंगः, अहोरात्रेषु कालेषु प्रकोपकालापेक्षया ज्वरोत्पत्तेः। हृदयस्थितेन दोषे-णैकस्मिन् दिने आमाशयमागत्यान्येद्युः क्रियते, सततारम्भकदोषापेक्षयास्य व्यवहितत्वात्। कण्ठस्थितेन दोषेणैकस्मिन् दिने हृदयमागम्यते, अन्यस्मिन् दिने आमाशयमागत्य ज्वर आरभ्यते तृतीयकः। एवं शिरसि स्थितेन दोषेण कण्ठहृदयामाशयान् त्रिभिर्दिनैः क्रमेण प्राप्य चतुर्थेऽह्नि चातुर्थः क्रियते। पुनः स्वस्थानगमनं तु दोषाणां कृतवेगत्वेन लाघवाद्वे-गदिन एव भवति। संधिस्थितेन दोषेण प्रलेपकः, संधयश्चामाशयेऽपि सन्तीति स सर्वदा भवति। अविषमोऽप्ययं विषमसहचरितः पठितः, कफस्थानोत्पादानुरोधात्। उक्तं हि सुश्रुते-"प्रलेपकस्त्वविषमः प्रायः क्लेशाय शोषिणाम्"इति। विषमज्वर एवान्यश्चातुर्थकवि-पर्यय इति अत्र तन्त्रान्तरे-"अस्थिमज्जोभयगते चातुर्थिकविपर्ययः। मध्येऽह्नी ज्वरयति ह्यादावन्ते च मुञ्चति"-इति। आदावेकदिनं न भूत्वा मध्ये दिनद्वयं भूत्वा अन्ते एकदिनं न भवतीति व्याचक्षते जेज्जटादयः। "अस्थिमज्जोभयगते चातुर्थकविपर्ययः। त्र्यहाद् द्व्यहं ज्वरयति ह्यादावन्ते विमुञ्चति"—इति तन्त्रान्तरम्।' (आ० द०)॥ ३४॥ ३५॥—

* 'परकीयमतमाह-केचिदित्यादि। केचन आचार्या विषमज्वरं भूताभिषङ्गोत्थं कथयन्ति' (आ० द०)॥ ३६॥

---

१ 'संतते वर्ज्यो' इति क. ख.। २ 'कार्येत्यभिधाय व्याख्यातम्' इति क.। ३ 'तृतीय-मानानभिधानात्' इति क.।

†कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ॥ ३७ ॥
चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसंभवः ॥ ३८ ॥
(च. चि. अ. ३)

उल्वणदोषभेदेन तृतीयकचतुर्थकयोर्लक्षणान्तरमाह—कफपित्तादित्यादि । त्रिकग्राही वेदनया त्रिकव्यापी, त्रिकस्य वातस्थानत्वेन तद्गतौ पित्तकफावन्यस्थानगतत्वेन दुर्बलौ तृतीयदिने वेगं कुरुतः, यदि तु स्वस्थानस्थितौ स्यातां तदा सन्ततज्वरमेव कुर्यातामिति **जेज्जटः** । एवं शिरसि कफस्थाने, पृष्ठे च पित्तस्थाने बोद्धव्यम् । पृष्ठादिति ल्यब्लोपे कर्मणि पञ्चमी, पृष्ठं वेदनया व्याप्येत्यर्थः । न च वाच्यं यदि त्रिकं वातस्थानं तत् कथं तत्र पित्तकफाविति; प्रकृतिस्थानां दोषाणां स्थाननियमो न तु प्रकुपितानां, तेषां सर्वदेहगतत्वात् । यदाह **सुश्रुतः**,—"कुपितानां हि दोषाणां शरीरे परिधावताम् । यत्र सङ्गः खवैगुण्याद्व्याधिस्तत्रोपजायते"—इति (सु. सू. स्था. अ. २४) । एवमन्यस्थानगतत्वेन दोषदौर्बल्यादि चतुर्थकेऽपि वाच्यम् । प्रभावं रुजारूपां शक्तिम् । द्विविधं विवृणोति—जङ्घाभ्यामित्यादि । जङ्घाभ्यां शिरस्त इति एतच्च पञ्चमीद्वयं पूर्ववत् । पूर्वमिति प्रथमं, तत्र भूत्वा निखिलं देहं व्याप्नोति । श्लैष्मिक इति श्लेष्मोल्वणः, सन्ततसततकान्येद्युष्कतृतीयकचतुर्थकानां पञ्चानां सान्निपातिकत्वात् । यदुक्तं **चरके**,—"प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः । सन्निपाते तु यो भूयान् स दोषः परिकीर्तितः"—(च. चि. स्था. अ. ३) इति । अथवा प्रायोग्रहणादेकदोषजा द्विदोषजा अपि भवन्ति । अन्ये त्वाहुः—विकृतिविषमसमवायारब्धाः सन्ततादयः सन्निपातजाः, तेषामेवोद्धूतदोषेण व्यपदेशः; प्रकृतिसमसमवायारब्धास्तु एकदोषजद्विदोषजा अपि भवन्तीति **जेज्जटः** । प्रकृतिसमसमवायारब्धश्चतुर्थकस्तु पित्तेन न क्रियत एव, व्याधिस्वभावात्; पित्तजगलगण्डवत् । ननु, अस्ति पैत्तिकोऽपि चतुर्थकः; तथा च **हारीताचार्यो** व्याहरति,—"चतुर्थको नाम गदो दारुणो विषमज्वरः । शोषणः सर्वधातूनां बलवर्णाग्निनाशनः ॥ त्रिदोषजो विकारः स्यादस्थिमज्जगतोऽनिलः । कुपितं पित्तमेवं तु कफश्चैवं स्वभावतः ॥ शीतदाहकरस्तीव्रस्त्रिकालं चानुवर्तते । सन्निपातसमुद्भूतो विषमो विषमज्वरः ॥ ऊर्ध्वं कायस्य गृह्णाति यः पूर्वं सोऽनिलात्मकः । पूर्वं गृह्णात्यधःकायं श्लेष्मवृद्धश्चतुर्थकः—" इति । अत्राहुः—अनुबन्धरूपमत्र पित्तं, न त्वारम्भकं; कथमेषा प्रतीतिरिति चेत्, स्थानविशेषानभिधानात्; अत एव **हारीते**नापि स्थानं नोदाहृतमेव जङ्घादिवदिति

---

† 'तृतीयको ज्वरस्त्रिविधो भवति । कफपित्तात्त्रिकग्राही वेदनया त्रिकव्यापी, वातकफात्मको ज्वरो वेदनया पृष्ठग्राही, वातपित्तात्मको वेदनया शिरोग्राही, एवं त्रैविध्यम् । चातुर्थिको द्विप्रकारां शक्तिं दर्शयति—जङ्घाभ्यां श्लैष्मिकः, अनिलसंभवः शिरसः, वेदनयेत्यर्थः । चातुर्थिकः पित्तेन न क्रियते इत्येके, व्याधिस्वभावात् पित्तजगलगण्डवत् । हारीतस्तु चातुर्थिकोऽपि पैत्तिकोऽस्तीति वदति' (आ० द०) ॥ ३७ ॥ ३८ ॥

चरकटीकाकृतो व्याचक्षते। किंत्वेषा व्याख्या तदा संगच्छते यदि पित्तलिङ्गं नोद्भूतं दृश्येत, दृश्यते च; तथा कथ्यते-भेडेऽपि पैत्तिकः पठ्यते,-"आमाशयस्थः पवनो ह्यस्थिमज्जगतोऽपि वा। कुपितः कोपयत्याशु श्लेष्माणं पित्तमेव च"-इति। किंच नागभर्तृतन्त्रे स्थानमप्युक्तमेव,-"ऊर्ध्वकायं तु यः पूर्वं गृह्णाति सोऽनिलात्मकः। मध्यकायं तु गृह्णाति पूर्वं यस्तु स पित्तजः॥ पूर्वं गृह्णात्यधःकायं श्लेष्मवृद्धश्चतुर्थकः"-इति। तस्मात् प्रायेण कफवाताभ्यां भवतीति पैत्तिकश्चतुर्थकश्चरकादिभिर्नोदाहृतः, नत्वसंभवादिति मन्तव्यम्। एषां चोत्पत्तिक्रमो वृद्धसुश्रुतादवगन्तव्यः। स यदाह-"अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। ततश्चामाशयं प्राप्य करोति विषमज्वरम्॥ कफस्थानविभागेन यथासंख्यं करोति हि। सततान्येद्युष्कत्र्याख्य-चतुर्थान् सप्रलेपकान्" (सु. उ. तं. अ. ३९)-इति। अस्यायमर्थः—आमाशय-हृदयकण्ठशिरःसन्धयः पञ्च कफस्थानानि, एषु स्थितैर्दोषैर्यथासंख्यं सततादयः क्रियन्ते। तत्रामाशयस्थितेन दोषेण सततकः क्रियते द्विकालं न च सर्वदा; न चामाशयप्राप्तौ सर्वदा प्रसङ्गः, अहोरात्रेषु कालेषु स्वप्रकोपकालापेक्षया ज्वरोत्पत्तेः। हृदयस्थितेन दोषेणामाशयमागत्यान्येद्युष्कः क्रियते एककालं, नच सर्वदा, सततारम्भक-दोषापेक्षयाऽस्य व्यवहितत्वात्। कण्ठस्थितेन दोषेणैकस्मिन् दिने हृदयमागम्यते, अपरस्मिन्नामाशयमागत्य ज्वर आरभ्यते तृतीयकः। एवं शिरःस्थितेन दोषेण कण्ठ-हृदयामाशयान् त्रिभिर्दिनैः क्रमेण प्राप्य चतुर्थकः क्रियते। पुनः स्वस्थानगमनं तु दोषाणां हृतवेगत्वेन लाघवाद्वेगदिन एव भवति। सन्धिस्थितेन दोषेण प्रलेपकः क्रियते, सन्धयश्चामाशयेऽपि सन्तीति स सर्वदा भवति। अयं चाविषमोऽपि विष-मसहचरितः पठितः, कफस्थानोत्पादानुरोधात्। उक्तं हि सुश्रुते-"प्रलेपकस्तु विषमः प्रायः क्लेशाय शोषिणाम्"-इति (सु. उ. तं अ. ३९) ॥ ३७ ॥ ३८ ॥

***विषमज्वर एवान्यश्चतुर्थकविपर्ययः।**
स मध्ये ज्वरयत्यह्नी आदावन्ते च मुञ्चति ॥ ३९ ॥

(च. चि. अ. ३)

चतुर्थकविपर्ययमाह—विषमेत्यादि। अत्र तन्त्रान्तरम्-"अस्थिमज्जोभयगते[१] चतुर्थकविपर्ययः। स मध्ये ज्वरयत्यह्नी ह्यादावन्ते च मुञ्चति"-इति। आदावेकदिनं मुक्त्वा, मध्ये दिनद्वयं भूत्वा, अन्ते एकदिनं न भवतीति व्याचक्षते जेज्जटादयः।

* "चातुर्थकविपर्ययोऽन्यो विषमज्वरः। व्यहाद्व्यहमिति व्यहाद्व्यहं[२] द्विदिनं ज्वरयति एकं दिनं विमुञ्चति, एवं तृतीयकविपर्ययो वाच्यः। सुश्रुते विषमज्वराणामुपशान्तवेगानामपि देहेऽवस्थानं दर्शितम्। तद्यथा-"स चापि विषमो देहं न कदाचिद्विमुञ्चति। ग्लानिगौरव(वैरस्य)कार्श्येभ्यः स यस्मान्न विमुच्यते॥ वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। गौरवं शिरसो ग्लानिर्नातिश्रद्धा च भोजने॥ माधुर्यमथ वैरस्यं तिक्तत्वमथवा पुनः। वक्त्रस्य जायते यस्मात् प्रवेगेऽपि गते सति। तस्मात्तु नियतो ज्ञेयः शरीरे विषमज्वरः' (सु. उ. तं. अ. ३९)-इति (आ० द०) ॥ ३९ ॥

१ "सर्वेषु कफस्थानेषु व्यवस्थितो दोषः संततं करोतीति ज्ञेयं, तन्त्रान्तरोक्तत्वात्"—इति वृन्दटीकायां श्रीकण्ठदत्तः। २ 'व्यहाद् व्यहं ज्वरयति' इति आतङ्कदर्पणसंमतः पाठः।

"अस्थिमज्जोभयगते चतुर्थकविपर्ययः । त्र्यहाद्व्यहं ज्वरयत्यादावन्ते च मुञ्चति"— इति पराशरवचनस्यापि स एवार्थः; त्र्यहादिति त्र्यहस्यादिदिनं विमुञ्चति, दिनद्वयं ज्वरयति, त्र्यहस्यान्ते चतुर्थदिनं मुञ्चतीति तात्पर्यार्थं व्याचक्षते । हरिचन्द्र-स्त्वाह—द्वे अहनी निरन्तरं ज्वरयित्वा उपरम्यैकमहः पुनर्ज्वरयतीत्येवं चतुर्थकवि-पर्यय इति । आदिदिनाभावश्चोत्तरोत्तरपातिदिवसेष्ववधार्यः । चतुर्थकविपर्ययस्योप-लक्षणत्वेन तृतीयकादिविपर्ययोऽप्यूह्य इत्याहुः । तद्यथा—मध्ये एकदिनं ज्वरयति, आद्यन्तयोर्मुञ्चतीति तृतीयकविपर्ययः; एककालं विमुच्य सर्वमहोरात्रं व्याप्नोतीत्यन्ये-द्युष्कविपर्ययः; (कालद्वये मुञ्चति, सर्वमहोरात्रं ज्वरयतीति सततकविपर्ययः ।) अत्र दोषविकृतिरेव नानाविधा हेतुरिति । "कफस्थानेषु वा तिष्ठन् दोषो द्वित्रिच-तुर्षु च । विपर्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान्" (सु. उ. तं. अ. ३९) इति वृद्धसुश्रुतवाक्यं व्याचक्षाणो जेज्जटोऽन्येद्युष्कतृतीयचतुर्थकमात्रस्य विपर्यय-मुदाहरति । तद्यथा—आमाशयहृदयस्थदोषेण यथोदाहृत एवान्येद्युष्कविपर्ययः; आमा-शयहृदयकण्ठस्थितेन तृतीयकविपर्ययः; तत्रैकस्मिन् दिने हृदयस्थो दोष आमाशय-मागत्य तत्स्थेन सह ज्वरयति, तद्दिने कण्ठस्थितश्च हृदयमायाति, अपरदिने सोऽप्या-माशयमागत्य ज्वरयति, एवं दिनद्वयं भूत्वा पश्चादेकदिनं न भवतीति तृतीयकविप-र्ययः; आमाशयहृदयकण्ठशिरःस्थेन दोषेण चतुर्थकविपर्यय इति तत्र यस्मिन् दिने हृदयस्थो दोष आमाशयमागत्य ज्वरयति तस्मिन् दिने कण्ठस्थो हृदयं शिरस्थश्च कण्ठमायाति, अपरदिने हृदयस्थ आमाशयमागत्य ज्वरयति कण्ठस्थितश्च हृदय-मायाति, अपरदिने हृदिस्थ एवामाशयमागत्य ज्वरयति, एवं दिनत्रये भूत्वा पश्चा-देकदिनं न भवतीति चतुर्थकविपर्यय इति । एते च सर्वे एव ज्वरा न विरुद्धाः, सर्वेषामेव मुनिप्रणीतत्वात् । यथोक्तं स्मृतिशास्त्रे—"स्मृतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ मतौ" (म. स्मृ. अ. २ श्लो. १४) इति । दृश्यन्ते च नानाविधा एव विषमज्वराः; एष एव न्यायश्चरकसुश्रुतयोः कुष्ठवैषम्ये वाप्यचन्द्रेण दर्शितः; न वा चिकित्साभेदोऽप्येषामुक्तः; यैव तृतीयकादौ चिकित्सा सैव तद्विपर्ययेऽपीति ॥ ३९ ॥

*नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेद्वातबलासकी ॥ ४० ॥
(अ. सं. नि. अ. २)

---

* 'वातबलासकज्वरमाह—नित्यमित्यादि । कीदृशः ? नित्यं मन्दज्वरो मन्दवेगज्वरः स्तब्धाङ्गश्लेष्मभूयिष्ठ इति स्तब्धाङ्गश्च श्लेष्मभूयिष्ठश्च; तदुक्तं सुश्रुते—"प्रलेपकं वातबलासकं वा कफाधिकत्वेन वदन्ति तज्ज्ञाः"—इति; अन्यत्र तु वाताधिकत्वेन दर्शितः, तत्कथमत्र श्लेष्मभूयिष्ठत्वमुक्तम् ? अत्रोच्यते—वातेरितसर्वसंधिकफारब्धत्वात् । वातबलासकस्तु यथार्थः-आमवातेरितो बलासक आरम्भको यस्येति । (आ० द०) ॥ ४० ॥

१ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते । २ अस्याग्रे ग. पुस्तके 'न च श्लेष्मा रूक्ष इति पित्तमप्यत्र बोद्धव्यम् । न श्लेष्मणोऽपि पित्तासक्तस्य रूक्षत्वं वातस्य पित्ताभिभूतत्वाद् व्याधिस्वभावाद्वा' इत्यधिकः पाठ उपलभ्यते ।

उक्तसंगत्या प्रलेपकादनूपद्रवत्वेन तत्सधर्मिणि वातवलासके वाच्ये प्रतिलोमतन्त्रयुक्त्या वातवलासकमेवाह—नित्यमित्यादि । वातवलासकाख्यो ज्वरोऽस्यास्तीति वातवलासकी नरः, तेन ज्वरेण, शूनकः शोथी, सीदति अवसन्नो भवति; शोथिनः स उपद्रव इत्यर्थः । 'शूनः कृच्छ्रेण सिध्यति' इति पाठान्तरे 'तेन' इति शेषः । वातवलासमेके कुम्भाह्वयपाण्डुरोगविषयमाहुरिति गदाधरः । वातवलासकारब्धत्वाद्वातवलासकः; वलासकः श्लेष्मा, पित्तमप्यत्र बोद्धव्यम् । यदुक्तं तन्त्रान्तरे—"वायुः प्रकुपितो दोषावुदीर्योभौ विधावति । स शिरस्थः शिरःशूलम्"–इत्यादि । यच्चोक्तं सुश्रुतेन–"प्रलेपकं वातवलासकं वा कफाधिकत्वात् प्रवदन्ति तज्ज्ञाः" (सु. उ. तं अ. ३९)–इति, तत्तु श्लेष्मणो नित्यानुपक्तत्वेनेति जेज्जटः । दुःखत्वं चास्य वातपित्ताभिभूतत्वात् कफस्नेहस्य, व्याधिप्रभावाद्वेति ॥ ४० ॥

*प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण च ।
मन्दज्वरविलेपी च सशीतः स्यात् प्रलेपकः ॥ ४१ ॥
(अ. सं. नि. अ. २)

प्रलेपकमाह—प्रलिम्पन्नित्यादि । मन्दज्वरश्चासौ विलेपी चेति मन्दज्वरविलेपी, विलेपित्वं चास्य यस्माद्धर्मगौरवाभ्यां लिम्पति संवध्नातीत्यर्थः । अयं च कफपित्तजः । यदुक्तं सुश्रुतेन—"प्रलेपकं वातवलासकं च"–(सु. उ. तं. अ. ३९) इत्यादि । तथा यक्ष्मणि "ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः" (सु. उ. तं अ. ४१)–इत्युक्तं, यक्ष्मणि चायं भवतीति । अन्ये तु त्रिदोषजयक्ष्मजनितत्वेन त्रिदोषज एवायम्, तद्भूतत्वेन तु कफपित्तव्यपदेशः ॥ ४१ ॥

†विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्धं शीतलं देहमर्धमुष्णं प्रजायते ॥ ४२ ॥
काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः ।
तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः ॥ ४३ ॥

* "विलेपित्वं चास्य घर्मेण आतपेनेव गौरवेण गुरुत्वेनेव लिम्पति संवध्नाति गात्राणि से प्रलेपकाख्यो ज्वरः । सशीतः शीतयुक्तः । गात्राणि प्रलिम्पतीवेति प्रलेपकोऽन्वर्थसंज्ञः" (आ० द०) ॥ ४१ ॥

† "काये इत्यादि । यदा मध्यकाये पित्तं दुष्टं भवति श्लेष्मा चान्ते दुष्टो व्यवस्थितो भवति तेन हेतुना गात्राणामुष्णत्वं हस्तपादयोः शीतत्वम् । विपर्ययेण ज्वरान्तरमाह—काये इत्यादि । विपरीतत्वं तु पूर्ववद्व्याख्येयम् । अतः परं संततादीनां शीतदाहपूर्वकत्वेन भेदमाह—त्वक्स्थावित्यादि । यदा श्लेष्मानिलौ त्वचि कुपितौ भवतस्तदा ज्वरस्यादौ त्वचि शीतं जनयतः । द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ स्मृतौ कथितौ 'मुनीन्द्रैः' इति शेषः । यतौ कौ ? ज्वरे आदौ पूर्वं कफवातौ त्वक्स्थौ सन्तौ शीतमुत्पादयतः, तयोः श्लेष्मानिलयोः प्रशान्तयोः सतोरन्ते पित्तं दाहं करोति; तथा तेनैव प्रकारेण आदौ पित्तं त्वक्स्थं सदग्रीव दाहं करोति, तस्मिंस्तु पित्ते प्रशान्ते सति इतरौ वातकफौ शीतं कुरुतः । तयोः श्लेष्मानिलयोः प्रशान्तवेगयोः स्वकालापगमात् प्रत्यनीकप्राप्त्या वा

१ 'गयदासः इति ग. । २ 'मन्दज्वरत्वं' क. ख. ।

कायें श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम्।
शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः ॥ ४४ ॥
(अ. सं. नि. अ. २)

त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥ ४५ ॥
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥ ४६ ॥
द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ स्मृतौ।
दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥ ४७ ॥
(सु. उ. तं. ३९)

विषमज्वरविशेषानाह—विदग्ध इत्यादि। विदग्धेऽन्नरसे दुष्टे आहाररसे तथा दुष्टे श्लेष्मणि पित्ते दुष्टे देहे व्यवस्थिते भवतः, तेन हेतुना देहमर्धं शीतलं कफेनार्धं चोष्णं पित्तेन प्रजायते। अर्धत्वं चार्धनारीश्वराकारेण नरसिंहाकारेण वा, यथादोषं व्यवस्थानियमहेतोरभावादिति। काय इत्यादि। काये अन्तरग्नौ, कोष्ठे इति यावत्। अन्ते हस्तपादयोः। उक्तार्थस्य विपर्ययेण ज्वरान्तरमाह—काये श्लेष्मेत्यादि। त्वक्स्थावित्यादि।—त्वक्शब्देन त्वक्स्थो रस उच्यते, तत्स्थस्य तदुपचारेणेति **गदाधरः**, **जेज्जटस्तु** त्वचमेवाह। एतदभिप्रायेणैव **चरकेण** ज्वरेऽभ्यङ्गार्थं तैलादीन्यभिधायोक्तं—"तैराशु प्रशमं याति बहिर्मार्गगतो ज्वरः"—इति (च. चि. स्था. अ. ३)। तयोः श्लेष्मानिलयोः। प्रशान्तयोरिति प्रशान्तवेगयोरित्यर्थः; नहि विषमेषु दोषस्य प्रशान्तिर्भवति, पुनर्वेगागमात्। यदाह **सुश्रुतः**—"स चापि विषमो देहं न कदाचिद्विमुञ्चति। ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते॥ वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यान्नैवोपलभ्यते" (सु. उ. तं. अ. ३९)—इति। इतरौ वातकफौ। दाहशीतादीति एको दाहादिः, अपरः शीतादिः। ननु, एतयोः संप्राप्तौ त्रिदोषजत्वमुक्तं; तत् कथं संसर्गजावित्युक्तं, संसर्गो हि द्वयोर्भवति त्रयाणां सन्निपात इति स्थितिः। उच्यते—संसर्गः संबन्धः, स च द्वयोर्बहूनां च भवति, अत्र त्रयाणामुक्तः[1], न चैवं सर्वत्र; अथवा संसर्गः[2] सौम्याग्नेयदोषकोटिद्वयमेलापः। तत्र शीतादौ ज्वरे पित्तमनुबन्धः, दाहादौ वातकफावनुबन्धौ; अनुबन्ध्यश्च प्राधान्येन चिकित्स्योऽनुबन्धाविरोधेनेति

यदा तौ प्रशान्तवेगौ भवतस्तदा पित्तमन्तर्दाहं करोति। चकारान्मूर्च्छादीन्। यदा तु पित्तं त्वक्स्थं भवति तदा त्वचि अतीव दाहं करोति, त्वग्दाहकारके पित्ते प्रशान्ते गतवेगे सति इतरौ श्लेष्मानिलौ अन्ततः शीतं कुरुतः। आदिशब्दाद्भ्रमतन्द्रादीन्। द्वावेतौ दाहशीतादी संसर्गजौ कथितौ, तयोर्दाहशीतपूर्वकयोर्ज्वरयोर्मध्ये दाहपूर्वकः कष्टोऽत्यन्तदुःखप्रदः, कष्टः कृच्छ्रसाध्यतम इति विशेषणद्वयोपादानादत्यर्थं दुःसाध्यत्वं दर्शितं, शीतपूर्वस्य सुखसाध्यत्वं; कुतः? रोगशक्तेरचिन्त्यत्वात्। ननु उपर्यधश्चाप्राधान्येन चिकित्स्यत इत्यनुबन्धात्संसर्गजावित्युक्तमिति न विरोध इति" (आ० द०) ॥ ४२–४७ ॥

---

१ 'त्रयाणामाहुः' इति क.। २ 'संसर्गः साम्यात्' इति क.।

प्रयोजनमेतस्य। तयोर्दाहशीतादिज्वरयोर्मध्ये दाहपूर्वो दाहादिः कष्ट इति दुःखप्रदः। दाहादेः कष्टसाध्यत्वाभिधानेन शीतादेरर्थतोऽकष्टत्वमिति। उक्तविषमज्वराणामुपलक्षणत्वादन्येऽपि विषमज्वरा रात्रिज्वरादयो बोद्धव्या इति जेज्जटः। उक्तं च तन्त्रान्तरे—"समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः। प्रायो रात्रौ ज्वरस्तस्य दिवा हीनकफस्य तु"—इति। सर्वेषु च विषमज्वरेष्ववश्यंभावी वायुः। यदाह वृद्धसुश्रुतः—"नर्तेऽनिलाद्धि विषमज्वरः समुपजायते। कफपित्ते हि निश्चेष्टे चेष्टयत्यनिलः सदा" (सु. उ. तं. अ. ३९)—इति। तथा विदेहेऽपि—"पवनो गतिवैषम्याद्विषमज्वरकारणम्"—इति। एषां च ज्वराणामृत्वादिहेत्वन्तरलाभादन्यथाभावोऽपि दृश्यते। तद्यथा—सन्ततः स्वरूपं त्यक्त्वा सततादीनामन्यतमत्वं प्रतिपद्यते, तथा चैतुर्थकस्तृतीयकादिरूपत्वम्। यदाह चरकः—"ऋत्वहोरात्रदोषाणां मनसश्च बलाबलात्। कालमर्थवशाच्चैव ज्वरस्तं तं प्रपद्यते" (च. अ. स्था. चि. ३)—इति। अस्यार्थः—बलाबलादिति ऋत्वादिमनोन्तेन संबध्यते, बलं चाबलं च बलाबलम्। अर्थशब्दोऽत्र प्राक्तनकर्मवाची। तं तं कालं सततकाद्युक्तं, ज्वरः प्रतिपद्यत इति योजना। उदाहरणं च ऋत्वहोरात्रबलाबलाद्यथा—यदा निदाघोत्पन्नो वातप्रधानश्चतुर्थको वर्षासमयमाप्नोति तदा तेनर्तुनाऽऽप्यायितबलस्तृतीयकान्तानां सततकादीनामन्यतमत्वं प्राप्नोत्युत्कर्षात्। एवं वर्षात्समुत्पन्नः सन्ततः शरदं प्राप्यापकृष्टबलः सततादीनामन्यतमत्वमेत्यपकर्षात्। एवं पित्तकफयोरप्युत्कर्षापकर्षावृतुकृतौ व्याख्येयौ। अहोरात्रशब्देन कतिपयान्यहोरात्राणि गृह्यन्ते, नह्येकस्मिन्नहोरात्रे सततादीनामुत्कर्षापकर्षाभ्यामन्यथाभाव उपपद्यते; किंतु कतिपयैरेव। यदा वर्षाशरद्वसन्तप्रारम्भे वातादयो ज्वरं चतुर्थकमारभन्ते तदा मध्यानि कतिपयदिनान्यवाप्य स एव तृतीयकपूर्वत्वेन विपरिणमते उत्कर्षात्; अपकर्षात्तु यदोऽन्यानि दिनान्याप्नोति तदा सन्ततो (वातारब्धः प्रावृषः,) पित्तारब्धः शरदो, वसन्तस्य च श्लेष्मारब्धः, प्रतनुकत्वाद्दोषस्य सततादीनामन्यतमत्वेन विपरिणमत इति। दोषबलाबलाद्यथा—यदा सततादीनामन्यतमकारी दोषः श्लेष्मा मधुरस्निग्धादीन् दिवास्वप्नादींश्च हेतूनाप्नोति तदा सन्ततकादीन् करोति। एवं वातपित्तयोरप्यूह्यम्। मनोबलाबलाद्यथा—यदा सन्ततज्वरी सत्त्वगुणोद्रेकात् प्रहर्षावष्टम्भबहुलो भवति तदा सततादीनामन्यतमत्वं प्राप्नोति; यदा चतुर्थकज्वरी तमोगुणभूयिष्ठत्वाद्विषादादिभिर्भूयते तदा तृतीयकादीनामन्यतमो भवति, "विषादो रोगवर्धनानाम्" (च. सू. स्था. अ. २५)—इत्यागमात्। अन्ये तु मनःशब्देन बुद्धिं व्याख्यानयन्ति, कारणे कार्योपचारात्। तस्याश्च बलाबलं यथा—यदा चतुर्थकज्वरी प्रज्ञापराधाद्देवादीनभिभूयाहितान्याचरति तदा तृतीयकपूर्वेषामन्यतमत्वमाप्नोति; यदा तु शुद्धसत्त्वोत्कर्षाद्विवेकिन्या बुद्ध्या युक्तः स्यात्तदा शुभानि देवताराधनेष्टिबल्युपहारादीन्याचरति तदा सन्ततज्वरी सततादीनामन्यतमत्वं प्राप्नोति। अर्थवशाद्यथा—सन्ततज्वरिणोऽपि

१ 'प्रपद्यते' इति क.। २ 'तृतीयकचतुर्थकादिरूपत्वं' इति क. ख.। ३ 'तृतीयकादीनामन्यतमत्वं' इति ख.। ४ 'तृतीयकत्वेन' इति क.। ५ 'अन्यानि' इति क. ख.। ६ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते।

यदि चतुर्थकवेदनीयं कर्म स्यात्तदा सन्ततोऽपि चतुर्थकत्वेन विपरिणमते; अथ चतुर्थकज्वराविष्टस्य यदि तत्कालपरिपाकि कर्म बलीयो भवति तदा सन्ततत्वेन परिणमते । एतच्च कर्मवशलमृत्लहोरात्रदोषबलावलेष्वपि बोद्धव्यं, तदनन्तरं तन्निर्देशादिति ॥ ४२–४७ ॥

*गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यं चास्योपजायते ॥ ४८ ॥
रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ ।
प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥ ४९ ॥
पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ।
ऊष्माऽन्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥ ५० ॥
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥ ५१ ॥
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च ।
विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे ॥ ५२ ॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ॥ ५३ ॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥ ५४ ॥
(सु. उ. तं अ. ३९)
(रसरक्ताश्रितः साध्यो मांसमेदोगतश्च यः ।
अस्थिमज्जगतः कृच्छ्रः शुक्रस्थस्तु न सिध्यति ॥ १ ॥)
(च. चि. अ. ३)

उक्तवातादिज्वराणां धातुविशेषदूष्यतयाऽधिकलक्षणानि भवन्ति; यदुक्तं—"वातपित्तकफोत्थानां ज्वराणां लक्षणं यथा । तथा तेषां भिषग्ब्रूयाद्रसादिष्वपि बुद्धिमान्" (सु. उ. तं. अ. ३९) इति; एतदभिधानं च रसादिधात्वविरोधेन वातादिचिकित्सा-

* 'अथ रसादिधातुगतज्वरमाह–गुरुतेत्यादि । गुरुता गात्राणां, सदनमङ्गग्लानिः; रसस्थे रसधातुगते ज्वरे । यद्यपि रसैकधातुग्राह्या संतत एवायं तथाऽप्यनुक्रमधातुगतकथनार्थमत्र निर्देशः । रक्तगं ज्वरमाह–रक्तेत्यादि । मोहो विगतचित्तता । मांसगतमाह–पिण्डिकेत्यादि । अस्थिगते भेदोऽस्थ्नामिति भेद इव भेदः, भङ्गवत्पीडेत्यर्थः । कूजनं कुन्थनं, कुञ्चनमिति केचन पठन्ति; तच्च सान्निध्यादस्थ्नामित्यनेन संबध्यते । ननु शुक्रगे ज्वरे मरणमित्युक्तं, तच्च शुक्रं सर्वदेहगं, ततश्च रसादिधात्वभिभवेऽपि शुक्रप्राप्तेस्तद्गतेऽपि मरणमिति । नैवं—सर्वशरीरगतस्यापि शुक्रस्य कलान्तरितत्वेन क्रमेण त्वन्वि प्राप्तेः । क्रमेणापि शुक्रं ज्वरेण कथं प्राप्यमिति चेत्, धात्वन्तरादतिक्रम्य शुक्रगमनादिति । उक्तं च सुश्रुते;—"दग्धेन्धनो यथा वह्निर्धातून् हत्वा यथा विषम् । कृतकृत्यो व्रजेच्छान्ति देहं हत्वा तथा ज्वरः"–(सु. उ. त. अ. ३९) इति । ग्रन्थान्तरेऽपि–"रसरक्ताश्रितः साध्यो मांसमेदोगतस्तथा । अस्थिमज्जगतः कृच्छ्रः शुक्रस्थाने न जीवति"–इति (आ० द०) ॥ ४८–५४ ॥

करणार्थम्; अतस्तानाह—गुरुतेत्यादि। हृदयोत्क्लेशः हृदयस्थितदोषस्योपस्थितवमनत्वमिव, रसस्य हृदयस्थत्वात्। रसस्थ इत्यनेन विशेषेणात्र रसो दूष्यः, सर्वेषामेव ज्वराणां रसानुगतत्वात्। दैन्यं क्लान्तचित्तत्वम्। पिण्डिकेत्यादि। पिण्डिका जान्वधो जङ्घामांसपिण्डः, तस्या उद्वेष्टनं दण्डादिना पीडनेनेव वेदना पिण्डिकोद्वेष्टनम्; एवमन्यत्रापि। सृष्टमूत्रपुरीषता प्रवर्तमानमूत्रपुरीषता। ऊष्मा वह्निः, एतच्च विशेषपरं, प्रायः सर्वज्वरेषु तथाभावात्। 'ऊष्माऽन्तर्मोहविक्षेपौ' इति पाठान्तरे ऊष्माऽन्तः अन्तर्दाह इत्यर्थः, विक्षेपो हस्तादिचालनम्। भृशं स्वेद इति घर्मस्य मेदोमलत्वात्; तद्विकृत्यैव दौर्गन्ध्यं गात्रे। असहिष्णुता वेदनाया असहत्वं, क्रोधनत्वमिति **कार्तिकः**। मेदोऽस्थ्नामिति मेद इव भेदः भङ्गवत्पीडेत्यर्थः, (परपदार्थेषु प्रयुज्यमानाः शब्दा वृत्ति(वति)मन्तरेणापि वृत्त्य(वत्य)र्थं गमयन्ति-) यथा—अग्निर्माणवकः। एवमन्यत्रापि भेदादौ द्रष्टव्यम्। कूजनं कुन्थनं; 'कुञ्चनं' इति पाठान्तरेऽस्थ्नामेव संकोच इत्यर्थः। तमःप्रवेशनम् अन्धकारप्रविष्टस्येवासंवित्तिः। महाश्वासः श्वासाधिकारे वक्ष्यमाणलक्षणः। मर्मशब्देन हृदयमुच्यते, प्राधान्यादिति **कार्तिकः**; तस्य छेद इव मर्मच्छेदः। मरणमित्यादि शुक्रगतस्य। तत्रैतेषु रसादिधात्वनुगतज्वरेषु मध्ये शुक्रस्थानगते मरणं प्राप्नुयादिति योज्यम्। शुक्रं च तत्स्थानं चेति शुक्रस्थानं; (*नतु शुक्रस्य स्थानं शुक्रस्थानं,*) शुक्रस्य सर्वदेहगत्वेन नियतस्थानासंभवादिति **कार्तिकः**। (यदुक्तं,—"*यथा पयसि सर्पिस्तु गुडश्चेक्षुरसे यथा। शरीरेषु तथा नॄणां शुक्रं विद्याद्भिषग्वरः*"–(सु. शा. स्था. अ. ४) इति।) विशेषत इति पदेन शुक्रस्य बाहुल्येन विसर्गः, अन्यस्यापि रक्तादेरिति वदन्ति॥ ४८–५४॥

***वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्।**
वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः॥ ५५॥
(वा. नि. अ. २)

(*उक्तवातादिज्वराणां कालप्रकृतिमुद्दिश्य प्राकृतत्वं वैकृतत्वं चाह*—) वर्षेत्यादि। वर्षादिषु वाताद्यैः क्रमाद्यो ज्वरः स प्राकृतः; वर्षासु वातिकः, शरदि पैत्तिकः, वसन्ते श्लैष्मिकः। अस्मादन्यो वैकृतः, यथा—वर्षासु पैत्तिक इत्यादि। स इति वैकृतो दुःसाध्यः, अर्थात् प्राकृतः सुखसाध्यः इति। यदुक्तं,—"प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भवः (च. चि. स्था. अ. ३)"—इति। *अत्र वाग्भटेन वातजस्य* प्राकृतत्वप्रणयनं यत् कृतं तदन्ये नानुमन्यन्ते, दुःसाध्यत्वेन वैकृतादभिन्नत्वात्। **जतूकर्णेनाप्यसौ** न पठितः। यदाह–"*वसन्तशरदोः प्राकृतोऽन्यत्र वैकृतः*"–इति। अत्रोच्यते—न प्राकृतत्वं सुखसाध्यत्वख्यापनपरा संज्ञा, किंतु कुम्भकारादि-

* 'अथ कालभेदेन ज्वरस्य साध्यासाध्यलक्षणमाह–वर्षेत्यादि। अनिलोद्भवस्तु प्राकृतो दुःसाध्यः' (आ० द०)॥ ५५॥

१ अस्याग्रे 'रोगप्रभावात्' इत्यधिकमातङ्कदर्पणे। २ अयं पाठः ख. पुस्तके नोपलभ्यते। ३ 'अस्फुटध्वनिः' इति पा०। ४ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते। ५ 'गूढश्चेक्षौ रसो' इति पा०।

वद्यौगिकत्वं; यतो यथर्तुप्रकुपितो दोषः प्रकृतिरुच्यते, तत उद्भूतं प्राकृतः, तेन प्राकृतत्वेऽपि दोषस्वभावाद्वातिकस्य दुःखसाध्यत्वं वैकृतवदिति दुःखसाध्यत्वेन वैकृतसाधर्म्याच्चरकजतूकर्णाभ्यां नोक्तः, न तु प्राकृतत्वाभावादित्यभिप्रायो वाग्भटस्येति । अन्यरोगेषु प्राकृतत्वेन दुःसाध्यत्वं, ज्वरस्य तु व्याधिप्रभावात् सुखसाध्यत्वम् । तन्त्रान्तरं हि–"ज्वरे तुल्यर्तुदोषत्वं प्रमेहे तुल्यदूष्यता । रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणम्"–इति ॥ ५५ ॥

*वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ।
कुर्यात् पित्तं च शरदि तस्य चानुबलः कफः ॥ ५६ ॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ।
कफो वसन्ते तमपि वातपित्तं भवेदनु ॥ ५७ ॥

(वा. नि. अ. २)

तेषामेव प्राकृतज्वराणां चिकित्साविशेषार्थमुत्पत्तिक्रममाह—वर्षास्वित्यादि । दुष्ट इति कुपितः, ग्रीष्मे संचितत्वात् । पित्तश्लेष्मान्वित इति तत्कालोचितपित्तकफानुबन्धः । यदुक्तं–"भूवाष्पान्मेघनिष्यन्दात् पाकादम्लाजलस्य च । वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः"–(च. सू. स्था. अ. ६) इति । कुर्यादिति छेदः । पित्तमित्यादि । पित्तं च शरदि दुष्टं ज्वरं कुर्यादिति पूर्वोक्तेन संबध्यते; एवं कफो वसन्ते इत्यत्रापि योज्यम् । पित्तदुष्टिश्च शरदि वर्षासु संचितत्वात् । अनुबलोऽनुबन्धः, तस्य च हेतुर्वार्षिकक्लेदानुवृत्तिरेव । तत्प्रकृत्येत्यादि तयोः पित्तश्लेष्मणोः प्रकृत्या स्वभावेन, तत्कृतयोर्ज्वरयोरनशनाल्लङ्घनाच्च भयं भवति । यदुक्तं–"कफपित्ते द्रवे धातू सहेते लङ्घनं महत् । आमक्षयादूर्ध्वमतो वायुर्न सहते क्षणम्–"इति । विसर्गाच्च हेतोर्नानशनाद्भयम् । वर्षाशरद्धेमन्ता विसर्गः, तत्रोपचितबलाः प्राणिनो भवन्ति, सोमस्य बलवत्त्वात्; शिशिरवसन्तग्रीष्मास्त्वादानं, तत्रापचितबलाः प्राणिनः, सूर्यस्य बलवत्त्वा-

---

* "(एतस्य च (वर्षासु संचितस्य शरदि प्रकुपितस्य पित्तस्य) पित्तज्वरं कर्तुमुद्यतस्य शरदि अनुबलो अनुबन्धः कफो भवति । अनु बलमिवानुबलं, यथा–स्वतन्त्रस्य कस्यचिद्राज्ञो गजरथतुरगपुरुषादिबलवतो वैरिभिः सह युध्यमानस्य पश्चादन्यबलं तच्छक्तेरनुबृंहणार्थमागच्छति, एवं स्वतन्त्रस्य पित्तस्य ज्वरं कुर्वतो बलोपबृंहणं शरदि कफः करोति । चन्द्रनन्दनस्त्वेवं व्याचष्टे–"तत्र शरदि पित्तज्वरेऽनशनाल्लङ्घनाद्भयं न भवति, केन कारणेन? तत्प्रकृत्या, तयोः पित्तकफज्वरयोर्लङ्घनसाध्यत्वेन; तथा विसर्गाच्च कालस्य विसर्गाख्यभावात्तत्र लङ्घनात् प्रत्यवायशङ्का नोत्पद्यते, ज्वरस्यामाशयसमुत्थत्वात् । पित्तश्लेष्मणोर्लङ्घनसाध्यत्वे वचनं च–"कफपित्ते द्रवत्वाच्च सहेते लङ्घनं महत् । आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणम्"–इति । अरुणदत्तस्त्वेवं व्याचष्टे–"तत्प्रकृत्येति तच्छब्देन वर्षाशरदुद्भूतौ वातज्वरपित्तज्वरौ परामृश्येते, तयोः प्रकृतिस्तत्प्रकृतिस्तया तत्प्रकृत्या तत्स्वभावेन तत्र प्राकृते ज्वरेऽनशनाद्भयं न 'भवति' इति शेषः; विसर्गाच्च वर्षाशरदुपलक्षितो हि कालो विसर्गः सौम्यस्वभावः, अस्माच्च कारणात्तस्मिन् काले ज्वरे उत्पन्ने लङ्घनात् प्रत्यवायशङ्का न तथा भवति, यथाऽन्यस्मिन् काले ज्वरे आदानकालस्वभावाद्वातपित्तानुबलत्वाच्चानशनाद्भयं भवतीत्यर्थः ।) (आ० द०) ॥५६॥५७॥

---

१ 'तथाभूतः' इति क. ख. । २ "°मपि' इति पा० । ३ अयं पाठो ग. पुस्तके नोपलभ्यते।

दिति व्युत्पादितं शास्त्रे । 'तत्प्रकृत्या विसर्गस्य'—इति पाठान्तरे तत्प्रकृत्या कफपित्तप्रकृत्या, विसर्गस्य च प्रकृत्येति योज्यम् । कफ इत्यादि । तं कफमनु वातपित्ते भवतः, अनुबन्धरूपे भवत इत्यर्थः । हेतुश्चात्र वसन्तस्यादानमध्यत्वेनाग्नेयरूक्षत्वेन वातपित्तप्रकोपकत्वम् । यदुक्तं चरके—"आदानमध्ये तस्यापि वातपित्तं भवेदनु" (च. चि. स्था. अ. ३)—इति । अत्र कफपित्तप्रकृत्या लङ्घनं युक्तमेव, किंत्वादानमध्यत्वेन न निर्भयं तत् कार्यम् । अत एव 'तत्र नानशनाद्भयम्' इत्येतस्मात् पूर्वमेव पठितम्, अन्यथा सर्वशेषे पठितं स्यादिति ॥ ५६ ॥ ५७ ॥

काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
(वा. नि. अ. २)

कालोऽपि दोषविशेषस्य लक्षणमित्याह—काल इत्यादि । यथास्वं काले यस्य वातादेर्यः प्रकोपकालस्तत्र तज्जन्यज्वरस्य प्रवृत्तिरुत्पादो वृद्धिर्वा भवति; अथवा प्रवृत्तिर्नित्यज्वरस्य, वृद्धिर्विषमज्वरस्येति ॥—

***निदानोक्तानुपशयो विपरीतोपशायिता ॥ ५८ ॥**
(वा. नि. अ. २)

(यथा कालो दोषविशेषस्य लक्षणं) तथोपशयानुपशयावपि लक्षणमित्याह—निदानेत्यादि । निदानत्वेन ये उक्ता आहाराचारादयस्तैरनुपशयो दुःखं निदानोक्तानुपशयः । विपरीतैर्दोषादिविपरीताहाराचारैरुपशायिता सुखजननशीलत्वं विपरीतोपशायितेति ॥ ५८ ॥

†अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्चोविनिग्रहः ॥ ५९ ॥
अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत् ।
संतापो ह्यधिको बाह्यस्तृष्णादीनां च मार्दवम् ॥ ६० ॥
बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ।
(च. चि. अ. ३)

उक्तज्वराणां मध्ये संप्राप्तिवशात् कश्चिदन्तर्वेगो भवति कश्चिद्बहिर्वेगस्तयोर्लक्षणमाह—अन्तर्दाह इत्यादि । श्वसनं श्वासः; 'सदनं' इति पाठान्तरं, तत्र युक्तमिति जेज्जटः; यतोऽन्तर्वेग एव सुश्रुते गम्भीराख्यया पठितः, तत्र च श्वास एव पठित इति । विनिग्रहोऽप्रवृत्तिः । संताप इत्यादि । तृष्णादीनामित्यादिशब्देनोक्तप्रलापादीनां

* "निदानेत्यादि । निदानत्वेनोक्तेनाहाराचारादिना दोषजनकत्वेनानुपशयो, विपरीतेन त्वाहाराचारादिना दोषानुत्पादकत्वादुपशय इति पिण्डार्थः" (आ० द०) ॥ ५८ ॥

† "अन्तरित्यादि । एतैर्लिङ्गैरन्तर्वेगं ज्वरं लक्षयेत् । दोषस्य वायोर्वर्चसः पुरीषस्य च विनिग्रहोऽप्रवृत्तिः । बहिर्वेगस्य लक्षणमाह—सन्ताप इत्यादि । एतैर्लिङ्गैर्बहिर्वेगं लक्षयेत् ।" (आ० द०) ॥ ५९ ॥ ६० ॥—

१ 'दोषाहाराचाराद्यैः' इति पा० ।

ग्रहणम् । मार्दवं स्वल्पत्वम् । अस्य सुखसाध्यत्वाभिधानेनान्तर्वेगस्य कृच्छ्रसाध्यतां सूचयति, असाध्यतां वा, "गम्भीरतीक्ष्णवेगार्तं ज्वरितं परिवर्जयेत्" (सु.उ.तं.३९) इति सुश्रुतवचनादिति ॥ ५९ ॥ ६० ॥—

*लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः ॥ ६१ ॥
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ।
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवाञ्ज्वरः ॥ ६२ ॥
आमज्वरस्य लिङ्गानि, न दद्यात्तत्र भेषजम् ।
भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम् ॥ ६३ ॥
(शोधनं, शमनीयं च करोति विषमज्वरम्)
ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ।
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥ ६४ ॥
क्षुत् क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ ६५ ॥
(च. चि. अ. ३)

चिकित्साविशेषार्थमामपच्यमाननिरामलक्षणान्याह—लालेत्यादि । ननु, न दद्यात्तत्र भेषजमिति विरुद्धं, द्विविधं हि भेषजमुक्तं चरकेण द्रव्यभूतमद्रव्यभूतं चेति; तत्र द्रव्यभूतं कषायादि, अद्रव्यभूतं लङ्घनस्वेदादि, अत्र लङ्घनादिकं षडङ्गार्थशृतं च प्रयुज्यते । उच्यते—भेषजशब्देनात्रान्नपानसाधनव्यतिरिक्ता कल्पनोच्यते, न तु सामान्येनौषधमात्रं; कथमेषा प्रतीतिरिति चेत्, तरुणज्वरे भेषजपाननिषेधेऽपि भेषजविधानदर्शनात् । एवं पच्यमानेऽपि बोद्धव्यं, तत्रापि सामतायाः सद्भावात् । क्षुदित्यादि ।—असमासकरणात् क्षुदादयो व्यस्तसमस्ता अष्टाहश्च[३] एकलक्षणमिति जेज्जटः । हरिचन्द्रस्त्वाह—असत्यप्यष्टाहे क्षुदादिभिर्निरामत्वं दोषप्रवृत्त्या वा क्षुदाद्यभावेऽप्यष्टाहेनैव शिष्यहितैषितया कालं लक्षणं च निर्दिष्टवानिति । द्विविधा हि सामता—

---

* "लालेत्यादि । लालाप्रसेको लालास्रावः, हृल्लास उपस्थितवमनत्वमिव, हृदयाशुद्धिः हृदयं पूर्णमिव, गुरु इत्येतत्परे । क्षुन्नाशः छिकाया अनिःसरणं, अथवा क्षुत् क्षुधा तस्या नाशः । एतानि लक्षणानि आमज्वरे भवन्ति, तत्र भेषजं पाचनादि न देयं, यदि दत्तं भेषजं तदा भूयो ज्वरं वर्धयति शोधनं यत्, यच्च शमनीयं तच्च विषमज्वरं कुर्यात् । पच्यमानज्वरलक्षणमाह–ज्वरेत्यादि । ज्वरवेगोऽधिको भवति, यथा निर्वाणावस्थायां दीपः प्रज्वलति तद्वत्पच्यमानावस्थायां ज्वरस्य वेगाधिक्यं भवति, मलप्रवृत्तिश्च भवतीति पच्यमानस्य दोषस्य लक्षणं जानीयात् । अथ निरामज्वरलक्षणमाह—क्षुदित्यादि । क्षुच्छिक्का तस्याः प्रादुर्भावः । अन्ये क्षुत् क्षुधा । क्षामता कृशत्वं, ज्वरमार्दवं ज्वराल्पत्वं, दोषप्रवृत्तिः वायोः प्रवर्तनं 'गुदेन' इति शेषः । 'त्वरसाह' इत्यत्र 'अष्टाह' इति पठन्ति, अष्टदिनेभ्यः परतः । एतन्निरामज्वरलक्षणं, तत्रौषधं देयम्" (आ० द०) ॥ ६१–६५ ॥

---

१ आतङ्कदर्पणसंमतोऽयं पाठः । २ 'दोषप्रवृत्तिरुत्साह' इत्यातङ्कदर्पणसंमतः पाठः । ३ 'लक्षणमिति' इति क. ख. ।

तन्नात्युद्धूतसामतायां द्रष्टव्यम् । यदाह वाग्भटः—"सप्ताहादौषधं केचिदाहुरन्ये दशाहतः । केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्बणे न तु ॥ तीव्रज्वरपरीतस्य दोषवेगोदयो यतः । दोषेऽथवाऽतिनिचिते तन्द्रास्तैमित्यकारिणि ॥ अपच्यमानं भैषज्यं भूयो ज्वलयति ज्वरम्" (वा. चि. स्था. अ. १)–इति । "अयमर्थोऽभियुक्तैश्च कैश्चिदुक्तश्चिकित्सकैः । सप्ताहात् परतोऽस्तब्धे सामे स्यात् पाचनं ज्वरे ॥ निरामे शमनं, स्तब्धे सामे नौषधमाचरेत्"–इति संक्षेपः । विस्तरस्तु कषायनिर्णयप्रकरणे द्रष्टव्यः । पक्वज्वरलक्षणेन जीर्णज्वरलक्षणमपि चिकित्सोचितं बोद्धव्यम् । यदुक्तं तन्त्रान्तरे—"आसप्तरात्रं"—इत्यादि । जतूकर्णेनाप्युक्तं,—"जीर्णस्त्रयोदशदिवसः"–इति । "त्रिसप्ताहे व्यतीते तु ज्वरो यस्तनुतां गतः । प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते"–इति तु तन्त्रान्तरमतिपुराणाभिप्रायेण द्रष्टव्यम् ॥ ६१–६५ ॥

बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ।
(च. चि. अ. ३) ।

ज्वरस्य साध्यलक्षणमाह–बलवत्स्वित्यादि । बलवत्सु पुरुषेषु साध्यः, यदुक्तं—"बलाधिष्ठानमारोग्यम्" (च. चि. स्था. अ. ३) इति । अल्पदोषेषु नातिप्रबलदोषेषु । अनुपद्रव इति ज्वरस्योपद्रवाः कासादयः । यदुक्तं तन्त्रान्तरे–"कासो मूर्च्छाऽरुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः । हिक्काश्वासाङ्गभेदाश्च ज्वरस्योपद्रवा दश"–इति ॥—

*हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ॥ ६६ ॥
ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः ।
ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घरात्रिकः ॥ ६७ ॥
असाध्यो बलवान् यश्च केशसीमन्तकृज्ज्वरः ।
(च. चि. अ. ३) ।

गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ॥ ६८ ॥
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ।
(सु. उ. तं. अ. ३९) ।

आरम्भाद्विषमो यस्तु यश्च वा दैर्घरात्रिकः ॥ ६९ ॥
क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम्[2] ।
विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ॥ ७० ॥
शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ।
यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् ॥ ७१ ॥

* "यो ज्वरो बलिभिः प्रबलैर्हेतुभिः कारणैर्जातोऽत एव बहुलक्षणः संपूर्णलक्षण इत्यर्थः, स त्वसाध्यः; यश्च शीघ्रमिन्द्रियनाशनो भवति सोऽपि ज्वरः प्राणान्तकृत् मारक इत्यर्थः । अपरमसाध्यलक्षणमाह–शूनस्य शोथयुक्तस्य पुरुषस्य, क्षीणस्य ज्वरेण । सुश्रुतोक्तं साध्यगम्भीरज्वरलक्षणमाह–गम्भीरस्त्वित्यादि । आनद्धत्वेनेति दोषपुरीषविबन्धेन । अपरमसाध्यलक्षणमाह–आरम्भादित्यादि । लक्षणान्तरमाह–हृष्टेत्यादि । गम्भीरोऽन्तर्वेगः, तीक्ष्णोऽतिदुःसहो बहि

१ 'तन्त्रान्तरवचनं पुराणाभिप्रायेण' इति क. । २ 'हन्ति मानवम्' इति पा० ।

वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम्।
हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम्॥ ७२॥
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः।
"हतप्रभेन्द्रियं क्षीणमरोचकनिपीडितम्॥ ७३॥
गम्भीरतीक्ष्णवेगार्तं ज्वरितं परिवर्जयेत्।"
(सु. उ. तं. अ. ३९)।

ज्वरस्यासाध्यलक्षणान्याह—हेतुभिरित्यादि। ननु, यो हेतुभिर्बलिभिर्बहुभिश्चोपजायते स बहुलक्षण एव भवति, तत् किं बहुलक्षणवचनेन? उच्यते—यथा-स्वहेतुकुपिता दोषाः सर्वस्यैव रोगस्य हेतवो भवन्ति, प्राक्तनकर्मापेक्षया तु यदा विशिष्टां सामग्रीं संप्राप्तिलक्षणामासादयन्ति तदा ज्वरमापादयन्ति, तथा दूष्यादिसहकारिकारणसान्निध्यासान्निध्याभ्यां बहुलक्षणतामल्पलक्षणतां च कुर्वन्ति। तथा हि तन्त्रान्तरं—"एकं द्वौ त्रीन् बहून् वाऽपि देहे धात्वादियोगतः। दर्शयन्ति विकारांस्ते कुपिताः पवनादयः"—इति। अथवा विकृतिविषमसमवायाद्बहुहेतुरप्यल्पलक्षणोऽल्पहेतुरपि बहुलक्षण इति। प्राणान्तकृदिति छेदः। शीघ्रमिन्द्रियनाशन इति उत्पन्नमात्र एव चिकित्स्यमानोऽपीन्द्रियशक्तिं रूपादिग्रहणलक्षणामुपहन्ति सोऽप्यसाध्यो नतूपेक्षया; अन्येऽपि रोगा उपेक्ष्यमाणा इन्द्रियशक्तिमुपघ्नन्ति असाध्यतां चाधिरोहन्ति। एवं बहुलक्षणोऽप्यादावेव चिकित्स्यमान एव बोद्धव्यः। इन्द्रियाणि चैकादश बोद्धव्यानि सांख्यसिद्धान्तेन, तथा चरकसुश्रुतनिर्दिष्टत्वात्; चक्षुः श्रोत्रं घ्राणं रसनं स्पर्शनं चेति बुद्धीन्द्रियाणि, हस्तपादगुदोपस्थजिह्वाः कर्मेन्द्रियाणि, उभयात्मकं मनः; एवमन्यत्रापि द्रष्टव्यम्। ज्वरः क्षीणस्य शूनस्येत्यपरमसाध्यलक्षणम्। गम्भीरो दैर्घरात्रिक इति गम्भीरोऽन्तर्धातुस्थः; अथवा गम्भीर इव गम्भीरः, यत्र वातादीनां निश्चयो न शक्यते कर्तुम्; अन्ये त्वाहुः—गम्भीरोऽन्तर्वेगः। दैर्घरात्रिक इति "दीर्घरात्रानुबन्धी"—इति जेज्जटः, "दीर्घां मरणरूपां रात्रिमनुवर्तते इति दैर्घरात्रिकः"—इति चक्रः, असाध्य इत्यर्थः। अत्र पक्षे दैर्घरात्रिक इति पूर्वेण संबध्यते, असाध्य इति परेण। केशसीमन्तकृदिति अकस्मात् केशेषु सीमन्तान् यः करोति। उक्तं हि तन्त्रान्तरे,—"केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ। लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे"—इति। गम्भीरार्थो ये जेज्जटादिभिर्व्याख्यातास्तेषु मध्येऽत्र गम्भीरोऽन्तर्वेग इत्ययमर्थो **माधवकरस्याभिमतः**, अत एवासौ तदनन्तरं

स्तब्ध, ताभ्यामन्योन्यमार्तं पीडितं, क्षामं क्षीणमित्थंभूतं ज्वरितं स्वार्थेविधायशोहानिभयादसाध्यत्वात् परिवर्जयेत्। एषामसाध्यलक्षणानामुपलक्षणत्वादन्यान्यपि तन्त्रान्तरेषु द्रष्टव्यानि। तद्यथा—"आविलाक्षं प्रताम्यन्तं निद्रायुक्तमतीव च। क्षीणशोणितमांसं च नरं क्षपयति ज्वरः॥ यस्ताम्यति स्वपिति शीतलगात्रयष्टिरन्तर्विदाहसहितः स्मरणादपेतः। सोच्छ्वासवान् कुपितरोमचयः सशूलस्तं वर्जयेद्भिषगिह ज्वरितं विधिज्ञः"—इति (आ० द०)॥ ६६–७३॥—

---

१ 'क्षामं' इति पा०। २ 'अपि च' इति पा०। ३ 'चलन्ति' इति क. ख.।

सौश्रुतं गम्भीरलक्षणं लिखति— गम्भीर इत्यादि । य एव चरकेऽन्तर्वेगः स एव सुश्रुते गम्भीरः पठितः; तुल्यलक्षणत्वात्, पृथक्पाठाभावाच्चेति । आनद्धत्वेन चेति बद्धदोषत्वेन । आरम्भादित्यादि । आरम्भादुत्पादात् प्रभृति यस्य विषमज्वरः सोऽसाध्यः, यस्य तु नित्यज्वरिणो ज्वरोत्सृष्टस्य वाऽपचारादिना विषमः स साध्य एव । एतच्च विषमत्वं सततादिरूपं बोद्धव्यं, नतु विषमत्वमात्रेण, वातिकज्वरेऽपि प्रसङ्गादिति । दैर्घरात्रिको व्याहृत एव; न चास्य पुनरुक्तत्वं, तन्त्रान्तरीयवाक्यत्वादधिकार्थप्रतिपादनार्थं वृद्धाऽपि लिखितम्; एवं गम्भीरेऽपि वाच्यम् । 'अतिरूक्षस्य' इत्यत्र 'अनिमेषस्य' इति पाठान्तरे सदा स्फारितनेत्रस्येत्यर्थः । विसंज्ञः विह्वलः, ताम्यते मुह्यति । शेते निपतित इति शयितो निपतित एवास्ते न चोत्थातुं समर्थः । शीतार्दितोऽन्तरुणश्चेति शीतार्दितो बहिः, अन्तरुणोऽन्तर्दाहवान् । हृष्टरोमा रोमाञ्चितगात्रः । हृदि संघातशूलवानिति संघातरूपेण वस्तुना अष्ठीलिकादिनाऽऽक्रान्तमिव हृदयं मन्यते यः स तथा; अन्ये त्वाहुः—नानाप्रकारकशूलवानिति । वक्त्रेण चैवोच्छ्वसितीत्येवकारेण नासिकां व्यवच्छिनत्ति व्यादितास्यप्रतिपादनार्थं, खरश्वास इत्यर्थः । हिक्केत्यादि । हिक्कादिभिर्मिलितैरेकेनापि बलवताऽसाध्यत्वम् । मूढं मोहयुक्तम् । विभ्रान्तलोचनं भ्रान्तप्रेक्षणं, चलितनेत्रं वा । सन्ततोच्छ्वासिनं निरन्तरखरश्वासयुक्तम् । हतेत्यादि । हतप्रभाणि हतशक्तीनि स्वविषयाग्राहीणि चक्षुरादीनि यस्य स तथा; अथवा हता प्रभा दीप्तिरिन्द्रियाणि च यस्य स तथा । 'अरोचकनिपीडितम्' इत्यत्र जेज्जटः पाठान्तरद्वयं पठति—'दुरात्मानमुपद्रुतम्' इति, व्याचष्टे च—दुरात्मानं दुष्टान्तःकरणम्, उपद्रुतमिति श्वासादिभिरुपद्रवैः; 'दुरात्मभिरुपद्रुतम्' इति पाठान्तरे तु राक्षसादिभिर्जुष्टमित्यर्थः । एषामसाध्यलक्षणानामुपलक्षणत्वादन्यान्यपि तन्त्रान्तरेषु द्रष्टव्यानि । तद्यथा— "प्रेतैः सह पिबेन्मद्यं स्वप्ने यः कृष्यते शुना । सुघोरं ज्वरमासाद्य सं जीवमपसृज्यते ॥ ज्वरः पौर्वाह्णिको यस्य शुष्ककासश्च दारुणः । बलमांसविहीनस्य यथा प्रेतस्तथैव सः ॥ ज्वरो यस्यापराह्णे तु श्लेष्मकासश्च दारुणः । बलमांसविहीनस्य यथा प्रेतस्तथैव सः ॥ सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः । विश्लेषणं च सन्धीनां मुमूर्षोरुपजायते ॥ गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम् । लेपज्वरोपसृष्टस्य दुर्लभं तस्य जीवितम् ॥ मृत्युश्च तस्मिन् बहुपिच्छिलत्वाच्छीतस्य जन्तोः परितः सरत्वात् । स्वेदो ललाटे हिमवज्ज्वरस्य शीतार्दितस्यातिसुपिच्छिलश्च ॥ कण्ठे स्थितो यस्य न याति वक्षो नूनं यमस्यैति गृहं स मर्त्यः ॥ सुतस्वेदो ललाटाद्यः श्लथसन्धानबन्धनः । मुखेदुत्थाप्यमानस्तु स स्थूलोऽपि न जीवति ॥ यस्य स्वेदोऽतिबहुलः पिच्छिलो याति सर्वतः । रोगिणः शीतगात्रस्य तदा मरणमादिशेत्"—इति । "आधानजन्मनिधने प्रत्यराख्ये विपत्करे । नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा ॥ ज्वरस्तु जातः षड्रात्रादश्विनीषु निवर्तते"—(वृ. वा. नि. अ. १) इत्यादिना ग्रन्थेन नक्षत्रभेदेन ज्वरस्य साध्यत्वासाध्यत्वं यदभिहितं, तद्धारीतवृद्धवाग्भटयोर्दृष्ट-

१ 'विबद्धमलत्वेन' इति पा० । २ 'निरन्तरोच्छ्वासिनम्' इति क. ख. । ३ 'न जीवेन्न च मुच्यते' इति क. ख. । ४ गोसर्गे प्रत्यूषे । ५ 'निधनं जन्मतः सप्तमं, प्रत्यरं पञ्चमं, विपत्करं तृतीयम्' इत्यष्टाङ्गसंग्रहव्याख्यायामिन्दुः ।

व्यम्, इह तु विस्तरभयान्न लिखितम्। सन्निपातासाध्यप्रकरणं यथा—"पित्तकफानिलवृद्ध्या दशदिवसद्वादशाहसप्ताहात्। हन्ति विमुञ्चति वाऽऽशु त्रिदोषजो धातुमलपाकात्"—इति। सप्ताहाद्वाताधिकः, दशाहात्पित्ताधिकः, द्वादशाहात्कफाधिकः, पित्ताधिकवद्वातपित्ताधिकः, कफाधिकवद्वातकफाधिकः, योगवाहित्वाद्वायोः। (यदाह चरकः—"योगवाही परं वायुः संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयात्"—इति (च. चि. स्था. अ. ३))। धातुपाकाद्धन्ति, मलपाकाद्विमुञ्चतीति व्यवस्थितविकल्पः; धातुमलपाकविकल्पे च दैवमेव हेतुः। उत्तरोत्तररोगवृद्धिबलहानिभ्यां शुक्रादिधातुसहितमूत्रादिना च धातुपाको ज्ञेयः, अन्यथा तु मलपाकः; यदुक्तं—"निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवारुची। अरतिर्बलहानिश्च धातूनां पाकलक्षणम्॥ दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः। इन्द्रियाणां च वैमल्यं दोषाणां पाकलक्षणम्"—इति। ननु, तरतमभावाद्वै स्थिरशीघ्रमध्यमशक्तित्वाद्दोषाणां कथं सप्ताहादिनियम इति चेत्। न, तथास्वभावाद्व्याधेः; विचित्रा हि प्रतिरोगं स्वभावाः; यथाऽग्निरोहिणी सप्ताहेन हन्ति न तथाऽन्ये विकारा इति। तत्र "सप्तमी द्विगुणा यावन्नवम्येकादशी तथा। एषा त्रिदोषमर्यादा मोक्षाय च वधाय च" (वा. नि. स्था. अ. २)—इति हारीतवचनसंवादार्थमेवं व्याचक्षते—दशमीप्रत्यासत्त्या नवमी, द्वादशीप्रत्यासत्त्या एकादशी च गृह्यते; ततो वृद्ध्येति पदमावर्त्य सर्वत्र द्वैगुण्यं कार्यम्। एवं, "सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा। पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा" (सु. उ. तं अ. ३९) इत्यत्र सुश्रुतवाक्ये पुनःशब्देन द्वैगुण्यमिति कार्तिककुण्डो व्याख्यातवान्। एवं "दशद्वादशसप्ताहैः पित्तश्लेष्मानिलाधिकः। दग्ध्वोष्मणा धातुमलान् हन्ति मुञ्चति वा ज्वरः" (वा. नि. स्था. अ.२)—इत्यत्राधिकशब्दमावर्त्य क्रियाविशेषणं कृत्वा द्वैगुण्यं व्याख्यातम्। तथा, "वातपित्तकफैः सप्तदशद्वादशवासरान्। प्रायोऽनुयाति मर्यादा मोक्षाय च वधाय च" (वा. नि. स्था. अ. २)—इत्यत्राग्निवेशमते प्रायोग्रहणेन द्वैगुण्यमिति। ननु, सप्तमीत्वादौ कथं तर्हि दशविंशतिद्वादशचतुर्विंशतीनां ग्रहणमिति चेत्। उच्यते—एकादशीत्यत्र एकेति पदमावर्तनीयं, तेन नवमी एकेति दशमी लभ्यते, एकादशी एकेति द्वादशी लभ्यते, ततः सर्वत्र द्वैगुण्यम्। तथाशब्दः समुच्चये, तेन सप्तमी गृह्यते सा द्विगुणा च; एवं नवम्यादिषु योज्यम्। चतुर्विंशत्यधिकस्तु मर्यादादिवसो नास्ति, तत्प्रतिपादकागमादर्शनात्॥ ६६-७३॥—

***दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिदसंज्ञता।**
कूजनं चास्यवैगन्ध्यमाकृतिर्ज्वरमोक्षणे॥ ७४॥

ज्वरविमुक्तिपूर्वरूपमाह—दाह इत्यादि। विड्भिदिति विड्भेदः; संपदादिपाठात्,

* "ज्वरमुक्तस्य पूर्वरूपमाह–दाह इत्यादि। ज्वरमोक्षकाले एतादृश्याकृतिर्लक्षणं 'भवति' इति शेषः।" (आ० द०)॥ ७४॥

१ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते। २ 'धातुमलपाकभेदे' इति क. ख.। ३ 'तरतमादिभावव्यवस्थितशीघ्रमध्यमन्दशक्तित्वात्' इति पा०। ४ 'तत्र' इति क.।

भावे क्विप् । असंज्ञता संज्ञानाशः । कूजनं[1]कुन्थनम् । यदुक्तं–"ज्वरप्रमोक्षे पुरुषः कूजेद्वमति चेष्टते" (च. चि. अ. ३)–इति । वाग्भटोऽप्याह—"धातून् प्रक्षोभयन् दोषो मोक्षकाले बलीयते। ततो नरः श्वसन् खिद्यन् कूजन् वमति चेष्टते"–(वा. नि. स्था. अ. २) इति । वैगन्ध्यं दुर्गन्धता गात्रे । ज्वरमोक्षणे भविष्यति आकृतिर्लक्षणं 'भवति' इति शेषः । ननु, दोषक्षयं विना न व्याधिनिवृत्तिः, क्षीणश्च दोषः कथमेवंविधं लक्षणं कुर्यात् ? उच्यते—कश्चिद्भावः क्षीणोऽपि विनाशकाले स्वशक्तिं दर्शयति, यथा—निर्वाणावस्थो दीपो विशेषात् प्रज्वलति, अथवा दोषाभिभूतानां धातूनां दोषापगमे क्षोभाद्दाहादयः तरलतरवानरपरिहीयमानतरुणतरुवल्लरीशिखरकम्पवदिति ॥ ७४ ॥

*स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥ ७५ ॥
(सु. उ. तं. अ. ३९)

इति श्रीमाधवकरविरचिते माधवनिदाने ज्वरनिदानं समाप्तम् ॥ २ ॥

ज्वरमुक्तिलक्षणमाह—स्वेद इत्यादि । स्वेदो घर्मागमनं, स्रोतसां स्फुटत्वात् । लघुत्वं गात्रस्य । शिरसः कण्डूरिति सर्वो हि ज्वरस्तैजसः, विरोधिव्यपगमात् सौम्यः श्लेष्मा लब्धबलः सञ्छिरसि स्वस्थानेऽसाधारणात्मलक्षणं कण्डूं करोति, व्याधिमहिम्ना नान्यत्र कफस्थाने इति वदन्ति । पाको मुखस्येति ज्वरोष्मकोपितपित्तात्, यत्तु पूर्वं न्नाकोर्षादन्यत्र वा तदपि व्याधिमहिम्नैव । एतच्च दाहमारभ्य लक्षणं त्रिदोषजेऽन्तर्वेगे ज्वरे भवति, न तु सर्वत्र । तथाचैतदनन्तरं भालुकिः प्राह–"त्रिदोषजे ज्वरे ह्येतदन्तर्वेगे च धातुगे । लक्षणं मोक्षकाले स्यादन्यस्मिन् स्वेददर्शनम्"–इति । ननु, ज्वरस्य प्रत्यक्षत्वात्तस्याभावोऽपि प्रत्यक्षः, तत् किं तल्लक्षणपाठेन ? तथाऽपि वा पठितव्यं, तर्हि सर्वविकारेषु पठ्यताम् ? उच्यते–विषमज्वरशङ्कानिरासार्थं, विषमज्वरो निवृत्तोऽपि पुनरायाति, दोषाणां धातुलीनत्वात्; एतल्लक्षणे तु निःशेषदोषनिवृत्त्या न पुनरागमः । यत्र चैवंविधा शङ्का तत्रैव लक्षणं पठति न सर्वत्र, यथा प्रमेहातीसारादिष्विति सर्वं सुस्थम् ॥ ७५ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां ज्वरनिदानं समाप्तम् ॥ २ ॥

---

* "ज्वरमुक्तस्य पुरुषस्यैवंविधं लक्षणं भवति । क्षवथुः छिक्का । परमते–"देहो लघुर्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वम् । स्वेदः क्षवः प्रकृतियोगि मनोऽन्नलिप्सा कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि"(वा. नि, अ. २)–इति (आ० द०) ॥ ७५ ॥

१ 'अस्फुटध्वनिः' इति पा० ।

अथातीसारनिदानम् ।

*गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः ।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः ॥ १ ॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः ।
शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्तुपर्ययैः ॥ २ ॥
जलाभिरमणैर्वेगविघातैः क्रिमिदोषतः ।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ ३ ॥
(सु. उ. त. ४०)

पित्तज्वरेऽतीसारपाठाज्ज्वरातीसारयोरन्योन्योपद्रवत्वाच्च ज्वरानन्तरमतीसारमाह—गुर्वित्यादि । गुरुशब्देन मात्रागुरु गृह्यते, यथाऽतिमात्रोपयुक्तो रक्तशाल्यादिः; तथा स्वभावगुरु च माषादि; अथवा गुणतः पाकतश्च । अतिशब्दः स्थूलान्तैः सह संबध्यते । स्थूलं संहतावयवं, यथा—लड्डुकपिष्टकादि । शीतलं स्पर्शाद्वीर्याच्च । विरुद्धमिति संयोगदेशकालमात्रादिभिर्विरुद्धं, यथा—क्षीरमत्स्यादि; तच्च बहुप्रकारं सुश्रुते हिताहितीयेऽध्याये (सु. सू. स्था. अ. २०.), चरके चात्रेयभद्रकाप्यीयाध्याये[1] (च. सू. स्था. अ. २६) द्रष्टव्यम् । अध्यशनं पूर्वदिनाहारेऽजीर्णे भोजनम् । उक्तं हि चरके—"भुक्तं पूर्वान्नशेषे[2] तु पुनरध्यशनं मतम्" (च. चि. स्था. अ. १५)-इति । एवं सर्वत्र । अजीर्णम् अपक्वमन्नम् । विषमम् अकालादिभोजनम् । उक्तं हि सुश्रुते—"बहु स्तोकमकाले वा तज्ज्ञेयं विषमाशनम्" (सु. सू. स्था. अ. ४६) इति । एवं सर्वत्र । 'विषमैः' इत्यत्र स्थाने 'असात्म्यैः' इति पाठान्तरम् । भोजनैरिति विरुद्धादिभिः सर्वैः संबध्यते । स्नेहाद्यैरिति स्नेहः स्नेहपानं, स्नेह आद्यो येषां ते स्नेहाद्याः स्वेदवमनविरेचनानुवासननिरूहाः, तैरतियुक्तैरिति अतियोगयुक्तैः । एतच्च यथायोग्यं बोध्यं, वमनातियोगस्यातिसारकारणत्वायोगात् । मिथ्यायुक्तैरिति हीनयोगयुक्तैः, वमनादिकर्मणां मिथ्यायोगाभावात्, हीनयोगात्तु ते दोषानुत्क्लेश्यातीसाराय स्युः । ननु, कदाचिद्वमनं प्रयुक्तं विरेकं करोति, विरेकश्च वमनमिति दर्शनात्तेषां मिथ्यायोगः संभवत्येव । न, सोऽप्ययोग एवेति सिद्धान्तः । यदुक्तं चरके—"योगः सम्यक् प्रवृत्तिः स्यादतियोगोऽतिवर्तनम् । अयोगः प्रातिलोम्येन न चाल्पं वा प्रवर्तनम्" (च. सि. स्था. अ. ६)-इति । विषमत्र स्थावरमुच्यते, अधोगत्वात्; कार्तिकस्त्वाह—विषं दूषीविषं, तल्लक्षणेष्वतीसारपाठात् । दुष्टाम्बुमद्यातिपानैरिति दुष्टं व्यापन्नं, दुष्टयोरम्बुमद्ययोः पानात्, अदुष्टयोरप्यतिपानात् । यदा

* "गुर्वित्यादि । अजीर्णमपक्वमन्नं चर्वणादि, अन्येऽजीर्णमामविदग्धादि । शोको बन्धुवियोगादिना । दुष्टाम्बु व्यापन्नजलं, मद्यं प्रसिद्धं, तयोरतिपानम् । जलाभिरमणैः पानीयातिक्रीडनैः । वेगविघातैरिति मूत्रपुरीषादीनां वेगविरोधनैः ।" (आ० द०) ॥ १-३ ॥

[1] 'भद्रकालीयाध्याये' इति क. ख. । [2] पूर्वान्नशेषे' इति क. ख. ।

चरकः—"दुष्टमद्यपानीयातिपानात्[1]"–(च. चि. स्था. अ. १९) इति । सात्म्यर्तु-पर्ययैरिति सात्म्यविपर्ययैर्ऋतुविपर्ययैश्च, सात्म्यविपर्ययोऽसात्म्यम् । नच पूर्वोक्तेन 'असात्म्यैः' इत्यनेन पौनरुक्त्यम्, उक्तं हि **चरके** आत्रेयभद्रकाप्यीये—"द्विविधं हि सात्म्यं प्रकृतिसात्म्यमभ्याससात्म्यम् च" (च. सू. स्था. अ. २६) इति; आहाराचारभेदादन्नपानभेदाद्वा न पौनरुक्त्यमित्यन्ये । जलाभिरमणैरिति जलक्रीडादिभिः । वेगविघातैरिति मूत्रपुरीषादीनाम् । क्रिमिदोषत इति क्रिमिभिः पक्वामाशयदूषणात्, क्रिमिजनितवातादिकोपाद्वा । एतानि च निदानानि यथासंभवं वातादीनां बोद्धव्यानि, दोषव्याधिहेतुत्वख्यापनार्थं पठितानि । एवमन्यत्रापि निदानविशेषपाठे प्रायो द्रष्टव्यमिति ॥ १–३ ॥

***संशम्यापां धातुरग्निं प्रवृद्धः शकृन्मिश्रो[2] वायुनाऽधः प्रणुन्नः ।**
सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं[3] तं वदन्ति ॥
एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ॥ ४ ॥

(सु. उ. अ. ४०)

सर्वातीसारसाधारणीं संप्राप्तिमाह–संशम्येत्यादि । संशम्य शमयित्वा; अत्रान्तर्भावितोण्यर्थ इति **गदाधरः**, अग्निं मन्दीकृत्येत्यर्थः । प्रवृद्धः प्रदुष्टः । अपां धातुरित्यसमासकरणेन रसजलमूत्रस्वेदमेदःकफपित्तरक्तादयो ग्राह्याः । **चरकेऽ**-प्युक्तं–"शोणितादीन् धातून् दूषयन्त" (च. चि. स्था. अ. १९) –इति । अधः प्रणुन्नः प्रेरितः, सरति गच्छत्यतीवेत्यनेन निरुक्तिमुक्तवान्; गुदेन बहुद्रवसरणमतिसार इत्यर्थः । निरुक्तिरपि लक्षणं भवति, एतेनाधोद्रवसरणत्वाविशेषेऽपि ग्रहण्यादीनां व्यवच्छेदः; वातातीसारे स्वल्पत्वं कफपित्तातीसारापेक्षया, नतु ग्रहण्यपेक्षयेति । उक्तषड्विधत्वं विभजते—एकैकश इत्यादि । ननु चरकादौ दोषैरेकैकशस्त्रयः, सन्निपातेनैकः, भयशोकजौ द्वौ, एवं षड्विधः, अत्र त्वन्यथेति कोऽभिप्रायः ? उच्यते—चरके भयशोकजौ लक्षणसंज्ञाकार्यभेदाद्द्विधावुक्तौ[4], आमजस्त्वजाजीर्णकुपितत्रिदोषजत्वेन सन्निपातेनावरुद्ध इति न संख्यातिरेकः, सुश्रुते तु हेतुप्रत्यनीकचिकित्सार्थं शोकजामजौ पठितौ वातजत्वसन्निपातजत्वाभेदेऽपि, यथा वातादिजत्वाभेदेऽपि मृत्तिकाजः[5] पाण्डुरोग इति; एवं भयशोकजावपि चरके

* "संशम्येत्यादि । यस्माद्वायुनाऽधः प्रणुन्नः प्रेरितः; अपां धातुः कफरसमूत्रस्वेदमेदः पित्तरक्तादिकः, प्रवृद्धो दुष्टः, अन्तरग्निं संशम्य मन्दीकृत्य, वर्चोमिश्रः पुरीषयुक्तः, अतीवाधः सरति, आचार्या घोरं तं व्याधिमतीसारमाहुः, तं पुनः षट्प्रकारं वदन्ति । उक्तषड्विधत्वं विभजन्नाह–वातेन पित्तेन श्लेष्मणा त्रयः, सन्निपातेन चतुर्थः, शोकेन पञ्चमः, आमेन षष्ठः, एवं षडतीसाराः । संख्येयानिर्देशादेव संख्यायां लब्धायां षडिति संख्याकरणं नियमार्थं; तेन द्वन्द्वजा अतीसारा न भवन्ति व्याधिस्वभावादिति सूचितम् । नन्वत्र भयशोकाभ्यां वायुः प्रकुप्यति तर्हि द्वयोर्वातजे निरोधः, पृथग्ग्रहणं किमर्थं कृतम् ? उच्यते–सुश्रुतेन हेतुप्रत्यनीकचिकित्सार्थं पृथक् पठितम्" ॥ ४ ॥ (आ० द०)

१ 'प्रदुष्टमद्यपानीयपानादतिमद्यपानीयपानात्' इति वर्त्तमानचरकपुस्तके पाठः । २ 'वर्चोमिश्रो' क. । ३ 'षड्' क. । ४ 'लक्षणशक्त्या कार्य॰' इति क. ख. । ५ 'मृत्तिकायाः इति क. ख. ।

हेतुप्रत्यनीकचिकित्सार्थं पठितौ, सुश्रुते भयजः केवलवातिकेऽवरुद्धः मानसत्वाविशेषाद्वा शोकजेऽवरुद्ध इति **जेज्जटः** । ननु, षष्ठ आमेन चोक्त इति पृथक्करणमसंगतं; यतः सर्वेषामेवातीसाराणां प्रागवस्था आमशब्दवाच्या, जीर्णावस्था पक्वशब्दवाच्या; अत एव सर्वातीसारगोचरमुदाहरन्ति,–"आमपक्वक्रमं हित्वा नातिसारे क्रिया हिता । अतः सर्वातिसारेषु ज्ञेयं पक्वामलक्षणम्" (सु. उ. तं. अ. ४०) —इति । नैवम्, आमेनैवारभ्यत इति आमजः, दोषास्तु संसर्गिणः प्रेरयितारश्च, नत्वारम्भकाः । आमश्च दुष्टान्नकार्यो दोषधातुमलव्यतिरिक्तो वातादिसंसृष्टो वातादिप्रेरितो वा रक्तादिवद्व्याध्यारम्भक इति । द्वन्द्वजास्त्वतीसाराः प्रकृतिसमसमवायारब्धत्वात् पृथङ्नोक्ताः; विकृतिविषमसमवायारब्धास्तु न संभवन्त्येव, व्याधिस्वभावात् । शैली चेयमाचार्याणां प्रायः प्रकृतिसमसमवायारब्धान् द्वन्द्वान् सन्निपातांश्च न[1] गणयन्ति, विकृतिविषमसमवायारब्धांश्चावश्यं लिखन्ति । यथा **चरके**—"पञ्च गुल्माः" (च. सू. अ. १९)–इत्यभिधाय, "संसृष्टरूपानपरांस्तु गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ।" (च. चि. स्था. अ. ५)—इत्युक्तं; तथा **सुश्रुते**—"षडर्शांसि" इत्यभिधाय, "अर्शःसु दृश्यते रूपं यदा वै दोषयोर्द्वयोः । संसर्गं तं विजानीयात् संसर्गः षड्विधश्च सः ॥"—(सु. नि. स्था. अ. २) इत्युक्तम् ॥ ४ ॥

*हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसन्निरोधाः ।
विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥५॥
(सु. उ. अ. ४०)

सर्वातीसारपूर्वरूपमाह—हृन्नाभीत्यादि । तोदः सर्वैर्हृदादिभिः संबध्यते । अत्र कुक्षिशब्द उदरैकदेशवाची, तेन न पौनरुक्त्यम् । अनिलसन्निरोध इति वाताप्रवृत्तिः । विट्सङ्गः पुरीषाप्रवृत्तिः; एतच्च दोषदूष्यसंमूर्च्छनावस्थाप्रतिनियतं पूर्वरूपं, तेन रूपावस्थायां नानुवर्तते, (यद्यनुवर्तेत तदा तत्र व्याधिरेव नोत्पद्येत, विट्सङ्गातिप्रतिषेधात्[2]) । अविपाकोऽन्नस्य । पुरःसराणि पूर्वरूपाणीति ॥ ५ ॥

†अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः ।
शकृदामं सरुक्शब्दं मारुतेनातिसार्यते ॥ ६ ॥

वातिकमाह—अरुणमित्यादि । अरुणमिति वायोररूपस्यापि दोषदूष्यसंमूर्च्छनाद्भवति, एवमन्यत्रापि । फेनिलं सफेनं; फेनादिलच् । शकृत् पुरीषम् । सरुक्शब्दमिति सशूलं सशब्दं चेति ॥ ६ ॥

‡पित्तात्पीतं नीलमालोहितं वा तृष्णामूर्च्छादाहपाकोपपन्नम् ।
(सु. उ. अ. ४०)

* "हृन्नाभीत्यादि । भविष्यतो भाविनोऽतीसारस्य हृत्तोदादीनि पुरःसराणि पूर्वरूपाणि भवन्ति । तोदो हृदयादिषु व्यथा एव । गात्रावसादो देहग्लानिः" (आ० द०) ॥ ५ ॥

† "वातातीसारलक्षणमाह—अरुणमित्यादि । मारुतेन वायुना अरुणादियुक्तं शकृत् पुरीषमतिसार्यते । रूक्षं निःस्नेहम्, अल्पमल्पं स्तोकं, मुहुर्मुहुर्वारंवारम्, आममपरिपक्वम्" (आ० द०)६

‡ "पित्तातिसारलक्षणमाह—पित्तादित्यादि । पीतं पीतवर्णं, नीलं नीलवर्णम्, आलोहितमीषल्लोहितम् । तृष्णेत्यादि मूर्च्छा प्रसिद्धा" (आ० द०) ॥

१ 'गणयन्ति' इति क. ख. । २ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते ।

पैत्तिकमाह—पित्तादित्यादि । दाहपाकोपपन्नमिति दाहः सर्वाङ्गे, पाको गुद एव। उक्तं हि तन्त्रान्तरे—"तृष्णादाहखेदमूर्च्छाबुध्नसन्तापपाकपरीतः" इति; बुध्नो गुदः। अत्राप्यतिसार्यते शकृदित्यनुवर्तते; एवं श्लैष्मिकेऽपि ॥—

*शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं विस्रं शीतं हृष्टरोमा मनुष्यः ॥ ७॥
(सु. उ. अ. ४०)

श्लैष्मिकमाह—शुक्लमित्यादि । शुक्लमित्यादिना हृष्टरोमा इत्यन्तेन श्लैष्मिकः। विस्रमामगन्धि ॥ ७ ॥

वराहस्नेहमांसाम्बुसदृशं सर्वरूपिणम् ।
कृच्छ्रसाध्यमतीसारं विद्याद्दोषत्रयोद्भवम् ॥ ८ ॥

सान्निपातिकमाह—वराहेत्यादि । वराहस्नेहः शूकरस्य मेदो मज्जा वा, मांसाम्बु मांसप्रक्षालनोदकं, तैः सदृशम् । सर्वरूपिणमिति उक्तवाताद्यतीसारत्रयलक्षणयुक्तम् । एवंविधमतीसारं दोषत्रयोद्भवं विद्यात्; तं च कृच्छ्रसाध्यं, त्रिदोषजत्वादेव ॥ ८ ॥

†तैस्तैर्भावैः शोचतोऽल्पाशनस्य
वाष्पोष्मा वै वह्निमाविश्य जन्तोः ।
कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं
तच्चाधस्तात् काकणन्तीप्रकाशम् ॥ ९ ॥
निर्गच्छेद्वै विड्विमिश्रं ह्यविड्वा
निर्गन्धं वा गन्धवद्वाऽतिसारः ।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं
रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥ १० ॥
(सु. उ. अ. ४०)

शोकजमाह—तैस्तैरित्यादि । तैस्तैर्भावैर्धनबन्धुनाशादिभिः । शोचतः शोकं कुर्वतः । अल्पाशनस्य शोकादेवाल्पं भुञ्जानस्य; एतेन धातुक्षयोऽप्यस्य स्यादित्युक्तम् । वाष्पोऽत्युद्गतनेत्रनासागलादिगतं[1] जलं, तत्सहित ऊष्मा शोकजं देहतेजो वाष्पोष्मा; स कोष्ठं गत्वा, वह्निमाविश्य व्याकुलीकृत्य, क्षोभयेत्तस्य रक्तम् ऊष्मलद्रवत्वाभ्यां समानगुणत्वात्; तच्च रक्तं काकणन्तीप्रकाशं गुञ्जाफलसंकाशम्, अधस्तान्निर्गच्छेत् । पक्तिमाविश्येति पाठान्तरे स एवार्थः । गदाधरस्तु वह्निशब्देन पित्तमाह । तच्च रक्तं विड्विमिश्रं निर्गच्छेत्; अविड्वा अल्पविट्, अल्पाशनत्वात् । निर्गन्धं गन्धवद्वेति विकल्पोऽविड्सविड्भ्यामिति कार्तिकः; अन्ये तु पित्तस्य पूतित्वात्[2] प्रबलगन्धवत्ता, तस्य नातिदुष्ट्या

* "श्लेष्मातिसारमाह—शुक्लमित्यादि । हृष्टरोमा मनुष्यः कण्टकितदेहः पुमान्, शुक्लादिगुणयुक्तं पुरीषमतिसार्यते । शुक्लं श्वेतवर्णं, सान्द्रं घनं, श्लेष्मसहितं, विस्रम् आमगन्धि, शीतं शीतलमिति" ॥ ७ ॥ (आ० द०)

† "तैस्तैर्भावैरित्यादि । तस्य एवंविधस्य जन्तोः । तच्च रक्तं निर्गन्धं गन्धवद्वेति विकल्पः; पित्तस्य दूषितत्वादतिगन्धता, तस्य नातिदुष्ट्या निर्गन्धत्वमिति । एष शोकोत्पन्नोऽतिसारो विकारो वैद्यैः कष्टो दारुणः प्रदिष्टः" (आ० द०) ॥ ९ ॥ १० ॥

१ 'मन्यूद्रवनेत्रनासागलादिगतं' इति ख. । २ 'पूतित्वात्' इति ग. ।

निर्गन्धत्वमिति; गन्धश्च विस्र इत्याहुः। क्षोभयेत्तस्य रक्तमित्यत्र 'शोषयेत्तस्य भुक्तम्'– इति पाठान्तरमयुक्तं, काकणन्तीप्रकाशत्वे हेत्वन्तराभावात्; तस्मादाद्य एव पाठो ज्यायान्, व्याख्यातश्च जेज्जटादिभिः सर्वैरेव। अयं वातपित्तज उक्तः। दुश्चिकित्स्योऽतिमात्रमिति शोकापनोदं विना केवलेन भेपजेनानुपशमात्। अत एवाह–कष्ट एष प्रदिष्ट इति। वैद्यैर्ब्रह्मादिभिः। गदाधरस्त्वाह–'एष' इत्यनेनैवंसंप्राप्तिक एव कष्टो नत्वन्यः शोकज इति ॥ ९ ॥ १० ॥

*अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तः
कोष्ठं दोषा धातुसंघान्मलांश्च।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षष्ठमेनं वदन्ति ॥ ११ ॥
(सु. उ. अ. ४०)

आमातीसारमाह—अन्नाजीर्णादित्यादि। अन्नं च तदजीर्णं चेति अन्नाजीर्णम्। अत एवाह क्षारपाणिः–"यथाभुक्तमशनमुपविशति"–इति। प्रद्रुता विमार्गगाः। क्षोभयन्तो दूषयन्तः। धातुसंघान् रक्तादीन्। मलान् पुरीषादीन्। नैकशो बहुशः॥११॥

†संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितम् ॥ १२ ॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य वै।
लाघवं च विशेषेण तस्य पक्वं विनिर्दिशेत् ॥ १३ ॥
(सु. उ. अ. ४०)

सर्वातिसाराणां चिकित्सोपयोगित्वेनामलक्षणं पक्वलक्षणं चाह—संसृष्टमित्यादि। संसृष्टं संबद्धम्, एभिर्दोषैर्दुष्टिभिरुक्तवाताद्यतीसारलिङ्गैः। दुष्ट्यश्चात्र यथासंभवं व्यस्ताः समस्ताश्च बोद्धव्याः; तेन सर्वातिसाराणां न सान्निपातिकत्वप्रसङ्गः। न्यस्तमप्सु जले क्षिप्तम्; अवसीदति निमज्जति, आमस्य गौरवात्। भृशशब्दः पिच्छिलेनापि संबध्यते। दुर्गन्धि विस्रम्। पिच्छिलमामसंबन्धात्। एतानीति

* 'अन्नेत्यादि। अन्नं च तदजीर्णं चेति अन्नाजीर्णं, तस्मात् प्रद्रुता उदीरिता दोषाः, कोष्ठं क्षोभयन्तो दूषयन्तः, कोष्ठशब्देन समस्तमुदरमध्यमुच्यते, तत्र गता इत्यर्थः। ते नानावर्णं सारयन्ति। 'भूयसा' इति पाठान्तरे बहुवेगत्वं सूचितम्। शूलोपेतं शूलयुक्तम्। अत्र पुनः षष्ठ इति संख्यावचनं नियमार्थं, तेन भयस्नेहाजीर्णविसूचिकार्शोजीर्णादिनिमित्ता अतीसारा न पृथग्गणनीयाः; यतस्ते दोषजेष्वेवान्तर्भूताः। प्रसंगादामलक्षणं लिख्यते–"आहारस्य रसः शेषो यो न पक्वोऽग्निलाघवात्। स हेतुः सर्वरोगाणामाम इत्यभिधीयते"–इति' (आ० द०)॥ ११ ॥

† 'अथामलक्षणमाह–संसृष्टमित्यादि। एभिः पूर्वनिर्दिष्टैः। पक्वलक्षणमाह–एतानि जलनिमज्जनादीनि यस्य पुरीषस्य विपरीतानि जले प्लवनं, गन्धरहितत्वम्, अपिच्छिलत्वमित्यर्थः। यस्येति मनुष्यस्येति केचिद् व्याख्यानयन्ति। चकारात् कफदुष्टं पुरीषं समुच्चीयते। यदुक्तम्– "मज्जत्यामा गुरुत्वाद्विट् पक्वा तूत्प्लवते जले। विनाऽतिद्रवसंघातात्श्लेष्मशैत्यप्रदूषणात्" इति। ननु, कफसंसृष्टं पक्वमपि जले निमज्जति तत् कथं पक्वकफातीसारज्ञानम्? उच्यते, तदितरलक्षणैरेव' (आ० द०) ॥ १२ ॥ १३ ॥

१ 'मूलं' इति–ग.।

जलनिमज्जनादीनि । लाघवं कोष्ठस्य शरीरस्य च, चकारेण कफशैत्यदुष्ट्यादिकं विनाऽप्यम्बुनिमज्जनं लक्षणमिति समुच्चीयते । यदुक्तं—"मज्जत्यामा गुरुत्वाद्विट् पक्का तूत्प्लवते जले । विनाऽतिद्रवसंघाताच्छ्लेष्मशैत्यप्रदूषणात्"—इति । अथवा आमलिङ्गवैपरीत्येनैव लाघवे सिद्धे पुनर्लाघवकरणं तत् कफदुष्ट्यादिव्यतिरेकं बोधयतीति ॥१२॥१३॥

*पक्वजाम्बवसंकाशं यकृत्खण्डनिभं[1] तनु ।
घृततैलवसामज्जवेशवारपयोदधि—॥ १४ ॥
मांसधावनतोयाभं कृष्णं नीलारुणप्रभम् ।
मेचकं स्निग्धकर्बूरं चन्द्रकोपगतं घनम् ॥ १५ ॥
कुणपं मस्तुलुङ्गाभं सुगन्धि[2] कुथितं बहु ।
तृष्णादाहतमः[3]श्वासहिक्कापार्श्वास्थिशूलिनम् ॥ १६ ॥
संमूर्च्छारतिसंमोहयुक्तं पक्वबलीगुदम् ।
प्रलापयुक्तं च भिषग्वर्जयेदतिसारिणम् ॥ १७ ॥
"असंवृतगुदं क्षीणं दूराध्मातमुपद्रुतम् ।
गुदे पक्वे गतोष्माणमतिसारकिणं[4] त्यजेत् ॥ १८ ॥"
(सु. उ. अ. ४०)
"श्वासशूलपिपासार्तं क्षीणं ज्वरनिपीडितम् ।
विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥ १९ ॥"
(सु. सू. अ. ३३)
†[5]शोथं[6] शूलं ज्वरं तृष्णां कासं श्वासमरोचकम् ।
छर्दिं मूर्च्छां च हिक्कां च दृष्ट्वातीसारिणं त्यजेत् ॥

असाध्यलक्षणान्याह—पक्वेत्यादि । पक्वजाम्बवसंकाशं पक्वजम्बूफलसदृशवर्णं स्निग्धकृष्णमित्यर्थः । यकृत्खण्डनिभं कृष्णलोहितम् । तनु स्वच्छ(ल्प)म् । घृतादीनां मांसधावनतोयान्तानामिवाभाः प्रतिभासो यस्य तत्तथा । वेशवारो "निरस्थिपिशितं

*'पक्वेत्यादि । भिषक् पक्वजाम्बवसंकाशादिपुरीषं तथा तृष्णादियुक्तमतिसारिणं पुरुषं च वर्जयेदिति संबन्धः । यकृत्पिण्डनिभं कालखण्डसदृशं कृष्णलोहितमित्यर्थः । वेसवारमिश्रमम्बु तत्सदृशम् । मेचकं मृदङ्गमुखप्रलेपनपिण्डवदीषत् कृष्णरूक्षम् । स्निग्धं चिक्कणं, धातुस्नेहयोगात् । घनं धात्ववयवमिश्रत्वात् । कुणपं शवगन्धिः, शीतमृतकगन्धमित्यर्थः । सुगन्धं गन्धयुक्तम् । बहु मात्राधिकत्वात् । यादृशमतिसारिणं त्यजेत्तादृशमाह—उपद्रुतं अतीसारोपद्रवैः । यदाहुः—"तृष्णा दाहोऽरुचिः शोथः पार्श्वशूलोऽरतिर्वमिः । गुदपाकः प्रलापश्च ह्याध्मानं श्वासकासकौ ॥ मूर्च्छा हिक्का मदः शूलं बहुवेगो ज्वरस्तथा । एतैरुपद्रवैर्जुष्टमतिसारिणमुत्सृजेत्"—इति । अन्यच्च—"हस्तपादाङ्गुलेः संधिप्रपाको मूत्रनिग्रहः । पुरीषस्योष्णता चैव मरणायातिसारिणाम्"—इति । अत्र श्लोकद्वयं केचन पठन्ति—"श्वासशूलपिपासार्तं क्षीणं ज्वरनिपीडितम् । विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥ बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरुपद्रुतः । अपि यूनामसाध्यः स्यादतिदुष्टेषु धातुषु"—इति । एतच्च माधवेन संग्रहीतत्वान्मधुकोशकृता च स्पष्टीकृतम् ।

† अतीसारोपद्रवानाह—शोथमित्यादि । सुकरव्याख्यानम्' (आ० द०) ॥ १४—१९ ॥

१ 'यकृत्पिण्डनिभं' इति ग. । २ 'दुर्गन्धं' इति क. । ३ "°दाहरुचि°" इति क. । "दाह-भ्रम°" इति ग. । ४ 'अतिसारिणमुत्सृजेत्' इति ग. । ५ आतङ्कदर्पणसम्मतोयं पाठः । ६ 'रोधो' इति ग. । ७ "°र्युक्तं°" इति ग. ।

पिष्टं दधिक्षीरसमन्वितम् ॥ एलमरिचसंयुक्तं वेशवार इति स्मृतम्"—इत्यादिपरिभाषितमांसप्रकारः। कृष्णमञ्जनप्रख्यम्। एतच्च कृष्णत्वादिकं पित्तातिसारवर्ज्यं बोद्धव्यं, तत्र रूपत्वेन पठितत्वात्। नीलारुणं चापपक्षवर्णम्। मेचकं मर्दनाञ्जनपिण्डवदीषत्कृष्णरूक्षम्। कर्बूरं नानावर्णं, तच्च स्निग्धं स्नेहद्रवधातुयोगात्। चन्द्रकोपगतं मयूरपिच्छचन्द्रकैरिव धातुस्नेहैरुपगतम्। उक्तं हि **करवीराचार्येण**,—"चन्द्रकैः शिखिपिच्छाभैर्नीलपीतादिराजिभिः। आवृतं वेशवाराम्बुमज्जक्षीरोपमं त्यजेत्"—इति। तदेव घनं धात्वन्तरव्यामिश्रत्वात्। कुणपं शवदुर्गन्धि। मस्तुलुङ्गाभं मस्तुलुङ्गं मस्तकाभ्यन्तरस्नेहः घृतकेति ख्यातं, तत्सदृशम्। कुथितं पूति। तृष्णेत्यादि।—तृष्णादीनां पार्श्वास्थिशूलान्तानां द्वन्द्वं कृत्वा मत्वर्थीय इनिः, तृष्णादियुक्तमित्यर्थः। अत्र संमूर्च्छा मनोमोहः, संमोह इन्द्रियमोहः, इत्यपौनरुक्त्यम्। चकाराच्चरकोक्तः (च. चि. अ. १९)। सहसोपरतातीसारश्चासाध्यो बोद्धव्यः पक्ववलीगुदं पक्वा वलयो गुदे यस्य तं पक्ववलीगुदम्। असंवृतगुदं गुदसंवरणाक्षमम्। तमेव क्षीणं वलोपचयरहितम्। दूराध्मातं भृशमाध्मानयुक्तं, तस्य विरेकसाध्यत्वेनातिसारविरुद्धोपक्रमत्वात्; दुरात्मानमिति पाठान्तरे दुष्टान्तःकरणम्, अजितेन्द्रियमिति **जेज्जटः**, उपद्रुतमतीसारोपद्रवैः शोथादिभिर्युक्तम्। यदुक्तं,—"शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकम्। छर्दिं मूर्च्छां च हिक्कां च दृष्ट्वाऽतीसारिणं त्यजेत्"—इति। गुदे पक्वे गतोष्माणमिति गुदे पाकारम्भकपित्ते वर्तमानेऽपि गतोष्माणं शीतगात्रं नष्टाग्निं वा। अतिसारकिणम् अतिसारयुक्तम्। "वातातीसाराभ्यां कुक् च" (पा. अ. अ. ५ पा. २ सू. १२९)—इति कुक्, चादिनिः। विशेषेणेति वचनाद्बालस्याप्यतिसारोऽसाध्य इति बोधयति। यदाह **सुश्रुत**श्चिकित्सायां—"कृच्छ्रश्चायं बालवृद्धेष्वसाध्यः"—(सु. उ. तं. अ. ४०)—इति। एतच्चावलत्वे सति बोद्धव्यम् ॥१४–१९॥

पित्तकृन्ति यदाऽत्यर्थं द्रव्याण्यश्नाति पैत्तिके ॥
तदोपजायतेऽभीक्ष्णं रक्तातीसार उल्बणः ॥ २० ॥

ननु, रक्तजोऽप्यतिसारोऽस्ति तस्य सप्तमत्वापत्तेरुक्तं षट्त्वं विरुध्यते, इत्याशङ्क्य पैत्तिकस्यायमवस्थाविशेष इत्याह—पित्तेत्यादि। पैत्तिकेऽतीसारे विद्यमाने भविष्यति वा पित्तकृन्ति पित्तकारकाणि द्रव्याण्यत्यर्थं प्रभूतमभीक्ष्णं निरन्तरमश्नाति तदा रक्तातीसार उल्बणो महान्नुपजायत इति संबन्धः। अत्र चारुणकृष्णपाण्डुत्वादिना वातादयो दूषका बोद्धव्याः। यदुक्तं—"दोषलिङ्गेन मतिमान् संसर्गं तत्र लक्षयेत्"—इति। एवं स्नेहाजीर्णविसूचिकाविषार्शःक्रिमिप्रभृतिजन्येष्वतीसारेषु षट्कातिरिक्तत्वं प्रतिक्षिप्तं बोद्धव्यम्, अव्यभिचरितदोषलिङ्गत्वादिति **जेज्जटः** ॥ २० ॥

***वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य।**
प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥२१॥
(सु. उ. अ. ४०)

*'दुष्टो वायुरहिताशनस्य संचितं बलासं श्लेष्माणं मलाक्तं पुरीषसहितमधस्तान्नुदति गुदेन पातयति। मलाक्तं बहुशो वारंवारम्। अल्पं स्तोकं, प्रवाहतः प्रवाहणं कुर्वतः। बलासमित्युपलक्षणं, तेन पित्तं रक्तं वा निचितं ज्ञेयम्'। (मा० द०) ॥ २१ ॥

अथ द्रवसरणादामपक्वलक्षणयोगात् प्रवाहिकातीसारयोः साधर्म्यम्, अतोऽतीसाराधिकारे प्रवाहिकासंप्राप्तिमाह—वायुरित्यादि । अतीसारे नानाविधद्रवधातुसरणं, प्रवाहिकायां तु कफमात्रसरणमिति भेदः । निचितं बलासमहिताशनस्य संचितं कफं, मलाक्तं पुरीषसहितं, वायुर्वातः, अधस्तान्नुदति गुदेन पातयति । प्रवाहतः प्रवाहणं कुर्वतः । भोजादौ लियं विस्रंसीति नाम्ना पठ्यते, पराशरे [1]ऽन्तर्ग्रन्थिरिति, हारीतस्तु नि[2]ष्ठीरकाख्यामेतां पठति । यदाह—"प्रवाहिकेति सा ज्ञेया कैश्चिन्नि[3]ष्ठीरकस्तु सः"—इति ॥ २१ ॥

*प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच्च ।
सशोणिता शोणितसंभवा च ताः स्नेहरूक्षप्रभवा मतास्तु ।
तासामतीसारवदादिशेच्च लिङ्गं क्रमं चामविपक्वतां च ॥ २२ ॥
(सु. उ. अ. ४०)

[1] तस्या वातादिभेदेन रूपमाह–प्रवाहिकेत्यादि । ननु, वायुः प्रवृद्धो निचितं बलासमित्युक्तं तत् कथं वातकृतेति ? उच्यते, आधिक्येन व्यपदेशात् । ननु, तथाऽपि पित्तरक्तसंभवा कुतः ? उच्यते, अहिताशनस्येत्युक्तम्, आहारो हि विरुद्धस्तस्यामवस्थायां पित्तं रक्तं च कोपयति, ते च पश्चाद्वातस्यानुबले स्वलिङ्गं यदा दर्शयतस्तदा ताभ्यां व्यपदेशः । स्नेहरूक्षप्रभवा इति स्नेहप्रभवा कफजा, रूक्षप्रभवा वातजा; तुशब्दाच्च ती[4]क्ष्णोष्णप्रभवा पित्तजा रक्तजा च । लिङ्गं वातादिभेदेन लक्षणम् । क्रममामपक्वभेदेन चिकित्साक्रममिति ॥ २२ ॥

[1]यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ २३ ॥
(सु. उ. अ. ४०)

(ज्वरातीसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तत्स्याज्ज्वरातिसारस्य तेन नात्रोदितं पुनः ॥ १ ॥)

इति श्रीमाधवकरविरचिते माधवनिदानेऽतीसारनिदानं समाप्तम् ॥ ३ ॥

वातविष्टम्भादुदावर्ताद्वा मलाप्रवृत्तावतीसारनिवृत्तिरिति शङ्कानिरासार्थमतीसारनिवृत्तिलक्षणमाह—यस्येत्यादि । उच्चारं विना यस्य मूत्रं प्रवर्तते, सम्यगिति सम्य[5]ग्वृत्त्या न हीनयोगेनेत्यर्थः । वायुश्च गच्छति, 'गुदेन' इति शेषः । स्थितो निवृत्तिं गतः । उदरामयोऽतीसारः, प्रकरणात् । एतेन संप्राप्तिभङ्ग उक्तः । अतीसारे हि संप्राप्तिरियं—

* 'वातकृता सशूला भवति, पित्तजा दाहयुक्ता, कफजा कफयुक्ता । सशोणिता सरुधिरा शोणितात्, तज्जातत्वात् । तासां हेतुमाह—स्नेहेत्यादि । तासां चतसृणां अतीसारवदादिशेत्; वातादिभेदेन लिङ्गं लक्षणम्, आमपक्वभेदेन क्रमं चिकित्साक्रममित्यर्थः' (आ० द०) ॥ २२ ॥

[1] 'यस्यातीसारिण उच्चारं पुरीषं विना मूत्रं प्रवर्तते, वायुश्च गच्छति सरति 'गुदेन' इति शेषः । दीप्ताग्नेः प्रवृद्धजठरानलस्य, अतः सम्यक्पाकात् लघुकोष्ठस्य, अतीसारप्रकरणत्वात् उदरामयोऽतीसारः, स्थितो गतः, निवृत्त इत्यर्थः' (आ० द०) ॥ २३ ॥

१ 'अन्त्रग्रन्थिरिति' इति पा० । २ 'निःसारकाख्यां' इति पा० । ३ 'निःसारकस्तु' इति पा० । ४ 'तीक्ष्णाम्ल०' इति क. । ५ 'नातिप्रवृत्त्या' इति पा० ।

यन्मूत्रोचितोऽपि द्रवधातुर्गुदेनैव प्रवर्तते, सर्वस्यैवाब्धातोर्गुदप्रवृत्तत्वात्; यदा तु मूत्रमार्गेण प्रवर्तते, तदाऽपि पुरीषप्रवृत्तिसमकालमिति ॥ २३ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामतीसारनिदानं समाप्तम् ॥३॥

अथ ग्रहणीरोगनिदानम् ।

*अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥ १ ॥
(सु. उ. अ. ४०)

द्रवसरणसाधर्म्यात् परस्परानुबन्धित्वाच्चातीसारानन्तरं ग्रहणी, तस्याः संप्राप्तिमाह—अतीसार इत्यादि । अपिशब्दादजातातिसारस्यापि स्वहेतोर्ग्रहणीरोगः स्यादिति बोधयति । अन्ये त्वपिशब्दादनिवृत्तेऽप्यतीसार इति व्याचक्षते । मन्दाग्नेरित्यनेन दीप्ताग्नेरहिताशनमपि न विकारकारीति बोधयति । उक्तं हि सुश्रुते— "दीप्ताग्नेर्विरुद्धं वितथं भवेत्" (सु. सू. स्था. अ. २०)—इति । भूय इति पुनरत्यर्थं वा, संदूषितः पूर्वमतीसारेऽपि दूषितत्वात्, अभिदूषयेत् समन्ताद्दूषयेत् । एतेन निवृत्तातीसारेणाहिताहारपरिहारः करणीयः, आवह्निबललाभादित्युक्तं भवति । अत एवाह सुश्रुतः—"तस्मात् कार्यः परीहारस्त्वतीसारे विरिक्तवत् । यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥" (सु. उ. तं. अ. ४०)—इति ॥ १ ॥

†एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥ २ ॥
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥ ३ ॥
(सु. उ. अ. ४०)

तस्याः संप्राप्तिपूर्वकं सामान्यलक्षणमाह—एकैकश इत्यादि । मूर्च्छितैरतिवृद्धैः 'मूर्च्छा मोहसमुच्छ्राययोः'—इति धात्वर्थात् । 'उच्छ्रितैः' इति पाठान्तरे एवार्थः । सा ग्रहणी दोषैर्दुष्टा सति भुक्तमाहारमाममपक्वमेव पक्वं वा विमुञ्चति । वाशब्दश्चार्थे, एवकारः समुच्चीयमानावधारणे, यथा—"नरं च नारायणमेव चोभौ स्वतःसुतौ संजनयांबभूवतुः"—इति । अथवा एवकारो विकल्पार्थः, निपातानामनेकार्थत्वादिति । सरुजं सशूलम्, पूति दुर्गन्धि । वातेन मुहुर्बद्धं, पित्तेन मुहुर्द्रवम् । ग्रहणीरोगमिति ग्रहण्या रोगो ग्रहणीरोगः । ग्रहणी चाग्न्यधिष्ठानम् ।

* 'अतीसार इत्यादि । केयं ग्रहणी नाम? "मांसाऽसृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका । पञ्चमी च तथाऽऽन्त्राणां षष्ठी चाग्निधरा मता ॥ रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ॥" (शा० प्र० खं० अ० ५) । उक्तं च सुश्रुते—"षष्ठी पित्तधरा नाम या कला परिकीर्तिता । पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥" (सु० उ० तं० अ० ४०)—इति । अपिशब्दादजातातीसारस्यापि स्वहेतोर्ग्रहणीरोगः स्यादिति बोधयति । (आ० द०) ॥ १ ॥

† 'भिषजस्तं ग्रहणीरोगमाहुः । बहुशः बहून् वारान् विमुञ्चति । पित्तेनापि दूष्यते तप्तजलेनेव वह्निः, अतो दोषैरिति बहुवचनमुक्तम् । पित्तेन मुहुर्द्रवं कफेन मुहुर्बद्धं च' (आ० द०) ॥२॥३॥

यदाह चरकः—"अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता । नाभेरुपरि सा ह्यग्निबलोपस्तम्भबृंहिता ॥ अपक्वं धारयत्यन्नं पक्वं सृजति चाप्यधः" (च. चि. स्था. अ. १५)—इति । सुश्रुतेऽप्येतदुक्तं—"षष्ठी पित्तधरा नाम या कला परिकीर्तिता । पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥" (सु. उ. तं. अ. ४०)—इति । कला धात्वाशयान्तरमर्यादा, पक्वामाशयमध्यस्था पच्यमानाशयरूपेत्यर्थः ॥ २ ॥ ३ ॥

*पूर्वरूपं तु तस्येदं तृष्णाऽऽलस्यं बलक्षयः ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवम् ॥ ४ ॥
(च. चि. अ. १५)

पूर्वरूपमाह—पूर्वरूपमित्यादि । तृष्णा पिपासा । विदाहोऽन्नस्य अग्निमान्द्येनाहारस्य विदग्धत्वं, अत एव चिरात् पाकश्चान्नस्यैव । कायस्य गौरवं सामत्वादिति ॥ ४ ॥

†कटुतिक्तकषायातिरूक्षसंदुष्टभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥ ५ ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान् ।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥ ६ ॥
कण्ठास्यशोषोऽक्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विसूचिका ॥ ७ ॥
हृत्पीडाकार्श्यदौर्बल्यं वैरस्यं परिकर्तिका ।
गृद्धिः सर्वरसानां च मनसः सदनं तथा ॥ ८ ॥
जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः ॥ ९ ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्चः कासश्वासार्दितोऽनिलात् ॥ १० ॥
(च. चि. अ. १५)

वातिकग्रहण्या निदानसंप्राप्तिपूर्वकं रूपमाह—कटुतिक्तेत्यादि । संदुष्टभोजनं संयोगादिविरुद्धभोजनम् । 'संदुष्टभोजनैः' इत्यत्र 'शीतादिभोजनैः' इति पाठान्तरम् । प्रमितमल्पभोजनं; प्रमृतेति पाठान्तरे अतीतकालभोजनं बोद्धव्यम् । अनशनमुपवासः । एतैः कारणैः कुपितो मारुतः, वह्निं संछाद्य संदूष्य, गदान् रोगान् करोति । कान् गदान् करोतीत्याह—तस्यान्नमित्यादि । शुक्तपाकम् अम्लपाकम्, एतच्चाग्निमान्द्यजनितान्नविदाहाद्भवति । खराङ्गता कर्कशशरीरत्वं, वातेन त्वग्गतस्नेहशोषात् । तिमिरं मन्ददृष्टित्वं । रुक् पीडा, सा च पार्श्वादिभिः संबध्यते । विसूचिका ऊर्ध्वमध-

* 'आलस्यं शक्तावप्यनुत्साहः' (आ० द०) ॥ ४ ॥

† 'अतिशब्दः कटुतिक्तकषायैः सह संबध्यते । अत्यध्वा अतिमार्गगमनम् । वेगनिग्रहः मूत्रपुरीषादीनाम् । कण्ठास्ययोः शोषः । अक्षुत् क्षुधाया अभावः । वंक्षणः सक्थ्यूर्वोः संधिः । वैरस्यं विरसास्यता । मनसः सदनं मनोग्लानिः । आहारे भुक्ते भोजने कृते सति क्षणं स्वास्थ्यं सुखं समश्नुते स्वस्थतां प्राप्नोति । चिरात् कदाचिद् द्रवं, कदाचिच्छुष्कं, शब्दफेनसहितं, वातादीदृशं वर्चः पुरीषं पुनः पुनः वारंवारं श्वासकासोपद्रवपीडितः सृजेत् मुञ्चेत् पुरुषः इति शेषः' (आ० द०) ॥ ५–१० ॥

१ 'संवाह्य' इति ग. ।

श्वामान्नप्रवृत्तिः । वैरस्यं विरुद्धरसास्यता । परिकर्तिका गुदे कर्तनवत्पीडा । गृद्धिः काङ्क्षा, सर्वरसानां मधुरादीनां, कर्मणि षष्ठी; एतच्च वातदूषितान्तःकरणत्वेन, व्याधिमहिम्ना वा । मनसः सदनमवसादः । आध्मानं जीर्णे जीर्यति च 'अन्ने' इति शेषः । स वातगुल्महृद्रोगप्लीहाशङ्कीति वातगुल्मादिवत्पीडायुक्तत्वात्तच्छङ्की । द्रवं शुष्कं कदाचिद्द्रवं, कदाचिच्छुष्कम् । तनु अल्पमिति ॥ ५-१० ॥

*कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम् ।
आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ॥ ११ ॥
सोऽजीर्णं नीलपीताभं पीताभः सार्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दितः ॥ १२ ॥
(च. चि. अ. १५)

पैत्तिकग्रहण्या निदानसंप्राप्तिपूर्वकं रूपमाह—कट्वित्यादि । विदाहि विदाहजनकं वंशकरीरादि । क्षारोऽपामार्गादिकृतः, तथा क्षारो यवक्षारादि, तथा सक्षारं च द्रव्यं; क्षारोदकसाधितं हि व्यञ्जनमश्नन्ति कामरूपादौ । आद्यग्रहणाल्लवणतीक्ष्णोष्णानां ग्रहणं, तैर्वृद्धं पित्तमनलमाप्लावयदभिभवत्तं हन्ति । ननु, पित्तमाग्नेयमग्निरेव वा, ततश्च वृद्धिमेवाप्नोति, कथं हन्त्यत आह—जलं तप्तमिवानलमिति । यथोष्णगुणयुक्तमपि जलमनलं हन्ति, तथा द्रवांशेन परिवृद्धं पित्तमूष्मरूपमग्निं हन्त्येवेति । स पीताभः पुरुषः सार्यते, 'वर्चः' इत्यनुवर्तते ॥ ११ ॥ १२ ॥

†गुर्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥ १३ ॥
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।
आस्योपदेहमाधुर्यं कासष्ठीवनपीनसाः ॥ १४ ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥ १५ ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्चःप्रवर्तनम् ।
अकृशस्यापि दौर्बल्यमालस्यं च कफात्मके ॥ १६ ॥
(च. चि. अ. १५)

श्लैष्मिकग्रहण्या निदानादिपूर्वकं रूपमाह—गुर्वित्यादि ।—आदिशब्दात् पिच्छिलमधुरादीनां ग्रहणम् । अतिभोजनात् अतिमात्रभोजनात् । ननु, भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निमिति विरुद्धं ? स्वप्नोऽत्र दिवास्वप्नो ग्राह्यः, रात्रिस्वापस्य स्वास्थ्यहेतुत्वात्; दिवास्वापश्च स्रोतःसंमीलनेन जठरानलं सन्धुक्षयति, अत एवाह—"अतीसारिणामजीर्णिनां च दिवास्वापो विहितः"—इति । उच्यते—भुक्तवतां दिवास्वापोऽ-

* 'स पीताभः पीतवर्णः पुरुषोऽजीर्णमपक्वं नीलपीताभं सार्यते 'वर्चः' इत्यनुवर्तनीयम् । पूत्यम्लोद्गारः सधूमोद्गारः । हृत्कण्ठदाह इति हृद्दाहः कण्ठदाहश्च' (आ० द०) ॥ ११ ॥ १२ ॥

† 'इदानीं सनिदानं श्लेष्मग्रहणीलक्षणमाह—गुर्वित्यादि । तस्य पुरुषस्यान्नं कष्टेन पाकं गच्छति । तस्य हृल्लासादीनि लिङ्गानि स्युः । उदरं जठरं, गुरु गौरवयुक्तं मन्यते । सदनमङ्गग्लानिः । भिन्नं विदीर्णं, गुरु ईषद्बद्धं वर्चः, तस्य प्रवर्तनम् । अकृशस्यापि दौर्बल्यमसामर्थ्यमित्यर्थः । कफात्मके कफग्रहणीगदे' (आ० द०) ॥ १३-१६ ॥

१ 'ऊर्ध्वमधश्चाममलप्रवृत्तिः' इति पा० । २ 'धूम्राम्लो' इति. ख. । ३ 'हृल्लासच्छर्द्यरोचकाद्युपद्रवैरुपद्रुतम्' इति ग.

त्यन्तकफवृद्ध्याऽग्निं हन्ति, अभुक्तवतां तु संधुक्षयति । यदुक्तं—"नराञ्चिरशनान् कामं दिवा स्वापयेत्—"इति । आस्योपदेहमाधुर्यमिति मुखस्य लिप्तत्वं मधुरत्वं च श्लेष्मणैव । स्त्यानं घनद्रवापूरितमिव । स्तिमितं विबद्धमुदरमिति, निश्चलमित्यर्थः; स्तिमितं स्तब्धं वा । गुरु जडम् । दुष्टो विकृतः । मधुरः मधुरत्वेनोपलक्षित उद्गारः । सदनम् अग्निसादः । स्त्रीष्वहर्षणं स्त्रीरिरंसाया अभावः । भिन्नं च तदामश्लेष्मभ्यां संसृष्टं चेति समासार्थः । दौर्बल्यम् असामर्थ्यमिति ॥ १३–१६ ॥

*पृथग्वातादिनिर्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोषं [1]निर्दिशेदेवं, तेषां वक्ष्यामि भेषजम् ॥ १७ ॥
(च. चि अ. १५)

(अन्त्रकूजनमालस्यं दौर्बल्यं सदनं तथा ।
द्रवं शीतं घनं स्निग्धं सकटीवेदनं शकृत् ॥ १ ॥
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ।
पक्षान्मासाद्दशाहाद्वा नित्यं वाऽप्यथ मुञ्चति ॥ २ ॥
दिवा प्रकोपो भवति रात्रौ शान्ति व्रजेच्च सा ।
दुर्विज्ञेया दुश्चिकित्स्या चिरकालानुबन्धिनी ॥ ३ ॥
सा भवेदामवातेन संग्रहग्रहणी मता ।
स्वपतः पार्श्वयोः शूलं गलज्जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥ ४ ॥)

शिष्यहितैषितया प्रकृतिसमसमवेतत्वेन सुगमाया अपि त्रिदोषजग्रहण्या अतिदेशेन लक्षणमाह—पृथगित्यादि । संपूर्णश्लोकानुरोधात् 'तेषां वक्ष्यामि भेषजम्—' इति लिखितम् । ग्रहणीदुष्ट्या ग्रहण्याश्रितवह्नेरपि दुष्टेरग्निमान्द्यादयोऽपि ग्रहणीविकारा उच्यन्ते । यदुक्तं चरके—"यश्चाग्निः पूर्वमुद्दिष्टो रोगानीके चतुर्विधः । तं चापि ग्रहणीदोषं समवर्जं प्रचक्ष्महे ॥" (च. चि. स्था. अ. १५)—इति । अन्यत्रापि "विभागेऽङ्गस्य चोक्ता ये विषमाद्यास्त्रयोऽग्नयः ॥ तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम् ।" इति ॥ १७॥

†दोषं सामं निरामं च विद्यादत्रातिसारवत् ॥ १८ ॥
लिङ्गैरसाध्यो ग्रहणीविकारो यैस्तैरतीसारगदो न सिध्येत् ।
वृद्धस्य नूनं ग्रहणीविकारो हत्वा तनुं नैव निवर्तते च ॥ १९ ॥

[2](बालके ग्रहणी साध्या यूनि कृच्छ्रा समीरिता ।
वृद्धे त्वसाध्या विज्ञेया मतं धन्वन्तरेरिदम् ॥ १ ॥)

इति श्रीमाधवकरविरचिते माधवनिदाने ग्रहणीनिदानं समाप्तम् ॥ ४ ॥

यथाऽतीसारे जलनिमज्जनादिना आमं, तद्विपरीतेन निरामं ज्ञायते, तथाऽत्रापि ज्ञेयम् ॥ १८ ॥

यैर्लिङ्गैरतीसारगदो न सिध्येत्तैर्लिङ्गैर्ग्रहणीविकारोऽसाध्यः, अतीसारस्य यान्यसाध्यलिङ्गानि ग्रहण्या अपि तानि ॥ १९ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां ग्रहणीनिदानं समाप्तम् ॥ ४ ॥

---

* 'सन्निपातग्रहणीलक्षणमाह–पृथगित्यादि । पृथग्वातादिनिर्दिष्टहेतुलिङ्गानां समागमे संयोगे सति त्रिदोषग्रहणीगदं लक्षयेत्; 'भिषक्' इति शेषः' (आ० द०) ॥ १७ ॥

† 'ग्रहण्यामामपक्वलक्षणमाह–दोषमित्यादि' । (आ० द०) ॥ १८ ॥ १९ ॥

---

१ 'लक्षये०' इति ग. । २ 'युक्ते निदानलक्षणमेलके' इति ग. ।

अथार्शोनिदानम्।

*पृथग्दोषैः समस्तैश्च शोणितात् सहजानि च।
अर्शांसि षट्प्रकाराणि विद्याद्गुदवलित्रये॥ १॥

अतीसारग्रहण्यर्शसां परस्परानुबन्धित्वादतीसारग्रहण्यनन्तरमर्श उच्यते—पृथगित्यादि। अरिवत् प्राणान् शृणाति हिनस्तीत्यर्श इति पृषोदरादिपाठान्निरुक्तिमाहुः। सहजानीति सह शरीरेण जातानि, गुदवल्यारम्भकबीजभागस्य दूषितत्वात्। अत्र द्वन्द्वजानि प्रकृतिसमसमवायारब्धत्वान्न पृथग्गणितानि। उक्तं हि सुश्रुते—"अर्शःसु दृश्यते रूपं यदा वै दोषयोर्द्वयोः। संसर्गं तं विजानीयात् संसर्गः षड्विधश्च सः" (सु. नि. स्था. अ. २)—इति। षड्विधत्वं चात्र संसर्गस्य वातादिभिर्युग्मैस्त्रयः संसर्गाः, तैरेव रक्तयोगादपरे त्रय इति। सन्निपातजं त्वेकैकदोषजेष्वदृष्टस्यासाध्यत्वस्य योगाद्विकृतिविषमसमवायारब्धमिति संख्यया पृथग्गणितम्। गुदवलित्रय इति अर्धपञ्चाङ्गुलमानं गुदं, तस्यावयवभूतास्तिस्रो वलय उपर्युपरि व्यवस्थिताः शङ्खावर्तनिभाः प्रवाहणीविसर्जनीसंवरणीनामिकाः; तत्र गुदौष्ठमर्धाङ्गुलं, तदूर्ध्वमङ्गुलमाना प्रथमा वलिः सुश्रुतेन (सु. नि. स्था. अ. २) निर्दिष्टा, भोजेऽप्युक्तं—"रोमान्तेभ्यो यवाध्यर्धं गुदौष्ठं परिचक्षते। गुदौष्ठादङ्गुलं चैकं प्रथमां तां वलीं विदुः॥ सार्धैकाङ्गुलमानेन तदन्येऽपि प्रकीर्त्यते—" इति। सार्धाङ्गुलमाना द्वितीया तृतीया चेति॥ १॥

†दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन्।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः॥ २॥
(वा. नि. अ. ७)

संप्राप्तिपूर्वकमर्शःस्वरूपमाह—दोषा इत्यादि। त्वङ्मांसग्रहणेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते, चिकित्सायां रक्तस्रावणोपदेशात्। अपानं गुदम्, आदिशब्देन नासिकादीनां ग्रहणम्। कायचिकित्सकास्तु गुदजस्यैवार्शस्त्वमिच्छन्ति नासादिजानां त्वधिमांसत्वं, 'तेषु 'पञ्चात्मा मारुतः' इत्यादिसंप्राप्तेरभावात्, विष्टम्भ इत्यादिपूर्वरूपस्य चासंभवात्। यदाह चरकः—"शिश्न"—इत्यारभ्य यावत् "अधिमांसे व्यपदेश एव" (च. चि. स्था. अ. १४)—इति। सुश्रुतेन तु मांसाङ्कुरत्वसाधर्म्यात्

* 'अर्शांसि षट्प्रकाराणि भवन्ति—पृथग्दोषैर्वातादिभिस्त्रीणि, समस्तैर्दोषैरेकं, शोणितेन चैकम्, एकं सहजमित्येवं षडर्शांसि। तत्र सहजानि कुलजानीत्यर्थः। त्रिदोषजं तु विकृतिविषमसमवायारब्धत्वेनासाध्यत्वात्संख्यया पृथग्गणितम्। तत्र गुदौष्ठमर्धाङ्गुलं, तदूर्ध्वमङ्गुलद्वयप्रमाणा प्रथमा वलिः, द्वितीया सार्धैकाङ्गुला, तृतीयाऽपि सार्धैकाङ्गुला, एवं सार्धपञ्चाङ्गुलं गुदं सुश्रुतेन निर्दिष्टम्।' (आ० द०)॥ १॥

† 'दोषा वातादयस्त्वङ्मांसमेदांसि संदूष्य अपानादौ यान् मांसाङ्कुरान् कुर्वन्ति भिषजस्तान्मांसाङ्कुरानर्शांसि जगुः कथयन्ति। आदिशब्देन नासिकाश्रवणचक्षुर्मेढ्रनाभिप्रभृतयो गृह्यन्ते। एषां लक्षणानि सुश्रुते पठितानि।' (आ० द०)॥ २॥

१ 'एकदोषजनितनिर्दिष्टस्य साध्यत्वस्यायोगात्' इति ख.। २ अर्धपञ्चममङ्गुलं यस्मिन् तत्तथा; एतेन सार्धचतुरङ्गुलप्रमाणं गुदमित्यर्थः॥ ३ यवाध्यर्धं सार्धयवं, अर्धाङ्गुलप्रमाणमित्यर्थः; अङ्गुलस्य त्रियवप्रमाणत्वात्॥

शस्त्रक्षाराग्निसाध्यत्वाच्च तेष्वर्शःशब्दप्रयोगः कृतः, सर्षपादिस्नेहे तैलव्यपदेशवत्; सुश्रुतानुवादिनो वाग्भटस्याप्ययमेवाभिप्राय इति ॥ २ ॥

*कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥ ३ ॥
लङ्घनं देशकालौ च शीतौ व्यायामकर्म च ।
शोको वातातपस्पर्शो हेतुर्वातार्शसां मतः ॥ ४ ॥
(च. चि. अ. १४)

वातार्शसो निदानमाह—कषायेत्यादि। प्रमितम् अल्पतमम्, अल्पं मात्राहीनमशनं, जेज्जटस्त्वाह—"प्रमितमतीतकालभोजनम्"। 'प्रमृत' इति पाठे तु नष्टशक्तिकं धान्यादिकमाहुः। "प्रमिताशनमेकरसाभ्यासः" इत्यन्ये। तन्नातियुक्तम्; एकरसाभ्यासः किं वातप्रकोपकस्य कट्वादेः, कफप्रकोपकस्य मधुरादेर्वा ? नाद्यः, कट्वादेरत्रैवोपात्तत्वात्; द्वितीये मधुरादीनां त्वभ्यासो वातशामक एव, एकरसाभ्यासाच्च दौर्बल्यमुक्तं न तु वातवृद्धिरिति चिन्त्यमेतत्। तीक्ष्णमिति मद्यविशेषणं, पैष्टिकादिमृदुमद्यस्य वातप्रशमकत्वात्। शीतो देश आनूपः, कालो हेमन्तादिः। आतप उष्णम्, आतपस्योष्णगुणस्याप्युद्भूतरौक्ष्याद्वातप्रकोपकत्वमिति ॥ ३ ॥ ४ ॥

†कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः ।
देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ॥ ५ ॥
विदाहि तीक्ष्णमुष्णं च सर्वं पानान्नभेषजम् ।
पित्तोल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसाम् ॥ ६ ॥
(च. चि. अ. १४)

पित्तार्शोनिदानमाह—कट्वम्लेत्यादि। देशकालावशिशिराविति उष्णो देशो मरुः, उष्णः कालः शरद् ग्रीष्मश्च। असूयनं परसंपत्तौ द्वेषः, स क्रोधविशेष एव। पित्तोल्वणानामित्यनेन सर्वेषामर्शसां त्रिदोषजत्वम्, अधिकेन तु व्यपदेश इति दर्शितं चरकेण। यदाह स एव—"अर्शांसि नाम जायन्ते नासन्निपतितैस्त्रिभिः। दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसाम्" (च. चि. स्था. अ. १४)-इति ॥ ५ ॥ ६ ॥

‡मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।
अव्यायामो दिवास्वप्नः शय्यासनसुखे रतिः ॥ ७ ॥

---

* "कषायेत्यादि। एतत्सर्वं वातार्शसां हेतुः कारणम्। प्रमितम् अल्पतमम्, अन्ये प्रमितस्थाने 'अतीतम्' इति पठन्ति, तत्रातीतकालभोजनम्।" (आ० द०) ॥ ३ ॥ ४ ॥

† 'कट्विलादि। कट्वम्लेत्यादिको हेतुर्ज्ञेयः। अग्नेरातपस्य च सेवनम्। विदाहि वंशकरीरादि।' (आ० द०) ॥ ५ ॥ ६ ॥

‡ 'मधुरेत्यादि। श्लेष्मोत्कटानामर्शसां समुत्पत्तावेतन्मधुरस्निग्धेत्यादि कारणमुक्तम्।' (आ० द०) ॥ ७ ॥ ८ ॥

---

१ "तिक्तानि' इति क.। २ "श्रमाः' इति क. ख.।

प्राग्वातसेवा शीतौ च देशकालावचिन्तनम् ।
श्लैष्मिकाणां समुद्दिष्टमेतत् कारणमर्शसाम् ॥ ८ ॥
(च. चि. अ. १४)

श्लेष्मार्शोनिदानमाह—मधुरेत्यादि। शय्यासनसुखे रतिरिति सुखशय्यासने रतिरासक्तिः । प्राग्वातसेवा पुरोवातसेवनम् । अचिन्तनं निश्चिन्तता ॥ ७ ॥ ८ ॥

"*हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्बणानि च ।

द्वन्द्वजार्शोनिदानादिकमाह—हेत्वित्यादि ।–हेतुलक्षणसंसर्गादिति दोषद्वयस्य निदानमेलकेन लक्षणमेलकेन च द्वन्द्वोल्बणानि द्वन्द्वजानि विद्यात् ॥–

सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणं समम् ॥ ९ ॥"
(च. चि. अ. १४)

त्रिदोषजार्शोनिदानमाह—सर्व इत्यादि । सर्वो हेतुरिति एकैकशो वाताद्यर्शसां यो हेतुरुक्तः स त्रिदोषजानां भवति, त्रयो दोषा जनकत्वेनैषां सन्तीति त्रिदोषजानि । सहजैर्लक्षणं सममिति तेषां लक्षणं सहजैरर्शोभिः सह समं सदृशं, सहजानां यल्लक्षणं तत्त्रिदोषजानामित्यर्थः । 'सहजैर्लक्षणैः समम्' इति पाठान्तरे तु सहजैः सहजार्शोभवैर्लक्षणैः समं सह सर्वो हेतुस्त्रिदोषाणामिति योज्यम् । सहजार्शोलक्षणं चात्र संग्रहे नोक्तं तन्त्रान्तरादनुसर्तव्यं; यदाह सुश्रुतः—"दुर्दर्शनानि परुषारुणपाण्डूनि दारुणान्तर्मुखानि, तैरुपद्रुतः कृशोऽल्पभुक् सिरासन्ततगात्रोऽल्पप्रजः क्षीणरेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्घ्राणशिरोऽक्षिश्रवणरोगवान्, सततमन्त्रकूजनाटोपहृदयोपलेपारोचकप्रभृतिभिः पीड्यते–(सु. नि. स्था. अ. २)" इति; चरके च–"कानिचिदणूनि–"(च. चि. स्था. अ. १४) इत्यादिना प्रभूततरं लक्षणमुक्तम् । ननु, त्रिदोषजानीति विशेषाभिधानमनुपपन्नं, सर्वेषामेव रोगाणां त्रिदोषजत्वात् । यदुक्तं—"द्रव्यमेकरसं नास्ति न रोगोऽप्येकदोषजः । योऽधिकस्तेन निर्देशः क्रियते रसदोषयोः"–इति । नैवं; "सर्वदेहचरास्तु वातपित्तश्लेष्माणः" (च. सू. स्था. अ. २०) इति वचनादेकस्मिन् धात्वादौ दोषेण दूषिते सति तद्गतेतरदोषेऽप्यवश्यंभाविनी काचिद्दुष्टिः, दुष्टदोषसंबन्धात् । किंच स्वकारणाद्वृद्धो वायुः शैत्याच्छीतस्य श्लेष्मणो बलमादधाति, लाघवात्तेजोरूपस्य पित्तस्य; पित्तं च कटुत्वाद्वातस्य, द्रवत्वाच्छ्लेष्मणः; कफश्च शैत्याद्वायोः, द्रवत्वात् पित्तस्येति । अत एवोक्तं–"न रोगोऽप्येकदोषजः"–इति । अनेनैवाभिप्रायेणोक्तं–"एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्"–इति । यत्र तु स्वकारणात्त्रयोऽपि कुपितास्तत्र त्रिदोषव्यपदेश इति सिद्धान्तः; एवं सर्वत्र ॥ ९ ॥

* 'दोषाणां हेतुलक्षणैरेव द्वन्द्वोल्बणमाह–हेत्वित्यादि । दोषद्वयस्य निदानमेलके लक्षणमेलके च द्वन्द्वोल्बणानि द्वन्द्वजानि विद्याद् जानीयात्' (आ० द०)–

१ 'श्लेष्मोल्बणाना" इति क. ख. ।

*गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमचिमान्विताः ।
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥ १० ॥
मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः ।
बिम्बीखर्जूरकर्कन्धूकार्पासीफलसन्निभाः ॥ ११ ॥
केचित् कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः ।
शिरःपार्श्वांसकट्यूरुवङ्क्षणाद्यधिकव्यथाः ॥ १२ ॥
क्षवथूद्गारविष्टम्भहृद्ग्रहा[१]रोचकप्रदाः ।
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥ १३ ॥
तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ।
रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ॥ १४ ॥
कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ।
गुल्मप्लीहोदराष्ठीलासंभवस्तत एव च ॥ १५ ॥

(वा. नि. स्था. अ. ७)

पूर्वं निदानमुक्तं, संप्रति वातादिभेदेनार्शसां लक्षणान्युच्यन्ते, तत्र प्रथमं वातार्शोलक्षणमाह—गुदेत्यादि । गुदाङ्कुरा गुदे अङ्कुराकारा मांसप्ररोहाः, त एव अर्शांसि । बह्वनिला वातोल्बणाः । शुष्काः स्रावरहिताः । चिमचिमा वेदनाविशेषः । म्लाना अनुपचिताः । स्तब्धाः काठिन्यात् । विशदा अपिच्छिलाः, धूलिस्पर्शवत् । परुषाः कर्कशाः, गोजिह्वास्पर्शवत् । खराः कर्कोटफलवत्सूक्ष्मानेककण्टकाचिताः । एषु विकल्पेषु वक्ष्यमाणं केचिदिति पदं संबन्धनीयम् । मिथो विसदृशाः परस्परभिन्नरूपाः । वक्रा धनुःकाष्ठादिवत् । तीक्ष्णाः सूक्ष्माग्राः । फलसन्निभा इति बिम्ब्यादिभिः संबध्यते, बिम्ब्यादिसन्निभत्वं चाकृत्या ज्ञेयम् । बिम्बी ओष्ठोपमफला, 'तेलाकुचा' इति लोके ख्याता, कार्पासी वनकार्पासी, कदम्बपुष्पाभाः स्थूला अनेकसूक्ष्मशिखराः । सिद्धार्थकोपमाः सूक्ष्मपिडकारूपाः । हृदयं गृहीतमिवेति वेदना हृद्ग्रहः । ग्रथितं ग्रन्थिलं पाषाणवत् । रुक् शूलम् । पिच्छा पिच्छिलो द्रवभागः । उपवेश्यते वर्चस्त्याज्यते । कृष्णशब्दस्त्वगादिभिर्वक्रान्तैः प्रत्येकं संबध्यते । अस्योपद्रवमाह—गुल्मेत्यादि । अष्ठीला वातरोगविशेषः ॥ १०–१५ ॥

* 'चिमिचिमा वेदनाविशेषस्तेनान्विताः; सर्षपकल्कलिप्ता इवेति यावत् । श्यावारुणा वर्णतः । स्तब्धाः कठिनाः कीलवत् । विषमा इति पाठे विषमा निम्नोन्नताः । वक्रा धनुर्वत्कुटिलाः । तीक्ष्णा दर्भाङ्कुरवत्सूक्ष्माग्राः । विस्फुटिताननाः केसरादिवदाननं येषां ते विदीर्णमुखा इत्यर्थः । बिम्ब्यादिफलवत्सदृशत्वमाकृत्या, कर्कन्धुः कोलबदरी । केचिदिति केचित्कदम्बपुष्पाभाः स्थूलाः, केचित्सिद्धार्थकोपमाः सर्षपवत्सूक्ष्माः । शिरःप्रभृतीनामभ्यधिकव्यथा अतिवेदना । क्षवथ्विति क्षवथुः छिक्का । विष्टम्भो मलस्य ग्रहः । तैरिति तैर्गुदाङ्कुरैरर्शोभिः पीडितः पुरुषः, स्तोकम् अल्पं, सप्रवाहिकं वातप्रवाहिकालक्षणोपेतं; रुक्

१ "हृद्रोग" इति ग. ।

*पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः।
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः॥ १६॥
शुकजिह्वायकृत्खण्डजलौकोवक्त्रसंनिभाः।
दाहपाकज्वरस्वेदतृण्मूर्च्छा[१]रुचिमोहदाः॥ १७॥
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः।
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः॥ १८॥
(वा. नि. स्था. अ. ७)

पित्तार्शोलक्षणमाह—पित्तोत्तरा इत्यादि। नीलमुखा नीलाग्राः। तनु अघनम्, अस्रं रक्तं स्रवन्तीति तन्वस्रस्राविणः। विस्रा आमगन्धिनः। तनवः स्वल्पाः। मृदवः कोमलाः। श्लथा लम्बनशीलाः। यवमध्याः यववन्मध्ये स्थूलाः। हरित् पत्रवर्णं, पीतं हरितालाभं, हारिद्रं हरिद्रावर्णम्; आदिशब्दाद्विण्मूत्रनेत्रवक्त्राणां ग्रहणम्॥ १६–१८॥

†श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः।
उत्सन्नोपचितस्निग्धस्तब्धवृत्तगुरुस्थिराः॥ १९॥
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः॥ २०॥
वङ्क्षणानाहिनः पायुबस्तिनाभिविकर्षिणः।
सश्वासकासहृल्लासप्रसेकारुचिपीनसाः॥ २१॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः।
क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः॥ २२॥

शूलं, पिच्छा पिच्छिलो द्रवभागस्तेनानुगतम्, ईदृग्वर्चः उपवेश्यते त्याज्यते, गुदेनेति शेषः। ततो वातार्शोभ्य उपद्रवरूपाणामेषां संभव उत्पत्तिः। अष्ठीला नाभेरधोभागे पाषाणपिण्डिकावद्वातरोगविशेषः' (आ० द०)॥ १०–१५॥

*'पैत्तिकान्याह—पित्तोत्तरा इत्यादि। पित्तोत्तराः पित्तोल्बणा गुदाङ्कुरा ईदृशा ज्ञेयाः। विस्रा विस्रगंधिताः, अन्ये 'मृदुलम्बिन' इति पठन्ति तत्र लम्बिनो लम्बनशीलाः। आकृत्या च शुकजिह्वायकृत्खण्डजलौकोमुखसन्निभाः सदृशाः। उपद्रवानाह–दाहेत्यादि। दाहादिमोहान्तोपद्रवदायिनः। सोष्माणः उष्णस्पर्शाः। द्रवं नीलम् उष्णं पीतरक्तम्, आमम् अपक्वं वर्चं उपवेशयन्ति। यवमध्येति यववन्मध्ये स्थूलाः प्रान्ते सूक्ष्माः। हरितादिवत् त्वगादि येषां ते वर्णसदृशत्वङ्नखादयो भवन्ति। आदिशब्दाच्च वक्त्रनेत्रादयो गृह्यन्ते' (आ० द०)॥ १६–१८॥

†'श्लैष्मिकान्याह—श्लेष्मोल्वणा इत्यादि। मन्दरुजः स्वल्पपीडाः। सिताः शुक्लवर्णाः। उत्सन्ना इत्यत्र 'उच्छूना' इति पाठे श्वयथुमन्तः। उपचिताः परिणाहेन वर्तुलाः स्थिरा निश्चलाः। पिच्छिला अविशदाः। स्तिमिता मन्दाः। बस्तिः मूत्रकोशः। उपद्रवानाह–सश्वासेत्यादि। हृल्लासः उपस्थितवमनत्वमिव, सप्रवाहिकाः श्लैष्मिकप्रवाहयुक्ताः। पाण्डुस्निग्धास्त्वगादयः त्वङ्नखनयनवदनानि यत्र पुरुषाणां भवन्ति' (आ० द०)॥ १९–२२॥

---

१ "°रति°" इति ग.। २ "°पार्श्व°" इति ग.।

वसाभसकफप्रायपुरीषाः सप्रवाहिकाः ।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः ॥ २३ ॥
(वा. नि. स्था. अ. ७)

श्लेष्मार्शोलक्षणमाह—श्लेष्मोल्वणा इत्यादि । अत्र गुदाङ्कुरा इत्यनुवर्तते । महामूला दूरवास्त्वगाहिनः । घना निबिडावयवाः । उत्सन्ना दैर्घ्येणोद्गताः, उपचिताः परिणाहेन स्थूलाः, स्तब्धा अनम्राः, वृत्ताः परिणाहेन वर्तुलाः, गुरवो गुरुद्रव्याक्रान्तमिव गुदं कुर्वते, स्थिरा अचञ्चलाः । श्लक्ष्णा मणिवन्मसृणाः । कण्ड्वाढ्याः कण्डूबहुलाः; कण्डूव्यपगमार्थं स्पृश्यमानाः प्रीणयन्त्यर्शसमिति स्पर्शनप्रियाः । करीरो मरुजद्रुमः, पनसः कण्टकीफलं, तयोरस्थ्याभाः; अथवा करीरो वंशाङ्कुरः; तेन करीराभाः, पनसास्थ्याभाश्चेत्यर्थः । तथा गोस्तनसन्निभाः गोस्तनसदृशा इत्यर्थः । वङ्क्षणौ आनाहितुमाबद्धुमिव शीलं येषां ते तथा, गुदप्रत्यासत्त्याः वङ्क्षणयोः प्रेरणाद्यसामर्थ्यकारिण इत्यर्थः । पायुबस्तिनाभिविकर्षिण इति पाय्वादिष्वाकर्षवत्पीडाकारिणः । प्रसेको मुखस्य गुदस्य वा; कृच्छ्रं मूत्रकृच्छ्रं, शिरोजाड्यं शिरःस्तिमितता, शिशिरज्वरकारिणः शीतज्वरकारिणः । क्लैब्यं स्त्रीष्वनुत्साहः, अग्निमार्दवं वह्निमान्द्यं, छर्दिर्वमिः । आमप्रायविकारदाः आमबहुला ये रोगा अतीसारग्रहण्यादयस्तत्प्रदाः । प्रायःस्थाने 'प्राज्य' इति पाठान्तरे स एवार्थः प्रायःप्राज्यशब्दयोः प्रचुरार्थत्वात् । वसाभं च सकफं च प्राज्यं च पुरीषं येषां ते तथा । न स्रवन्ति 'क्लेदरक्तादिकम्' इति शेषः । न भिद्यन्ते गाढविट्प्रपीडिता अपि न विदीर्यन्त इति ॥ १९–२३ ॥

सर्वैः सर्वात्मकान्याहुर्लक्षणैः सहजानि च ।

सन्निपातार्शसः सहजार्शसश्च लक्षणमाह—सर्वैरित्यादि ।—सर्वैर्वातजाद्यर्शोभवैर्लक्षणैः, सर्वात्मकानि त्रिदोषजानि; तथा तैरेव लक्षणैः सहजान्यप्याहुः, तेषामपि त्रिदोषजत्वात् ॥—

*रक्तोल्वणा गुदेकीलाः पित्ताकृतिसमन्विताः ॥ २४ ॥
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ।
तेऽत्यर्थं दुष्टमुष्णं च गाढविट्कप्रपीडिताः ॥ २५ ॥
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ।
भेकाभः पीड्यते दुःखैः शोणितक्षयसंभवैः ॥ २६ ॥
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ।
(वा. नि. स्था. अ. ७)

* 'रक्तजान्याह–रक्तोल्वणा इत्यादि । आकृत्या च गुञ्जा रक्तगुञ्जा, विद्रुमः प्रवालमणिस्तत्सदृशलोहिता इत्यर्थः । अत्यर्थम् अतिशयेन दुष्टम् । सहसा अकस्मात् ।' (आ० द०) ॥ २४–२६ ॥–

१ 'दूरभात्ववगाहिनः' इति क. ।

रक्तार्शोलक्षणमाह—रक्तोल्बणा इत्यादि। गुदेकीलाः कीलवत् कीलाः अर्शांसि, "हलदन्तात् सप्तम्याः संज्ञायाम्"—(पा. अ. ६. पा. ३ सू. ९) इत्यलुक्समासः। पित्ताकृतिसमन्विताः पैत्तिकार्शोलक्षणयुक्ताः। विद्रुमसन्निभाः प्रवालमणिवल्लोहिता इत्यर्थः। ते गाढविट्प्रपीडिताः कठिनपुरीषयन्त्रिताः, दुष्टम् आविलम्, उष्णं च रक्तं स्रवन्ति। तस्येति रक्तस्य, अतिप्रवृत्तितः अतिक्षयात्, भेकाभः प्रावृषेण्यवर्षाभ्वाभः पीतच्छविः, 'पुरुषः' इति शेषः। दुःखैः रोगैः। शोणितक्षयसंभवैरिति "त्वक्पारुष्याम्लशीतप्रार्थनासिराशैथिल्यैः" (सु. सू. स्था. अ. १५) सुश्रुतोक्तैः। बलं स्थौल्यम्, उत्साहो हर्षः। हतौजाः हतशक्तिः। कलुषेन्द्रिय आविलचक्षुः, व्याकुलसर्वेन्द्रियो वा॥ २४–२६॥—

(तत्रानुबन्धो द्विविधः श्लेष्मणो मारुतस्य च।)
विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्तते॥ २७॥
*तनु चारुणवर्णं च फेनिलं चासृगर्शसाम्।
कट्यूरुगुदशूलं च दौर्बल्यं यदि चाधिकम्॥ २८॥
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम्।
शिथिलं श्वेतपीतं च विट् स्निग्धं गुरु शीतलम्॥ २९॥
यद्यर्शसां घनं चासृक् तन्तुमत् पाण्डु पिच्छिलम्।
गुदं सपिच्छं स्तिमितं गुरु स्निग्धं च कारणम्।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः॥ ३०॥
(च. चि. स्था. अ. १४)

इदानीं तस्यैव रक्तार्शसो निदानस्य रक्तस्य वातादिभेदेन लक्षणमाह—विडित्यादि। विट् श्यावमिति विट्शब्दो नपुंसकोऽप्यस्ति, एतन्निर्देशादेव। काश्मीरास्तु चरके, —"विट् श्यावा कठिना रूक्षा" (च. चि. अ. १४)—इत्येव पठन्ति। अधोवायुर्न वर्तते गुदेन प्रतिलोमगत्वात्। तन्वित्यादि। तत्रानुबन्धो वातस्येति वातादिदुष्टस्यैव रक्तस्यारम्भकत्वान्नतु केवलस्य, दोषत्वाभावात्। शिथिलमित्यादिना कफानुबन्धस्य। ननु, पित्तानुबन्धः कुतो नोक्त? इति, उच्यते—रक्तपित्तयोः प्रायः समानलिङ्गत्वात्। उक्तं च पूर्वं 'रक्तोल्बणा गुदेकीलाः पित्ताकृतिसमन्विताः' इति॥ २७–३०॥

* 'रक्तोल्बणानामर्शसामसृग्यदीदृशं भवति—तनु अल्पं, कट्यादिषु शूलम्, अधिकं च दौर्बल्यं, तत्र रक्तार्शसि वातस्यानुबन्धो ज्ञेयः। यदि च रूक्षणं रूक्षद्रव्यादि हेतुः कारणम्। श्लेष्मानुबन्धलक्षणमाह—रक्तोल्बणानामर्शसां यदि शिथिलं श्वेतपीतं च विट् प्रवर्तते, यदि च स्निग्धं गुरु शीतलं तन्तुमत् पाण्डु पिच्छिलं चासृक्प्रवर्तते, तन्तुमत् सूत्राकारं, गुदमपि पिच्छिलम् आर्द्रं, स्तिमितं निश्चलं च भवति, तस्मिन् रक्तार्शसि श्लेष्मानुबन्धो विज्ञेयः। गुरु स्निग्धं च तत्र कारणं हेतुः। इति' (आ० द०)॥ २७–३०॥

१ 'अल्पमल्पं मुहुर्मुहुः' इति, ख.।

*विष्टम्भोऽन्नस्य दौर्बल्यं कुक्षेराटोप एव च ।
कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ॥ ३१ ॥
ग्रहणीदोषपाण्ड्वर्तेराशङ्का चोदरस्य च ।
पूर्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये ॥ ३२ ॥
(च. चि. स्था. अ. १४)

पूर्वरूपमाह—विष्टम्भ इत्यादि । विष्टम्भोऽन्नस्येति विष्टम्भोऽन्नस्य जीर्णतागमनम्; आहारो विष्टब्ध आमाशय एवावतिष्ठते, वातवैगुण्यात् । दौर्बल्यं हीनशक्तिता । 'विष्टम्भोऽङ्गस्य' इति पाठान्तरे विष्टम्भो मलस्य, अङ्गस्य दौर्बल्यम् । यद्यपि निदानानन्तरं पूर्वरूपं वक्तव्यं भवति, तथाऽपि निदानलक्षणानन्तरमत्र पूर्वरूपं; निदानलिङ्गयोश्चिकित्साङ्गतमत्वप्रतिपादनार्थं तयोः पूर्वमभिधानम्; अथवाऽवश्यवक्तव्यानां कामचारादभिधानमिति । एवमन्यत्रापि व्यतिक्रमे द्रष्टव्यम् । कुक्षेराटोपो 'गुडगुडाशब्दः' इति चक्रः, 'तनतनी' इति गुणाकरः; 'रुजापूर्वकः क्षोभः' इति गदाधरः, पुरीषवृद्धिलक्षणे च "आटोपम् आध्मानम्" इति विवृतवान्; एतच्च न, सर्वत्र गुल्मपूर्वरूपे आटोपाध्मानयोरुभयोरपि पाठात् । उद्गारबाहुल्यमधोनिरुद्धस्य वायोरूर्ध्वगमनात् । सक्थिसादो जङ्घावसादः । ग्रहणीदोषपाण्ड्वर्तेः ग्रहणीदोषयुक्तपाण्डुरोगस्य उदरस्य चाशङ्का, तेषां लक्षणदर्शनात् । 'ग्रहणीदोषपाण्ड्वर्तिः' इति पाठान्तरे ग्रहणीदोषस्य पाण्डोः पाण्डुरोगस्य चार्तिः पीडा स्यात् । अभिवृद्धये उत्पत्त्यर्थमिति ॥ ३१ ॥ ३२ ॥

†पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रयम् ।
सर्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥ ३३ ॥
तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ।
सर्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥ ३४ ॥
(च. चि. अ. १४)

* 'विष्टम्भोऽन्नस्येत्यादि । पुरीषवृद्धिलक्षणे आटोपः आध्मानमिति माधवः । अल्पविट्कता अल्पपुरीषत्वम् (आ० द०) ॥ ३१ ॥ ३२ ॥

† 'पञ्चात्मेत्यादि । गुदजानां समुद्भवे संभवे एते सर्वे एवोक्तस्वरूपा वातादयः प्रकुप्यन्ति । एवं पञ्चात्मा वायुः कथ्यते । "योऽनिलो वक्त्रसंचारी स प्राणो नाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । कुपितः कुरुते चापि हिक्काश्वासादिकान् गदान् ॥ उदानो नाम यस्तूर्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिविशेषश्चाभिवर्तते । ऊर्ध्वजत्रुगतान् रोगान् करोति कुपितश्च सः ॥ आमपक्वाशयचरः समानोऽग्निसहायवान् । अन्नं पचति तज्जांश्च विकारान् प्रव्यनक्ति सः । गुल्माग्निसादातीसारान्प्रदुष्टश्च करोति सः ॥ पक्वाशयाश्रयोऽपानः काले कर्षति चाप्यधः । वातमूत्रपुरीषाणि शुक्रगर्भार्तवानि च । क्रुद्धश्च कुरुते रोगान् घोरान्वस्तिगुदाश्रयान् ॥ सर्वदेहसरो व्यानो रससंवहनोद्यतः ।

१ 'अङ्गस्य' इति. ग. २ 'रोग°' इति. ख. ।

ननु, गुददेशदुष्ट्या गुदजस्योत्पादात् कथं सर्वदेहे कृशत्वकृष्णत्वादिरूपा दुष्टिरित्यत आह—पञ्चात्मेत्यादि। पञ्चात्मा पञ्चस्वरूपः, प्राणापानसमानोदानव्यानभेदात्; "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ॥ उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥" इति तेषां स्थानानि। एवं लिङ्गविपरिणामात् पञ्चात्मकत्वं पित्तेऽपि योज्यं, पित्तं ह्यालोचकरञ्जकसाधकपाचकभ्राजकभेदाद्विधम्। आलोचकं नेत्रयोः, रञ्जकं यकृत्प्लीह्नोः, साधकं हृदि, पाचकं पक्वामाशययोर्मध्ये, भ्राजकं त्वचीति। एवं कफोऽपि पञ्चात्मा हृदयामाशयजिह्वाशिरःसन्धिषु क्रमेणावलम्बकक्लेदकबोधकतर्पकश्लेष्मकभेदात्। यदाह गौतमः—"श्लेष्मा पञ्चविधोरःस्थः श्लेष्मकादिस्वकर्मणा। कफधाम्नां च सर्वेषां यत् करोत्यवलम्बनम् ॥ अतोऽवलम्बकः, श्लेष्मा यस्त्वामाशयसंश्रितः। क्लेदकः सोऽन्नसंघातक्लेदनाद्, रसबोधनात् ॥ बोधको रसनास्थस्तु, शिरःसंस्थोऽक्षतर्पणात्। तर्पकः, श्लेष्मकः सम्यक् श्लेषणात् सन्धिषु स्थितः"—इति। गुदवलित्रयस्य च प्रकोपो विकृतत्वं, प्रवाहणादिस्वकार्याकर्तृत्वं च। 'गुदवलित्रये' इति पाठान्तरं न युक्तं, तत्र प्राणोदानयोः सन्निधानस्याप्यभावात्, तद्दुष्टेरप्राप्तेश्च। सर्वे एवेति उक्तनाद्यतादय एवेति। तस्मादित्यादि, बहुव्याधिकराणीति जठराग्निमान्द्याद्युपद्रवकराणि। प्रायः कृच्छ्रतमानीति प्रायोग्रहणादसाध्यानि सुखसाध्यान्यपि ॥ ३३ ॥ ३४ ॥

स्वेदास्रक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ॥ क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान् ॥ शुक्रदोषाः प्रमेहाश्च व्यानापानप्रकोपजाः। युगपत् कुपिताश्चामी देहं भिन्द्युरसंशयम्" (सु. नि. स्था. अ. १)—इति पञ्चात्मा वायुः। 'रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः' इति। एवं पञ्चात्मकत्वं पित्ते योज्यं, आलोचकरञ्जकसाधकपाचकभ्राजकभेदात्; "पाचकं भ्राजकं चैव रञ्जकालोचके तथा। साधकं चेति पञ्चैव पित्तनामान्यनुक्रमात् ॥" "स्वाशये पाचकं पित्तमग्निरूपं तिलोन्मितम्। भ्राजकं कान्तिदं यत्तु लेपाभ्यङ्गादि पाचकम् ॥ रञ्जकं तु यकृत्प्लीह्नोस्तद्रसं शोणितं नयेत्। आलोचकं स्थितं नेत्रे रूपदर्शनकारि तत् ॥ साधकं हृदये तिष्ठन्मेधाप्रज्ञाकरं च तत्। पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम् ॥ कटु तिक्तरसं चैवं विदग्धं चाम्लतां व्रजेत्" (सु. सूत्र. स्था. अ. २१)—इति। इति एवं कफोऽपि पञ्चात्मा, "उरःकण्ठशिरःसंधिपर्वाण्यामाशयो रसः। मेदो घ्राणं च जिह्वा च कफस्थानमुरो भृशम्"—इति। एवं दोषत्रयाणां पञ्चात्मकत्वं सिद्धम्। पञ्चात्मानो दोषास्त्रयः गुदवलित्रयं च गुदजानां समुद्भवे सर्वे एव प्रकुप्यन्ति। अन्ये तु 'गुदवलित्रये' इति पठन्ति व्याख्यानयन्ति—गुदवलित्रये गुदजानां समुद्भवे उत्पत्तौ सति सर्वे एव दोषाः प्रकुप्यन्तीति। तस्मादर्शांसि दुःखप्रदानि बहुव्याधिकरणत्वाद् जठराग्निमान्द्याद्युपद्रवकराणि अतः सर्वशरीरतापीनि। प्रायः कृच्छ्रतमानीति प्रायोग्रहणादसाध्यानि। उक्तञ्च—"अर्शसां प्रशमे यत्नं नाशु कुर्वीत बुद्धिमान्। तान्याशु हि गुदं बद्ध्वा कुर्युर्बद्धगुदोदरम् ॥" सुश्रुतस्तु—"सर्वाः स्युर्वलयो येषां दुर्नामभिरुपद्रुताः। तामिस्तु प्रहितो वायुरपानः सन्निवर्तते ॥ ततो व्यानेन संगम्य स्रोतोर्गृह्णाति देहिनाम्" (सु. नि. स्था. अ. २)—इति (आ० द०) ॥ ३३-३४ ॥

---

१ 'गुदजं स्यात्, गुदस्योपादानात्कथं'—इति पाठान्तरम्। २ 'व्यानेनापि च संगम्य' इति पाठान्तरम्।

*बाह्यायां तु वलौ जातान्येकदोषोल्बणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥ ३५ ॥
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ ३६ ॥
सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् ॥ ३७ ॥
(च. चि. स्था. अ. १४)

उक्तवाताद्यर्शसां साध्यत्वादिकमाह—बाह्यायामित्यादि । न चिरोत्पतितानीति अनतिक्रान्तसंवत्सराणि । परिसंवत्सराणीति परिगतोऽतिक्रान्तः संवत्सरो यैस्तानि तथा । यानि तु बाह्यवलिजातानि द्विदोषोल्बणानि तानि कृच्छ्राणि, त्रिदोषजानि याप्यानीत्युक्तम्; एवं द्वितीयायामेकदोषोल्बणानि कृच्छ्राणि, द्विदोषोल्बणानि याप्यानि, त्रिदोषोल्बणान्यसाध्यानि; एवं तृतीयायामेकदोषोल्बणानि याप्यानि, शेषाण्यसाध्यानि । यद्याप्यं प्रत्याख्येयं वा [१]तद्दोषवलिभेदेऽप्यसाध्यमेव, यदुक्तं चरकेण— "नासाध्यः साध्यतां याति साध्यो याति त्वसाध्यताम्" (च. नि. स्था. अ. ८)— इति ॥ ३५–३७ ॥

†शेषत्वादायुषस्तानि चतुष्पादसमन्विते ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ॥ ३८ ॥
(च. चि. स्था. अ. १४)

असाध्यो हि द्विविधो याप्यप्रत्याख्येयभेदात्, तत्र यद्यायुःशेषोऽस्ति चतुष्पादसंपत्तिश्च तदा याप्यत्वमन्यथा प्रत्याख्येयत्वमित्याह— शेषत्वादित्यादि । चतुष्पादसमन्विते 'अर्शोरोगिणि' इति शेषः । समन्वित इति भावे क्तः, तेन "चतुष्पादसमन्वये सति" इति चक्रः ॥ ३८ ॥

---

* 'सुखसाध्यान्याह—बाह्यायामित्यादि । कृच्छ्रसाध्यान्याह—द्वन्द्वजानि द्वितीयायां वलौ यान्यर्शांसि कृच्छ्रसाध्यानि तान्याहुः । कृच्छ्रसाध्यानि याप्यानीत्यर्थः । असाध्यान्याह— सहजानीत्यादि । यानि सहजानि तान्यसाध्यानि, तथा त्रिदोषजान्युत्तरकालजान्यपि, 'यान्यभ्यन्तरां वलिं संश्रित्य जायन्त' इत्यन्वयः । (आ० द०) ॥ ३५–३७ ॥

† 'असाध्यस्य याप्यप्रत्याख्येयभेदेन द्वैविध्यमाह—शेषत्वादित्यादि । यद्यायुषः शेषोऽस्ति तदा चतुष्पादसमन्विते तान्यर्शांसि याप्यन्ते 'रोगिणं' इति शेषः । कीदृशे रोगिणि ? दीप्तकायाग्नौ, पुनः कीदृशे ? चतुष्पादसमन्विते, अतोऽन्यथा विपरीतानि प्रत्याख्येयानि असाध्यानि । पादचतुष्टयं यथा—रोगी भिषक् परिचारक औषधं च । यदा रोगी भिषग्वाक्यकृदाढ्यो विजितेन्द्रियः; वैद्यः, शास्त्रे कर्मणि कुशलो निर्लोभः सत्यधर्मपरश्च, परिचारकः, आप्तः कुलीनोऽनलस आतुरच्छन्दानुवर्ती च, औषधं, नवं रसवीर्यादिसंपन्नं च ।

---

१ 'त्रिदोषं तृतीयवली त्वसाध्यमेव' इति क. ।

"*हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा।
शोथो हृत्पार्श्वशूलं च यस्यासाध्योऽर्शसो हि सः॥ ३९॥
हृत्पार्श्वशूलं संमोहश्छर्दिरङ्गस्य रुग्ज्वरः।
तृष्णा गुदस्य पाकश्च निहन्युर्गुदजातुरम्॥ ४०॥"
(च. चि. स्था. अ. १४)

"तृष्णारोचकशूलार्तमतिप्रस्रुतशोणितम्।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि॥ ४१॥"
(सु. सू. स्था. अ. ३३)

उपद्रवादसाध्यत्वमाह—हस्त इत्यादि।—हस्तपादादिशोथो मिलितोऽसाध्यलक्षणम्। अत्र हृत्पार्श्वशूलसंमोहादि व्यस्तं समस्तं वा॥ ३९–४१॥

†मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं, नाभिजानि च।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च॥ ४२॥
(वा. नि. स्था. अ. ७)

अथ मेढ्रजादीनां स्वरूपमाह—मेढ्रादिष्वित्यादि। मेढ्रादिष्वपि वक्ष्यन्ते यथास्वमित्यन्वेन छेदः। तेन 'नासार्श' इत्यादिव्यपदेशः। गण्डूपदास्यरूपाणि किञ्चुलकमुखसदृशानि॥ ४२॥

तदुक्तं—"वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः। एते पादाश्चिकित्सायाः कर्मसाधनहेतवः॥ तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृती। लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥ प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः। सत्यधर्मपरो यश्च स भिषक्पाद उच्यते॥ आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि। उच्यते व्याधितः पादो वैद्यवाक्यकृदास्तिकः॥ प्रशस्तदेशसंभूतं प्रशस्तेऽहनि चोद्धृतम्। अल्पमात्रं महावीर्यं गन्धवर्णरसान्वितम्॥ दोषघ्नमग्लानिकरमविकारि विपर्यये। समीक्ष्य काले दत्तं च भेषजं पाद उच्यते॥ स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे। वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः" (सु. सू. स्था. अ. ३४)–इति। एषा चतुष्पादसंपत्तिः। सा चायुषः शेषत्वाद्भवते' (आ० द०)॥ ३८॥

* 'अथोपद्रवादसाध्यत्वमाह—हस्त इत्यादि। यस्य हस्तपादादिषु श्वयथुः स्यात् हृत्पार्श्वशूलं च स अर्शसोऽर्शोरोगी असाध्यः। असाध्यस्य लक्षणमाह—हृदित्यादि। हृत्पार्श्वशूलं संमोहश्च; तथा हृत्पार्श्वशूलादि समस्तं व्यस्तं च, अङ्गस्य रुक् पीडा, गुदमुष्कयोः पाकश्च, गुदजानि अर्शांसि, तं नरं घ्नन्तीत्यर्थः। रक्तार्शोऽसाध्यत्वमाह—तृष्णेत्यादि। अतिप्रस्रुतशोणितं तृष्णारोचकाद्युपद्रवयुक्तं पुरुषमर्शांसि क्षपयन्ति नाशयन्ति, हि पादपूरणे' (आ० द०)॥ ३९–४१॥

† 'स्थानान्तरेष्वन्यान्यप्यर्शांस्याह—मेढ्रादिष्वित्यादि। मांसाङ्कुरत्वादेषामर्शस्त्वेन व्यपदेशः, सर्षपादिस्नेहेषु तैलव्यपदेशवत्। मेढ्रः शेफः आदिशब्दाच्चक्षुर्नासादीनि। यथास्वं यथास्थानम्। नाभिजानि तु गण्डूपदास्यरूपाणि किञ्चुलमुखसदृशानि आकृत्येत्यर्थः। तानि पिच्छिलानि मृदूनि च भवन्ति' (आ० द०)॥ ४२॥

*व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः ।
कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः ॥ ४३ ॥
(वा. नि. स्था. अ. ७)

चर्मकीलसंप्राप्तिमाह—व्यान इत्यादि । व्यानो वायुः, "एतच्च गुदौष्ठदेश एव नान्यत्र" इति कार्त्तिककुण्डादयः ॥ ४३ ॥

†वातेन तोदपारुष्यं पित्तादसितवक्त्रता ।
श्लेष्मणा स्निग्धता चास्य ग्रथितत्वं सवर्णता ॥ ४४ ॥
(वा. नि. स्था. अ. ७)

इति श्रीमाधवकरविरचिते माधवनिदानेऽर्शोनिदानं समाप्तम् ॥ ५ ॥

तस्यैव वातादिभेदेन लक्षणमाह—वातेनेत्यादि । सवर्णता गात्रसवर्णता ॥ ४४ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामर्शोनिदानं समाप्तम् ॥ ५ ॥

* 'व्यानो वायुः, कफं गृहीत्वा संगृह्य, त्वचो बहिः कीलसदृशमर्शः कुर्यात्, स्थिरं निश्चलं, तं चर्मकीलं प्राहुः । त्वचो बहिरिति गुदौष्ठं परित्यज्येत्यर्थः, तत्र त्वर्शसामेव संभवत्वात्' (आ० द०) ॥ ४३ ॥

† 'तस्यैव वातादिलक्षणमाह–वातेनेत्यादि । वातेन तोदः पीडाविशेषः, पारुष्यं परुषता; पित्तात् असितं किंचित्कृष्णं वक्त्रं; श्लेष्मणा स्निग्धता, ग्रन्थिसादृश्यं, सवर्णता गात्रसमानवर्णता । दोषाः प्रकुपिता मेढ्रमांसशोणिते प्रदूष्य कण्डूः कुर्वन्ति, ततः कण्डूयतां क्षतम् । "तस्मिन् क्षते प्ररोहाः स्युर्मांसजा रुधिरस्रवाः । विनाशयन्ति शेफं ते घ्नन्ति पुंस्त्वं च सत्वरम्"–इति । शेफो मेढ्रं, पुंस्त्वं शुक्रम् । "तथा योनौ च ते दुष्टा गण्डूपदमुखाकृतीन् । दुर्गन्धान्सुकुमारांश्च पिच्छिलान् जनयन्ति हि"–इति । मांसाङ्कुरानिति शेषः । चकाराद्योनेरार्तवं च घ्नन्ति । "तैरेवोर्ध्वगतैर्दोषैः कर्णजार्शस्तु जायते । बाधिर्यं शूलमत्युग्रं सततं कर्णपूतिता ॥ नेत्रजेषु जलस्रावो वेदना चाप्यदर्शनम् । अश्रूणां जायते वर्त्मोऽवरोधोऽर्शस्सु संततम् ॥ घ्राणजेषु प्रतिश्यायः कृच्छ्रोच्छ्वासः शिरोव्यथा । क्षवथुः पूतिवक्त्रं च वाक्यं स्यादनुनासिकम् ॥ मुखार्शस्सु च कण्ठौष्ठतालुमध्यैकजन्मसु । स्याद्धि गद्गदवाक्यत्वं रसाज्ञानं मुखामयाः–" इति' (आ० द०) ॥ ४४ ॥

१ "रक्तता' इति क. ख. ।

अथाग्निमान्द्याजीर्णविसूचिकालसकविलम्बिकानिदानम्।

*मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः॥ १॥

अर्शःकार्यत्वादग्निमान्द्यादीनां तान्याह—मन्द इत्यादि। मन्दस्य दुर्जयत्वात् प्रागभिधानम्। कफपित्तानिलाधिक्यादिति यथाक्रमं मन्दादिषु योज्यम्। तत्साम्यादिति तेषां कफादीनां साम्यात्। समः अविकृतः, धातुसाम्यहेतुरित्यर्थः। एतस्याविकारस्यापि विकारप्रस्तावेऽभिधानं प्रकृतिज्ञानानन्तरीयकं विकृतिज्ञानमिति बोधनार्थम्। जाठर इति धात्वग्निभूताग्निव्यवच्छेदार्थम्॥ १॥

†विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्।
करोत्यग्निस्तथा मन्दो विकारान् कफसंभवान्॥ २॥
समा समाग्नेरशिता मात्रा सम्यग्विपच्यते।
स्वल्पाऽपि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः॥ ३॥
कदाचित् पच्यते सम्यक्कदाचिन्न विपच्यते।
मात्राऽतिमात्राऽप्यशिता सुखं यस्य विपच्यते[1]।
तीक्ष्णाग्निरिति तं विद्यात्, समाग्निः श्रेष्ठ उच्यते॥ ४॥

प्रतिलोमतन्त्रयुक्त्या तेषां रूपमाह—विषम इत्यादि। वातजान् रोगानिति वातनानात्मजानामशीतेरन्यतमान्, सामान्यजांश्च ज्वरातीसारादीन्, एवं पित्तनानात्मजानामोषप्लोषादीनां चत्वारिंशतोऽन्यतमान्, एवं कफनानात्मजानां[2] विंशतेरालस्यादीनामन्यतमान्। एते च विकाराश्चरके महारोगाध्याय (च. सू. स्था. अ. २०) एव द्रष्टव्याः। समेत्यादि।—समा उचिता, मात्रा आहारस्य, सम्यग्यस्य विपच्यते स समाग्निः। तीक्ष्णाग्निरिति तं विद्यादिति छेदः। मात्राऽतिमात्रेत्युपलक्षणं, तेनाजीर्णगुरुभोजनादिकमपि लक्षणीयम्। यदुक्तमन्यत्र—"अतिमात्रमजीर्णेऽपि गुरु चान्नमथाश्नतः। दिवाऽपि स्वपतो यस्य पच्यते सोऽग्निरुत्तमः"—इति। तीक्ष्ण-

* 'अर्शोभ्योऽग्निमान्द्यस्य संभवस्ततोऽर्शोऽनन्तरमग्निमान्द्यादिकान् रोगानाह-मन्द इत्यादि। अनलो वह्निश्चतुर्विधो भवति-मन्दः, तीक्ष्णो, विषमः, समश्चेति।' (आ० द०)॥१॥

† 'तेषां स्वरूपमाह-विषम इत्यादि। तेषां लक्षणमाह-समेत्यादि। मन्दाग्नेः मन्दवह्नेः पुरुषस्य स्वल्पाऽपि मात्रा अशिता सम्यङ् नैव विपच्यते। विषमाग्नेस्तु पुरुषस्य कदाचित्सम्यक् पाकं गच्छति कदाचिन्न गच्छति, वायोर्विषमगतित्वात्। तीक्ष्णाग्निरिति जानीयात्। तेषु मध्ये समाग्निरुत्तमः' (आ० द०)॥ २-४॥

१ 'सुखं यस्य विपच्यते' इति ख.। २ ये वातादिभिर्दोषान्तरासंपृक्तैर्जन्यन्ते ते नानात्मजाः।

ग्रहणेन भस्मकस्यावरोधः, अत्यन्ततीक्ष्णाग्निरेव 'भस्मक' इत्युच्यते । यदुक्तं चरके—"नरे क्षीणकफे पित्तं कुपितं मारुतानुगम् । स्वोष्मणा पावकस्थाने बलमग्नेः प्रयच्छति ॥ तदा लब्धबलो देहं विरूक्षेत् सानिलोऽनलः । अभिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः ॥ पक्त्वाऽन्नं स ततो धातून् शोणितादीन् पचत्यपि । ततो दौर्बल्यमातङ्कान् मृत्युं चोपनयेन्नरम् ॥ भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रताम्यति । तृट्कासदाहमूर्च्छाद्या व्याधयोऽत्यग्निसंभवाः ॥ (च. चि. स्था. अ. १५)"—इति ॥ २–४ ॥

*"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ ५ ॥"
(सु. सू. स्था. अ. ४६)
अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥ ६ ॥

अग्निमान्द्याजीर्णयोः परस्परकारणत्वादजीर्णान्याह—आममित्यादि । त्रिभिरिति कफादिभिरेकैकशो यथासंख्येन । रसशेषत इति रसाय शेषो रसशेषः, प्रकृतिविकृतिभावे चतुर्थी, यथा—यूपाय दारु यूपदारु; अथवा "रसशब्देन रसवानाहारोऽभिप्रेतो लक्षणया, तेन रसशब्देन रसवानाहारोऽभिधीयते, तस्य शेषोऽपरिणतिलक्षणो रसशेष" इति जेज्जटः । ननु, यद्येवं तदा आमविदग्धविष्टब्धानामन्यतमरूपस्यावश्यंभावित्वान्न तेभ्यो भेदः; किंच तल्लिङ्गैरम्लोद्गारादिभिर्भवितव्यं, तथाच सत्युद्गारशुद्धे रसशेषाजीर्णलक्षणस्यानुदयप्रसङ्गः ? । उक्तं हि सुश्रुते—"उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्रसेकं चतुर्थमेतत्प्रवदन्त्यजीर्णम्"-इति (सु. सू. स्था. अ. ४६) । आरोग्यमञ्जर्यां नागार्जुनोऽप्याह—"उद्गारेऽपि विशुद्धतामुपगते काङ्क्षा न भक्तादिषु स्निग्धत्वं वदनस्य सन्धिषु रुजा कृत्वा शिरोगौरवम् । मन्दाजीर्णरसे तु लक्षणमिदं तत्रातिवृद्धे पुनर्हृल्लासज्वरमूर्च्छनादि च भवेत् सर्वामयक्षोभणम्"-इति । नैवं, अवश्यंभाविविदग्धादिरूपस्याप्याहारशेषस्यात्यल्पत्वेन न तदनुरञ्जितोद्गारोदयप्रसङ्गः, अकालबुभुक्षायामिव । यदाह सुश्रुतः—"स्वल्पं यदा दोषविबद्धमामं लीनं न तेजःपथमावृणोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति" (सु. सू. स्था. अ. ४६)-इति । तन्त्रान्तरेऽप्याहारापाकजरसशेषलक्षणमुक्तम्—"आमं विदग्धं विष्टब्धं रसशेषमथापि च । चतुर्विधमजीर्णं स्यादाहारापरिपाकतः"-इति । गदाधरस्त्वाह—"रसे शेषो रसशेषः, आहारजनिते रसे शेष आहारावयवोऽनुप्रविष्टोऽलक्ष्यमाणः क्षीरे नीरमिव रसशेषः" इति । ननु, आमाजीर्णादिभ्यो रसशेषस्य को भेदः ? उच्यते, आमादित्रयमन्नजं, रसशेषस्त्वाहाररसजः; वातिकादिव्यपदेशश्चात्र न कृतः, अल्पत्वाद्वातादिलिङ्गानां; हेतुलक्षणचिकित्साभेदाच्चास्य भेद इति । अजीर्णमिति

* 'आहारस्यैव अपक्व उद्गरितो रसो रसशेषस्ततः । मतान्तरमाह-अजीर्णमित्यादि ।' (आ०द०) ॥ ५–६ ॥

१ 'रूक्षयेत्' इति क. ख. । २ 'क्षुदरस' इति क. ।

तद्विरोधे नञ्, जीर्णं पक्वं तद्विरुद्धमजीर्णं; यथा—'असितम्'। सर्वमजीर्णं त्रिदोषजम्, एकदोषव्यपदेशस्तूत्कटैकदोपलिङ्गत्वेनोक्त इति व्याख्यानयन्ति; यतस्त्रैदोषिकमेवाजीर्णकारणमुक्तम्, "अत्यम्बुपानात्" इत्यादि। अजीर्णादपि दोपत्रयकोपो भवति। यदुक्तं सुश्रुते—"अजीर्णात् पवनादीनां विभ्रमो बलवान् भवेत्" (सु. सू. स्था. अ. ४६)—इति। अजीर्णं पञ्चमं केचिदित्यादि। निर्दोषम् आध्मानादिदुष्टरकारकम्। दिनपाकि चेत्यहोरात्रेणाहारः पच्यत इत्युत्सर्गः, यत्र तु मात्राकालासात्म्यादिदोपादपरदिने पच्यते तद्दिनपाकि। कालव्यतिक्रमेण पच्यमानमप्याध्मानादिकं न करोतीति पूर्वेभ्यो भेदः। एतदभिधानस्य तु प्रयोजनं पाककालप्रतीक्षणं, नैशाजीर्णे भोजननिषेधात्। प्राकृतं प्रतिवासरमिति प्राकृतमवैकारिकं, प्रतिवासरं प्रतिदिनं क्रियमाणम्। अयमभिसन्धिः—अद्यैव भुक्तमन्नं किं जीर्णमजीर्णं वा? न तावज्जीर्णं, क्षुत्पिपासामलोत्सर्गादेर्जीर्णलक्षणस्यानुदयात्; तस्मादजीर्णं, तच्चाध्मानादिकं न करोतीति पूर्वेभ्यो भिन्नम्। तस्य चाभिधानप्रयोजनं—पाकार्थं वामपार्श्वशयनाद्याचारसेवा। उक्तं हि सुश्रुते—"भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत्। शब्दरूपरसस्पर्शगन्धांश्च मनसः प्रियान्॥ भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति" (सु. सू. स्था. अ. ४६)—इति। न चात्राहारस्य निषेधः, तस्य शास्त्रेण विहितत्वात्। चरके तु—"तस्य लिङ्गमजीर्णस्य"—इत्यादिना "घोरमन्नविषं च" (च. चि. स्था. अ. १५)—इत्यन्तेनान्नविषाख्यमजीर्णं पठितं; तच्च पित्तादिसंसृष्टरसशेषाजीर्णमेवेति व्याचक्षते; तेन रसशेष एव तस्यान्तर्भाव इति न पृथक् पठितम्॥ ५॥ ६॥

*अत्यम्बुपानाद्विषमाशनाच्च संधारणात्स्वप्नविपर्ययाच्च।
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥७॥
ईर्ष्याभयक्रोधपरिक्षतेन लुब्धेन रुग्दैन्यनिपीडितेन।
प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक्परिपाकमेति॥ ८॥
(सु. सू. अ. ४६)

मात्रयाऽप्यभ्यवहृतं पथ्यं चान्नं न जीर्यति।
चिन्ताशोकभयक्रोधदुःखशय्याप्रजागरैः॥ ९॥
(च. वि. अ. २)

अजीर्णकारणमाह—अत्यम्बुपानादित्यादि। संधारणादिति वेगानाम्। स्वप्नविपर्ययात् दिवास्वप्नादेः। लघु चापीत्यपिशब्देन स्निग्धोष्णादिगुणयुक्तमपि बोध्यम्। केचित् 'ईर्ष्याभयक्रोधपरिक्षतेन'—इत्यादिश्लोकं पठन्ति; स च मानसदोषाजीर्णविषयो बोद्धव्य इति॥ ७–९॥

* 'अजीर्णस्य कारणमाह—अत्यम्बित्यादि। विषमाशनं "बहु स्तोकमकाले वा तज्ज्ञेयं विषमाशनम्—" (सु. सू. अ. ४६) इति। क्षुत्तृड्वातपुरीषादिवेगानां संधारणं, रात्रिजागरणं

१ 'नैशामजीर्णे' इति क.। २ एतदनन्तरं 'परं प्रकृतत्वादविकारित्वमस्य' इति आतङ्कदर्पणेऽधिकं पठ्यते।

*तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथाभुक्तमविदग्धः प्रवर्तते ॥ १० ॥
विदग्धे भ्रमतृण्मूर्च्छाः पित्ताच्च विविधा रुजः ।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते ॥ ११ ॥
विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः ।
मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनम् ॥ १२ ॥
रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे ।

उद्दिष्टानामजीर्णादीनां लक्षणमाह—तत्रेत्यादि। तत्रेति तेषु मध्ये। गण्डः कपोलः, अक्षिकूटश्चक्षुर्गोलकः, तद्गतः शोथो भवति प्रभावात्। उद्गारश्च यथाभुक्तमिति मधुरादिरूपः। अविदग्धोऽनम्लः, द्वितीयपाके ह्याहारस्याम्लता दर्शिता। विदग्ध इत्यादि। पित्ताच्च विविधा रुज इति ओषचोषादयः। सधूमाम्ल इति धूमोद्गारोऽम्लोद्गारश्च। विष्टब्ध इत्यादि। विविधा वातवेदना तोदभेदादिरूपा। अङ्गपीडनं सामवातवेदनादि ॥ १०–१२ ॥

†मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः ॥ १३ ॥
(सु. सू. अ. ४६)

उपद्रवानाह—मूर्च्छेत्यादि। अतिप्रवृद्धाजीर्णे तु मरणमपि ॥ १३ ॥

दिवास्वापः स्वप्नविपर्ययः। कायिकं कारणमभिधाय मानसं रजस्तमोदोषकारणमाह–ईर्ष्येत्यादि। ईर्ष्या परसंपत्तेरसहिष्णुता, भयं परस्मात्त्रासः, क्रोधः पराभिद्रोहलक्षणः, तैः परिप्लुतेन परिभूतेन, लुब्धेन लोभसहितेन, रुग्दैन्यनिपीडितेन शोकदैन्यव्याप्तेन, दैन्यं निर्गतित्वं, प्रद्वेषो मात्सर्यमिति' (आ० द०) ॥ ७–९ ॥

* 'आमे अजीर्णे गुरुतादिचिह्नं भवति। गुरुता उदराङ्गयोर्गौरवम्। उत्क्लेद उपस्थितवमनत्वमिव। अविदग्धोऽनम्लः, एतस्य लक्षणं सुश्रुते उक्तं–"माधुर्यमन्नं गतमामसंज्ञम्–" (सु. सू. अ. ४६) इति। तदेतत् कफदूषितान्नस्वभावकथनमात्रम्। कफकार्याणि गौरवस्नेहकण्डूप्रभृतीनि द्रष्टव्यानि। विदग्धलक्षणमाह–विदग्धं किंचिद्विपक्वमम्लभावगतम्। उक्तं च सुश्रुते–"विदग्धसंज्ञं गतमम्लभावम्–" (सु. सू. अ. ४६) इति। तेषु मध्ये विदग्धे भ्रमश्चक्रारूढस्येव। विष्टब्धलक्षणमाह–विष्टब्ध इत्यादि। आनद्धवातं विष्टब्धं कथ्यते। उक्तं च सुश्रुते–"किंचिद्विपक्वं भृशतोदशूलं विष्टब्धमानद्धविरुद्धवातम्–" (सु. सू. अ. ४६) इति। तत्र तेषु मध्ये विष्टब्धेऽजीर्णे विविधवातवेदनास्तोदभेदादिरूपाः। जृम्भाङ्गमर्दशिरोरुजादीन्यपि द्रष्टव्यानि। पुरीषवातयोरप्रवर्तनम्। स्तम्भोऽङ्गानाम्। मोहो विगतचित्तता। रसशेषलक्षणमाह–रसशेष इत्यादि। हृदयाशुद्धिरिति अशुद्धिः। प्रसेकादिसहितं गौरवमिति। उक्तं च सुश्रुते "उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य। रसावशेषेण तु सप्रसेकं चतुर्थमेतद् प्रवदन्त्यजीर्णम्" (सु. सू. अ. ४६)' (आ० द०) ॥ १०–१२ ॥—

† 'अजीर्णस्योपद्रवानाह–मूर्च्छेत्यादि। मूर्च्छा चेतनाच्युतिः, प्रलापोऽसंबद्धभाषणं, वमथुः छर्दिः, सदनमङ्गग्लानिः, अन्ये तु स्फुटनमिवाङ्गानामिति वदन्ति, भ्रमश्चक्रारूढस्येव' (आ० द०) ॥ १३ ॥

***अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः ।**
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ १४ ॥

उक्ताजीर्णकारणेभ्योऽतिमात्रभोजनस्य विशेषकारणत्वमाह[1]—अनात्मवन्त इत्यादि । अनात्मवन्तो दुष्टमनोयुक्ताः, लोलुपत्वेन तदात्वसुखाकाङ्क्षिण इति । अत एवोक्तं पशुवदिति । रोगानीकस्य रोगसमूहस्य विसूच्यादेः, मूलं कारणम् ॥ १४ ॥

†अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम् ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥ १५ ॥
(सु. उ. अ. ५६)

अजीर्णसंभवत्वाद्विसूच्यादीनामजीर्णानन्तरं विसूच्यादीनाह—अजीर्णमित्यादि । "आमविष्टब्धविदग्धेषु त्रिषु विसूच्यलसकविलम्बिका यथासंख्यं भवन्ति"—इति कार्तिककुण्डः । 'तन्न'—इति वकुलकरः । यथासंख्ये हि विलम्बिका विदग्धात् प्राप्नोति, तां च कफवाताभ्यां पठिष्यति, तस्मात्रिविधाजीर्णाद्यथासंभवं विसूच्यादीनामुत्पाद इति युक्तम् । उक्तं हि[2]—"अजीर्णात्पवनादीनां विभ्रमो बलवान् भवेत्"—इति ॥ १५ ॥

‡सूचीभिरिव गात्राणि तुदन् संतिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ॥ १६ ॥
न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥ १७ ॥
(सु. उ. अ. ५६)

विसूच्या निरुक्तिमाह—सूचीभिरित्यादि । ('बाहुल्याद्वायुः सूचीभिरिव तुदन्' इति विसूचिनिरुक्तिः । पाण्डुरोगवत्सूचीभिरिव तोदनं विहायान्येऽपि वेदनाभेदा विविधा भवन्त्येव । यदुक्तं तन्त्रान्तरे—"विविधैर्वेदनाभेदैर्वाय्वादेर्भृशकोपतः । सूचीभिरिव गात्राणि भिनत्तीति विसूचिका"—इति ।)[3] विदितागमा विदितायुर्वेदाः । मूढाः तज्ज्ञानानभिज्ञाः । अजितात्मानः अजितेन्द्रियाः । अशनलोलुपाः पशुवदप्रमाणभोजिनः ॥ १६–१७ ॥

* 'ये नरा अप्रमाणतः पशुवद्भुञ्जते, तेऽजीर्णं प्राप्नुवन्ति' (आ० द०) ॥ १४ ॥

† 'अजीर्णसंभवा विसूच्यादय इत्यजीर्णानन्तरं विसूच्यादीनाह—अजीर्णमित्यादि । यदामादिभेदेनाजीर्णमुक्तं तस्मात्रिविधाजीर्णाद्विसूच्यलसकौ स्यातां तथा विलम्बिकाऽपि भवेत्; यदत्र चतुर्थस्याजीर्णस्य रसशेषस्योपादानं न कृतं तदपरिणाममात्रत्वेन तस्य विसूच्याद्यारम्भकत्वाभावादेकीयमतत्वेनोक्तत्वाच्च' (आ० द०) ॥ १५ ॥

‡ 'यस्यां विसूचिकायामनिलः सूचीभिरिव गात्राणि तुदन् सन् तिष्ठते वैद्यैरादिवैद्यैरजीर्णात्सा विसूचीति कथ्यते । नेत्यादि । एवंविधाः पुरुषास्तां विसूचिकां न प्राप्नुवन्ति, मुह्यन्तीति मूढाः भक्ष्याभक्ष्यानभिज्ञाः, पुरुषास्तां भजन्ते[4] । अजितात्मानोऽजितेन्द्रियाः 'कलुषाशयाः' इत्यन्ये पठन्ति, कलुषो दुष्ट आमाशयो येषां ते कलुषाशयाः; आमाशयदुष्टिश्च दुष्टान्नसंपर्कात्, वातादिकोपाच्च' (आ० द०) ॥ १६–१७ ॥

१ 'अपि कारणत्वमाह' इति क. ख. । २ 'आर्षं हि' इति क. ख. । ३ अयं पाठः क. ख. पुस्तकयोर्नोपलभ्यते. । ४ 'लभन्ते' इत्यत्र 'भजन्ते' इति पाठाभिप्रायेण ।

*मूर्च्छाऽतिसारो वमथुः पिपासा शूलो भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥ १८॥
(सु. उ. तं. अ. ५६)

विसूच्या लक्षणमाह—मूर्च्छेत्यादि। वमथुः वान्तिः। शिरसश्च भेदः शिरःशूलम्। अत्र वमनातीसारौ मिलितौ लक्षणमिति; सुश्रुते—अधोगाया आमातीसारेण ग्रहणं, ऊर्ध्वगायाश्च छर्द्या। चरके तु पठ्यते,—"ऊर्ध्वं चाधश्च प्रवृत्तामदोषां यथोक्तरूपां विसूचीं विद्यात्" (च. वि. स्था. अ. २)—इति। अत ऊर्ध्वगा विसूची भवति, तथाऽधोगाऽपि, चरके आमातीसारस्यापठितत्वात्; चकारादुभयमार्गगाऽपीति व्याचक्षते, ऊर्ध्वगायाश्चापक्वाहारवमनेन त्रिदोषच्छर्दिभ्यो भेद इति मन्तव्यम् ॥ १८ ॥

†कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥ १९ ॥
वातवर्चोनिरोधश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु ॥ २० ॥
(सु. उ. तं. अ. ५६)

अलसकमाह—कुक्षिरित्यादि। आनह्यते आध्मायते, मलविष्टम्भस्य वक्ष्यमाणत्वात्। प्रताम्येत् मुह्यति पुरुषः, परिकूजति आर्तनादं करोति। निरुद्ध इत्यजीर्णेनाधः प्रतिरुद्धगतिः कुक्षौ वा, तेनोपरि धावति ऊर्ध्वं हृदयकण्ठादिकं[२] गच्छति। 'अलसक' इति दोषस्थिरत्वनिमित्ता संज्ञा। यदुक्तं तन्त्रान्तरे,—"प्रयाति नोर्ध्वं नाधस्तादाहारो न विपच्यते। आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः"—इति ॥१९–२०॥

‡दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्ध्वमधश्च यस्य।
विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः २१
(सु. उ. तं. अ. ५६)

विलम्बिकामाह—दुष्टमित्यादि। भुक्तमन्नं कफमारुताभ्यां दुष्टमिति संबन्धः। भृशं दुश्चिकित्स्याम् अत्यर्थं दुश्चिकित्स्यां, प्रत्याख्येयां वर्जनीयामित्यर्थः। ननु, अलसकविलम्बिकयोरुभयोरपि वातकफप्रबलयोरूर्ध्वाधोऽप्रवर्तनशीलयोस्तुल्यत्वात् को भेदः? उच्यते, अलसके तीव्राः शूलादयो भवन्ति, यदुक्तं,—"पीडितं मारुतेनान्नं

---

* 'उद्वेष्टनं हस्तपादयोर्मोटनं जङ्घादीनां, खल्लीति लोके। तस्यां विसूच्यां; अत्र "वमनातीसारौ मिलितौ लक्षणमिति" सुश्रुतः। सा च द्विविधा अधोगा ऊर्ध्वगा च। आमातिसारेणाधोगा छर्द्योर्ध्वगा चेति सौश्रुताः, इत्युभयगा।' (आ० द०) ॥ १८ ॥

† 'अलसकलिङ्गमाह—कुक्षिरित्यादि। कुक्षिः उदरम्। तस्य पुरुषस्यालसकनामानं रोगमाचष्टे कथयति' (आ० द०) ॥ १९–२० ॥

‡ 'यस्य पुरुषस्य भुक्तमन्नं कफमारुताभ्यां दुष्टं सदूर्ध्वमधश्च न प्रवर्तते, पुराणाः शास्त्रविदस्तां विलम्बिकामाहुः; भृशं दुश्चिकित्स्यां प्रत्याख्यायोपचरणीयामित्यर्थः। दुष्टमित्यत्र लीनमिति केचित्पठन्ति। इयमेव विलम्बिका तन्त्रान्तरे दण्डकालसक इति नाम्ना पठ्यते।

१ 'दोषज" इति ख.। २ 'कण्ठादीन्' इति ख.।

श्लेष्मणा रुद्धमन्तरा । अलसं क्षोभितं दोषैः शल्यत्वेनैव संस्थितम् ॥ शूलादीन्कुरुते तीव्रांश्छर्द्यतीसारवर्जितान्"–इति ॥ २१ ॥

*यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः ।
दोषेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च ॥ २२ ॥
(सु. उ. तं. अ. ५६)

अजीर्णजातान् विसूच्यादीनभिधायाजीर्णजन्यस्यामस्य कार्यान्तरमाह—यत्रस्थमित्यादि । आमं कर्तृ, यत्रस्थं तमेव देशं विशेषेण रुजेत्; एतेनान्यदेशेऽपि किंचिद्रुजं करोतीति बोधयति । यत्रेति सर्वनामशब्देन कुपितवातादीनामिवानियतमेव स्थानमामस्येति दर्शितम् । कै रुजेदित्याह—विकारजातैर्विकारसमूहैः । किंभूतैरित्याह—दोषेण येन स्वकारणकुपितेन वातादिनाऽवततं व्याप्तं शरीरं, तल्लक्षणैः तल्लिङ्गैस्तोददाहगौरवादिभिः, न केवलं तैरामसमुद्भवैश्च विकारजातैरपाकालसकादिभिरपि ।–अनेनैव श्लोकेन तन्त्रान्तरोक्तमामवाताख्यं रोगं गृहीतवान् सुश्रुतः तस्य लक्षणस्य समानत्वादित्याहुः ॥ २२ ॥

†यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥ २३ ॥
(सु. उ. तं. अ. ५६)

विसूच्यलसकयोरसाध्यत्वलक्षणमाह—य इत्यादि । "विलम्बिकायास्तु स्वरूपेणैवासाध्यत्वम्" इति जेज्जटः । अल्पसंज्ञो मोहयुक्तः । अभ्यन्तरयातनेत्रः कोटरान्तःप्रविष्टाक्षिगोलकः । सर्वविमुक्तसन्धिः श्लथीभूतसर्वपर्वास्थिसन्धिः । अपुनरागमाय मरणाय ॥ २३ ॥

तथाच–"दुष्टा ह्यलसके दोषाश्छर्द्यतीसारवर्जिताः । कारकास्तीव्रशूलादेः स्रोतसां संनिरोधकाः ॥ तिर्यग्योगात्तनुं सर्वां दण्डवत्स्तम्भयन्ति च । स दण्डालसकः शीघ्रं नरदेहविनाशकृत्"–इति' (आ० द०) ॥ २१ ॥

* आमवसन्यत्ररपिणतं, तथाच–"अविपक्वमसंयुक्तं दुर्गन्धं बहु पिच्छिलम् । सादनं सर्वगात्राणामाममित्यभिधीयते"–इति । यत् आमं कर्तृ, यत्रस्थं वायुप्रेरणाकर्षणस्था(स्य) वैगुण्यादत्र व्यवस्थितं तमेव देशं विशेषेण रुजेत् पीडयेत्, एतावता धातुभूताग्नीनां मान्द्यत्वेनामसंभवत्वात् शोफग्रन्थिविद्रध्यादिरोगाणां तज्जन्यत्वमुक्तं भवति । यदुक्तं,—"धातूनां सप्त सप्तानां भूतानां पञ्च पावकाः । त्रयोदश भवन्त्येवं सह जाठरवह्निना–" इति । यत्र धातुप्रदेशे वह्निर्मन्दो भवति तत्रैवामसंभवात्पिडकाद्युत्पत्तिः स्यात् ।' (आ० द०) ॥ २२ ॥

† 'यः पुरुषः श्यावदन्तादिलक्षणयुक्तः स्यात्, श्यावशब्दो दन्तादिभिः प्रत्येकं संबध्यते, क्षामस्वरः क्षीणध्वनिः, सर्वविमुक्तसंधिश्च, स नरोऽपुनरागमाय अपुनरावृत्तये मरणाय यायाद्गच्छेत् । अत्रान्ये–निद्रानाशादिभिर्लक्षणान्तरं पठन्ति । परंतु "निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञिता । अमी ह्युपद्रवा घोरा विसूच्याः पञ्च दारुणाः–" इति माधवेन संगृहीतत्वात्पृथङ्ग लिखितम्' (आ० द०) ॥ २३ ॥

---

१ 'स्तब्धत्वेनैव' इति क. । 'स्तब्धत्वेन च' इति ख. । २ "आमवातादिभिः" इति क. । 'रपाकजातैरामवातादिभिः' इति ख. । ३ 'पाचकाः' इति ग. ।

*उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ २४ ॥
निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता ।
अमी ह्युपद्रवा घोरा विसूच्यां पञ्च दारुणाः ॥ २५ ॥
प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम् ।
तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति ॥ २६ ॥
ग्लानिगौरवविष्टम्भभ्रममारुतमूढताः ।
विबन्धो वा प्रवृत्तिर्वा सामान्याजीर्णलक्षणम् ॥ २७ ॥

इति श्रीमाधवकरविरचिते माधवनिदानेऽग्निमान्द्याजीर्णविसूचिकालसक-विलम्बिकानिदानं समाप्तम् ॥ ६ ॥

अजीर्णप्रतियोगितया जीर्णाहारलक्षणमाह—उद्गारेत्यादि । उद्गारशुद्धिर्धूमाम्लादि-रहितत्वम् । उत्साहः शरीरमनसोर्बलम् । उत्सर्गो मलमूत्रप्रवृत्तिः, वेगसहित उत्सर्गो वेगोत्सर्गः । यथोचित उपयुक्ताहारानुरूपः । लघुता देहस्य, विशेषेण कोष्ठस्येति ॥ २४–२७ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामग्निमान्द्याजीर्णविसूचिकालसक-विलम्बिकानिदानं समाप्तम् ॥ ६ ॥

अथ क्रिमिनिदानम् ।

†क्रिमयश्च द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ।
बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥ १ ॥
नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः ।
(वा. नि. स्था. अ. १४)

अजीर्णात् क्रिमिसंभव इत्यतोऽजीर्णानन्तरं क्रिमिनिदानमाह—क्रिमय इत्यादि । तत्र बाह्याः त्वगुपलेपकबाह्यमलसंभवाः, आभ्यन्तरा आमाशयादिसंभवाः, ते देश-भेदेन द्वैविध्येनोक्ताः कारणभेदाच्चतुर्धा भवन्तीत्याह—बहिर्मलेत्यादि । बहिर्मलो

---

* 'जीर्णाहारस्य पुंस एतल्लक्षणं' (आ० द०) ॥ २४–२७ ॥

† 'एके बाह्याः केशवस्त्रादिजा यूकालिक्षादयः, अन्ये चाभ्यन्तराः । आभ्यन्तरा आमादि-संभवाः । केचिद्बहिर्मलजन्मानः, तथा केचित्कफजन्मानः, केचिद्रक्तजन्मानः, केचित्पुरीष-जन्मानश्चेति चतुर्धा । त एव चतुर्विधा नामतो नामभेदेन वक्ष्यमाणाभिः संज्ञाभिर्विंशतिविधा भवन्ति तानाह—नामत इत्यादि । नामतो विंशतिविधा विंशतिसंख्याका नामत इत्यर्थः । एते च नामविशेषाः केचित्सान्वयाः केचिन्निरन्वयाः व्यवहारार्थं पूर्वाचार्यैः प्रणीताः । तेषां नामानि यूका लिक्षा बहिर्मलोत्थे द्वे, एतयोराश्रयः केशवस्त्राणि; कफजा—अन्त्रादाः, उदरावेष्टाः, हृदयादाः, महागुदाः, चुरवः, दर्भकुसुमाः, सुगन्धाः, एवं सप्त, एषामाश्रय आमाशयः; रक्तजाः—केशादाः, लोमविध्वंसाः, रोमद्वीपाः, उदुम्बराः, सौरसाः, मातरः, एवं षट्, एषां स्थानं रक्तवाहिसिराः; पुरीषोत्थाः पञ्च—ककेरुकाः, मकेरुकाः सौसुरादाः, सशूलाः, लेलिहाः, एषामाश्रयः पक्वाशयः; एवं विंशतिः' (आ० द०) ॥ १ ॥—

गात्रोपलेपी खेदादिरुक्तः, एवं वहिर्मलादिषु चतुर्षु जन्म वहिर्मलादिजन्म तद्भेदात् । त एव चतुर्विधा नामभेदेन विंशतिविधा भवन्ति, विंशत्यतिरिक्ताश्चातिसूक्ष्माः क्रिमयः सहजाश्चरकेणोक्ताः, ते चावैकारिकत्वेन रोगाधिकारे नोच्यन्ते, विंशतिविधास्तु क्रिमयो दोषप्रकोपणद्वारेण ज्वरशूलादीन् जनयन्तीति रोगा उच्यन्ते ॥ १ ॥—

*तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥ २ ॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ।
[१]द्विधा ते कोठपिडकाकण्डूगण्डान् प्रकुर्वते ॥ ३ ॥
(वा. नि. स्था. अ. १४)

उक्तान् बाह्यान् विवृणोति—बाह्या इत्यादि । तिलानामिव प्रमाणं परिमाणं संस्थानमाकृतिर्वर्णश्च श्वेतः कृष्णो वा येषां यूकादिरूपाणां ते तथा । केशाम्बराश्रया इति अम्बरं वस्त्रम् । बहुपादा इति यूकाः, सूक्ष्मा इति लिक्षाः ॥ २ ॥ ३ ॥

†अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता ।
व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते क्रिमींस्तु ॥४॥

तेषां निदानमाह—अजीर्णेत्यादि ।—अजीर्णे भोजनशीलोऽजीर्णभोजी । मधुराम्लनित्यः सततमधुराम्लभोजी । विरुद्धं क्षीरमत्स्यादि ॥ ४ ॥

‡[३]माषपिष्टाम्ललवणगुडशाकैः पुरीषजाः ।
मांसमत्स्यगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥ ५ ॥
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ।
(सु. उ. तं. अ. ५४)

क्रिमिविशेषे निदानविशेषमाह—माषेत्यादि ॥ ५ ॥—

¶ज्वरो विवर्णता शूलं हृद्रोगः सदनं[४] भ्रमः ॥ ६ ॥
भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम् ।
(सु. उ. तं. अ. ५४)

आभ्यन्तरक्रिमिलक्षणमाह—ज्वर इत्यादि ॥ ६ ॥—

---

* 'तत्र तेषु चतुर्षु, बाह्या बाह्यमलोद्भवाः, केशाम्बराश्रया इति–केशाः कचाः अम्बरं वस्त्रं च आश्रयो येषाम् । ते के कृमयो भवन्तीति तानाह–बहुपादा इत्यादि । यूकाः केशविद्धाः, बहुपादाः बहुचरणाः, लिक्षा सूक्ष्मा अणवः । ते द्विधा यं रोगं कुर्वन्ति तमाह । कोठेत्यादि कोठ उदर्दभेदः, पिडिका प्रसिद्धा, कण्डूः खर्जूः, गण्डः पिडिकाकारः कठिनः ।' (आ० द०) ॥२॥३॥

† 'ना पुरुषः कृमीन् लभते, कथंभूतः? अजीर्णे पिष्टं गोधूमचूर्णकृतं पूपादि' (आ० द०)॥४॥

‡ 'पुरीषजानां निदानमाह–माषेत्यादि । एतैः कारणैः पुरीषजा जायन्ते, 'पक्वाशये' इति शेषः । कफोद्भवनिदानमाह–मांसेत्यादि । शुक्तं इक्षुरसः कालान्तरेणाम्लीभूतः । एते आमाशये । शोणितजानां कारणमाह–विरुद्धेत्यादि । शाकम् अपक्वहरितचणकादिशाकभक्षणम्' (आ० द०) ॥ ५ ॥—

¶ 'विवर्णता शरीरे श्यामपीतता, शूलम् आमाशये पक्वाशये च, हृद्रोगो हृदयविकारो हृल्लासादिः, भ्रमः चक्रारूढस्येव, भक्तद्वेषो भोजनविद्वेषः' (आ० द०) ॥ ६ ॥—

---

१ अयं पाठः ख.पुस्तके नास्ति । २ 'पिष्टान्न' इति ख. । ३ "माष°" इति क. ख. । ४ 'छर्दनम्' इति क. ग. ।

*कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः ॥ ७ ॥
पृथुब्रध्ननिभाः केचित् केचिद्गण्डूपदोपमाः ।
रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः ॥ ८ ॥
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ।
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ॥ ९ ॥
चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते ।
हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥ १० ॥
मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षैवथुपीनसान् ।
(वा. नि. स्था. अ. १४)

कफजानाह—कफादित्यादि । कफनिमित्ताः क्रिमयो ये ह्यामाशये जायन्ते, ते च वृद्धाः सन्तः सर्वत ऊर्ध्वमधश्च सर्पन्ति; एवं पुरीषजादिषु द्रष्टव्यम् । ब्रध्नः चर्मलता, ब्रध्नीति लोके, रूढं प्ररूढम् । तनवः परिणाहेन, दीर्घा आयामेन, अणवः उभाभ्यामपि स्वल्पाः । ते इति कफजाः । सप्त नामानि विवृणोति—अन्त्रादा इत्यादि । एते च नामविशेषाः केचित्सान्वयाः केचिन्निरन्वया व्यवहारार्थं पूर्वाचार्यैः प्रणीताः; एवं वक्ष्यमाणेष्वपि बोध्यमिति ॥ ७–१० ॥—

†रक्तवाहिसिरास्थानरक्तजा जन्तवोऽणवः ॥ ११ ॥
अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः ।
केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः ।
षट् ते कुष्ठैककर्माणः सहसौरसमातरः ॥ १२ ॥
(वा. नि. स्था. अ. १४)

रक्तजानाह—रक्तेत्यादि । रक्तवाहिसिरास्थानाश्च ते रक्तजाश्चेति रक्तवाहिसिरास्थानरक्तजाः; अथवा रक्तवाहिसिरास्थानं यद्रक्तं तज्जाः । नामभेदात्ते षट्, तत्र केशादादयश्चत्वारः, सह सौरसनाम मातृनामभ्यां क्रिमिभ्यां वर्तन्त इति सहसौरसमातरः, एवं षड् भवन्ति । कुष्ठैककर्माण इति कुष्ठमेवैकं कार्यं येषां ते तथा, कुष्ठजनका

* 'कफजानां स्वरूपमाह—कफादित्यादि । आमाशये नाभेरूर्ध्वं, आकारेण पृथुब्रध्ननिभाः विस्तीर्णचर्मैकदेशाकाराः, केचित्क्रिमयो गण्डूपदोपमाः भूमिलताकाराः, केचिद्रूढधान्याङ्कुराकारास्तदाकृतयो भवन्ति, रूढं प्ररूढमङ्कुरितमिति यावत् । श्वेताः शुक्लाः, ताम्रावभासाः ताम्रवर्णाः, केचिदिति सर्वत्र संबन्धनीयम् । नामतस्तु ते कफजाः सप्तधा इति । ते कुपिता यान् रोगान् कुर्वते तानाह—हृल्लासमित्यादि । हृल्लास उपस्थितवमनत्वमिव, आस्यस्रवणं लालास्रावः, आनाह उदरे निश्चलाटोपः' (आ० द०) ॥ ७–१० ॥—

† 'रक्तजानां स्वरूपमाह—रक्तेत्यादि । रक्तजा जन्तवः क्रिमयः, रक्तवहासु सिरासु स्थानं येषां ते तथा । वृद्धाः सन्तः सर्वतः प्रसरन्तीत्यत्रापि योज्यम् । अपादाः पादरहिताः, वृत्ता वर्तुलाः, वर्णतस्ताम्राः, ते सौक्ष्म्यात् अणुरूपत्वात् केचिददृश्याः । नामतः षट्—केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः सहसौरसमातरः, एवं षड् भवन्ति । ते कुष्ठैककर्माण इति कुष्ठैकफलदा इत्यर्थः । अथवा कुष्ठेन सहैकं समानं कर्म हर्षकण्डूतोदादिकं केशश्मश्रुलोमविध्वंसादिकं त्वक्सिरास्नायुमांसतरुणास्थिभक्षणं च येषां त एवम्' (आ० द०) ॥ ११ ॥ १२ ॥

१ 'महारुजः' इति क. ख. । २ "°तृषा" इति क. ख. ३ "°श्वयथु" इति क. ख. ।

इति यावत् । उक्तं हि सुश्रुते,-"सर्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि सक्रिमीणि चोपदिश्यन्ते"-इति (सु. नि. स्था. अ. ५) ॥ ११ ॥ १२ ॥

*पक्काशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
प्रवृद्धाः स्युर्भवेयुश्च ते यदाऽऽमाशयोन्मुखाः ॥ १३ ॥
तदाऽऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः ।
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ॥ १४ ॥
ते पञ्च नाम्ना क्रिमयः ककेरुकमकेरुकाः ।
सौसुरादाः सशूलाख्या लेलिहा जनयन्ति हि ॥ १५ ॥
विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनं गुदकण्डूर्विमार्गगाः ॥ १६ ॥
(वा. नि. स्था. अ. १४)

इति श्रीमाधवकरविरचिते माधवनिदाने क्रिमिनिदानं समाप्तम् ॥ ७ ॥

पुरीषजानाह—पक्काशय इत्यादि । अधोविसर्पिण इति विसर्पणं गतिः, गुदनिःसरणशीलाः, ते यदाऽतिवृद्धाः सन्त आमाशयोन्मुखा भवेयुस्तदाऽस्य रोगिण उद्गारनिःश्वासा विड्गन्धानुविधायिनः पुरीषगन्धयुक्ता भवन्तीति योज्यम् । शेषं सुबोधम् ॥ १३-१६ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां क्रिमिनिदानं समाप्तम् ॥ ७ ॥

अथ पाण्डुरोगकामलाकुम्भकामलाहलीमकनिदानम् ।

†पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥ १ ॥
(च. चि. स्था. अ. १६)

पुरीषजाः क्रिमयः सूक्ष्माः पाण्डुतां जनयन्ति, अतः क्रिमेरनन्तरं पाण्डुरोगमाह-पाण्डुरोगा इत्यादि । पाण्डुत्वेनोपलक्षितो रोगः पाण्डुरोगः । "चरके अष्टोदरीयाध्याये "पञ्च पाण्डुरोगाः" (च. सू. स्था. अ. १९)-इत्यभिधायापि "पाण्डुरोगाः स्मृताः पञ्च" (च. चि. स्था. अ. १६)-इति यदेतत्पुनश्चरकवचनं तत् पञ्चानामपि

* 'पुरीषोत्थाः क्रिमयः पक्काशय एव जायन्ते, पुरीषस्य पक्काशयस्थितत्वात् । ते चाधोविसर्पिणः स्युर्नोर्ध्वगाः; पृथवो दीर्घाः, वृत्ता वर्तुलाः, तनवः अल्पाः, स्थूला उत्सन्नाः 'आकारेण' इति शेषः । वर्णतः श्यावाः ईषत् पीतश्वेताः, असिताः कृष्णाः । नामतः पञ्चधा ककेरुकमकेरुकाः, सौसुरादामलूनेत्याख्यानाम येषां ते तथा लेलिहाः । ते पञ्च यान् रोगान् जनयन्ति तानाह-विड्भेदेत्यादि । विड्भेदः सान्द्रमलप्रवृत्तिः, शूलं पक्काशये, विष्टम्भो मलस्य, पारुष्यं कर्कशाङ्गत्वं, अग्निसदनं वह्निग्लानिः, विमार्गगा विमार्गप्रवृत्तयः' (आ० द०) ॥ १३-१६ ॥

† 'पाण्डुत्वेनोपलक्षितो रोगः पाण्डुरोगः । स च पञ्चविधः-वातपित्तकफैस्त्रयः, सन्निपातेनैकः, मृद्भक्षणादेकः, एवं पञ्च' (आ० द०) ॥ १ ॥

---

१ 'सौसिरादा सलूनाश्च' इति ख. । २ 'मलूनाख्या' इति ग. ।

साध्यत्वं बोधयति, नतु पञ्चोन्मादेष्विव सान्निपातिकस्यासाध्यत्वम्'' इति–जेज्जटः; ''न्यूनसंख्याव्यवच्छेदार्थम्'' इति—चक्रः । ननु, सुश्रुते हि मृत्तिकाजो न पठितः; मृत्तिकाऽपि दोषप्रकोपद्वारेणैव पाण्डुरोगं जनयतीति; यदुक्तं—''कषाया मारुतं पित्तमूषरा मधुरा कफम्'' (च. चि. स्था. अ. १६)–इति; निदानभेदाच्च रोगभेदे रोगानन्त्यप्रसङ्गः, वातजस्यापि रूक्षशीताद्यनेकवातनिदानकुपितवातजन्यत्वात् । उच्यते, दोषजत्वाविशेषेऽपि विशिष्टरूपचिकित्साप्रतिपादनार्थं पृथगभिधानं, मूत्राघातवृद्धिवत्; सुश्रुतेन तु पराधिकारेषु न विस्तरोक्तिरित्यभिप्रायेण न पृथक्कृतः । चिकित्सा तु दोषचिकित्सयाऽपि भवतीति ॥ १ ॥

*[५]व्यायाममम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम् ।
निषेवमाणस्य [३]प्रदूष्य रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति ॥ २ ॥
(सु. उ. तं. अ. ४४)

[१]संप्राप्तिमाह—व्यायाममित्यादि । रक्तमित्युपलक्षणं, तेन ''त्वङ्मांसमपि'' दूष्यत्वेन दृढबलेन पठितं, हारीतेन ''रसोऽपि'' इति ॥ २ ॥

†त्वक्स्फोटनष्ठीवनगात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥ ३ ॥
(सु. उ. तं. अ. ४४)

पूर्वरूपमाह—त्वगित्यादि । त्वक्स्फोटनं त्वचः किंचिद्विदरणम् । मृद्भक्षणं मृद्भक्षणेच्छा । प्रेक्षणकूटशोथो अक्षिगोलकशोथः । अविपाक आहारस्य । पुरःसराणि पूर्वरूपाणि ॥ ३ ॥

‡त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता[४] ।
वातपाण्ड्वामये तोदकम्पानाहभ्रमादयः ॥ ४ ॥

वातिकलक्षणमाह—त्वगित्यादि । अत्र कृष्णारुणाभता न पाण्डुतामतिक्रामति, अन्यथा पाण्डुरोगत्वाभावः । उक्तं च सुश्रुते—''सर्वेषु चैतेष्विह पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोगः'' (सु. उ. तं. अ. ४४)–इति । भ्रमादय इति आदिशब्देन भेदशूलादीनां ग्रहणम् ॥ ४ ॥

---

* 'पाण्डुरोगनिदानमाह–व्यवायमित्यादि । व्यवायादीनि अतीव अतिशयेन निषेवमाणस्य पुंसो दुष्टा दोषा रक्तं विदूष्य त्वचि पाण्डुभावं कुर्वन्तीति पिण्डार्थः । रक्तमित्युपलक्षणं; ''त्वचं मांसमपि दूषयन्ति'' इति दृढबलेन पठितं, हारीतेन तथोक्तत्वात् । व्यवायः स्त्रीसेवा. अन्ये 'व्यायामं' इति पठन्ति । लवणानीति बहुवचनेन क्षाराण्यपि बोद्धव्यानि । मृदं मृत्तिकाम् । तीक्ष्णं राजिकादि' (आ० द०) ॥ २ ॥

† 'अन्ये 'त्वक्पाटनिष्ठीवनगात्रसादाः' इति पठन्ति, तत्रापि स एवार्थः । निष्ठीवनं मुखेन, 'थुगथुगीति लोके । तस्य भाविनः भवन्ति' (आ० द०) ॥ ३ ॥

‡ 'तोदः पीडाभेदः, आनाह उदराटोपः, भ्रमश्चक्रारूढस्येव' (आ० द०) ॥ ४ ॥

---

१ 'दोषचिकित्सायामन्तर्भवति' इति क. ख. । २ 'व्यवाय' इति क. ग. । ३ 'समेत्य रक्तं कुर्वन्ति दोषास्त्वचि पाण्डुभावम्' इति ग. पुस्तके पाठान्तरम् । ४ 'वर्णप्रभाः' इति ग. । ५ 'व्यवायमम्लं' इति पाठाभिप्रायेण ।

*पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्डुामयी नरः ॥ ५ ॥

पैत्तिकलक्षणमाह—पीतेत्यादि । ननु, पित्तपाण्डुामयीति न युक्तं, पाण्डुरोगस्य पित्तकार्यत्वादेव । उच्यते, इतरदोषासंश्लिष्टप्रबलपित्तजन्यत्वेन पैत्तिकाभिधानं, यथा—पैत्तिकरक्तपित्तमिति ॥ ५ ॥

†कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ ६ ॥

श्लैष्मिकलक्षणमाह—कफप्रसेकेत्यादि । कफाद्यः पाण्डुरोगी स शुक्लैस्त्वङ्मूत्रनयनाननैरुपलक्षित इति योज्यम् ॥ ६ ॥

‡ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥ ७ ॥

सान्निपातिकस्तु प्रकृतिसमसमवेतत्वेन उक्तवातजादिलक्षणैरेव बोद्धव्यः । उक्तं हि चरके—"सर्वान्नसेविनः सर्वे दुष्टा दोषास्त्रिदोषजम् । त्रिलिङ्गं संप्रकुर्वन्ति पाण्डुरोगं सुदुःसहम्" (च. चि. स्था. अ. १६)—इति । तस्यैव सोपद्रवस्यासाध्यत्वमाह—ज्वरारोचकेत्यादि । हतेन्द्रियः स्वविषयाग्राहकेन्द्रियः ॥ ७ ॥

§मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥ ८ ॥
कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तं च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥ ९ ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ १० ॥
(च. चि. स्था. अ. १६)

मृज्जसंप्राप्तिमाह—मृत्तिकेत्यादि । अन्यतमो मलो वातादिः । ऊषरा सक्षारा । रसादीन् रूक्षयेत्, भुक्तं च रूक्षयेदिति योज्यम् । रौक्ष्यात् प्राकृतिकोद्भूतरौक्ष्यगुणात् । अविपक्वैव कोष्ठधात्वग्निभिः पाकं न गत्वैव, स्रोतांसि रसवहादीनि, पूरयति रुणद्धि च । इन्द्रियाणां बलं स्वविषयग्रहणशक्तिम् । "तेजो दीप्तिः" इति जेज्जटः "ऊष्मा" इति चक्रः ।

* 'भिन्नविट्कः सद्रवमलः, अतिपीताभः अतिशयेन पीतः' (आ० द०) ॥ ५ ॥

† 'कफप्रसेकः कफस्रावः' (आ० द०) ॥ ६ ॥

‡ 'त्रिदोषजः पाण्डुरोग एतैरुपद्रवैर्युक्तस्त्याज्यः असाध्य इत्यर्थः' (आ० द०) ॥ ७ ॥

§ 'मृत्तिकाजनितपाण्डुरोगमाह—मृत्तिकेत्यादि । मृत्तिकाभक्षणशीलस्य पुरुषस्य अन्यतमो मलो दोषो वातादिः कोपं गच्छति । मृत्तिकायास्त्रिदोषप्रकोपणे हेतुं दर्शयति कषायेत्यादि ।—कषाया मृत्तिका मारुतं प्रकोपयेत्, ऊषरा सक्षारा पित्तं, मधुरा कफं, रौक्ष्याच्च रसादीन् धातून् रूक्षयेत् भुक्तं च रूक्षयेत्, तस्याः स्वभावोद्भूतरूक्षगुणत्वात् । अपक्वैवेत्यादि न कोष्ठवात्वग्निभिः पाकं गच्छति किन्त्वपक्वैव रसवाहीनि स्रोतांसि पूरयति निरुणद्धि च । बलवर्णाग्निनाशनमित्यत्र बलं शरीरे सामर्थ्यम्' (आ० द०) ॥ ८ ॥ ९ ॥ १० ॥

१ 'प्रकृतिसमवायारब्धत्वेन' इति ख. । २ 'प्रोद्भूतरौक्ष्यगुणात्' इति ख. ।

वीर्यं शक्तिः । "ओजः सर्वधातुसारभूतं हृदयस्थम्" इति पराशरः, "पराभिभवेच्छेति" जेज्जटः ॥ ८–१० ॥

*शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
क्रिमिकोष्ठोऽतिसार्येत मलं सासृक्कफान्वितम् ॥ ११ ॥
(च. चि. स्था. अ. १६)

मृज्जस्य लक्षणमाह—शूनेत्यादि । "सर्वपाण्डुरोगेषु क्रिमिकोष्ठता यदा स्यात्तदेतल्लक्षणम्" इति जेज्जटः, मृत्तिकाजानन्तरपठितत्वेन तस्यैव लक्षणमित्यन्ये । विदेहे—तु पठ्यते,—"मृद्भक्षणाद्भवेत् पाण्डुस्तन्द्रालस्यनिपीडितः । सश्वासकासशोषार्शःसादारुचिसमन्वितः ॥ शूनपादाननकरः कृशाङ्गः कृशपावकः"—इति ॥ ११ ॥

†पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां[१] यो वा पीतानि पश्यति ॥ १२ ॥
बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्दिमूर्च्छातृडर्दितः ॥ १३ ॥
स नास्त्यसृक्क्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ।
(च. चि. स्था. अ. १६)

पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥ १४ ॥
(सु. सू. स्था. अ. ३३)

अन्तेषु शूनं परिहीणमध्यं म्लानं तथाऽन्तेषु च मध्यशूनम् ।
गुदे च शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पम् ।
विवर्जयेत्पाण्डुकिनं यशोऽर्थी तथाऽतिसारज्वरपीडितं च ॥ १५ ॥
(सु. उ. तं. अ. ४४)

असाध्यलक्षणमाह—पाण्डुरोग इत्यादि पाण्डुरोगश्चिरोत्पन्नः कालप्रकर्षात् खरीभूतो जठरतां गतो न सिध्यति, अचिरोत्पन्नोऽपि शूनानां मध्ये यो वा पीतानि पश्यति स पाण्डुरोगी न सिध्यतीत्यपरमसाध्यलक्षणमिति जेज्जटस्य योजना । चक्रस्त्वाह[२],—"चिरोत्पन्नः खरीभूतोऽत्यर्थरूक्षितसर्वधातुर्न सिध्यति, तथा कालप्रकर्षादित्यादिनाऽपरमसाध्यलक्षणम्"—इति । अत्र शूनानां शोथवतां मध्ये यो वा पीतानि

* 'मृज्जनितस्योपद्रवमाह—शूनेत्यादि । अक्षिकूटोऽक्षिगोलकः, गण्डः कपोलः, एतेषु श्वयथुः । तथा शूनपान्नाभिमेहनः शूनश्चरणौ नाभिर्मेहनं च यस्य स तथा । तथा च क्रिमिकोष्ठः पुरुषः, सरुधिरं सकफं च पुरीषमतिसार्येत । इति' (आ॰ द॰) ॥ ११ ॥

† 'हरितं हरितशाकवर्णम् । अत्रैवापरमप्यसाध्यलक्षणमाह—असृक्क्षयाद्यः पाण्डुरोगी श्वेतत्वमाप्नुयात्सोऽप्यसाध्यः । नयनरश्मिसदृचरितं वहिर्निर्गतं पित्तं तद्योगादखिलमपि वस्तु पीतवर्णपिण्डितं पश्यति । मध्यदेहः शूनः श्वयथुयुक्तो यस्य स तादृशस्तम् । अपरमसाध्यलक्षणमाह—गुदे शेफसि मुष्कयोश्च शूनं शोथयुक्तं, प्रताम्यन्तं मोहमुपगच्छन्तं मूर्च्छन्तमित्यर्थः' (आ॰ द॰) ॥ १२–१५ ॥

१ "च्छूनाङ्गो' इति ग. । २ 'चक्रस्त्वन्यथाह' इति ख. ।

पश्यति स न सिध्यतीति । 'शूनो ना' इति पाठान्तरे ना पुरुषः । 'शूनाङ्गो यो वा पीतानि पश्यति' इति पाठान्तरं सुगमम् । अपरमसाध्यलक्षणमाह—बद्धेत्यादि । अत्र सकफत्वेऽपि बद्धाल्पलहरितत्वानि व्याधिप्रभावात्, बद्धाल्पस्थाने बहुलमिति पाठान्तरम् । विदशब्दो नपुंसकोऽप्यस्तीत्येतन्निर्देशादेवोन्नेयमित्याहुः । अपरमसाध्यलक्षणमाह—दीन इत्यादि । दीनः ग्लानः । श्वेतातिदिग्धाङ्ग इति श्वेतवर्णलिप्ताङ्ग इवेत्यर्थः । स नास्ति नष्ट इव असाध्य इत्यर्थः । अपरमाह—असृगित्यादि । अपरमसाध्यलक्षणमाह—पाण्डुदन्तेत्यादि । पाण्डुसंघातदर्शी नयनरश्मिसहचरितं बहिर्निर्गतं पित्तं संपिण्डितं पश्यति । अपरमसाध्यलक्षणमाह—अन्तेष्वित्यादि ।—अन्तेषु बाहुजङ्घाशिरःसु, शूनं शोथयुक्तम् । परिहीणमध्यं दुर्बलमध्यदेहम् । एतद्वैपरीत्येनापरमसाध्यलक्षणमाह—म्लानमित्यादि । म्लानं दुर्बलम् । असंज्ञकल्पं मृतप्रायम् । एवंविधं पाण्डुकिनं पाण्डुरोगिणं यशोर्थी वैद्यो विवर्जयेदिति । अत्र **सौश्रुत**श्लोके "पाण्डुकिनम्" इत्यत्र "पालकिनम्" इति पाठान्तरं, युक्तं चैतत्; एवं हि पठ्यमाने पाण्डुरोगावस्थाविशेषस्य पालकिनो लक्षणमपि कृतं स्यात् । उक्तं हि **सुश्रुते**—"सकामलापालकिपाण्डुरोगः कुम्भाह्वयो लाँघवकोऽलसाख्यः" (सु. उ. तं. अ. ४४)—इति । अनेनैवाभिप्रायेण कश्चिदभियुक्तो लिखितवान्, "अन्ते शूनः कृशो मध्येऽन्यथा च गुदशेफसि । शूनो ज्वरातिसारार्तो मृतकल्पस्तु पालकी"—इति ॥ १२–१५ ॥

***पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।**
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥ १६ ॥
हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः ।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥ १७ ॥
दाहाविपाकदौर्बल्यसदनारुचिकर्षितः ।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ॥ १८ ॥

(च. चि. स्था. अ. १६)

पाण्डुरोगावस्थायां कामलामाह—पाण्डुरोगीत्यादि । दग्ध्वा संदूष्य । रोगाय कामलारूपाय । भेकवर्णः प्रावृषेण्यभेकवर्णः । कोष्ठशाखाश्रयेति एका कोष्ठाश्रयाः, अपरा शाखाश्रयाः, शाखा रक्तादयो धातवः । स्वतन्त्राऽपि कामला भवति, यथा राजयक्ष्मा स्वतन्त्र उपेक्षितेष्वपि कासेषु भवतीत्याहुः ॥ १६–१८ ॥

†कालान्तरात् खरीभूता कृच्छ्रा स्यात्कुम्भकामला ।

(च. चि. स्था. अ. १६)

---

* 'यः पाण्डुरोगी पित्तजनकानि अत्यर्थं सेवते तस्य रोगिणः पित्तं दोषः असृङ्मांसं दग्ध्वा संदूष्य रोगाय कल्पते कामलारूपाय जायते । तस्य च रक्तं पीतं शकृन्मूत्रं, 'रक्तपीतशकृन्नेत्रे' इति वा पाठः । हतेन्द्रियः हतेन्द्रियशक्तिः । एतैश्चोपद्रवैर्दाहादिभिः कर्षितः पीडितः, अविपाक आहारस्य, सदनम् अङ्गग्लानिः । बहुपित्ता एषा कामला । उपेक्षितः पाण्डुरोगः कामलायै भवति' (आ० द०) ॥ १६–१८ ॥

† 'कालान्तरात् खरीभूता कठिनतां गता, (आ० द०) ॥—

---

१ 'पातकिनं' क. 'पाकलिनं' इति ख. । २ 'पाण्डुरकः" इति ख. । ३ "नेत्रो' इति ग. ।

तस्या अवस्थान्तरं कुम्भकामलामाह—कालान्तरादित्यादि । खरीभूतेति पूर्ववद्व्याख्येयम् । कृच्छ्रा च कृच्छ्रसाध्या । कुम्भः कोष्ठः, अन्तःशुषिरसाधर्म्यात्; तद्गता कामला कुम्भकामला, कोष्ठाश्रयेत्यर्थः ॥—

*कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ॥ १९ ॥
सरक्ताक्षिमुखच्छर्दिविण्मूत्रो यश्च ताम्यति ।
दाहारुचितृडानाहतन्द्रामोहसमन्वितः ॥ २० ॥
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते ।
(च. चि. स्था. अ. १६)

कामलाया असाध्यलक्षणमाह—कृष्णेत्यादि । कृष्णेत्यादिना ताम्यतीत्यन्तेनैकमसाध्यलक्षणम् । ताम्यति मुह्यति । दाहेत्यादिना विपद्यत इत्यन्तेनापरमसाध्यलक्षणमिति जेज्जटः ॥ १९ ॥ २० ॥—

†छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः ॥ २१ ॥
नश्यति श्वासकासार्तो विड्भेदी कुम्भकामली ।

कुम्भकामलिनोऽसाध्यलक्षणमाह—छर्द्यादि ॥ २१ ॥—

‡यदा तु पाण्डोर्वर्णः स्याद्धरितः श्यावपीतकः ॥ २२ ॥
बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ।
स्त्रीष्वहर्षोऽङ्गमर्दश्च दाहस्तृष्णाऽरुचिर्भ्रमः ।
हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥ २३ ॥
(सन्तापो भिन्नवर्चस्त्वंबहिरन्तश्च पीतता ।
पाण्डुता नेत्रयोर्यस्यपानकीलक्षणं भवेत् ॥)
(च. चि. स्था. अ. १६)

इति श्रीमाधवकरविरचिते माधवनिदाने पाण्डुरोगकामलाकुम्भकामला-
हलीमकनिदानं समाप्तम् ॥ ८ ॥

पाण्डुरोगावस्थायां हलीमकमाह—यदेत्यादि । यदा तु पाण्डोः पाण्डुरोगिणः हरितादिवर्णयुक्तस्यैते उपद्रवा भवन्ति तदा तस्य वातपित्तकोपजं हलीमकं जानीयात् । हरितः शाकवर्णः । श्यावो नीलवर्णः । बलोत्साहक्षयो बलोत्साहयोःक्षीणता स्त्रीष्वहर्षः स्त्रीरिरंसाया अभावः । अङ्गमर्दोऽङ्गमोटनम् । लाघवकालसकादीनां पाण्डुरोगावस्थाविशेषाणां लक्षणं सुश्रुतादिष्वनुसर्तव्यमिति ॥ २२ ॥ २३ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां पाण्डुरोगकामलाकुम्भकामला-
हलीमकनिदानं समाप्तम् ॥ ८ ॥

---

* 'छर्दिरिति छर्दिरपि रक्ता । नष्टोऽग्निः संज्ञा चेतना च यस्य स तथा' (आ० द०) ॥ १९ ॥ २० ॥—

† 'क्लम । आयासेन विनैव श्रमः विड्भेदः सद्रवमलप्रवृत्तिः । एतैरुपद्रवैः कुम्भकामली त्याज्यः' (आ० द०) ॥ २१ ॥—

‡ 'बलोत्साहक्षय इति बलोत्साहयोर्नाशः ।' (आ० द०) ॥ २२ ॥ २३ ॥

---

१ ' 'नेत्रो'इति ग. । २ क. सम्मतः पाठः ।

अथ रक्तपित्तनिदानम्।

*घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥ १ ॥
"पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम्।
ततः प्रवर्तते रक्तमूर्ध्वं चाधो द्विधाऽपि वा ॥ २ ॥"
(सु. उ. तं. अ. ४५)

ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः।
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्तते ॥ ३ ॥

पाण्डुरोगवद्रक्तपित्तस्यापि पित्तजन्यत्वात्तदनन्तरं रक्तपित्तनिदानमाह—घर्मेत्यादि। घर्मं आतपः। तीक्ष्णं तीक्ष्णवीर्यं मरिचादि, उष्णोऽग्नितापः, क्षारो यवक्षारादिः, घण्टापाटल्यादिकृतश्च; विदग्धं कुपितम्। स्वगुणैरिति 'पित्तं तीक्ष्णं द्रवं पूति' इत्यादिभिः, विदहति कोपयति स्वगुणैरेव, 'विदाहश्चास्य पित्तवत्' (सु. सू. स्था. अ. २१) इत्युक्तेः। ततः प्रवर्तते निःसरति, पित्तं रक्तं च धातुरूपं; ननु केवलं रक्तं, रक्तपित्तमिति व्यपदेशानुपपत्तेः। अथ पित्तेन दुष्टं रक्तं रक्तपित्तमित्युच्यते, तदा पित्तरक्तमिति व्यपदेशः प्रसज्येत, एतेन "रक्तं च पित्तं चेति द्वन्द्वसमासान्निरुक्तिरुक्ता"—सुश्रुतेन। ननु, चरके—"रागपरिप्राप्तं पित्तं रक्तपित्तम्" इत्युक्तं, तेन रक्तं च तत् पित्तं चेति कर्मधारयसमासेन निरुक्तिरुक्ता। अत्र च कारणत्रयमुक्तं। यदाह—"संयोगाद्दूषणात्तत्तु सामान्याद्गन्धवर्णयोः। रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः" (च. चि. स्था. अ. ४)—इति, तत्कथं न विरोधः? नैवं, अत्रापि रक्तप्रवृत्तेः, दुष्टं हि रक्तं पित्ते रागमादधत्तत्संसर्गि रक्तं स्वयमपि प्रवर्तत इति पूर्व एवार्थः। तेन रक्तं च पित्तं चेति रक्तपित्तं, रक्तं च तत् पित्तं चेत्युभयथाऽपि निरुक्तावदोषः ॥ १–३ ॥

†सदनं शीतकामित्वं कण्ठधूमायनं वमिः।
लोहगन्धिश्च निःश्वासो भवत्यस्मिन् भविष्यति ॥ ४ ॥
(सु. उ. तं अ. ४५)

* 'एतैः स्वकारणगुणैर्विदग्धं दुष्टं पित्तं शोणितं विदहति कोपयति। अध्वा पन्थाः। व्यवायो मैथुनं उष्णः अग्नितापोऽथवोष्णगुणद्रव्यं, क्षारो यवक्षारादिरपामार्गादिकृतश्च। ततो रक्तं प्रवर्तते ऊर्ध्वमधो वा, द्विधा वा, एककालमूर्ध्वाधो वा, "रक्तं च पित्तं" चेति द्वन्द्वसमासान्निरुक्तिः सुश्रुतेनोक्ता। चरके तु,—"रागपरिप्राप्तं पित्तं रक्तपित्तम्" उच्यते। तत्र रक्तं च तत्पित्तं चेति कर्मधारयसमासः। यदुक्तं चरकेण कारणत्रयं–संयोगादित्यादि। इत्युभयत्रापि न कश्चिद्दोषः। केषु मार्गेषु प्रवर्तते तानाह–ऊर्ध्वमित्यादि, कुपितं तत्पित्तं नासादिभिरूर्ध्वं. मेढ्रादिभिरधः, अतिकुपितं मार्गद्वयैरूर्ध्वाधोभिः समस्तरोमच्छिद्रैश्च' (आ० द०) ॥१–३॥

† 'पूर्वरूपमाह–सदनमित्यादि। सदनम् अङ्गानां, शीतकामित्वं शीतेऽभिलाषः, लोहगन्धिः ध्मायमानलोहस्येव श्वासे गन्धः' (आ० द०) ॥ ४ ॥

---

१ 'च० चि० स्था० चतुर्थेऽध्याये हृदयतेऽस्य पद्यस्य भावार्थबोधकानित्रीणि पद्यानि १५–१६–१७ संख्याकानि'। २ 'रक्तपित्तप्रवृत्तेः' इति. क। ३ 'धूमायितं' इति अ.

पूर्वरूपमाह—सदनमित्यादि । कण्ठधूमायनं कण्ठाद्धूमनिर्गम इव प्रतीतिः ॥ ४ ॥

सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफान्वितम् ।

(च. चि. स्था. अ. ४)

श्लैष्मिकमाह—सान्द्रमित्यादि । सान्द्रं घनं, सपाण्डु सस्नेहमिति ईषत्पाण्डुस्नेहम्—

श्यावारुणं सफेनं च तनु रूक्षं च वातिकम् ॥ ५ ॥

(च. चि. स्था. अ. ४)

वातिकमाह—श्यावेत्यादि । तनु अघनम् ॥ ५ ॥

***रक्तपित्तं कषायाभं कृष्णं गोमूत्रसंनिभम् ।**

(च. नि. अ. ४)

मेचकागारधूमाभमञ्जनाभं च पैत्तिकम् ॥ ६ ॥

(च. चि. अ. ४)

संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ।

(च. चि. स्था. अ. ४)

पैत्तिकमाह—रक्तेत्यादि । कषायाभं वटादिक्काथवर्णम् । मेचकागारधूमाभमिति मेचकागारधूमयोरिवाभा यस्य तत्तथा; मेचकाभम्, अगारधूमाभं च । मसृणीकृतकृष्णमणिवर्णस्येव वर्णो मेचक इति जेज्जटादयः प्राहुः, चिक्कणकृष्ण इत्यर्थः । अञ्जनाभं सौवीराञ्जनवर्णाभम् । ननु, सर्वमेव रक्तपित्तं दुष्टेन पित्तेनारभ्यते तत्कथं पैत्तिकं रक्तपित्तमिति ? उच्यते–सत्यं, किंतु यदा स्वस्थानस्थं पित्तं रक्तपित्तारम्भकं स्थानान्तरावस्थितेन पित्तेन संगृह्यते, किंवा दोषान्तरासंश्लिष्टं केवलं पित्तमारम्भकं तदा पैत्तिकमिति व्यपदेश इति । ननु, केवलपैत्तिकं न संभवत्येव, यद्वक्ष्यति,—"ऊर्ध्वगं कफसंसृष्टमधोगं पवनानुगम्"—इति; नच तस्य निर्दिष्टो मार्गः । उच्यते, यदा स्वकारणोद्भूतेन कफेन वातेन वा स्वलक्षणकारिणा संसृष्टं भवति, तदा श्लैष्मिकादिव्यपदेशः ननु मार्गसंबन्धानुगतेन कफवातसंबन्धेन । ऊर्ध्वगं हि मार्गसंबन्धमहिम्नाऽवश्यं कफेन, अधोगं चावश्यं वातेन, अनुबध्यते । न च तत्र कफवातौ स्वलक्षणं कुरुतः, यथा शरदि ज्वरकरं पित्तं कालमहिम्नाऽनुगतेन कफेनानुबध्यते तथाऽपि पैत्तिक एवासौ प्राकृतो ज्वरः । यदुक्तं,—"कुर्यात्पित्तं च शरदि तस्य चानुबलः कफः" (च. चि. स्था. अ. ३)—इति । तेन यदैकदोषलिङ्गयुक्तं भवति तदैकदोषानुगं, एवं द्विदोषलिङ्गं त्रिदोषलिङ्गं च बोध्यम् । तेनोर्ध्वगमधोगं चैकद्वित्रिलिङ्गं भवति । एतेन पैत्तिकस्य मार्गो न दर्शित इति यदुक्तं तन्निरस्तमिति ॥ ६ ॥—

---

* 'मेचकाभं कृष्णराजिरञ्जितमणिमसृणीकृतकृष्णवस्त्रवर्ण इव वर्णो मेचक इति जेज्जटादयः, चिक्कणकृष्ण इत्यर्थः । संसर्गसंनिपातजानि रक्तपित्तान्याह–संसृष्टेत्यादि । यदा द्विदोषलिङ्गैरुपलक्षितं भवति तदा द्विदोषजं, यदा च त्रिदोषलिङ्गैः संसृष्टं मिलितं भवति तदा सान्निपातिकम्' (आ० द०) ॥ ६ ॥

---

१ 'ससारमल्लमणिकादिमसृणीकृतकृष्णवर्णवस्त्रस्येव' इति क. ।

*ऊर्ध्वगं कफसंसृष्टमधोगं पवनानुगम्।

(च. चि. अ. ४)

द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्तते ॥ ७ ॥

(च. चि. स्था. अ. ४)

संसर्गविशेषेण मार्गभेदमाह—ऊर्ध्वगमित्यादि ॥ ७ ॥

(सु. उ. अ. ४५)

†ऊर्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम्।

(सु. उ. तं अ. ४५)

मार्गभेदेन साध्यत्वादिकमाह—ऊर्ध्वमित्यादि। ऊर्ध्वं साध्यमिति, ऊर्ध्वगस्य कफपित्तसंश्लिष्टत्वेन कषायतिक्तौ रसौ कफपित्तहरौ योग्यौ, पित्तहरणे प्रधानं विरेचनं च योग्यम्। अधोगे त्वेक एव मधुरो वातपित्तप्रशमनः, वमनं च प्रतिमार्गत्वेन वेगमात्रविरोधि, न तु पित्तहरणम्। उभयमार्गं च विरुद्धोपक्रमत्वादेवासाध्यम्। यदुक्तं चरके,—"साध्यं लोहितपित्तं तद्यदूर्ध्वं प्रतिपद्यते। विरेचनस्य योग्यत्वाद्बहुत्वाद्भेषजस्य च ॥ विरेचनं हि पित्तस्य जयाय परमौषधम्" (च. नि. स्था. अ. २)—इत्यादि ॥—

‡एकमार्गं बलवतो नातिवेगं नवोत्थितम् ॥ ८ ॥
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम्।

(च. चि. स्था. अ. ४)

साध्यत्वे हेतुमाह—एकमार्गमित्यादि। एकमार्गमत्रोर्ध्वगमभिप्रेतम्, अधोगस्य याप्यत्वात्। नवोत्थितम् अचिरजम्। सुखे काले हेमन्तशिशिरयोः। निरुपद्रवं वक्ष्यमाणदौर्बल्याद्युपद्रवरहितम् ॥ ८ ॥—

¶एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ॥ ९ ॥
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत्।
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥ १० ॥

(च. चि. स्था. अ. ४)

---

* 'दोषमिलितत्वेन मार्गमाह—ऊर्ध्वगमित्यादि। यदा कफानुगतं रक्तपित्तं भवेत्तदोर्ध्वमार्गेषु प्रवर्तते, यदि च वातानुगं तदाऽधोमार्गेषु, यदि तूभाभ्यां कफवाताभ्यां संसृष्टं भवति तदा मार्गद्वयेषु प्रवर्तते। एतेन पैत्तिकस्य मार्गो न दर्शितः, रोगस्य रक्तपित्तप्राधान्यतयैव' (आ० द०) ॥ ७ ॥

† 'मार्गप्रवृत्त्या तस्य साध्यासाध्यत्वमाह—ऊर्ध्वमित्यादि। युगपद्गतमेककालं मार्गद्वये प्रवृत्तम्' (आ० द०)—

‡ 'एकमार्गमिति ऊर्ध्वमार्गप्रवृत्तं, बलयुक्तस्य पुंसः, नातिवेगं मन्दवेगं' (आ० द०) ॥ ८ ॥

¶ 'पुनरपि दोषानुसंसृष्टत्वेन साध्यासाध्यत्वमाह—एकदोषानुगमित्यादि। याप्यमप्रतिक्रियं त्रयो दोषाः प्रकोपहेतवो यस्य तत्त्रिदोषं रक्तपित्तमिति।' (आ० द०) ॥ ९ ॥ १० ॥

---

१ '°वेगितम्' इति क.।

दोषभेदेन साध्यत्वादिकमाह—एकदोषानुगमित्यादि । मार्गभेददोषभेदाभ्यां साध्यत्वासाध्यत्वविरोधेऽर्थःस्वभिहितदोषभेदवलिभेदाभ्यां साध्यत्वासाध्यत्वव्याख्येयम् । मन्दाग्निस्तथा व्याधिभिः क्षीणदेहस्य यदतिवेगवत्तदसाध्यम् । अनश्नतः अरुच्यादिना, अन्नाभावाद्वा ॥ ९ ॥ १० ॥

*दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा,
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा ।
तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं,
भक्तद्वेषाविपाकौ विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥ ११ ॥
(सु. उ. तं. अ. ४५)

उपद्रवानाह—दौर्बल्येत्यादि । दौर्बल्यं 'शक्त्युपचययोरभाव' इति—गयदासः । भुक्ते इति 'षष्ठ्यर्थे सप्तमी' इति कार्तिकः । हृद्यतुल्येति, हृदि अतुल्या असदृशी पीडा । कोष्ठस्य भेदः । तपनं तापः । 'प्रविततशिरस' इति पाठान्तरे प्रविततं विस्तीर्यमाणमिव; 'प्रवितता विस्तीर्णा वेदना शिरसि यस्य स तथा' इति ।—कार्तिकः । 'प्रविततसिरता' इति पाठान्तरे सिराव्याप्तगात्रता । अविपाक आहारस्य । विकृतिरपि भवेद्रक्तपित्तोपसर्गा इति, एते रक्तपित्तस्य उपसर्गा उपद्रवाः; तथा तस्य विकृतिरपि भवेदिति योज्यम् । सा च वक्ष्यमाणमांसप्रक्षालनाभमित्यादिरूपा । 'रक्तपित्तोपसर्गात्' इति पाठान्तरं सुगमम् ॥ ११ ॥

†मांसप्रक्षालनाभं कुथितमिव च यत्कर्दमाम्भोनिभं वा,
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् ।
यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारा-
स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥१२॥
(सु. उ. तं. अ. ४५)

येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥ १३ ॥
(च. नि. अ. २)

---

* 'वमथुः छर्दिः, मदः धत्तूरादिफलभक्षणवत् । आ समन्ततः पाण्डुता । दाहः सर्वाङ्गगतः । मूर्च्छा चेतनाच्युतिः । भुक्ते घोरो विदाह इति भुक्तस्याहारस्य दारुणो विदाहः, पूतिनिष्ठीवनत्वं पित्तमयोद्गिरणं' (आ० द०) ॥ ११ ॥

† 'तस्य विकृतिरूपत्वेनासाध्यत्वमाह-मांसेत्यादि । भृशमिति अत्यर्थम्; नीलम् । अतिकुणपं शवगन्धि । यत्र चोक्ता विकाराः श्वासकासादय उपद्रवाः; 'भवन्ति' इति शेषः । एभिः पूर्वोक्तैरुपद्रवैर्युक्तं विकृतैर्वर्णैश्च रक्तपित्तं त्याज्यम् । असाध्यलक्षणान्तरमाह-येनेत्यादि । येन रक्तपित्तेनोपहतो मनुष्यो दृश्यं घटपटादिकं वियच्चादृश्यं पश्यति स नश्यति । अन्ये 'पश्येद्रक्तं वियच्चापि' इति पठन्ति ।' लक्षणान्तरमाह-लोहितमित्यादि । यो बहुशो रक्तं छर्दयेत्, रक्तनयनश्च' (आ० द०) ॥ १२-१४ ॥

लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्षणः ।
लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः ॥ १४ ॥
(सु. सू. अ. ३३)

इति श्रीमाधवकरविरचिते माधवनिदाने रक्तपित्तनिदानं समाप्तम् ॥ ९ ॥

असाध्यलक्षणमाह—मांसेत्यादि । कुथितमिव पूतितां गतमिव । कर्दमम् आविलमिवाम्भः कर्दमाम्भः, अथवा कर्दमनिभमम्भोनिभं च । तथा मेदःपूयास्रकल्पमिति "कल्पशब्दो मेदःप्रभृतिभिस्त्रिभिः संबध्यत" इति गयदासः । यकृदिव यकृत्खण्डमिव । पक्कजम्बूफलाभं स्निग्धकृष्णम् । कृष्णम् अञ्जनाभम् । नीलं चापपक्षप्रतिमम् । ननु, पैत्तिके कृष्णत्वं पठितं नच तदसाध्यं ? नैवं, अतिशब्देनात्र विशेषितत्वात्, "तेन तत्र मनाक्कृष्णत्वं बोध्यम्" इति जेज्जटः; अथवा जम्बूफलाभं यत् कृष्णं तदिति योज्यम् । उक्ता विकाराः श्वासकासादयः । सुरपतिधनुषा तुल्यं नानावर्णम् । येनेत्यादि । येन रक्तपित्तेनेति योज्यम् । पश्येद्दृश्यं वियच्चापि अदृश्यमपि वियद्दृश्यमिव पश्यतीति योज्यं रक्तपित्तोपहतनेत्रत्वादिति; अथवा दृश्यं घटपटादि, वियच रक्तं पश्यतीति । अपरमसाध्यलक्षणमाह—लोहितमित्यादि । यो बहुशश्छर्दयेदिति संबन्धः ।, लोहितोद्गारदर्शीति लोहितोद्गारो लोहितदर्शी च, उद्गारोऽपि लोहितः प्रवर्तत इत्यर्थः, अथवा लोहितमुद्गारं पश्यतीति लोहितोद्गारदर्शीति ॥ १२—१४ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां रक्तपित्तनिदानं समाप्तम् ॥ ९ ॥

अथ राजयक्ष्मक्षतक्षीणनिदानम् ।

***वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।**
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥ १ ॥

राजयक्ष्मरूपेषु पित्ताद्रक्तस्य चागम इति वचनाद्रक्तपित्तानन्तरं यक्ष्मनिदानम् चिकित्सोपयोगिविप्रकृष्टकारणं चतुर्विधमाह—वेगरोधादित्यादि । वेगोऽत्र वातमूत्रपुरीषाणां, न तु न वेगान्धारणीयोक्तानां जृम्भादीनां सर्वेषाम् । यदुक्तं **चरके,**—"ह्रीमत्त्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् । वातमूत्रपुरीषाणां निगृह्णाति यदा नरः" (च. चि. स्था. अ. ८)—इत्यादि । क्षयादिति क्षीयते अनेनेति क्षयः, तेनातिव्यवायानशनेर्ष्याविषादादयो धातुक्षयहेतवो गृह्यन्ते । साहसादिति, साहसं बल-

* 'क्षयो धातुक्षयः । स च व्यवायानशनात्युत्कण्ठोपवासादिभिरनेककारणैर्जायते । विषमाशनादिति "बहुस्तोकमकाले वा ज्ञेयं[3] तद्विषमाशनम्"—इति । तन्त्रान्तरेऽपि कारणचतुष्टयमुक्तम्—"अयथाबलमारम्भो वेगसंधारणं क्षयः । यक्ष्मणः कारणं विद्याच्चतुर्थं विषमाशनम्" इति' (आ० द०) ॥ १ ॥

१ 'गदाधरः' इति क. । २ 'रक्तं पश्यति' इति क. । ३ 'तज्ज्ञेयं विषमाशनम्' इति पाठान्तरम् ।

वह्निग्रहादिरुरःक्षतहेतुत्वेन कारणम् । विषमाशनादिति, सुश्रुतोक्तद्वादशाशनप्रविचारव्यतिरेकेणोपयोगः, तस्य शीघ्रं स्रोतोरोधकत्वात् । उक्तं हि चरके,—"विविधान्यन्नपानानि वैषम्येण समश्नताम् । जनयन्त्यामयान् घोरान् विषमा मारुतादयः ॥ रुद्ध्वा स्रोतांसि धातूनां वैषम्याद्विषमं गताः । दोषा रोगाय कल्पन्ते पुष्यन्ति नच धातवः" (च. चि. स्था. अ. ८) इति । त्रिदोष, इति मिलितत्रिदोषज एक एव, नतु कारणभेदादनेकः । यदाह सुश्रुतः,—"एक एव मतः शोषः संनिपातात्मको यतः । उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि" (सु. उ. तं. अ. ४१)–इति । ननु, वेगरोधादयो वातं प्रकोपयन्ति, तज्जनितो यक्ष्मा कथं त्रिदोषज इति चेत् ? उच्यते, वातप्रकोपादेवाग्निदुष्ट्या कफपित्तयोरपि प्रकोप इत्याहुः । हेतुचतुष्टयादित्यनेनासंख्येया अपि हेतव उक्तचतुष्टयेऽन्तर्भवन्तीति दर्शयति । शोषादिनानाशब्दवाच्यत्वेन चास्य सुश्रुतोऽन्वयमकार्षीत्[1] । यथा,—"संशोषणाद्रसादीनां शोष इत्यभिधीयते । क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः ॥ राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः । तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः" (सु. उ. तं. अ. ४१)–इति । वाग्भटे तु—"यक्ष्मणां राजा राजयक्ष्मा"—इत्युक्तम्[2] । "राजदन्तादिषु परम्"—इति उपसर्जनस्य यक्ष्मशब्दस्य परनिपातः ॥ १ ॥

*कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तराः ।
क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥ २ ॥

न केवलं धातुक्षयमात्रादेव यक्ष्मा भवति, अपि तु रसादिवहस्रोतोनिवहनिरोधादिभिरपीति[3] दर्शयितुं विशिष्टां संप्राप्तिमाह—कफेत्यादि । यदा त्वेवं न स्यात्, तदा धातुक्षय एव रोगो नतु यक्ष्मा । कफः प्रधानं येषामनिलादीनां दोषाणां ते तथा । ननु, दोषैरित्यनेन[4] दोषत्रयमुच्यते, कफस्य विशेषणत्वेनोपात्तत्वात्, कथं तस्यैवान्यपदार्थवाच्यता ? उच्यते, स्वावयवेन विग्रहः, समुदायः समासार्थः, यथा—बहुवृक्षं वनमिति; समाधानविस्तरस्तु सुश्रुते जेज्जटे द्रष्टव्यः । कफप्रधानता च वेगरोधादिकु-

* 'ननु दोषैरिति बहुत्वेन दोषत्रयमुच्यते, तत्कथं कफस्य प्रधानता, उच्यते–तस्य प्रधानता वेगरोधादिक्षुभितवातविप्लुताग्निमान्द्यादिना बोद्धव्या । अथेदमत्र सूचितं–यन्मार्गावरोधाद्धृदयस्थो रसो विदह्यते, स तत्रैवावस्थितो विकृतिबहुलपिच्छिलविस्रहरितपीतश्वेतः कासवेगेन मुखमार्गेण निःसरति । अतिव्यवायिनोऽत्यर्थं ग्राम्यधर्मसेविनः । ननु, रसवर्त्मरोधाद्रसो न रक्तस्य बृंहणायालं रक्तापचयान्मांसस्यापचय इत्यादिपूर्वपूर्वधातुक्षीणतया शुक्रक्षयो युक्तः कार्यभूतशुक्रक्षये पूर्वधातूनां कथं क्षयः ? उच्यते, शुक्रक्षयाद्वायुः कुप्यति; स वायुः सान्निध्यान्मज्जानं शोषयति एवं पूर्वपूर्वधातून् । दृष्टं च प्रत्यासन्नतया कार्यजनकत्वं यथा महाजलाधारपरिक्षये तत्र प्रविशतां जलाशयानां परिक्षयः' (आ० द०) ॥ २ ॥

१ 'संज्ञां स्वयमेवाकार्षीत् सुश्रुतः' इति पा० । २ वाग्भटे तु "नक्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा । यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः" इति पठ्यते (वा. नि. स्था. अ. ५) । ३ 'बहुस्रोतोरोधादिभिः' इति क. । ४ 'दोषैरिति बहुत्वेन' (आ० द०) ।

पित्तवातविकृताग्निमान्द्यादिना बोद्धव्या । रसवर्त्मसु रसवहधमनीषु, अत्रादिशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः । तेन रक्तादिवहस्रोतोरोधोऽपि बोध्यः । अथवा रसकारणतया रक्तादीनां रसदुष्ट्यैव रक्तादिदुष्टिरिति कार्त्तिकः । इदमत्र सूचितं,—यन्मार्गरोधाद्धृदयस्थो रसस्तत्रैवावस्थितो विकृतो मुखेन निःसरति । यदाह चरकः—"रसः स्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते । स ऊर्ध्वं कासवेगेन बहुरूपः प्रवर्त्तते" (च. चि. स्था. अ. ८)—इति । एतेनानुलोमक्षयो दर्शितः, कारणभूतरसधातुक्षये सति रक्तादीनां रसकार्याणां पोषकाभावेन क्षीयमाणत्वात् । प्रतिलोमक्षयं दर्शयितुमाह—अतिव्यवायिनो वेत्यादि; रेतसि क्षीणे सत्यनन्तराः समीपगा धातवः क्षीयन्ते, तद्यथा–शुक्रे क्षीणे मज्जा क्षीयते, मज्जनि क्षीणेऽस्थि, एवं पूर्वं पूर्वम् । ननु, कार्यभूतस्य शुक्रस्य क्षयात् कथं कारणभूतानां धातूनां क्षय इति चेत् ? उच्यते, शुक्रक्षयाद्वायुः प्रकुप्यति । यदुक्तं,–"वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन च" (च. चि. स्था. अ. २८)–इति । स वायुः सान्निध्यान्मज्जानं शोषयति, एवं पूर्वपूर्वधातून् । दृष्टं च प्रत्यासत्त्याऽपि कार्यजननं, यथा—अग्निसन्तप्तायोगोलकसन्निधानादार्द्रभूभागस्यापि शोषः । तथाच रससंचारपक्षे सुश्रुतवचनं,—"पूर्वः पूर्वोऽतिवृद्धत्वाद्वर्धयेद्धि परं परम् । तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम्" (सु. सू. स्था. अ. १५)–इति ॥ २ ॥

*श्वासाङ्गमर्दकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥ ३ ॥
(सु. उ. अ. ४१)

स्वप्नेषु काकशुकशल्लकिनीलकण्ठा
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्ये-
च्छुष्कांस्तरून्पवनधूमदवार्दितांश्च ॥ ४ ॥
(सु. उ. अ. ४१)

पूर्वरूपमाह—श्वासेत्यादि । संस्रवः ष्ठीवनम् । पीनसः प्रतिश्यायः । मांसपरो मांसभोजनेच्छुः । रिरंसुः स्त्रियं रन्तुमिच्छुः; एतच्च व्याधिमहिम्ना मनोदोषात् ।

* 'भविष्यति उत्पद्यमाने शोषे श्वासादयो भवन्तीति संबन्धः । अङ्गसादोऽङ्गग्लानिः । कफसंस्रवः कफष्ठीवनं, मदो धत्तूरफलभक्षणादिव मनोमोहः, पीनसः प्रतिश्यायः, 'कास-हिक्का' इतिस्थानेऽन्ये 'पाण्डुनिद्रा' इति पठन्ति, तत्र पाण्डुः पाण्डुदेहच्छविः । स च पुरुषः शुक्लनयनो भवति । शल्लकी गोधानुकारी वज्रशल्की 'सेहक' इति विख्यातः; कृकलासः सरटः 'गिरगिट' इति पूर्वदेशीया भाषन्ते; एते तं वाहनीभूय वहन्ति । पवनो वायुः, अर्दितान् अभिभूतान् (आ० द०) ॥ ३ ॥ ४ ॥

१ अस्याग्रे यदि स्त्रीभ्यो न निवर्तेत तदा' इत्यातङ्कदर्पणेऽधिकं पठ्यते ।

तथा स्वप्नेषु काकादिवाहनं च पूर्वरूपमेव । शल्लकी 'शरारु' इति ख्याता, नीलकण्ठो मयूरः । विजला निर्जलाः । दवो वनाग्निः । आर्दितान् अभिभूतान् । चकारात्तृणकेशानिपातादयो द्रष्टव्याः । यदुक्तं चरके,—"पूर्वरूपं प्रतिश्यायो दौर्बल्यं दोषदर्शनम् । अदोषेष्वपि भावेषु. कार्ये बीभत्सदर्शनम् ॥ घृणित्वमश्नतश्चापि बलमांसपरिक्षयः स्त्रीमद्यमांसप्रियता प्रियता चावगुण्ठने ॥ मक्षिकाघुणकेशानां तृणानां पतनानि च । प्रायोऽन्नपाने, केशानां नखानां चातिवर्धनम् ॥ पतत्रिभिः पतङ्गैश्च श्वापदैश्चाभिधर्षणम्" (च. चि. स्था. अ. ८)—इति । तत्र श्वापदा व्याघ्रादयः ॥३–४॥

अंसपार्श्वाभितापश्च संतापः करपादयोः ।
ज्वरः सर्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥ ५ ॥
(च. चि. अ. ८)

त्रिरूपसंपन्नमाह—अंसेत्यादि ।–अंसपार्श्वयोरभितापः पीडा, अंसो भुजस्योपरिभागः, अभितापत्वेनैकं रूपं, एवं संतापेऽपि वाच्यम् । करपादयोरित्यत्र प्राण्यङ्गत्वादेकवद्भावं मन्यमानाः काश्मीराः–'तापः पादकरस्य च'–इति पठन्ति, 'करपादिकः' इति च पाठान्तरम् । एतत्त्रयं प्रायोभावित्वेन चरकेणोक्तं, तेनैकादशरूपेषु मध्येऽन्यदपि त्रयं बोध्यम् । तथाच भोजः–"कासो ज्वरो रक्तपित्तं त्रिरूपे राजयक्ष्मणि"–इति । अन्ये त्वाहुः,–राजयक्ष्मणि यो ज्वरस्तस्यैतल्लक्षणमिति; जेज्जटस्तु त्रिरूपसंपत्तिमेव व्याख्यातवान् ॥ ५ ॥

*(भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥)
†स्वरभेदोऽनिलाच्छूलं संकोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥ ६ ॥
(सु. उ. अ. ४१)

शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥ ७ ॥
(सु. उ. अ. ४१)

राजयक्ष्मणस्त्रिदोषिकस्यैकादशरूपाणि विभज्य व्याधिप्रभावाज्जायन्ते, ननु सन्निपातज्वरलिङ्गवत्सर्वदोषैः सर्वाणीत्याह—स्वरभेदोऽनिलादित्यादि । शूलमंसपार्श्वयोरेव,

* 'इदानीं तस्यैव षड्रूपाणि दर्शयितुमाह-भक्तेत्यादि' (आ० द०)

† दोषभेदेनैकादशरूपाणि दर्शयन्नाह–स्वरेत्यादि । अंसपार्श्वयोः संकोच इत्यत्रापरे 'संलोच' इति पठन्ति, तत्र संलोचो लुञ्चितमिव अंसयोः पार्श्वयोश्च, तेनैवं त्रीणि; ज्वरादीनि

१ 'भोजने प्राह्याः' इति (आ० द०) २ एतदनन्तरं 'स्वप्ने केशास्थिराशीनां भस्मनश्चाधिरोहणम् ॥ जलाशयानां शैलानां वनानां ज्योतिषामपि । शुष्यतां क्षीयमाणानां पततां चापि दर्शनम् ॥ प्राग्रूपं बहुरूपस्य तज्ज्ञेयं राजयक्ष्मणः' इत्यातङ्कदर्पणेऽधिकं पठ्यते ।

अंशपार्श्वयोः संकोच एक एव गणनीयः । अभक्तच्छन्दो भक्तारुचिः । कण्ठस्योद्ध्वंसः कण्ठभेदः 'उत्कासिका' इति कार्तिकः ॥ ६ ॥ ७ ॥

*एकादशभिरेभिर्वा षड्भिर्वाऽपि समन्वितम् ।
कासातीसारपार्श्वार्तिस्वरभेदारुचिज्वरैः ॥ ८ ॥
त्रिभिर्वा पीडितं लिङ्गैः कासश्वासासृगामयैः ।
जह्याच्छोपार्दितं जन्तुमिच्छन् सुविमलं यशः ॥ ९ ॥
(सु. उ. अ. ४१)

सर्वैरर्धैस्त्रिभिर्वाऽपि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्यतोऽन्यथा ॥ १० ॥
महाशनं क्षीयमाणमतीसारनिपीडितम् ।
शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत् ॥ ११ ॥
शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितम् ।
कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवम् ॥ १२ ॥

असाध्यलक्षणमाह—एकादशभिरित्यादि । एकादशभिरेभिरिति स्वरभेदादिभिः कण्ठोद्ध्वंसान्तैः । षड्भिरिति सुश्रुतेन षड्रूपाणि पठितानि,—"भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् । स्वरभेदश्च जायेत षड्रूपं राजयक्ष्मणि" (सु. उ. तं. अ. ४१)—इति । 'कासातिसारपार्श्वार्तिस्वरभेदारुचिज्वरैः'—इति तु कस्यचित्त-

---

चत्वारि पित्तेन; शिरसः परिपूर्णत्वं कफेनेति शेषः, अभक्तच्छन्दो भोजने अश्रद्धा एवं चत्वारि कफेन; एवमेकादश रूपाणि; एवं षड्रूपाण्यपि वातादिभेदेन ज्ञेयानि' (आ०द०) ॥ ६ ॥ ७ ॥

* 'बहुरूपो राजयक्ष्माऽसाध्यस्तमाह—एकादशभिरित्यादि । [१]एतैरिति स्वरभेदोऽनिलाच्छूलमित्यादिकैरेकादशभिः । षड्भिर्वाऽपीति भक्तद्वेषो ज्वर इत्यादिभिः षड्भिः, अपिशब्दात् त्रिभिर्वा अंसपार्श्वाभितापश्चेत्यादिकैः, समन्वितं जह्यात् त्यजेत् । शोषान्वितं पुरुषं यक्ष्मिणमिति । वह्निमांसबलक्षये सतीति बोध्यम् । असाध्यलक्षणमाह—सर्वैरिति सर्वैरेकादशभिः । एतैर्लिङ्गैर्मांसबलक्षयैर्युक्तो वर्ज्य इति संबन्धः । मांसबलयोः क्षयलिङ्गानि सुश्रुतेनोक्तानि । तद्यथा—"मांसक्षयेऽस्थिगण्डोपस्थोरुवक्षःकक्षापिण्डिकोदरग्रीवाशुष्कता रूक्षता सादो गात्राणां धमनीशैथिल्यं च" इति । बलं ओजः "मूर्च्छा मांसक्षयो मोहः प्रलापोऽज्ञानमेव । पूर्वोक्तानि च लिङ्गानि मरणं च बलक्षये"—इति । अपरे 'मांसबलक्षये' इति पठन्ति, तत्र मांसबलक्षये सतीति योज्यम् । अतोऽन्यथेति मांसबलक्षयेऽसतीति । एतेन बलमांसाभियुक्तः प्रत्याख्येयः न चिकित्स्यः सर्वरूपोऽपि । अपरमसाध्यलक्षणमाह—महाशनमिति ।—महाशनं बह्वशनमपि क्षीयमाणं मांसबलाभ्यां क्षीणमरिष्टत्वात् । अतीसारनिपीडितमतीसारयुक्तम् । उक्तं च "मलायत्तं बलं पुंसां शुक्रायत्तं तु जीवितम् । तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी"—इति; शूनमुष्कोदरं शोफयुक्तं मुष्कमुदरं च यस्य तं । अपरमपि वर्ज्यमाह—शुक्लाक्षमित्यादि । कृच्छ्रेण बहुमेहन्तमिति कष्टेन बहुतरं मेहन्तं 'मलं' इति शेषः । एतेनाहारस्य मलभावः कथितः । यस्य चातिशयो मलो निष्पद्यते तस्य मांसरक्तक्षयो भवति स पुनरसाध्यः स्यात् । इत्थंभूतं नरं शुक्लाक्षत्वाद्युपद्रवसहितं यक्ष्मा हन्तीति संबन्धः । इहेत्यस्मिन् शास्त्रे' (आ०द०) ॥ ८–१२ ॥

---

१ 'ज्वर कासा' इति क. २ 'एभिर्वा' इत्यत्र—'एतैर्वा' इति पाठाशयेन । ३ 'शोषान्वितं' इति पाठाभिप्रायेण ।

स्य षड्रूपाणि माधवकरेण लिखितानीति। एतानि चैकादश षड्वा त्रिरूपाणि वा प्रायोभाविलादुक्तानि, अन्यतमरूपपरिहारात्, रूपान्तरयोगेऽप्येकादशत्वं षट्त्वं च स्यादेव, तथाहि चरको निदाने एकादशरूपाणि पठित्वा चिकित्सितेऽपि वेगरोधादि-कारणचतुष्टयजे प्रतिकारणं चतुर्धा एकादशरूपाणि पठितवान्। यथा,—"कासोऽस-तापो वैस्वर्यं ज्वरः पार्श्वशिरोरुजा। छर्दनं रक्तकफयोः श्वासो वर्चोग्रहोऽरुचिः॥ रूपाण्येकादशैतानि, यक्ष्मणि षडिमानि च। कासो ज्वरः पार्श्वशूलं स्वरवर्चोग्रहो-ऽरुचिः" (च. चि. स्था. अ. ८)—इति। एकादशवचनेनैवं बोधयति—संपूर्णे यक्ष्म-ण्येकादशैव रूपाणि भवन्तीति। जह्यादिति 'बलमांसक्षये सति' इति शेषः। तथाच चरकः,—"वातव्याधिरपस्मारी कुष्ठी शोथी तथोदरी। गुल्मी च मधुमेही च राजयक्ष्मी च यो नरः॥ अचिकित्स्या भवन्त्येते बलमांसपरिक्षयात्। स्वल्पेष्वपि विकारेषु भिषगेतान् विवर्जयेत्—(च. इ. स्था. अ. ९)" इति। सर्वैरित्यादि। ननु, सर्वरूपाण्ये-कादश, एकादशानामर्धं सार्धपञ्च भवन्ति, तत्र कतमस्य रूपस्यार्धत्वं किंभूतं वा भवति? उच्यते, एकस्य रूपस्यार्धत्वासंभवे षट्पञ्चरूपयोरर्धयोरुत्कृष्टत्वात् षड्रूप एवार्धोऽर्थो ग्राह्यः। लिङ्गैर्युक्त इति संबन्धः। अतोऽन्यथेति बलमांसक्षयाभावे सति। महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम् अरिष्टरूपत्वात्; अतीसारपीडितमिति द्वितीयं,यक्ष्मिणो मलायत्तजीवितस्योक्तत्वात्; शूनमुष्कोदरमिति तृतीयं, मुष्कशोथस्य विरेकसाध्यत्वेन विरुद्धोपक्रमत्वात्। शुक्लेत्यादि। शुक्लाक्षत्वादय एकैकशोऽसाध्यलक्षणानि॥८–१२॥

ज्वरानुबन्धरहितं बलवन्तं क्रियासहम्।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम्॥ १३॥
(सु. उ. अ. ४१)

चिकित्स्यत्वमाह—ज्वरेत्यादि। उपक्रमेत् चिकित्सेत्। अकृशमित्यनेन वय-स्थोऽपि प्रत्याख्यायोपक्रम्यत इति सूच्यते। यदुक्तमन्यत्र,—"परं दिनसहस्रं तु यदि जीवति मानवः। सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः"—इति॥ १३॥

*व्यवायशोकवार्धक्यव्यायामाध्वप्रशोषितान्।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु॥ १४॥
(सु. उ. अ. ४१)

व्यवायादिजनितधातुशोषणमात्रेण राजयक्ष्मत्वं निरस्यन्नाह—व्यवायेत्यादि। यदुक्तं सुश्रुते,—"केषांचिदेवं शोषो हि कारणैर्भेदमागतः। न तत्र दोषलिङ्गानां समस्तानां निपातनम्॥ क्षया एव हि ते ज्ञेयाः प्रत्येकं धातुसंक्षयात्" (सु. उ. तं. अ. ४१)— इति। "वृद्धस्य भावो वार्धक्यमिति स्वार्थे क्य(ष्य)ञ्" इति कार्तिकः॥ १४॥

* 'व्यवायः स्त्रीसेवा, शोकः पुत्रादिवियोगेन चित्तोद्वेगः, वार्धक्यं वृद्धत्वं, व्यायामः शरीरायासजननं, अध्वा दीर्घमार्गाटनं, व्रणः क्षतं, उरःक्षतमुरोन्तराभिघातजनितव्रणः। यक्ष्मणो लक्षणैरिति तल्लिङ्गैः, न तु यक्ष्मभवैः' (आ० द०)॥ १४॥

१ "वर्चोभिदो" इति क.। २ 'अर्धोनानि षट्' इति क.। ३ एतच्च 'यक्ष्मणो लक्षणैः शृणु'—इति पाठाभिप्रायेण।

*व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः।
पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः॥ १५॥
(सु. उ. अ. ४१)

व्यवायशोषिणो लक्षणमाह—व्यवायेत्यादि। शुक्रस्य क्षयलिङ्गैरिति सुश्रुतोक्तैः। तद्यथा,—"शुक्रक्षये मेढ्रवृषणवेदना, अशक्तिर्मैथुने, चिराद्वा प्रसेकः, प्रसेके चाल्पम् रक्तशुक्रदर्शनम्" (सु. सू. स्था. अ. १५)—इति॥ १५॥

†प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः।
(सु. उ. अ. ४१)

शोकशोषिणो लक्षणमाह—प्रध्यानेत्यादिना। शोकशोष्यपि तादृश इति शुक्रस्य क्षयलक्षणव्यतिरिक्तेन शुक्रशोषलिङ्गेन युक्तः, यदुक्तं सुश्रुते,—"विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः" (सु. उ. तं. अ. ४१)—इति॥—

‡जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः॥ १६॥
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः।
ष्ठीवति श्लेष्मणा हीनं गौरवारतिपीडितः॥ १७॥
संप्रस्रुतास्यनासाक्षिः शुष्करूक्षमलच्छविः।
(सु. उ. अ. ४१)

वार्धक्यशोषिणो लक्षणमाह—जरेत्यादि। कम्पनः कम्पयुक्तः। भिन्नस्य स्फुटितस्य कांस्यपात्रस्य हतस्य दण्डादिनेव स्वरो यस्य स तथा। ष्ठीवति श्लेष्मणा हीनमिति श्लेष्महरणाय यत्ने कृतेऽपि न श्लेष्मनिःसरणम्। शुष्करूक्षमलच्छविरिति शुष्करूक्षे यथाक्रमं मलच्छवी यस्य स तथा॥ १६॥ १७॥—

§अध्वशोषी च स्रस्ताङ्गः संभृष्टपरुषच्छविः॥ १८॥
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः।
(सु. उ. अ. ४१)

---

* 'यथापूर्वं धातवः क्षीयन्ते; तत्र शुक्रस्य पूर्वो मज्जा, मज्ज्ञोऽस्थि, अस्थ्नो मेदः, मेदसो मांसं, मांसस्य रक्तमित्येवं, परं यदि स्त्रीभ्यो न निवर्तते' (आ० द०)॥ १५॥

† 'शोकशोषमाह–प्रध्यानशीलः चिन्तापरः, स्रस्ताङ्गः अवसन्नगात्रः'॥—

‡ 'जराशोषिणमाह–जरेत्यादि। मन्दशब्दो वीर्यादिभिः प्रत्येकं संबध्यते। वीर्यं शक्तिः, बलमोजो हृदि स्थितं सप्तधातूनां धाम। अर्रेचिपीडित इति पुनररोचकग्रहणमत्यन्तमरोचकताख्यापनार्थम्। संप्रस्रुतशब्द आस्यादिभिः संबध्यते। आस्यं मुखकुहरं, अक्षि लोचनम्' (आ० द०)॥ १६–१७॥—

§ 'स्रस्ताङ्ग इति स्रस्ताङ्गः शिथिलगात्रः। प्रसुप्तगात्रावयव इति प्रसुप्तः स्पर्शानभिज्ञोऽकर्मण्यः शरीरप्रदेशो यस्य तथोक्तः। शुष्कशब्दः क्लोमादिभिः प्रत्येकं संबध्यते। यद्यपि यथोद्देशं जराशोष्यनन्तरं व्यायामशोषी वाच्यो नाध्वशोषी, तथाऽप्यध्वशोषिणो लक्षणानां व्यायामशोषिण्यतिदेशात् पूर्वमत्राध्वशोषी निर्दिष्टः। यद्येवं तर्हि व्यायामशोषिलक्षणान्येव

---

१ 'गौरवारुचिपीडितः' इति क.। २ 'बले' इति (आ० द०)। ३ अस्याग्रे क. पुस्तके 'पुनररुचिग्रहणमत्यन्तारोचकख्यापनार्थम्' इत्यधिकं पठ्यते। ४ एतच्च 'गौरवारुचिपीडित' इति पाठाभिप्रायेण।

अध्वशोषिणो लक्षणमाह—अध्वेत्यादि । संमृष्टस्येव भर्जितस्येव छविः वर्णो यस्य स तथा । प्रसुप्तः स्पर्शानभिज्ञः । क्लोम पिपासास्थानं हृदये, क्लोमस्थाने तात्विति पाठान्तरम् ॥ १८ ॥—

*व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥ १९ ॥
(सु. उ. अ. ४१)

व्यायामशोषिणो लक्षणमाह—व्यायामेत्यादि । एभिरिति स्रस्ताङ्गतादिभिरध्वशोषलक्षणैः, अध्वनो व्यायाममात्रसामान्यात् । भूयिष्ठम् अत्यर्थम् । अध्वशोषेऽल्पानि लक्षणानि व्यायामजे तु महान्तीत्यर्थः । तथा 'उरःक्षतकृतैर्लिङ्गैः संयुक्तः क्षतवर्जितैः' इति सुगमः पाठः । गदाधरस्तु,—"लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना—" इति पठति, व्याचष्टे च—उरःक्षतेन व्यायामभाराध्ययनद्रुतयानादिहेतुना यः कृतः शोषः सोऽप्येभिरेवाध्वशोषलिङ्गैर्भूयिष्ठं संयुक्तः, क्षतं क्षतकार्यं विना । क्षतकार्यं तु सुश्रुते यथा—"तस्योरसि क्षते रक्तं पूयः श्लेष्मा च गच्छति—" इत्यारभ्य "भिन्नवर्णस्वरो नरः" (सु. उ. तं अ. ४१)—इत्यन्तमेतान्येव लक्षणानि क्षतेऽधिकानि, उरःक्षतकारणव्यायामभारादिकृतशोषस्य लक्षणमेव भूयिष्ठं यत्तदेवोरःक्षतकारणमात्रत्वादध्वनोऽपीत्यर्थः । अथवा क्षतं विना व्रणं विना, उरःक्षतनिमित्तभाराध्ययनादिनाऽतिमात्रेण यः कृतः शोषः सोऽप्येभिरेवात्यर्थाध्वशोषलिङ्गैः समन्वित इति प्रकृतेन संबन्धः; सव्रणस्य तु वक्ष्यमाणमेव लक्षणमिति ॥ १९ ॥

†रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषः स चासाध्यतमो मतः ॥ २० ॥
(सु. उ. अ. ४१)

कारणत्रयेण व्रणशोषिणमाह—रक्तक्षयादित्यादि । वेदना व्रणवेदनाः, ताभिर्भयशोकवन्मनःक्षोभाद्वातप्रकोपादेव शोषः । स चासाध्यतम इति स्वार्थिकस्तमप्, यथा—"युधिष्ठिरः श्रेष्ठतमः कुरूणां"—इति । अत्रेष्ठनैवातिशायिकप्रत्ययेन प्रशस्ततमत्वस्य प्रतिपादितत्वात् अथवा याप्यापेक्षयाऽसाध्यतमशब्देन प्रत्याख्येय उच्यते, याप्यस्याप्यसाध्यरूपत्वात् । ननु, एवं सति "कृशानां व्रणशोषिणाम् । बृंहणीयो विधिः कार्यः (सु. चि. स्था. अ. १)"—इति सुश्रुतेनैवोक्तं चिकित्सितस्थाने विरुध्यते ? उच्यते, प्रबलशोषे प्रत्याख्येयत्वं, नातिप्रबले तु चिकित्साविधानमिति समर्थ-

---

कुतोऽध्वशोषिणि नातिदिश्यन्ते । सत्यं. उरःक्षतलिङ्गानामधिकानां व्यायामशोषिणि सद्भावात् । अथोद्देश एवाध्वशोषी कस्मान्नादावुक्त इति चेत्—छन्दोनुरोधात्' ॥ १८ ॥

* 'एभिरिति स्रस्ताङ्गत्वादिभिरनन्तरोक्तैरेवाध्वप्रशोषिलक्षणैः; 'स एवोरःक्षतकृतैः संप्रयुक्त' इति सुगमः पाठः । "कासमानश्छर्दयेच्च पीतरक्तासितारुणम् ॥ संतप्तवक्षाः सोऽत्यर्थं दूयनात्परितान्यति । दुर्गन्धोच्छ्वासवदनो भिन्नवर्णस्वरो नरः"—इति' (आ० द०) ॥ १९ ॥

† 'व्रणशोषिणमाह—रक्तेत्यादि । रक्तक्षयात् रक्तातिस्रुतेः' ॥ २० ॥

---

१ 'व्यायाममात्रसाम्यत्वात्' इति क. ।

नीयम् । चन्द्रिकाकारस्तु 'स चासाध्यतमः स्मृतः'—इत्यस्य स्थाने 'याप्यासाध्यतमस्तु सः' इति पठति, चिकित्सायां बृंहणविधेरभिधानादिति ॥ २० ॥

*धनुषाऽऽयस्यतोऽत्यर्थं भारमुद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥ २१ ॥
वृषं हयं वा धावन्तं दम्यं वाऽन्यं निगृह्णतः ।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान् ॥ २२ ॥
अधीयानस्य वाऽत्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीर्वा तरतो हयैर्वा सह धावतः ॥ २३ ॥
सहसोत्पततो दूरं तूर्णं वाऽपि प्रनृत्यतः ।
तथाऽन्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥ २४ ॥
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते ।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ॥ २५ ॥
उरो विभज्यतेऽत्यर्थं भिद्यतेऽथ विरुज्यते ।
प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते ॥ २६ ॥
क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ।
ज्वरो व्यथा मनोदैन्यं विड्भेदाग्निवधावपि ॥ २७ ॥
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः ।
कासमानस्य चाभीक्ष्णं कफः सास्रक् प्रवर्तते ॥ २८ ॥
स क्षती क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
(च. चि. अ. १६)

शोषनिदानेनैव साहसादिना उरःक्षतस्य संभवात्, उरःक्षतेनापि शोषसंभवात्, शोषाधिकारे सनिदानमुरःक्षतमाह—धनुषेत्यादि । आयस्यत इति आयासं कुर्वतो 'नरस्य' इति शेषः, 'आयम्यतः' इति पाठान्तरे विस्तीर्यमाणहृदयस्य । दम्यं दमनार्हं वृषादिकमेव बलवन्तमित्यर्थः । अन्यं वा गजोष्ट्रादिकं, निगृह्णतः विधारयतः । शिला दीर्घशिला, अश्मा तदितरप्रस्तरखण्डः[1], निर्घातोऽस्त्रविशेषः, किंवा निर्घातः शिलादीनां प्रेरणविशेषोऽतिबलसंपादितः । निघ्नतः परान् शत्रून् ताडयतः । अधीयानस्य पठतः । महानदीस्तरत इति, 'बाहुभ्यां' इति शेषः । तूर्णं शीघ्रम् । तथाऽन्यैः कर्मभिः क्रूरैर्भृ-

* 'अधीयानस्य उच्चैः पठतः । दूरं वा व्रजतो द्रुतमिति शीघ्रं दूरं गच्छतः । तूर्णं शीघ्रमतिनृत्यतः । विक्षते विदारिते, वक्षसि हृदि । बलवान् समुदीर्यते उत्कट उत्पद्यते । उरःक्षतक्षीणत्वेऽपरमपि कारणमाह—स्त्रीष्वित्यादि । रूक्षं चणकादि, अल्पं स्तोकं, प्रमितमकालभोजनम् । उरो भिद्यत इव शूलेन, विभज्यते द्विधा क्रियत इव, 'विदह्यते' इति पाठान्तरम् । वर्णो गौरादिः, व्यथा अङ्गानां, मनोदैन्यम् मनोग्लानिः, अग्निवधोऽग्न्यभावः, कफः सास्रः प्रवर्तते इति रुधिरयुक्तं कफं ष्ठीवते, 'सास्र' इत्यत्र 'सान्द्र' इति पाठान्तरं, तत्र सान्द्रो घनः, एभिः कारणैः, सक्षतः क्षतवान्, 'स ततः' इति पाठे स पुरुषः, तत उरःक्षतात्[2] अत्यर्थं क्षीयते धातुशोषमाप्नोतीत्यर्थः । (आ० द०) ॥ २१–२८ ॥—

१ 'पर्वतादिप्रस्तरखण्डः' इति क. । २ एतच्च 'सास्र' इति पाठाभिप्रायेण ।

क्षुद्रादिभिरभ्याहतस्य, क्रूरैरित्यत्र शूरैरिति शत्रुभिरित्यन्ये । एषां कारणानां मध्ये किंचिन्निखिलदेहस्यायासकरं, किंचिदुरस एवेति बोद्धव्यम् । व्याधिरिति उरःक्षत-लक्षणः, अथवा व्याधिर्वायुः, 'दोषा अपि व्याधिशब्दं लभन्त' इत्यागमादिति जेज्जटः । उरो विभज्यते भज्यत इव, भिद्यते विदार्यते द्विधा क्रियत इव, विदह्यत इति पाठान्तरमसंगतं, कारणाभावात् टीकाकारैरव्याख्यातत्वाच्च । वीर्यं शक्तिः । बलं मांसोपचयः । 'विड्भेदोऽग्निवधात्' अपीति पाठान्तरे अग्निवधाद्धेतोर्विड्भेदो भवतीत्यर्थः; अपिशब्दात् व्याधिमहिम्ना विनाऽप्यग्निवधाद्विड्भेदो भवतीत्याहुः ।' दुष्टो व्यापन्नः; तदेव विवृणोति—श्याव इत्यादि । विग्रथितो विशेषेण ग्रन्थिलः, "विबद्ध" इति जेज्जटः । स पुरुषः, क्षती उरःक्षतवान्, क्षीयते धातुशोषमाप्नोति । न केवलं क्षतादेव क्षीयते, किं तर्हि स्त्रीसेवादिना शुक्रौजसोः क्षयादपीत्याह—तथे-त्यादि ॥ २१–२८ ॥—

*अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतम् ॥ २९ ॥

पूर्वरूपमाह—अव्यक्तमित्यादि ॥ २९ ॥

†उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते ।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः ॥ ३० ॥
(च. चि. अ. १६)

क्षतक्षीणयोरसाधारणलक्षणमाह—उरोरुगित्यादि । वैशेषिको विशिष्टः कासः; स च विशेष उक्तो दुष्टश्यावादिकफसंयुक्तत्वं; किंवा वैशेषिक उद्भूतः । क्षत इति छेदः । क्षीण इति क्षय इत्यर्थः । सरक्तमूत्रत्वम् आलोहितमूत्रता ॥ ३० ॥

‡अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः ।
परिसंवत्सरो याप्यः सर्वलिङ्गं तु वर्जयेत् ॥ ३१ ॥
(च. चि. अ. १६)

इति श्रीमाधवकरविरचिते माधवनिदाने राजयक्ष्मक्षतक्षीणनिदानं समाप्तम् ।

तयोः साध्यलक्षणमाह—अल्पेत्यादि ॥ ३१ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां राजयक्ष्मक्षतक्षीणनिदानं समाप्तम् ॥ १० ॥

---

* 'तस्य क्षतस्य, लक्षणमव्यक्तमप्रकटम्' (आ० द०) ॥ २९ ॥

† 'क्षते उरःक्षते । वैशेषिकः क्षीणकासापेक्षया अधिक इत्यर्थः । शुक्रौजसोः क्षये तु सरक्तमूत्रादिरुपद्रवः । वैशेषिको विशिष्टः कास इत्यस्मिन् लक्षणे संबध्यते' (आ० द०) ॥ ३० ॥

‡ 'उरःक्षते साध्ययाप्यासाध्यत्वमाह—अल्पेत्यादि । अल्पलिङ्गस्य अल्पलक्षणस्य' (आ० द०) ॥ ३१ ॥

अथ कासनिदानम् ।

*धूमोपघाताद्रसतस्तथैव व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य वेगावरोधात् क्षवथोस्तथैव ॥ १ ॥
प्राणो ह्युदानानुगतः प्रदुष्टः स भिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः ॥ २ ॥
(सु. उ. अ. ५२)

क्षयरूपे कासपाठात् कासोपेक्षया च क्षयोत्पत्तेस्तदनन्तरं कासनिदानमाह—धूमोपघातादित्यादि ।—धूमेन मुखनासाप्रविष्टेनोपघातो धूमोपघातः । रसत इति वातेनोर्ध्वं नीतादामरसात्, रजस इति पाठान्तरे मुखनासाप्रविष्टधूलेरित्यर्थः । विमार्गगत्वं च हि भोजनस्यातिद्रुताभ्यवहारादिना, चशब्दः समुच्चये, हि पादपूरणे । वेगावरोधादिति पुरीषादेः, तेन हि वायुरूर्ध्वगः स्यात् । क्षवथोस्तथैवेति वेगावरोधादिति संबन्धः । प्राणो वायुरुदानेन दुष्टेनानुगतो वक्त्रान्निरेति । स वायुः, भिन्नकांस्यपात्रवत् हतस्वनः कास इति प्रदिष्टः । सदोषः सकफपित्तः, वातिकपैत्तिकादिभेदभिन्नं इति वा । एतेनैव समानस्थाननिदानाभ्यां हिक्काश्वासाभ्यामस्य भेदः, न हि तत्र वातिकपैत्तिकादिभेदेन व्यपदेश इति **गदाधरः** । कसति शिरःकण्ठादूर्ध्वं गच्छति वायुरिति कासः, 'कस' गतौ इत्यस्मात्; 'कसनात् कासः' (च. चि. स्था. अ. १८)—इति **चरके पाठः**, कासनं कास इति वा, "भिन्नस्वरः कासति शुष्कमेव" (सु. उ. तं. ५२)—इति **सुश्रुतदर्शनात्** ॥ १ ॥ २ ॥

†पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम् ॥ ३ ॥
(अ. हृ. नि. अ. ३)

संख्यामाह—पञ्चेत्यादि । पञ्च कासा इति संख्येयनिर्देशादेव संख्यायां लब्धायां पञ्चग्रहणं जराकासस्य दोषजेष्वन्तर्भूतस्याधिकत्वनिरासार्थं, पञ्चानामपि वा क्षयकारणत्वप्रतिपादनार्थमिति । क्षयाय धातुक्षयाय ॥ ३ ॥

---

* 'रजसेति रजसा मुखनासाप्रविष्टेन, 'रसतः' इति पाठान्तरं, तत्र रसो जलं; व्यायाम आयासः, रूक्षान्नं चणकादि । तस्य संप्राप्तिमाह—प्राण इत्यादि । प्राणो वायुर्दुष्टः उदानेन दुष्टेनानुयातो वक्त्रान्निरेति गच्छति, स दोषो रोगः कास इति प्रदिष्टः । कार्ये कारणोपचाराद्दोषो रोग इति संज्ञा । किंविशिष्टः स दोषः ? भिन्नकांस्यपात्रस्वनः, भग्नकांस्यपात्रस्वनः; स वातपित्तकफभेदैर्भिन्न इति तस्य निरुक्तिः । कास इति 'कासृ' दीप्तौ, इत्यस्माद्धातोः अप्रत्ययान्तः; अनेकार्थत्वात्प्राप्त्यर्थः । अथवा कासनं कास इति घञ्; "कसनात्" कास इति चरकपाठात्' (आ० द०) ॥ १ ॥ २ ॥

† 'उपेक्षितास्ते अप्रतिक्रियमाणाः क्षयाय धातुक्षयाय भवन्ति; उत्तरोत्तरमिति वातात्पैत्तिकः, पैत्तिकात् श्लैष्मिकः, तस्मात्क्षतजो बली, तस्मात् क्षयजः' (आ० द०) ॥ ३ ॥

*पूर्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते ॥ ४ ॥
(च. चि. अ. २२)

पूर्वरूपमाह—पूर्वेत्यादि । भोज्यानामवरोध इत्यरुचिरभ्यवहारासामर्थ्यं वा ॥ ४ ॥

†हृच्छङ्खमूर्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ॥ ५ ॥
(सु. उ. अ. ५२)

वातिककासस्वरूपमाह—हृदित्यादि । शङ्खो ललाटैकदेशः । क्षामाननः शुष्कमुखः, वातेन शोषणात् । प्रसक्तवेगः सततकासवेगः । शुष्कमिति श्लेष्मादिनिष्ठीवनरहितम् ॥ ५ ॥

‡उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषार्तः ।
पित्तेन पीतानि वमेत्कटूनि कासेत्सपाण्डुः परिदह्यमानः ॥ ६ ॥
(सु. उ. अ. ५२)

पैत्तिककासमाह—उर इत्यादि । अभ्यर्दितः पीडितः ॥ ६ ॥

§प्रलिप्यमानेन मुखेन सीदन् शिरोरुजार्तः कफपूर्णदेहः ।
अभक्तरुग्गौरवकण्डुयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥ ७ ॥
(सु. उ. अ. ५२)

कफजकासमाह—प्रलिप्यमानेनेत्यादि । प्रलिप्यमानेन श्लेष्मलिप्तेन मुखेनोपलक्षितः, सीदन् अङ्गावसादयुक्तः । अभक्तरुगरुचिः ॥ ७ ॥

§ अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमाचरेत् ॥ ८ ॥
स पूर्वं कासते शुष्कं ततः ष्ठीवेत्सशोणितम् ।
कण्ठेन रुजताऽत्यर्थं विरुग्णेनेव चोरसा ॥ ९ ॥

---

* 'शूको धान्याग्रे सूक्ष्मकण्टकाकारः' (आ० द०) ॥ ४ ॥

† 'क्षीणबलस्वरौजा इति क्षीणं बलं स्वर ओजश्च यस्य स तथा । भिन्नस्वरः द्विधाकृतस्वर इव' (आ० द०) ॥ ५ ॥

‡ 'एतैरुपद्रवैः पीतानि वमेत् पित्तं कफसंसृष्टं निष्ठीवति; उक्तं च तन्त्रान्तरे—"श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिकः" इति । पाण्डुना सह वर्तत इति सपाण्डुः, एतेन नयनादीनामपि पाण्डुत्वमुक्तम् । परिदह्यमानो दाहपरिप्लुतः' (आ० द०) ॥ ६ ॥

§ 'कफपूर्णदेहत्वाद्गौरवं, कण्डूः कण्ठस्यैव, सान्द्रकफो घनश्लेष्मा' (आ० द०) ॥ ७ ॥

§ 'एतैः कारणै रूक्षस्य पुरुषस्य उरःक्षतं गृहीत्वा वायुः कासमावहेत्[1] करोति । युद्धं मल्लयुद्धादिकम् । अत्यर्थं रुजता पीडायुक्तेन' (आ० द०) ॥ ८–११ ॥

---

१ एतच्च 'कासमावहेत्' इति पाठाभिप्रायेण ।

सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना॥ १०॥
पर्वभेदज्वरश्वासतृष्णावैस्वर्यपीडितः।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्॥ ११॥
(सु. उ. अ. ५२)

क्षतकासमाह—अतिव्यवायेत्यादि। विग्रहो विधारणं युद्धस्योपात्तत्वात्; विग्रह इति पाठे स एवार्थः। ततः ष्ठीवेत् सशोणितमिति कासाभिघातेन हृदयस्य विदारणात्। कण्ठेनेत्युपलक्षणे तृतीया, एवमुरसेति। विरुग्णेनेव भग्नेनेव, सूचीभिरिव तुद्यमानेन, शूलिना दुःखस्पर्शेन चोरसेति संबन्धः, दुःखस्पर्शत्वं स्पर्शासहत्वम्। शूलेनोपलक्षितः, तच्च पार्श्वादौ बोध्यम्। वाग्भटेनापि पठ्यते,—"पार्श्वशूली" (वा. नि. स्था. अ. ३)—इति। भेदपीडाभितापिनेति शूलविशेषणम्। पारावत इव कूजन्, भवतीति शेषः॥ ८—११॥

*विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः।
कुपिताः क्षयजं कासं कुर्युर्देहक्षयप्रदम्॥ १२॥

स गात्रशूलज्वरदाहमोहान् प्राणक्षयं चोपलभेत कासी।
शुष्यन्विनिष्ठीवति दुर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम्।
तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति॥ १३॥
(सु. उ. अ. ५२)

क्षयजकासमाह—विषमेत्यादि। घृणिनां शोचतां चाहाराभावात्कुपितेन वायुनाऽग्नेरुपहतत्वाद्दोषत्रयप्रकोप इति। क्षयजमिति शुक्रादिधातुक्षयजं, न तु राजयक्ष्मजम्। त्रिदोषजेऽपि राजयक्ष्मणि कासः कफेनैव क्रियते। यदुक्तं,—"कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः—"इति; क्षयजकासस्तु त्रिदोषज इति। ननु, कासादेव क्षयो जायते तत्कथं क्षयजः कास इति? उक्तं हि—"कासात्संजायते क्षयः"—इति। उच्यते, दृष्टो हि परस्परं व्यक्तिभेदेन कार्यकारणभावो बहुशः, यथाऽतीसारार्शोऽग्निमान्द्यादाविति। स गात्रशूलेत्यादिश्लोकार्धस्य क्षयजकासमध्ये पाठोऽयुक्तः प्रतिभाति, सुश्रुते क्षतजकासे पठितत्वात्; क्षयकासश्चात्र चरकसुश्रुतवाक्ये मेलयित्वा माधवकरेण लिखितः; उच्यते, स गात्रशूलेत्याद्यनन्तरं क्षयकासः सुश्रुतेन पठितः; तेन स गात्रशूलेत्यादिश्लोकार्धस्य परेण संबन्धात् क्षयकासलिङ्गत्वमिति माधवकरस्याभिप्रायः; एतच्चान्ये नानुमन्यन्ते, यतः क्षतकासस्यावस्थायामसाध्यत्वख्यापनपरमेतद्व्याख्यातं जेज्जटेन, गयदासेनापि क्षतजकासरूपत्वेनेति॥ १२॥ १३॥

* 'क्षयजमिति रक्तादिक्षयजम्। अस्योपद्रवानाह—शुष्यन्निति प्रतिदिनं शुष्यमाणः, दुर्बलः उपचयरहितः, प्रक्षीणमांसस्त्वगस्थिभूतः, सर्वलिङ्गमिति त्रिदोषलिङ्गत्वादसाध्यम्' (आ० द०)॥ १२॥ १३॥

*इत्येष क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेव क्षतोत्थितः ॥ १४ ॥
नवौ कदाचित्सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्वो याप्यः प्रकीर्तितः ।
त्रीन् पूर्वान्साधयेत्साध्यान्पथ्यैर्याप्यांस्तु यापयेत् ॥ १५ ॥
(सु. उ. अ. ५२)

इति श्रीमाधवकरविरचिते माधवनिदाने कासनिदानं समाप्तम् ॥

असाध्यत्वादिलक्षणमाह— इतीत्यादि। पादगुणान्विताविति वैद्यादिचतुष्पादसंपन्नौ। स्थविराणां वृद्धानां; स्थविराणामित्युक्तेऽपि जराशब्दोपादानं जरानिमित्तधातुक्षयज एव कासो याप्यः, अपचारजनितदोषजस्तु साध्य इति बोधनार्थम् ॥ १४ ॥ १५ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां कासनिदानं समाप्तम् ॥

अथ हिक्काश्वासनिदानम् ।

†विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः ।
शीतपानाशनस्थानरजोधूमातपानिलैः ॥ १ ॥
व्यायामकर्मभाराध्ववेगाघातापतर्पणैः ।
हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥ २ ॥
(सु. उ. अ. ५०)

समाननिदानत्वात्कासानन्तरं हिक्काश्वासौ । ननु, एतेषां प्रायस्तुल्यनिदानचिकित्सितत्वेनैकाधिकारे कथमनभिधानं ? उच्यते; यद्यपि कासश्वासहिक्कानां निदानं समानं, तथापि कासस्य दोषभेदाद्भेदः, यथा—वातिकः पैत्तिकः श्लैष्मिक इत्यादि; हिक्काश्वासौ तु कफवातात्मकावेव, यदाह दृढबलः,—"कफवातात्मकावेतौ पित्तस्थानसमुद्भवौ" (च. चि. स्था. अ. १७)—इति । सुश्रुतोऽप्याह,—"वायुः कफेनानुगतः पञ्च

---

* 'बलवतां कदाचित्साध्यो वा स्याद्याप्यश्च, एवं क्षतजः कदाचित्साध्यो याप्यो वा । पुनः साध्यत्वमाह–नवावित्यादि । अचिरोत्थौ क्षतक्षयजौ द्वौ पादगुणान्वितौ वैद्यादिचतुष्पादसंपत्तियुक्तौ कदाचित् सिध्येतां साध्यौ भवत इत्यर्थः । याप्यत्वमाह–स्थविराणामिति । एतस्य दोषजेष्वन्तर्भूतत्वान्न पृथक्त्वम् । पञ्चानामपि चिकित्साद्वारेण साध्ययाप्यत्वमाह–त्रीनिति ।— वातपित्तश्लेष्मजान् पथ्यैः साधयेत्, एतेन त्रयः कासाः साध्या उक्ताः; अपरान् पथ्यैर्यापयेत् याप्यतां नयेत् । जराकासा इति बहुवचनाज्जराकास उपेक्षितोऽसाध्यो भवतीति दर्शयति । "पूयाभमरुणं श्यावं हरितं पीतनीलकम् । निष्ठीवेच्छ्वासकासार्तो न जीवति हतस्वरः ॥ कासश्वासक्षयच्छर्दिस्वरभेदादयो गदाः । भवन्त्युपेक्षयाऽसाध्यास्तस्मात्तान् त्वरया जयेत्"–इति' (आ० द०) ॥ १४ ॥ १५ ॥

† 'विदाहीनि याम्निकेक्षुरसमधमरिचादीनि विदहनशीलानि, गुरूणि गुणतः पाकतश्च' विष्टम्भीनि चणकादीनि, अभिष्यन्दीनि आभिमुख्येन स्यन्दितुं शीलं येषां तान्यभिष्यन्दन, शीलानि फाणितमाषमत्स्यक्षीरादीनि' (आ० द०) ॥ १ ॥ २ ॥

---

१ एतच्च 'जराकासाः सर्वे याप्याः प्रकीर्तिताः' इति पाठाभिप्रायेण ।

हिक्काः करोति हि" (सु. उ. त. अ. ५१)—इति; भेदस्तनयोः संप्राप्तिभेदाद्वेगक्रियादिना च, नतु कासवद्दोषभेदेन; श्वासकासाभ्यां हिक्कायाः स्वतोऽपि भेदः। पित्तस्थानसमुद्भवाविति विशेषणं सुश्रुतमते क्षुद्रां न प्राप्नोति, सा हि जत्रुमूलात्प्रधावितेति पठ्यते; चरकमते तु व्यपेतां न प्राप्नोति, साऽपि जत्रुमूलादसन्तवेति पठ्यते; तस्मात् पित्तस्थानसमुद्भवाविति विशेषणं छत्रिणो गच्छन्तीति न्यायेन बोध्यम् । शीतशब्दः पानादिभिस्त्रिभिः संबध्यते । रजो धूलिः, सा च धूमवन्नासादिप्रवेशात् कारणम् । व्यायामकर्म धनुराकर्षणादिव्यापारः, वेगाघातो मलादिवेगविधारणं, अपतर्पणमनशनादि । कासश्वासोऽप्येकनिदानत्वप्रतिपादनार्थं पुनरभिहित इति ॥ १ ॥ २ ॥

*मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् ।
स घोषवानाशु हिनस्त्यसून् यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥३॥
(सु. उ. अ. ५०)

हिक्कानां स्वरूपं निरुक्तिं चाह—मुहुर्मुहुरित्यादि । वायुरत्र सोदानः प्राण इत्याहुः। उदेति ऊर्ध्वं गच्छति । सस्वन इति हिंगितिशब्दवान् । ऊर्ध्वगमनमेव विशिनष्टि,—यकृदित्यादि । अत्र प्लिहेति ह्रस्वेकारश्छन्दोनुरोधात् । मुखादिति ल्यब्लोपे कर्मणि पञ्चमी, तेन यकृत्प्लीहान्त्राणि मुखमानीय, आक्षिपन् निःसारयन्निवेत्यर्थः । स इति वायुः । 'हिनस्त्यसून्' इति हिक्केति निरुक्तिः, पृषोदरादिना रूपसिद्धिः । 'हिगिति कृत्वा कायति शब्दायते, इति हिक्का' इति शाब्दिकाः ॥ ३ ॥

†अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ।
वायुः कफेनानुगतां पञ्च हिक्काः करोति हि ॥ ४ ॥
(सु. उ. अ. ५०)

तासां भेदं संप्राप्तिं चाह—अन्नजामित्यादि । यमलैव चरके व्यपेतेति नाम्ना पठिता, अन्नपाने व्यपेते परिणते जायत इत्यतो हेतोः; अस्यां चानुक्तमपि यमलवेगत्वं सुश्रुतदर्शनाद्विज्ञेयम् । अन्नजायाः साध्यत्वेन प्राशस्त्यात्पूर्वमभिधानम् ॥ ४ ॥

‡कण्ठोरसोर्गुरुत्वं च वदनस्य कषायता ।
हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च ॥ ५ ॥
(च. चि. अ. २१)

* 'संप्राप्तिमाह—मुहुर्मुहुरित्यादि । मुहुर्मुहुर्वारंवारं, यकृत्प्लीहान्त्राणि मुखादिवेत्यत्र मुखशब्देन प्राणोदकान्नवाहीनि स्रोतांसि भण्यन्ते, उक्तं च तन्त्रान्तरे—"प्राणोदकान्नवाहीनि स्रोतांसि विकृतोऽनिलः । हिक्काः करोति संरुध्य तासां लिङ्गं पृथक्छृणु"—इति । हिक्काशब्दोऽत्र द्विरावर्तयितव्यः; तेन हिक्केति हिक्कास्वरूपकथनं स्यात्, स घोषवानित्यादिना हिक्कानिरुक्तिकथनमिति । सस्वन इत्यनेन गतत्वात् सघोषवानित्यभिधानं निरुक्तिप्रदर्शनार्थम्' (आ० द०) ॥ ३ ॥

† 'अन्नजेत्यादीनि तासां नामानि' (आ० द०) ॥ ४ ॥

‡ 'कुक्षेरुदरस्य, आटोपः पूर्णत्वमिव' (आ० द०) ॥ ५ ॥

१ 'अन्नजादीनां' इति क. ।

पूर्वरूपमाह—कण्ठोरसोरित्यादि । वदनस्य कषायता वातात्, नतु कफान्माधुर्यं, व्याधिप्रभावात् ॥ ५ ॥

***पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः ।**
हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ॥ ६ ॥
(सु. उ. अ. ५०)

अन्नजाया लक्षणमाह—पानान्नैरित्यादि । हिक्कयति हिक्कां करोति ॥ ६ ॥

†चिरेण यमलैर्वेगैर्या हिक्का संप्रवर्तते ।
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्दिशेत् ॥ ७ ॥
(सु. उ. अ. ५०)

यमलामाह—चिरेणेत्यादि । कम्पयन्ती शिरोग्रीवमित्युपलक्षणं, तेन चरकोक्तप्रलापमूर्च्छावमितृष्णावैचित्त्यजृम्भाविप्लुताक्षत्वमुखशोषा बोध्या इति **गयदासः** ॥ ७ ॥

‡प्रकृष्टकालैर्या वेगैर्मन्दैः समभिवर्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधाविता ॥ ८ ॥
(सु. उ. अ. ५०)

क्षुद्रामाह—प्रकृष्टेत्यादि । प्रकृष्टकालैश्चिरेण । जत्रु कण्ठोरसोः सन्धिरिति **जेज्जटः**; जत्रु ग्रीवामूलं, तद्ग्रहणेनैव हृदयक्लोमकण्ठग्रहणमिति **गयदासः** ॥ ८ ॥

§नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता ॥ ९ ॥
(सु. उ. अ. ५०)

गम्भीरामाह—नाभीत्यादि । नाभिप्रवृत्तेति नाभितः प्रभृति संजाता, अत एवास्या गम्भीरत्वम् । अनेकोपद्रववती तृष्णाज्वरादियुक्ता ॥ ९ ॥

§मर्माण्युत्पीडयन्तीव सततं या प्रवर्तते ।
महाहिक्केति सा ज्ञेया सर्वगात्रविकम्पिनी ॥ १० ॥
(सु. उ. अ. ५०)

महतीमाह—मर्माणीत्यादि । मर्माणीति प्रधानानि वस्तिहृदयशिरांसि ॥ १० ॥

* 'शीतैरिति शेषः । अतिसंयुक्तैरिति उपर्युपर्यत्युपयुक्तैः । सहसा पीडितोऽनिलो हृदिस्थः प्राणो वायुरूर्ध्वगतित्वाद्धिक्कयति हिक्कां करोति, सा हिक्का अन्नजेति कथ्यते' (आ० द०) ॥ ६ ॥

† 'या हिक्का यमलैर्वेगैर्युग्मैरुपक्रमैः शिरोग्रीवं कम्पयति चिरकालेन प्रवर्तते तां नामतो यमलामाहुः' (आ० द०) ॥ ७ ॥

‡ 'विकृष्टकालैरित्यादि । विकृष्टकालैश्चिरकालैः, मन्दवेगैः । इयं नामतः क्षुद्रिका' (आ० द०) ॥ ८ ॥

§ 'इयं नामतो गम्भीरा' (आ० द०) ॥ ९ ॥

§ 'इयं नामतो महाहिक्का' (आ० द०) ॥ १० ॥

१ 'प्रवृत्ता' इति क. । २ 'प्राधान्येन नाभिवस्तिहृदयशिरांसि' इति क. ।

आयम्यते हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं नाम्यते यस्य नित्यम् ।
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ ॥
(सु. उ. अ. ५०)

***अतिसंचितदोषस्य भक्तच्छेदकृशस्य च ।**
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः ॥ १२ ॥
आसां या सा समुत्पन्ना हिक्का हन्त्याशु जीवितम् ।
यमिका च प्रलापार्तिमोहतृष्णासमन्विता ॥ १३ ॥
अक्षीणश्चाप्यदीनश्च स्थिरधात्विन्द्रियश्च यः ।
तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा ॥ १४ ॥
(च. चि. अ. २१)

अवस्थायामसाध्यत्वमाह—आयम्यत इत्यादि । आयम्यते विस्तार्यत इव । दृष्टिश्चोर्ध्वं भवतीति शेषः । नाम्यते आकुञ्च्यते देह इति संबन्ध इति **जेज्जटगयदासौ।** ताम्यतीति पाठान्तरे मुह्यति हिक्की । क्षौति छिक्कति । तौ द्वाविति आयम्यत इत्यादिना नित्यमित्यन्तेनैकावस्थो हिक्की, क्षीणेत्यादिनाऽतिमात्रान्तेनापरः; साध्यानामपि मध्ये एवंविधौ वर्जयेदित्यर्थः । गम्भीरामहत्योः स्वभावादेवासाध्यत्वमिति तद्युक्तौ हिक्कमानावन्त्यौ शेषपठितावसाध्यौ; पाठान्तराणि व्याख्याविशेषाश्च विस्तरभयान्न लिखिताः । आसां या सेति आसां साध्यहिक्कानां मध्ये याऽतिसंचितदोषादेर्भवति सा हन्तीति योज्यं, अथवा आसामिति पञ्चविधानामेव । तेन महतीप्रभृतीनां स्वरूपेण यदसाध्यत्वमुक्तं तत्प्रायिकम् । यदाह **जतूकर्णः**,—"आद्या दुःसाध्या; यमिका मोहतृष्णावतः सद्यःप्राणहृत्"—इति । यमिकेत्यादि । यमिका चेत्यनेन चकारात् क्षुद्रा अन्नजा वा या साध्यत्वेनोक्ता सा यमलैर्वेगैर्जायमाना हन्तीति योज्यम् । सैवाक्षीणादेः साध्या भवतीत्याह—अक्षीण इत्यादि । अक्षीणो बलवान् । अदीनः प्रसन्नमनाः । अन्ये तु अन्नजां यमलामित्यादिसुश्रुतग्रन्थपठितां यमलां यमिकाशब्देन व्याचक्षते । तन्न, यमिका च प्रलापार्तीत्यादिश्लोकश्चरके पठितः, अत्र यमला यमिकानाम्ना न पठितैव हिक्केति । यमिकाशब्देनैवार्थगत्या व्यपेतोच्येतेति चेत्; न, तर्हि व्यपेता च प्रलापार्तीत्येवमभिदध्यात् ॥ ११–१४ ॥

†महोर्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ १५ ॥
(सु. उ. अ. ५१)

---

* 'यश्च क्षीणोऽन्नद्वेषी, अतिक्षौति छिक्कति, तां हिक्कां वर्जयेत्, द्वौ चान्त्यौ वर्जयेत् । अन्त्याविति गम्भीरा महती चेति । साध्यानामप्यवस्थाविशेषेणासाध्यत्वमाह—अतिसंचितदोषस्येत्यादि । पुनरवस्थाविशेषेणासाध्यत्वमाह—यमिकेत्यादि । अत्रान्नजा क्षुद्रा च साध्यैव यमलवेगवतोऽसाध्येत्युच्यते; न तु यमला, चरकोक्तत्वात् । स्थिरधात्विन्द्रिय इति स्थिराणि धात्विन्द्रियाणि यस्य स तथा; अन्यथा एतद्विपरीत इति' (आ० द०) ॥ ११—१४ ॥

† 'हिक्काश्वासयोरेकहेतुत्वाद्धिक्कानन्तरं श्वासमाह—महेत्यादि । स महाव्याधिः श्वासत्वे नैक एव सन् विशेषं हेतुलिङ्गभेदं प्राप्य महोर्ध्वादिभेदैः पञ्चधा भिद्यते । तन्त्रान्तरे पञ्चाना-

(वाताधिको भवेत् क्षुद्रस्तमकस्तु कफोद्भवः ।
कफवाताधिकश्चैव संसृष्टश्छिन्नसंज्ञकः ।
श्वासो मारुतसंसृष्टो महानूर्ध्वस्ततो मतः ॥ १२ ॥)

(सु. उ. अ. ५१)

श्वासानाह,—महोर्ध्वेत्यादि । एको विशेषत इति श्वासत्वेनैक एव सन् विशेषं हेतुलिङ्गभेदं प्राप्य पञ्चधा भिद्यते, पञ्चसु श्वासत्वं वेगवदूर्ध्ववातत्वं; यदुक्तमन्यैः,— "श्वासस्तु भस्त्रिकाध्मानसमवातोर्ध्वगामिता"—इति । संख्येयनिर्देशादेव पञ्चप्रकारत्वे सिद्धे पञ्चवचनं तमकभेदस्य प्रतमकस्य पृथक्त्वसंख्यानिरासार्थम् ॥ १५ ॥

*प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च ।
आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च ॥ १६ ॥
†यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः ।
विष्वग्व्रजति संरुद्धस्तदा श्वासान् करोति सः ॥ १७ ॥

(सु. उ. अ. ५१)

संप्राप्तिमाह—यदेत्यादि । स्रोतांसीति हिक्कानिर्दिष्टप्राणोदानवहानि । कफः पूर्वं प्रधानं यस्य स तथा, तेनैव कफेन रुद्धो विमार्गगतिर्विमार्गगत्वेन, विष्वग्व्रजति विष्वग्गच्छतीति, विष्वक् सर्वत इत्यर्थः ॥ १७ ॥

‡उद्धूयमानवातो यः शब्दवद्दुःखितो नरः ।
उच्चैः श्वसिति संरुद्धो मत्तर्षभ इवानिशम् ॥ १८ ॥
प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः ।
विवृताक्ष्याननो बद्धमूत्रवर्चा विशीर्णवाक् ॥ १९ ॥
दीनः प्रश्वसितं चास्य दूराद्विज्ञायते भृशम् ।
महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥ २० ॥

(च. चि. अ. २१)

मपि दोषोत्कटत्वमुक्तम्,—"वातेन क्षुद्रकः श्लेष्मभूयिष्ठस्तमकः स्मृतः । छिन्नः पित्तप्रधानः स्यादन्यौ मारुतकोपजौ"—इति (आ० द०) ॥ १५ ॥

* 'तस्य पूर्वरूपमाह—प्राग्रूपमित्यादि । शूलमुदरे, अध्मानमाटोपः, आनाह आमं शकृद्वा विगुणानिलेन निबद्धमयथावत्प्रवृत्तम् । शङ्खनिस्तोदः शङ्खयोर्व्यथा' (आ० द०) ॥ १६ ॥

† 'तस्य संप्राप्तिमाह—यदेत्यादि । यदा कफपूर्वकः कफप्रधानो वायुः, तेनैव कफेन संरुद्धगतिर्विमार्गगः, प्राणोदकान्नवाहीनि स्रोतांसि संरुध्य, विष्वग्व्रजति सर्वत्र प्रसरति, तदा श्वासान् करोति' (आ० द०) ॥ १७ ॥

‡ 'दुःखितो दुःखयुक्तः, अनिशमनवरतं, क इव? संरुद्धो मत्तर्षभ इव मत्तमहोक्ष इव, विवृते स्तब्धे अक्षिणी नयने आननं च यस्य स तथा । अस्य च श्वासवतः श्वसितमत्यर्थं दूरादेव श्रूयते । अनेन महाश्वासेनोपसृष्टो युक्तः शीघ्रमेव विनश्यति' (आ० द०) ॥ १८–२० ॥

महाश्वासलक्षणमाह—उद्धूयमानेत्यादि। उद्धूयमानवात इति उत् ऊर्ध्वं धूयमानो नीयमानो वातो यस्य स तथा। शब्दवत् सशब्दं यथा भवति, उच्चैर्दीर्घम्। संरुद्धो मत्तर्षभ इवेति स्वरविशेषज्ञापनार्थमयं दृष्टान्तः। ज्ञानं शास्त्रं विज्ञानं तदर्थनिश्चयः[1]। विभ्रान्तलोचनश्चञ्चलनेत्रः। विवृते स्तब्धे अक्ष्यानने यस्य स तथा, नेत्रस्य विभ्रान्तस्तब्धत्वे कालभेदादिति जेज्जटः। विशीर्णवाक् वक्तुमक्षमः, मन्दवचनो वा। दीनः क्लान्तमनाः; हीनमिति पाठान्तरमयुक्तं, दूराद्विज्ञायते भृशमित्यनुपपत्तेरित्याहुः १८–२०

*ऊर्ध्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः।
श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः॥ २१॥
ऊर्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः।
प्रमुह्यन् वेदनार्तश्च शुष्कास्योऽरतिपीडितः॥ २२॥
ऊर्ध्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते।
मुह्यतस्ताम्यतश्चोर्ध्वं श्वासस्तस्यैव हन्त्यसून्॥ २३॥
(च. चि. अ. २१)

ऊर्ध्वश्वासलक्षणमाह—ऊर्ध्वमित्यादिना। ऊर्ध्वमिति विशेषपरं, सर्वश्वासानां तथाविधत्वात्। दीर्घमिति दीर्घकालम्। नच प्रत्याहरत्यध इति न श्वासमधःकरोति दीर्घकालमित्यर्थः। श्लेष्मावृतमुखस्रोता इति श्लेष्मणा आवृतानि मुखं स्रोतांसि च यस्य स तथा। क्रुद्धगन्धवहार्दितः कुपितवातपीडितः, समस्तपाठे तु श्लेष्मावृतमुखस्रोतस्त्वेन क्रुद्धो यो गन्धवहस्तेनार्दितः। विपश्यन् इतस्तत इति इतस्ततो विकृतिं पश्यन्। 'ऊर्ध्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः' इति यदुक्तं तत्र हेतुमाह—ऊर्ध्वश्वास इत्यादि। निरुध्यत इति हृदय एवातिस्तम्भितः स्यात्, अथवा श्वासो वातः सोऽधो न वर्तते; ऊर्ध्वं श्वास ऊर्ध्वश्वासः। ताम्यतो ग्लायतो मुह्यतश्चासून् प्राणान् हन्ति, नान्यथेति॥ २१—२३॥

†यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः।
न वा श्वसिति दुःखार्तो मर्मच्छेदरुगर्दितः॥ २४॥
आनाहस्वेदमूर्च्छार्तो दह्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः॥ २५॥

---

* 'ऊर्ध्वश्वासे पुमान् दीर्घकालमूर्ध्वं श्वसिति, सर्वश्वासानामूर्ध्वगत्वादत्रोर्ध्वमिति विशेषपरम्। श्लेष्मावृतानि मुखसंबन्धीनि स्रोतांसि यस्य स तथा। ऊर्ध्वं दृष्टिर्दर्शनं यस्य स ऊर्ध्वदृष्टिः। विभ्रान्ताक्षः परिक्षिप्तनेत्रः, प्रमुह्यन् मोहमुपगच्छन्, शुष्कास्यः शुष्कमुखः, अरतिः कस्मिन्नपि विषये न चिरावस्थितिः। मुह्यतस्तमसि मज्जत इव, अथवा निश्चेष्टावतः, तस्यैवंविधपुरुषस्य' (आ० द०)॥ २१–२२॥

† 'अथ छिन्नं लक्षयति—य इत्यादि। विच्छिन्नमिव विच्छिन्नमन्तराऽन्तरा विच्छिद्यमानमनुवर्तते सान्तरायमित्यर्थः। सर्वप्राणेन समस्तया शक्त्या, दुःखार्तः सन्, न वा श्वसिति मर्मच्छेदरुगर्दित इति मर्माणि हृद्वस्तिशिरांसि तेषां छेदनेनेव पीडितः'। (आ० द०)॥ २४–२६॥

---

१ 'श्लेष्मावृतमुखानि स्रोतांसि' इति क.।

विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून् ॥ २६ ॥
(च. चि. अ. २१)

छिन्नश्वासलक्षणमाह—यस्त्वित्यादि। विच्छिन्नं सविच्छेदम्। सर्वप्राणेन यावद्बलेन। न वा श्वसिति श्वासं न लभते। मर्मच्छेदरुगर्दित इति हृदयच्छेदवेदनयेव पीडितः। दह्यमानेन वस्तिनोपलक्षितः, एतेन वातस्य पित्तानुबन्धो दर्शितः। विप्लुताक्षश्चञ्चलनेत्रोऽश्रुपूर्णचक्षुर्वा। न वा श्वसिति न वा श्वासं लभते। रक्तैकलोचनत्वं व्याधिप्रभावात्, दोषात्तु द्वयोरपि स्यात्। विचेता उद्विग्नचित्तः। विच्छिन्नो विमोक्षितसन्धिः, पीडित इत्यन्ये, "विहृतः" इति पाठान्तरम् ॥ २४—२६ ॥

*प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च ॥ २७ ॥
करोति पीनसं तेन रुद्धो घुर्घुरकं तथा।
अतीव तीव्रवेगं च श्वासं प्राणप्रपीडकम् ॥ २८ ॥
प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते।
प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः ॥ २९ ॥
श्लेष्मण्यमुच्यमाने तु भृशं भवति दुःखितः।
तस्यैव च विमोक्षान्ते मुहूर्तं लभते सुखम् ॥ ३० ॥
तथाऽस्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम्।
न चापि लभते निद्रां शयानः श्वासपीडितः ॥ ३१ ॥
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णं चैवाभिनन्दति ॥ ३२ ॥
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्तिमान्।
विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते ॥ ३३ ॥
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्धते।
स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः ॥ ३४ ॥
(च. चि. अ. २१)

तमकश्वासलक्षणमाह—प्रतिलोममित्यादि। श्लेष्माणं समुदीर्य चेत्यनेन सामान्यसंप्राप्तिलब्धस्यापि श्लेष्मणः पुनरभिधानादिह विशेषेण कारणत्वं बोधयति। तेन रुद्धः कफेनावृतः। घुर्घुरकं कण्ठे घुर्घुरशब्दम्। प्राणप्रपीडकं प्राणाधिष्ठानहृदयस्य

* 'यदि वायुः प्रतिलोमं वैपरीत्येन स्रोतांसि प्रतिपद्यते प्राप्नोति, तदा स वायुः श्लेष्माणं समुदीर्य ऊर्ध्वप्रेरणया, ग्रीवां शिरश्च संगृह्य समन्ताद्गृहीत्वा, पीनसं करोति, पश्चात्तेनैवावृतः कण्ठे घुरघुरशब्दं करोति, तेन श्वासवेगेन। अमुच्यमाने कफेनातीव दुःखितो भवति। तस्यैव श्लेष्मणो विमोक्षान्ते मुहूर्तं सुखं प्राप्नोतीति। तथेति पार्श्वेऽवगृह्णाति पीडयति परं शयानस्य, आसीनः सन् सुखं लभते।' (आ० द०) ॥ २७–३४ ॥

पीडकम्। प्रताम्यति तमसि प्रविशतीव। सन्निरुध्यते निश्चेष्टो भवतीति **चक्रः**, **जेज्जटस्तु** सन्निरुध्यते 'श्वासः' इतिः' शेषमाह। तस्यैवेति श्लेष्मणः। सुखं सुखमिव। उद्धंसते कण्डूयते। पार्श्वे इति कर्मपदं, अवगृह्णाति पीडयति। उष्णमभिनन्दति वातकफारब्धत्वात्। उच्छ्रिताक्ष उच्छूननेत्रः। ललाटेनेत्युपलक्षणे तृतीया। अवधम्यते गजारूढस्येव सर्वगात्रं चाल्यते ॥ २७—३४ ॥

*ज्वरमूर्च्छापरीतस्य विद्यात्प्रतमकं तु तम्।
उदावर्तरजोजीर्णक्लिन्नकायनिरोधजः ॥ ३५ ॥
तमसा वर्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति।
मज्जतस्तमसीवास्य विद्यात्संतमकं तु तम् ॥ ३६ ॥
(च. चि. अ. २१)

तमकस्यैव पित्तानुबन्धत्वाज्ज्वरादियोगेन प्रतमकसंज्ञामाह—ज्वरेत्यादि। ज्वरमूर्च्छाभ्यां परीतो ज्वरमूर्च्छापरीतः, ज्वरेण मूर्च्छा ज्वरमूर्च्छेति **जेज्जटः**। एतस्यैवापरकारणं लक्षणं चाह—उदावर्तेत्यादि। उदावर्तो रोगः, रजो धूलिः, अजीर्णमामादि, क्लिन्नं विदग्धं, काये वेगानां निरोधः कायनिरोधः; अथवा क्लिन्नकायो **वृद्धनर** इत्याहुः, निरोधो वेगनिरोधः; अथवा कुयोगिनां कुम्भकादिरूपवातनिरोध इति **जेज्जटः**। तमसा अन्धकारेण, मानसदोषेण वा; अत्यर्थमिति इतरकारणापेक्षया विशेषेण; वातकफारब्धोऽपि पित्तसंबन्धाच्छीतैरुपशाम्यतीत्याहुः। संतमकः प्रतमक एवेति। अन्ये तूदावर्तेत्यादिना प्रतमकस्योपसर्गमाहुरिति **जेज्जटः** ॥ ३५ ॥ ३६ ॥

†[1]रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन्।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥ ३७ ॥
हिनस्ति न स गात्राणि न च दुःखो यथेतरे।
न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥ ३८ ॥
नेन्द्रियाणां व्यथां नापि कांचिदापादयेद्रुजम्।
स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः ॥ ३९ ॥
(च. चि. अ. २१

* 'एतस्यैवापरलक्षणं—निरोधो वेगनिरोधः। तमसा अन्धकारेण, मानसतमोगुणादिदोषेण वा। तमस्यन्धकारे मज्जत इवास्य पुरुषस्य तं प्रतमकमाहुः' ॥ ३५ ॥ ३६ ॥

† 'आयासो व्यायामः, तज्जनितः। क्षुद्र इति क्षुद्रश्वासः, अल्पनिदानलिङ्गत्वात् क्षुद्रः। कोष्ठे वातं प्रकोपयन् क्षुद्रश्वासं करोति। स क्षुद्रश्वासो दुःखेन नाङ्गप्रबाधको भवति। किञ्च स गात्राणि न हिनस्ति मारणात्मको न भवति। न च दुःखकारी यथेतरे चत्वारः। इन्द्रियाणां व्यथां नापादयेत्। कांचिदपि रुजं रोगं नापादयेत्। सर्वेषां साध्यत्वमाह—स इत्यादि। स क्षुद्रश्वासो बलिनः पुरुषस्य साध्यः। साध्यासाध्यानाह—क्षुद्र इत्यादि। तेषां श्वासानां क्षुद्रः साध्यतमः, तमको याप्यः, महोर्ध्वच्छिन्नाख्यः संपूर्णलक्षणा असाध्या, दुर्बलस्य तमकोऽसाध्यः' (आ० द०) ॥ ३७–४० ॥

[1] एतच्च 'क्षुद्रो वातमुदीरयन्' इति पाठाभिप्रायेण।

क्षुद्रः साध्यो मतस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥ ४० ॥
(सु. उ. अ. ५१)

क्षुद्रश्वासमाह—रूक्षेत्यादि । रूक्षमन्नपानम् । क्षुद्रोऽल्पनिदानलिङ्गः । उदीरयन् ऊर्ध्वं गच्छन् । इतरे ऊर्ध्वश्वासादयः । स साध्य उक्त इति छेदः । सर्वे महाश्वासादयोऽव्यक्तलक्षणाः सन्तः साध्या इति योज्यम् । त्रयः श्वासा न सिध्यन्ति महोर्ध्वच्छिन्नाः संपूर्णलक्षणाः ॥ ३७–४० ॥

*कामं प्राणहरा रोगा बहवो न तु ते तथा ।
यथा श्वासश्च हिक्का च हरतः प्राणमाशु च ॥ ४१ ॥
(च. चि. अ. २१)

इति श्रीमाधवकरविरचिते माधवनिदाने हिक्काश्वासनिदानं समाप्तम् ॥ १२ ॥

उपेक्षणासम्यगुपक्रमाभ्यां हिक्काश्वासयोः शीघ्रावश्यमारकत्वमाह—काममित्यादि । काममनुमतौ, प्राणहराः सन्निपातज्वरादयः । शेषं सुबोधमिति ॥ ४१ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां हिक्काश्वासनिदानं समाप्तम् ॥ १२ ॥

अथ स्वरभेदनिदानम् ।

†अत्युच्चभाषणविषाध्ययनाभिघात-
संदूषणैः प्रकुपिताः पवनादयस्तु ।
[1]स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ १ ॥
(सु. उ. अ. ५३)

(वातादिभिः पृथक् सर्वैर्मेदसा च क्षयेण च ।)

प्राणोदानदुष्टिसाधर्म्यात् श्वासे च स्वरभेदो भवतीति श्वासानन्तरं स्वरभेदमाह—अत्युच्चभाषणेत्यादि । अध्ययनमुच्चैर्वेदादिपाठः, अभिघातः कण्ठादिदेशे लगुडादिभिराघातः, एतैः संदूषणैरन्यैश्च यथास्वं वातादिकोपनैः, विषं तु सर्वदोषप्रकोपणमेव । स्रोतःसु स्वरवहेषु चतुर्षु, यदुक्तं सुश्रुते,—"द्वाभ्यां भाषते, द्वाभ्यां घोषं करोति"—(सु. शा. स्था. अ. ९) इति; भाषणघोषणयोरल्पत्वमहत्त्वाभ्यां भेदः । प्रतिष्ठां स्थितिं वृद्धिं वा । स इति स्वरभेदः; षड्विधो वातपित्तकफसंनिपातक्षयमेदोजभेदात् ॥१॥

---

*"हिक्काश्वासयोः शीघ्रावश्यमारकत्वमाह-काममित्यादि । प्राणहराः सन्निपातादयो रोगा बहवः सन्ति, ते तथा प्राणहरा न भवन्ति, यथा श्वासश्च हिक्का चैतौ रोगावाशु शीघ्रं प्राणान् हरतः' (आ० द०) ॥ ४१ ॥

†'हिक्काश्वासौ प्राणोदानदुष्ट्या संभवतः, तद्दुष्टिसाधर्म्याच्छ्वासानन्तरं स्वरभेदमाह-अत्युच्चेत्यादि । अभिघातो बलेन छर्दिजनितः, अथवाऽस्थ्यादिकठिनभोज्यजनितः । विषतस्तु त्रिदोषप्रकोपः । एतैः संदूषणैरन्यैश्च यथास्वं वातादिकोपनैर्दुष्टा दोषास्तेषु स्रोतःसु प्रतिष्ठां स्थितिं वृद्धिं वा गताः स्वरं हन्युः स स्वरभेदः' (आ० द०) ॥ १ ॥

---

१ 'स्वरवहेषु स्रोतःसु शब्दवाहिनीषु' इति डल्हणः ।

*वातेन कृष्णनयनाननमूत्रवर्चा
भिन्नं शनैर्वदति गर्दभवत् खरं च ।
(सु. उ. अ. ५३)

वातिकमाह—वातेनेत्यादि । कृष्णत्वं मूत्रादिषु स्वरभेदारम्भकदोषस्य सर्वाङ्ग-व्यापकत्वात्, अर्शोवत् । भिन्नं भिन्नस्वरं, तदेवाह—गर्दभवत् खरमिति, खरं निष्ठुरं-उद्वेजकमिति यावत् ॥—

पित्तेन पीतनयनाननमूत्रवर्चा
ब्रूयाद्गलेन स च दाहसमन्वितेन ॥ २ ॥
(सु. उ. अ. ५३)

पैत्तिकमाह—पित्तेनेत्यादि । गलेनेति विशेष्योपदर्शनं, दाहसमन्वितेनेति विशेषणस्य विशेष्याधीनप्रतीतत्वात्; गलः सदाहो भवतीत्यर्थः ॥ २ ॥

†ब्रूयात्कफेन सततं कफरुद्धकण्ठः
स्वल्पं शनैर्वदति चापि दिवा विशेषात् ।
(सु. उ. अ. ५३)

श्लैष्मिकमाह—ब्रूयादित्यादि । दिवा विशेषादिति दिने सूर्यरश्मिभिः कफस्य मन्दीभावाद्विशेषाद्विशिष्टं वदतीत्यर्थः । 'दिवा विशेषं' इति पाठान्तरे स एवार्थः ॥—

सर्वात्मके भवति सर्वविकारसं-
पत्तं चाप्यसाध्यमृषयः स्वरभेदमाहुः ॥ ३ ॥
(सु. उ. अ. ५३)

सान्निपातिकमाह—सर्वात्मक इत्यादि । सर्वविकारसंपदिति उक्तवातादिस्वरभेद-लिङ्गयोगः । तं चाप्यसाध्यमिति अपिशब्दो भिन्नक्रमे, असाध्यमपि; तेन "सर्वजे क्षयजे चापि प्रत्याख्यायाचरेत् क्रियाम्"–(सु. उ. तं. अ. ५३) इति सुश्रुतवचनमुपपन्नं भवतीति ॥ ३ ॥

‡धूप्येत वाक् क्षयकृते क्षयमाप्नुयाच्च
वागेष चापि हतवाक् परिवर्जनीयः ।
(सु. उ. अ. ५३)

क्षयजमाह—धूप्येतेत्यादि । धूप्येत वागिति सधूमेव निर्गच्छन्ती वेदनयाऽनुभूयते । क्षयकृत इति धातुक्षयकृते स्वरभेदे । क्षयमाप्नुयाच्च वागिति पदच्छेदः । एष च यदा हतवाग्भवति ओजः क्षयाद्वचनाक्षमस्तदा न साध्यः, अन्यथा तु साध्यः; तेन

* 'अन्ये गर्दभवत्स्वरमित्यत्र गर्दभवत्खरमिति पठन्ति, गर्दभस्य वचनाभावात्; 'कण्ठेन' इति शेषः' (आ० द०) ॥—

† 'ब्रूयादित्यत्र कृच्छ्रादिति केचित्पठन्ति' (आ० द०) ॥—

‡ 'धूप्येत वागित्यत्र 'धूमायते' इति पाठान्तरे स एवार्थः । वचनं क्षयमाप्नुयात् 'वातात्' इति शेषः' (आ० द०) ॥—

१ 'सर्वेषु' इति क. ।

प्रलाख्योऽयं क्रियाकरणमुपपन्नं भवति । एषु चापीति । पाठे वातादिस्वरभेदेषु मध्ये इतर्वागसाध्यः, किंलयं पाठटीकाकारैर्न व्याख्यातः ॥—

*अन्तर्गतस्वरमलक्ष्यपदं चिरेण
मेदोऽन्वयाद्वदति दिग्धगलस्तृषार्तः ॥ ४ ॥
(सु. उ. अ. ५३)

मेदोजलक्षणमाह—अन्तर्गतेत्यादिना । अन्तर्गतस्वरमिति क्रियाविशेषणं, 'अन्तर्गतं स्वरं' इति पाठे तु कण्ठस्यान्तर्गतं यथा भवति तथा स्वरं वचनं वदतीति योज्यं; 'अन्तर्गलं' इति पाठान्तरे गलस्यान्तरिति अन्तर्गलं स्वरं वदतीत्यर्थः । दिग्धगल इति श्लेष्मणा मेदसा वा लिप्तगल इत्यर्थः । तृषार्तश्च मेदोरुद्धस्रोतस्त्वात् ॥ ४ ॥

†क्षीणस्य वृद्धस्य कृशस्य वाऽपि चिरोत्थितो यश्च सहोपजातः ।
मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥ ५ ॥
(सु. उ. अ. ५३)

इति श्रीमाधवकरविरचिते माधवनिदाने स्वरभेदनिदानं समाप्तम्

उक्तवातादिजानामेवावस्थायामसाध्यत्वमाह—क्षीणस्येत्यादिना सहोपजात इत्यन्तेन । क्षीणस्य क्षीणमांसस्य । कृशस्य अवलस्य । सहोपजातो जन्मप्रभृतिवद्धः 'काकस्वर' इति लोके । 'सहोपजात' इत्यत्र 'मदोपजात' इति पाठान्तरं, मदो रोगविशेषः । मेदस्विनोऽतिस्थूलस्य मेदसाऽऽवृतस्रोतस्त्वेन यो जातः; अमेदस्विनस्तु मेदोदुष्ट्या यो जातः स साध्यः पूर्वमुक्त इति न विरोधः । सर्वसमुद्भवश्चावगाढः संपूर्णलिङ्गो वाऽसाध्यो द्रष्टव्य इति ॥ ५ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां स्वरभेदनिदानं समाप्तम् ॥ १३ ॥

अथारोचकनिदानम् ।

‡वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः,
(च. चि. अ. २६)

ऊर्ध्वगविकारसाधर्म्यादरोचकमाह—वातादिभिरित्यादि । एकैकशो वातादिभिस्त्रयः,

---

* 'मेदोन्वयान्मेदःसंबन्धात् । 'मेदश्चयात्' इति केचित्पाठान्तरं पठन्ति, मेदश्चयान्मेदोवृद्धेरिति; 'मेदःक्षयात्' इति पाठान्तरं, अत्र स्वरशब्दो लुप्तो मध्येऽतिदिष्टो द्रष्टव्यः, तेन मेदसा स्वरक्षयादित्यर्थः' (आ० द०) ॥ ४ ॥—

† 'असाध्यमाह—क्षीणस्येत्यादि । क्षीणस्य अवलस्य, कृशस्य क्षीणमांसस्य' (आ० द०) ॥५॥

‡ 'शोकभयादिनाऽऽगन्तुरेक एव गणनीयः, तन्त्रान्तरेऽपि—"अरोचको भवेद्दोषैरेको हृदयसंश्रयैः । सन्निपातेन मनसः संतापेन च पञ्चमः"—इति । एतैर्हेतुभिररोचका भवन्ति । मनोघ्नाशनमुच्छिष्टकृमिक्लिन्नादि, रूपं शरीरम्लयथुगतं, गन्धः पूतिः, तैः' (आ० द०)—

१ 'तद्गतं' इति पा० ।

संनिपातेनैकः, शोकादिनौ गन्धान्वेनागन्तुरेक एव गणनीयः, यतः पञ्चानामेकं लक्षणं वक्ष्यति; सुश्रुते चोक्तं,—"भक्तोपघातमिह पञ्चविधं वदन्ति—" (सु. उ. तं. अ. ५७) इति । शोकादिजस्तु यद्यपि वातादिजः, तथाऽपि हेतुप्रत्यनीकचिकित्साकरणार्थं पृथगुक्तः । अतिलोभोऽन्नाहितस्य सततोपयोगहेतुतया दोषप्रकोपक इति दर्शयति । अरोचकाः स्युरिति छेदः ॥—

***परिहृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन ॥ १ ॥**

(च. चि. अ. २६)

वातिकलक्षणमाह—परीत्यादि । परिहृष्टदन्त इति अम्लभक्षणेनेव ॥ १ ॥

†कट्वम्लमुष्णं विरसं च पूति पित्तेन विद्यात्

(च. चि. अ. २६)

पैत्तिकलक्षणमाह—कट्वित्यादि । कटुशब्दोऽत्र तिक्तवाची । यदाह विदेहः,—"पित्तेन तिक्तास्यविदाहकृत् स्यात्, स्वाद्वास्यहृल्लासकरः कफेन"—इति—

‡लवणं च वक्त्रम् ।
माधुर्यपैच्छिल्यगुरुत्वशैत्यविबद्धसंबद्धयुतं कफेन ॥ २ ॥

(च. चि. अ. २६)

श्लैष्मिकलक्षणमाह—लवणमित्यादि । लवणं वक्त्रमिति विदग्धस्य श्लेष्मणो लवणरसत्वात् । उक्तं हि सुश्रुते—"श्लेष्मा विदग्धो लवणः स्मृतः, पित्तं विदग्धमम्लम्"— (सु. सू. स्था. अ. ४०) इति । विबद्धसंबद्धयुतमिति विबद्धं च तत् संबद्धयुतं चेति विबद्धसंबद्धयुतम् । अत्र विबद्धं बद्धमिव, भक्षणाद्यसामर्थ्यात्; संबद्धयुतं 'कफस्य' इति शेषः, भावे क्तः, कफलिप्तमित्यर्थः । 'विदग्धसंबद्धयुतं' इति पाठान्तरं सुगमम् । 'विबद्धसन्नद्धयुतं' इति पाठे विबद्धः सन्नद्धः स च प्रकृतत्वात् कफस्य, सन्नद्धो बद्धः, 'णह' बन्धने इत्यस्माद्धातोः पूर्ववत् क्तादि । 'विबद्धसंस्तम्भयुतं' इति काश्मीराः ॥ २ ॥

§अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।
स्वाभाविकं चास्यमथारुचिश्च

(च. चि. अ. २६)

* 'कषायवक्त्र इति लोध्रचर्वितस्येव' (आ० द०) ॥ १ ॥—

† 'विरसमिति रोगस्वभावात्, अन्यथा वातेन विरसास्यता । पित्तेन पूति दुर्गन्धं जानीयात् । लवणं च वक्त्रमिति कफजलक्षणे पठनीयं, यतो विदग्धः श्लेष्मा लवणभावमुपैति' (आ० द०) ॥—

‡ 'कफेन लवणं च वक्त्रमिति योज्यं, माधुर्यादियुतमिति वक्त्रमेव' (आ० द०) ॥ २ ॥

§ 'अशुचिरुच्छिष्टं, स्वाभाविकं चास्यमिति अविकृतमुखरसत्वं न तु वातादिवद्वक्त्रकषायत्वादिकं, अथारुचिरिति विशेषत्वम्' (आ० द०) ॥—

१ 'शोकादीनामागन्तुत्वेन' इति क. । २ 'वातजः' इति क. ।

आगन्तुजमाह—अरोचक इत्यादि। अहृद्यगन्धो घ्राणोद्वेजको गन्धः। स्वाभाविकं चास्यमिति अविकृतमुखरसत्वं, न तु वातादिवत् कषायत्वादि॥—

*त्रिदोषजे नैकरसं भवेत्तु॥ ३॥
(च. चि. अ. २६)

त्रिदोषजमाह—त्रिदोषज इत्यादि। त्रिदोषजे नैकरसमिति वातजाद्युक्तकषायाद्यनेकरसम्॥ ३॥

†हृच्छूलपीडनयुतं पवनेन, पित्तात्
तृड्दाहचोषबहुलं, सकफप्रसेकम्।
श्लेष्मात्मकं, बहुरुजं बहुभिश्च विद्या-
द्वैगुण्यमोहजडताभिरथापरं च॥ ४॥
(च. चि. अ. २६)

इति श्रीमाधवकरविरचिते माधवनिदानेऽरोचकनिदानं समाप्तम्॥ १४॥

वातादिभेदेन मुखविकृतिमभिधायान्यदेशविकृतिमाह,—हृच्छूलेत्यादि—। हृदि शूलेन पीडनं हृच्छूलपीडनम्। चोषश्चूषणवत् पीडा। बहुभिरिति त्रिदोषैः। वैगुण्यमोहजडताभिरथापरमित्युपलक्षणे तृतीया, वैगुण्यं मनसो व्याकुलत्वम्। अपरमिति दोषजादन्यमागन्तुजमित्यर्थः। सत्यामपि बुभुक्षायामभ्यवहारासामर्थ्यमरुचिः, अभिलषितमप्यन्नं दीयमानं नाभ्यवहरतीत्यन्नानभिनन्दनं अन्नस्य श्रवणस्मरणदर्शनगन्धस्पर्शनैर्यत्रोद्विजते स भक्तद्वेषः; एवं त्रिविधोऽपि रोगश्चरकसुश्रुताभ्यामरोचकशब्देन संगृहीतः। उक्तं हि वृद्धभोजेन,—"प्रक्षिप्तं तु मुखे चान्नं जन्तोर्न स्वदते मुहुः। अरोचकः स विज्ञेयो, भक्तद्वेषमतः शृणु॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वाऽपि भोजनम्। द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते॥ कुपितस्य भयार्तस्य अभिचारहतस्य च। यस्य नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते"—इति॥ ४॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामरोचकनिदानं समाप्तम्॥ १४॥

---

* 'नैकरसमिति अनेकरसमास्यमित्यर्थः' (आ॰ द॰)॥ ३॥

† 'विद्यादिति अरोचकमिति शेषः। श्लेष्मात्मकं सकफप्रसेकं विद्यात्। बहुरुजमनेकपीडाकरम्।' (आ॰ द॰)॥ ४॥

---

१ 'घ्राणोद्वेजकः' इत्यातङ्कदर्पणे पाठः।

अथ छर्दिनिदानम् ।

*दुष्टैर्दोषैः पृथक् सर्वैर्बीभत्सालोचनादिभिः ।
छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥ १ ॥
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति ।
अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः ॥ २ ॥
श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः ॥ ३ ॥
बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् ।
छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः ॥ ४ ॥
(सु. उ. अ. ४९)

छर्द्यामप्यरुचेर्भावात्तथाऽरोचकवत्पञ्चविधत्वादरोचकानन्तरं छर्दिः, तस्या निदानं निरुक्तिं चाह—दुष्टैरित्यादि । बीभत्सालोचनं विकृतिदर्शनं, आदिग्रहणेनानिष्टगन्धभक्षणादीनां ग्रहणम् । नार्याश्चापन्नसत्त्वाया इति गर्भिण्याः, तस्या गर्भोत्पीडनेन वातवैगुण्याच्छर्दिः । छादयन्नाननमिति वेगैर्मुखं छादयन् पूरयन्, अर्दयन् पीडयन्, अङ्गभञ्जनैरङ्गभेदैः । छादयति मुखं, अर्दयति चाङ्गानीति छर्दिः; 'छद अपवारणे' 'अर्द हिंसायां' अनयोः पृषोदरादित्वेन रूपसिद्धिः ॥ १–४ ॥

†हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥ ५ ॥
(सु. उ. अ. ४९)

पूर्वरूपमाह—हृल्लासेत्यादि । उद्गाररोध उद्गाराप्रवृत्तिः । प्रसेको मुखप्रसेकः, तस्य लवणत्वं प्रभावात्, आमाशयोत्क्लेशभवत्वेन कफविदाहाद्वा; तनुरघनोऽल्पो वा ॥ ५ ॥

‡हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायम् ।
कृच्छ्रेण चाल्पं महता च वेगेनार्तोऽनिलाच्छर्दयतीह दुःखम् ॥ ६ ॥
(च. चि. अ. २३)

---

* 'एतैः कारणैर्वक्ष्यमाणैर्दुष्टैर्दोषैश्छर्दयः पञ्च भवन्ति । वातादिभिस्त्रयः, त्रिदोषैणैका, बीभत्सादिभिरेका, एवं पञ्च । निदानपूर्वां संप्राप्तिमाह–अतीत्यादि । बीभत्सैर्हेतुभिश्चान्यैरिति पूयामेध्यादिदर्शनगन्धास्वादनैर्घृणाकारिभिः । वेगैर्मुखं प्रति प्रधावितो दोष उदानो वायुश्छर्दिं कुर्यादित्यर्थः' (आ० द०) ॥ १–४ ॥

† 'छर्दीनामिदं पूर्वरूपम् ।' (आ० द०) ॥ ५ ॥

‡ 'वाताच्छर्दयतीति योज्यम् । कृच्छ्रेण कष्टेन, अल्पं स्तोकं, महता वेगेन' (आ० द०) ॥ ६ ॥

वातजाया लक्षणमाह—हृत्पार्श्वेत्यादि । शीर्षनाभ्यर्तिः मस्तके नाभौ च शूलं, तोदैरित्यनन्तरं 'युक्त' इति शेषः, उपलक्षणे वा तृतीया । आर्तो नरश्छर्दयतीति योज्यम् । किंभूतं छर्दयतीत्याह—उद्गारेत्यादि । उद्गारशब्दाभ्यां प्रबलमुद्गारशब्दप्रबलम् । विच्छिन्नं सान्तरवेगमल्पद्रवं वा, वातस्य स्वतो द्रवत्वाभावात् । तनुकमघनम् । कषायं कषायरसं, कषायस्य वातकृतत्वात् ॥ ६ ॥

*मूर्च्छापिपासामुखशोषमूर्धताल्वक्षिसन्तापतमोभ्रमार्तः ।
पीतं भृशोष्णं हरितं सतिक्तं धूम्रं च पित्तेन वमेत्सदाहम् ॥ ७ ॥
(च. चि. अ. २३)

पित्तजामाह—मूर्च्छेत्यादि । तमोऽन्धकारदर्शनमिव । धूम्रं कृष्णलोहितवर्णम् ॥ ७ ॥

†तन्द्रास्यमाधुर्यकफप्रसेकसन्तोषनिद्रारुचिगौरवार्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्धं सरोमहर्षोऽल्परुजं वमेत्तु ॥ ८ ॥
(च. चि. अ. २३)

कफजामाह—तन्द्रेत्यादि । आस्यमाधुर्यं मुखस्य मधुररसत्वम् । सन्तोष इति सन्तोष इव सन्तोषः, अन्नानभिलाष इत्यर्थः; तृप्तो हि नान्नमभिलषति । अरुचिरभ्यवहारासामर्थ्यम् । स्वादु मधुरम् । विशुद्धमतिशुभ्रं, सुश्रुते 'शुक्लं हिमं सान्द्रकफं कफेन' (सु. उ. तं. अ. ४९) इति पाठात् ॥ ८ ॥

‡शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबला प्रसक्तम् ।
छर्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥९॥
(च. चि. अ. २३)

त्रिदोषजामाह—शूलेत्यादि । शूलादिभिः प्रमोहान्तैः प्रबला शूलादिप्रबला । प्रसक्तं निरन्तरम् । त्रिदोषादित्यत्र 'त्रिदोषा' इति पाठान्तरे त्रिदोषजेत्यर्थः ॥ ९ ॥

§विट्स्वेदमूत्राम्बुवहानि वायुः स्रोतांसि संरुध्य यदोर्ध्वमेति ।
उत्सन्नदोषस्य समाचितं तं दोषं समुद्धूय नरस्य कोष्ठात् ॥ १० ॥
विण्मूत्रयोस्तत्समगन्धवर्णं तृट्श्वासहिक्कार्तियुतं प्रसक्तम् ।
प्रच्छर्दयेद्दुष्टमिहातिवेगात्तयाऽर्दितश्चाशु विनाशमेति ॥ ११ ॥
(च. चि. अ. २३)

---

* 'मूर्ध्नि शिरसि ताल्वक्ष्णोश्च संतापवान् । भ्रमश्चक्रारूढस्येव, पदार्थस्यान्यथाज्ञानं वा, वैरार्तः । कीदृशं वमेदित्याह-पीतमित्यादि । भृशोष्णमत्युष्णं, हरितं शाकवर्णं, पित्तेनेति योज्यम्' (आ० द०) ॥ ७ ॥

† 'एतैरुपद्रवैरार्तः स्निग्धादिकं वमेत् । सुश्रुते-"शुक्लं हिमं सान्द्रकफं कफेन"-इति । अल्परुजमिति कफस्य द्रवरूपत्वात् सुखेन निःसरणमित्यर्थः' ॥ ८ ॥

‡ 'त्रिदोषाया छर्दिस्तया वमतां नृणामित्यर्थः' (आ० द०) ॥ ९ ॥

§ 'वायुः कोष्ठादुद्धूय ऊर्ध्वं नीत्वेति । विट् दोषान् स्वेदादिकान् धातुमलान् वा स्वस्थानात् संचाल्योर्ध्वमेत्यागच्छति' (आ० द०) ॥ १० ॥ ११ ॥

असाध्यामाह—विडित्यादि । उत्सन्नदोषस्य उद्गतदोषस्य । दोषमिति पित्तं कफं वा, स्वेदादिकान् वा तद्दुष्टान् धातुमलान् । तदिति यस्माद्विडादिवाहिस्रोतोदुष्टिस्ततो हेतोर्विण्मूत्रयोः समगन्धवर्णं छर्दयतीति योज्यम् । इयं तु छर्दिर्विकृतिविषमसमवायारब्धा त्रिदोषजेति केचित्, अन्ये त्वाहुः,-सर्वा एव छर्दयः प्रबला एवंविधाः सत्योऽसाध्याः स्युरिति ॥ १० ॥ ११ ॥

***बीभत्सजा दौर्हृदजाऽऽमजा च ह्यसात्म्यजा च क्रिमिजा च या हि।**
सा पञ्चमी तां च विभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ ॥ १२॥
(सु. उ. अ. ४९)

आगन्तुजामाह—बीभत्सजेत्यादि । दौर्हृदजा दौर्हृदालाभजा, आमजा अजीर्णजा, असात्म्यजा असात्म्यभक्षणादिसंभूता, क्रिमिजा कोष्ठक्रिमिसंभवा; बीभत्सजेत्यादिना क्रिमिजान्तेनैकत्वेनैव गणनीया, आगन्तुजत्वसामान्यात्; आगन्तुज्वरवत् । सा पञ्चमीति त्रिदोषजापेक्षया; यदि तु बीभत्सजापेक्षया क्रिमिजा पञ्चमीति गण्यते, तदा तां च विभावयेद्दोषोच्छ्रयेणैवेत्यनेन क्रिमिजाया एव दोषसंबन्धः स्यात्, ततश्च बीभत्सजादीनां चिकित्सोपयोगी दोषसंबन्धो न लभ्यते । अन्ये तु तद्दोषपरिहारार्थं 'सा पञ्चमी ताश्च' इति बहुवचनान्तं पठन्ति, एवं सत्यन्तर्गणनया न प्रयोजनमित्यन्तर्गणनां नाद्रियन्ते । कथमत्र दोषोच्छ्रयो विभावनीय इत्याह—यथोक्तमादाविति ।—आदौ वातादिलक्षण इत्यर्थः ॥ १२ ॥

†शूलहृल्लासबहुला क्रिमिजा च विशेषतः ।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १३ ॥
(सु. उ. अ. ४९)

क्रिमिजाया लक्षणमाह—शूलेत्यादि । क्रिमिहृद्रोगतुल्येन लक्षणेन लक्षितेति क्रिमिहृद्रोगे क्रिमिलक्षणात् (णं) यत् पीडादिकं तदस्यां भवतीत्यर्थः ॥ १३ ॥

‡क्षीणस्य या छर्दिरतिप्रसक्ता सोपद्रवा शोणितपूययुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां, साध्यां चिकित्सेन्निरुपद्रवां च॥१४॥
(च. चि. अ. २३)

इति श्रीमाधवकरविरचिते माधवनिदाने छर्दिनिदानं समाप्तम् ॥ १५ ॥

असाध्यलक्षणमाह—क्षीणस्येत्यादि । सचन्द्रिकामिति मेदःप्रभृतिधातूनां स्नेहः प्रवर्तमानो मयूरपिच्छचन्द्रिकावत् प्रतिभाति निरुपद्रवामिति । कासाद्युपद्रवरहिताम् ।

---

* 'बीभत्सजा पूयामेध्यादिदर्शनगन्धस्वादजा, आपन्नसत्त्वायाः स्त्रिया दौर्हृदालाभजा, एनामागन्तुजां दोषोच्छ्रयेणैव जानीयात् । आदाविति पूर्वोक्तेन' (आ० द०) ॥ १२ ॥

† 'क्रिमिजाया विशेषलक्षणमाह—शूलेत्यादि । कृमिजाया अयं विशेषः—हृच्छूलहृल्लासाधिका क्रिमिजहृद्रोगतुल्यलक्षणेन च लक्षितेति; यथा—"उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत्"—इति' (आ० द०) ॥ १३ ॥

‡ 'असाध्यां साध्यां चाह—अतिप्रसक्ता अतिशयेन निरन्तरा, सोपद्रवा वक्ष्यमाणोपद्रवयुक्ता । इत्थं पञ्चविधामपि छर्दिमसाध्यां प्रवदेत् वर्जयेदित्यर्थः । निरुपद्रवां चिकित्सेत् 'भिषक्' इति शेषः' (आ० द०) ॥ १४ ॥

तदुक्तं,—"कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेव च । हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः"—इति ॥ १४ ॥

*(कासश्वासोऽज्वरो हिक्का तृष्णा वैचित्त्यमेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥ १५ ॥)
(च. चि. अ. २३)

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां छर्दिनिदानं समाप्तम् ॥ १५ ॥

अथ तृष्णानिदानम् ।

†भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्ध्वं चितं पित्तविवर्धनैश्च ।
पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम् ।
स्रोतस्स्वपांवाहिषु दूषितेषु दोषैश्च तृट् संभवतीह जन्तोः ॥ १ ॥
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथा ह्यामसमुद्भवा च ।
भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु ॥ २ ॥
(सु. उ. अ. ४८)

छर्देस्तृष्णोपद्रवत्वाच्छर्द्यनन्तरं तृष्णानिदानं, तस्याः संप्राप्तिमाह—भयेत्यादि । पित्तविवर्धनैरिति कट्वम्ललोष्णादिभिः क्रोधोपवासादिभिश्च स्वस्थान एव संचितं कुपितं च पित्तं, वातश्च भयश्रमबलक्षयैः कुपितः, ऊर्ध्वं प्रसरत् पिपासां जनयति । ताल्विस्युपलक्षणं, तेन क्लोमाद्यपि बोध्यं, तस्य पिपासास्थानत्वेनोक्तत्वात् । चरकेऽप्युक्तं—"रसवाहिनीश्च धमनीर्जिह्वामूलगलतालुक्लोम्नः । संशोष्य नृणां देहे कुरुतस्तृष्णां महाबलावेतौ हि" (च. स्था. चि. अ. २२)—इति । अक्षकफामजानां संप्राप्तिमाह—स्रोतःस्वित्यादि । ननु, अपांवाहिष्विति बहुवचनं विरुद्धं, 'द्वे उदकवहे' (सु. शा. स्था. अ. ९)—इति सुश्रुतेनोक्तत्वात् । नैवं, तयोरेवानेकप्रतानयोगादिति । दोषैरिति अक्षकफामैः, दुष्टिकर्तृत्वाद्दुष्टदोषसंबन्धाद्वाऽक्षामयोरपि दोषत्वमिति गदाधरः । तिस्र इति वातादिभिः प्रत्येकम् । क्षतजेति क्षतनिमित्ता प्राणिनां या भवति । चतुर्थीत्यनेनोक्तानां चतसृणां सुखसाध्यत्वं बोधयति, अन्यासां तु कष्टसाध्यत्वम् ॥ १ ॥ २ ॥

---

* 'तस्या उपद्रवमाह—कास इत्यादि । वैचित्त्यं विमनश्चित्तता' (आ० द०) ॥ १५ ॥

† 'स्वस्थाने हृदि संचितं, तालुप्रपन्नमिति सवातं पित्तं तालुगतमित्यर्थः । क्षयादन्या पञ्चमी, आमसमुद्भवा षष्ठी, भक्तोद्भवा सप्तमिकेति, क्रमेण तासां लक्षणानि जानीहि' (आ० द०) ॥ १ ॥ २ ॥

---

१ ताल्वोष्ठकण्ठास्यविशोषदाहसंतापमोहभ्रमविप्रलापाः ।
पूर्वाणि रूपाणि भवन्ति तासामुत्पत्तिकाले तु विशेषतो हि ॥

२ 'गयदासः' इति क. ।

*क्षामास्यता मारुतसंभवायां तोदस्तथा शङ्खशिरःसु चापि ।
स्रोतोनिरोधो विरसं च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥ ३ ॥
(सु. उ. अ. ४८)

वातजामाह—क्षामास्यतेत्यादि । क्षामास्यता शुष्कदीनमुखत्वम् । स्रोतोनिरोध इति रसाम्बुवाहिधमनीनिरोधः । शीताभिरद्भिरित्यनेन वायोः शीतस्य शीताम्बुना वृद्धिरित्यनुपशयनिदर्शनम् । चकाराच्चरकोक्तनिद्रानाशस्य ग्रहणम् । यदाह चरकः,—"निद्रानाशः शिरसो भ्रमस्तथा शुष्कगलताल्वः" (च. चि. स्था. अ. २२) इति ॥ ३ ॥

†मूर्च्छान्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः ।
शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिदूयनं च ॥ ४ ॥
(सु. उ. अ. ४८)

पित्तजामाह—मूर्च्छेत्यादिना । विलापोऽत्र प्रलापः । प्रततश्च शोषोऽतीव महती तृष्णा । शीताभिनन्दा शीतेच्छा, 'गुरोश्च हलः'—इत्यकारप्रत्ययः । परिदूयनमुपतापः, 'परिधूम(प)नं' इति पाठेऽन्तःक्षोभणं, धूमनिर्गम इव वा । चकारात् पीतविण्मूत्रनेत्रत्वादयो ग्राह्याः ॥ ४ ॥

‡वाष्पावरोधात्कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा तु ।
निद्रा गुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रम् ॥ ५ ॥
(सु. उ. अ. ४८)

श्लेष्मजामाह—वाष्पेत्यादि । स्वकारणकुपितेन कफेनोपरिष्टादाच्छादितेऽन्तरग्नौ कफावरुद्धवाष्पेण पावकोष्मणाऽधोगतेनाम्बुवहस्रोतःशोषणात् कफजा तृष्णा भवति । ननु, कफजा तृष्णाऽनुपपन्ना ? कफस्य वृद्धस्य केवलद्रवस्य पिपासाकर्तृत्वायोगात्, वातपित्तयोरेव तृष्णाकर्तृत्वेनोक्तत्वात् । यदुक्तं,—"पित्तं सवातं कुपितं नराणां"—इत्यादि । चरकेऽप्युक्तं—"नाग्नेर्विना तर्षः पवनाद्वा, तौ हि शोषणे हेतू"—(च. चि. स्था. अ. २२) इति । सुश्रुतेऽप्युक्तं,—"मद्यस्याग्नेयवायव्यगुणावम्बुवहानि तु । स्रोतांसि शोषयेयातां ततस्तृष्णा प्रजायते" (सु. उ. तं. अ. ४७)—इति । अत आह—तथेति ।—उक्तप्रकारेण कफाग्नेर्वाष्पावरोधादिना, नतु स्वगुणेन; अत एव चरके कफजा तृष्णा न पठितैव, सुश्रुतेन तु चिकित्साभेदार्थं पठिता, हारीतेनापि सपित्तेनैव श्लेष्मणा तृष्णा पठिता न तु केवलेन । यदाह,—"स्वाद्वम्ललवणा-

---

* 'क्षामास्यता शुष्कदीनमुखत्वं, वक्त्रं चर्वितुं वाऽसामर्थ्यमित्येके । शङ्खशिरःस्विति शङ्खयोः शिरसि वा, तोदो व्यथाविशेषः, शङ्खयोर्द्वित्वेन बहुवचनत्वम् । स्रोतोनिरोधः शब्दाश्रवणमिति' (आ० द०) ॥ ३ ॥

† 'विलापो विविधप्रकारेण भाषणं, रक्तेक्षणत्वं रक्तनेत्रत्वं, परिदूयनमित्यत्र 'परिधूपनं' इति पाठान्तरं, तत्रान्तःक्षोभणं धूमस्योद्गिरणमिव वा' (आ० द०) ॥ ४ ॥

‡ 'तया तृष्णया पीडितो मनुष्योऽतितरां कृशो भवति, धातूनामनुपचयात्' (आ० द०) ॥ ५ ॥

जीर्णैः क्रुद्धः श्लेष्मा सहोष्मणा। प्रपद्याम्बुवहं स्रोतस्तृष्णां संजनयेन्नृणाम्॥ शिरसो गौरवं तन्द्रा माधुर्य वदनस्य च। भक्तद्वेषः प्रसेकश्च निद्राधिक्यं तथैव च॥ एतैर्लिङ्गैर्विजानीयात्तृष्णां कफसमुद्भवाम्"-इति॥ ५॥

*क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु।
(सु. उ. अ. ४८)

क्षतजामाह—क्षतस्येत्यादि।-शस्त्रादिक्षतयुक्तस्य॥—

†रसक्षयाद्या क्षयसंभवा सा तयाऽभिभूतश्च निशादिनेषु॥ ६॥
पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः।
रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत्॥ ७॥
(सु. उ. अ. ४८)

क्षयशब्दस्यानेकविषयत्वात् क्षयजां विशेषयन्नाह—रसक्षयादित्यादि। पेपीयते पुनः पुनः पिबति; एतच्च विशेषपरं, सर्वतृष्णासु तथाभूतत्वात्। यदाह सुश्रुतः,—"सततं यः पिबेद्वारि न तृप्तिमधिगच्छति। पुनः काङ्क्षति तोयं च तं तृष्णार्दितमादिशेत्"-(सु. उ. तं. अ. ५८) इति। रसक्षयोक्तानि च लक्षणानि सुश्रुतोक्तानि। तद्यथा,—"रसक्षये हृत्पीडा कम्पः शोषः शून्यता तृष्णा च"-(सु. सू. स्था. अ. १५) इति। तस्यां क्षयजायां, अशेषेण कार्त्स्न्येन॥ ६॥ ७॥

‡त्रिदोषलिङ्गाऽऽमसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री।
(सु. उ. अ. ४८)

आमजामाह—त्रिदोषेत्यादि। त्रिदोषलिङ्गा त्रिदोषलिङ्गयुक्ता। आमादजीर्णात्त्रिदोषकोपः स्यादिति॥—

स्निग्धं तथाऽम्लं लवणं च भुक्तं गुर्वन्नमेवाशु तृषां करोति॥ ८॥
(सु. उ. अ. ४८)

भुक्तोद्भवामाह—स्निग्धमित्यादि। चकारात् कटु च, न तु तिक्तकषायमधुराणीत्यर्थः। गुरुशब्देन मात्रागुरु द्रव्यगुरु च गृह्यते। दृढबलेन तु पञ्च तृष्णाः पठिताः, 'वातपित्तक्षयामोपसर्गजा (च. चि. स्था. अ. २२) इति; तत्र, कफजा आमजायामेवावरुद्धा; क्षतजा वातजायां; भक्तजा च वातजायां, भक्तावरणेन वातप्रकोपात्; पित्तजायां वा, विदाहेन पित्तप्रकोपात्। सुश्रुते चोपसर्गजा यथास्वं दोषजासु। ननु, मद्यजाऽपि सुश्रुतेन मदात्यये (सु. उ. तं. अ. ४७) पठिता, तत् कथं सप्तेत्युच्यते? सत्यं, तस्या वातपित्तजायामवरोधः, एवं दृढबलमतेऽपि॥ ८॥

* 'क्षतस्येति शस्त्रादिक्षतयुक्तस्य नरस्य रुक्पीडनाच्छोणितस्रावाच्च तृष्णा जायते। सा क्षतसंभवा चतुर्थी' (आ० द०)॥—

† 'रसक्षयात्तृष्णा भवति, सा क्षयजा ज्ञेया तया व्याप्तः पुमान् जलं पेपीयते पुनः पुनः पिबति, परं सुखं न लभते, जलेन तृप्तो न भवतीत्यर्थः। तां केचन सन्निपातात्कथयन्ति। अशेषेणेति समस्तान्यपि भवन्ति' (आ० द०)॥ ६॥ ७॥

‡ 'सादोऽङ्गानाम्। एतानुपद्रवान् करोति। आमे ह्यजीर्णात्त्रिदोषकोपः स्यादिति। उक्तं च सुश्रुते—"अजीर्णात्पवनादीनां विभ्रमो बलवान्भवेत्"-इति'॥—

*दीनस्वरः प्रताम्यन् दीनः संशुष्कवक्त्रगलतालुः ।
भवति खलु योपसर्गात्तृष्णा सा शोषिणी कष्टा ॥ ९ ॥
(च. चि. अ. २४)

तत्रोपसर्गजामाह—दीनेत्यादि । दीनस्वरः क्षामवचनः, प्रताम्यन् मुह्यन्, दीनः क्लान्तः । उपसर्गादित्युपद्रवाद्रोगात्, उपद्रवशब्दश्च सामान्येन रोगमात्रेऽपि वर्तते, यथा—"निरुद्धोपद्रवचिकित्सितं व्याख्यास्यामः" (सु. चि. स्था. अ. ३८) इत्यत्र । कष्टा कष्टसाध्या, व्याधिकर्षितदेहत्वात् ॥ ९ ॥

†ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम् ॥
(च. चि. अ. २४)

तानेवोपसर्गानाह—ज्वरेत्यादि । आदिशब्देनातीसारादीनां ग्रहणम् ॥—

‡सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् ।
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः ॥ १० ॥
(सु. उ. अ. ४८)

इति श्रीमाधवकरविरचिते माधवनिदाने तृष्णानिदानं समाप्तम् ॥ १६ ॥

असाध्यानां लक्षणमाह—सर्वास्त्वित्यादि । सर्वा वातजादयः, अतिप्रसक्ता अतिप्रवृद्धाः । घोरोपद्रवयुक्ता मुखशोषादिभिर्बलवद्भिरुपद्रवैः समन्विता इति जेज्जटः ॥ १० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां तृष्णानिदानं समाप्तम् ॥ १६ ॥

अथ मूर्च्छाभ्रमनिद्रातन्द्रासंन्यासनिदानम् ।

§क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः ॥ १ ॥
करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ २ ॥

* 'शोषिणी धातुशोषणात्मिका' (आ० द०) ॥ ९ ॥

† 'एतैर्व्याधिभिर्गृहीतदेहानां नृणां; अत्र पूर्वलक्षणानुरोधः' (आ० द०) ॥—

‡ 'वमिप्रसक्तानामिति शरीरश्लेष्मशोधनाय वमनशीलानां, ता मरणाय विज्ञेया इति ता मरणकारिका इत्यर्थः' (आ० द०) ॥ १० ॥

§ 'क्षीणस्येति ।—पुरुषस्य । विरुद्धाहारसेविनः विरुद्ध आहारः क्षीरमत्स्यादिः । तमो मनोगुणोऽज्ञानहेतुः, तस्यावरणात्मकत्वात् । सुखदुःखयोर्व्यपोहस्तिरस्कारस्तयोरसंवित्तिरित्यर्थः; अथवा सुखं सत्त्वं, दुःखं रजः, तयोर्व्यपोहकृत्; तमसा तयोरावृतत्वात्; अतः काष्ठवन्निपतत्यीत्यर्थः । मोहो मूर्च्छेति तस्याः पर्यायौ; उक्तं चाभिधानान्तरे—"संज्ञोपघाते मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा । कश्मलं प्रलयो मोहः संन्यासस्तु मृतोपमः"—इति । सा च मूर्च्छा षड्विधा षट्प्रकारा भवति । वातादिभिः शोणितमद्यविषैश्च तिस्रः, एवं षड्विधत्वमाह—वातादिभिरिति । प्रभुत्वेनेति वातादिष्वपि व्यापकत्वेन पित्तमेवावतिष्ठते' (आ० द०) ॥ १-५ ॥

१ एतच्च 'वमिप्रसक्तानां' इति पाठाभिप्रायेण ।

संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः ।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ३ ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्तिता ॥ ४ ॥
वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु पित्तं तु प्रभुत्वेनावतिष्ठते ॥ ५ ॥
(सु. उ. अ. ४६)

तृष्णायां मोहो भवतीति तृष्णानन्तरं मूर्च्छा, उक्तं हि—'तृषितो मोहमायाति—' इति । निदानं संप्राप्तिं चाह—क्षीणस्येत्यादि । बहुदोषस्येति विपुलदोषस्य न त्वनेकदोषस्य; तथा सत्येकदोषजायाः संप्राप्तिर्नोक्ता स्यात् । वेगाघातान्मलादिवेगधारणात् । अभिघाताल्लगुडादेः । हीनसत्त्वस्य हीनसत्त्वगुणस्य । करणं मनः, तस्यायतनानि बाह्यानि चक्षुरादीनि, आभ्यन्तराणि मनोवहानि स्रोतांसि, यैराश्रयमनश्चक्षुरादीन्यधितिष्ठति; अथवा बाह्यानि कर्मेन्द्रियाणि, आभ्यन्तराणि धीन्द्रियाणि; तेषु यदा उग्रा दोषा निविशन्ते तदा मूर्च्छन्तीति योज्यम् । पुनः कया संप्राप्त्या इत्यत आह—संज्ञावहास्वित्यादि । संज्ञावहनाडीशब्देन सिराधमनीस्रोतसां ग्रहणमित्याहुः, यतस्तैर्मन इन्द्रियदेशं प्राप्नोति । पिहितासु आवृतासु । तमो मनोगुणोऽज्ञानहेतुः, अभ्युपैति वर्धते, सहसा झटिति । अन्येषु तमोबहुलेषु रोगेषु मदात्ययादिषु सत्त्वरजसी न तथा लीयेते, यथा मूर्च्छायामित्यत आह—सुखदुःखव्यपोहकृदिति ।—सुखदुःखयोरसंवित्तिकरम् । एतत्तु प्रायिकत्वेनोक्तं, (त्रिविधं ज्ञानं भवति हेयोपादेयोपेक्षणीयभेदात्,) तेनोपेक्षणीयज्ञानाभावो ज्ञेयः । व्यवहारार्थं तत्पर्यायावाह—मोहो मूर्च्छेति । वातादिभिस्तिस्रः, शोणितमद्यविषैश्च तिस्रः, एवं षट् । प्रभुत्वेनेति व्यापकत्वेन; तेन वातजादिष्वपि ज्वरवद्रोगमहिम्नाऽवश्यं पित्तसंबन्धः, अत एव वक्ष्यति,—मूर्च्छा पित्ततमःप्राया" इति; चिकित्सायां च शीतक्रियाविधानमिति ॥ १–५ ॥

*हृत्पीडा जृम्भणं ग्लानिः संज्ञादौर्बल्यमेव च ।
सर्वासां पूर्वरूपाणि, यथास्वं ता विभावयेत् ॥ ६ ॥
(सु. उ. अ. ४६)

तस्याः पूर्वरूपमाह—हृत्पीडेत्यादि । संज्ञादौर्बल्यमसम्यग्ज्ञानता । सर्वासां पूर्वरूपाणीति छेदः । यथास्वं विभावयेदिति ता मूर्च्छा वातादिभेदेन जानीयात् = व्यक्तरूपावस्थायां, नतु पूर्वरूपावस्थायामिति जेज्जटः ॥ ६ ॥

†नीलं वा यदि वा कृष्णमाकाशमथवाऽरुणम् ।
पश्यंस्तमः प्रविशति शीघ्रं च प्रतिबुध्यते ॥ ७ ॥

---

* 'पूर्वरूपाणीति पादभङ्गेण छेदः' (आ० द०) ॥ ६ ॥
† 'दृश्यं गगनं च पश्यन् तमः प्रविशति' (आ० द०) ॥ ७ ॥ ८ ॥

वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च ।
कार्श्यं श्यावाऽरुणाच्छाया मूर्च्छाये वातसंभवे ॥ ८ ॥

ता एवाह (वातजामाह)—नीलमित्यादि । नीलं स्निग्धकृष्णं कृष्णं रूक्षकृष्णं, अरुणमीषल्लोहितम् । तमः प्रविशत्यन्धकारमिव प्रविशति मूर्च्छतीत्यर्थः । शीघ्रं च प्रतिबुध्यत इति वायोः शीघ्रकारित्वात् । कार्श्यं श्यावाऽरुणा च्छाया, 'गात्रे' इति शेषः । मूर्च्छायशब्दो मूर्च्छापर्यायः ॥ ७ ॥ ८ ॥

*रक्तं हरितवर्णं वा वियत्पीतमथापि वा ।
पश्यंस्तमः प्रविशति सस्वेदश्च प्रबुध्यते ॥ ९ ॥
(सपिपासः ससन्तापो रक्तपीताकुलेक्षणः ।)
(जातमात्रे पतति च शीघ्रं च प्रतिबुध्यते ।)
संभिन्नवर्चाः पीताभो मूर्च्छाये पित्तसंभवे ॥ १० ॥

पित्तजमूर्च्छायमाह—रक्तमित्यादि । वियदाकाशम् । अत्र "सपिपासः ससन्तापो रक्तपीताकुलेक्षणः"—इति क्वचिदधिकः पाठः ॥ ९ ॥ १० ॥

†मेघसंकाशमाकाशमावृतं वा तमोघनैः ।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥ ११ ॥
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा ।
सप्रसेकः सहृल्लासो मूर्च्छाये कफसंभवे ॥ १२ ॥

कफजमूर्च्छायमाह—मेघेत्यादि । तमोघनैरिति तमोभिर्घनैश्च; तमोऽन्धकारः, घनोऽत्र मेघवाची ॥ ११ ॥ १२ ॥

‡सर्वाकृतिः सन्निपातादपस्मार इवागतः ।
स जन्तुं पातयत्याशु विना वीभत्सचेष्टितैः ॥ १३ ॥
(अ. हृ. नि. अ. ६)

---

* 'वियदाकाशं, रक्तं, हरितवर्णं शाकवर्णं, पीतं वा पश्यन् तमः प्रविशतीति मूर्च्छतीत्यर्थः । यदा प्रबुध्यते तदा स्वेदो भवति, सपिपासस्तृष्णान्वितः, संतापवांश्च भवति । रक्ते पीते आकुले त्रस्ते इव ईक्षणे लोचने यस्य स तथा । 'अन्ये रक्तपित्ताकुलेक्षणः' इति पठन्ति । तत्र रक्तपित्तो विकारः । (जातमात्रे उत्पन्नमात्रे, पतति शीघ्रं च प्रतिबुध्यते ।) पीताभः पीतशरीरच्छविः' (आ० द०) ॥ ९ ॥ १० ॥

† 'आर्द्रेण चर्मणा इव प्रावृतैर्वेष्टितैरङ्गैरुपलक्षितः । प्रसेको मुखस्रावः, हृल्लास उपस्थितवमनत्वमिव' (आ० द०) ॥ ११ ॥ १२ ॥

‡ 'अपस्मार इवागत इति आगतस्यापस्मारस्य वेगवत् सा मूर्च्छा जन्तुं प्राणिनं शीघ्रं पातयति चिराच्च प्रतिबुध्यते, विना वीभत्सचेष्टितैरिति अपस्मारे फेनागमनदन्तावघट्टनाक्षिवैकृतसत्त्वादिदर्शनमस्ति, त्रिदोषजायां मूर्च्छायां तु न तथा, अयमेव भेदः; अत एव विना वीभत्सचेष्टितैरिति' (आ० द०) ॥ १३ ॥

---

१ एतस्याग्रे 'यथा चत्वारोऽपस्मारा वातेन पित्तेन श्लेष्मणा सन्निपातेन, तद्वन्मूर्च्छा अपीत्यर्थः' इत्यधिकमातङ्कदर्पणे ।

सान्निपातिकमाह—सर्वैरित्यादि । ननु, सर्वाकृतिरिति विरुद्धं, उद्देशे 'षड्विधा सा प्रकीर्तिता' इत्यभिहितत्वात्; सन्निपातजया च सह सप्त प्रसज्येरन्? उच्यते, उद्देशः सुश्रुतग्रन्थेन, चरकग्रन्थेन च विवरणम् । चरके ह्येकजास्तिस्त्रस्त्रिदोषजा चैकेति चतस्रः पठ्यन्ते । यदुक्तमष्टोदरीये,—"चत्वारो मूर्च्छाया इत्यपस्मारैर्व्याख्याताः"— (च. सू. स्था. अ. १८) इति । रक्तमद्यविषजानां यथादोषमेतास्वन्तर्भावः; सुश्रुते चैता रक्तादिजा लक्षणचिकित्साभेदख्यापनार्थं साक्षात् पठिताः, त्रिदोषजाया दोषजास्वन्तर्भावः इत्यभिप्रायेण भेद आचार्ययोः; संग्रहे चात्र सर्वतन्त्रस्वीकाराद्भयमपि लिखितमित्यदोषः । अपस्मार इवेति यथाऽपस्मारी महताऽभिघातेन पतति चिरेण प्रतिबुध्यते । अपस्मारे फेनवामित्वदन्तघट्टनाक्षिवैकृतादिकमधिकमिति भेदः । बीभत्सचेष्टितैरिति फेनवामित्वादिभिरेव ॥ १३ ॥

*पृथिव्यापस्तमोरूपं रक्तगन्धस्तदन्वयः ।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुविमानवाः ॥ १४ ॥
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ।
(सु. उ. अ. ४६)

रक्तजमूर्च्छासंप्राप्तिमाह—पृथिव्याप इत्यादि । पृथिव्यापश्चैतद्वयं तमोरूपं तमोबहुलं, उक्तं हि,—"तमोबहुला पृथिवी, सत्त्वतमोबहुला आपः (सु. शा. स्था. अ. १)"—इति । 'पृथिव्यम्भः' इति पाठेऽयमेवार्थः । तदन्वयः पृथिव्यम्भोऽन्वयः, 'तन्मयः' इति पाठे पृथिवीजलमयः, प्रकृतिविकारभावे मयट् । तस्मादिति यस्मात् पृथिव्यापस्तमोरूपं रक्तगन्धश्च तदन्वयः, मूर्च्छा च तमःप्राया, तस्मादित्यर्थः । भुविमानवा इति पाञ्चभौतिकत्वेऽपि शरीरस्योद्भूतभूमिगुणा ये ते भुविमानवाः पार्थिवाः, तामसा इत्यर्थः; नतु राजसाः सात्त्विका वा । ननु चम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत ? तत्रापि गन्धस्य पार्थिवत्वात्, पृथिव्याश्च तमोरूपत्वादित्यत आह—द्रव्यस्वभाव इत्यादि । रक्तस्यायं स्वभावः, तेन तद्गत एव गन्धो मूर्च्छयतीति । स्वभावमेव दर्शयति—दृष्ट्वा यदभिमुह्यतीति । 'यच्च दृष्ट्वाऽपि मुह्यति'—इति पाठान्तरम् । अन्ये तु गन्धासंबन्धेऽपि दर्शनमात्रान्मूर्च्छोपलम्भादनैकान्तिकत्वं गन्धस्य मन्यमानाः स्वभावमेव हेत्वन्तरमाहुः; एतेन गन्धस्य प्रायिकत्वमुक्तम् । अन्ये तु गन्धस्य हेतुत्वमपास्य दर्शनस्यैव हेतुत्वं मन्यन्ते; तच्च, यदाह भोजः,—"स्तब्धाक्षदृष्टिर्भवति

* 'तदन्वयः' इत्यत्र 'तन्मयः' इति पाठे तन्मय इति पृथिवीजलमयः, तदन्वयाद्गन्धेऽपि तमस्त्वं सिद्धं, मूर्च्छा च तमःप्राया, तस्मादित्यर्थः । अन्ये 'पृथिव्यम्भः' इति पठन्ति । तत्र 'पृथिवी चाम्भश्च पृथिव्यम्भसी तयोः संबन्धि यत्तमस्तद्रूपं तद्बहुलत्वलक्षणं रक्तमिति, रूपशब्दोऽत्र बाहुल्ये स्वलक्षणे वा वर्तते, यतः सत्त्वरजस्तमसां परमं रूपं दृष्टिपथं नोपगच्छति किंतु विशेषेष्वभिव्यज्यते, सर्व एव विशेषास्तमोमया इत्युक्तत्वात् । ये मानवास्तामसा भवन्ति त एव रक्तगन्धेन मूर्च्छन्ति, न तु राजसाः सात्त्विका वा रक्तगन्धेन मूर्च्छन्तीति भावः । यत् 'रक्तं' इति शेषः' (आ० द०) ॥ १४ ॥

१ 'यदाह भेडः' इति क. ।

गूढोच्छ्वासस्तथैव च। दर्शनादस्य जस्तजाद्गन्धाच्चैव प्रमुह्यति"-इति। "पृथिव्या यस्तमोरूपम्"-इति पाठान्तरं सुगमम्। "पृथिव्यम्मस्तमोरूपं रक्तगन्धेन तत्रयम्"-इति पाठान्तरस्य जेज्जटलिखितस्यायमर्थः,-रक्तगन्धेन तु यद्दुष्कमव्यभिचरितं प्रकृतिविकारयोस्तादर्थ्यात् किं तन्नयमित्यत उक्तं—पृथिव्यम्मस्तमोरूपमिति; पृथिव्यम्मस्तमसां रूपमित्यर्थः, शेषं पूर्ववत्। दृष्ट्वेति रक्तमिति शेषः ॥ १४ ॥—

*गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः ॥ १५ ॥
त एव तस्मात्ताभ्यां तु मोहौ स्यातां यथेरितौ ।
(सु. उ. अ. ४६)

विषमद्यजे प्राह—गुणा इत्यादि। गुणा दश; यदुक्तं दृढबलेन,—"लघु रूक्षमाशु विशदं व्यवायि तीक्ष्णं विकाशि सूक्ष्मं च। उष्णमनिर्देश्यरसं दशगुणमुक्तं विषं तज्ज्ञैः" (च. चि. स्था. अ. २३)—इति। ते तैलादौ व्यस्तास्तीव्राः सन्ति, विषमद्ययोस्तु तीव्रतराः, अतस्तैलादिभिर्न मोहः, किंतु विषमद्याभ्यामिति। त एवेति गुणा लघुत्वादयः। यथेरिताविति विषजो मोहो न स्वयं निवर्तते विषस्यापाकित्वात्, मद्यजस्तु मद्यपरिणामादेव शाम्यति, अयं च भेदो विषमद्ययोः प्रभावात्। उक्तं हि तन्त्रान्तरे,—"ये विषस्य गुणाः प्रोक्ताः सन्निपातप्रकोपनाः। त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः"—इति ॥ १५ ॥—

†स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ॥ १६ ॥
मद्येन विलपञ्शेते नष्टविभ्रान्तमानसः ।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् ॥ १७ ॥
वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते ।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ॥ १८ ॥
(सु. उ. अ. ४६)

रक्तजादिमूर्च्छात्रयस्य रूपाण्याह,—स्तब्धाङ्गेत्यादि मूर्च्छित इत्यन्तं रक्तजायाः। गूढोच्छ्वासश्चास्पष्टोच्छ्वासः। 'मूढ' इति पाठे संनिरुद्ध इत्यर्थ इति जेज्जटः। मद्येने-

---

* 'तीव्रतरत्वेन तत्रापि भेदः-विषे तीव्रतमाः, मद्ये तीव्रतराः, तैलादिषु तीव्रा व्यस्ताश्च। यथेरिताविति ताभ्यां विषमद्याभ्यां यथेरितौ तरतमादिभेदेन यथोक्तौ मोहौ स्याताम्। विषेण तीव्रतमः, मद्येन तीव्रतर इत्यर्थः' (आ० द०) ॥ १५ ॥—

† 'गूढोच्छ्वास इत्यत्र मूढेति पाठे सन्निरुद्धोच्छ्वासः। विलपन् प्रलपन्। नष्टविभ्रान्तमानस इति नष्टं स्मृतिरहितं विभ्रान्तं विक्षिप्तं मानसं चित्तं यस्य स तथा। जरां यावन्न याति तदिति यावज्जरां परिपाकं न गच्छति तावद्गात्राणि भूमौ विनिक्षिपन् ताडयन् मूर्च्छितस्तिष्ठतीत्यर्थः। वेपथुः कम्पः, स्वप्नो निद्रा। तमोऽन्धकारप्रविष्टस्येवार्थासंवित्तिः। यथास्वं विषलक्षणैरिति विषस्य मूलकन्दपत्रक्षीरादिभेदेन यल्लक्षणं सुश्रुते कल्पस्थाने उक्तं तेषां लक्षणैरेव तीव्रतरत्वेन युक्ता मूर्च्छा भवतीत्यर्थः' (आ० द०) ॥ १६-१८ ॥

---

१ 'पृथिव्यापस्तमोरूपा' इति क.।

त्यादि तदित्यन्तं मद्यजायाः ॥ नष्टविभ्रान्तमानस इत्यत्र 'निष्टनन् भ्रान्तमानसः" इति पाठान्तरे निष्टनन् शब्दं कुर्वन् । वेपथ्वादिना विषजायाः ॥ यथास्वं विषलक्षणैरिति विषस्य मूलपत्रक्षीरादिभेदेन प्रातिस्विकं यल्लक्षणमुक्तं सौश्रुतकल्पस्थाने (सु. क. स्था. अ. २) तल्लक्षणयुक्ता मूर्च्छा भवतीत्यर्थः ॥ १६-१८ ॥

*मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥ १९ ॥
(चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्वदा ।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः ॥ १ ॥)

संज्ञानाशसाधर्म्येऽपि मूर्च्छादीनां को भेदः ? इत्याह—मूर्च्छा पित्ततमःप्रायेत्यादि । तमोवातकफादिति समाहारद्वन्द्वः । निद्रातन्द्रयोश्चैतानि कारणानि व्यस्तसमस्तानि, तेन सुश्रुतेन यदतिलङ्घितलक्षणे निद्रातन्द्रे पठिते ते[1] विनैव कफात्, अतिलङ्घनस्य श्लेष्मक्षयहेतुत्वात् ॥ १९ ॥

†इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः ।
निद्रार्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत् ॥ २० ॥

तन्द्रालक्षणमाह—इन्द्रियार्थेष्वित्यादि । निद्राभ्रमयोस्तु लक्षणं नोक्तमिह, अतिप्रसिद्धत्वात् । निद्रा हि विक्लुतमनसः सर्वेन्द्रियाणां स्वविषयनिवृत्तिः । यदाह चरकः—"यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः" (च. सू. स्था. अ. २१)—इति । अत्र कर्मात्मान इन्द्रियाणि; निरिन्द्रिय-

* 'संज्ञानाशसाधर्म्यान्मूर्च्छाया भेदानाह—तत्र मूर्च्छाहेतुमाह—मूर्च्छा पित्ततमःप्राया; तमोगुणयुक्तेन पित्तेन मूर्च्छा भवति । भ्रमहेतुमाह—रज इत्यादि । रजोगुणेन पित्तानिलाभ्यां युक्तेन भ्रमो भवति, तत्र भ्रमः स्थाणौ पुरुषज्ञानं, पुरुषे विपरीतसत्त्वज्ञानादिकं; अन्ये चक्रस्थितस्येव संभ्रमद्वस्तुदर्शनमिति । तन्द्राहेतुमाह—तम इत्यादि । तमोगुणेन युक्ताभ्यां वातकफाभ्यां तन्द्रा भवति, समाहारद्वन्द्वेनैकवचनम् । निद्राहेतुमाह—श्लेष्मणा मिलितेन तमोगुणेन निद्रा भवति, तस्या लक्षणं—अरतिविक्लान्तमनसः सर्वेन्द्रियाणां स्वविषयनिवृत्तिः । चरकेऽपि "यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः"—इति । अत्र कर्मात्मान इन्द्रियाणि, निरिन्द्रियप्रदेशे मनसोऽवस्थितिर्निद्रेत्यर्थः' (आ० द०) ॥ १९ ॥

† 'इन्द्रियार्थेषु विषयेषु असंप्राप्तिरग्रहणम् । गौरवमङ्गानाम् । निद्रार्तस्येवोत्पन्ननिद्रस्येव । अस्याग्रे क्लमलक्षणं पठन्ति—य इत्यादि । यः शरीरे आयासवर्जितः श्रमः प्रवृद्धो भवति परं श्वासवर्जितः स क्लम इति कथितः । इन्द्रियार्थप्रबाधकः विषयग्रहणेऽसमर्थः । अयं पाठो माधवेन न लिखितः' (आ० द०) ॥ २० ॥

१ 'तेनैव कफात्' इति क. ।

२ योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥

प्रदेशे मनसोऽवस्थितिर्निद्रेति मतेऽप्ययमेवार्थः। निद्रातन्द्रयोस्तु कारणभेदाद्भेदः उद्भूतजृम्भादेश्चानुभवसिद्धत्वादिति; तथा निद्रायामिन्द्रियमनोमोहः, तन्द्रायामिन्द्रियमोहः। भ्रमलक्षणं तु चक्रस्थितस्येव भ्रमद्वस्तुदर्शनमिति ॥ २० ॥

*दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्।
स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्विना ॥ २१ ॥
(अ. हृ. नि. अ. ६)

संन्यासस्य मूर्च्छादिभ्यो भेदमाह—दोषेष्वित्यादि ॥ २१ ॥

†वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥ २२ ॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥ २३ ॥
(अ. हृ. नि. अ. ६)

इति श्रीमाधवकरविरचिते माधवनिदाने मूर्च्छा-
भ्रमनिद्रातन्द्रासंन्यासनिदानं समाप्तम्।

तल्लक्षणमाह—वागित्यादि। अतिबला इत्यनेन मूर्च्छायाः प्रारम्भकदोषेभ्योऽधिकत्वेन प्रवृद्धा दोषास्तमश्चेति बोधयति। संन्यस्यन्ति मोहयन्ति। स ना पुरुषः, संन्याससंन्यस्तः संन्यासपीडितः, काष्ठीभूत इति अत्यन्तनिष्क्रियत्वेन अकाष्ठ एव काष्ठवद्भूतः। अत एव मृतोपम इति। मुक्त्वा सद्यःफलां क्रियामिति सूचीव्यधनाञ्जनावपीडशूकशिम्बीफलावघर्षणादिरूपा क्रिया यदि क्रियते यदा प्राणैर्विमुच्यते, अन्यथा तु जीवतीति ॥ २२ ॥ २३ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां मूर्च्छा-
भ्रमनिद्रातन्द्रासंन्यासनिदानं समाप्तम्।

---

* 'आदिशब्दोऽत्र लुप्तो द्रष्टव्यः। आविष्टवेगेषु दोषेषु या मदादिभिर्मूर्च्छा भवति सोपशान्तवेगेषु स्वयमेवोपशमं याति, भिषक्प्रतीकारं विनेत्यर्थः; संन्यासस्तु चिकित्सकजनसानुभवौषधैर्विना न शाम्यतीत्यर्थः' (आ० द०) ॥ २१ ॥

† 'प्राणायतनं चेतनास्थानं हृदयमाश्रिताः, वाग्देहमनसां चेष्टामाक्षिप्य विनाश्य, अबलं हीनसत्त्वं पुरुषं, संन्यस्यन्ति। मुक्त्वा सद्यःफलां क्रियामिति सद्यः फलं यस्यास्तां क्रियां त्यक्त्वेत्यर्थः' (आ० द०) ॥ २२ ॥ २३ ॥

---

१ 'निद्राऽतिविद्रुतमनसः' इति क.। २ 'तन्द्रायां मनोमोहः' इति क.।

३ कृतवेगेष्विति वेगं कृत्वा क्षीणबलेषु, वेगो हि दोषाणां बलक्षयकारणं भवति। यदुक्तं विषमज्वरे,—"कृत्वा वेगं गतबलाः"—इत्यादि। हृतवेगेष्विति पाठान्तरम् ॥

अथ पानात्ययपरमदपानाजीर्णपानविभ्रमनिदानम्।

*ये विषस्य गुणाः प्रोक्तास्तेऽपि मद्ये प्रतिष्ठिताः।
तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः॥ १॥

'मूर्च्छा मद्येन च विषेण च'—इति वचनान्मूर्च्छानन्तरं मद्यविकारान् मदात्यया-दीनाह। ननु, कथं मद्यं मोहयतीत्याह—ये विषस्येत्यादि। ते च विषगुणा मूर्च्छा-ध्याये निदर्शिताः। मिथ्योपयुक्तेनेति अयथाविधिपीतेन, विधिश्चायं तद्यथा,—कुसु-मितलतोपगूढैः प्ररूढनिरन्तरनवाङ्कुरनिकररोमाञ्चैर्मधुकरमधुरझङ्कारसीत्कारैर्मुखाकण्ठ-कलकण्ठकूजितैर्दक्षिणसमीरणसमुल्लसितपल्लवकरप्रचारैस्तरुणतरुभिरुपक्रान्तलताभिर-तिशोभनेषु तुषारकरकिरणराजिपराजिताशेषतापदोषेषु प्रदेशेषु[2] शृङ्गाररससमुचिता-कृतिकमनीयकामिनीसेवितं ललितललनोपनीयमानं सुरभिरुचिररूपरसोपदंशं कं नाम परमितं परार्घ्यमधुपानं न सुखयति? चरके तु विस्तरेणैतदुक्तम्[1]॥ १॥

†किंतु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथाऽमृतम्॥ २॥
प्राणाः प्राणभृतामन्नं तदयुक्त्या हिनस्त्यसून्।
विषं प्राणहरं तच्च युक्तियुक्तं रसायनम्॥ ३॥
(च. चि. अ. १२)

ननु, विषस्य ये गुणास्ते चेन्मद्येऽपि सन्ति, तर्हि विषवन्मद्यमनुपयोज्यं प्रसज्येत? अत आह—किंत्वित्यादि। यथैवान्नमिति देहधारकस्वभावं तदेवायुक्तियुक्तमविधियुक्तं रोगाय; तस्माद्धितमपि विशिष्टविधिनोपयुक्तं हितं, हितमप्यविधिनोपयुक्तमनर्थाय भवतीति। अत्रैव दृष्टान्तमाह—प्राणा इत्यादि। तदयुक्त्येति अतिमात्रत्वादिना विसू-च्यादिकं कृत्वा मारयतीत्यर्थः। युक्तियुक्तमिति यथा चरकरसायनप्रयोगे उक्तं,— "द्वौ यवावत्र हेम्नस्तु तिलं दद्याद्विषस्य च (च. चि. स्था. अ. १)"—इति। अत्र तिलमिति तिलप्रमाणम्॥ २॥ ३॥

* 'ये विषस्य गुणाः प्रोक्ताः, ते गुणा मद्येऽपि कीर्तिताः, तेन मद्येन' (आ० द०)॥ १॥

† 'मद्यं स्वभावेन प्रकृत्याऽन्नवत् ज्ञेयं देहधारणस्वभावं, तदेवान्नं मद्यं वाऽयुक्तियुक्तमवि-धिप्रयुक्तं रोगाय भवति, युक्तियुक्तममृतवद्भवतीत्यर्थः। अन्नं प्राणभृतां शरीरिणां प्राणाः, शरीरधारणात्मकत्वात्। प्राणहरमपि तद्वद्विषं युक्तियुक्तं रसायनं भवति, शरीरं धारयतीत्यर्थः (आ० द०)॥ २॥ ३॥

१ अस्माग्रे कपुस्तके 'शुद्धकायः पिबेत्प्रातः सोपदंशं पलद्वयम्। मध्याह्ने द्विगुणं तच्च स्निग्धाहारेण पाययेत्। प्रदोषेऽष्टपलं तद्वन्मात्रा मधरसायने॥ वामे रामा रमणकुशला दक्षिणे पानपात्रं चाग्रे धृत्वा मरिचलवणैश्छागलं भृष्टमांसम्। वीणानादैः परभृतकृतैः काक-लीगीतयुक्तैः सोऽयं धन्यः पिबति मदिरां भैरवो यस्य तुष्टः'—इत्यधिकः पाठ उपलभ्यते।
२ 'प्रदोषेषु' इति क.।

*विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम् ॥ ४ ॥
(च. चि. अ. १२)

स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम् ।
भवेदायुःप्रकर्षाय बलायोपचयाय च ॥ ५ ॥
काम्यता मनसस्तुष्टिस्तेजो विक्रम एव च ।
विधिवत्सेव्यमाने तु मद्ये संनिहिता गुणाः ॥ ६ ॥
(सु. उ. अ. ४७)

विधिनोपयुक्तस्य फलमाह—विधिनेत्यादि । काल इति नित्यगे आवस्थिके च; तद्यथा—ग्रीष्मे शीतमधुरं मार्द्वीकादि, शीते उष्णतीक्ष्णं गौडिकपैष्टिकादि, तथा वाते स्निग्धादि, एवं वयस्युदाहार्यम् । हितैरन्नैरिति वक्ष्यमाणस्निग्धादिभिर्मद्यविपरीतगुणैः । स्निग्धैरित्युपलक्षणं, तेनान्यैरपि मद्यविपरीतगुणैरिति बोद्धव्यम् । यदुक्तं सुश्रुतेन,—"मद्यमम्लं तथा तीक्ष्णं सूक्ष्मं विशदमेव च । रूक्षमाशुकरं चैव व्यवायि च विकाशि च—" (सु. उ. तं. अ. ४७) इति । अम्लरसत्वं चास्योद्भूतरसत्वेनोक्तं; यदुक्तमन्यत्र,—"सर्वेषामम्लजातीनां मद्यं मूर्ध्नि व्यवस्थितम्"—इति । मूर्ध्नि व्यवस्थितमुत्कृष्टम् । अन्येऽप्यत्र रसाः सन्ति । यदाह भोजः,—"मैरेयं मदिरा सीधु चतुर्थं मधु चोच्यते । एकैकं षड्रसं तत्र रसतो मद्यमीरितम्"—इति । अन्नभक्ष्यशब्दयोरुपादानेन प्रायो लेह्यं द्रवान्तरपानं च मद्यपानोचितं न भवतीति दर्शयति । अन्नभक्ष्याभ्यां लब्धेऽपि मांसे, मांसग्रहणं विशेषेण हितत्वोपदर्शनार्थम् । बलं शक्तिः, उपचयः स्थौल्यम् । अपरमपि विधिसेवागुणमाह—काम्यतेत्यादि । काम्यता कमनीयमूर्तिता, मनसस्तुष्टिः सन्तोषः । काम्यता मनस इति कमनीयवस्तुनि मनोवृत्तिः, तुष्टिश्च मनस एवेति योज्यम् । तेज उत्साहः । विक्रमः पराभिभवार्थं बलवती शरीरचेष्टा ॥ ४–६ ॥

---

* 'विधिः पूर्वोक्तः, तन्त्रान्तरोक्तश्च,—"शुद्धकायः पिबेत्प्रातः सोपदंशं पलद्वयम् । मध्याह्ने द्विगुणं तच्च स्निग्धाहारेण वै पिबेत् ॥ प्रदोषेऽष्टपलं तद्वन्मात्रा मद्यरसायने । आरोग्यं धातुसाम्यं च वह्निकान्तिबलप्रदम् ॥ अनेन विधिना सेव्यं मद्यं नित्यमतन्द्रितैः"—इति; अन्ये, "बुद्ध्यादयो गुणा यावदुल्लसन्ति निरत्ययाः । मात्रेयं विहिता मद्यपाने रोगाय चापराः"—इति । काल इति तत्र कालो द्विविधो नित्यगः, आवस्थिकश्च; तत्र नित्यगे ऋतुसंबन्धिनि, आवस्थिके काले—वाते स्निग्धादि, यथाबलं स्वशक्त्या । एवं हृष्टो हर्षयुक्तो यो मद्यं पिबेत्तस्यामृतोपमं स्यात् । कैः सह पीतं बलोपचयाय भवति तानाह—स्निग्धैरित्यादि । एतैर्वस्तुभिः सेव्यमानं मद्यमायुःप्रकर्षाय भवति तथा बलवर्धकमिति । स्निग्धैरित्युपलक्षणं, तेनान्यैर्मद्यविपरीतगुणैरिति बोद्धव्यं, तेन तीक्ष्णादिदशगुणविपरीतैर्मृद्वादिगुणैः सह मद्यं सेव्यमिति । अन्येऽप्यत्र रसाः सन्ति । यदुक्तं तन्त्रान्तरे—"मद्यस्याम्लस्वभावस्य चत्वारोऽनुरसाः स्मृताः । मधुरश्च कषायश्च कटुकस्तिक्त एव च"—इति । यदाह भोजः—"मदिराया रसा व्यक्ता मधुरोषणतिक्तकाः । लवणाम्लकषायाश्च त्रयः सूक्ष्मतराः स्मृताः ॥ विपर्ययेणैतदेवं मैरेये कथिता रसाः । मार्द्वीके सीधुसंज्ञे च व्यक्तौ चाम्लकटू रसौ । व्यक्ता हि शेषाश्चत्वारो रसा भोजेन कीर्तिताः"—इति । अन्नैरिति गोधूमादिभिः' (आ० द०) ॥ ४–६ ॥

*बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्धनश्च ।
संपाठगीतस्वरवर्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि ॥ ७ ॥

उक्तविधिविपर्ययेण सेव्यमानं मद्यं मदात्ययाय संपद्यते, स च त्रिविधो भवति—पूर्वो मध्यमोऽन्तिमश्चेति; तेषां क्रमेण लक्षणमाह—बुद्धीत्यादि । बुद्धिरनुभवः, स्मृतिरनुभूतार्थानुसन्धानम् । पानान्ननिद्रारतिवर्धनश्चेति पानादिषु रतिरनुरागस्तद्वर्धनः । संपाठः सम्यक् पाठः । गयदासस्तु 'संपाठ्य'—इति पठित्वा गीतनृत्यवाद्यानि मिलितानि संपाठ्यमुच्यते, गीतं तु केवलमेवेति व्याचष्टे । स्वरो ध्वनिः । प्रोक्तोऽतिरम्य इति (ननु मनोविकारकारित्वात्कथमस्यातिरम्यता ? उच्यते-) मनोविकारकारित्वेऽपि तदात्वेन दुःखोपहत्वात्, अत एव सुश्रुतेन मानसविकारेषु हर्षः पठितः ॥ ७ ॥

†अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः ।
आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥ ८ ॥

द्वितीयमदमाह—अव्यक्तेत्यादि । विचेष्टो विरुद्धचेष्टः । उन्मत्तस्य लीलाकृतिभ्यां सह वर्तत इति सोन्मत्तलीलाकृतिः, उन्मत्तप्राय इत्यर्थः । अप्रशान्तः प्रचण्डः ॥८॥

‡गच्छेदगम्यान्न गुरूंश्च मन्येत् खादेदभक्ष्याणि च नष्टसंज्ञः ।
ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः ॥ ९ ॥

तृतीयमदमाह—गच्छेदित्यादि । ननु चरके द्वितीयतृतीययोर्मध्ये मदान्तरं पठितं, यदाह,-"मध्यमं मदमुत्क्रम्य मदमप्राप्य चोत्तमम् । न किंचिदशुभं कुर्युर्नरा राजसतामसाः ॥ को मदं तादृशं गच्छेदुन्मादमिव चापरम् (च. चि. स्था. अ. २४)"-इति; तत् कुतोऽत्र न पठितं ? उच्यते,-द्वितीयमदान्ते तृतीयमदस्य पूर्वावस्थैवातिनिन्दनीया, सुतरां तृतीयो मद इति प्रतिपादनार्थं तत्पठितं, न तु तयोः परमार्थतोऽन्तराले पृथङ्मदान्तरमस्ति,-यथा, "कुम्भमीनर्क्षयोर्मध्ये यदा चरति चन्द्रमाः । नाहरेत्तृणकाष्ठानि न गच्छेद्दक्षिणां दिशम्"-इति । अत्र हि कुम्भस्य शेषांशो मीनस्य प्रथमांश एतद्द्वयं मध्यशब्देनोच्यत इत्याहुर्जेज्जटादयः, हरिचन्द्रव्याख्यानं तु विस्तरत्वान्न लिखितम् । अगम्यान् गुरुदारादीन् दुष्टयानादींश्च ।

---

*'प्रीतिः परेण मैत्री । सुख इति शोकाद्यसरणेन मनसः प्रसादादनुपहतेन्द्रियवृत्तित्वात् । गीतं गानं, स्वरो ध्वनिः' (आ० द०) ॥ ७ ॥

†'मुहुर्वारंवारं, आलस्यनिद्राभ्यामभिहतः पीडितः, स चैवंविधोऽल्पानुपहतेन्द्रियवृत्तित्वात्' (आ० द०) ॥ ८ ॥

‡'गुरून् ज्येष्ठान्, न मन्येतावगणयेदित्यर्थः । अभक्ष्याणि शास्त्रनिषिद्धानि, चकाराद्दुष्टपानादींश्च । स चैवंविधोऽतीवोपहतेन्द्रियत्वाद्भवति' (आ० द०) ॥ ९ ॥

नष्टसंज्ञ इति संज्ञा नामोल्लेखेन ज्ञानं, तन्नष्टं यस्य स तथा । गुह्यानि गोप्यानि । अस्वतन्त्रो मदपरवशः ॥ ९ ॥

*चतुर्थे तु मदे मूढो भग्नदार्विव निष्क्रियः ।
कार्याकार्यविभागज्ञो मृतादप्यपरो मृतः ॥ १० ॥
को मदं तादृशं गच्छेदुन्मादमिव चापरम् ।
बहुदोषमिवामूढः कान्तारं स्ववशः कृती ॥ ११ ॥

चतुर्थमदमाह—चतुर्थेत्यादि । कार्याकार्यविभागज्ञः कार्यमकार्यमिति बुध्या जानाति । 'कार्याकार्यविभागाज्ञः' इति पाठे कार्याकार्यविभागयोरज्ञ इत्यर्थः । मृतादप्यपरो मृत इति मृतमपेक्ष्यापरोऽयं मृत इव, अत्यन्ताज्ञानसाधर्म्यात् । 'अवरः' इति पाठान्तरे मृतादप्यधम इत्यर्थः, तथाविधावस्थायाः स्वयं कृतत्वात् । क इत्यादि । —कः कृती कुशलः, सुकृती वा, कृतकृत्यो वा; स्ववशोऽपराधीनः, तादृशमुक्तप्रकारेण निन्दितं मदं, गच्छेत् प्राप्नुयात्; न कश्चिदेवंविधं प्राप्नुयादित्यर्थः । कमिवेत्याह— बहुदोषमिवामूढः कान्तारमिति बहुदोषं हिंस्रादियुक्तं, कान्तारं दूरशून्यमध्वानम् । यदुक्तं **चरके**,—"गच्छेदध्वानमस्वन्तं बहुदोषमिवाऽध्वगः" (च. चि. स्था. अ. २४) इति, एवं **विदेहे**ऽपि । पठितमिति । अत्रास्वन्तमशोभमानमनिष्टफलत्वेन । ननु, **चरकविदेहवाग्भटादिभिः**श्चतुर्थो मदो न पठितस्तत्कथं **सुश्रुतेन** पठितः ? उच्यते, **चरके** या द्वितीयतृतीययोरन्तरालावस्था पठिता, सैव **सुश्रुतेन** तृतीयो मद इति कृत्वा पठितः, यस्तु **चरके** तृतीयः स च **सुश्रुते** चतुर्थः पठित इत्यविरोधः । वस्तुगत्या तु त्रय एव मदा इत्युपपादितम् । ननु, किंकारणमेतत्त्रैविध्यमिति चेत् ? उच्यते, मद्यं हि वह्नितुल्यं, यथा ह्यग्निः सुवर्णानामुत्तममध्यमाधमानामभिव्यञ्जकस्तथा मद्यमपि प्राणिनां सत्त्वरजस्तमोभूयिष्ठानां क्रमेणाभिव्यञ्जकमिति । तथाहि **चरकः**,—"प्रधानाधममध्यानां रुक्माणां व्यक्तिदर्शकः । यथाऽग्निरेवं सत्त्वादीनेवं प्रकृतिदर्शकम्"—इति (च. चि. स्था. अ. २४)। तस्मात् प्रथमद्वितीयतृतीयमदाः सत्त्वरजस्तमोभूयिष्ठानां क्रमेण भवन्तीत्यर्थः ॥ १० ॥ ११ ॥

निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम् ।
आपादयेत्कष्टतमान्विकारानापादयेच्चापि शरीरभेदम् ॥ १२ ॥
(सु. उ. अ. ४७)

---

* 'चतुर्थे मदे पुरुषो मूढोऽज्ञः, भग्नदार्विव निष्क्रियो भवति भग्नवृक्ष इव क्रियारहितः, को मूढो गच्छेदपि तु न कोऽपि । ननु चरकविदेहवाग्भटादिभिश्चतुर्थो मदो न पठितः, तत्कथं न विरोधः ? उच्यते; चरके या द्वितीयतृतीययोरन्तरालावस्था पठिता, सैव सुश्रुतेन तृतीयो मद इति कृत्वा पठितः । केयमन्तरालावस्था? यथोक्तं ज्योतिःशास्त्रे—"कुम्भमीनर्क्षयोर्मध्ये यदा चरति चन्द्रमाः । नाहरेत्तृणकाष्ठानि न गच्छेद्दक्षिणां दिशम्—" इति । अत्र कुम्भस्य शेषांशो मीनस्य प्रथमांश एतद्द्वयं मध्यशब्देनोच्यते इति सैवान्तरालावस्था' (आ० द०) ॥ १० ॥ ११ ॥

अविधिमद्यपानस्य विकारान्तरहेतुत्वमाह—निर्भक्तमित्यादि । ननु, अयमर्थः स्निग्धैस्तदन्नैरित्यादिना यदुक्तं तद्विपर्ययेणैव लब्धः, तत्कथं पुनरुच्यते? नैवं, पूर्वं मद्यपानगुणाभिधानार्थमुक्तं, इदं तु कृच्छ्रतमव्याधिकर्तृत्वाभिधानार्थमिति भेदः । यत्परः शब्दः स शब्दार्थ इत्यभिप्रायः । कष्टतमान्विकारानिति वक्ष्यमाणपानात्यया-दीन् । भेदं विनाशं शरीरस्य ॥ १२ ॥

*क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि ॥ १३ ॥
अत्यम्लभक्षावततोदरेण साजीर्णभुक्तेन तथाऽबलेन ।
उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान् ॥१४॥
(सु. उ. अ. ४७)

अन्नसहितस्यापि मद्यस्य क्रुद्धत्वादिकारणसहितस्य विकारकारित्वप्रदर्शनार्थमाह—क्रुद्धेनेत्यादि । परिक्षतेन क्षीणेन । अवततं व्याप्तम् । विविधान् विकारान् पानात्यया-दीनिति ॥ १३ ॥ १४ ॥

†पानात्ययं परमदं पानाजीर्णमथापि वा ।
पानविभ्रममुग्रं च तेषां वक्ष्यामि लक्षणम् ॥ १५ ॥
(सु. उ. अ. ४७)

तानेव विवृणोति—पानात्ययमित्यादि । ननु, अयमर्थः 'आपादयेत्कष्टतमान्विका-रान्'—इत्यनेनैवोक्तत्वात् कथं पुनरुक्तः? उच्यते, पूर्वेण कष्टतमविकारकारित्वमुक्तं, अनेन तु नानाविधविकारकारित्वमिति भेदः ॥ १५ ॥

‡हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥ १६ ॥
तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥ १७ ॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।

---

* 'व्यायामभाराध्वभिः परिक्षतेन क्षीणेन, वेगावरोधाभिहतेन मूत्रादीनां वेगाभिघातपी-डितेन । अत्यम्लभक्षैरवततोदरेण व्याप्तोदरेण । साजीर्णभुक्तेन साजीर्णं भुक्तं यस्य स तथा तेन । अबलेन बलरहितेन, बलमोजः । उष्णाभितप्तेन घर्मसंतप्तेन । ईदृशेन पुरुषेण सेव्यमानं विविधान् नानाविधान्, विकारान् पानात्ययादीन् करोति' (आ० द०) ॥ १३ ॥ १४ ॥

† 'पानात्ययमित्येको विकारः, पानाजीर्णमित्यन्यः, पानविभ्रममित्यपरः । तेषां क्रमेण लक्षणं वक्ष्यामि' (आ० द०) ॥ १५ ॥

‡ 'तत्र वातिकमदात्ययमाह–हिक्केत्यादि । सर्वे मदात्ययास्त्रिदोषजाः, औद्धत्येन व्यपदेश्याः । पैत्तिकमाह–तृष्णेत्यादि । विभ्रमो वस्तुविपरीतज्ञानम् । हरितवर्णस्य पुरुषस्येति हरितवर्णता पित्तलक्षणं, शेषं सुगमम् । श्लैष्मिकमाह–छर्दीत्यादि । स्तैमित्यं निश्चलता । शीतपरीतस्य शीतयुक्तस्य । त्रिदोषजमाह–ज्ञेय इत्यादि । सर्वलिङ्गैः सर्वदोषलक्षणैः' (आ० द०) ॥ १६–१८॥

विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ।
ज्ञेयस्त्रिदोषजश्चापि सर्वैलिङ्गैर्मदात्ययः ॥ १८ ॥
(च. चि. अ. १२)

तेषामुद्दिष्टानां लक्षणमाह—हिक्केत्यादि । प्रजागरो निद्राविच्छेदः । वातप्रायमित्यनेन सर्वे मदात्ययास्त्रिदोषजा उद्भूतत्वेन व्यपदेश इति चरके दर्शितम् । यदाह,—"ये विषस्य गुणाः प्रोक्ताः सर्वदोषप्रकोपनाः"—इत्यारभ्य, यावत् "सर्वं मदात्ययं विद्यात्त्रिदोषं" (च. चि. स्था. अ. २४)—इति । एवं चरकसंवादात्सुश्रुतेऽपि बोध्यम् । विभ्रमो भ्रमः । हरितवर्णत्वेत्यनेन हरितवर्णताऽपि लक्षणम् ॥१६–१८॥

*श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य च मदस्य वदन्ति तज्ज्ञा-
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥ १९ ॥
(सु. उ. अ. ४७)

परमदमाह—श्लेष्मोच्छ्रय इत्यादि । श्लेष्मोच्छ्रयश्चात्र नाचासावादिना ज्ञेयः । सक्तिः सङ्गः, अप्रवृत्तिरिति यावत् । तन्द्रिस्तन्द्रा । परस्य मदस्येति परमदस्य; छन्दोनुरोधादसमासनिर्देशः ॥ १९ ॥

आध्मानमुग्रमथ चोद्गिरणं विदाहः
पानेऽजरां समुपगच्छति लक्षणानि ।
(सु. उ. अ. ४७)

पानाजीर्णमाह—आध्मानमित्यादि । उद्गिरणं वान्तिः, उद्गारो वा । पाने मद्ये, अजीर्णमुपगच्छति अपक्वत्वमुपगच्छतीति पानाजीर्णविकार इत्यर्थः ॥—

हृद्गात्रतोदकफसंस्रवकण्ठधूमा
मूर्च्छावमिज्वरशिरोरुजनप्रदाहाः ॥ २० ॥
द्वेषः सुरान्नविकृतेष्वपि तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेन धीराः ।
(सु. उ. अ. ४७)

पानविभ्रममाह—हृदित्यादि । कण्ठधूमः कण्ठाद्धूमनिर्गमवत्पीडा । शिरोरुजनं शिरःशूलम् । सुरान्नविकृतेष्विति सुराविकृतेष्वन्नविकृतेषु च, भावे क्तः । तेषु तेष्विति नानाविकारेषु सुराभेदैरपिष्टकलड्डुकादिषु । उशन्ति इच्छन्ति । एते च परमदाद्यस्त्रयो न चरके पठिताः, सन्निपातजेऽन्तर्भूतत्वात्; सुश्रुतेन तूक्तत्रिदोषजमदात्ययात्पृथगेते पठिताः, विकृत्या पूर्वलक्षणवैलक्षण्याभिधानार्थमित्याहुः ॥ २० ॥

*'अङ्गगुरुता शरीरगौरवम् । विरसास्यता मुखस्य वैरस्यम् । विण्मूत्रसक्तिर्विण्मूत्रयोरप्रवृत्तिः । शिरसि रुजा पीडा, संधिषु भेदः स्फुटनमिव' (आ० द०) ॥ १९ ॥

*हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमपि पानहतं त्यजेत्तु ॥ २१ ॥
जिह्वौष्ठदन्तमसितं त्वथवाऽपि नीलं
पीते च यस्य नयने रुधिरप्रभे वा ।
(सु. उ. अ. ४७)

असाध्यलक्षणमाह—हीनेत्यादि । हीनोत्तरौष्ठं प्रलम्बमानोपरितनौष्ठम् । अतिशीतं बहिः, अमन्ददाहमभ्यन्तरे, तैलप्रभास्यं तैलाक्तमुखमिव ॥ २१ ॥—

†हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं भजन्ते ॥ २२ ॥
(सु. उ. अ. ४७)

इति श्रीमाधवकरविरचिते माधवनिदाने पानात्ययपरमदपानाजीर्णपान-
विभ्रमनिदानं समाप्तम् ॥

उपद्रवानाह—हिक्केत्यादि । एतैः कृच्छ्रसाध्यं भवति नत्वसाध्यं; असाध्यलक्षणेभ्यः पृथक्पाठादिति जेज्जटः । ध्वंसकविक्षेपकाख्यौ मद्यविकारौ चरके पृथक् पठितौ; तद्यथा—"विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते । ध्वंसो विक्षेपकश्चैव रोगस्तस्योपजायते ॥ श्लेष्मप्रसेकः कण्ठास्यशोषः शब्दासहिष्णुता । तन्द्रानिद्राभियोगश्च ज्ञेयं ध्वंसकलक्षणम् ॥ हृत्कण्ठरोधः संमोहश्छर्दिरङ्गरुजा ज्वरः । तृष्णा कासः शिरःशूलमेतद्विक्षेपलक्षणम् (च. चि. स्था. अ. २४)"—इति; तौ च सुश्रुतेन "विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते । तस्य पानात्ययोद्दिष्टा विकाराः संभवन्ति हि"(सु. उ. तं. अ. ४७)—इत्यनेन संगृहीतौ बोद्धव्यौ । न वा चिकित्साभेदस्तयोरुक्तः, यतश्चरक एवोक्तवान्—"तयोः कर्म चिकित्सा च वातिके यन्मदात्यये" (च चि. स्था. अ. २४)—इति ॥ २२ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां पानात्ययपरमदपाना-
जीर्णपानविभ्रमनिदानं समाप्तम् ॥

दाहनिदानम् ।

त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्च्छितः ।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥ १ ॥
(सु. उ. अ. ४७)

---

* 'अतिशीतममन्ददाहमिति विकल्पेन प्रत्येतव्यं, एकदैकत्र विरुद्धधर्मद्वयासंभवात्; कदाचिदतिशीतं, कदाचित्तीव्रदाहम्' (आ० द०) ॥ २१ ॥

† 'उपद्रवानाह–हिक्केत्यादि । एते उपद्रवाः पानहतान् पुरुषान् भजन्ते । असितं कृष्णं, अथवा नीलं चाषपक्षप्रतिमम् । रुधिरप्रभे अतीव रक्ते' (आ० द०) ॥ २२ ॥

मदात्ययेऽपि दाहो भवत्यतः सप्तप्रकारं दाहमाह, तत्र मद्यजमाह—त्वच- मित्यादि । पानोष्मा मद्यपानकुपितपित्तस्यौष्ण्यं; समानोष्मेति पाठान्तरमयुक्तं, सुश्रुते पानात्यये श्लोकस्यास्य पाठात् । पित्तजोऽप्ययं हेतुभेदात्पृथक् पठितः ॥ १ ॥

कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवम् ।
स उष्यते तृष्यते च ताम्राभस्ताम्रलोचनः ॥ २ ॥
लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते ।
(सु. उ. अ. ४७)

रक्तजमाह—कृत्स्नेत्यादि । स उष्यते समीमस्थेनेव वह्निना तप्यते, संधूप्यत इति पाठान्तरे संधूपनवद्वेदनामनुभवति । ताम्राभ इति गात्रे । लोहगन्धाङ्गवदन इति लोहस्येव गन्धोऽङ्गे वदने च यस्य स तथा ॥ २ ॥

पित्तज्वरसमः पित्तात्स चाप्यस्य विधिः स्मृतः ॥ ३ ॥
(सु. उ. अ. ४७)

पित्तजमाह—पित्तेत्यादि । पित्तज्वरसमः पित्तज्वरलिङ्गयुक्तः, पित्तज्वरे त्वामा- शयदुष्ट्यादयोऽधिका इति भेदः । स चाप्यस्य विधिरिति पित्तज्वरचिकित्सा ॥ ३ ॥

***तृष्णानिरोधादब्धातौ[१] क्षीणे तेजः समुद्धतम् ।**
सबाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः ॥ ४ ॥
संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य वेपते ।
(सु. उ. अ. ४७)

तृष्णानिरोधजमाह—तृष्णेत्यादि । तेजः समुद्धतं पित्तोष्मा वृद्ध इत्यर्थः निष्कृष्य निःसार्य ॥ ४ ॥—

असृजः पूर्णकोष्ठस्य दाहोऽन्यः स्यात्सुदुःसहः ॥ ५ ॥
(सु. उ. अ. ४७)

अवगाढशस्त्रप्रहारजनितरक्तपूर्णकोष्ठजमाह—असृज इत्यादि । न चोक्तरक्त- जेनास्य पौनरुक्त्यं, कृत्स्नदेहानुगमिति वचनात् कारणभेदाच्च । असृजः पूर्णकोष्ठ- स्येति "पूरणगुणसुहितार्थ-" इत्यादिना ज्ञापकेन कर्तरि षष्ठी, रक्तेन पूरितकोष्ठस्ये- त्यर्थः । कोष्ठशब्देन हृदयादयो गृह्यन्ते । यदाह सुश्रुतः,—"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते" (सु. चि. स्था. अ. २)—इति ॥ ५ ॥

†धातुक्षयोत्थो यो दाहस्तेन मूर्च्छातृडर्दितः ।
क्षामस्वरः क्रियाहीनः स सीदेद्भृशपीडितः ॥ ६ ॥
(सु. उ. अ. ४७)

---

* 'तृष्णाविधारणादब्धातौ रसे क्षीणे सति, तेजः संमुत्थितं पित्तोष्मा वृद्ध इत्यर्थः । सबा- ह्याभ्यन्तरं देहं प्रदहेत् । मन्दचेतसो विसंज्ञस्य । निष्कृष्य निःसार्य कम्पते' (आ० द०) ॥ ४ ॥ ५ ॥—

† 'धातवो रसादयः, तेषां क्षयेण यो दाहो भवति तेन धातुक्षयजदाहेन, क्षामस्वरो दुर्बलस्वरः' (आ० द०) ॥ ६ ॥

---

१ गे इति कः ।

(क्षतजोऽनश्नत श्चान्नं शोचतोवाप्यनेकधा ।
तेनांतर्दह्यतेत्यर्थं तृष्णा मूर्च्छा प्रलापवान् ॥)
(इति क.)

धातुक्षयजमाह—धात्वित्यादि । धातवो रसादयः । क्रियाहीनो निश्चेष्टः; किंवा भृशपीडितो दाहेन क्रियाहीनश्चिकित्साहीनो यदि भवेत्तदा सीदेन्म्रियेत इत्यर्थः ॥६॥

*मर्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमो मतः ।
सर्वे एव च वर्ज्याः स्युः शीतगात्रस्य देहिनः ॥ ७ ॥
(सु. उ. अ. ४७)

इति श्रीमाधवकरविरचिते माधवनिदाने दाहनिदानं समाप्तम् ॥ १९ ॥

क्षतजमाह क्षतज इत्यादि मर्माभिघातजमाह—मर्मेत्यादि । मर्माणि शिरोहृदय-वस्त्यादीनि । जेज्झटस्तु सप्तत्वमन्यथा गणयति,—'त्वचं प्राप्त' इत्यादिना प्रथमः, 'कृत्स्नदेहानुगं रक्तं'—इत्यत्र रक्तस्थाने पित्तं पठित्वा एतदादिना 'स चाप्यस्य विधिः स्मृतः' इत्यन्तेन पैत्तिको द्वितीयः तृष्णानिरोधजस्तृतीयः, 'असृजः पूर्णकोष्ठस्य' इति चतुर्थः, धातुक्षयजः पञ्चमः, षष्ठस्य तु क्षतजस्य लक्षणं पठति,—"क्षतजोऽनश्न-तश्चान्नं शोचतश्चाप्यनेकधा । तेनान्तर्दह्यतेऽत्यर्थं तृष्णादाहप्रलापवान्" इति, मर्मा-भिघातजस्तु सप्तम इति ॥ ७ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां दाहनिदानं समाप्तम् ॥ १९ ॥

अथोन्मादनिदानम् ।

†मदयन्त्युद्धता दोषा यस्मादुन्मार्गमागताः[1] ।
मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः ॥ १ ॥
(सु. उ. अ. ६२)

मदात्यये 'उन्मादमिव चापरम्'—इत्यनेनोन्मादसंकीर्तनमुन्मादसादृश्यं चोक्तं, तथा मदात्ययेऽपि दाहो भवतीति स्वल्पवक्तव्यतया दाहमभिधायोन्मादारम्भः, तस्य

---

*'क्षतजेनाश्नतश्चान्नं शोचतो वाऽप्यनेकधा । तेनान्तं दह्यतेऽत्यर्थं तृष्णादाहप्रलापवान्'—इति । अस्यार्थः—पूर्वमसृजः पूर्णकोष्ठस्येत्यादिना कोष्ठस्थेन रक्तेन दाहमभिधायेदानीं प्रका-रान्तरेणाह—क्षतजेन, रक्तेन, अश्नतो भोजनं कुर्वतः, शोकं कुर्वतो वाऽपि नरस्यान्यो दाहो रक्तेन भवतीति संबन्धः, तेन दाहेनाभ्यन्तरं दह्यते, तृष्णामूर्च्छाप्रलापवान् 'नरो भवति' इति शेषः । मर्माभिघातजस्तु सप्तमः । सर्वेषामपि दाहानामवस्थायां वर्जनीयत्वमाह—सर्वे इति । सर्वे एव हि 'दाहा' इति शेषः । शेषं सुगमम्' (आ० द०) ॥ ७ ॥

† 'यस्माद्दोषा मदयन्ति मनोविभ्रमं कुर्वन्ति, अतोऽयं मानसो व्याधिरुन्माद इति कीर्त्यते इति संबन्धः । अथवा ऊर्ध्वं हृदयं गताः' (आ० द०) ॥ १ ॥

---

१ 'उन्मार्गमाश्रिताः' इति क. ।

निरुक्तिमाह—मदयन्तीत्यादि । मदयन्ति मनोविभ्रमं कुर्वन्ति, उन्मार्गमागता विमार्गमागता मनोवहधमनीरनुप्राप्ताः । उद्धता वृद्धाः, अथवोर्ध्वं हृदयं गताः, ऐतेनोत्पूर्वेणैव दोषाणां वृद्धत्वं विमार्गगत्वं च दर्शितम् ॥ १ ॥

***एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।**
मानसेन च दुःखेन स च पञ्चविधो मतः ॥ २ ॥
विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ।
स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति च ॥ ३ ॥

(सु. उ. अ. ६२)

प्रकारभेदमाह—एकैकश इत्यादि । मानसेन च दुःखेनेति शोकादिना । स चेति षड्विधोऽपि । अप्रवृद्धपदमुपादायापि तरुणपदप्रयोगं कुर्वता सुश्रुतेन स्वतन्त्रोऽपि दोषजनितो मदो भवतीति दर्शितम् । अत एव चरके विविधशोणितकीयाध्याये (च. सू. स्था. अ. २४) उन्मादात्पृथगेव पठितः सनिदानचिकित्सित इति ॥ २ ॥ ३ ॥

†विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् ।
उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टाः ॥ ४ ॥

(च. चि. अ. १४)

सामान्यहेतुमाह—विरुद्धेत्यादि । दुष्टं गरसहितमन्नादि । प्रधर्षणं 'धृष' प्रधर्षणे, इत्यस्मात् प्रधर्षणमभिभवः । भयहर्षपूर्वो मनोभिघात इति भयहर्षाभ्यां मनसोऽभिभवः, भयहर्षपूर्वं इति भयं हर्षो द्वौ वा पूर्वं यस्य स तथा, पूर्वशब्दोऽत्र कारणवाची; चकारोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः, तेन कामक्रोधलोभादयोऽपि कारणमिति जेज्जटः; । अन्ये त्वाहुः—क्रोधादिभिरपि भयहर्षपूर्वक एव भवतीति, तेन तौ निर्दिष्टौ । विषमाश्च चेष्टा इति विषमाङ्गन्यासबलवद्विग्रहादय उन्मादहेतव इति योज्यम् ॥ ४ ॥

‡तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य ।
स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः ॥ ५ ॥

(च. चि. अ. १४)

---

* 'तस्य संख्यामाह—एकैकश इत्यादि । वातेन पित्तेन श्लेष्मणा, सर्वश इति सन्निपातेन अत्यर्थमूर्च्छितैरतिप्रवृद्धैः, विषात् षष्ठो भवति । स चाप्रवृद्ध इति स च विकारः, यावत् प्रवृद्धो वृद्धिं गतो न भवति, यावच्च तरुणस्तावन्मद इति संज्ञां बिभर्ति मद इति कथ्यत इत्यर्थः' (आ० द०) ॥ २ ॥ ३ ॥

† 'दुष्टं गरदुष्टमन्नादि, अशुचिभोजनं चाण्डालादिस्पृष्टं, प्रधर्षणं निन्दाद्यभिभवनं' (आ० द०) ॥ ४ ॥

‡ 'संप्राप्तिमाह—तैरित्यादि । अल्पसत्त्वस्य नरस्य मला वातादयः प्रदुष्टाः सन्तो बुद्धेर्निवासं हृदयं प्रदूष्य मनोवहानि स्रोतांस्यधिष्ठाय व्याप्याशु चेतः प्रमोहयन्ति' (आ० द०) ॥ ५ ॥

---

१ 'तेन ततः पूर्वेणैव' इति क.।

संप्राप्तिमाह—तैरित्यादि । तैरुक्तहेतुभिः । अल्पसत्त्वस्य अल्पसत्त्वगुणस्येति चक्रः; जेज्जटस्त्वाह-सत्त्वं मनः, तस्य चाल्पत्वं रजस्तमोभ्यामावृतत्वेनाल्पज्ञानजनकत्वात् । मला वातादयः । बुद्धेर्निवासं हृदयमित्यनेन हृदयस्याश्रयस्य दुष्ट्या 'तदाश्रितज्ञानस्यापि दुष्टिर्भवतीति दर्शयति । स्रोतांसि मनोवहानीति हृदयाश्रिता दश धमन्यः; एतच्च विशेषेण बोध्यं, निखिलदेहस्रोतसामेव मनोऽधिष्ठानत्वेन चरके दर्शितत्वात् । अधिष्ठाय व्याप्येत्यर्थः ॥ ५ ॥

*धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च ।
अवद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ॥ ६ ॥
(च. चि. अ. १४)

सामान्यरूपमाह—धीविभ्रम इत्यादि । एतत् सामान्यं पूर्वरूपमिति जेज्जटः, सामान्यरूपमिति चक्रः । धीविभ्रमो भ्रान्तज्ञानत्वम् । सत्त्वपरिप्लवो मनसश्चञ्चलत्वम् अधीरता कातरत्वम् । अवद्धवाक्त्वमसंबद्धवचनत्वम् । लिङ्गयतेऽनेनेति लिङ्गं, तेन पूर्वरूपं रूपं चेति व्याख्यातम् ॥ ६ ॥

†रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः ।
चिन्तादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम् ॥७॥
अस्थानहाससितनृत्यगीतवागङ्गविक्षेपणरोदनानि ।
पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलं चानिलजस्य रूपम् ॥ ८ ॥
(च. चि. अ. १४)

वातजमाह—रूक्षेत्यादि । विरेकशब्देनात्र वान्तिरप्यभिधीयते, विरेचयति देहान्मलं पृथक्करोतीति व्युत्पत्त्या । अस्थानहासेत्यादि अस्थानेऽविषये हासोऽस्थानहासः; एवमस्थानशब्दः स्मितादिषु प्रयोज्यः । स्मितमीषद्धासः । अङ्गविक्षेपो विरुद्धचेष्टा । जीर्णे बलमिति जीर्णे आहारे व्याधेर्बलं भवति ॥ ७ ॥ ८ ॥

‡अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम् ।
उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात् ॥ ९ ॥
अमर्षसंरम्भविनग्नभावाः सन्तर्जनातिद्रवणौष्ण्यचोपाः ।
प्रच्छायशीतान्नजलाभिलापः पीता च भाः पित्तकृतस्य लिङ्गम् १०
(च. चि. अ. १४)

---

* 'पर्याकुला दृष्टिरिति आकुलावलोकनम् । अन्ये तु हृदयं शून्यमित्यन्तं धीविभ्रमत्वादि सामान्यलक्षणमेवाहुः' (आ० द०) ॥ ६ ॥

† 'एतद्वातिकोन्मादलक्षणम् । रूक्षाल्पशीतान्नैर्भोज्यैः । धातुक्षयो रसादिधातुक्षयः, एतैर्दुष्टो वायुश्चिन्ताशोकादिदुष्टं हृदयं मनः प्रविश्य बुद्धिं स्मृतिं च शीघ्रमुपहन्ति । अनुभूतार्थस्मरणं स्मृतिः । पारुष्यं रौक्ष्यं, कार्श्यं कृशता, अरुणवर्णता ईषद्रक्तवर्णता' (आ० द०) ॥ ७ ॥ ८ ॥

‡ 'अजीर्णादिभिश्चितं संचयतां गतमुदीर्णवेगं पित्तं पूर्ववच्चिन्तादिदुष्टहृदयस्य बुध्यादिकमुपहन्ति । अजीर्णमविदग्धं, संरंभ आरभटी, हस्तपादादिविक्षेपणमित्यन्ये । विनग्नभावो वस्त्रादित्यागः, सन्तर्जनं परित्रासनं भर्त्सनमपरस्येत्यर्थः । चोपो दाहविशेषः । पीता च भाः पीतवर्णता' (आ० द०) ॥ ९ ॥ १० ॥

पित्तजमाह—अजीर्णेत्यादि । अशीतैरिति उष्णैः । उन्मादमत्युग्रमिति अत्युग्रं तीव्रवेगं, 'उन्मादयत्युग्रं' इति पाठान्तरे उग्रं यथा भवति तथोन्मादं जनयति । अनात्मकस्य अनात्मवतः । पूर्ववदिति चिन्तादिदुष्टहृदयस्य बुद्ध्यादिकमुपहत्येत्यादिसंप्राप्त्या । कुर्यादिति वक्ष्यमाणं लिङ्गमिति शेषः । अत्र पक्षे किं तल्लिङ्गमित्याह—अमर्षेत्यादि । —अमर्षोऽसहिष्णुत्वं, न तु रोषः; तस्य वक्ष्यमाणत्वात् । संरम्भ आरभटी; विनग्नभावो नग्नत्वम् । संतर्जनं परित्रासनं, अतिद्रवणं पलायनं, औष्ण्यं गात्रस्य; औष्ठ्यमिति पाठान्तरे विकृतौष्ठत्वम् । प्रच्छायशीतान्नजलाभिलाष इति छायायां शीतयोरन्नजलयोश्चाभिलाषः ॥ ९ ॥ १० ॥

*संपूर्णैर्मन्दविचेष्टितस्य सोष्मा कफो मर्मणि संप्रदुष्टः ।
बुद्धिं स्मृतिं चाप्युपहत्य चित्तं प्रमोहयन् संजनयेद्विकारम् ॥ ११ ॥
वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियताऽतिनिद्रा ।
छर्दिश्च लाला च बलं च भुक्ते नखादिशौक्ल्यं च कफात्मके स्यात् ॥

(च. चि. अ. १४)

कफजमाह—संपूर्णैरित्यादि । मन्दविचेष्टितस्य आयासशून्यस्य । संपूर्णैर्भोजनादिभिः, कफो दुष्ट इति संबन्धः । सोष्मा सपित्तः । कफेनापि क्रियमाण उन्मादोऽवश्यं सपित्तेन क्रियते व्याधिमहिम्ना, यथा मूर्च्छा । अन्ये त्वाहुः—केवलकफेनापि क्रियते, सोष्मपदेन तु द्वन्द्वजोऽपि भवतीति सूच्यते । अन्ये त्वाहुः—ऊष्मशब्देन शक्तिरुच्यते, तेनोत्कृष्टशक्तिकः कफ इत्यर्थः । मर्मणीति हृदये । विकारमुन्मादम् । वागित्यादौ नारीविविक्तप्रियतेति नारीप्रियता विजनप्रियता च । बलं च भुक्ते इति 'व्याधेः' इति शेषः । नखादीत्यादिशब्देन त्वङ्मूत्रनेत्रादीनां ग्रहणम् ॥ ११ ॥ १२ ॥

†यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स च हेतुभिः स्यात् ।
सर्वाणि रूपाणि बिभर्ति तादृग्विरुद्धभैषज्यविधिर्विवर्ज्यः ॥ १३ ॥

(च. चि. अ. १४)

सान्निपातिकमाह—य इत्यादि । सर्वैः समस्तैरिति सर्वैरिति कृत्वाऽपि यत् समस्तैरिति करोति तेनैवं बोधयति,—वातादयोऽनेकैः स्वनिदानैः कुपिता उन्मादं जनयन्ति, नतु प्रत्येकमेकनिदानकुपिताः । विरुद्धभैषज्यविधिर्विवर्ज्य इति । अयमभिसन्धिः—त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका क्रिया कार्या, सा च परस्परविरोधिनी, त्रिदोषहरं च किंचिदेव द्रव्यमामलक्यादि, तत्तु नात्र यौगिकं, 'न हि सर्वाणि सर्वत्र

* 'चित्तं प्रमोहयन् बुद्धिं स्मृतिं चोपहत्योन्मादं करोति वाक्चेष्टितं मन्दमल्पं, निद्राबाहुल्यं, छर्दिः, लालास्रावः, नखनेत्रादीनां शौक्ल्यं च' (आ० द०) ॥ ११ ॥ १२ ॥

† 'सन्निपातग्रहणेनैव सर्वात्मकत्वं लब्धं पुनः सर्वैरिति यद्ग्रहणं कृतं तद्रजस्तमोग्रहणार्थं, तेन रजस्तमोमिलितैरित्यर्थः; तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिलिताः समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति । सर्वाणि रूपाणि सर्वदोषलक्षणानि बिभर्ति । तादृगिति तादृशः । कोऽप्येष त्रिदोषसंप्राप्तिविशेषो रोगविशेषो वा, येनायं विरुद्धभैषज्यविधिर्विवर्ज्यः' (आ० द०) ॥ १३ ॥

यौगिकानि भवन्ति' इति-वचनात् । ननु, यद्येवं तदा सर्वे एव हि त्रिदोषजविकारा असाध्या भवेयुरित्यत उक्तं—तादृगिति । कोऽप्ययं संप्राप्तिविशेषो रोगविशेषो वा, येनायं विरुद्धभैषज्यविधिर्न तु सर्वं इत्यर्थः । अन्ये त्वाहुः—सर्वैः समस्तैर्हेतुभिर्यः कृतः स एवासाध्यः, न त्वल्पहेतुकृत इति ॥ १३ ॥

*चोरैर्नरेन्द्रपुरुषैररिभिस्तथाऽन्यै-
र्वित्रासितस्य धनवान्धवसंक्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतमो मनसो विकारः ॥ १४ ॥
चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चापि मूढः ।
(सु. उ. अ. ६२)

शोकादिजमाह—चोरैरित्यादि । क्षते उपहते, प्रियया रिरंसोः कामुकस्य, अप्राप्तया प्रियया क्षते मनसीति संबन्धः । तस्य लक्षणमाह—चित्रमित्यादि । चित्रं विविधम् । मनोऽनुगतं गोप्यमपि । विसंज्ञो विपरीतज्ञानः, अत एव मूढः ॥ १४ ॥

†रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृतेऽथ भवेद्विसंज्ञः ॥ १५ ॥
(सु. उ. अ. ६२)

विषजमाह—रक्तेक्षण इत्यादि । हतबलेन्द्रियभा इति हतं बलमिन्द्रियाणि भाश्च यस्य स तथा । भा दीप्तिः ॥ १५ ॥

‡अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः ।
जागरूको ह्यसंदेहमुन्मादेन विनश्यति ॥ १६ ॥
(सु. सू. अ. ३४)

साध्यलक्षणमाह—आवाञ्चीत्यादि । अवाञ्ची अधोमुखः, उदञ्ची ऊर्ध्वमुखः, अत एवान्ये 'अवाङ्मुखस्तून्मुखो वा' इति पठन्ति । जागरूकोऽनिद्रः ॥ १६ ॥

¶अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादिभिर्यः ।
उन्मादकालोऽनियतश्च यस्य भूतोत्थमुन्मादमुदाहरेत्तम् ॥ १७ ॥
(च. चि. अ. १४)

* 'मनोदुःखजमाह—चौरैरित्यादि । नरेन्द्रपुरुषैर्नृपाधिकारिभिः, अरिभिः, अन्यैरिति सिंहगजादिभिः, वित्रासितस्य क्रोधशस्त्रादिभिः; द्रव्यविनाशात् पुत्रादिमरणाद्वा गाढं क्षते मनसीति संबन्धः' (आ० द०) ॥ १४ ॥—

† 'श्यावाननः कृष्णमुखो विषजनितोन्मादेन' (आ० द०) ॥ १५ ॥

‡ 'क्षीणं मांसं बलमोजश्च यस्य स तथा' (आ० द०) ॥ १६ ॥

¶ 'अनियत इति कदाचिन्मध्याह्ने कदाचित्प्रदोषे, न तु वातादिजवदाहारजीर्णादिकालनियमः; तं भूतोत्थमुन्मादं कथयेत्' (आ० द०) ॥ १७ ॥

१ 'अवाञ्चीवाप्युदञ्चीवा' इति पाठः ।

भौतिकोन्मादस्य सामान्यलक्षणमाह—अमर्त्यवागित्यादि । अमर्त्या अमनुष्या अनुचिता वा वागादयो यस्य स तथा । विक्रमः पराक्रमः, वीर्यं शक्तिः, चेष्टा शारीरिकी क्रिया । ज्ञानादिविज्ञानबलादिभिरित्युपलक्षणे तृतीया । ज्ञानं तत्त्वज्ञानं, विज्ञानं शिल्पादिज्ञानं; किंवा ज्ञानं शास्त्रज्ञानं, विज्ञानं तदर्थनिश्चयः; आदिशब्देन स्मृत्यादीनां ग्रहणं, तेषां बलम्। अनियत इति न वातजादिवदाहारजीर्णादिकालवत् कालनियमः। नियत इति पाठे तु वक्ष्यमाणानियततिथ्यादीनां ग्रहणं, देवग्रहाः पौर्णमास्यामित्यादि। भूतशब्देनात्र सर्वे एव वक्ष्यमाणा देवादयोऽभिधीयन्ते ॥ १७ ॥

***संतुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रीरवितथसंस्कृतप्रभाषी।**
तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः॥१८॥
(सु. उ. अ. ६०)

देवजुष्टमाह—संतुष्ट इत्यादि । अतिदिव्यमाल्यगन्ध इति अतिमात्रो दिव्यमाल्यस्येव गन्धो यस्य स तथा । निस्तन्द्रीरनिद्रः । अवितथं सत्यम् । **विदेहेऽपि,**—"निःस्वप्नं सत्यसंस्कृतभाषिणम्"—इति पठितम्। ब्रह्मण्यो ब्राह्मणानुरक्तः । देवजुष्टो देवग्रहपीडितः । देवग्रहणेन गणमातृकादयोऽपि ग्राह्याः । **विदेहेऽपि** पठ्यते,—"क्रोधनः स्रस्तसर्वाङ्गो लालाफेनाविलाननः । निद्रालुः कम्पनो मूको गणमातृभिरर्दितः—" इति ॥ १८ ॥

†संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः।
संतुष्टो न भवति चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः॥१९॥
(सु. उ. अ. ६०)

देवशत्रुजुष्टमाह—संस्वेदीत्यादि ॥ १९ ॥

‡हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः।
नृत्यन्वै प्रहसति चारु चाल्पशब्दं
गन्धर्वग्रहपरिपीडितो मनुष्यः ॥ २० ॥
(सु. उ. अ. ६०)

---

* 'संतुष्टः संतोषवान्, शुचिः स्नानाचमनादिना। अवितथं सत्यं संस्कृतं च प्रभाषत इति। तेजस्वी तेजोयुक्तः, स्थिरनयनो निमेषरहितः, वरदाता, यतो ब्रह्मण्यो ब्राह्मणानुरक्तः (आ० द०)॥ १८॥

† 'असुरजुष्टमाह-संस्वेदीत्यादि । यः संस्वेदी स्वेदवान्, ब्राह्मणगुरुदेवानां निन्दकः, जिह्माक्षः कुटिलदृष्टिः, विमार्गदृष्टिः श्रुतिधर्मनिन्दकः; अन्नं शालिमांसादि, पानं क्षीरमद्यादि, तैः संतुष्टो न भवति। दुष्टात्मा पापबुद्धिः । एवंविधो देवशत्रुजुष्टो भवति' (आ० द०)॥ १९ ॥

‡ 'हृष्टात्मा चिन्तादिरहितः संतुष्टात्मा । पुलिनं नद्यादितटं, वनमुद्यानं, तयोरन्तरं मध्यं, तद्विशेषात्सेवत इति' (आ० द०) ॥ २० ॥

गन्धर्वाविष्टमाह—हृष्टेत्यादि । पुलिनं तोयोज्झितं तटं, अन्तरं मध्यं, विशेषो वा । स्वाचारोऽनिन्दिताचारः । प्रियेत्यादि प्रियाणि परि सर्वतो गीतगन्धमाल्यानि यस्य सं तथा । नृत्यन्नित्यादि चारु (यथा भवति तथा) नृत्यन्नल्पशब्दं यथा भवति तथा प्रहसतीति योज्यम् ॥ २० ॥

*ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीडितो मनुष्यः ॥ २१ ॥
(सु. उ. अ. ६०)

यक्षाविष्टमाह—ताम्राक्ष इत्यादि । प्रियेत्यादि प्रियं शोभनं, तनु सूक्ष्मं, रक्तं च वस्त्रं धर्तुं शीलं यस्य स तथा ॥ २१ ॥

†प्रेतानां स दिशति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः ।
मांसेप्सुस्तिलगुडपायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिजुष्टः ॥ २२ ॥
(सु. उ. अ. ६०)

पितृजुष्टमाह—प्रेतानामित्यादि । प्रेतानां मृतपितॄणां. संबन्धमात्रविवक्षया न चतुर्थी । दिशति ददाति । संस्तरेषु कुशपत्रादिरचितास्तरणेषु । अपसव्यवस्त्रो वामोत्तरीयः । मांसेप्सुरित्यादि । एतदभिधानप्रयोजनं यस्मिन् यस्येच्छा भवति तस्य तेनैव बलिर्दातव्यः, एमन्यत्रापि द्रष्टव्यम् । तद्भक्तः पितृभक्तः ॥ २२ ॥

‡यस्तूर्व्यां प्रसरति सर्पवत्कदाचित्
सृक्कण्यौ विलिहति जिह्वया तथैव ।
क्रोधालुर्गुडमधुदुग्धपायसेप्सु-
र्ज्ञातव्यो भवति भुजङ्गमेन जुष्टः ॥ २३ ॥
(सु. उ. अ. ६०)

नागाविष्टमाह—यस्त्वित्यादि । प्रसरति सर्पवदिति उरसा गच्छति । सृक्कण्यौ ओष्ठप्रान्तौ । सृक्कणीशब्द ईकारान्तोऽप्यस्तीत्युन्नेयम् ॥ २३ ॥

---

* 'ताम्राक्षो रक्तनेत्रः । गम्भीरोऽनाकुलितान्तःकरणः, द्रुतगतिस्त्वालगतिः; अल्पवागल्पभाषी, सहिष्णुः सहनशीलः । कस्मै किं ददामीत्येवं वदति' (आ० द०) ॥ २१ ॥

† 'पिण्डानन्नमयान्, शान्तात्मा शान्तस्वभावः, जलमपि चेति न परं दर्भसंस्तरेषु पिण्डान् ददाति किंतु जलमपि चेत्यर्थः । 'अपसव्यहस्तः' इति पाठे दक्षिणहस्तः । पायसः क्षीरसिद्धास्तण्डुलाः, अभिकामोऽभिलाषुकः, तद्भक्तः पितृभक्तः; तद्भक्तः तिलादिभोजन इति ढल्हणः' (आ० द०) ॥ २२ ॥

‡ 'सर्पग्रहजुष्टमाह—य इत्यादि । उर्व्यां भूमौ सर्पवदुरसा गच्छति, सृक्कण्यावोष्ठप्रान्तौ जिह्वया विलिहति । क्रोधालुः कोपनः, गुडादिप्रियः, भुजङ्गमग्रहेण जुष्टो ज्ञेयः' (आ० द०) ॥ २३ ॥

*मांसासृग्विविधसुराविकारलिप्सु-
निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः।
क्रोधालुर्विपुलबलो निशाविहारी
शौचद्विड् भवति स राक्षसैर्गृहीतः॥ २४॥
(सु. उ. अ. ६०)

राक्षसाविष्टमाह—मांसेत्यादि। निशाविहारी निशायामेव भ्रमणशीलः। राक्षसशब्देन ब्रह्मराक्षसादयोऽपि ग्राह्याः। तथा राक्षसानन्तरं विदेहोऽपि पठति,—"देवविप्रगुरुद्वेषी वेदवेदाङ्गनिन्दकः। आत्मपीडाकरो हासी ब्रह्मराक्षससेवितः"—इति॥ २४॥

†उद्धस्तः कृशपरुषोऽचिरप्रलापी
दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः।
बह्वाशी विजनवनान्तरोपसेवी
व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः॥ २५॥
(सु. उ. अ. ६०)

पिशाचाविष्टमाह—उद्धस्त इत्यादि। उद्धस्त ऊर्ध्ववाहुः; उद्वस्त्र इति पाठान्तरं न्याय्यं, विदेहेऽपि दिगम्बरपाठात्; उद्वस्त्रो नग्नः। परुषो रूक्षः। लोलः सर्वस्मिन्नन्ने पाने च सतृष्णः। लोलुरिति पाठान्तरे स एवार्थः। व्याचेष्टन्निति विरुद्धमाचेष्टन्॥ २५॥

‡स्थूलाक्षो द्रुतमटनः स फेनलेही
निद्रालुः पतति च कम्पते च यो हि।
यश्चाद्रिद्विरदनगादिविच्युतः स्यात्
सोऽसाध्यो भवति तथा त्रयोदशाब्दे॥ २६॥
(सु. उ. अ. ६०)

---

* 'विविधसुराविकाराः पैष्टीप्रभृतयः, भृशमतिशयेन लज्जारहितः, अतिनिष्ठुरो दयारहितः, विपुलबलोऽन्नादिनाऽपि प्रभूतबलः' (आ० द०)॥ २४॥

† 'कृशो निर्मांसः, विरुद्धलापी विरुद्धभाषी, 'अचिरप्रलापी' इति पाठान्तरम्। दुर्गन्धः' 'अतिलोलः' इत्यत्र अतिचपल इत्यन्ये; 'अतिलोलुः' इति पाठान्तरे अशनलोलुप इत्यर्थः; बह्वाशी प्रचुरभोक्ता। विजनं निर्जनस्थानं, हिमाम्बु शीताम्बु, तयोः सेवी, रात्रेः सेवी रात्रिविचारीत्यर्थः। 'निजनवनान्तरोपसेवी' इति पाठान्तरम्। व्याचेष्टन् विविधं चेष्टन्; 'व्याचेष्टं' इति पाठान्तरे विरुद्धचेष्टं यथा भवति तथा भ्रमति' (आ० द०)॥ २५॥

‡ 'त्रिविधं हि हिंसाक्रीडापूजार्थं ग्रहा गृह्णन्ति। यदुक्तं "अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम्। हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि च"—इति। अस्यार्थः—भिन्नमर्यादं श्रुतिस्मृत्युदितकर्मणोऽन्यत्र कर्मणि प्रवृत्तं, अभक्ष्यागम्याहिंसादिप्रवृत्तत्वात्। क्षते सव्रणे, मांसशोणितप्रियत्वात्। अक्षतमपि शौचादिरहितम्। अत्र विहारशब्देन रतिरभिधीयते। सत्कारः

---

१ 'राक्षसान्तरं' इति क.। २ एतच्च 'विजनहिमाम्बुरात्रिसेवी' इति पाठाभिप्रायेण॥

त्रिविधं हि हिंसाक्रीडापूजार्थं ग्रहा गृह्णन्ति । यदुक्तम्,—"अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम् । हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि च" (सु. उ. तं. अ. ६०)—इति । तत्र हिंसार्थं गृहीतोऽसाध्यो भवति, तस्य श्लोकार्धद्वयेन लक्षणमाह—स्थूलाक्ष इत्यादि । स्थूलाक्षो विकृतनेत्र इति जेज्जटः, द्रुतमटनो द्रुतगतिः, अत एव त्वरितगतिरिति जेज्जटेन पठितम् । यश्चेत्यादि ।—पर्वतादिपतितः सन् यो गृह्यते सोऽप्यसाध्यः, नगो वृक्षः । स सर्व एवोन्मादी त्रयोदशेऽब्दे देवतागृहीतोऽप्यसाध्यः । विदेहेऽधिकमप्यसाध्यलक्षणं पठ्यते,—"मेढ्रप्रवृत्तः क्षतजः सास्राक्षः स्तनासिकः । रूक्षजिह्वः पूतिगर्भो हतवागतिदुर्बलः"—इत्यादि ॥ २६ ॥

*देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥ २७ ॥
पित्र्याः कृष्णक्षये हिंस्युः पञ्चम्यामपि चोरगाः ।
रक्षांसि रात्रौ पैशाचाश्चतुर्दश्यां विशन्ति हि ॥ २८ ॥
(सु. उ. अ. ६०)

देवादीनां ग्रहणकालमाह—देवग्रहा इत्यादि । पौर्णमास्यां पूर्णिमायाम् । कृष्णक्षयेऽमावास्यायाम् । प्रायोग्रहणादन्यत्रापि । तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्तिथौ बलिदानार्थं च ॥ २७ ॥ २८ ॥

†दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्करार्चिश्च यथा देहं च देहधृक् ।
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणः ॥ २९ ॥
(सु. उ. अ. ६०)

ननु, यदि ग्रहाविष्टानां पुंसामुन्मादः स्यात्, तदा विशन्तो ग्रहाः कुतो न लक्ष्यन्ते ? इत्यत आह—दर्पणादीनित्यादि । अस्मदादिदर्शनायोग्यत्वान्न दृश्यन्त इत्यर्थः । आदि-

---

पूजा । तत्र हिंसार्थं गृहीतोऽसाध्यो भवति । तस्य लक्षणमाह–स्थूलाक्ष इत्यादि । यश्चातिकम्पते सोऽसाध्यः । यश्चैतेभ्यः पतितः स्यात् सोऽप्यसाध्यः । अद्रिः पर्वतः, द्विरदो गजः, आदिग्रहणात्तत्प्रासादादयो गृह्यन्ते । एतेभ्यः पतितः स्यादित्यर्थः' (आ० द०) ॥ २६ ॥

* 'विशन्ति अनुप्रवेशं कुर्वन्ति । असुरा असुरग्रहाः । संध्ययोरपीत्यपिशब्दः पादपूरणे; अन्येऽपिशब्दात् पौर्णमास्यामपि गृह्णन्तीति वर्णयन्ति । प्रायशोऽष्टम्यामिति प्रायःशब्दात्संध्ययोरपि गन्धर्वा विशन्तीति लभ्यते । पित्र्याः पितृग्रहाः । पञ्चम्यामपीत्यपिशब्दात्कृष्णक्षयेऽपि । उरगा नागग्रहाः । तिथ्यभिधानप्रयोजनं तेषां तिथौ बलिदानार्थं; तथा चोक्तं—"ग्रहा गृह्णन्ति ये येषु तेषां तेषु विशेषतः । दिनेषु बलिहोमादीन् प्रयुञ्जीत चिकित्सकः"—इति' (आ० द०) ॥ २७ ॥ २८ ॥

† 'ननु भूतैः शरीरेऽनुप्रवेशः क्रियते न तु शरीरिणि, तत्कथं शरीरिण इत्यभिधानं न विरुध्यते ? उच्यते—शरीरिशब्देनात्र शरीरमभिप्रेतं, स्थानिनि स्थानोपचारात्, यथा—मञ्चाः क्रोशन्तीति । यथा छायाशीतोष्णादयो दर्पणप्राणिप्रभृतीन् विशन्तो न दृश्यन्ते तद्वद्ग्रहा इत्यर्थः' (आ० द०) ॥ २९ ॥ ३० ॥

शब्देन प्रकारवाचिना जलतैलादीनां ग्रहणम् । छाया प्रतिकृतिः, शीतोष्णमिति कर्तृपदं, प्राणिन इति कर्मपदम् । स्वमणिमिति सूर्यकान्तम् । देहधृगात्मा, मन इति जेज्जटः । अनेकदृष्टान्तप्रयोजनं जेज्जटलिखितं तच्चात्रानुपयुक्तत्वेन विस्तरभयाच्च न लिखितम् । देवशब्देन चात्र देवस्यानुचरा देवसधर्माणो गृह्यन्ते, देवानां मनुष्यशरीरेणाशुचिना संबन्धाभावात् । यदाह सुश्रुतः, "न ते मनुष्यैः सह संविशन्ति न ते मनुष्यान् क्वचिदाविशन्ति । ये त्वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपेताः (सु. उ. तं. अ. ६०)—" इति ॥ २० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामुन्मादनिदानं समाप्तम् ॥ २० ॥

*प्रविश्याशु शरीरं हि पीडां कुर्वन्ति दुःसहाम् ॥ ३० ॥
(तपांसि तीव्राणि तथैव दानं व्रतानि धर्मो नियमश्च सत्यम् ।
गुणास्तथाऽष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावम् ॥ ३१॥
न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान्क्वचिदाविशन्ति ।
ये त्वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः ॥ ३२ ॥
तेषां ग्रहाणां परिचारका ये कोटीसहस्त्रायुतपद्मसंख्याः ।
असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तथाऽऽविशन्ति ॥)

इति श्रीमाधवकरविरचिते माधवनिदाने उन्मादनिदानं समाप्तम् ॥ २० ॥

---

* 'इदानीं ग्रहाणां तीव्रतपादियमादियुक्तां प्रभाववत्तां सुश्रुतोक्तेन श्लोकत्रयेण दर्शयितुमाह—तपांसीत्यादि । तपस्तपनलक्षणमुपवासादि, व्रतानि शास्त्रोदितविधिना भोजनादिनियमनानि, कर्म कायवाङ्मनसां सुचरितम् । गुणास्तथाष्टाविति अणिमा १, महिमा २, लघिमा ३, प्राकाम्यं ४, प्राकाश्यं ५, ईशित्वं ६, वशित्वं ७, कामावसायित्वं ८, चेति । अन्ये तु—"आवेशश्चेतसो ज्ञानमर्थानां शब्दनक्रिया । दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्" इत्यष्टविधमैश्वर्यमाहुः । तेषु ग्रहेष्वेते गुणा नित्याः, न कदाचित्काः, व्यस्ता द्वित्रिचत्वार इत्यादि, समस्ताः सर्वे; यो यस्य प्रभाव इति यथाप्रभावं; तत्र व्यस्ता गुणा असुरादिग्रहाणां, समस्ता देवग्रहाणाम् । अथ ते नियमादियुक्ताश्चेत्कथमशुर्चि देहमाविशन्ति, न कथंचन, अत एवाह—नेत्यादि । ते देवादयो मनुष्यैः सह न विशन्ति नैकीभवन्तीत्यर्थः । न वा मनुष्यान् मानुषदेहान् । क्वचिदप्यनुप्रविशन्तीत्यर्थः । ये पुनर्वैद्या 'आविशन्ति' इति मोहादज्ञानात्प्रवदन्ति, ते वैद्या भूतविद्याविषयात्तज्ज्ञानादपोह्या अपसारणीयास्त्याज्या इत्यर्थः । के तर्हि गृह्णन्तीत्याह—तेषां देवादीनां परिचारकाः प्रेष्याः, कर्मकरा इत्यर्थः । कोट्यः शतलक्षप्रमाणाः, अयुतं दशसहस्रं, एतेन कोटिभिः शतलक्षप्रमाणगुणितं यत् सहस्रं तादृशैर्दशभिः सहस्रैरत्रायुतं बोद्धव्यं; तेषां पद्मं, पद्मं चतुर्दशबिन्दुकं, तदेव संख्या येषां ते तथा । सुभीमा अत्यर्थं भयानकाः । निशाविहारा रात्रौ भ्रमणशीलाः' (मा० द०) ॥ ३०-३३ ॥

अथापस्मारनिदानम्।

*(चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः।
कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते ॥ १ ॥)
तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः।
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥ १ ॥

मनोदुष्टिसाधर्म्यात् समानचिकित्स्यत्वादुन्मादानन्तरमपस्मारारम्भः। तस्य निरुक्तिः सुश्रुतेन कृता,—"स्मृतिर्भूतार्थविज्ञानमपस्तत्परिवर्जनम्। अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् (सु. उ. तं अ. ६१)"—इति। स्मृतिश्च ज्ञानोपलक्षणं, तेनानुभवागमोऽपि बोध्यः। तस्य सामान्यलक्षणमाह—तमःप्रवेश इत्यादि। तमःप्रवेशोऽन्धकारप्रवेश इव ज्ञानाभाव इत्यर्थः। संरम्भो नेत्रविकृतिः, हस्तपादादिक्षेपणादिकं च ॥ १ ॥

†हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता।
निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ ॥ २ ॥
(सु. उ. अ. ६१)

---

*'स्मरणाभावो जलादौ प्रवेशादिभिः। सुश्रुतादपस्मारस्य निदानं लिख्यते—"मिथ्यादियोगीन्द्रियार्थकर्मणामभिसेवनात्। विरुद्धमलिनाहारविहारकुपितैर्मलैः ॥ वेगनिग्रहशीलानामहिताशुचिभोजिनाम्। रजस्तमोभिभूतानां गच्छतां च रजस्वलाम् ॥ तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशम्। चेतस्यभिहते पुंसामपस्मारोऽभिजायते"—इति। अस्यार्थः—मिथ्यादियोगयुक्तानामिन्द्रियार्थानां कर्मणां चाभिसेवनादिति ज्ञेयम् तत्रेन्द्रियाणां श्रवणस्पर्शनदर्शनरसनघ्राणानामर्था विषयाः शब्दस्पर्शरसरूपगन्धाः, तेषां मिथ्यादिसेवनात्। तत्र परुषेष्टविनाशादिश्रवणं मिथ्यायोगः, पटहादीनामतिशब्दश्रवणमतियोगः, सर्वशोऽश्रवणमयोगः; अभिघातभूताशुचिसंस्पर्शो मिथ्यायोगः, अतिमात्रशीतोष्णादीनां स्पृश्यानां स्नानाभ्यङ्गादीनां चातिसेवनमतियोगः, तथा सर्वशोऽसेवनमयोगः तथाऽतितेजसामतिदर्शनमतियोगः सर्वथाऽनवलोकनमयोगः, सूक्ष्मादिदर्शनं मिथ्यायोगः; रसानामत्यादानमतियोगः, अनादानमयोगः, तथाऽयोग्यरसानामादानं मिथ्यायोगः; तथा पूत्याद्याघ्राणं मिथ्यायोगः, अतितीक्ष्णादिगन्धाघ्राणमतियोगः, सर्वशोऽघ्राणमयोगः; तथा कायिककर्मणो व्यायामादेर्निषिद्धकालादिषु सेवनं मिथ्यायोगः, अतिसेवनमतियोगः, सर्वशोऽसेवनमयोगः; तथा वाचिककर्मणः परुषानृतादिवचनं मिथ्यायोगः, अतिवचनादिकश्चातियोगः, सर्वशो मौनमयोगः; तथा मानसकर्मणः शोकादिचिन्तनं मिथ्यायोगः, अतिमात्रचिन्तनादिकमतियोगः, सर्वशोऽचिन्तनमयोगः। मलिनाहारः पूतिद्विष्टामेध्यपर्युषिताहारः, विहारोऽपि मलिनो दृष्टादृष्टार्थैः स्मृतिषु विज्ञातव्य इति। वाग्भटात्संप्राप्तिर्लिख्यते—"उन्मादवत्प्रकुपितैश्चित्तदेहगतैर्मलैः। हते सत्त्वे हृदि व्याप्ते संज्ञावाहिषु खेषु च ॥ तमोविशन्मूढमतिर्बीभत्साः कुरुते क्रियाः। दन्तान् खादन्वमन् फेनं हस्तौ पादौ च विक्षिपन् ॥ पश्यन्नसन्ति रूपाणि प्रस्खलन् पतति क्षितौ। विजिह्माक्षिभ्रुवो दोषवेगेऽतीते प्रबुध्यते ॥ कालान्तरेण स पुनश्चैवमेव विचेष्टते"—इति। तमःप्रवेशादिलक्षणो घोरोऽपस्माराख्यो गदो ज्ञेयः। स चतुर्विध इति वातात्पित्तात्कफात्सन्निपातात्। चतुर्विध इति विधानं द्वन्द्वजप्रतिषेधार्थं, द्वन्द्वजाभावस्तु व्याधिस्वभावात्' (आ० द०) ॥ १ ॥

† 'तस्मिन्नपस्मारे भविष्यति हृत्कम्पादीनि पूर्वरूपाणि भवन्ति' (आ० द०) ॥ २ ॥

पूर्वरूपमाह—हृत्कम्प इत्यादि । शून्यता हृदयस्यैव । ध्यानं जिह्मायनम् । अत्र मूर्च्छा मनोमोहः, प्रमूढता इंद्रियमोहः ॥ २ ॥

*कम्पते प्रदशेद्दन्तान् फेनोद्वामी श्वसित्यपि ।
परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥ ३ ॥
(सु. उ. अ. ६१)

वातिकलक्षणमाह—कम्पत इत्यादि । श्वसिति खरश्वासो भवति । रूपाणीति प्राणिनः, 'नीलो मामनुधावति'—इति सुश्रुतवचनात्, एवं पैत्तिके 'पीतो मामनुधावति'—इति, एवं श्लैष्मिके 'श्वेतो मामनुधावति'—इति ॥ ३ ॥

†पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः ।
सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिकः ॥ ४ ॥
(सु. उ. अ. ६१)

पैत्तिकलक्षणमाह—पीतेत्यादि । पीतासृग्रूपदर्शक इति पीतलोहितवर्णसमस्तवस्तुदर्शी । सतृष्णेत्यादि सतृष्णश्चासावुष्णश्चेति सतृष्णोष्णः, सतृष्णोष्णश्चासावनलव्याप्तलोकदर्शी चेति समासः ॥ ४ ॥

‡शुक्लफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः ।
पश्येच्छुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात् ॥ ५ ॥
(च. चि. अ. १५)

श्लैष्मिकलक्षणमाह—शुक्लेत्यादि । हृष्टाङ्गजो हृष्टरोमा । चिरादित्यनेन वातपित्तयोरचिरेण वेगमोक्ष इति सूचयति ॥ ५ ॥

§सर्वैरेतैः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः ।
अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥ ६ ॥
प्रतिस्फुरन्तं[१] बहुशः क्षीणं प्रचलितभ्रुवम् ।
नेत्राभ्यां च विकुर्वाणमपस्मारो विनाशयेत् ॥ ७ ॥
(च. चि. अ. १५)

सान्निपातिकलक्षणमाह—सर्वैरित्यादि । स चेति स सान्निपातिकः । क्षीणस्यैकदोषजोऽप्यसाध्यः । एवमनवश्च बोध्यः । प्रस्फुरन्तं प्रकम्पन्तम् । नेत्राभ्यां च । विकुर्वाणमिति नेत्राभ्यां विकृतिमासादयन्तम् ॥ ६ ॥ ७ ॥

---

* 'अनिलाद् दन्तान् दशति, तथा फेनमुद्वमति, परुषारुणकृष्णानि रूपाणि पश्येद्' (आ० द०) ॥ ३ ॥

† 'पैत्तिकः पित्तापस्मारयुक्तः पुरुषः पीतफेनाङ्गवक्त्राक्षो भवति' (आ० द०) ॥ ४ ॥

‡ 'श्लैष्मिको नरः शुक्लफेनाङ्गवक्त्राक्षो भवति । शीतहृष्टाङ्गज इति शीतः शीतगात्रः । कृष्णपीतशुक्लदर्शनं वातादीनां प्रभावः, न तु पैशाचादिकं रूपमभिप्रेतम्' (आ० द०) ॥ ५ ॥

§ 'एतैः सर्वैस्त्रिभिः समस्तैश्च लिङ्गैस्त्रिदोषजः सान्निपातिको ज्ञेयः 'बहुशोऽपसरन्तं तु' इति पाठान्तरं; बहुशो बहून्वारानपसरन्तमपसारवेगवन्तं, क्षीणं पुरुषमिति शेषः । इत्थंभूतं पुरुषमपसारवेगाद्युपद्रवसहितमपस्मारो विनाशयेदिति संबन्धः' (आ० द०) ॥ ६ ॥ ७ ॥

---

१ प्रस्फुरन्तम् सुबहुशः इत्यपि पाठः ।

*पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः।
अपस्माराय कुर्वन्ति वेगं किंचिदथान्तरम् ॥ ८ ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित्।
शरदि प्रतिरोहन्ति तथा व्याधिसमुच्छ्रयाः ॥ ९ ॥
(सु. उ. अ. ६१)

इति श्रीमाधवकरविरचिते माधवनिदानेऽपस्मारनिदानं समाप्तम् ॥ २१ ॥

अपस्मारप्रकोपकालमाह—पक्षादित्यादि। पक्षात् पैत्तिकः, द्वादशाहाद्वातिकः, मासाच्छ्लैष्मिकः। द्वादशाहानन्तरं पक्षे वक्तव्ये तत्पूर्वं पक्षाभिधानं, तेनात्राऽधिककालेनापि वेगं करोतीत्याहुः। किंचिदथान्तरमिति उक्तकालेभ्योऽर्वागपि दोषतारतम्यादिति। ननु, वेगं कृत्वाऽपस्मारारम्भको दोषोऽस्त्येव तत् कुतः सर्वदा वेगं न कुरुते? द्वादशाहादिष्वेव कुरुत इत्याह—देवे वर्षतीत्यादि। अयमभिसन्धिः—तेजोवनीपवनपयःसनाथं विद्यमानमपि बीजं कालविशेष एवाङ्कुरं जनयति, कालविशेषस्य सहकारित्वात्; तथा गतस्याप्यपस्मारस्य पुनरुद्भवः संभवति। शरदीति तत्कालोचितबीजाभिप्रायेण, तेन कानिचिद्बीजानि वर्षास्वपि भवन्तीति। अयं च न्यायश्चातुर्थिकज्वरादिष्वपि बोध्यः ॥ ८ ॥ ९ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामपस्मारनिदानं समाप्तम् ॥ २१ ॥

अथ वातव्याधिनिदानम्।

[1]रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः।
विषमादुपचाराच्च दोषासृक्स्रवणादपि ॥ १ ॥

---

* 'वातादिजनितापस्मारवेगदिननियमलक्षणमाह-पक्षादित्यादि। मला वातादयः कुपिताः सन्तोऽपस्माराय पक्षादथवा द्वादशाहान्मासाद्वा वेगं कुर्वन्ति। अयमभिसन्धिः। अथ दृष्टान्ताभिप्रायः-यथा वर्षत्यपि देवे भूमावुप्तानि कानिचिद्बीजानि शरद्येव प्ररोहन्ति, तथा सर्वरोगबीजानां वातादीनां कदाचित् कस्यचिदपस्मारादिव्याधिविशेषस्य निदानादिसंगमेऽपि दूष्यादिसमुदायेनैव समुद्भवो भवतीत्यर्थः। अन्ये त्वन्यथा व्याख्यानयन्ति-ननु, संचयादिक्रमेणोपयोगो दोषाणां तदा पुनः कथमल्पेनैव कालेन तद्विकारोद्गमः स्यादित्यत्राह-देवेऽवर्षतीत्यादि। अवर्षत्यपि देवे यथा शरत्काले भूमौ स्तिमितत्वात्कानिचिद्बीजानि प्ररोहन्त्येव, तथाऽल्पेनापि कालेन शरीरस्था दोषाः किंचिदुपचिता विकारं जनयन्तीति' (आ० द०) ॥ ८ ॥ ९ ॥

† 'सुश्रुते दोषाणां वात एव प्रधानः। उक्तं च-"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्"-इति। अतो वातव्याध्यभिधानम्। तस्य संप्राप्तिपूर्वकं निदानमाह-रूक्षेत्यादि। अल्पं स्तोकं, लघ्वन्नं पुरातनं षष्टिकादि, व्यवायो मैथुनं, प्रजागरो रात्रिजागरणम्। विषमादुपचारादिति अप्राप्ते क्रियाकाले

---

[1] 'प्रथमं' इति क.।

लङ्घनप्लवनात्यध्वव्यायामादिविचेष्टितैः।
धातूनां संक्षयाच्चिन्ताशोकरोगातिकर्षणात् ॥ २ ॥
वेगसंधारणादामादभिघातादभोजनात्।
मर्माबाधाद्गजोष्ट्राश्वशीघ्रयानापतंसनात् ॥ ३ ॥
देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली।
करोति विविधान् व्याधीन् सर्वाङ्गैकाङ्गसंश्रयान् ॥ ४ ॥
(च. चि. अ. २८)

अपस्मारवद्वातविकाराणामप्याक्षेपकादीनां वेगकर्तृत्वादपस्मारानन्तरं, वातव्याध्यारम्भः। ननु, वातव्याधिरिति कोऽर्थः? किं वात एव व्याधिर्वातव्याधिः, उत वातेन जनितो व्याधिर्वातव्याधिः? आद्ये स्वस्थेष्वपि प्रसङ्गः, द्वितीये ज्वरादिषु। उच्यते, व्याधिपदसामानाधिकरण्याद्विकृतो दुःखकारी वातो वातव्याधिः। उक्तं हि सुश्रुते,— "पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च" (सु. नि. स्था. अ. १)—इति। वातजनितोऽसाधारणव्याधिर्वातव्याधिरिति विशेषणीयं, तेनोभयत्राप्रसङ्गः। यच्चोक्तं,— "कफपित्तान्वितो वायुर्वायुरेव च केवलः। कुर्यादाक्षेपकम्" इत्यादि; तत्रारम्भको वायुरेव, पित्तकफौ त्वनुबन्धाविति न विरोधः स्यात्। चरके हि द्विविधा व्याधय उक्ताः सामान्यजा नानात्मजाश्चेति, तत्र सामान्यजा ये वातादिभिः समस्तैर्व्यस्तैर्वा जन्यन्ते, यथा—ज्वरादयः, नानात्मजा ये नियतैकदोषजन्याः, यथा—आक्षेपकादयो ये वातेनैव जन्यन्ते, न स्वतन्त्रेण पित्तेन कफेन वा; तथौषचोषादयः पित्तेनैव, न वातेन कफेन च; तथा तृप्त्यादयः कफेनैव, न वातेन, न तु पित्तेन; एवं व्यवस्थिते वातव्याधिवत् पित्तकफव्याधी कस्मान्नोक्तौ? उच्यते,—वायोरतिबलत्वेनाशुकारित्वेन च गरीयस्त्वात्तद्विकाराणां दुःसाध्यत्वादाश्वात्ययकरत्वाद्विशिष्टचिकित्सात्वाद्वातव्याध्यभिधानं, नतु कफपित्तव्याध्यभिधानम्। अत एव चरकसुश्रुतादिष्वपि वातरोगाध्याय एव निर्दिष्टो, नतु पित्तकफरोगाध्यायः। चन्द्रिकाकारस्त्वाह,—पित्तकफयो रूपरसादियोगाद्दूष्यविशेषयोगाद्वा हरिद्राचूर्णसंयोगवदत्यन्तविसदृशा रसादिमन्तो विकाराः पृथङ्नामानो जायन्ते, वायोस्तु रूपरसाद्यभावाद्दूष्यनिरपेक्षा आक्षेपकादयो वातादनतिभिन्नरूपा नानात्मजाः, तेन वातविकाराः पृथगुच्यन्ते, नतु पित्तकफविकारा इति। एतत्तु वकुलकरप्रभृतयो नानुमन्यन्ते, चरकविरोधात्। चरके हि पित्तकफयोरपि नानात्मजा उक्ताः, यथा,—"अशीतिर्वातविकाराः, चत्वारिंशत् पित्तविकाराः, विंशतिः श्लेष्मविकाराः" (च. सू. स्था. अ. २०)—इति। सुश्रुतेन तु

क्रियाक्रमः। दोषासृक्स्रावणादपि वमनविरेकाभ्यां दोषस्यातिरेकाद्रुधिरस्रवणाच्च। अभिघातो लगुडादिभिः। अभोजनादुपवासात्। मर्माबाधान्मर्माभिघातात्। एतैः कारणैः कुपितो बली वायुः रिक्तानि स्रोतांसि पूरयित्वा सर्वाङ्गैकाङ्गजान् व्याधीन् करोति, (आ० द०) ॥ २-४॥

१ 'सामान्यजा इति वातादिभिः प्रत्येकं मिलितैश्च ये जन्यन्ते, नानात्मजा इति ये वातादिभिर्दोषान्तरासंपृक्तैर्जन्यन्ते' चक्रः।

शल्याध्यायिना पित्तकफनानात्मजा न दर्शिताः, पराधिकारेषु न विस्तरोक्तिरित्यभिप्रायेणेति। लङ्घनमुत्पतनं, उपवासस्यानशनशब्देन वमनादेश्च दोषस्रवणशब्देन वक्ष्यमाणत्वात्। प्लवनं बाहुभ्यां जलप्रतरणम्। आमादिति आमरसात्, तस्य कारणत्वं मार्गावरणद्वारेण नतु स्वरूपेण; आयासादिति पाठान्तरमयुक्तं, तस्य व्यायामशब्देनोक्तत्वात्। मर्माघाधान्मर्माभिघातात्। अपतंसनं, गजादिभ्यः शीघ्रयानेन पतनं, उच्छ्वासावरोधो वा; धातुकर्षणमिति स्वरनादः॥ १-४॥

अव्यक्तं लक्षणं तेषां पूर्वरूपमिति स्मृतम्।
आत्मरूपं तु यद्व्यक्तमपायो लघुता पुनः॥ ५॥
(च. चि. अ. २८)

पूर्वरूपादिकमाह—अव्यक्तमित्यादि। अव्यक्तमिति वक्ष्यमाणानां वातविकाराणां रूपमेवाव्यक्तं पूर्वरूपं, नतु ज्वरादिवद्विशिष्टमन्यत्। आत्मरूपमित्यादि तदेव व्यक्तमात्मरूपं दोषादिभेदेन सम्यक् प्रकाशितं स्वलक्षणमित्यर्थः। अपाय इति वायोश्चलत्वेन स्तम्भसंकोचकम्पादीनां कदाचिदभावात्, यदुक्तं,—"गते वेगे भवेत्, स्वास्थ्यं सर्वेष्वाक्षेपकादिषु"-इति। लघुतेति शरीरस्य, वायुना सर्वधातुशोषणात्। अथवा अपायो लघुता इति सर्ववातविकाराणामपायोऽभावः, किं तदित्याह—लघुतेति।—वातलिङ्गानां लघुताऽल्पत्वेनावस्थानं, नतु निःशेषनिवृत्तिः; यथा—बहिरायामनिवृत्तावपि न रूक्षत्वादिनिवृत्तिरित्याहुः॥ ५॥

*संकोचः पर्वणां स्तम्भो भङ्गोऽस्थ्नां पर्वणामपि।
रोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः॥ ६॥
खाञ्ज्यपाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रता।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता॥ ७॥
शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम्।
भेदस्तोदोऽर्तिराक्षेपो मुहुश्चायास एव च॥ ८॥
(च. चि. अ. २८)

करोति विविधान् व्याधीनिति यदुक्तं तद्याकरोति—संकोच इत्यादि। स्तम्भः पर्वणामेव। पाङ्गुल्यं पङ्गुता। शोषोऽङ्गानामिति बाहुमुखादीनाम्। अनिद्रतेत्यनेनाल्पनिद्रतेत्याहुः। गर्भशुक्ररजोनाश इति गर्भशय्याया वाताधिष्ठितत्वेन गर्भाग्रहणमिति जेज्जटः; गर्भादिविकृतिरप्यत्र द्रष्टव्या। स्पन्दनं कम्पनम्। हुण्डनं शिरःप्रभृतीनामन्तःप्रवेशो वक्रत्वं वा, धातूनामनेकार्थत्वात्। अन्ये त्वाहुः,—शिरोहुण्डनं केशभूमिस्फुटनं शङ्खललाटभेदश्च, नासाहुण्डनं घ्राणनाशः, अक्षिहुण्डनमक्षिव्युदासः जत्रुहुण्डनं वक्षउपरोधः ग्रीवाहुण्डनं ग्रीवास्तम्भः। भेद इति ओष्ठदन्तश्रोण्यादी-

*'संकोचः पर्वणां, अस्थ्नां भङ्गः स्फुटनं, तथा पर्वणां पाण्यादीनां ग्रहः स्तम्भ इव। खाञ्ज्यं खञ्जता, तोदः शूलं पीडाभेदः' (आ० द०)॥ ६-८॥

१ 'श्रोत्रादीनां' इति क.।

नाम् । तोदः शूलम् । अर्तिः पीडा, सा च पादपार्श्वश्रोत्राक्षिवक्षसामिति जेज्जटः । आक्षेपश्च आक्षेपकादिषु वक्ष्यमाणः । आयासः श्रमः ॥ ६-८ ॥

एवंविधानि रूपाणि करोति कुपितोऽनिलः ।
हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत् ॥ ९ ॥
(च. चि. अ. २८)

हेत्वित्यादि । हेतुविशेष आवरणादिः, यथा—श्लेष्मावृतो मन्यास्तम्भकारी; स्थानविशेषः कोष्ठादिः,—यथा—पक्वाशयस्थोऽन्त्रकूजमित्यादि ॥ ९ ॥

*तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः ।
ब्रध्नहृद्रोगगुल्मार्शःपार्श्वशूलं च मारुते ॥ १० ॥
सर्वाङ्गकुपिते वाते गात्रस्फुरणभञ्जनम् ।
वेदनाभिः परीताश्च स्फुटन्तीवास्य सन्धयः ॥ ११ ॥
(च. चि. अ. २८)

एतदेव विवृणोति (कोष्ठाश्रितवातलक्षणमाह)—तत्रेत्यादि । कोष्ठशब्देनाविशेषात् सर्वे आमाशयादयो गृह्यन्ते, आमाशयादिगं तु पृथगपि वक्ष्यति । निग्रहोऽप्रवृत्तिः । ब्रध्नः कोचावङ्क्षणसन्धिः ॥ १० ॥ ११ ॥

†ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः ।
जङ्घोरुत्रिकपात्पृष्ठरोगशोषौ गुदे स्थिते ॥ १२ ॥
रुक् पार्श्वोदरहृन्नाभेस्तृष्णोद्गारविसूचिकाः ।
कासः कण्ठास्यशोषश्च श्वासश्चामाशयस्थिते ॥ १३ ॥
(च. चि. अ. २८)

गुदस्थितवातलक्षणमाह—ग्रह इत्यादि । अश्मा अश्मरी । रोगो रुजा । गुद इत्युतरगुदे पक्वाशय इत्यर्थः, नतु गुदमात्रे; तथा सत्यश्मरीकर्तृत्वानुपपत्तेः ॥ १२ ॥ १३ ॥

‡पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च ।
कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ १४ ॥
श्रोत्रादिष्विन्द्रियवधं कुर्याद्दुष्टसमीरणः ।
(च. चि. अ. २८)

---

*'स्थानविशेषमाह–तत्रेत्यादि । तत्र तेषु स्थानेषु मध्ये कोष्ठाश्रिते वाते दुष्टे सति मूत्रवर्चसोर्निग्रहस्तथा ब्रध्नादयो रोगा भवन्ति । कोष्ठशब्देनात्र आमाशयादयः सर्वे गृह्यन्ते । यदुक्तम्–"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते"–इति । सर्वाङ्गकुपितलक्षणमाह–सर्वाङ्गेत्यादि । भञ्जनं भङ्गवत्पीडेत्यर्थः । सन्धयो वेदनया परीता युताः स्फुटन्तीव' (आ० द०) ॥ १० ॥ ११ ॥

†'पक्वाशयकुपितमाह–ग्रह इत्यादि । ग्रहोऽप्रवृत्तिः, पाच्चरणम्, पृष्ठरोगाः स्तम्भादयः, रोगो रुजाविशेषः, तथा शोफश्च । आमाशयकुपितमाह–रुगित्यादि । सुगमम्' (आ० द०) ॥ १२ ॥ १३ ॥

‡'सुश्रुतोक्तं पक्वाशयगतवातलक्षणमाह–पक्वेत्यादि । अन्त्रकूजं अन्त्रेऽव्यक्तशब्दं करोति । आटोपो रुजापूर्वकक्षोभः । त्रिकः स्फिजोरुपरि सन्धिः' ।

पक्काशयस्थवातलक्षणमाह—पक्काशयस्थ इत्यादि। ननु पक्काशयस्थ इति पुनरुक्तिः, गुदे स्थित इत्यनेनैवोक्तत्वात्। उच्यते, गुदे स्थित इति दृढबलस्य लक्षणं पक्काशयस्थ इति सुश्रुतस्य; उभयलिङ्गोपन्यासस्तु सकललिङ्गप्रदर्शनार्थमित्यविरोधः ॥ १४ ॥

*त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते ।
आतन्यते सरागा च पर्वरुक् त्वग्गतेऽनिले ॥ १५ ॥
(च. चि. अ. २८)

त्वग्गतवातलक्षणमाह—त्वगित्यादि । आतन्यते विस्तार्यत एव । त्वग्गत इति उपधातुरूपां त्वचं प्राप्ते; चन्द्रिकाकारस्तु त्वक्शब्देन रसमाह, तेन रसगत इत्यर्थः। हृदयस्थस्य च रसस्यामाशयसामीप्यादामाशयगतवातलक्षणेनैव तदधिगते रसगतस्यानभिधानमिति कार्त्तिकः ॥ १५ ॥

†रुजस्तीव्राः ससन्तापा वैवर्ण्यं कृशताऽरुचिः ।
गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले ॥ १६ ॥
(च. चि. अ. २८)

असृग्गतवातलक्षणमाह—रुज इत्यादि । अरूंषि व्रणाः । भुक्तस्य स्तम्भो भुक्तवतो गात्रस्तम्भः, सन्तर्पणेन रक्तस्य वृद्धेः । अन्ये त्वसृग्गतवातलक्षणं न पठन्ति, वातरक्तेन सहाभेदात्; तन्न, अत्र दुष्टो वायू रक्तेनावृतः कुप्यति, वातरक्ते तु स्वकारणादुभावपि हस्त्यादिगमनकुपितौ विशिष्टसंप्राप्त्या हस्तपादगतावेव वातरक्ताख्यं विकारं जनयत इति ॥ १६ ॥

‡गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा ।
सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले ॥ १७ ॥
भेदोऽस्थिपर्वणां सन्धिशूलं मांसबलक्षयः ।
अस्वप्नः संतता रुक् च मज्जास्थिकुपितेऽनिले ॥ १८ ॥
(च. चि. अ. २८)

'श्रोत्रादिगतलक्षणमाह—श्रोत्रादिष्वित्यादि । श्रोत्रादिषु गते श्रोत्रत्वक्चक्षुर्घ्राणरसनेन्द्रियाणां विनाशः स्वस्वविषयग्रहणेऽशक्तता' (आ० द०) ॥ १४ ॥

* 'सांप्रतं धातुकुपितस्य लक्षणम् । तत्र रसकुपितमाह—त्वगित्यादि । त्वक्त्वचा, रौक्ष्यादियुक्ता तुद्यते; त्वक्शब्देनात्र रसोऽभिप्रेतः, तदाधारत्वात् । पर्वरुक् सर्वत्वग्व्यथा' (आ० द०) ॥ १५ ॥

† 'रक्तकुपितमाह—रुज इत्यादि । वैवर्ण्यं निच्छायता, गात्रे शरीरे' (आ० द०) ॥ १६ ॥

‡ 'अनिले मांसमेदोगते सत्यङ्गं शरीरं, गुरु भारिकं, स्तब्धं निश्चलं, दण्डमुष्टिभ्यां हतमिव सरुक् पीडायुक्तं, सुश्रुते चात्र विशेष उक्तः—"कर्कशांस्तोदबहुलान् ग्रन्थीन्मांससमाश्रितः। वायुर्मेदोगतः कुर्याद्ग्रन्थीन्मन्दरुजोऽव्रणान्"—इति । तथा मज्जास्थिकुपितस्यापि वातस्य विशेष उक्तः—"अस्थिशोषं च भेदं च कुर्याच्छूलं च तत्स्थितः। तथा मज्जगते रुक् च न कदाचित्प्रशाम्यति"—इति । भेद इत्यादि । सुगमम्' (आ० द०) ॥ १७ ॥ १८ ॥

मांसमेदोगतवातलक्षणमाह—गुर्वित्यादि । श्रमितं श्रान्तं निःसहमित्यर्थः । मांसमेदोगतवायोरेकलिङ्गत्वं, अदूरान्तरेण प्रत्यासत्तेराश्रयाभेदात् । एवं मज्जास्थिकुपितेऽपि वाच्यम् ॥ १७ ॥ १८ ॥

*क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा ।
विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः ॥ १९ ॥
(च. चि. अ. २८)

शुक्रस्थवातलक्षणमाह—क्षिप्रमित्यादि । गर्भमिति दुष्टशुक्रारब्धत्वाद्गर्भस्य । विकृतिमिति गर्भस्य शुक्रस्य च ॥ १९ ॥

†कुर्यात्सिरागतः शूलं सिराकुञ्चनपूरणम् ।
(सु. नि. अ. १)

स बाह्याभ्यन्तरायामं खल्लीं कौब्ज्यमथापि वा ॥ २० ॥
सर्वाङ्गैकाङ्गरोगांश्च कुर्यात्स्नायुगतोऽनिलः ।
(च. चि. अ. २८)

सिरागतवातलक्षणमाह—कुर्यादित्यादि । आकुञ्चनं संकोचः । पूरणं स्थूलत्वं, यदुक्तमन्यत्र,—"सुप्तास्तन्व्यो बृहत्यो वा सिरा वाते सिरागते"—इति । खल्लीं वक्ष्यमाणाम् ॥ २० ॥—

‡हन्ति सन्धिगतः सन्धीन् शूलाटोपौ करोति च ॥ २१ ॥

सन्धिगतवातलक्षणमाह—हन्तीत्यादि । हन्ति सन्धिगतः सन्धीनिति सन्धिविश्लेषं स्तम्भादिकं वा करोति ॥ २१ ॥

§(प्राणोदानौ समानश्च व्यानश्चापान एव च ।
स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् ॥)
प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते ।
दौर्बल्यं सदनं तन्द्रा वैरस्यं च कफावृते ॥ २२ ॥

---

* 'अनिलः शुक्रस्थः कुपितः सन् शुक्रं क्षिप्रं शीघ्रं मुञ्चति बध्नाति च, तथा गर्भमपि क्षिप्रं मुञ्चति बध्नाति च' (आ० द०) ॥ १९ ॥

† 'सिरागतो वायुः शूलं सिराऽऽकुञ्चनपूरणं च, तथा बाह्याभ्यन्तरमायामं तथा खल्लीं वक्ष्यमाणां कौब्ज्यं च कुर्यात् । स्नायुगतोऽनिलः सर्वाङ्गरोगानेकाङ्गरोगांश्च कुर्यात् । सुश्रुतेनाप्युक्तं-"स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा"-इति । वाग्भटेनोक्तं-"तथा स्नाय्वाश्रितः कुर्याद्गृध्रस्यायामकुब्जताम्"-इति' (आ० द०) ॥ २० ॥—

‡ संधिगतो वायुः सन्धीन् हन्ति, तथा शूलशोफौ करोति, संधिष्विति शेषः एतेनाकुञ्चनप्रसारणयोरभाव उक्तः' (आ० द०) ॥ २१ ॥

§ [अत्र पञ्चविधस्य वायोर्नामान्याह-प्राणेत्यादि । स्थानस्था इति स्थानशब्देनात्र साम्यमुच्यते । यापयन्ति धारयन्ति] सदनमङ्गग्लानिः । क्लमोऽनायासः श्रमः, हर्षो रोमहर्षः, 'शीतस्तम्भौ' इति पाठान्तरम् । कफेन संवृते समाने विण्मूत्रयोः सङ्गः, "कफाधिकं च विण्मूत्रं रोमहर्षः कफावृते" इति पाठान्तरम् । कफाधिकं श्लेष्मबहुलं विड्मूत्रमिति । अपान

---

१ 'प्रत्यासत्तेराश्रयाभेदात्' इति पाठान्तरम् ।

उदाने पित्तयुक्ते तु दाहो मूर्च्छा भ्रमः क्लमः ।
अस्वेदहर्षौ मन्दोऽग्निः शीतता च कफावृते ॥ २३ ॥
स्वेददाहौष्ण्यमूर्च्छाः स्युः समाने पित्तसंवृते ।
कफेन सक्ते विण्मूत्रे गात्रहर्षश्च जायते ॥ २४ ॥
अपाने पित्तयुक्ते तु दाहौष्ण्यं रक्तमूत्रता ।
अधःकाये गुरुत्वं च शीतता च कफावृते ॥ २५ ॥
(सु. नि. अ. १)

व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः ।
स्तम्भनो दण्डकश्चापि शूलशोथौ कफावृते ॥ २६ ॥

पित्तकफावृतानां प्राणादीनामर्धार्धश्लोकेन लिङ्गान्याह—प्राण इत्यादि । गात्रहर्षो रोमाञ्चः । दण्डको दण्डवत् स्तम्भः । परस्परं च प्राणादीनामावरणानि विंशतिर्भवन्ति । यदुक्तं **चरके**,—"मारुतानां हि पञ्चानामन्योन्यावरणं शृणु" (च. चि. स्था. अ. २८)—इत्यादि । एषां च लक्षणं **चरक** एव द्रष्टव्यम् । **विदेहे** चैक एव वायुः स्थानकर्मभेदात् पञ्चेत्याहुः, संसर्गिद्रव्यत्वेनैकश्रकाये जलवत्पृथगवस्थानानुपपत्तेः । **ईशानो**ऽप्याह,—यथैको देवदत्तः स्थानभेदात् गृहस्थो वानप्रस्थः कर्मभेदात् कुम्भकारो मालाकार इत्युच्यते, तथा वायुरपीति ॥ २२–२६ ॥

इति सुगमम् । व्यान इति । वाग्भटोक्तं द्वाविंशतिविधं वायोरावरणं लिख्यते—"वायोरावरणं वातो बहुभेदं प्रवक्ष्यते । लिङ्गं पित्तावृते दाहस्तृष्णा शूलं भ्रमस्तमः ॥ कटूष्णैश्चाम्ललवणैर्विदाहः शीतकामिता । शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम् ॥ लङ्घनायासरूक्षोष्णकामिता च कफावृते । रक्तावृते सदाहार्तिस्त्वङ्मांसान्तरयोर्भृशम् ॥ भवेत्सरागः श्वयथुर्जायन्ते मण्डलानि च । मांसेन कठिनः शोफो विवर्णः पिडिकास्तथा ॥ हर्षः पिपीलिकानां च संचार इव जायते । चलः स्निग्धो मृदुः शीतः शोफो गात्रेष्वरोचकः ॥ आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसाऽऽवृते । स्पर्शमस्थ्यावृतेऽत्युष्णं पीडनं चाभिनन्दति ॥ सूच्येव तुद्यतेऽत्यर्थमङ्गं सीदति शूल्यते । मज्जावृते विनमनं जृम्भणं परिवेष्टनम् ॥ शूलं च पीड्यमानेन पाणिभ्यां लभते सुखम् । शुक्रावृतेऽतिवेगो वा न वा निष्फलताऽपि वा ॥ भुक्ते कुक्षौ रुजा जीर्णे शाम्यत्यन्नावृतेऽनिले । मूत्राप्रवृत्तिराध्मानं वस्तौ मूत्रावृते भवेत् ॥ विडावृते विबन्धोऽधः स्वस्थाने परिकृन्तति । व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः ॥ शकृत्पीडितमन्नेन दुःखं शुष्कं चिरात्सृजेत् । सर्वधात्वावृते वायौ श्रोणीवंक्षणपृष्ठरुक् ॥ विलोमो मारुतोऽस्वस्थं हृदयं पीड्यतेऽपि च । भ्रमो मूर्च्छा रुजा दाहः पित्तेन प्राण आवृते ॥ विदग्धेऽन्ने च वमनमुदानेऽपि भ्रमादयः । दाहोऽन्तरूर्जाभ्रंशश्च, दाहो व्यानेन सर्वगः ॥ क्लमोऽङ्गचेष्टासंगश्च ससंतापः सवेदनः । समान ऊष्मोपहतिरतिस्वेदोऽरतिः सतृट् ॥ दाहश्च स्यादपाने तु मले हारिद्रवर्णता । रजोऽतिवृद्धिस्तापश्च योनिमेहनपायुषु ॥ श्लेष्मणा त्वावृते प्राणे सादस्तन्द्राऽरुचिर्वमिः । ष्ठीवनक्षवथूद्गारनिःश्वासोच्छ्वाससंग्रहाः ॥ उदाने गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः । बलवर्णप्रणाशश्च, व्याने पर्वास्थिवाग्ग्रहाः ॥ गुरुताऽङ्गेषु सर्वेषु स्खलितं च गतौ भृशम् । समानेऽतिहिमाङ्गत्वमस्वेदो मन्दवह्निता ॥ अपाने सकफं मूत्रशकृतः स्यात्प्रवर्तनम् । इति द्वाविंशतिविधं वायोरावरणं विदुः ॥ प्राणादयस्तथाऽन्योन्यमावृण्वन्ति यथाक्रमम् । सर्वेऽपि विंशतिविधं विद्यादावरणं च तत् ॥ निःश्वासोच्छ्वाससंरोधः प्रतिश्यायः शिरोग्रहः । हृद्रोगो मुखशोषश्च प्राणेनोदान आवृते ॥ उदानेनावृते प्राणे वर्णौजोबलसंक्षयः । दिशाऽनया च विभजेत्सर्वमावरणं भिषक्"—इति (आ० द०) ॥ २२–२६ ॥

*यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः ।
तदाऽऽक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः ॥ २७ ॥
मुहुर्मुहुश्चाक्षेपणादाक्षेपक इति स्मृतः ।

आक्षेपकस्य सामान्यलक्षणमाह—यदेत्यादि । सर्वा इति ऊर्ध्वाधस्तिर्यग्गाः । आक्षिपति देहं हस्त्यारूढपुरुषस्येव गात्रं चालयति । मुहुश्चर इति हेतुगर्भविशेषणम् । 'वहिश्चर' इति पाठान्तरे कोष्ठाद्बहिः शाखागतश्चरन्नाक्षेपकं करोतीत्यर्थः । चन्द्रिकाकारस्त्वेतन्नानुमन्यते, स्थानगाम्भीर्यादाक्षेपकस्य तदारम्भकवायोर्बहिश्चरत्वानुकूत्वात् ॥ २७ ॥—

†क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं प्रवर्तते ॥ २८ ॥
(सु. नि. अ. १)

पीडयन् हृदयं गत्वा शिरः शङ्खौ च पीडयन् ।
धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा ॥ २९ ॥
स कृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः ।
कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः ॥ ३० ॥
दृष्टिं संस्तभ्य संज्ञां च हत्वा कण्ठेन कूजति ।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ॥ ३१ ॥
वायुना दारुणं प्राहुरेके तदपतानकम् ।
(वा. नि. अ. १५)

अस्यैवावस्थाविशेषावपतन्त्रकापतानकावाह—क्रुद्ध इत्यारभ्य एके तदपतानकमित्यन्तेन । स्वैः कोपनैरित्यनेन रूक्षादिकुपितः स्वतन्त्रो नत्वावरणकुपित इति ईशानः । निमीलितास्क्षः स्तब्धाक्षो वा भवतीत्यर्थः । आक्षेपकश्चतुर्विधो भवति, दण्डापतानकोऽभ्यन्तरायामो वहिरायामोऽभिघातजश्चेति । दृढबलेन यद्यप्याक्षेपकात् पूर्वमन्तरायामबहिरायामौ पठितौ, तथाऽप्याक्षेपकविशेषावेतौ मन्तव्यौ, सुश्रुतदर्शनात् ॥ २८–३१ ॥—

* 'मुहुर्मुहुर्देहमाक्षिपति हस्त्यारूढस्येव गात्रं चालयति । मुहुश्चर इति हेतुगर्भविशेषणं, वारंवारं संचरणशीलः, आक्षेपणात् चालनात्' (आ० द०) ॥ २७ ॥—

† 'स्थानात् पक्वाशयात् । ऊर्ध्वं शिरसि उद्दिश्य । पीडयन् रुजन् । हृदयं ततः शिरः शङ्खौ च पीडयेत् । आक्षिपेच्चालयेत् । मोहयेदिन्द्रियाणि । कष्टेनोच्छ्वासं मुञ्चति । निमीलको निमीलिताक्षः स्तब्धाक्षो वा भवतीत्यर्थः । कपोत इव कूजेत्, निःसंज्ञः संज्ञारहितः, सोऽपतन्त्रकः, दृष्टिं रूपग्रहणयोग्यां, संस्तभ्याच्छाद्य, संज्ञां ज्ञानविषयिणीं बुद्धिं, विनाश्य । वायुना मुक्ते हृदि सुखं लभते । वृते मूर्च्छते । तमेवापतन्त्रमेके त्वपतानकमाहुः । तन्त्रान्तरेऽपतन्त्रकलक्षणं पठितम् । तद्यथा—"क्रुद्धः स्वैः कोपनैर्वायुरपानो नाभिसंश्रयः । संदूष्य हृदयस्थं च मनो व्याकुलयेत्ततः ॥ पीडयन् हृदयं प्राप्य शिरः शङ्खौ च पीडयेत् । आक्षिप्य चाखिलं देहं मोहयेच्च पुनः पुनः ॥ स कृच्छ्रादुच्छ्वसेच्चापि स्वेदशैत्ययुतो वहिः । स निद्रां लभते नीरं प्राप्य चाशु प्रबुध्यते ॥ त्रसते कम्पते भूयो निःसंज्ञः सोऽपतन्त्रकः । प्रलापो वक्त्रकटुता भ्रमो मूर्च्छाऽरुचिस्तृषा ॥ तस्मिन्पित्तान्विते स्वेदः पीताभः शीतकामिता । शिरोऽङ्गगौरवं ग्लानिः शीतद्विट् मन्दवेदनः । कफान्विते च सदनं शैत्यं च हृदयग्रहः ॥ वातोल्बणेऽङ्गस्फुरणं शिरोमन्याकटिव्यथा । धैर्यादिविप्लवो दैन्यं विषयेष्वनवस्थितिः" (आ० द०) ॥ २८–३१ ॥

*कफान्वितो भृशं वायुस्तास्वेव यदि तिष्ठति ॥ ३२ ॥
(वा. नि. अ. १५)
दण्डवत्स्तम्भयेद्देहं स तु दण्डापतानकः ।
(सु. नि. अ. १)

एषां लक्षणमाह—कफान्वित इत्यादि । भृशं कफान्वित इत्यनेन पित्तमपि न वार्यत इत्याहुः । चरके त्वस्यासाध्यत्वं केवलवातजत्वेन द्रष्टव्यम् । यदाह,—"पाणिपादशिरःपृष्ठश्रोणीः स्तभ्नाति मारुतः । दण्डवत् स्तब्धगात्रस्य दण्डकः सोऽनुपक्रमः" (च. चि. स्था. अ. २८)-इति । तास्विति सर्वधमनीषु ॥ ३२ ॥—

†धनुस्तुल्यं नमेद्यस्तु स धनुःस्तम्भसंज्ञकः ॥ ३३ ॥

अन्तरायामबहिरायामयोः साधारणं रूपमाह—धनुस्तुल्यमित्यादि ॥ ३३ ॥

‡अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः ।
स्नायुप्रतानमनिलो यदाऽऽक्षिपति वेगवान् ॥ ३४ ॥
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् ।
अभ्यन्तरं धनुरिव यदा नमति मानवम् ॥ ३५ ॥
तदाऽस्याभ्यन्तरायामं कुरुते मारुतो बली ।
बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च ॥ ३६ ॥
तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ।
(सु. नि. अ. १)

विशेषलक्षणमाह—अङ्गुलीत्यादि । वक्षो बाहुद्वयान्तरम् । हृदयं तदभ्यन्तरं धङ्कुलम् । स्नायुप्रतानं लतावदनेकप्ररोहं स्नायुजालं; स्नायुरित्युपलक्षणं, तेन सिराकण्डरयोरपि ग्रहणम् । यदुक्तं तन्त्रान्तरे,—"महाहेतुर्बली वायुः सिराः सस्नायुकण्डराः । मन्यापृष्ठाश्रिता बाह्याः संशोष्यायामयेद्बहिः"-इत्यादि । अभ्यन्तरायामं क्रोडे नतं, बाह्यायामं पृष्ठे नतम् । अन्तरायामबहिरायामाभ्यां तन्त्रान्तरोक्तकुब्जस्यावरोधः । यदुक्तं,—"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् । क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत्"-इति ॥ ३४-३६ ॥—

§कफपित्तान्वितो वायुर्वायुरेव च केवलः ॥ ३७ ॥
कुर्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ।
(सु. नि. अ. १)

---

* 'तास्विति सर्वधमनीषु' (आ० द०) ॥ ३२ ॥—

† 'स्तम्भः सामान्यः धनुःस्तम्भोऽस्यैव भेदः । धनुस्तुल्यमिति धनुस्तुल्यं क्रोडेन नमयति, दण्डापतानकस्तु शुष्ककाष्ठदण्डवत्' (आ० द०) ॥ ३३ ॥

‡ 'बली वायुः कुपितो गुल्फौ चरणत्रुटिके, अन्तःस्नायुप्रतानं धनुरिव नामयेत् । हनुः कण्ठकपोलसन्धिः । बहिरायामलक्षणमाह-बाह्येत्यादि । पूर्ववद्बाह्यस्नायुप्रतानं धनुर्वदानमेत् । बाह्यायामं पृष्ठे नतं वक्षःकट्यूरुभङ्गत्वात् । तमसाध्यमाहुः' (आ० द०) ॥ ३४-३६ ॥—

§ 'केवलः स्वतन्त्रः' (आ० द०) ॥ ३७ ॥—

उक्तानामाक्षेपकप्रकाराणां कफपित्तानुबन्धमाह—कफपित्तान्वित इत्यादि । एतच्च दण्डापतानकलक्षणमेव जेज्झटेन व्याख्यातम् । पित्तकफानुबन्धश्चात्र शैत्यशोथगुरुत्वानीलादिनोक्तलक्षण एव बोध्यः । चतुर्थमभिघातजमिति दण्डापतानकादित्रितयापेक्षया चतुर्थत्वं, अभिघातजं दण्डाद्यभिघातकुपितवातजं, अस्य च लक्षणं—"यदा तु धमनीः सर्वाः" इत्यादिनोक्तसामान्यलक्षणं द्रष्टव्यम् ॥ ३७ ॥

*गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ॥ ३८ ॥
अभिघातनिमित्तश्च न सिद्ध्यत्यपतानकः ।
(सु. नि. अ. १)

असाध्यत्वमाह—गर्भपातेत्यादि । गदाधरस्त्वाह—कफपित्तान्वित इत्यादिना निमित्तभेदेनाक्षेपकश्चतुर्धेति, तद्यथा—एकः कफान्वितेन वातेन, द्वितीयः पित्तान्वितेन, तृतीयः केवलेन, चतुर्थोऽभिघातेनेति । अत्र पक्षे गर्भपातशोणितातिस्रावजौ केवलवातेन ग्राह्यौ, एतेषां च मुहुर्मुहुराक्षेपणं बोध्यं, आक्षेपकविशेषत्वात् ॥ ३८ ॥—

†गृहीत्वाऽर्धं तनोर्वायुः सिराः स्नायूर्विशोष्य च ॥ ३९ ॥
(सु. नि. अ. १)

पक्षमन्यतरं हन्ति सन्धिबन्धान्विमोक्षयन् ।
कृत्स्नोऽर्धकायस्तस्य स्यादकर्मण्यो विचेतनः ॥ ४० ॥
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः ।
सर्वाङ्गरोगस्तद्वच्च सर्वकायाश्रितेऽनिले ॥ ४१ ॥
(वा. नि. अ. १५)

पक्षवधमाह—गृहीत्वेत्यादि । अर्धमिति अर्धमर्यादयाऽर्धनारीश्वरवत् । पक्षं बाहुकक्षपार्श्वादिभागं, अन्यतरमिति वामं दक्षिणं वा । सन्धिबन्धान् कफसहितस्नायुभिर्वृतान् मोक्षयन्निति गदाधरः; अत एव सिराः स्नायूर्विशोष्येत्युक्तम् । अर्धकाय इत्युक्तेऽपि कृत्स्नग्रहणं युगपत् सर्वार्धाङ्गव्याप्त्यर्थम् । अकर्मण्य ईषच्चेष्टाक्षमः । विचेतनोऽल्पचेतनः, ईषत्स्पर्शादिज्ञानवानित्यर्थः । तद्वच्चेत्यनेन सिराः स्नायूर्विशोष्य चेत्यादिसंप्राप्तिं लक्षणं चातिदिशति ॥ ३९–४१ ॥

‡दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ।
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफान्विते ॥ ४२ ॥

---

* 'असाध्यमाह—गर्भेत्यादि । अत्रापतानकेत्युपलक्षणं, तेन चतुष्टयमपि गृह्यते' (आ० द०) ॥ ३८ ॥

† 'वायुस्तनोः शरीरस्यार्धं गृहीत्वा, सिराः स्नायूर्विशोष्य शोषयित्वा, अन्यतरं पक्षं हन्ति निरीहं करोति । पक्षमिति शरीरार्धं । किं कुर्वन्? संधीनां बन्धान् सन्धिबन्धान् विमोक्षयन्निति गदाधरः । तस्य तथाविधस्य पुंसः, कृत्स्नो निःशेष अर्धकायोऽकर्मण्यो विचेतनः स्यात् । केचिदाचार्यास्तं व्याधिमेकाङ्गरोगं विदुः, अन्ये पक्षवधं विदुः । सर्वकायाश्रिते समस्तदेहगते वाते तद्वत्सर्वाङ्गरोगमित्याहुः' (आ० द०) ॥ ३९–४१ ॥

‡ 'पक्षाघातस्य साध्यासाध्यत्वं दर्शयन्नाह—शुद्धेत्यादि । कृच्छ्रसाध्यं कष्टसाध्यं' (आ० द०) ॥ ४२ ॥ ४३ ॥

शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम् ॥ ४३ ॥
(सु. नि. अ. १)

तस्यैव साध्यासाध्यज्ञानार्थमाह—दाहेत्यादि । एतच्च लक्षणमन्यत्रापि वातरोगे द्रष्टव्यं, अत एव सामान्येन वायाविति कृतवान् । शुद्धः केवलः । अन्येनेति कफेन पित्तेन वा । क्षयहेतुकमिति धातुक्षयकुपितशुद्धवातजमिति ॥ ४२ ॥ ४३ ॥

(गर्भिणी सूतिकाबालवृद्धक्षीणेष्वसृक्स्रुते ।
पक्षाघातं परिहरेत् वेदना रहितो यदि ॥) (इति ख.)
*उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि वा ।
हसतो जृम्भतो वाऽपि भाराद्विषमशायिनः ॥ ४४ ॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः ।
अर्दयत्यनिलो वक्त्रमर्दितं जनयत्यतः ।
वक्रीभवति वक्त्रार्धं ग्रीवा चाप्यपवर्तते ॥ ४५ ॥
शिरश्चलति वाक्सङ्गो नेत्रादीनां च वैकृतम् ।
ग्रीवाचिबुकदन्तानां तस्मिन्पार्श्वे च वेदना ॥ ४६ ॥
(यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलम् ।
वायुरूर्ध्वं त्वचि स्वापस्तोदो मन्याहनुग्रहः ॥)
तमर्दितमिति प्राहुर्व्याधिं व्याधिविचक्षणाः ।
(सु. नि. अ. १)

अर्दितमाह—उच्चैरित्यादि । अर्दयति पीडयति । अपवर्तते वक्रीभवति । चलति कम्पते । वाक्सङ्गोऽनिर्गमो वचनस्य । आदिशब्देन भ्रूगण्डादीनां ग्रहणम् । वैकृतं वेदनास्फुरणवक्रत्वादिकम् । ग्रीवेत्यादि, यस्मिन् पार्श्वेऽर्दितं तस्मिन् ग्रीवादीनां वेदनेति योज्यम् । तन्त्रान्तरे तु मुखार्धवच्छरीरार्धव्यापकोऽप्यर्दितः पठितः । यदाह दृढबलः,—"अर्धे तस्मिन् मुखार्धे वा केवले स्यात्तदर्दितम्" (च. चि. स्था. अ. २८)—इति नंनु, यद्येवं तदाऽर्दितार्धाङ्गवातयोः को भेदः ? उच्यते, वेगित्वेनार्दिते कदाचिद्वेदना भवति, अर्धाङ्गवाते तु सर्वदैवेति भेदः; अथवा यथोक्तः सर्वलिङ्गोऽर्दितस्तद्विपरीतस्त्वर्धाङ्गवात इत्याहुः । सुश्रुतेन तु मुखमात्र एवार्दितः पठितः, अर्धशरीरस्यार्धाङ्गवातेन लब्धत्वात् । स एवात्र माधवेन लिखितः ॥ ४४–४६ ॥—

†क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः ॥ ४७ ॥
न सिध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य च ।
(सु. नि. अ. १)

* 'अर्दितस्य निदानपूर्वकं लक्षणमाह–उच्चैरित्यादि । उच्चैर्भाषणं, कठिनानि पूगफलादीनि खादतः, विषमाच्छयनात् ग्रीवादिवैपरीत्यशयनात्, ग्रीवां व्याप्य अपवर्तते वक्रीभवति, आदिशब्देन गण्डनासादीनां ग्रहणं, चिबुकं मुखकुहरस्याधोभागः' (आ० द०) ॥ ४४–४६ ॥

† 'प्रसक्तेति प्रकर्षेण सक्तं लक्ष्ममवृत्तं कण्ठताल्वादिवर्णोच्चारणस्थानेषु, वेपनस्य कम्पनशीलस्य' (आ० द०) ॥ ४७ ॥—

तस्यासाध्यलक्षणमाह—क्षीणेत्यादि । अनिमिषाक्षस्य निमेषासमर्थचक्षुषः । प्रसक्ताव्यक्तभाषिण इति प्रसक्तं प्रकर्षेण सक्तमप्रवृत्तं, अव्यक्तं प्रपीडितवर्णपदं भाषितुं शीलं यस्य स तथा । अन्ये तु प्रसक्तं निरन्तरमाहुः; तथा, चरके "दीना जिह्वा समुत्क्षिप्ता काले सज्जति चास्य वाक्" (च. चि. स्था. अं. २८)—इति वचनात् । त्रिवर्षमिति अतीतवर्षत्रयं; अथवा त्रयाणां मुखनासाचक्षुषां वर्षः स्रवणं यत्र तत्तथेत्याहुः ॥ ४७ ॥—

गते वेगे भवेत् स्वास्थ्यं सर्वेष्वाक्षेपकादिषु ॥ ४८ ॥

(वा. नि. अ. १५)

आक्षेपकादीनामर्दितान्तानां वेगित्वमाह—गत इत्यादि । स्वास्थ्यं पीडालाघवं, भारापगमे सुखित्वव्यपदेशवत् ॥ ४८ ॥

***जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः ।**
कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम् ॥ ४९ ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुग्रहः[1] स तेन स्यात्कृच्छ्राच्चर्वणभाषणम् ॥ ५० ॥

(वा. नि. अ. १५)

हनुग्रहमाह—जिह्वेत्यादि । हनुमूलस्थः कपोलमूलस्थः[2] । हनुं स्रंसयित्वाऽधः कृत्वा । विवृतास्यत्वमास्यविवृतिं, संवृतास्यतामास्यसंवृतिं; सा च वायोरनियतकारित्वात् ॥ ४९ ॥ ५० ॥

†दिवास्वप्नासमस्थानविवृतोर्ध्वनिरीक्षणैः ।
मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणाऽऽवृतः ॥ ५१ ॥

(सु. नि. अ. १)

मन्यास्तम्भमाह—दिवास्वप्नेत्यादि । स एवेति वातः ॥ ५१ ॥

वाग्वाहिनीसिरासंस्थो जिह्वां स्तम्भयतेऽनिलः ।
जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ॥ ५२ ॥

(वा. नि. अ. १५)

जिह्वास्तम्भमाह—वागित्यादि । वाग्वाहिनीसिरासंस्थ इति वाग्वाहिनी या सिरा तत्र संस्थ इति योज्यं, समस्तपक्षे "पुंवत् कर्मधारयजातीयदेशीयेषु—" इत्यनेन पुंवद्भावप्राप्तेः । अन्नपानवाक्येष्वनीशतेति अन्नपानाभ्यवहारवचनेष्वसामर्थ्यम् ॥ ५२ ॥

---

* 'जिह्वानिर्लेखनाज्जिह्वाघर्षणाद्दन्तकाष्ठादिना, शुष्काणां चणकादीनां भक्षणात्, अभिघाततस्ताडनात् । विवृतास्यत्वं प्रसारितवदनत्वं, संवृतास्यत्वं संकुचितमुखताम्; अत्र संवृतिर्विवृतिर्वा वायोरनियतकारित्वात् । स एव वातः कुपित इत्यर्थः । तेन कृच्छ्राच्चर्वणं भाषणं च स्यात्' (आ० द०) ॥ ४९ ॥ ५० ॥

† 'आसनमुपवेशः, स्थानमूर्ध्वभवनं, विवृतोर्ध्वनिरीक्षणं वक्रमार्गावलोकनम् । स एवेति वातो दिवास्वप्नादिभिः कुपितः सन्, श्लेष्मणाऽऽवृतो मन्यास्तम्भं प्रकुरुते, मन्यास्तम्भं केचिदपतानकपूर्वरूपं मन्यन्ते' (आ० द०) ॥ ५१ ॥

---

[1] 'हनुस्तम्भः' इति पा० । [2] 'कपोलस्थः' इति क. ।

रक्तमाश्रित्य पवनः कुर्यान्मूर्धधराः सिराः ।
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्यात्सिराग्रहः ॥ ५३ ॥
(वा. नि. अ. १५)

सिराग्रहमाह—रक्तमित्यादि । मूर्धधरा इति ग्रीवागताः, तासां रूक्षत्वं वेदनावत्त्वं कृष्णत्वं च कुर्यात् । सोऽसाध्य इति खल्पेनैव, काकणकुष्ठवत् । शिरोग्रह इति पाठान्तरे शिरोधारकसिराद्दुष्ट्या शिरोवेदनाकारित्वात् 'शिरोग्रह' इति व्यपदेशः, लक्षणं तु तदेव ॥ ५३ ॥

*स्फिक्पूर्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात् ।
गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः ॥ ५४ ॥
वाताद्वातकफात्तन्द्रागौरवारोचकान्विता । (च. चि. अ. २८)
†[वातजायां भवेत्तोदो देहस्यापि प्रवक्रता ।
जानुकट्यूरुसंधीनां स्फुरणं स्तब्धता भृशम् ॥ ५५ ॥
वातश्लेष्मोद्भवायां तु निमित्तं वह्निमार्दवम् ।
तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च ॥ ५६ ॥]

गृध्रसीमाह—स्फिक्पूर्वेत्यादि । स्फिक् पूर्वा प्रथमतो ग्राह्या स्तम्भरुक्तोदैर्यस्याः सा स्फिक्पूर्वा; ईशानस्तु पूर्वा प्रथमा गृध्रसी वातादिति योजयति, एषा च व्याख्या स्फिक्शब्दस्य नपुंसकत्वेन 'पूर्वा स्फिक्कटीपृष्ठ'—इत्यादिपाठेन वोपपद्यते नान्यथा । 'स्फिक्पूर्वं' इति पाठान्तरं जानुजङ्घापदमित्यनेन योज्यम् । क्रमादिति न युगपत् । वातादिति छेदः । वातकफारब्धा गृध्रसी, सोक्तवातलक्षणयुक्ताऽपि तन्द्रागौरवादियुक्ता भवतीति गृध्रसीद्वयमुक्तम् ॥ ५४ ॥ ५६ ॥

‡तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः ॥ ५७ ॥
बाह्वोः कर्मक्षयकरी विश्वाची चेति सोच्यते ।
(सु. नि. अ. १)

विश्वाचीमाह—तलमित्यादि । तलं हस्तस्योपरिभागः, तलशब्दोऽत्रोपरिवचनः, यथा—भूतलमिति गयदासः । तेनायमर्थः—बाह्वोः पृष्ठं बाहुपृष्ठं, तत आरभ्य हस्ततलं लक्षीकृत्याङ्गुलीनां याः कण्डरास्ताः संदूष्य बाह्वोः कर्मक्षयकरी या सा विश्वाची; बाह्वोः कर्म ग्रहणाकुञ्चनादि, द्वित्वं चात्र संभवपरं, तेनैकबाहावपि भवति वातरक्तवत् । विश्वाची चेति चकारेण गृध्रसीविश्वाच्योः खल्लीसंज्ञां दर्शयति, तयोरपि करमूलावमोटनकारित्वात्; यदुक्तं हारीते,—"विश्वाची गृध्रसी चोक्ता खल्ली तीव्ररुजान्विता"—इति गयादासः । चक्रस्त्वाह चरके—'खल्ली तु पादजङ्घोरुकरमूलावमोटनी' (च. चि.

---

* 'गृध्रसी स्तम्भरुक्तोदैः क्रमात् कटिपृष्ठोरुजानुजङ्घापदं गृह्णाति, तथा मुहुः स्पन्दते, सा वातजा ज्ञेया, कथंभूता गृध्रसी, स्फिक्पूर्वा । गृध्रसी रङ्गिणीति लोके (आ० द०) ॥ ५४ ॥

† 'गृध्रस्याः पुनरपि विशेषलक्षणमाह—वातजायामित्यादि । सुगमम्' (आ०द०) ॥५५॥५६॥

‡ कण्डरा महास्नायुः' (आ० द०) ॥ ५७ ॥

स्था. अ. २८)—इत्यनेन विश्वाच्याः पृथगेव खल्ली पठिता, **सुश्रुतेन** तु खल्ली न पठितैव; नहि तेन तन्त्रान्तरोक्तसर्वविकाराः पठ्यन्ते, **चरकोक**परस्परवातावरणलक्षणमेव न पठितं, **हारीतेन** तु तीव्ररुजायोगाद्गृध्रसीविश्वाच्योः खल्लीत्वं पठितं, भवति हि धर्मान्तरयोगात्, कस्यचिद्विकारस्य रोगान्तरत्वं, तथा—अष्ठीलैव प्रत्यष्ठीला, अश्मर्यैव शर्करा, पाण्डुरोग एव कामलेत्यादि ॥ ५७ ॥—

***वातशोणितजः शोथो जानुमध्ये महारुजः ॥ ५८ ॥**
ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत् ।
(सु. नि. अ. १)

क्रोष्टुकशीर्षमाह—वातेत्यादि । वातशोणितज इति वातरक्ताख्यविकारजः, चिकित्साभेदार्थं पृथक् पठित इति **गयदासः** । वातशोणिताभ्यां जात इति **जेज्जटः** । दृश्यते ह्ययं वातरक्तव्यतिरेकेणापि, जानुदेशनियतत्वेन विशिष्टलक्षणत्वेन चेतरवातरक्तशोथाद्भेद इति । क्रोष्टुकशीर्षवत् शृगालमस्तकवत् स्थूलः ॥ ५८ ॥—

†वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा ॥ ५९ ॥
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ।
(सु. नि. अ. १)

खञ्जमाह—वायुरित्यादि । सक्थ्न ऊर्ध्वजङ्घायाः, कण्डरां महास्नायुं, आक्षिपेत् ईषत् क्षिपेत्, किंचिद्गतिमत्त्वादिति **गयदासः** । सक्थ्नोरिति द्विवचनेनैव द्वित्वे लब्धे द्वयोरिति पदेन नियमयति,—सक्थिद्वयस्यैव वधात् पङ्गुः, एकसक्थिवधात् खञ्ज इति; वधश्चात्र गमनादिक्रियानाशः ॥ ५९ ॥—

‡प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति ॥ ६० ॥
कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ।
(सु. नि. अ. १)

खञ्जविशेषमाह—प्रक्रामन्नित्यादि । प्रक्रामन्निति गमनमारभमाणो वेपते । प्रशब्दोऽयमादिकर्मणि । खञ्जन्निव गच्छति विकलयन्निव गच्छति, गमनारम्भे न वेपते तेन खञ्जादस्य भेदः । मुक्तसन्धिप्रबन्धनमिति शिथिलीकृतसन्धिबन्धनम् । कलायखञ्ज इति शास्त्रे रूढा संज्ञा; अयमेवान्यत्र खञ्जवात इत्युक्तः ॥ ६० ॥—

रुक् पादे विषमन्यस्ते श्रमाद्वा जायते यदा ॥ ६१ ॥
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ।
(वा. नि. अ. १५)

---

* 'वातशोणिताभ्यां जातो वातशोणितजः, न पुनर्वातरक्तेन व्याधिना जनितः । जानु ऊरुजङ्घयोः सन्धिः, स्थौल्येन आकृत्या च क्रोष्टुशीर्षवत्' (आ० द०) ॥ ५८ ॥

† 'खञ्जपङ्गुवातावाह—वायुरित्यादि । यदा कट्यां स्थितो वायुः सक्थ्नः कण्डरामाक्षिपेत्तदा जन्तुः खञ्जो भवति । पङ्गुः सक्थ्नोर्द्वयोर्वधादिति सर्वथा गतिविघातात् पङ्गुरित्यर्थः' (आ० द०) ॥ ५९ ॥

‡ 'कलायखञ्जमाह—प्रक्रामन्नित्यादि । प्रक्रामन् पादविक्षेपं कुर्वन्, वेपते कम्पते' (आ० द०) ॥ ६० ॥

वातकण्टकमाह—रुगित्यादि । यदा विषमपादन्यासकुपितः श्रमकुपितो वा वायुर्गुल्फे वेदनां जनयति, तं वातकण्टकमित्याहुः, अयमेवान्यत्र 'खुड्डकावात' इत्युक्तः ॥ ६१ ॥—

*पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः ॥ ६२ ॥
विशेषतश्चङ्क्रमतः पाददाहं तमादिशेत् ।
(सु. नि. अ. १)

पाददाहमाह—पादयोरित्यादि । विशेषतश्चङ्क्रमत इत्यनेन स्थितस्य मन्दो दाह इति दर्शयति । वैवर्ण्यादेरभावाद्वातरक्तादस्य भेदः ॥ ६२ ॥—

हृष्यते चरणौ यस्य भवेतां चापि सुप्तकौ ॥ ६३ ॥
पादहर्षः स विज्ञेयः कफवातप्रकोपतः ।
(सु. नि. अ. १)

पादहर्षमाह—हृष्येते इत्यादि । हृष्येते हर्षयुक्तौ भवतः, हर्षश्च रोमाञ्चप्रायोऽन्तःशीतो झिणिझिणिवद्वेदनाविशेष इत्याहुः, झिणिझिणि तु न चिरानुबन्धिनी केवलवातजेति भेदः ॥ ६३ ॥—

†अंसदेशस्थितो वायुः शोषयेदंसबन्धनम् ॥ ६४ ॥
(सु. नि. अ. १)

अंसेत्यादि । अंसेत्यादिना श्लोकार्धेनांसशोषः केवलवातज उच्यते । अंसबन्धकारकः श्लेष्मा अंसबन्धनः; एतदनन्तरं 'अंसशोषं जनयेत्' इति शेष इति कार्तिकः ॥ ६४ ॥

‡सिराश्चाकुञ्च्य तत्रस्थो जनयेदवबाहुकम् ।
(सु. नि. अ. १)

अवबाहुकमाह—सिराश्चेत्यादिना अवबाहुकः । तत्रस्थोऽसदेशस्थः, सिरा आकुञ्च्यावबाहुकं जनयेत् । अयं वातकफजः । अन्ये तु मिलित्वाऽवबाहुकलक्षणमाहुः तन्न, यतः सुश्रुतेनोक्तम्,—"अंसशोषावबाहुकयोर्बाहुमध्ये सिराव्यधः" (सु. शा. स्था. अ. ८)—इति । एतदनन्तरं सुश्रुतेन बाधिर्यं पठितं,—"यदा शब्दवहं वायुः" (सु. नि. स्था. अ. १)—इत्यादिना, माधवेन तु प्रकरणानुरोधं मन्यमानेन कर्णरोग एव तत् पठितं, किंतु सुश्रुतेन वातव्याधौ बाधिर्यं पठित्वाऽपि बाधिर्यकर्णशूले शालाक्येऽपि पठितौ, पुनरुक्तमिति चेत्; न, संप्राप्तिभेदभिन्नत्वात्; वातव्याधौ शब्दवहमित्यनेन कर्णशष्कुल्यवच्छिन्नभोदेश उक्तः, शालाक्ये च शब्दवहाः सिरा इत्युक्तम् । माधवेन तु कर्णरोगे शब्दाश्रवणत्वाविशेषादेतदेव तत्र पठितमित्यविरोधः ॥—

---

* 'विशेषतश्चङ्क्रमतः विशेषेण गच्छतः' (आ० द०) ॥ ६२ ॥

† 'अर्धश्लोकेनांसशोपलक्षणमाह-अंसेत्यादि । अंसशब्देनांससमीपोपलक्षितदेशोऽसदेशः । अंसो बाहुशिरः, तत्र स्थितो व्यवस्थितः । अंसबन्धनमिति अंसबन्धनकारकः श्लेष्मा अंसबन्धनः, तत्रांसबन्धनं श्लेष्माणं शोषयित्वा' (आ० द०) ॥ ६४ ॥

‡ 'अयं कफवातजः । 'अत्रांसशोपमवबाहुकमिति रोगद्वयमुक्तवान्' (आ० द०) ॥—

*आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ॥ ६५ ॥
नरान्करोत्यक्रियकान्मूकमिन्मिनगद्गदान् ।
(सु. नि. अ. १)

मूकादींस्त्रीनाह—आवृत्येत्यादि । अक्रियकान् अवचनक्रियकान्; नञयमभावे ईषदर्थे च । आद्यो मूकोऽवचनः, द्वितीयो मिन्मिनः सानुनासिकसर्ववचनः, तृतीयो गद्गदो लुप्तपदव्यञ्जनाभिधायी । एषां च समानकारणाभिधानेऽपि दुष्टेरुत्कर्षादिभिरदृष्टवशाद्वा भेद इत्यूहनीयम् ॥ ६५ ॥—

†अधो या वेदना याति वर्चोमूत्राशयोत्थिता ॥ ६६ ॥
भिन्दतीव गुदोपस्थं सा तूनी नाम नामतः ।
(सु. नि. अ. १)

तूनीमाह—अध इत्यादि । अध इति गुदोपस्थम् । वेदना शूलम् । वर्चोमूत्राशयोत्थिता पक्वाशयमूत्राशयोत्थिता, पक्वाशयमूत्रपुटयोर्व्यस्तसमस्तयोर्जाता । उपस्थं स्त्रीपुंसयोर्गुह्यम् । नामतः प्रसिद्धितः ॥ ६६ ॥—

‡गुदोपस्थोत्थिता या तु प्रतिलोमं प्रधाविता ॥ ६७ ॥
वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते ।
(सु. नि. अ. १)

प्रतितूनीमाह—गुदेत्यादि । प्रतिलोममित्यूर्ध्वम् । वेगैर्वातकृतोद्गमैः । चेत्यनेन भिन्दतीवेत्यतिदिश्यते ॥ ६७ ॥—

§साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् ॥ ६८ ॥
आध्मानमिति तं विद्याद्घोरं वातनिरोधजम् ।
विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ॥ ६९ ॥
प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलम् ।
(सु. नि. अ. १)

आध्मानमाह—साटोपमित्यादि । साटोपमिति आटोपश्चलचलनमिति गयदासः, गुडगुडाशब्द इति कार्तिकः । आध्मातं वातपूर्णचर्मपुटकस्थानीयम् । उदरमिति पक्वाशयः, प्रत्याध्मानस्यामाशयसंभवत्वात् । घोरमिति कष्टप्रदम् । आमाशयसमुत्थ-

---

* 'मूकादीन् जिह्वागतान् वातरोगांस्त्रीनाह-आवृत्येत्यादि । वायुः सकफः कुपितः सन्, शब्दवाहिनीर्धमनीरावृत्यावरुध्य, नरानक्रियकान् करोति' (आ० द०) ॥ ३५ ॥

† 'या वेदना शूलमध इति गुदोपस्थं याति, नामतः सा तूनी नाम, भिन्दतीव गुदोपस्थमिति भेदं कुर्वतीव गुदोपस्थस्येत्यर्थः' (आ० द०) ॥ ३६ ॥

‡ 'गुदोपस्थोत्थिता सैव वेदना प्रतिलोमं प्रधाविता सती वेगैर्वातकृतोद्गमैर्मुहुर्मुहुः स्वभावोपशमोपलक्षितैः पक्वाशयं याति, सा प्रतितूनीत्युच्यते' (आ० द०) ॥ ३७ ॥

§ आटोपादिलक्षणयुक्तमुदरमाध्मातं जानीयात्; साटोपमिति आटोपश्चलनं तेन सह वर्तत इति साटोपमिति गयदासः । प्रत्याध्मानमाह-विमुक्तेत्यादि । विमुक्तं पार्श्वहृदयं येन तत्तथा' (आ० द०) ॥ ३८ ॥ ३९ ॥

त्वेन प्रत्यासत्त्या पार्श्वहृदययोरपि वेदनाशङ्कानिरासार्थमाह—विमुक्तेत्यादि । तदेवेत्य-नेन साटोपादित्वमतिदिशति । कफव्याकुलितानिलं कफावृतवातम् ॥ ६८ ॥ ६९ ॥—

*नाभेरधस्तात्संजातः संचारी यदि वाऽचलः ॥ ७० ॥
अष्ठीलावद्घनो ग्रन्थिरूर्ध्वमायत उन्नतः ।
वाताष्ठीलां विजानीयाद्बहिर्मार्गावरोधिनीम् ॥ ७१ ॥
एतामेव रुजोपेतां वातविण्मूत्ररोधिनीम् ।
प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थिताम् ॥ ७२ ॥
(सु. नि. अ. १)

अष्ठीलमाह—नाभेरित्यादि । अष्ठीला उत्तरापथे वर्तुलः पाषाणविशेष इति **जेज्जटमतानुवादी कार्तिकः**, कर्मकाराणां वर्तुला दीर्घा लौहभाण्डीति **गयदासः** । ऊर्ध्वमायत उपरिदीर्घः । उन्नतस्तिर्यगुन्नतः । वातकृता अष्ठीला वाताष्ठीलेति स्वरूपपरं, व्यावृत्त्यभावात् । बहिर्मार्गावरोधिनीं वातमूत्रपुरीषावरोधिनीम् । एतामित्यादि सैव जठरे तिर्यगुत्थिता तिर्यगायता प्रत्यष्ठीलेति भेदः । वातविण्मूत्ररोधिनीमिति विशेष-परम् ॥ ७०–७२ ॥

†मारुतेऽनुगुणे बस्तौ मूत्रं सम्यक् प्रवर्तते ।
विकारा विविधाश्चात्र प्रतिलोमे भवन्ति च ॥ ७३ ॥
(सु. नि. अ. १)

अष्ठीलाव्यतिरिक्तामपि वातविकृतिं मूत्ररोधिनीमाह—मारुत इत्यादि । अनुगुणेऽ-नुलोमे, प्रतिलोमे मारुत इति संबन्धः । विकारा अश्मरीमूत्रकृच्छ्रादयः ॥ ७३ ॥

‡सर्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः ।

वेपथुवातविकारमाह—सर्वेत्यादि । शिरसः कम्प इति संबन्धः, शिर इत्यवयवोप-लक्षणं, तेन हस्तादेरपि कम्पो वेपथुरित्यर्थः ॥—

§खल्ली तु पादजङ्घोरुकरमूलावमोटनी ॥ ७४ ॥
(च. चि. अ. २८)

(§अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन वा ।
करोत्युद्गारबाहुल्यमूर्ध्ववातः स उच्यते ॥ ७५ ॥)

खल्लीत्यादि । खल्ली शिरावमोट्टन इति लोके । "अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन च । करोत्युद्गारबाहुल्यमूर्ध्ववातं प्रचक्षते" इत्यत्राधिकं केचित् पठन्ति ॥ ७४ ॥ ७५ ॥

---

* 'अष्ठीलावत् अष्ठीलासदृशं ग्रन्थिं वाताष्ठीलां विजानीयात् । घनं संहतावयवम्' (आ० द०) ॥ ७०–७२ ॥

† 'अनुगुणेऽनुलोमे मारुत इत्यर्थः' (आ० द०) ॥ ७३ ॥

‡ 'सर्वाङ्गकम्पवातमाह–सर्वाङ्गेत्यादि । सर्वाङ्गस्य शिरसश्च कम्प इति संबन्धः, (आ० द०) ॥—

§ 'खल्लीमाह–खल्लीत्यादि । मोटनीति परिवर्तनशीला' (आ० द०) ॥ ७४ ॥

§ 'ऊर्ध्ववातमाह–अध इति' (आ० द०) ॥ ७५ ॥

*स्थाननामानुरूपैश्च लिङ्गैः शेषान्विनिर्दिशेत् ।
सर्वेष्वेतेषु संसर्गं पित्ताद्यैरुपलक्षयेत् ॥ ७६ ॥
हनुस्तम्भार्दिताक्षेपपक्षाघातापतानकाः । (च. चि. अ. २८)
कालेन महता वाता यत्नात्सिध्यन्ति वा नवा ॥ ७७ ॥
नरान् बलवतस्त्वेतान् साधयेन्निरुपद्रवान् ।

अनुक्तवातरोगसंग्रहार्थमाह—स्थानेत्यादि । स्थानानुरूपैर्लिङ्गैर्यथा—कुक्षिशूलं, नखभेद इत्यादि । नामानुरूपैर्लिङ्गैर्यथा—शूलमित्युक्ते कीलनिखातवद्वेदनाविशेष एवबोध्यते, तथा भेदत्तोदादिभिरपि पीडाविशेष एव गम्यते । वाता इति वातविकाराः, कार्यकारणयोरभेदोपचारात्, वातादिति पाठे तु वाताद् पक्षवधादयः इति योज्यम् ॥ ७६ ॥ ७७ ॥—

†विसर्पदाहरुक्सङ्गमूर्च्छारुच्यग्निमार्दवैः ॥ ७८ ॥
क्षीणमांसबलं वाता घ्नन्ति पक्षवधादयः ।
शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीडितम् ।
रुजार्तिमन्तं च नरं वातव्याधिर्विनाशयेत् ॥ ७९ ॥
(सु. सू. अ. ३३)

वातोपद्रवानाह—विसर्पेत्यादि । वाता इति वातविकाराः, कार्यकारणयोरभेदोपचारात् । वातादिति पाठे तु वाताद् पक्षवधादय इति योज्यम् । शूनमित्यादि शूनं सशोथम् । सुप्तत्वचं स्पर्शानभिज्ञत्वगिन्द्रियम् ॥ ७८ ॥ ७९ ॥

अव्याहतगतिर्यस्य स्थानस्थः प्रकृतिस्थितः ।
वायुः स्यात्सोऽधिकं जीवेद्वीतरोगः समाः शतम् ॥ ८० ॥

इति श्रीमाधवकरविरचिते माधवनिदाने वातव्याधिनिदानं समाप्तम् ॥ २२ ॥

इदानीं पञ्चविधस्यापि प्रकृतिस्थस्य वायोर्लिङ्गं कार्यं चाह—अव्याहतेत्यादि । यस्येति पुरुषस्य, अव्याहतगतिरनवरुद्धमार्गः, स्थानस्थः स्वाश्रयव्यवस्थितः, प्रकृतिस्थितोऽक्षीणश्चाप्रवृद्धः, एतद्विशेषणत्रयं हेतुहेतुमद्भावेन योज्यम् । वीतरोगो नीरोगः कफपित्तदुष्टेरपि प्रेरकवातेनान्तरीयकत्वात् । अधिकं समाः शतमिति पञ्च दिनाधिकं सविंशं वर्षशतम् । यदाह वराह आयुर्निरूपणे,—"समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशाः"—इत्यादि ॥ ८० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां वातव्याधिनिदानं समाप्तम् ॥ २२ ॥

---

* 'पित्ताद्यैरिति पित्तश्लेष्मरुधिरैः संसर्गं द्विदोषं सन्निपातं च लक्षयेत् । उक्तरोगाणां कृच्छ्रसाध्यत्वमाह—हन्वित्यादि । एतेष्वेकः कश्चिन्मुच्यत इत्यर्थः । परं कः सिध्यति ? यस्तरुणो भवति । तथा निरुपद्रवान् उपद्रवरहितान्' (आ० द०) ॥ ७६ ॥ ७७ ॥—

† 'सङ्गो मूत्रपुरीषवाताप्रवृत्तिः । क्षीणं मांसबलं यस्य स तथा । भग्नं भग्नास्थि । रुजार्तिमन्तमतीव पीडयाऽऽर्तम्' (आ० द०) ॥ ७८ ॥ ७९ ॥

---

१ एतच्च 'नरांस्तु तरुणानेतान्' इति पाठमभिप्रायेण ।

अथ वातरक्तनिदानम् ।

*लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥ १ ॥
कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥ २ ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः । (च. चि अ. २९)
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनां चापि कुप्यते वातशोणितम् ॥ ३ ॥
(सु. चि. अ. १)

वातव्याधिविशेषत्वात्तदनन्तरं वातरक्तमाह । ननु, सुश्रुते वातरोगाध्याय एव वातरक्तं पठितं तत् कुतोऽत्र संग्रहे पृथक् पाठः ? उच्यते, सत्यपि वातरोगत्वे निदानवैशिष्ट्याद्विशिष्टदोषदूष्यख्यापनार्थं हस्तादिदेश एव संप्राप्तिकथनार्थं क्रियाविशेषख्यापनार्थं च पृथक्करणम् । अत एव **चरके**ऽपि वातव्याध्यनन्तरं पृथग्वातरक्ताधिकारः । ननु, रुजस्तीव्राः ससंतापा इत्यादिना रक्तगतस्य वातस्य लक्षणं वातव्याधावेवोक्तं, ततश्च वातरक्ताभिधानं पुनरुक्तं स्यात्; नैवं, वातरक्तं हि दुष्टेन वातेन दुष्टेन रक्तेन च विशिष्टसंप्राप्तिकं विकारान्तरमेव । उक्तं हि **चरके**,—"वायुः प्रवृद्धो वृद्धेन रक्तेनावारितः पथि । क्रुद्धः संदूषयेद्रक्तं तज्ज्ञेयं वातशोणितम्" (च. चि. स्था. अ. २९)—इति । रक्तगतवाते तु वात एव दुष्टो रक्तमदुष्टमेव गच्छतीति भेदः । लवणाम्लेत्यादि, क्लिन्नशुष्कशब्दौ मांसेन संबध्येते । पिण्याकस्तिलकल्कः । निष्पावः शिम्बिः, पललं मांसम् । प्रायश इत्यादि, सुकुमारा मृदुदेहावयवाः, तेषामल्पचेष्टत्वाल्लवणादिभी रक्तं कटुतिक्तप्रजागरादिभिश्च वातः कुप्यति इति **ईशानः** ॥१-३॥

†हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च विदाह्यन्नं स विदाहोऽशनस्य ।
कृत्स्नं रक्तं विदहत्याशु तच्च स्रस्तं दुष्टं पादयोश्चीयते तु ।
तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम् ॥ ४ ॥
(सु. नि. अ. १)

---

* 'तस्य निदानमाह-लवणेत्यादि । लवणादिभिर्भोजनैः, तथा क्लिन्नशुष्काम्बुजादिभिः, तथा कुलत्थादिभिः, तथा दध्यादिभिः, तथा विरुद्धादिभिः, तथा प्रायशः सुकुमाराणां पुंसां, तथा मिथ्याहारविहारिणां स्थूलानां सुखिनां च वातरक्तं प्रकुप्यति । क्लिन्नं शटितं, अम्बुजा मत्स्यादयः, आरनालादयः काञ्जिकभेदाः, सुरा पिष्टकृता, आसवो मद्यं, विरुद्धं क्षीरमत्स्यादि, अध्यशनं भुक्तोपरिभोजनं, स्थूला मेदस्विनः, सुखिनश्च सम्यक्प्रवृत्त्यादिवर्जिताः' (आ० द०) ॥ १-३ ॥

† 'विदाहि विरूढकादिकम् । अश्नतो भुक्तवतः, कृत्स्नशरीरगतरक्तमाशु विदहति, हस्त्यादिगमनं तथा विषमपादेनापि गमनं हेतुः । तद्वदपित्तमिति दुष्टं पित्तमित्यर्थः दूषितेनासृजाऽऽक्तमिति दूषितेन रक्तेन मिश्रं, तथा दुष्टः श्लेष्मा दूषितेन रक्तेनाक्तो मिश्रः' (आ० द०) ॥ ४ ॥

---

१ वातरक्तं प्रकुप्यति इति ख ।

संप्राप्तिमाह—हस्त्यश्वेत्यादि । हस्त्यादिगमनं वातवृद्धौ विशेषेण रक्तस्य द्रवस्याधोगमनेऽपि हेतुः, विदाह्यन्नं च शोणितवृद्धौ । हस्त्यादिगमनं विशेषेण, पादेनापि गमनं हेतुरेव । तदुक्तम् । संपृक्तं वायुना दूषितेन स्वहेतुवृद्धेन । तत्प्राबल्यादिति द्वयोर्दुष्टत्वेऽपि वातस्य प्राबल्याद्दोषत्वेन प्राधान्याद्वातरक्तव्यपदेशः, नतु रक्तवात इति ॥४॥

*स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् ।
सन्धिशैथिल्यमालस्यं सदनं पिडकोद्गमः ॥ ५ ॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥ ६ ॥
कण्डूः सन्धिषु रुग्भूत्वा भूत्वा नश्यति चासकृत् ।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम् ॥ ७ ॥
(च. चि. अ. २९)

पूर्वरूपमाह—स्वेदेत्यादि । स्वेदोऽत्यर्थं नवेति घर्मागमनमत्यर्थं भवति सर्वथा वा न भवति, एतच्च व्याधिमहिम्ना कुष्ठवत् । क्षतेऽतिरुगिति यदि कारणान्तरात् क्षतं स्यात्तदाऽतिशयं रुजा स्यात्, तद्देशस्य दुष्टत्वात् ॥ ५–७ ॥

†वातेऽधिकेऽधिकं तत्र शूलस्फुरणभञ्जनम् ।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावतावृद्धिहानयः ॥ ८ ॥
धमन्यङ्गुलिसन्धीनां संकोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥ ९ ॥
रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ॥ १० ॥
पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदः¹सतृट् ।
स्पर्शासहत्वं रुग्रागः शोथः पाको भृशोष्मता ॥ ११ ॥
(च. चि. अ. २९)

कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ।
कण्डूर्मन्दा च रुग्द्वन्द्वं सर्वलिङ्गं च संकरात् ॥ १२ ॥
(सु. नि. अ. १)

वातरक्तस्य दोषान्तरसंसर्गेण लक्षणमाह—वातेऽधिक इत्यादि । वृद्धिहानय इति वातरक्तलक्षणानाम् । रक्त इत्यादि । रक्त इत्यत्र 'अधिक' इत्यनुवर्तनीयं, एवं वक्ष्यमाणपित्तादिषु । एतच्चारम्भकरक्तादन्यद्रक्तान्तरं बोध्यं, रक्तमपि रक्तान्तरदूषकं भवति । यदुक्तं दुष्टरक्तलक्षणे,—"पित्तवद्रक्तेनातिकृष्णं च (सु. सू. स्था. अ. १४)—"इति ।

* 'कार्ष्ण्यमज्ञानाम् । सदनमङ्गानाम् । पिडिकाप्रादुर्भावो जान्वादिषु, निस्तोदः पीडाविशेषः, सुप्तिस्त्वचः, वैवर्ण्यं विच्छायता, एतत्पूर्वरूपं वातरक्तस्य' (आ० द०) ॥ ५–७ ॥

† 'तत्र जानुजङ्घादिस्थानेषु शूलादिकं ज्ञेयं, तथा शोथस्य रौक्ष्यादिकं वृद्धिहानयश्च विशेषाः, धमन्यादीनां संकोचः । शीतद्वेषः, अनुपशयः शीतेन रोगवृद्धिः । रक्ताधिक-

१ मदस्तृषा इत्यपिपाठः ।

शर्म नैति शान्ति न याति । कफ इत्यादि । द्वन्द्वसर्वलिङ्गं च संकरादिति संकरात् द्विदोषत्रिदोषमेलकात् द्वन्द्वलिङ्गं सर्वलिङ्गं च क्रमाद्वातरक्तं भवति ॥ ८–१२ ॥

*पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ।
आखोर्विषमिव क्रुद्धं तद्देहमुपसर्पति ॥ १३ ॥ (सु.नि.अ. १)

पादयोर्जातमप्रतिक्रियमाणं देशान्तरं व्याप्नोति, पादवद्धस्तयोरपि भवतीति दर्शयन्नाह—पादयोरित्यादि । आखोर्विषमित्यनेन मन्दविसर्पितां दर्शितवान्; एतद्वातरक्तं चरकेण द्विविधमुक्तम् । यदाह—"उत्तानमथ गम्भीरं द्विविधं वातशोणितम् । त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयम्" (च. चि. स्था. अ. २९)—इति । सुश्रुतेन तु कुष्ठवदुत्पत्तौ उत्तानस्योत्तरकालं गम्भीरत्वमुक्तमिति मतभेद एव ॥ १३ ॥

†आजानु स्फुटितं यच्च प्रभिन्नं प्रस्रुतं च यत् ।
उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥ १४ ॥
वातरक्तमसाध्यं स्याद्याप्यं संवत्सरोत्थितम् । (सु.नि.अ.१)
अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः ॥ १५ ॥
संमूर्च्छामदरुक्तृष्णाज्वरमोहप्रवेपकाः ।
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ॥ १६ ॥
अङ्गुलीवक्रतास्फोटदाहमर्मग्रहार्बुदाः ।
एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वाऽपि यत् ॥ १७ ॥
अकृत्स्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ।
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥ १८ ॥
(च. चि. अ. २९)

इति श्रीमाधवकरविरचिते माधवनिदाने वातरक्तनिदानं समाप्तम् ॥ २३ ॥

असाध्यत्वादिकमाह—आजान्वित्यादि । आजानु जानुपर्यन्तं गतमसाध्यम् । तथा स्फुटितादिकं स्फुटितं दलितत्वक्, प्रभिन्नं विदीर्णत्वक्, उपद्रवैरित्यादौ आदिशब्देन वक्ष्यमाणानामस्वप्नादीनां ग्रहणम् । याप्यं संवत्सरोत्थितमित्यनेन संवत्सरादर्वाक् साध्यं, यदि स्फुटितत्वगादयो न भवेयुरित्याहुः । अस्वप्नेत्यादि । पाङ्गुल्यं पङ्गुता । मोहेनैकेनेति वचनात् पूर्वोक्तैः समस्तैर्द्वित्रादिभिर्वेति ज्ञापयतीति ॥ १४–१८ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां वातरक्तनिदानं समाप्तम् ॥ २३ ॥

१लक्षणमाह–रक्त इत्यादि । कण्डूक्लेदौ शर्म न यातः, क्लेदो द्रवत्वम् । पित्ताधिकमाह–पित्त इत्यादि । मृद्वौष्म्यता संतापाधिक्यम् । कफाधिकमाह–कफ इत्यादि । कफाधिके स्तैमित्यमार्द्रता, मन्दा अदारुणा, रुक् पीडा । द्वन्द्वजसान्निपातिकावाह–द्वन्द्वमित्यादि (आ० द०) ॥ ८–१२ ॥

* 'कदाचिदिति अप्रतिक्रियमाणम् । हस्तयोरपीति मूलमास्थाय' (आ० द०) ॥ १३ ॥

† 'प्रस्रुतं स्रावयुक्तम् । उपद्रवैरिति प्राणमांसक्षयादिभिः, उपद्रवानाह–अस्वप्नेत्यादि ।

अथोरुस्तम्भनिदानम् ।

*शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः ।
जीर्णाजीर्णे तथाऽऽयाससंक्षोभस्वप्नजागरैः ॥ १ ॥
सश्लेष्ममेदःपवनः साममत्यर्थसंचितम् ।
अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते ॥ २ ॥
सक्थ्यस्थिनी प्रपूर्यान्तः श्लेष्मणा स्तिमितेन च ।
तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ॥ ३ ॥
परकीयाविव गुरू स्यातामतिभृशव्यथौ ।
ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्द्यरुचिज्वरैः ॥ ४ ॥
संयुक्तौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः ।
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥ ५ ॥
(वा. नि. अ. १५)

वातव्याधिविशेषत्वादूरुस्तम्भमाह—शीतोष्णेत्यादि । शीतोष्णग्रहणमनुक्तपरस्परविरोधिद्वन्द्वोपलक्षणार्थं, तेन गुरुस्निग्धाभ्यां लघुरूक्षयोर्ग्रहणं बोध्यमिति **जेज्जटः** । संशुष्कं कठिनं, द्रवविरोधित्वात् । जीर्णाजीर्णे इति प्रभूतं जीर्णे, स्तोकमजीर्णमित्याहुः, तस्मिन्; 'भोजने' इति शेषः । अत एव **दृढबलेन**,—"जीर्णाजीर्णे समश्नतः" (च. चि. स्था. अ. २७)—इति पठितम् । एते च यथासंभवं श्लेष्मादीनां हेतवः । सश्लेष्ममेदःपवन इति सश्लेष्ममेदश्चासौ पवनश्चेति सश्लेष्ममेदःपवन इति विग्रहः । इतरं दोषं पित्तम् । अस्यां संप्राप्तौ वातस्य प्राधान्यमुक्तं, अत एव **सुश्रुतेन** महावातव्याधावयं रोगः पठितः । **चरके** तु कफस्य प्राधान्यमुक्तम् । यदाह,—"ऊरु श्लेष्मा समेदस्को वातपित्तेऽभिभूय तु" (च. चि. स्था. अ. २७)—इत्यादि । तत्र **चरके** आवरकस्य श्लेष्मणः प्राकृचिकित्स्यत्वेन प्राधान्यं, आरम्भकत्वेन तु **सुश्रुते** पवनस्येति न विरोधः । परकीयाविवेत्यनेनोत्क्षेपणगमनादिष्वप्रभुत्वं दर्शयति । ध्यानादिभिर्ज्वरान्तैरुपलक्षितः 'पुरुष' इति शेषः ॥ १–५ ॥

मांसकोथो मांसगलनम् । मूर्च्छायो मूर्च्छा । अमन्दरुक् पीडाबाहुल्यम् । मोह इन्द्रियार्थानाम् । पुनश्च साध्यासाध्यत्वमाह–अकृत्स्नेत्यादि । यस्य च सर्वे उपद्रवा भवेयुः सोऽप्यसाध्यः । 'अकृत्स्नोपद्रवम्' इत्यादिकं माधवेन न गृहीतं, पुस्तकान्तरेषु दृष्ट्वालिखितमिति' (आ० द०) ॥ १४–१८ ॥

*'ऊरुस्तम्भस्य निदानपूर्वां संप्राप्तिमाह–शीतेत्यादि । आयासो व्यायामः । स्वप्नं दिवा, जागरणं निशि । अत्यर्थसंचितमितरं दोषं पित्तम् । स्तिमितेन मन्देन, स्तभ्नाति स्तम्भयति, अचेतनौ स्पर्शज्ञानरहितौ । ऊरुस्तम्भमपरे आढ्यवातमाहुः' (आ० द०) ॥ १–५ ॥

---

१ एतच्च 'मूर्च्छायोऽमन्दरुक्तृष्णा' इति पाठाभिप्रायेण ।

*प्राग्रूपं तस्य निद्राऽतिध्यानं स्तिमितता ज्वरः ।
रोमहर्षोऽरुचिश्छर्दिर्जङ्घोर्वोः सदनं तथा ॥ ६ ॥
वातशङ्किभिरज्ञानात्तस्य स्यात्स्नेहनात्पुनः ।
पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा ॥ ७ ॥
जङ्घोरुग्लानिरत्यर्थं शश्वच्चादाहवेदने ।
पादं च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च ॥ ८ ॥
संस्थाने पीडने गत्यां चालने चाप्यनीश्वरः ।
अन्यस्येव हि संभग्नावूरू पादौ च मन्यते ॥ ९ ॥
†यदा दाहार्तितोदार्तो वेपनः पुरुषो भवेत् ।
ऊरुस्तम्भस्तदा हन्यात्साधयेदन्यथा नवम् ॥ १० ॥

(च. चि. अ. २७)

इति श्रीमाधवकरविरचिते माधवनिदाने ऊरुस्तम्भनिदानं समाप्तम् ॥ २४ ॥

अनुपशयमाह—वातेत्यादि । वातशङ्किभिरिति सुप्तिसंकोचकम्पादिवातरोगसदृशलिङ्गदर्शनात्तच्छङ्किभिः । अज्ञानादनिश्चयात्, मोहादि इति ईशानः । तत्रोपशयानुपशयज्ञानार्थं स्नेहनं, यदुक्तं **चरके**,—"गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परीक्षेत" (च. चि. स्था. अ. ४)—इति; ततः स्नेहनादनुपशयो भवतीत्याह–पादयोरित्यादि । उद्धरणम् ऊर्ध्वचालनम् । आदाहवेदने इति आङ् ईषदर्थे; अन्ये त्वीषदर्थ एव नव्यमाहुः, उद्भूतदाहस्यासाध्यत्वेन वक्ष्यमाणत्वात् । 'आनाहवेप(द)ने' इति पाठान्तरमयुक्तं, चरकटीकाकारैः सर्वैरव्याख्यातत्वात् । व्याधिस्वभावादयं चोरुस्तम्भ एक एव त्रिदोषारब्धः, नतु वातादिभेदादनेकविधः । उक्तं हि **चरके** व्याधिसंख्यायाम्,—'एक एवोरुस्तम्भः' (च. सु. स्था. अ. १९)—इति । संभग्नाविति संभग्नाविव संभग्नौ ॥ ७–१० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामूरुस्तम्भनिदानं समाप्तम् ॥ २४ ॥

---

* 'अज्ञानात् वातरोगोऽयमिति भ्रमात्, स्नेहनादभ्यङ्गादेः' (आ० द०) ॥ ६ ॥ ९ ॥

† 'असाध्यत्वमाह–यदेत्यादि । अन्यथेति पूर्वोक्तैरुपद्रवै रहितं चोत्पन्नमात्रमेव (आ० द०) ॥ १० ॥

अथामवातनिदानम्।

*विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च।
स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तदा॥ १॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति।
तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते॥ २॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः॥ ३॥
जनयत्याशु दौर्बल्यं गौरवं हृदयस्य च।
व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः॥ ४॥
युगपत्कुपितावन्तस्त्रिकसन्धिप्रवेशकौ।
स्तब्धं च कुरुतो गात्रमामवातः स उच्यते॥ ५॥

ऊरुस्तम्भे वायुः साम इत्युक्तं, अतस्तदनन्तरमामवातनिदानमाह—विरुद्धेत्यादि। विरुद्धाहारः संयोगादिविरुद्धः, विरुद्धा च चेष्टा यथा—अजीर्णे व्यायामव्यवायजलप्रतरणादि। स्निग्धं भुक्तवतो व्यायामं कुर्वत इति मिलितो हेतुः, न पृथक्त्वेन। श्लेष्मस्थानमामाशयसन्ध्यादि। तेन वातेन विदग्धो दूषितोऽसावामो धमनीः प्रतिपद्यते, 'धमनीभिः प्रपद्यत' इति पाठान्तरे श्लेष्मस्थानमिति योज्यम्। सोऽन्नजो रस इति आमः, अन्नरसस्यैवापक्वस्य तन्त्रान्तरे आमव्यपदेशात्। यदुक्तं,—"ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्। दुष्टमामाशयगतं रसमामं प्रचक्षते" (वा. सू. स्था. अ. १३)—इत्यादि। अन्यैरप्युक्तं,—"आमाशयस्थः कायाग्नेर्दौर्बल्यादविपाचितः। आद्य आहारधातुर्यः स आम इति कीर्तितः"—इति। अपरे त्वाहुः,—"अविपक्वमसंयुक्तं दुर्गन्धं बहु पिच्छिलम्। सदनं सर्वगात्राणामाम इत्यभिधीयते"—इति। अन्ये त्वाहुः,—"आहारस्य रसः शेषो यो न पक्वोऽग्निलाघवात्। स मूलं सर्वरोगाणामाम इत्यभिधीयते"—इति। तथाचापरे,—"आममन्नरसं केचित्, केचित्तु मलसंचयम्। प्रथमां दोषदुष्टिं च केचिदामं प्रचक्षते"—इति। नानावर्ण इति वातादिदूषितत्वाद्बहुवर्णः। युगपदित्यादि, वातकफौ युगपत्कुपिता-

---

* 'विरुद्धाहारचेष्टस्य तथा मन्दाग्नेरेवंविधस्य पुरुषस्य, निश्चलस्य व्यापाररहितस्य, विरुद्धाहारः क्षीरमत्स्यादिः संयोगादिविरुद्धः, अन्ये व्यायामं वाऽप्यकुर्वत इति पठन्ति। तन्नातियुक्तं, निश्चलस्येत्यनेनैव लब्धत्वात्। श्लेष्मस्थानं प्रधावतीति श्लेष्मस्थानान्यामाशयोरःशिरःकण्ठसंधय इति। श्लेष्मस्थाननिक्षिप्तेन वातेन विदग्धो दूषित आमो धमनीः सिराः प्रतिपद्यते। "जठरानलदौर्बल्यादविपक्वस्तु यो रसः। स आमसंज्ञको देहे सर्वरोगप्रकोपकः"—इति। त्रिभिर्दोषैरतिशयदूषितोऽन्नरसः स्रोतांस्यभिष्यन्दयति लिम्पति, अतिपिच्छिलत्वात्। बहुसैन्दत्वं जनयति। हृदये गौरवं भवति, तस्य स्थानत्वात्। सर्वेषां रोगाणामयमेव कारणीभूत आमसंज्ञकः। तस्यैव रूपमाह—युगपदित्यादि। युगपदेकवारमेव (त्रिके कटिमन्यासंसन्धी तत्र, तथा संधिषु प्रविश्य) स आमवातः कथ्यते' (आ० द०)॥ ५॥

वन्तः कोष्ठे त्रिकसन्धिप्रवेशकौ भवतः, अथवा गात्रं स्तब्धं कुरुतः; त्रिकसन्धिषु प्रवेशस्तद्गतवेदनया बोध्यः ॥ १–५ ॥

*अङ्गमर्दोऽरुचिस्तृष्णा ह्यालस्यं गौरवं ज्वरः ।
अपाकः शूनताऽङ्गानामामवातस्य लक्षणम् ॥ ६ ॥

आमवातस्य सामान्यलक्षणमाह—अङ्गमर्द इत्यादि ॥ ६ ॥

†स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् ।
हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु ॥ ७ ॥
करोति सरुजं शोथं यत्र दोषः प्रपद्यते ।
स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥ ८ ॥
जनयेत्सोऽग्निदौर्बल्यं प्रसेकारुचिगौरवम् ।
उत्साहहानिं वैरस्यं दाहं च बहुमूत्रताम् ॥ ९ ॥
कुक्षौ कठिनतां शूलं तथा निद्राविपर्ययम् ।
तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्रहं विड्विबद्धताम् ।
जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान् ॥ १० ॥

तस्यैवातिवृद्धस्य लक्षणमाह—स इत्यादि । वृश्चिकैः सविषकीटविशेषैः । स इति आमवातः । जाड्यमकर्मण्यत्वम् । अन्यानुपद्रवान् संकोचखञ्जत्वादीन् ॥ ७–१० ॥

‡पित्तात्सदाहरागं च सशूलं पवनानुगम् ।
स्तिमितं गुरुकण्डूं च कफदुष्टं तमादिशेत् ॥ ११ ॥

तस्य विशेषलक्षणान्याह—पित्तादित्यादि ॥ ११ ॥

---

* 'आमवातस्य सामान्यलक्षणमाह—अङ्गेत्यादि । अङ्गमर्दोऽङ्गभङ्गः । अरुचितृष्णे प्रसिद्धे । आलस्ययुक्तमङ्गगौरवं ज्वरश्च । अपाक आहारस्य । अङ्गानां शूनत्वम् । एतदामवातस्य स्वरूपकथनम्' (आ० द०) ॥ ६ ॥

† 'आमवातो यदा कुपितो भवति तदा सर्वरोगाणां मध्ये कष्टतमः कृच्छ्रसाध्यः स्यादित्यर्थः । हस्तपादादीनां सन्धिषु सरुजं श्वयथुं कुर्यात् । सन्धिमन्ये पृथग्व्याख्यानयन्ति । गुल्फौ चरणोपरिग्रन्थी, त्रिकं स्फिक्पृष्ठसन्धिः, ऊरुर्जङ्घादेशः । स देशो वृश्चिकैः सविषकीटविशेषैर्व्याविद्धो दष्ट इवात्यर्थं रुज्यते तुद्यते । उपद्रवानाह—जनयेदित्यादि ।—अग्निमान्द्यादीन् जनयेत्, प्रसेको लालास्रावः, अरुचिगौरवे प्रसिद्धे, उत्साहहानिं कर्माक्षमत्वं, वैरस्यादयः प्रसिद्धाः । कुक्षौ काठिन्यं, शूलं कुक्षावेव, निद्राविपर्ययो निद्रानाशः, तृडादयः प्रसिद्धाः, विड्विबद्धता विड्ग्रहः, जाड्यमङ्गानामकर्मण्यता, अन्ये जाड्यं कर्कशत्वमित्याहुः । आनाह ऊर्ध्वाधोभागनिरोधिता । अन्यानुपद्रवानिति वातव्याधिनिदानोक्तान्' (आ० द०) ॥७–१०॥

‡ 'पित्तादियुक्तस्य विशेषलक्षणमाह—पित्तादित्यादि । यदा पित्तेन मिलितो भवति, तदा दाहरागवान् भवति, यदि तु वातानुगस्तदा सशूलं सव्यथं जानीयात् । यद्यप्यामो वातेन नीयमानस्तथाऽपि प्रदेशस्थितेन मिलितत्वात्तेनैवानुगतत्वमिति । स्तिमितं जडं, गुरुं गौरवयुक्तं, कण्डूमन्तं च कफोत्तरं जानीयात्' (आ० द०) ॥ ११ ॥

*एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते ।
सर्वदेहचरः शोथः स कृच्छ्रः सान्निपातिकः ॥ १२ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने आमवातनिदानं समाप्तम् ॥ २५ ॥

तस्य साध्यत्वादिकमाह—एकेत्यादि ॥ १२ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामामवातनिदानं समाप्तम् ॥ २५ ॥

अथ शूलपरिणामशूलान्नद्रवशूलनिदानम् ।

दोषैः पृथक् समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।
सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥ १ ॥

आमवातेऽपि शूलं भवतीत्यतस्तदनन्तरं शूलनिदानम् । ज्वरादिवच्छूलस्यापि प्रागुत्पत्तिरस्ति । यदाह हारीतः,—"अनङ्गनाशाय हरस्त्रिशूलं मुमोच कोपान्मकरध्वजश्च । तमापतन्तं सहसा निरीक्ष्य भयार्दितो विष्णुतनुं प्रविष्टः ॥ स विष्णुहुङ्कारविमोहितात्मा पपात भूमौ प्रथितः स शूलः । स पञ्चभूतानुगतं शरीरं प्रदूषयत्यस्य हि पूर्वसृष्टिः"—इति । एतेन शूल(लि)संभवत्वादस्य शूलमिति संज्ञा, शूलनिखातवद्वेदनाजनकत्वाच्च । तदाह वृद्धसुश्रुतः,—"शङ्कुस्फोटनवत्तस्य यस्मात्तीव्रा हि वेदना । शूलासक्तस्य भवति तस्माच्छूलमिहोच्यते" (सु. उ. तं अ. ४२)—इति । कफपित्तादिशूलेष्ववश्यंभावी वायुरित्याह—सर्वेष्वित्यादि । प्रभुः कर्ता ॥ १ ॥

[1]†व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् ॥ २ ॥
कषायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकात् ।
विड्शुक्रमूत्रानिलवेगरोधाच्छोकोपवासादतिहास्यभाष्यात् ॥ ३ ॥
वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पार्श्वपृष्ठत्रिकबस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् ॥ ४ ॥
मुहुर्मुहुश्चोपशमप्रकोपी विड्वातसंस्तम्भनतोदभेदैः ।
संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥ ५ ॥

---

* 'साध्यासाध्यत्वमाह–एकदोषानुग इत्यादि । सुगमम्' (आ० द०) ॥ १२ ॥

† 'व्यायामो मल्लयुद्धादिः, यानं तुरगरथादि, मैथुनं स्त्रीसेवा, प्रजागरं रात्रौ, एषामतियोगात्; कलायस्त्रिपुटः, अत्यर्थरूक्षद्रव्यसेवा, अध्यशनं भुक्तस्योपरि भोजनं, अभिघातो लोष्टादिभिः, कषायतिक्तरससेवा, शुष्कशाकं प्रसिद्धम् । शोको बन्धुवियोगात्, उपवासो-

---

१ 'वायोः प्राधान्यं' (आ० द०) ।

वातिकमाह—व्यायामेत्यादि । शीतजलातिपानाच्छीतलजलस्य प्रभूतपानात् आढकी तुवरी, कोरदूषः कोद्रवः, विरूढजान्नमङ्कुरितधान्यकृतमन्नं, विरुद्धं क्षीरमत्स्यादिकं, वल्लूरं शुष्कमांसम् । यद्यपि सर्वैरेव वातकोपनैर्वातशूलं स्यात्तथाऽपि व्यायामादिपाठेनैतद्दर्शयति,—व्यायामादयो यथा वातहेतवस्तथा शूलहेतवोऽपीति; दोषव्याधिहेतव इत्यर्थः । एवं पित्तशूलादिषु द्रष्टव्यम् । जीर्णे इत्याहारे । घनागमे वर्षासु, मेघोदये च । मुहुर्मुहुरुपशमप्रकोपौ वायोश्चलत्वेन ॥ २-५ ॥

*क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः ।
कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ॥ ६ ॥
ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम् ।
तृण्मोहदाहार्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमचोषयुक्तम् ॥ ७ ॥
मध्यन्दिने कुप्यति चार्धरात्रे विदाहकाले जलदात्यये च ।
शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च ॥ ८ ॥

पैत्तिकमाह—क्षारेत्यादि । क्षारो यवक्षारादिः शुष्ककादिकृतक्षारद्रव्यं च, तीक्ष्णोष्णं मरिचराजिकादि, विदाहि वंशाकरीरादि, तैलं तिलविकृतिः, निष्पावः शिम्बिः, पिण्याको निःस्नेहः सर्षपादिकल्कः, कुलत्थयूषोऽत्र कुलत्थान्नपानोपलक्षणः । सौवीरं सन्धानविशेषः । रविप्रतापो रौद्रः । ग्राम्यातियोगो मैथुनातिसेवा । विदाहीति पूर्वं पठिताऽपि अशनैर्विदग्धैरित्यनेनाविदाहिवस्तुनोऽपि दोषवशेन विदाहित्वं दर्शितम् । यदाह सुश्रुतः,—"स्रोतस्यन्नवहे पित्तमग्नौ वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते" (सु. सू. स्था. अ. ४६)—इति । विदाहकाल इत्याहारस्य । जलदात्यये शरदि ॥ ६-८ ॥

ऽभोजनं, अतिहासोऽट्टाट्टहासः, अतिभाष्यं बहुप्रलपनं, एतैः कारणैर्दुष्टो वायुः शूलं कुर्यात् । स्थानसंश्रयमाह–हृत् हृदयं, पार्श्वे, पृष्ठं, त्रिकं स्फिककटिसंधिर्वायोः स्थानत्वात्, वस्तिर्मूत्राशयः । प्रदोषे संध्यासमये, शीते शीतकाले, एतेष्वधिकं प्रकोपं प्रयाति । मुहुर्मुहुर्वारंवार प्रकोपोपशमौ भवतः । विड्वातसंस्तम्भनतोदभेदैरिति पुरीषादीनां यदा स्तम्भस्तदा प्रकोपः, यदा च तेषां प्रवृत्तिस्तदोपशमः, भेदोऽभिघात इव, एतदुपलक्षणम् । यदा तोदभेदौ तदा प्रकोपः । उपशयमाह–संस्वेदनादिभिः शमं शान्तिं प्रयाति स्निग्धोष्णभोजनैश्च (आ० द०) ॥ ५ ॥

*"कटुः कटुकरः, अम्लश्च; सौवीरं काञ्जिकं, सुराविकारः शालिषष्टिकपिष्टैः कृतं मद्यं सुरा तस्या विकारः, पुनर्नवाशालिपिष्टैः कृता श्वेतसुरा, बिभीतकत्वक्शालितण्डुलपिष्टैस्तु बैभीतिकी सुरेत्यादि । क्रोधः कोपः, अनलो वह्निसेवा, आयासः श्रमकारि कर्म, रविप्रतापोऽर्कधर्मः । एभिः कारणैर्दुष्टं पित्तं शूलं जनयेत् । तृट् तृषा, मोहो नष्टचित्तता, दाहः प्रसिद्धः । नाभ्यां पित्तशूलस्य स्थानत्वात् । स्वेदादयः प्रसिद्धाः, चोष्यत इव वेदनाविशेषः, एतैर्युक्तम् । मध्यन्दिनेऽर्धरात्रे च कोपं याति । विदाहकाल आहारस्य पाकावस्थिकः, 'निदाघकाले' इति पाठान्तरम् । शीते शीतवीर्यैः सुस्वादुशीतैर्मधुरशीतभोजनैश्च शान्तिं गच्छति' (आ० द०) ॥ ६-८ ॥

कटुतिक्तोपशान्तं च तच्च ज्ञेयं कफात्मकम् ।
संसृष्टलक्षणं बुद्धा द्विदोषं परिकल्पयेत् ॥ २० ॥
त्रिदोषजमसाध्यं तु क्षीणमांसबलानलम् ।

तस्य वातादिभेदेन लक्षणान्याह—आध्मानेत्यादि । तृष्णादाहारतिस्वेदा यत्र सन्ति तत्तृष्णादाहारतिस्वेदम् । कट्वम्ललवणोत्तरं कट्वम्ललवणैर्वृद्धम् । शीतशमप्रायं शीतलोपशम(य)बहुलम् । छर्दिहृल्लासमोहहृल्लिङ्गानि यस्मिन् सन्ति तच्छर्दिहृल्लासस-मोहम् दीर्घसन्ततीति निरनुबन्धि ॥ १७–२० ॥—

*जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते ॥ २१ ॥
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन च ।
न शर्म याति नियमात्सोऽन्नद्रव उदाहृतः ॥ २२ ॥
(अन्नद्रवाख्यशूलेषु न तावत्स्वास्थ्यमश्नुते ।
वान्तमात्रे जरत्पित्ते शूलमाशु व्यपोहति ॥ १ ॥)

इति श्रीमाधवकरविरचिते माधवनिदाने शूलपरिणामशूलान्नद्रव-
शूलनिदानं समाप्तम् ॥ २६ ॥

त्रिदोषविकृतिविशेषमन्नद्रवाख्यं शूलमाह—जीर्ण इत्यादि । जीर्णे 'आहारे' इति शेषः, एवं जीर्यत्यजीर्णे चेत्यत्र; सर्वदेत्यर्थः । न शर्म याति नोपशेत इत्यर्थः; न त्वसाध्यं, चिकित्साविधानादिति ॥ २१ ॥ २२ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां शूलनिदानं समाप्तम् ॥ २६ ॥

अथोदावर्तानाहनिदानम् ।

†वातविण्मूत्रजृम्भास्रक्षवोद्गारवमीन्द्रियाः ।
क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्तसंभवः ॥ १ ॥
(सु. उ. अ. ५५)

उदावर्तेऽपि शूलं भवतीति शूलानन्तरमुदावर्तमाह—वातेत्यादि । अस्रमश्रु, इन्द्रियशब्देनात्र शुक्रं, क्षुत् बुभुक्षा । धृत्या वेगविधारणेन । एते वातादयस्त्रयोदश नियमार्थाः, तेनान्येषां क्रोधादीनां वेगविधारणं न तद्धेतुः, स्वास्थ्यहेतुत्वात् । यदाह चरकः,—"लोभशोकभयक्रोधमानवेगान् विधारयेत्" (च. सू. स्था. अ. ७)—इत्यादि । सर्वोदावर्तेषु च वायुरेव कारणम् । यदाह सुश्रुतः,—"सर्वेष्वेतेषु विधि-

* 'जीर्यति पच्यमाने, पथ्येऽपि भुक्ते न शान्तिं गच्छति । प्रायेण त्रिदोषजविकृतित्वाद-साध्यम्' (आ० द०) ॥ २१ ॥ २२ ॥

† 'एतेषां धृत्या वेगविधारणेन । अस्रु चक्षुर्जलं, क्षवदिक्का' (आ० द०) ॥ १ ॥

वदुदावर्तेषु कृत्स्नशः । वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये" (सु. उ. तं. अ. ५५)—इत्यादि । उद्धूतेन वेगविधारणेनावृतस्य वायोर्वर्तनमित्युदावर्तनिरुक्तिः; अन्ये तु वायोरूर्ध्वमावर्तो गमनमित्युदावर्तमाहुः; तन्न, अश्रुस्रावादेरव्यापकत्वात्; छत्रिणो गच्छन्तीति न्यायेन वा समर्थनीयम् ॥ १ ॥

*वातमूत्रपुरीषाणां सङ्गो ध्मानं क्लमो रुजा ।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥ २ ॥
(च. सू. अ. ७)

आटोपशूलौ परिकर्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः ।
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥ ३ ॥
(सु. उ. अं. ५५)

वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा ।
विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ ४ ॥
(च. सू. अ. ७)

मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात्पवनात्मकाः स्युः ।
तथाऽक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः ॥ ५ ॥

---

* 'अपानवातस्य धारणात्, आध्मानं ध्मातमिवोदरे, सङ्गोऽप्रवृत्तिः, क्लमोऽनायासश्रमः, रुजा उदरे, पुरीषावरोधजमाह—आटोपेत्यादि । पुरीषवेगे धारिते सत्याटोपः सरुक् गुडगुडाशब्दः । शूलमिति पक्वाशये, परिकर्तिका कर्तनवद्व्यथा, सङ्गः पुरीषस्याप्रवृत्तिः, ऊर्ध्ववात उद्गारबाहुल्यं, अथवा मुखात्पुरीषनिर्गमनमूर्ध्ववातादेव । मूत्रनिग्रहजमाह—वस्तीत्यादि । मूत्रनिग्रहे मूत्रविधारणे सति, वस्तौ मूत्राशये, मेहने मेढ्रे, व्यथा, मूत्रकृच्छ्रमल्पमल्पं कष्टेन मूत्रप्रवर्तनं, वङ्क्षणयोरूरुसंध्योः, आनाहः पूर्णत्वम् । जृम्भाघातजमाह—मन्येत्यादि । शूलं, मन्याकण्ठयोः स्तम्भः, शिरोरोगाः पवनजाः, तथाऽक्षिनासादीनां पवनजा रोगाः स्युः, तीव्रा दारुणाः, तथा कर्णरोगाः स्युर्जृम्भाविधारणात् । अश्रूदावर्तमाह—आनन्दजमित्यादि । नेत्रोदकमानन्दजनितं शोकजं वा द्विविधमपि लोचनजलं, शिरोगुरुत्वादयो रोगाः पीनसेन सह तीव्रा जायन्ते । छिक्कोदावर्तमाह—मन्येत्यादि । क्षवथोश्छिक्कायाः, इन्द्रियाणां चक्षुरादीनां ग्रहणे दौर्बल्यं श्रवणनयननासानामयथार्थं विपर्ययग्रहणम् । उद्गारोदावर्तमाह—कण्ठेत्यादि । उद्गारे विधारिते सति कण्ठमुखयोः पूर्णत्वमाध्मानेण, अतीव तोदो व्यथामाशये वाऽतिव्यथा, छर्द्युदावर्तमाह—कोठो वरटीदष्टसंस्थानः, व्यङ्गं मुखलाञ्छनं, शोफादयः प्रसिद्धाः । शुक्रोदावर्तमाह—मूत्राशय इत्यादि । मैथुनप्रवृत्तौ शुक्रविधारणात् । मूत्राशये वस्तौ, अन्ये 'मूत्रायने' इति पठन्ति, तत्र मूत्रमार्गे गुदमुष्कयोश्च श्वयथुः, तेष्वेव पीडा । मूत्रनिग्रहो मूत्राघातः, शुक्राश्मरीरोगः, ते विकारा इति वातकुण्डल्यादयः । क्षुदुदावर्तलक्षणमाह—तन्द्रेत्यादि । तन्द्रा निद्राभेदः, अङ्गमेदोऽङ्गभङ्गः, श्रमः कर्मेन्द्रियाणामसामर्थ्यं, दृष्टेः कृशता मान्द्यं, चकारात् कार्श्यदौर्बल्यादयस्तन्त्रान्तरोक्ता ग्राह्याः । तृडुदावर्तलक्षणमाह—कण्ठेत्यादि । श्रवणावरोधः[1] शब्दस्याग्रहणमङ्गुलिपिहित इव । श्वासोदावर्तलक्षणमाह—श्रान्तस्येत्यादि । श्रान्तस्य धावनादिना खिन्नस्य, निःश्वासविनिग्रहेण हृद्रोगादयो भवन्ति । हृद्रोगो हृदयविकारः, मोहो मूर्च्छा, गुल्मस्यापि संभवः । निद्रोदावर्तमाह—जृम्भेत्यादि । अक्ष्णोः शिरसि च जाड्यं गौरवम् । अन्ये 'जृम्भाऽङ्गमर्दोऽक्षिशिरोभिजाड्यम्' इति पठन्ति । तत्र शिरस्यतिगौरवम्' (आ० द०) ॥२-१२॥

---

१ एतच्च—'शोथपाण्ड्वामयज्वरः' इति पाठाभिप्रायेण ।

आनन्दजं वाऽप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि ।
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥ ६ ॥
(सु. उ. अ. ५५)

मन्यास्तम्भः शिरःशूलमर्दितार्धावभेदकौ ।
इन्द्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥ ७ ॥
(च. सू. अ. ७)

कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवाऽप्रवृत्तिः ।
उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः ॥ ८ ॥
(सु. उ. अ. ५५)

कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः ।
कुष्ठवीसर्पहृल्लासाश्छर्दिनिग्रहजा गदाः ॥ ९ ॥
(च. सू. अ. ७)

मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकारा विहते च शुक्रे ॥ १० ॥
तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधाभिघातात्कृशता च दृष्टेः ।
कण्ठास्यशोषः श्रवणावरोधस्तृष्णाविघाताद्धृदये व्यथा च ॥ ११ ॥
श्रान्तस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवाऽपि गुल्मः ।
जृम्भाऽङ्गमर्दोऽक्षिशिरोतिजाड्यं निद्राभिघातादथवाऽपि तन्द्रा ॥१२॥
(सु. उ. अ. ५५)

उक्तवाताद्युदावर्तानां क्रमेण लक्षणमाह—वातेत्यादि । अन्ये इति तोदशूलादयः । मेहनं शेफः । विनाम आनाहपीडया (बन्धनवत्पीडया) नतगात्रत्वम् । वङ्क्षणयोरानाहो बन्धनवत्पीडा । नेत्रोदकमश्रु, प्राप्तमागतममुञ्चतो 'नरस्य' इति शेषः । चकारात्तन्त्रान्तरोक्तप्रतिश्यायहृद्रोगारुचिप्रभृतीनां ग्रहणम् । अर्धावभेदोऽर्धशिरःशूलम् । कूजोऽव्यक्तभाषणमिति कार्तिकः । वायोरप्रवृत्तिरुच्छ्वासनिरोधः । घोरा विकाराः पवनजा हिक्कादयः । मूत्राशये बस्तौ, 'मूत्रायन' इति पाठे स एवार्थः । वैशब्दः पादपूरणे । तत्स्रवणं शुक्रस्य स्यन्दनम् । अतिजाड्यं गौरवम् । "शिरोगात्राक्षिगौरवं—" इति तन्त्रान्तरे पाठः ॥ २–१२ ॥

*वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्तं करोति हि ॥ १३ ॥

---

*'कोष्ठानुगः कोष्ठशब्देन समस्तमुदरमध्यमुच्यते, रूक्षादिभिश्चणकराजमाषादिभिः, तथा कषायादिभी रसैः कुपितः । तस्य संप्राप्तिमाह—वातेत्यादि । ततः स्वैः कारणैः कुपितो वायुर्वातमूत्रादीनां स्रोतांस्युदावर्तयत्यूर्ध्वमावृणोति पुरीषं चातिवर्तयेत् । हृद्बस्तिशूलैस्तथा हृल्लासादिभिः पीडितः कृच्छ्रेण कष्टेन वातमूत्रपुरीषाणि लभते, वैद्यप्रयत्नात्प्राप्नोतीत्यर्थः । श्वासादीनन्यांश्च वातप्रकोपजान् गदान् लभते । मनोविभ्रमः स्थाणौ पुरुषज्ञानमित्यादि, श्रवणविभ्रमो विपरीतश्रवणम्' (आ० द०) ॥ १३–१६ ॥

वातमूत्रपुरीषासृक्कफमेदोवहानि वै ।
स्रोतांस्युदावर्तयति पुरीषं चातिवर्तयेत् ॥ १४ ॥
ततो हृद्बस्तिशूलार्तो हृल्लासारतिपीडितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण लभते नरः ॥ १५ ॥
श्वासकासप्रतिश्यायदाहमोहतृषाज्वरान् ।
वमिहिक्काशिरोरोगमनःश्रवणविभ्रमान् ।
बहूनन्यांश्च लभते विकारान् वातकोपजान् ॥ १६ ॥
(सु. उ. अ. ५५)

वेगनिरोधजानुदावर्तानभिधाय रूक्षादिकुपितवातजमाह—वायुरित्यादि । उदावर्तयत्यावृणोति । अतिवर्तयेच्छोषयेत् । कृच्छ्रेण लभत इति कष्टेन प्रवर्तयति । अत्र केचित् सुश्रुतोक्तमसाध्यलक्षणं पठन्ति,—"तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरुपद्रुतम् । शकृद्वमन्तं मतिमानुदावर्तिनमुत्सृजेत्" (सु. उ. तं. अ. ५५)—इति ॥ १३-१६ ॥

*आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।
प्रवर्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ॥ १७ ॥
तस्मिन् भवत्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं हृत्स्तम्भ उद्गारविघातनं च ॥ १८ ॥
स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा शकृतश्च छर्दिः ।
श्वासश्च पक्वाशयजे भवन्ति तथाऽलसोक्तानि च लक्षणानि ॥१९॥
(सु. उ. अ. ५६)

तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ।
शकृद्वमंतं मतिमान् उदावर्तिनमुत्सृजेत् ॥ २० ॥
(सु. उ. अ. ५५)

इति श्रीमाधवकरविरचिते माधवनिदाने उदावर्तानाहनिदानं समाप्तम् ।

इदानीं विगुणानिलजत्वेन समानचिकित्स्यत्वेनानाहमाह—आममित्यादि । नेति पूर्वेण संबध्यते । छर्दिरित्येक एव छकारश्छन्दोऽनुरोधात् । स्तम्भशब्दः कट्यादेः स्तब्धतावाची, मूत्रपुरीषयोश्चाप्रवृत्तिवाची । अलसोक्तानीति आध्मानवातनिरोधादीनि ॥ १७-२० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामुदावर्तानाहनिदानं समाप्तम् ॥

---

* 'प्रवर्तमानं नेति पूर्वेण संबध्यते, तेनाप्रवर्तमानमित्यर्थः । यथास्वं स्वं मार्गमित्यर्थः । एवमामं निचितं विगुणानिलेन विबद्धं सन्तं स्वमार्गे न प्रवर्तमानं शकृद्वैवंभूतमानाहविकारमुदाहरन्तीति पिण्डार्थः । आमजमानाहमाह—तस्मिन्नित्यादि । तस्मिन्नानाहे आमसमुद्भवे तृष्णा संचितामजाता, गुरुत्वमामाशय एव, उद्गारविघातनमुद्गाराप्रवृत्तिः, शेषं सुगमम् । शकृत्संचयजमाह—स्तम्भ इति । शूलोऽत्र कट्यादिष्वेव । पक्वाशयजे पक्वाशयोत्थ आनाह इति व्याख्यानयन्ति, ते च पक्वाशयोद्भव आनाहः पुरीषाद्भवतीतीच्छन्ति, तथाऽपि स पूर्वोक्त एव परिफलितोऽर्थः' (आ० द०) ॥ १७-२० ॥

अथ गुल्मनिदानम् ।

*दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः ।
कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ।
तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः ॥ १ ॥

गुल्मेऽप्यानाहो भवतीत्यानाहानन्तरं गुल्ममाह—दुष्टा इत्यादि । पञ्चधेति वातपित्तकफसंनिपातरक्तजाः । द्वन्द्वजास्तु प्रकृतिसमसमवेतत्वान्न पृथग्गण्यन्ते, अर्शोरोगवत् । कोष्ठान्तरामाशयादिमध्ये, ग्रन्थिरूपिणं गुडकाकारम् । तस्येत्यादि । एतदेव विवृणोति—पार्श्वेत्यादि । पार्श्वे द्वे गणनीये, अन्यथा पञ्चत्वानुपपत्तिः, अत एव 'पार्श्वे' इति द्विवचनान्तमेव क्वचित् पठ्यते ॥ १ ॥

†हृन्नाभ्योरन्तरे ग्रन्थिः संचारी यदि वाऽचलः ।
वृत्तश्चयापचयवान् स गुल्म इति कीर्तितः ॥ २ ॥
(सु. उ. अ. ४२)

सामान्यगुल्मरूपमाह—हृदित्यादि । नाभिशब्देन वस्तिर्बोध्यः, सामीप्यात्; यथा गङ्गायां घोष इत्याहुः; वस्तेरपि गुल्माश्रयत्वेनोक्तत्वात् । अत एव 'हृद्वस्त्योरन्तरे' इति पाठान्तरम् । अन्ये त्वाहुः—वस्तौ विद्रधिरेव स्यान्नतु गुल्म इति । तन्न, वस्तेरपि गुल्मस्थानत्वात्; तथा च **चरके**—'पञ्चस्थानानि गुल्मस्य पार्श्वहृन्नाभिवस्तयः' इति । एतत् पञ्चस्थानकथनं दोषजाभिप्रायेण, रक्तजस्य तु गर्भाशयः स्थानं, अथवा पार्श्वस्थितत्वाद्गर्भाशयस्य पार्श्वग्रहणेनैव ग्रहणम् । वृत्तो वर्तुलः । चयापचयवानिति कदाचिदुपचीयते, कदाचिदपचीयते; एतच्च सामान्योक्तमपि वातिके व्यवतिष्ठते, तल्लक्षणे तदभिधानादिति **जेज्जटः**; **गयदासस्तु** (इति क) सामान्यलक्षणमाह, सर्वगुल्मानां वातमूलत्वात् । 'चयोपचयवान्' इति पाठान्तरे दोषस्य चयेनोपचयवानिति वृद्धिमानित्यर्थः । गुल्म इति लतादिपिहितसंस्थानविशेषादौ गुल्मव्यपदेशो लोके, तत्सादृश्यात् संचितपरिपिण्डितदोषेऽपि गुल्मसंज्ञेत्याहुः, **वाप्यचन्द्रस्त्वाह**—संपिण्डितदोषो गुडकेन मीयत इति निरुक्तिः ॥ २ ॥

‡स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ।
पुरुषाणां, तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ ३ ॥
(सु. उ. अ. ४२)

---

* 'गुल्मस्य संप्राप्तिमाह—दुष्टा इत्यादि । दुष्टाः स्वकारणैर्मिथ्याहाराध्यशनादिभिः, मिथ्याविहारो बलवद्विग्रहादिः । तेषां स्थानान्याह—तस्येत्यादि' (आ० द०) ॥ १ ॥

† 'हृद् हृदयं वस्तिर्मूत्राशयः । संचारी चलनशीलः, अथवाऽचलः स्थिरः' (आ०द०) ॥२॥

‡ 'तस्य संख्यामाह—स इत्यादि । स गुल्मो व्यस्तैर्वातपित्तश्लेष्मभिः, उच्छ्रितैः प्रकुपितैस्त्रिभिरपि जायते पुरुषाणाम्' (आ० द०) ॥ ३ ॥

पूर्वोक्तं पञ्चविधत्वं विवृणोति—स इत्यादि । व्यस्तैरित्यनेनैकजो द्वन्द्वजोऽपि ग्राह्यः । पञ्चधा गुल्म इत्यनेन विरोध इति चेत् । न, नहि तत्रावधारणं कृतं, पञ्चधैवेति । अत एव सूत्रस्थाने चरकेण "पञ्च गुल्मा" (च. सू. स्था. अ.) इत्यभिधायापि "संसृष्टलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम्" (च. चि. स्था. अ. ५)—इत्युक्तं, समानचिकित्स्यत्वेन तत्रान्तर्भावात् । रक्तेन चापर इति स्त्रीणामेव । वक्ष्यति हि,—"स रौधिरः स्त्रीभव एव गुल्मः" (च. चि. स्था. अ. ५)—इति । रक्तं चात्रार्तवं न धातुरूपं, धातुरूपरक्तजस्तु गुल्मो यद्यप्यन्योऽस्ति तथाऽपि नैतत्सं-प्राप्तिको भवतीति पृथगुपदिश्यते । पृथग्ज्ञानानभिधानं तु पित्तगुल्मसमाननिदानचिकित्स्यत्वेन तत्रान्तर्भावात्, सुश्रुते रक्तातीसारवत् । विशेषलक्षणं च यदाह चरकः,— "तृष्णाज्वरपरीदाहशूलस्वेदाग्निमार्दवैः । गुल्मिनामरुचौ चापि रक्तमेवावसेचयेत्—" (च. चि. स्था. अ. ५) इति । धातुरूपरक्तजः स्त्रीणां पुंसां च भवतीति भट्टारहरिचन्द्रः । तथाच क्षारपाणिः,—"स्त्रीणामार्तवजो गुल्मो न पुंसामुपजायते । अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसां च जायते"—इति । वाप्यचन्द्रस्त्वाह,— वातादिदोषजस्यैवापचाराद्रक्ते दुष्टे रक्तजव्यपदेशः, यथा चरके कफपित्तमेहानामतिकर्षणादुत्तरकालं वातसंसर्गे सति वातमेहत्वमुक्तम् । यदुक्तं,—"या वातमेहान् प्रति पूर्वमुक्ता वातोल्वणानां विहिता क्रिया सा । वायुर्हि मेहेष्वतिकर्षितेषु कुप्यत्यसाध्यान् प्रति नास्ति चिन्ता—(च. चि. स्था. अ. ६)" इति । क्षारपाणेरप्येवमेवाभिप्रायः । यदि तु पृथक् स्यात्तदा तमपि नवमं लिङ्गस्थानादिभिरभिधास्यत्, न चोक्तः । जेज्जटगयदासाभ्यां तु हरिचन्द्रमतमेवानुमतमिति । सर्वगुल्मेषु वातकारणत्वं ज्ञेयम् । यदुक्तं चरके,—"गुल्मिनामनिलशान्तिरुपायैः सर्वशो विधिवदाचरितव्या । मारुते ह्यवजितेऽन्यमुदीर्णं दोषमल्पमपि कर्म निहन्यात्—" (च. चि. स्था. अ. ५) इति; सुश्रुतेऽप्युक्तं,—"कुपितानिलमूलत्वात्संचितत्वान्मलस्य च । तुल्यत्वाद्वा विशालत्वाद्गुल्म इत्यभिधीयते"—(सु. उ. तं. अ. ४२) इति । न चैतावता नानात्मजत्वप्रसङ्गः, वातस्यानुबन्धरूपत्वात्, ज्वरे पित्तवत् । ननु वाताव्यभिचाराद्द्विदोषजस्त्रिदोषजो वा गुल्मः स्यान्न केवलं कफजः पित्तजो वेति, ततश्च पञ्चधेति विरोधः । नैतत्, अनुबन्धरूपेण वातजव्यपदेशो, नत्वनुबन्ध्यरूपेणेति ॥३॥

*उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोप आध्मानमपक्तिशक्तिरासन्नगुल्मस्य वदन्ति चिह्नम् ॥४॥
(मा. नि. अ. ११)

पूर्वरूपमाह—उद्गारेत्यादि । पुरीषबन्धो विड्बन्धः । तृप्तिरनन्नाभिलाषः । सुश्रुतेऽपि हि "द्वेषोऽन्ने"—(सु. उ. तं. अ. ४२) इति पठितम् । अक्षमत्वमसामर्थ्यम् ।

* 'उद्गारबहुलता, तृप्त्यक्षमत्वं सौहित्यासहिष्णुतेति केचित् । अन्त्रविकूजनमन्त्राणामव्यक्तशब्दानुकरणम् । आध्मानमुपान्तयोराध्मानमिव, अपक्तिशक्तिर्मन्दाग्नित्वादाहारस्यापाकः' (आ० द०) ॥ ४ ॥

१ 'तच्च नोक्तम्' इति पा० ।

आटोपोऽत्र रुजापूर्वकः क्षोभः, तनतनं वा; नतु गुडगुडाशब्दः, तस्यान्त्रकूजनेनैव गृहीतत्वात्; नाप्याध्मानं, तस्योपात्तत्वात्। अपक्तिशक्तिर्मन्दाग्निता; 'अपकृशक्तिः' इति पाठे स एवार्थः ॥ ४ ॥

*अरुचिः कृच्छ्रविण्मूत्रवातताऽन्त्रविकूजनम्।
आनाहश्चोर्ध्ववातत्वं सर्वगुल्मेषु लक्षयेत् ॥ ५ ॥

गुल्मसाधारणरूपमाह—अरुचिरित्यादि ॥ ५ ॥

†रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च।
शोकोऽभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः ॥६॥
यः स्थानसंस्थानरुजां विकल्पं विड्वातसङ्गं मलवक्त्रशोषम्।
श्यावारुणत्वं शिशिरज्वरं च हृत्कुक्षिपार्श्वांसशिरोरुजं च ॥७॥
करोति जीर्णे त्वधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च।
वातात्स गुल्मो नच तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥ ८॥
(च. चि. अ. ५)

वातिकमाह—रूक्षेत्यादि। विषमातिमात्रमित्यन्नपानविशेषणम्। विचेष्टनं विरुद्धचेष्टाः बलवद्विग्रहादि। अतिमलक्षयो विरेकादिना। निरन्नता निराहारता। विकल्पशब्दः स्थानादिभिः प्रत्येकं योज्यः। स्थानविकल्पो यथा–कदाचिन्नाभौ, कदाचित्पार्श्वयोः, कदाचिद्बस्तावित्यादिस्थानान्तरगमनम्। संस्थानविकल्पो यथा–कदाचिदल्पः, कदाचिन्महान्, वृत्तो, दीर्घो वेति। रुजाविकल्पो यथा–कदाचिदल्पा, कदाचिन्महती, तोदरूपा, भेदरूपा, अनेकरूपा वेति। नच तत्रोपशेते न सुखयति ॥६—८॥

‡कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा।
आमाभिघातो रुधिरं च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥९॥
ज्वरः पिपासा वदनाङ्गरागः शूलं महज्जीर्यति भोजने च।
स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम् ॥१०॥
(च. चि. अ. ५)

---

*'कृच्छ्रविण्मूत्रवातता कष्टेन विण्मूत्रवातप्रवर्तनम्। अन्त्रविकूजनं गुडगुडाशब्दः, आनाह ऊर्ध्वाधोवातनिरोधः, ऊर्ध्ववातत्वमुद्गारबाहुल्यम्' (आ० द०) ॥ ५ ॥

† 'वातगुल्मस्य हेतुपूर्वकं लक्षणमाह—रूक्षेत्यादि। विषमं बहु स्तोकमकालभोजनं, एवं जलपानमपि, अतिमात्रं मात्राधिकं, एवं जलस्यापि। य इत्यादि। विड्वातसङ्गं विड्वाताप्रवृत्तिः, कण्ठवक्त्रयोः शोषः, श्यावारुणत्वं शरीरस्य, शीतज्वरः, हृत्कुक्ष्यादीनां पीडा, अंसो भुजयोरुपरिभागः। जीर्णे आहारे प्रकुप्यति, भुक्ते च शान्तिं गच्छति, स वातिको गुल्मः। रूक्ष आहारः कषायतिक्तकटुका रसाः, तत्र तस्मिन्वातगुल्मे नोपशेते न सुखयन्ति, वातकारणत्वात्' (आ० द०) ॥ ६–८ ॥

‡ 'विदाहि वंशकरीरादि, अतिशब्दो मद्यादिषु योज्यः। एते पैत्तिकगुल्मस्य हेतवः। तस्य लक्षणमाह–ज्वर इत्यादि। ज्वरः प्रसिद्धः, पिपासा पातुमिच्छा, वदनाङ्गरागो मुखे शरीरे चारुणता, आहारे जीर्यति पच्यमाने महच्छूलं भवति, एतत्पित्तगुल्मरूपम्' (आ० द०) ॥ ९ ॥ १० ॥

पैत्तिकमाह—कट्वित्यादि । आमाभिघात इति विदग्धाजीर्णजनितदुष्टरसेनाभिभवः; अन्ये तु 'आमाभिघातो' इति पठन्ति, तन्नाम उत्कल्पः, अभिघातो लगुडादे रक्तदूषको ज्ञेयः । जीर्यतीति सप्तम्यन्तम् । व्रणवत् स्पर्शासह इति योज्यम् ॥ ९ ॥ १० ॥

*शीतं गुरु स्निग्धमचेष्टनं च संपूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसंभवस्य सर्वस्तु दुष्टो निचयात्मकस्य ॥ ११ ॥
स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि ।
शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य ॥ १२ ॥
(च. चि. अ. ५)

श्लैष्मिकमाह—शीतमित्यादि । संपूरणं तृप्तिभोजनम् । सर्वं इति वातजाद्युक्तः । निचयात्मकस्य सन्निपातजस्य । कठिनोन्नतत्वं गुल्मस्य ॥ ११ ॥ १२ ॥

†निमित्तरूपाण्युपलभ्य गुल्मे द्विदोषजे दोषबलाबलं च ।
व्यामिश्रलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ॥ १३ ॥
(च. चि. अ. ५)

व्यात्मकेषु त्रिष्वेकजहेतुलक्षणातिदेशार्थमाह—निमित्तेत्यादि । निमित्तानि च रूपाणि चेति द्वन्द्वः । दोषबलाबलं चेत्यनेन समद्विदोषद्वन्द्वजत्रयेणैकोल्बणादिद्विदोषजोऽपि ग्राह्य इति दर्शयति, अन्यथा बहुत्वापत्तेः । औषधकल्पनार्थमित्येकदोषजाभिहितचिकित्सामेलकेन तांश्चिकित्सेदित्यर्थः ॥ १३ ॥

‡महारुजं दाहपरीतमश्मवद्घनोन्नतं शीघ्रविदाहि दारुणम् ।
मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥ १४ ॥
(च. चि. अ. ५)

साम्निपातिकमाह—महारुजमित्यादि । अश्मवद्घनोन्नतं पाषाणवत् कठिनमुन्नतं च । मन इत्यादि मनोऽपहारिणं मनोवैकल्यकारिणं, शरीरापहारिणं कृशत्ववैवर्ण्यकरं, अग्न्यपहारिणमग्निवैषम्यकरं, बलापहारिणमसामर्थ्यकरम् । ननु, असाध्यमिति विरुद्धं, "सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः"–(सु. उ. तं. अ. ४२) इति सुश्रुत-

---

* 'शीतादिभिर्द्रव्यैः, अचेष्टनमव्यायामः । संपूरणमित्याहारादिना कोष्ठस्य तृप्तिरिव, एतत् सर्वं कफगुल्मस्य हेतुः । एतस्यैव श्लोकपादेन साम्निपातिकस्य हेतुमाह—सर्वं इति । निचयात्मकस्य सान्निपातिकस्य गुल्मस्य वातजाद्युक्तहेतुः कारणं, तथा सर्वदोषोक्तलक्षणानि च भवन्ति । पुनः श्लैष्मिकस्यैव लक्षणमाह—स्तैमित्यं निश्चलत्वं, शीतज्वरादयः सुबोध्याः; शैत्यं शीतगात्रता' (आ० द०) ॥ ११ ॥ १२ ॥

† 'लिङ्गानि लक्षणानि, द्विदोषजे गुल्मे दोषाणां बलाबलं ज्ञात्वा व्यामिश्रलिङ्गान् मिलितलिङ्गान् परांस्त्रीन् गुल्मानौषधकल्पनार्थमादिशेत्' (आ० द०) ॥ १३ ॥

‡ 'त्रिदोषजस्यासाध्यत्वमाह–महारुजमित्यादि । महारुजं तीव्रपीडाकरं, दाहपरीतदेहं संतापेन व्याप्ताखिलदेहं, शीघ्रेण विदाहकरं, दारुणं मारणात्मकं, एतल्लक्षणं विकृतिविषमसमवेतस्य' (आ० द०) ॥ १४ ॥

---

१ एतच्च 'निमित्तलिङ्गानि' इति पाठाभिप्रायेण ।

वचनात्। नैवं, अयं च विकृतिविषमसमवेतोऽसाध्यः, प्रकृतिसमसमवेतस्तु साध्य इत्याहुः। ननु, सोऽप्यसाध्यः, यदाह सुश्रुतः,–"सर्वात्मके सर्वरुजोपपत्तिं चाप्यसाध्यं प्रवदन्ति तज्ज्ञाः" (सु. उ. तं. अ. ४२)–इति। उच्यते, तं चापीत्यपिशब्दादविरोधिस्थितः साध्यो विश्वामित्रसंवादादिति गयदासः॥ १४॥

*नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा।
वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम्।
पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणं चाप्यपरं निबोध॥ १५॥
(सु. उ. अ. ४२)

यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्सशूलः समगर्भलिङ्गः।
स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः १६
(च. चि. अ. ५)

रक्तगुल्ममाह—नवेत्यादि। आमगर्भं विसृजेदिति नवममासादर्वाक् प्रसूतेः ऋतौ आर्तवप्रवृत्तिकाले, अहितभोजनेति संबन्धः। एतच्चोपलक्षणार्थं, तेनाहाराचारादिकं ज्ञेयम्। यदाह चरकः–"ऋतावनाहारतया भयेन विरूक्षणैर्वेगविधारणैश्च। संस्तम्भनोल्लेखनयोनिदोषैर्गुल्मः स्त्रियं रक्तभवोऽभ्युपैति" (च. चि. स्था. अ. ५)–इति। पैत्तस्य पैत्तिकगुल्मस्य। विशेषणं पैत्तिकगुल्माद्विशेषलक्षणम्। पिण्डितः समुदितः। एवकारोऽत्रावधारणे। एतदेव स्फुटयति—नाङ्गैर्नावयवैश्चिरात् स्पन्दत इति संबन्धः। समगर्भलिङ्ग इति आर्तवादर्शनमुखस्रवणस्तनमुखकृष्णत्वदोहदादिगर्भलक्षणयुक्तः, एतच्च व्याधिप्रभावात्; यथा–क्षयार्शसोः स्त्रीरिरंसाकृष्णत्वङ्खादयः। अन्ये तु समगर्भलिङ्गोऽविकृतगर्भलिङ्ग इत्याहुः। उक्तविशेषणैरेव स्त्रीभवत्वे लब्धे स्त्रीग्रहणेन कुमारीमतिवृद्धां च निषेधयति, अनुद्भूतक्षीणरजस्कत्वात्तयोः। व्यतीतेऽतिक्रान्ते। गर्भसमानलिङ्गत्वेन संशयः–गर्भो वा, रक्तगुल्मो वा, इति; तच्छङ्कानिरासार्थं दशमे मासे व्यतीते इत्युक्तं; नवमदशमयोः प्रसवकालत्वादित्येके। तन्न, 'यः स्पन्दते पिण्डित एव नाङ्गैः' इत्यादिनैव विशेषदर्शनेन संशयस्य निवर्तितत्वात्। गर्भो हि निरन्तरं प्रत्यङ्गैर्निःशूलं स्पन्दते, गुल्मस्त्वेतद्विपरीतेन। किंच नवमे दशमे प्रसूत इत्युत्सर्गः, न तु नियमः, तदधिककालेऽपि प्रसवदर्शनात्, आगमाच्च। उक्तं हि चरके,–"तं स्त्री प्रसूते सुचिरेण गर्भं पुष्टो यदा वर्षगणैरपि स्यात्" (च. शा. स्था. अ. २)–इति; तस्मात्रेदं दशममासव्यतिक्रमे चिकित्साविधानस्य प्रयोजनं, किंतु व्याधिनहित्रा तावतैव कालेन तस्य चिकित्सया सुखोच्छेदनमिति। यथा ज्वरे पुराण एव क्षीरपानविरेचने। उक्तं हि तन्त्रान्तरे–"रक्तगुल्मे पुराणत्वं सुखसाध्यस्य

---

*'स्त्रीणां रक्तजगुल्मस्य संप्राप्तिमाह–नवेत्यादि। या स्त्री नवप्रसूता सत्यहितभोजना भवति, ऋतावार्तवप्रवृत्तिकालेऽहितभोजनेति संबन्धः। तस्य लक्षणमाह–पैत्तस्येत्यादि। पैत्तिकगुल्मस्यासैवापरं विशेषणं, तदेव स्फुटयति–चिरात् पिण्डीभूत इव स्पन्दते हस्तपादादिभिरित्यर्थः। सशूलः पीडायुक्तः स स्त्रीभव एव रक्तजो गुल्मो दशमे मासे व्यतीते सति चिकित्स्यः स्यात्। रौधिर इत्यनेन विशेषणेनार्तवायुक्तां कुमारीमतिवृद्धां च निषेधयति, अनुद्भूतक्षीणरक्तत्वात्तयोः' (आ० द०)॥ १५॥ १६॥

लक्षणम्"—इति। पुराणता चास्य दशममासव्यतिक्रमेणैव भवति। जेज्झटेनाप्युक्तं,—यद्यर्वाग्रक्तभेदनं क्रियते तदा गर्भशय्यां क्षिणोति, तल्लीनत्वाद्रक्तस्य; एकादशमासे तु परिपिण्डितगुल्मे स्नेहादिनोपस्कृतदेहाया न गर्भशय्याया विकृतिमादधाति रक्तभेदनमिति ॥ १५ ॥ १६ ॥

*संचितः क्रमशो गुल्मो महावास्तुपरिग्रहः।
कृतमूलः सिरानद्धो यदा कूर्म इवोत्थितः ॥ १७ ॥
दौर्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते स न सिध्यति ॥ १८ ॥
गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम्।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥ १९ ॥
(च. चि. अ. ५)
श्वासः शूलं पिपासाऽन्नविद्वेषो ग्रन्थिमूढता।
जायते दुर्बलत्वं च गुल्मिनो मरणाय वै ॥ २० ॥
(सु. सू. अ. ३३)

इति श्रीमाधवकरविरचिते माधवनिदाने गुल्मनिदानं समाप्तम् ॥ २८ ॥

चिरजस्यावस्थायामसाध्यत्वमाह—संचित इत्यादि। महावास्तुपरिग्रहः सकलोदरव्यापी। कृतमूलो धात्वन्तरावगाही। सिरानद्धः सिराजालवान्। गृहीत्वेत्यादि। हृदयादौ गृहीत्वा शोथो गुल्मिनं कर्षति, 'मरणाय' इति शेषः श्वासेत्यादि ग्रन्थिमूढता ग्रन्थिरूपस्य गुल्मस्याकस्माद्विलयनमिति। ननु च, अन्तर्विद्रधिगुल्मयोः को भेदः, समानस्थानसंभवत्वात्। उच्यते, विद्रधिः पच्यते गुल्मो न पच्यते, निराश्रयत्वात्। यदाह सुश्रुतः,—"न निबन्धोऽस्ति गुल्मस्य विद्रधिः सनिबन्धनः। गुल्मस्तिष्ठति दोषे स्वे विद्रधिर्मांसशोणिते ॥ विद्रधिः पच्यते तस्माद्गुल्मः क्वापि न पच्यते" (सु. नि. स्था. अ. ९)—इति। ननु, गुल्मोऽपि पच्यत एव। यदाह चरकः,—"विदाहशूलसंक्षोभस्वप्ननाशारतिज्वरैः। विदह्यमानं जानीयाद्गुल्मं तमुपनाहयेत्" (च. चि. स्था. अ. ५).इति। उच्यते—गुल्मो न पच्यते निराश्रयत्वात्; यदा तु कारणवशादाश्रयं मांसादिकमासादयति, वातोपशमनार्थं कृतस्वेदादिभिर्वा रक्तदुष्टिर्भवति तदा पच्यमानो विदाहनिमित्तकं विद्रधित्वमाप्नोति। उक्तं हि,—"स वै शीघ्रविदाहित्वाद्विद्रधी-

---

* 'संचित इत्यनुपक्रान्तत्वाच्चिरकालानुबन्धित्वात्, क्रमशः क्रमेण, संचितो वृद्धिं गतो, गुल्मो यदा कूर्मवदुन्नतः स्यात्, दौर्बल्यादिभिरुपद्रवैर्युक्तो भवति, तदा न सिध्यतीत्यर्थः। पुनरसाध्यलक्षणमाह—गृहीत्वेत्यादि। गुल्मिनं गुल्मयुक्तं रोगिणं, कर्षति मारयतीत्यर्थः। सज्वरश्वासं[1] ज्वरश्वासाभ्यामुपद्रुतम्। पुनश्चासाध्यलक्षणमाह—श्वासेत्यादि। श्वासादय उपद्रवा गुल्मिनो मरणाय भवन्ति' (आ० द०) ॥ १७–२० ॥

---

१ एतच्च—'सज्वरश्वासं' इति पाठाभिप्रायेण।

त्यभिधीयते" (च. सू. स्था. अ.)–इति । न । हि यस्मात् विकाराद्यदुत्पद्यते विकारान्तरं तत् स एव भवतीति; माभूत् ब्रीहैवोदरं, अश्मर्यैव शर्करा, इत्यादि शास्त्रोक्तविरोधविस्तरः । तस्माद्विद्रधिः पच्यते, गुल्मो न पच्यत इति सिद्धान्तो निरपवादः । ये त्वन्तर्विद्रधिं न पठन्ति तेषामयमभिप्रायः,—गुल्मे पक्के विद्रधौ च पाटनशोधनरोपणादेः, अपक्के च विरेकलेपविम्लापनादेश्चिकित्सितस्य प्रायो विशेषाभावादलं पृथग्विकारस्वीकारेणेति ॥ १७–२० ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां गुल्मनिदानं समाप्तम् ॥ २८ ॥

अथ हृद्रोगनिदानम् ।

*अत्युष्णगुर्वन्नकषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः ।
संचिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः ॥ १ ॥

गुल्मस्य हृदयं स्थानमुक्तं, अतो हृदयसंकीर्तनाद्धृद्रोगारम्भः । प्रसङ्गः सातत्येन सेवा, अत्युष्णादयो यथायोग्यं वातादीनां क्रिमेश्च निदानमिति बोध्यम् ॥ १ ॥

†दूषयित्वा रसं दोषा विगुणा हृदयं गताः ।
हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते ॥ २ ॥
(सु. उ. अ. ४३)

तस्य संप्राप्तिं सामान्यलक्षणं चाह—दूषयित्वेत्यादि । दूषयित्वा रसमिति रसस्य हृदयाश्रयत्वात् । विगुणाः कुपिताः । हृद्रोगमिति वाच्ये यद्बाधाग्रहणं, तद्द्विपभेदेन बाधावैचित्र्यज्ञापनार्थं; बाधाशब्देन चात्र नानाविधा पीडेति **जेज्जटः**, भङ्गवत् पीडेति **गयदासः** । हृद्रोगमिति 'वा शोकष्यञ्रोगेषु–' इति रोगे परे हृदयस्य हृद्भावः, अथवा हृदो रोगो हृद्रोगः ॥ २ ॥

आयम्यते मारुतजे हृद्रोगं तुद्यते तथा ।
निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेऽपि च ॥ ३ ॥
(सु. उ. अ. ४३)

वातिकहृद्रोगलक्षणमाह—आयम्यत इत्यादि । आयम्यते आकृष्यत इव । तुद्यते सूच्येव । निर्मथ्यते दण्डेनेव । दीर्यते द्विधेव क्रियते । स्फोट्यते आरयेव । पाट्यते कुठारेणेव ॥ ३ ॥

---

* 'गुल्मस्य हृदयं स्थानमुक्तमतो गुल्मानन्तरं हृद्रोगारम्भः । तस्य हेतुमाह–अतीत्यादि । उष्णादिभिरतिशब्दः प्रत्येकं संबध्यते । उष्णादयोऽतिसेविता वातजादीनां हृदामयानां क्रिमिजस्य च हेतवो भवन्ति, श्रमो धनुःकर्षणादिः, अभिघातो हृदयेन, संचिन्तनं नृपतिभयादिकं; स च पञ्चप्रकारः–वातादिभिस्त्रयः; सन्निपातेन, क्रिमिभिश्च' (आ० द०) ॥१॥

† 'विगुणाः कुपिता दोषा रसं दूषयित्वा हृदयं गताः, हृदि रोगो हृद्रोग इति निरुक्तिः' (आ० द०) ॥ २ ॥

*तृष्णोष्मादाहचोषाः स्युः पैत्तिके हृदयक्लमः ।
धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥ ४ ॥
(सु. उ. अ. ४३)

पैत्तिकमाह—तृष्णेत्यादि । ऊष्मा किंचिद्दाहः । हृदयक्लमो हृदयाकुलत्वं, ग्लानिरिति यावत् ॥ ४ ॥

†गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्दवम् ।
माधुर्यमपि चास्यस्य बलासावतते हृदि ॥ ५ ॥
(सु. उ. अ. ४३)

श्लैष्मिकमाह—गौरवमित्यादि । बलासावतते कुपितकफव्याप्ते, "दोषा दुष्टा दूषयितारो भवन्ति"—इत्यागमात् ॥ ५ ॥

‡विद्यात्त्रिदोषं त्वपि सर्वलिङ्गं तीव्रार्तितोदं क्रिमिजं सकण्डूम् ।
(च. चि. अ. २६)

उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः ।
अरुचिः श्यावनेत्रत्वं शोथश्च क्रिमिजे भवेत् ॥ ६ ॥
(सु. उ. अ. ४३)

सान्निपातिकमाह—विद्यादित्यादि । सर्वलिङ्गमित्यनेन प्रकृतिसमसमवायारब्धत्व-मुक्तं, तेन चिकित्साऽप्यस्य प्रत्येकं वातादिजस्य या सा मिलितैव कार्या । अपचारा-दिह ग्रन्थिरुत्पद्यते ततः क्रिमिसंभवः । उक्तं हि **चरकेण**,—"त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते । तिलक्षीरगुडादीनि ग्रन्थिस्तस्योपजायते ॥ मर्मैकदेशे संक्लेदं रसश्चा-स्योपगच्छति । संक्लेदात् क्रिमयश्चास्य भवन्त्युपहतात्मनः" (च. सू. स्था. अ. १७)—इति । तस्यैवेदं लक्षणमाह,—तीव्रार्तितोदं क्रिमिजं सकण्डूमिति । उत्क्लेद इत्यादिना तमोन्तं त्रिदोषजहृद्रोगलक्षणं; तत्र तोदशूले वातात्, उत्क्लेदहृल्लासौ कफात्, तमः पित्तात्, ष्ठीवनं कफपित्तात्; अरुचिरित्यादिना क्रिमिजस्येति **जेज्जटः** । **गयदास**-स्त्वाह—श्यावनेत्रत्वपर्यन्तेन त्रिदोषजलक्षणमिति । स्यादेतत्, त्रिदोषजपदं न ताव-दत्र **सुश्रुतेन** पठितं; अतः सर्वमेवोत्क्लेदादि शोथान्तं क्रिमिजलक्षणं भविष्यति ।

---

* 'ऊष्मा प्रादेशिको दाहः, हृदि किंचिद्दाह इत्यर्थः । दाहः सार्वाङ्गिकः; चोषश्चूष्यत इव, धूमायनं धूमोद्गिरणमिव, क्लेदः किंचिद्दुर्गन्धः सटित इव, मुखस्यैव शोषश्च' (आ० द०) ॥४॥

† 'गौरवं हृदयस्य; स्तम्भो जडता, मार्दवं जलप्लुतमिव, माधुर्यं मुखे' (आ० द०) ॥ ५ ॥

‡ 'त्रिदोषजक्रिमिजयोर्मिलितमेव लक्षणमाह—विद्यादित्यादि । विद्यात्त्रिदोषमित्यादि दृढ-बलोक्तलक्षणं, उत्क्लेद इत्यादिकमेकपद्यं सुश्रुतोक्तं; तीव्रार्तितोदमिति भिन्नतन्त्रीयत्वात्पौन-रुक्त्यं न वाच्यम् । त्रिदोषजे सर्वदोषाणां लिङ्गानि भवन्ति । क्रिमयो जायन्तेऽस्मिन्निति क्रिमिज इति निरुक्तिः । तोदो व्यथाविशेषः, उत्क्लेदोऽपक्वदोषाणां स्वांशोदयाच्च्युतिः, हृल्लासो हृदयादीषदम्बुनिर्गमः; तमोऽन्धकारप्रविष्टस्येव; एतत्त्रिदोषलक्षणम् । अरुचीत्यादिना क्रिमिजस्येति । एतत्सुगमम्' (आ० द०) ॥ ६ ॥

---

१ एतच्च—'क्लेदः शोषो मुखस्य च' इति पाठाभिप्रायेण । २ लक्षणमिति शेषः ।

नैवं, "विद्यात्रिदोषं त्वपि सर्वलिङ्गं तीव्रार्तितोदं क्रिमिजं सकण्डूम्" (च. चि. स्था. अ. २६)-इति दृढबलस्य वाक्यात्। उत्क्लेद इत्यादिस्त्वेक एव श्लोकः सुश्रुतेन पठितः, ननु पृथक् सन्निपातलक्षणं, ततस्त्रिदोषजस्यानभिधाने सुश्रुते न्यूनत्वं स्यात्। त्रिदोषाश्मरीवत्तस्यासंभव एवेति चेत्? नैवं, तन्त्रान्तरेषु पठितत्वात्। तथाच हारीतः,-"सर्वाणि रूपाणि च सन्निपाताच्चिरोत्थितं चापि वदन्त्यसाध्यम्"-इति। चरकेऽप्युक्तं,-"हेतुलक्षणसंसर्गादुच्यते सान्निपातिकः" (च. सू. स्था. अ. १७)—इति; तथा,-"त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते" (च. सू. स्था. अ. १७)-इत्यादि। कण्ठरवेण तु त्रिदोषजपदं यन्न पठितं सुश्रुतेन, तत् क्रिमिजस्यापि त्रिदोषजत्वख्यापनार्थमित्याचक्षते। ननु, दोषजावान्तरावस्थाविशेषत्वात् क्रिमिजोऽपि दोषज एव, तत् कथं हृदामयः पञ्चविध इति? नैवं, रोगजस्यापि रोगस्य पृथक्त्वदर्शनात्। यदुक्तं,-'निदानार्थकर'-इत्यादि। द्विदोषजस्त्वनुक्तोऽपि प्रकृतिसमवायत्वाद्बोध्यः ॥ ६ ॥

क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः।
क्रिमिजे क्रिमिजातीनां श्लैष्मिकाणां च ये मताः ॥ ७ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने हृद्रोगनिदानं समाप्तम् ॥ २९ ॥

सर्वेषामुपद्रवानाह—क्लम इत्यादि। श्लैष्मिकाणां कृमीणां ये उपद्रवास्ते क्रिमिजहृद्रोगेऽपि स्युः। ते च हृल्लासास्यस्रवणाविपाकादयः ॥ ७ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां हृद्रोगनिदानं समाप्तम् ॥ २९ ॥

अथ मूत्रकृच्छ्रनिदानम्।

***व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनित्यद्रुतपृष्ठयानात्[१]।**
आनूपमांसाध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणां तथाऽष्टौ ॥१॥
पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य वस्तौ।
मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह कृच्छ्रात् ॥ २ ॥
(च. चि. अ. २६)

---

* 'सप्तोत्तरे मर्मशते त्रीणि मर्माणि शिरोहृदयवस्तयः प्रधानानि, हृदयस्य प्रधानमर्मत्वात्प्राग् हृद्रोगानभिधाय वस्तेरपि मर्मत्वाद्धृद्रोगानन्तरं वस्तिव्याधित्वान्मूत्रकृच्छ्रारम्भः। तस्य हेतुमाह-व्यायामेत्यादि। तीक्ष्णौषधं राजिकादियुक्तं, मद्यप्रसङ्गोऽतिमद्यसेवा। नित्येत्यादि, पृष्ठयानात्, अश्वादिपृष्ठयानात् अन्ये-नित्यद्रुतपृष्ठयानादिति पठन्ति। नित्यं शीघ्रं तुरगादिगमनात्। आनूपाः सजलप्रदेशचारिणो मत्स्यादयः, अध्यशनं भुक्तस्योपरि भोजनम्। तस्य संप्राप्तिपूर्वकं लक्षणमाह-पृथगिति। पृथक् भिन्नाः, अथ सर्वैः स्वैर्हेतुभिः कुपितास्ततो वस्तौ मूत्राशये कोपं प्राप्य यदा मूत्रमार्गं भेद्रं परिपीडयन्ति, तदा नरः कष्टेन मूत्रयतीत्यर्थः' (आ० द०) ॥ १ ॥ २ ॥

---

१ एतच्च-'नृत्यद्रुतपृष्ठयानात्' इति पाठाभिप्रायेण।

सप्तोत्तरे मर्मशते त्रीणि मर्माणि शिरोहृदयवस्तयः प्रधानानि। तत्र हृदयगतविकारानभिधाय वस्तिगतविकारानाह—व्यायामेत्यादि। मूत्रकृच्छ्राणीति मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तिः। अष्टाविति दोषैः पृथक् त्रीणि, सन्निपातेनैकं, शल्यजपुरीषजशुक्रजाश्मरीजानीत्येकैकानि। ननु, शर्कराजं मूत्रकृच्छ्रं सुश्रुतेन पठितं; तथात्र संग्रहेऽपि पठितं, 'अश्मरी शर्करा चैव तुल्यसंभवलक्षणे'—इत्यादिना तत् कथमष्टौ? नव प्राप्नुवन्ति। उच्यते, शर्करा अश्मरीभेद एव। यदाह दृढबलः, "एषाऽश्मरी मारुतभिन्नमूर्तिः स्याच्छर्करा मूत्रपथात् क्षरन्ती" (च. चि. स्था. अ. २६) इति। अतोऽश्मरीजेनैव शर्कराजग्रहणमिति मन्यमानो दृढबलोऽष्टावित्यपठत्॥ १॥ २॥

*तीव्रार्तिरुग्वङ्क्षणवस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात्।
पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात्॥ ३॥
वस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे।
सर्वाणि रूपाणि तु सन्निपाताद्भवन्ति तत्कृच्छ्रतमं हि कृच्छ्रम्॥४॥
(च. चि. अ. २६)

मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम्॥ ५॥
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्दिशेत्।
शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः॥ ६॥
आध्मानं वातशूलं च मूत्रसङ्गं करोति च।
अश्मरीहेतु तत्पूर्वं मूत्रकृच्छ्रमुदाहरेत्॥ ७॥
(सु. उ. अ. ५९)

शुक्रे दोषैरुपहते मूत्रमार्गे विधाविते।
सशुक्रं मूत्रयेत्कृच्छ्राद्वस्तिमेहनशूलवान्॥ ८॥

---

* 'तीव्रा मारणात्मिका, वङ्क्षणे ऊरुवृषणमेढ्राणामन्तरालसंधौ, स्वल्पं स्तोकं, मुहुर्वारंवारं, वातात् कृच्छ्रम्। पैत्तिकमाह—पीतमित्यादि। इह पित्तात् कृच्छ्रे पीतादिलिङ्गं मूत्रं मुहुर्मूत्रयति, 'नर' इति शेषः। पीतं सरक्तं चेति वर्णद्वयं न्यूनाधिकपित्तप्रकोपात्। श्लैष्मिकमाह—वस्तेरित्यादि। वस्तेः सलिङ्गस्य मेहनयुक्तस्य वस्तेर्गुरुत्वशोथौ भवतः। त्रिदोषजमाह—सर्वाणीत्यादि। सर्वाणि सर्वदोषलिङ्गानि, तत् कृच्छ्रं त्रिदोषजं कृच्छ्रतमं कष्टसाध्यम्। शल्यजमाह—मूत्रेत्यादि। मूत्रवहस्रोतःसु शल्येन क्षतेषु सत्स्वथवाऽभिहतेषु पीडितेषु तदाघाताद्भृशं दारुणं, तीव्रं मारणात्मकम्। पुरीषजमाह—शकृत इत्यादि। पुरीषस्य प्रतीघातादवरोधाद्विगुणीभूतो दूषितो वायुराध्मानं वातशूलं मूत्रनाशं च कुर्यात्, ततो मूत्रकृच्छ्रं जायते। अश्मरीजमाह—अश्मरीहेतु मूत्रकृच्छ्रमिति तस्य कृच्छ्रस्याश्मर्येव कारणम्। शुक्रजमाह—शुक्र इत्यादि। स्रवणव्यथायुक्तः 'पुरुष' इति शेषः' (आ० द०)॥ ३–८॥

मूत्रकृच्छ्रस्य वातजादिभेदेन लक्षणान्याह—तीव्रेत्यादि। सलिङ्गस्य समेढ्रस्य। सपिच्छं पिच्छिलम्। कृच्छ्रतमं कष्टसाध्यम्। कृच्छ्रं मूत्रकृच्छ्रम्। मूत्रवाहिष्ववि मूत्रवहस्रोतःसु। अश्मरीहेतु तत्पूर्वमिति अश्मरीहेत्विति लक्ष्यपदं, तत्पूर्वमिति लक्षणपदं, तत्पूर्वमश्मरीपूर्वकम्॥ ३–८॥

*अश्मरी शर्करा चैव तुल्यसंभवलक्षणे।
विशेषणं शर्करायाः शृणु कीर्तयतो मम॥ ९॥
पच्यमानाऽश्मरी पित्ताच्छोष्यमाणा च वायुना।
विमुक्तकफसन्धाना क्षरन्ती शर्करा मता॥ १०॥
हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्बलः।
तया भवति मूर्च्छा च मूत्रकृच्छ्रं च दारुणम्॥ ११॥
(सु. उ. अ. ५९)
मूत्रवेगनिरस्ताभिः प्रशमं याति वेदना।
यावदस्याः पुनर्नैति गुडिका स्रोतसो मुखम्॥ १२॥

इति श्रीमाधवकरविरचिते माधवनिदाने मूत्रकृच्छ्रनिदानं समाप्तम्॥ ३०॥

मूत्रकृच्छ्रहेतुत्वेनोक्तयोरश्मरीशर्करयोः समानतामवान्तरभेदं चाह—अश्मरीत्यादि अश्मरी शर्करा चैवेत्यनन्तरं 'एते' इत्यध्याहार्य तुल्यसंभवलक्षणे इत्यनेन द्विवचनान्तेन संबन्धनीयं, यथा—"तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी"—इत्यादिवत्। तुल्यः संभव उत्पत्तिकारणं लक्षणं च ययोस्ते तथा, 'तुल्ये संभवलक्षणैः' इति पाठान्तरे स एवार्थः। विशेषणं विशेषः। तमेव विवृणोति—पच्यमानेत्यादि। कफसंधानं कफेनावयवसंश्लेषः, कफ एव वा संधानं कफसंधानं, संधीयतेऽनेनेति व्युत्पत्त्या। तेन पित्तपाकवातशोषौ संधानविमोक्षहेतुत्वेनोक्तौ। क्षरन्तीति बस्तितः। **चरके** हि,—"स्याच्छर्करा मूत्रपथात् क्षरन्ती" (च. चि. स्था. अ. २६)—इत्येवं पठितम्। कुक्षौ शूलमिति संबन्धः। तया शर्करयेति॥ ९–१२॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां मूत्रकृच्छ्रनिदानं समाप्तम्॥ ३०॥

---

* 'अश्मरी च शर्करा चैते उभे तुल्यसंभवलक्षणे तुल्यः संभव उत्पत्तिर्लक्षणं च ययोस्ते तथा, समाननिदानलिङ्ग इत्यर्थः। कीर्तयतः कथयतो मम शर्कराया विशेषणं शृणु। पित्तेन पच्यते, वायुना शोष्यते, एतेन पाचनादिशोषणाच्च पित्तवातौ संधानरूपस्य कफस्य शोषणत्वेन शर्कराया हेतुत्वेनोक्तौ; पित्तेन पाचिता, वायुना शोषिता, श्लेष्मणा संधिताऽश्मरी; ताभ्यां विमुक्तसंधाना शर्करारूपा क्षरन्ती सती शर्करा मता, क्षरन्तीति बस्तितः[1]। एतावता हेतुलक्षणत्वेनैक एव रोगः; संधानाभावभावात् क्रियाभेदः, अतो मूत्रकृच्छ्रे द्वे अपि कारणे। तस्योपद्रवानाह—हृदित्यादि' (आ० द०)॥ ९–१२॥

---

१ वस्ते इति क.।

अथ मूत्राघातनिदानम् ।

जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश ।
प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः ॥ १ ॥

मूत्रविकारसाधर्म्यान्मूत्राघातानाह—जायन्त इत्यादि । मूत्रकृच्छ्रमूत्राघातयोश्चायं विशेषः,-मूत्रकृच्छ्रे कृच्छ्रत्वमतिशयितं, ईषद्विबन्धः, मूत्राघाते तु विबन्धो बलवान्, कृच्छ्रत्वमल्पमिति । मूत्रविघाताद्यैर्मूत्रवेगविधारणादिभिः, आद्यशब्देन पुरीषशुक्रवेगविघातादीनां रूक्षाशनादीनां च ग्रहणम् । वातकुण्डलिकादयस्त्रयोदशेति संबन्धः ॥१॥

*रौक्ष्याद्वेगविघाताद्वा वायुर्बस्तौ सवेदनः ।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ॥ २ ॥
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्तते ।
वातकुण्डलिकां तां तु व्याधिं विद्यात्सुदारुणम् ॥ ३ ॥
(सु. उ. अ. ५८)

वातकुण्डलिकामाह—रौक्ष्यादित्यादि । आविश्येत्यावृत्य; 'आविध्य' इति पाठान्तरे स एवार्थः । चरति गच्छति । विगुणः कुपितः । कुण्डलीकृत इति वात्यावद्वृत्तावेव भ्रमंस्तिष्ठतीति ॥ २ ॥ ३ ॥

†आध्मापयन्वस्तिगुदं रुद्ध्वा वायुश्चलोन्नताम् ।
कुर्यात्तीव्रार्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम् ॥ ४ ॥

अष्ठीलामाह—आध्मापयन्नित्यादि । रुद्ध्वेति वस्तिगुदमेव । अष्ठीलातुल्यत्वादष्ठीला, सा च वातव्याधावुक्ता ॥ ४ ॥

‡वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः ।
निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः ॥ ५ ॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीडितः ।
वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः ॥ ६ ॥
(सु. उ. अ. ५८)

---

* 'तेषां मध्ये वातकुण्डलिकालक्षणमाह—रौक्ष्येत्यादि । रौक्ष्यादिभिर्वेगविघातादिभिश्च विगुणो दुष्टः, कुण्डलीभूतो वायुः, वस्तौ मूत्राशये, चरति प्रधावति, आवद्धत्वाद्वात्यावद्भ्रमंस्तिष्ठतीत्यर्थः । आविश्य आवृत्य मूत्रमिति । तस्मान्मूत्रमल्पमल्पं सव्यथं प्रवर्तते, तं व्याधिं वातकुण्डलिकामाहुः । सुदारुणं मारणात्मकत्वात्' (आ० द०) ॥ २ ॥ ३ ॥

† 'आध्मापयन् पूरयन् वस्तिगुदं, तथा वस्तिगुदमेव रुद्ध्वा वायुरष्ठीलां कुर्यात् अष्ठीला उत्तरापथे नदीषु पाषाणपिण्डी । चलोन्नतां चलां चलनशीलां, उन्नतामूर्ध्वंस्थिताम् । तीव्रार्तिमतिव्यथाम् । मूत्रमार्गो मेढ्रं, विण्मार्गः पायुः, तयो रोधिनीम्' (आ० द०) ॥ ४ ॥

‡ 'अकुशलो मूर्खः, तस्य पुरुषस्य वस्तेर्मुखं निरुणद्धि वस्तिगतो वायुः, तेन वायुना मूत्रसङ्गं विद्यात् । 'वस्तिकुक्षी निपीडयन्' इति पाठे तत्र वस्तिकुक्षौ चरन्' (आ० द०) ॥५॥६॥

वातवस्तिमाह—वेगमित्यादि। वस्तिकुक्षिनिपीडित इति वस्तौ कुक्षौ च निपीडितः संपिण्डितो वायुरिति संबन्धः, 'वस्तिकुक्षी निपीडयन्' इति पाठान्तरे वस्तिकुक्ष्यो रुजाकर इति ॥ ५ ॥ ६ ॥

*चिरं धारयतो मूत्रं त्वरया न प्रवर्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥ ७ ॥

मूत्रातीतमाह—चिरमित्यादि। त्वरया न प्रवर्तत इति मूत्रमित्यर्थः। मेहमानस्य मूत्रं सृजतः। 'वहमानस्य' इति पाठान्तरं सुगमम् ॥ ७ ॥

†मूत्रस्य वेगेऽभिहते तदुदावर्तहेतुकः।
अपानः कुपितो वायुरुदरं पूरयेद्भृशम् ॥ ८ ॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम्।
तन्मूत्रजठरं विद्यादधोवस्तिनिरोधनम् ॥ ९ ॥
(सु. उ. अ. ५८)

मूत्रजठरमाह—मूत्रस्य वेग इत्यादि। तदुदावर्तहेतुक इति मूत्रवेगधारणजनितोदावर्तनिमित्तः। अधोवस्तिनिरोधनमिति वस्तेरधोभागे विबन्धकारकम् ॥ ८ ॥ ९ ॥

‡वस्तौ वाऽप्यथवा नाले मणौ वा यस्य देहिनः।
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥ १० ॥
स्रवेच्छनैरल्पमल्पं सरुजं वाऽथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥ ११ ॥
(सु. उ. अ. ५८)

मूत्रोत्सङ्गमाह—वस्तावित्यादि। नाले मेढ्रे मणौ मेढ्राग्रे। प्रवृत्तं सज्जेतेति संसक्तं सन्न प्रवर्तते। सरक्तं वा प्रवाहत इति प्रवाहणकुपितवायुना वस्त्यादिभेदजनितरक्तयुक्तं मूत्रं प्रवर्तते ॥ १० ॥ ११ ॥

§रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् ॥ १२ ॥
(सु. उ. अ. ५८)

तदाह्वयमिति मूत्रक्षयाख्यं, कारणे कार्योपचारात् ॥ १२ ॥

---

* 'चिरं चिरकालं मूत्रं धारयतः पुंसस्त्वरया वेगेन न प्रवर्तते, मेहमानस्य प्रवर्तते चेत्तदा मन्दं शनैः' (आ० द०) ॥ ७ ॥

† 'अपानोऽपानसंज्ञको वातः कुपितोऽतिशयेनोदरं पूरयति। ततो नाभेरधस्तात्तीव्रवेदनमाध्मानं कुर्यात्' (आ० द०) ॥ ८ ॥ ९ ॥

‡ 'वस्तौ मूत्राशये, मूत्रं सज्जते न प्रवर्तते सरक्तं वा प्रवर्तते, प्रवाहत इति; शनैर्मन्दं, अल्पमल्पं स्तोकं सव्यथं वा रुजारहितं वा प्रवर्तते मूत्रमिति संबन्धः' (आ० द०) ॥ १० ॥ ११ ॥

§ 'क्लान्तदेहस्य श्रान्तशरीरस्य, वस्तिस्थौ मूत्राशयस्थौ, पित्तमारुतौ मूत्रनाशं कुरुतो व्यथादाहयुक्तम्' (आ० द०) ॥ १२ ॥

*अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् ।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥ १३ ॥
(वा. नि. अ. ९)

मूत्रग्रन्थिमाह—अन्तरित्यादि । अन्तर्वस्तिमुखे वस्तिमुखस्याभ्यन्तरे । ग्रन्थिर्गुडूकाकारः । ननु, स्थानवेदनाकारणानामभिन्नत्वादश्मर्या सह को भेदः ? उच्यते, अश्मर्यां पित्तादिकं संहन्यते, अत्र तु रक्तमेव । उक्तं हि तन्त्रान्तरे,—"रक्तं वातकफाद्दुष्टं वस्तिद्वारे सुदारुणम् । ग्रन्थिं कुर्यात् स कृच्छ्रेण सृजेन्मूत्रं तदावृतम् ॥ अश्मरीसमशूलं तं रक्तग्रन्थिं प्रचक्षते"—इति । विशेषज्ञानं तु कुत इति चेत् ? अश्मरीपूर्वरूपोक्तस्य मूत्रे वस्तगन्धत्वादेर्भावाभावाभ्याम् ॥ १३ ॥

†मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् ।
स्थानाच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्तते ॥ १४ ॥
(वा. नि. अ. ९)

भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ।

मूत्रशुक्रमाह—मूत्रितस्येत्यादि । मूत्रितस्य मूत्रवेगितस्य । स्थानाच्युतं स्वस्थानाद्भ्रष्टं शुक्रम् ॥ १४ ॥—

‡व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलान्वितम् ॥ १५ ॥
वस्तिं मेढ्रं गुदं चैव प्रदहेत्स्रावयेदधः ।
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ॥ १६ ॥
(सु. उ. अ. ५८)

कृच्छ्रात्पुनः पुनर्जन्तोरुष्णवातं ब्रुवन्ति तम् ।

उष्णवातमाह—व्यायामेत्यादि ।—व्यायामाद्विरोधिसौम्यधातुक्षयात्तेजोवृद्ध्या पित्तवृद्धिः । अनिलान्वितमनिलसंयुतम् । 'अनिलावृतं' इति पाठान्तरं सुगमम् । सरक्तमीषल्लोहितम् ॥ ॥ १५ ॥ १६ ॥—

§पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् ॥ १७ ॥
कृच्छ्रान्मूत्रं तदा पीतं श्वेतं रक्तं घनं सृजेत् ।

---

*'स्थिरोऽचलः, अल्पो लघुरामलकाकारः । अथवा अयं सहसा भवेत्, अश्मरी तु संचयेन । अन्यच्च—अश्मरी पित्तेन पच्यते, वायुना शोष्यते, कफेन बध्यते, अत्र तु रक्तमेवेत्यश्मर्या सह भेदः' (आ० द०) ॥ १३ ॥

† 'मूत्रयतो मूत्रं कुर्वतः पुरुषस्य प्राक् प्रथमं प्रवर्तते, अथवा पश्चात्; भस्ममिलितोदकसदृशम्' (आ० द०) ॥ १४ ॥

‡ 'वस्तिं प्राप्य वस्त्यादिकं प्रदहन् मूत्रमधः स्रावयेत् । कीदृशं ? हारिद्रं, अथवा सरक्तमीषद्रक्तम्, अथवा केवलं रक्तमेव' (आ० द०) ॥ १५ ॥ १६ ॥

§ 'वातेन संहन्येते स्त्यानीक्रियेते, पित्तेन पीतरक्तं; कफेन श्वेतं घनं, त्रिदोषेण समस्तवर्णम्' (आ० द०) ॥ १७ ॥ १८ ॥

सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्तु तत् ॥ १८ ॥
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ।
(वा. नि. अ. ९)

मूत्रसादमाह—पित्तमित्यादि । संहन्येते स्त्यानीक्रियेते । शुष्कमल्पं तन्मूत्रं पित्तेन रोचनाभं, कफेन शङ्खचूर्णाभं, समस्तवर्णमुक्तसकलवर्णं सन्निपातात् ॥ १७ ॥ १८ ॥–

*रूक्षदुर्बलयोर्वातेनोदावृत्तं शकृद्यदा ॥ १९ ॥
मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः ।
विड्गन्धं मूत्रयेत्कृच्छ्राद्विड्विघातं विनिर्दिशेत् ॥ २० ॥
(वा. नि. अ. ९)

विड्विघातमाह—रूक्षेत्यादि । अनुपद्येत प्राप्नुयात् । विड्गन्धमित्यत्र वाशब्दो द्रष्टव्यः ॥ १९ ॥ २० ॥

†द्रुताध्वलङ्घनायासैरभिघातात्प्रपीडनात् ।
स्वस्थानाद्वस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् ॥ २१ ॥
शूलस्पन्दनदाहार्तो विन्दुं विन्दुं स्रवत्यपि ।
पीडितस्तु सृजेद्धारां संस्तम्भोद्वेष्टनार्तिमान् ॥ २२ ॥
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ।
पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ।

वस्तिकुण्डलमाह—द्रुतेत्यादि । लङ्घनमुत्पतनम् । उद्वृत्तः स्वस्थानादूर्ध्वं गतः । गर्भवदिति गर्भिण्या उदरान्तर्गतापत्यवत्; एतेन वस्तिपुटस्य पार्श्वगमनं दर्शितम् । पीडित इति नाभेरधः । उद्वेष्टनार्तिरुद्वेष्टनरूपाऽऽर्तिः । शस्त्रविषोपमं शस्त्रविषसदृशमिति विभिन्नार्थसूचनार्थं प्रसिद्धानुभवोपदर्शनार्थम् ॥ २१ ॥ २२ ॥

तस्मिन्पित्तान्विते दाहः शूलं मूत्रविवर्णता ॥ २३ ॥
श्लेष्मणा गौरवं शोथः स्निग्धं मूत्रं घनं सितम् ।

वातस्यैव दोषान्तरानुबन्धिनो लक्षणमाह—तस्मिन्नित्यादि । श्लेष्मणा अन्विते तस्मिन्निति बोद्धव्यम् ॥ २३ ॥—

‡श्लेष्मरुद्धबिलो वस्तिः पित्तोदीर्णो न सिध्यति ॥ २४ ॥
अविभ्रान्तबिलः साध्यो न तु यः कुण्डलीकृतः ।

---

* 'द्वयोस्तयोर्वातेनाधोवृतं मूत्राशयात्स्रोतांस्यनुपद्येत आप्नुयात्, तदा विट्संसृष्टं पुरीषमिश्रं विड्गन्धं मूत्रं कृच्छ्रान्मूत्रयेत् । 'उदावर्तं' इति पाठान्तरं, तत्रापि स एवार्थः' (आ० द०) ॥ १९ ॥ २० ॥

† 'द्रुताध्वलङ्घनं द्रुतेनाध्वगमनं, लङ्घनमुत्पतनं वा, अभिघाताल्लगुडादिभिः प्रपीडनाद्देहनिष्पीडनात्, एतैर्हेतुभिस्तथा संस्तम्भादियुक्तः, उद्वेष्टनरूपाऽर्तिरुद्वेष्टनरूपपीडादियुक्तम् । शस्त्रोपमं शीघ्रेण मारणात्मकं, विषोपममिति कालान्तरेण । विषमत्र गरः प्रायेण वातबहुलम्' (आ० द०) ॥ २१ ॥ २२ ॥

‡ 'अविभ्रान्तबिलः कफेनारुद्धमुखः, घनकफेन कुण्डलीकृतो न भवति स साध्यः, कुण्डलीकृतस्त्वसाध्यः' (आ० द०) ॥ २४ ॥

तस्यैव साध्यत्वासाध्यत्वमाह—श्लेष्मरुद्धविल इत्यादि। विलं बस्तिमुखच्छिद्रम्। पित्तोदीर्ण उपचितपित्तः, स एवाविभ्रान्तविलोऽनावृतविलः। कफेन कुण्डलीकृतोऽसाध्य इति बोध्यम्। अकुण्डलीकृतस्तु साध्यत्वेनोक्तः॥ २४॥

*स्याद्रस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च॥ २५॥

इति श्रीमाधवकरविरचिते माधवनिदाने मूत्राघातनिदानं समाप्तम्॥ ३१॥

कुण्डलीभूतस्यैव लिङ्गमाह—स्यादित्यादि। एतौ विड्विघातबस्तिकुण्डलौ सुश्रुतेन न पठितौ, तेन हि मूत्रोदकसादमेव द्विधा पठित्वा द्वादश मूत्राघाता इत्युक्तं, सर्वानभिधानं तु पराधिकारत्वेनेति मन्तव्यम्॥ २५॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायां मूत्राघातनिदानं समाप्तम्॥३१॥

अथाश्मरीनिदानम्।

†वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजाऽपरा।
प्रायः श्लेष्माश्रयाः सर्वा अश्मर्यः स्युर्यमोपमाः॥ १॥

विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा।
यदा तदाऽश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः॥ २॥
नैकदोषाश्रयाः सर्वाः,

(च. चि. अ. २६)

मूत्ररोधित्वसाधर्म्यादश्मरीमाह—वातेत्यादि। श्लेष्माश्रया इति श्लेष्मसमवायिकारणाः, शुक्रजां विना; तत्र शुक्रस्यैव समवायिकारणत्वात्। तथा च दृढबलः,—"विशोषयेद्वस्तिगतं सशुक्रम्" (च. चि. स्था. अ. २६)-इत्यादि, एतच्च सामान्योक्तमपि विशेषेण संबध्यते। यथा—हलृङ्यादिसूत्रे 'दीर्घात्' इति विशेषणं ङयाभ्यां संबध्यते, नतु हला। अत एवात्र प्रायोग्रहणं कृतवान्। अन्ये तु शुक्राश्मर्यामपि कफकारणत्वमिच्छन्त्येव, विरोधाभावात्। प्रायःशब्दश्चात्र विशेषार्थः। यमोपमा इति असति चिकित्सितेऽवश्यमेव मारकत्वात्। विशोषयेदित्यादि पित्तेष्विवेति वातशोषितेषु। नैकदोषाश्रया इति त्रिदोषजाः, उद्धतदोषेण व्यपदेशः॥ १॥ २॥

---

* 'श्लेष्मणा रुद्धविलो बस्तिः कुण्डलाकारत्वेन तिष्ठति।"वातकुण्डलिकाऽष्ठीला वातबस्तिस्तथैव च। मूत्रातीतः सजठरो मूत्रोत्सङ्गः क्षयस्तथा॥ मूत्रग्रन्थिर्मूत्रशुक्रमुष्णवातस्तथैव च। मूत्रसादो विड्विघातो बस्तिकुण्डलिका तथा॥" एते मूत्राघातास्त्रयोदश ज्ञेयाः' (आ० द०)॥२५॥

† 'तस्याः संप्राप्तिमाह—विशोषयेदित्यादि। पवनो बस्तिगतं सशुक्रं मूत्रं सपित्तं कफं वा शोषमुपनयेद्यदा तदाऽश्मरी भवति, क्रमेण शनैर्वर्धमाना यथा गोः पित्तेषु रोचना भवति' (आ० द०)॥ १॥ २॥

*अश्मर्याः पूर्वलक्षणम्।

बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्॥ ३॥
मूत्रेषु बस्तगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः।
(वा. नि. अ. ९)

पूर्वरूपमाह—अश्मर्याः इत्यादि इति क। बस्तसगन्धत्वं बस्तसमानगन्धत्वम्॥३॥

†सामान्यलिङ्गं रुक्नाभिसेवनीबस्तिमूर्धसु॥ ४॥
विशीर्णधारं मूत्रं स्यात्तया मार्गे निरोधिते[१]।
तद्व्यपायात्सुखं मेहेदच्छं गोमेदकोपमम्॥ ५॥
तत्संक्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत्।
(वा. नि. अ. ९)

तासां सामान्यलक्षणमाह—सामान्येत्यादि। रुक् शूलं, बस्तिमूर्धा नाभेरधोदेशः। विशीर्णधारं सविच्छेदधारम्। तया अश्मर्या। मार्गो मूत्रवाहि स्रोतः। तद्व्यपायाद्वायुना कदाचिदश्मरीकृतमार्गरोधव्यपगमात्। मेहेत् मूत्रयेत्। अच्छमनाविलम्। गोमेदकोपममिति गोमेदको लोहितमणिस्तद्वर्णम्। तत्संक्षोभान्निरुद्धमार्गमूत्रेण पीडनादश्मरीसंपाताद्वा क्षते जाते मूत्रवहादौ, सास्रं सरक्तं मूत्रं प्रवर्तते आयासात् प्रवाहणादिजनितक्लमात्॥ ४॥ ५॥

‡तत्र वाताद्भृशं चार्तो दन्तान् खादति वेपते॥ ६॥
गृह्णाति[२] मेहनं नाभिं पीडयत्यनिशं क्वणन्।
सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः॥ ७॥
श्यावारुणाऽश्मरी चास्य स्याच्चिता कण्टकैरिव।
(वा. नि. अ. ९)

वातजामाह—तत्रेत्यादि। क्वणन् आर्तनादं सानिलं कुर्वन्। सशब्दं, मूत्रप्रवृत्त्यर्थं कृतातिकुन्थनात्। मेहति बिन्दुश इति बिन्दुं बिन्दुं मूत्रयति, "बह्वल्पार्थाच्छस्

* 'बस्त्याध्मानमित्यादि।—बस्त्याध्मानं बस्तेरापूरः, तदासन्नदेशेषु बस्तिशिरोमुष्कमेढ्रादिषु, परितः समन्तात्, अतिरुगतिवेदना। मूत्रे बस्तसगन्धत्वं बृहच्छमबस्तसदानगन्धत्वं, तथा मूत्रकृच्छ्रं ज्वरोऽरुचिश्च भवति' (आ० द०)॥ ३॥

† 'मार्गनिरोधने मूत्रवाहिस्रोतस आवरणे सति तस्मिन् रुद्धे सति। गोमेदकोपममिति गोमेदक आलोहितपीतमणिस्तद्वर्णम्। आयासात् प्रवाहणादिकजनितात्, प्रवाहणं कण्ठबलेन शब्दकरणं, मूत्रस्याजननं निकुन्थनमिति लोके' (आ० द०)॥ ४॥ ५॥

‡ 'भृशमत्यर्थमार्तः पुमान् दन्तैर्दन्तान् खादति कटकटायते, वेपते कम्पते, मेहनं लिङ्गं, मृद्नाति मश्नाति, अनिशं क्वणन् क्रन्दन् नाभिदेशं पीडयति। शकृत्पुरीषं, सानिलं सशब्दं मुञ्चति, मुहुर्वारंवारं, श्यावारुणा किंचिच्छ्यामा किंचिद्रक्ता कण्टकैरन्वितेव' (आ० द०)॥ ६॥ ७॥

१ 'मार्गे निरोधिते' इत्यत्र 'मार्गनिरोधने' इति पाठाभिप्रायेण। २ 'गृह्णाति' इत्यत्र 'मृद्नाति' इति पाठाभिप्रायेण।

कारकादन्यतरस्याम्"–इति अल्पार्थे शस्प्रत्ययः । श्यावेत्यादि ।–अश्मर्या आकारकथनं; एतच्चाकथनं प्रत्यक्षसंवादेन शास्त्रप्रामाण्यख्यापनार्थमित्याहुः, आकृष्टासु दोषोचितचिकित्सार्थमित्यन्ये ॥ ६ ॥ ७ ॥

‡पित्तेन दह्यते बस्तिः पच्यमान इवोष्मवान् ॥ ८ ॥
भल्लातकास्थिसंस्थाना रक्तपीताऽसिताऽश्मरी ।

(वा. नि. अ. ९)

पित्तजामाह—पित्तेनेत्यादि । पच्यमानः क्षारेणेव । ऊष्मवान् उष्णस्पर्शः असिता कृष्णा ॥ ८ ॥

*बस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ॥ ९ ॥
अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवा सिता ।

(वा. नि. अ. ९)

श्लेष्मजामाह—बस्तिरित्यादि । श्लक्ष्णा मसृणा । मधुवर्णा ईषत् पिङ्गलशुक्ला ॥९॥

†एता भवन्ति बालानां तेषामेव च भूयसा ॥ १० ॥
आश्रयोपचयाल्पत्वाद्ग्रहणाहरणे सुखाः ।

(वा. नि. अ. ९)

एता इति त्रिदोषजा बालानां स्युः, तेषां तन्निदानाभ्यासात् । भूयसा प्रायेण, तेन महतामपि त्रिदोषजा भवन्ति । तेषामेव बालानां ग्रहणाहरणे सुखा इति संबन्धः । आश्रयोपचयाल्पत्वादिति आश्रयो बस्तिः, उपचयः स्थौल्यं, तयोरल्पत्वं; तच्च तद्देहाल्पत्वात् । आहरणं पाटनादिपूर्वकमाकर्षणं, ग्रहणं तदर्थमेवाङ्गुलिभ्यां धारणम् । उक्तं हि सुश्रुते, "प्रायेणैतास्तिस्रोऽश्मर्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्धमधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति, तेषामेवाल्पबस्तिकायत्वादल्पमांसोपचयाच्च बस्तेः सुखग्रहणाहरणा भवन्ति" (सु. नि. स्था. अ. ३)—इति ॥ १० ॥—

‡शुक्राश्मरी तु महतां जायते शुक्रधारणात् ॥ ११ ॥
स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ।
शोषयत्युपसंगृह्य शुक्रं तच्छुक्रमश्मरी ॥ १२ ॥

---

‡ 'पित्तेन साऽश्मरी तया बस्तिर्मूत्रकोशो दह्यते; भल्लातकास्थिसंस्थाना भल्लातकमज्जाकारा' (आ० द०) ॥ ८ ॥

* 'बस्तिर्निस्तुद्यत इव शूलेनेव, शीतस्पर्शः, गुरुर्गौरवयुक्तः, महती कुक्कुटाण्डतुल्या, सिता शुभ्रा' (आ० द०) ॥ ९ ॥

† 'अतस्ता ग्रहणाहरणे सुखाः सुखेनाहर्तुं शक्याः । महतां तु यथोक्तहेत्वभावाद्ग्रहणाहरणे ता दुःखावहा' इति । ग्रहणं बडिशादिना, आहरणं पाटनादिपूर्वकमाकर्षणं' (आ० द०) ॥ १० ॥

‡ 'च्युतममुक्तमिति मैथुनादुपस्थितवेगस्य शुक्रस्य धारणादित्यर्थः । अमुक्तं धृतमित्यर्थः । तथाभूतं शुक्रमनिल एकीकृत्य शोषयति, सा शुक्राश्मरीति । उत्पन्नमात्रायां तस्यां यदा सा कथमपि विलीयते विलयं याति, तदा शुक्रमेति मूत्रपथादागच्छति, परमवकाशे छिद्रे पीडिते सति' (आ० द०) ॥ ११-१२ ॥

वस्तिरुङ्मूत्रकृच्छ्रत्वमुष्कश्वयथुकारिणी ।
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥ १३ ॥
पीडिते त्ववकाशेऽस्मिन्

(वा. नि. अ. ९)

शुक्राश्मरीमाह—शुक्रेत्यादि । तुशब्दोऽवधारणे; तेन महतामेव नतु बालानां तेषां वक्ष्यमाणसंप्राप्तेरभावात्; नतु शुक्राभावात्, अन्यथा षड्धातुकत्वं स्यात् । शुक्रधारणादुपस्थितशुक्रवेगस्य मैथुनाकरणात् । मुष्कयोरन्तरे 'मेढ्रेण सह' इति शेषः । सुश्रुते हि 'मेढ्रवृषणयोरन्तरे' (सु. नि. स्था. अ. ३)—इत्येवोक्तम् । मेढ्रवृषणमध्यगतबस्तिमुख इत्यर्थः, तत्रैव शुक्रवहस्रोतसो बस्तिमुखेन सह संबन्धात् । तथाभूतं शुक्रमेवाश्मरीति । बस्तिरुग्बस्तिशूलं, मुष्कश्वयथुकारिणी वृषणयोः शोथकारिणी । तस्यां शुक्राश्मर्याम् । एति वर्तते । तुशब्दोऽवधारणे । अवकाशेऽस्मिन्निति मेढ्रवृषणयोरन्तरे । अस्मिन्नेव पीडिते सति विलीयते प्रविलयमापद्यत इत्यर्थः । अत एव सुश्रुतः—"पीडितमात्रे च तस्मिन्नेवावकाशे प्रविलयमापद्यते" (सु. नि. स्था. अ. ३)—इति ॥११–१३ ॥

अश्मर्यैव च शर्करा ।

(वा. नि. अ. ८)

सैवावस्थाभेदादश्मरी शर्करा, पश्चनी न भवतीत्याह—अश्मर्यैव चेति । चकारात् सिकताऽपि भवतीति मन्तव्यम् । अत एव 'शर्करा सिकतान्विता' इति वक्ष्यति । शर्करासिकतयोश्च महत्त्वाल्पत्वाभ्यां भेदः ॥—

***अणुशो वायुना भिन्ना सा तस्मिन्ननुलोमगे ॥ १४ ॥**
निरेति सह मूत्रेण प्रतिलोमे निरुध्यते ।

(वा. नि. अ. ८)

मूत्रस्रोतःप्रवृत्ता सा सक्ता कुर्यादुपद्रवान् ॥ १५ ॥
दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिम् ।
पाण्डुत्वमुष्णवातं च तृष्णां हृत्पीडनं वमिम् ॥ १६ ॥

(सु. नि. अ. ३)

---

* 'सैवाश्मर्यणुशो वायुना भिन्ना विदारिता शर्करा कथ्यते । सा शर्करा, अनुलोमगे मूत्रस्रोतसाऽधःप्रवृत्ते तस्मिन्वायौ मूत्रेण सह एति, प्रतिलोमगे ऊर्ध्वं प्रवृत्ते वायौ, निबध्यते[1] बन्धं प्राप्नोति न बहिर्मूत्रेण निष्क्रामति; अश्मरी त्वनुलोमगे मारुते न निरेति, शर्करा तु मूत्रेण सह निष्क्रामतीत्यनयोर्भेदः । साऽश्मरी मूत्रमार्गप्रवृत्ता सक्ताऽनिर्गता दौर्बल्यादीनुपद्रवान् कुर्यात् । तानेवाह—दौर्बल्यमित्यादि । दौर्बल्यमिन्द्रियाणां, सदनं ग्लानिः, कार्श्यमङ्गानां, कुक्षिशूलं, हृदयशूलं, उष्णवातं मूत्राघातनिदानोक्तं, शेषं सुगमम्' (आ० द०) ॥ १४–१६ ॥

---

१ एतच्च 'प्रतिलोमे निबध्यते' इति पाठाभिप्रायेण ।

कथमश्मरी शर्करा भवतीत्याह—अणुश इत्यादि । अणुशोऽल्पशः । अत्रार्थे सुश्रुतः—"पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः । सा भिन्नमूर्तिर्वातेन शर्करेत्यभिधीयते" (सु. नि. स्था. अ. ६) इति । मूत्रस्रोतःप्रवृत्ता सा सक्तेति मूत्रमार्गस्य सति संलग्नेत्यर्थः ॥ १४–१६ ॥

*प्रशूननाभिवृषणं बद्धमूत्रं रुजातुरम् ।
अश्मरी क्षपयत्याशु सिकता शर्करान्विता ॥ १७ ॥
(सु. सू. अ. ३३)

इति श्रीमाधवकरविरचिते माधवनिदानेऽश्मरीनिदानं समाप्तम् ॥ ३२ ॥

असाध्यलक्षणमाह—प्रशूनेत्यादि । रुजातुरं शूलपीडितमित्यर्थः ॥ १७ ॥

इति श्रीविजयरक्षितकृतायां मधुकोशव्याख्यायामश्मरीनिदानं समाप्तम् ॥ ३२ ॥

अथ प्रमेहप्रमेहपिडकानिदानम् ।

†आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वम् ॥ १ ॥
(च. चि. अ. ७)

चन्द्रोदयप्रणयपीवरदुग्धसिन्धुपूरश्रमं वहति यद्गुणकीर्तिगुच्छः ॥
तेन व्यधायि गुरुणा विजयेन शिष्यप्रेम्णाऽश्मरीरुगवधेर्मधुकोपबन्धः ॥ १ ॥
श्रीकण्ठदत्तभिषजा गुरुभक्तिलेशादारभ्यते प्रभृति संप्रति मेहरोगात् ॥
सूक्तीर्विचिन्त्य मधुशीकरमुद्गिरन्तीष्टीकाकृतः कतिपयस्य तदीयशेषः ॥ २ ॥

अश्मरीरोगानन्तरं बस्तिविकृतिसाम्यात्प्रमेहनिदानमुच्यते—आस्यासुखमित्यादि । आस्या उपविष्टस्य चेष्टोपरमः, तेन कृतं सुखमास्यासुखं, एवं स्वप्नसुखमिति द्रष्टव्यम् । तेनासनादिदोषादास्यादुःखं स्वप्नदुःखं वा न प्रमेहहेतुः । गुडवैकृतमिति गुडविकाराः शर्करादयस्तथा गुडकृताश्च भक्ष्याः । प्रमेहहेतुः कफकृच्च सर्वमित्यनुक्तहेतुसंग्रहार्थमुक्तम् । एष साधारणो हेतुः प्रमेहस्य; विशेषहेतुस्तु चरके निदानस्थाने,—"हायनकोद्दालक"—इत्यादिना कफजस्य, 'उष्णाम्ललवण'—इत्यादिना पित्त-

---

* 'प्रशूननाभिवृषण अयथुयुक्तनाभिवृषणं पुरुषमश्मरी क्षपयति विनाशयति; सिकता वालुका, तत्तद्रूपी या शर्करा, तया सहिताश्मरीत्यर्थः' (आ० द०) ॥ १७ ॥

† आसनमास्या । दधीनीति बहुवचनात्सर्वजातीनां दध्नां निषेधः । ग्राम्यौदकानूपरसाः रस्यन्त इति रसाः, रसशब्देनाहार उच्यते, कार्ये करणोपचारात् । कानि ग्राम्योदकानि ? मांसानि, तत्र ग्राम्याच्छागोरभ्रमेदः पुच्छप्रभृतयः, औदका मत्स्यकूर्मादयः, आनूपा जलसंनिधिचारिणो हंसचक्रवाकादयः, एषां मांसानि; पयांसि क्षीराणि, अत्रापि बहुवचनं दधिवत् पानं नवाभिवृष्टजलपानम् । एतत्सर्वं प्रमेहहेतुः । कफकृच्च सर्वमिति आहाराचारादिकं कफकारि' (आ० द०) ॥ १ ॥

जस्य, 'कटुतिक्तकषाय' (च. नि. स्था. अ. ४)–इत्यादिना वातजस्याभिहितः। एतेन सामान्यहेतुसहितो विशिष्टहेतुः कफजादिप्रमेहस्य । किंच कफजनिदानमप्येतदास्या-सुखादि बोद्धव्यम् ॥ १ ॥

*मेदश्च मांसं च शरीरजं च क्लेदं कफो वस्तिगतः प्रदूष्य ।
करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ॥ २ ॥
क्षीणेषु दोषेष्ववकृष्य धातून् संदूष्य मेहान् कुरुतेऽनिलश्च ।
साध्याः कफोत्था दश, पित्तजाः षड् याप्या, न साध्यः पवनाच्चतुष्कः ३
समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते ॥
(च. चि. अ. ६)

कफपित्तवातजमेहानां क्रमेण संप्राप्तिमाह—मेद इत्यादिना । अत्र कफजा एव मेहा भूयस्त्वेन साध्यत्वेन चादावुच्यन्ते । तानेवेति मेदोमांसशरीरजक्लेदान् । उष्णै-रिति उष्णवीर्यस्पर्शैर्द्रव्यैः । क्षीणेषु दोषेष्विति प्रवृद्धत्वेनैव क्षीणेषु, न तु समानापे-क्षया क्षीणेषु; अनेन वृद्धे कफे पित्ते वा यो वायुर्लङ्घनादिना क्रमेण वृद्धो भवति, स मेहासाध्यमेहचतुष्टयप्रकरणे विवक्षित इति सूच्यते । तत्र हि चिकित्साविधानात् साध्यत्वमस्ति । यदुक्तं,–"या वातमेहान् प्रति पूर्वमुक्ता वातोल्बणानां विहिता क्रिया सा । वायुर्हि धातुष्वतिकर्षितेषु[१] कुप्यत्यसाध्यान् प्रति नास्ति चिन्ता" (च. चि. स्था. अ. ६)–इति । दोषेष्विति कफपित्तेषु, द्वयोश्च बहुवचनं व्यक्त्यपेक्षया बहुत्वात् । अवकृष्येति वस्तिमुखं नीत्वा । धातूनिति वसामज्जौजोलसीकाख्यान् । समक्रियत्वादिति कफस्य दोषस्य दूष्यस्य च मेदःप्रभृतेः समानत्वात् कटुतिक्तादिक्रियायाः अत्र व्याधि-महिम्ना तुल्यदूष्यता साध्यताया हेतुः । तेन "न च तुल्यगुणो दूष्यो न दोषः प्रकृ-तिर्भवेत्" (च. सू. स्था. अ. ११) इति चरकवचनं कष्टसाध्यतार्थं नोद्भावनी-यम् । यदुक्तं,–"ज्वरे तुल्यर्तुदोषत्वं प्रमेहे तुल्यदूष्यता । रक्तगुल्मे पुराणत्वं सुख-साध्यस्य लक्षणम्"–इति । विषमक्रियत्वादिति पित्तस्य प्रमेहप्रधानदूष्यस्य च मेदः-प्रभृतेश्चान्योन्यविपरीतक्रियत्वात्; पित्तहरं हि मधुरादि मेदस्करं, मेदोहरं च कटुकादि,

* शरीरजं क्लेदं वस्तिगतं वस्तिप्राप्तं प्रदूष्य श्लैष्मिकान् मेहान् करोति । यदुक्तं–"मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च । मूत्रदोषाश्च ये चापि वस्तौ ते संभवन्ति हि"–इति । समुदीर्णवेगं पित्तं तानेव मेदोमांसशरीरक्लेदान् वस्तिगतान् प्रदूष्य पैत्तिकान् मेहान् करोति । पित्तप्रमेहसं-प्राप्तिमुक्त्वा वातप्रमेहसंप्राप्तिमाह–क्षीणेष्वित्यादि । अनिलो दोषेषु क्षीणेषु वस्तौ धातूनवकृष्य मेहान् वातजान् कुरुते । मेहानिति बहुवचनं व्यक्त्यपेक्षयाबहुत्वात् । क्रमेण कफपित्तवातजानां साध्यासाध्यत्वमाह–साध्या इत्यादि । दोषदूष्याणां समक्रियत्वादिति; अत्र दोषः श्लेष्मा, दूष्याणि रसमांसमेदोमज्जाशुक्रलसीकौजांसि; दोषस्य श्लेष्मणः, एषां दूष्यवर्गाणां च कटुतिक्तकषा-यादिभिः समैव क्रिया, अत एव कफजाः प्रमेहाः दश साध्याः प्रमेहं विनाऽन्येषां रोगाणाम-तुल्यदूष्यत्वमेव साध्यत्वहेतुः । दोषदूष्याणां विषमक्रियत्वादिति; अत्रदोषः पित्तं, दूष्याणि रसमांसादीनि; शीतमधुरादिका क्रिया पित्तहन्त्री, सा रसमांसमेदोजनयित्री; एतेन विषमक्रिय-त्वात् षट् पित्तजा याप्याः । महात्ययत्वाद्विनाशकारित्वात्' (आ० द०) ॥ २–३ ॥

१ 'मेहेष्वतिकर्षितानां' इति पाठान्तरम् ।

पित्तकरमिति क्रियावैषम्यं; अत्र व्याधिस्वभावो हेतुः, तेनान्येषु व्याधिषु परस्परविरुद्धदोषदूष्यसंसर्गेऽप्युभयप्रत्यनीकभेषजविधिरविरोधीति । महात्ययत्वादिति मज्जादिगम्भीरधात्वपकर्षकत्वेन बहुव्यापत्तिकरत्वात्; आशुकारित्वादितीशानः । चकाराद्विषमक्रियत्वं च वातजानां समुच्चीयते ॥ २ ॥ ३ ॥

*कफः सपित्तः पवनश्च दोषा, मेदोऽस्रशुक्राम्बुवसालसीकाः ।
मज्जा रसौजः पिशितं च दूष्याः, प्रमेहिणां विंशतिरेव मेहाः ॥४॥
(वा. नि. अ. १०)

सर्वमेहानां दोषदूष्यसंग्रहमाह—कफ इत्यादिना । वसा मांसस्नेहः, सर्वदेहस्नेह इत्यन्ये । लसीकोदकविशेषः । यथाह **चरकः**,—"यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते" (च. शा. स्था. अ. ७)—इति । रसौज इति रसश्च ओजश्च इति द्वन्द्वः । ओजश्चात्रार्धाञ्जलिपरिमितं श्लेष्मरूपम्, यदुक्तं,—"श्लेष्मलस्यौजसोऽर्धाञ्जलिः परिमाणम्" (च. शा. स्था. अ. ७)—इति नत्वष्टविन्द्वात्मकं, तस्य अंशेन मरणाभिधानात् । ननु, रस एवौजो रसौज इति कुतो न कल्प्यते? रसोऽप्योजःशब्देनोच्यते; यदुक्तं,—"तस्मिन् काले पचत्यग्निर्यदन्नं कोष्ठमागतम् । मलीभवति तत् प्रायः कल्प्यते किंचिदोजसे" (च. चि. स्था. अ. ८)—इति; ओजसे इति रसायेत्यर्थः । नैवं, ओजसो हि मधुमेहे दूष्यत्वेनोक्तत्वात्, ओजःशब्दोपादानवैफल्याच्च । यद्यप्यत्र बहूनि मेदःप्रभृतीनि दूष्यत्वेनोच्यन्ते, तथाऽपि पूर्वं मेदोमांसशरीरजक्लेदानां सर्वमेहेष्ववश्यम्भाविदूष्यत्वेन पृथगभिधानम् । मज्जादयस्तु मेहविशेषे दूष्याः । तद्यथा—लसीकावसामज्जौजांसि वातिके, न पैत्तिके, न श्लैष्मिके । **ईशानः** पुनराह,—रसरक्तशुक्राणि सर्वमेहेषु कदाचिद्दुष्यन्ते न त्ववश्यमिति । किंच सर्वमेहानामेव दोषत्रयजन्यत्वं सकलदूष्याश्रयित्वं च 'कफः सपित्त'—इत्यादिनोपदर्श्यते । मेदोमांसादीनि त्वत्यन्तदूष्योपदर्शनार्थं पृथगुक्तानि । यतश्चरकेऽपि कियन्तःशिरसीयाध्याये सकलमेहवाचकमधुमेहकथने दोषत्रयप्रकोपोऽभिहितः । तथाहि,—"समारुतस्य, पित्तस्य कफस्य च मुहुर्मुहुः । दर्शयत्याकृतिं गत्वा क्षयमाप्याय्यते पुनः" (च. सू. स्था. अ. १७)—इति । तथा **सुश्रुतो**ऽप्याह,—"वातपित्तमेदोभिरन्वितः श्लेष्मा मेहान् जनयति" (सु. नि. स्था. अ. ६)—इत्यादि । कफादीनां त्वुल्वणादिसंसर्गस्थानन्त्येन सर्वमेहावस्थाविशेषेण मधुमेहेन च संख्याधिक्यप्रसक्तनिरासायावधारणार्थमाह—विंशतिरेव मेहा इति ॥ ४ ॥

†दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे तृट् स्वाद्वास्यं च जायते ॥ ५ ॥
(वा. नि. अ. १०)

* 'सर्वत्र मेहानामयं दोषदूष्यसंग्रहः—त्रयो दोषाः, बलं रक्तं, अम्बु शरीरक्लेदः, "तेजोभूतः परं सूक्ष्मः स रक्तरस उच्यते । लसीका नाम लभते समगन्धिस्त्वगाश्रितः"—इति । तन्त्रान्तरेऽपि दूष्यसंग्रह उक्तः—"वसा मांसं शरीरस्य क्लेदः शुक्रं सशोणितम् । मेदो मज्जा लसीकौजः प्रमेहे दूष्यसंग्रहः"—इति' (आ० द०) ॥ ४ ॥

† 'हस्तपादयोः संतापः, स्वाद्वास्यं मधुरास्यता' (आ० द०) ॥ ५ ॥

पूर्वरूपमाह—दन्तादीनामित्यादि । आदिशब्देन नयनताल्वकर्णादीनां ग्रहणम् । यदुक्तं सुश्रुते—"तालुगलजिह्वादन्तेषु मलोत्पत्तिः" (सु. नि. स्था. अ. ६)—इति । अत्र च मलभूयस्त्वं मेदोदोषात् । चिक्कणता देहे मेदःकफदुष्टेः । अत्र चकारात् सुश्रुतोक्तकेशजटिलीभावनखातिवृद्धी बोध्ये । एतच्च व्याधिविशेषनियतमेव, येनान्यत्र विद्यमानाऽपि कफमेदोदुष्टिर्नैवं कर्तुं क्षमा ॥ ५ ॥

*सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः ॥ ६ ॥
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ।
(वा. नि. अ. १०)

सामान्यलक्षणमाह—सामान्यमित्यादि । प्रभूतेत्यादि प्रभूतमूत्रत्वं दूष्यद्रवधातुसंबन्धात्, आविलत्वं दोषदूष्यसंसर्गात् । ननु, कथं कफेन दश, पित्तेन षडित्यादिव्यवस्था ? यतः कारणभेदात् कार्यभेद इत्याशङ्क्याह,—दोषदूष्याविशेषेऽपि तत्संयोगविशेषत इति । तेषां दोषदूष्याणामुत्कर्षापकर्षकृतात् संयोगभेदाद्भेदो मेहेषु भवति । यथा—पञ्चानां वर्णानां श्वेतकृष्णपीतलोहितश्यावानां संयोगभेदादनेकपिङ्गलपाटलादिभेदाः । सुश्रुतेऽप्युक्तं—"यथा पञ्चानां वर्णानामुत्कर्षापकर्षकृतेन संयोगविशेषेण कपिलादिनानावर्णोत्पत्तिरेवं दोषादिसंसर्गान्मेहानां नानात्वम्" (सु. नि. स्था. अ. ६)—इति । संयोगभेदप्रतीतिः कुत इत्यत आह—मूत्रेत्यादि । मूत्रवर्णादिभेदं दृष्ट्वा कारणानां समानानां भेदः कल्पनीयः, यथा—मृदादिकारणकलापस्याभेदेऽपि कुम्भकारादिसंयोगभेदादुदञ्चनादिप्रपञ्चभेदः । ननु, उदञ्चनादौ कुम्भकारादिप्रयत्नभेदात् संयोगभेदः, अत्र तु कः संयोगभेदहेतुः ? उच्यते, तत्तदाहारादिकमदृष्टं च भवतीत्यदोषः ॥६॥—

†अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम् ॥ ७ ॥
मेहत्युदकमेहेन किंचिदाविलपिच्छिलम् ।
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ॥ ८ ॥
सान्द्रीभवेत् पर्युषितं सान्द्रमेहेन मेहति ।
सुरामेही सुरातुल्यमुपर्यच्छमधो घनम् ॥ ९ ॥

---

* 'दोषा वातादयः, दूष्या मेदोमज्जादिकाः, मूत्रवर्णादिभेदं दृष्ट्वा कारणानां समानानां भेदः कल्पनीयः, यथा मृत्पात्राणां मृदादिकारणकलापस्याभेदेऽपि कुम्भकारादिसंयोगाद्घटस्थाल्यादिप्रपञ्चभेदः' (आ० द०) ॥ ६ ॥

† 'आविलं घनम् । पर्युषितं रात्रौ पात्रे स्थापितम् । पिष्टमेहमाह—संहृष्टेत्यादि । तण्डुलादिकृतालेपनपिष्टवत् । संहृष्टरोमा रोमाञ्चितशरीरः । दिष्टमिश्रनेन श्वेतत्वं, श्लेष्मणः श्वेतत्वात् । सिकता वालुका । मलशब्देन श्लेष्मैवोच्यते, मधुरत्वान्मूत्रं मन्देन वेगेन शनैः प्रमेहति । एवं दश श्लेष्मणः । एते दोषदूष्यसंयोगगुणाद्विंशतिसंख्यां लभन्ते । उक्तं च तन्त्रान्तरे—"शीताच्छशीतैरुदकप्रमेहः स्यादिक्षुवाली मधुराच्छशीतात् । पित्तोत्कटः स्वच्छगुणात्सुराख्यो मूत्रेण युक्तः सिकताप्रमेहः ॥ मन्देन मूत्रेण शनैः प्रमेहो गुरोर्विदग्धाल्लवणप्रमेहः । पिष्टप्रमेहः खलु

संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितम् ।
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ॥ १० ॥
मूर्ताणून् सिकतामेही सिकतारूपिणो मलान् ।
शीतमेही सुबहुशो मधुरं भृशशीतलम् ॥ ११ ॥
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ।
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥ १२ ॥
(वा. नि. अ. १०)

अत्र कफस्य श्वेतशीतमूर्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्देषु गुणेषु मध्ये कुत्रचित् किंचिद्गुणप्रकर्षादुदकमेहादयो दश दश्यन्त इत्याह—अच्छमित्यादि । सान्द्रप्रसादस्त्वेक एव गुणो गणनीयः, सान्द्रमेहव्यपदेशस्त्वेकदेशेन भविष्यतीति । एतैश्च श्वेतादिभिर्गुणैर्व्यस्तैः समस्तैश्च योगाद्दश मेहा न तु यथाक्रमं, "येन गुणेनैकेनानेकेन वा भूयस्तरमुपसृज्यते तत्समाख्यं गौणं नामविशेषं प्राप्नोति" (च. नि. स्था. अ. ४)–इति चरकवचनात् । नच यथा दशभिर्गुणैर्दश मेहान् करोति तथा संसर्गविकल्पान्तरेणापरानपि कुतो न करोतीत्याशङ्कनीयं, भावस्वभावस्यापर्यनुयोज्यत्वात्, अदृष्टकल्पनायाश्चानर्हत्वात् । तत्र श्वेताच्छशीतैर्गुणैरुदकमेहः; मधुरशीताभ्यामिक्षुमेहः; सान्द्रपिच्छिलाभ्यां सान्द्रमेहः; अच्छेन पित्तानुरागिणा सुरामेहः; शुक्लेन पिष्टमेहः, अत्र पिष्टवदित्यालेपनपिष्टवत्; श्वेतस्निग्धाभ्यां शुक्रमेहः; अत्र शुक्राभमिति सर्वमेव मूत्रं शुक्रतुल्यं, शुक्रमिश्रं वेति शुक्राभशुक्रमिश्रं; वास्तवशुक्रमिश्रत्वे तु कफजस्याप्यसाध्यत्वं स्यादिति, वाप्यचन्द्रस्तु शुक्रस्य मूत्रेण गुणकृतं सादृश्यं, शुक्रमिश्रं वेति च शुक्रगुणानां संयुक्तसमवायान्मूत्रे दर्शनमित्याह; सान्द्रमूर्ताभ्यां सिकतामेहः, अत्र मूर्ताणूनिति मूर्तान् कठिनान्, अणून् अल्पान्; मलानिति बहुवचनं दोषाणामवयवबहुत्वात्, जात्याख्यायामेकस्मिन् बहुवचनमिति वाप्यचन्द्रः; मलोऽत्र प्रकरणात् कफः; गुरुमधुरशीतैः शीतमेहः; मन्दमूर्ताभ्यां शनैर्मेहः; पिच्छिलेन लालामेहः । चरके सुरामेहस्थाने सान्द्रप्रसादमेहः पठितः, तथा पिष्टमेहः शुक्लमेहशब्देन, तेनैव शीतमेहलालामेहौ पठितौ, पित्तजश्च कालमेहः; सुश्रुतस्तु चरकोक्तशीतमेहलालामेहयोः स्थाने फेनमेहलवणमेहौ, कालमेहस्थाने चाम्लमेहं पठितवान् । सामञ्जस्यं चात्र नास्त्येव, परस्परलक्षणसंवादाभावात्, स्मृतिद्वैध्यवत् सर्वं प्रमाणम् ॥ ७–१२ ॥

शुक्रभागात्समस्तसान्द्रेण तु सान्द्रमेहः ॥ स्निग्धेन शुक्रेण च शुक्रमेहः स्यात्फेनमेहो गुरुशुक्रयोगात् । श्लेष्मिरंशैः कफदोषजातैर्नृणां प्रमेहा दश संभवन्ति । औत्कट्यतोऽयं व्यपदेश एषु संसर्गभावो गुणदोषदृष्यात् । पित्तात्रीलहरिद्राम्लक्षारमाञ्जिष्ठशोणितैः । सर्पिर्मेहं मरुत्कुर्याद्युक्तश्च लवणेन हि ॥ मेदोयुक्तो वसायुक्तो वसामेहकरस्तु सः । क्षौद्रमेहे रौक्ष्यगुणाद्विप्रम्भो हस्तिमेहतः"–इति (आ० द०) ॥ ७–१२ ॥

---

१. 'अत्रान्तरशुक्रमिश्रत्वे' ख. ।

*गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ।
नीलमेहेन नीलाभं कालमेही मसीनिभम् ॥ १३ ॥
हारिद्रमेही कटुकं हरिद्रासंनिभं दहत् ।
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ॥ १४ ॥
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ।

(वा. नि. अ. १०)

पित्तात्तु षड्भिः पित्तलिङ्गैः क्षारनीलकालपीतलोहितविस्रैर्यथाक्रमं क्षारमेहादयः षट्, तान् गन्धवर्णरसस्पर्शैरित्यादिना दर्शयति—गन्धेत्यादि । नीलाभमिति चासपक्षप्रभं, चासः 'स्वर्णचूड' इति लोके ख्यातः, क्वचित् 'टाकुसना चासः' इति गदाधरः, तत्पक्षश्च स्निग्धनीलो भवति । दहदिति मूत्रविशेषणम् । दहन्निति पाठान्तरे दाहमनुभवन् पुरुषः ॥ १३ ॥ १४ ॥—

†वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ॥ १५ ॥
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ।
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ॥ १६ ॥
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम् ।
सलसीकं विबद्धं च हस्तिमेही प्रमेहति ॥ १७ ॥

(वा. नि. अ. १०)

वातेन यथाक्रमं वसामज्जौजोलसीकाभिर्यथाक्रमं वसामेहादयः; तानाह—वसेत्यादि । अत्र मज्जमेहः सुश्रुते सर्पिर्मेहनाम्ना, क्षौद्रमेहश्चरके मधुमेहनाम्ना पठितः ॥ १५–१७ ॥

‡अविपाकोऽरुचिश्छर्दिर्निद्रा कासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥ १८ ॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाऽम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥ १९ ॥
वातजानामुदावर्तः कम्पहृद्ग्रहलोलताः ।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥ २० ॥

(वा. नि. अ. १०)

---

* 'गन्धादिभिः क्षारतोयवत् क्षारमेहेन । विस्रं विस्रगन्धि । एवं षट् पैत्तिकाः । सर्वत्र मूत्रमिति योज्यम्' (आ० द०) ॥ १३ ॥ १४ ॥

† 'वसा मांसस्नेहः, वसामिश्रं वसामिलितं, वसाभं वसातुल्यं, मुहुर्मूत्रयेत् । मज्जमेहमाह—मज्जाभमित्यादि । सुश्रुतेऽयं सर्पिर्मेहनाम्ना पठितः, शेषं पूर्ववद्व्याख्येयम् । हस्तिमेहमाह—हस्तीत्यादि । अजस्रमनवरतं, वेगविवर्जितं वेगरहितं, सलसीकं लसीकया सह, विबद्धं पिण्डीभूतमिव' (आ० द०) ॥ १५–१७ ॥

‡ 'सपीनसः प्रतिश्याययुक्तः, वस्तिर्मूत्राशयः, मेहनं मेढ्रं, विड्भेदो भिन्नपुरीषता । शूलं वस्तिमेहनयोरेव, कासोऽत्र शुष्कः' (आ० द०) ॥ १८–२० ॥

इदानीं कफजादिमेहानां कृच्छ्रसाध्यत्वमसाध्यत्वं च ज्ञापयितुं भेदेनोपद्रवानाह—अविपाकोऽरुचिरित्यादि। कफजे कास आर्द्रः, वातजे शुष्कः। तोदः संसर्गिवातजन्यः, मेहानां त्रिदोषजन्यत्वात्। मुष्कावदरणं पाकेन। अम्लिका अम्लोद्गारः। लोलता सर्वरसभक्षणेच्छा; इयं तु प्रभावाद्धातुक्षयाद्वा भवति, यथा वातग्रहण्यां 'गृद्धिः सर्वरसानां' इत्युक्तम् ॥ १८-२० ॥

यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव च।
पिडकापीडितं गाढः प्रमेहो हन्ति मानवम् ॥ २१ ॥
(सु. सू. अ. ३३)

असाध्यतामाह—यथोक्तोपद्रवाविष्टमित्यादि। उक्तैरविपाकादिभिरन्यैश्च सुश्रुताद्युक्तैरुपद्रवैः; तद्यथा—कफजे आलस्यास्योपदेहशैथिल्यकफप्रसेकमक्षिकोपसर्पणादिकं, पित्तजे पाण्डुरोगादिकम्। अतिप्रस्रुतमिति अतिशयं धातुमूत्रस्रावयुक्तम्। पिडकापीडितमिति शराविकादिपिडकापीडितम्। गाढः कालप्रकर्षात्। यद्यपि पिडका अप्युपद्रवत्वेनाभिमताः; यदुक्तं चरके,—"उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वरदाहदौर्बल्यारोचकाविपाकाः पूतिमांसपिडकालजीविद्रध्यादयः" (च. नि. स्था. अ. ४)—इति, तथाऽपि पिडकानां पृथगुत्पादसूचनार्थं पृथक्करणम्। उक्तं च चरके,—"विना प्रमेहमप्येता जायन्ते दुष्टमेदसः" (च. सू. स्था. अ. १७)—इति। अन्यदप्यसाध्यलक्षणं बोद्धव्यम्। यदाह चरकः,—"सपूर्वरूपाः कफपित्तमेहाः क्रमेण ये वातकृताश्च मेहाः। साध्या न ते पित्तकृतास्तु याप्याः साध्यास्तु मेदो यदि न प्रदुष्टम्" (च. चि. स्था. अ. ६)—इति। अस्यार्थः,—ये कफजाः साध्यास्ते सपूर्वरूपाः सन्तोऽसाध्याः, पित्तकृतास्तु याप्या ये ते सपूर्वरूपा एवासाध्याः। सर्वरोगाणामेव यद्यपि पूर्वरूपानुवृत्तावसाध्यत्वमुक्तं, तथाप्यत्रासकलपूर्वरूपान्वयेऽसाध्यत्वं, अन्यत्र तु सकलपूर्वरूपान्वये सतीति विशेषः। क्रमेणेति स्वनिदानक्रमेण। तेन निजहेत्वादिकृता ये वातजाश्चत्वारो मेहास्ते पूर्वरूपरहिता अपि नहि साध्याः, ये तु पश्चाद्वालपकर्षणाद्वातानुबन्धेन वातजास्ते साध्या याप्या वा। अत एवोक्तं,—"या वातमेहान् प्रति पूर्वमुक्ता वातोल्बणानां विहिता क्रिया सा" (च. चि. स्था. अ. ६)—इत्यादि ॥२१॥

जातः प्रमेही मधुमेहिनो वा
न साध्य उक्तः स हि बीजदोषात्।
ये चापि केचित्कुलजा विकारा
भवन्ति तांस्तान् प्रवदन्त्यसाध्यान् ॥ २२ ॥
(च. चि. अ. ६)

असाध्यतायाः प्रकारान्तरमाह—जात इत्यादि। श्लेष्ममेदसोरतिदुष्ट्या मूत्रमेदःश्लेष्मणामतिमाधुर्यान्मधुमेहिना जातो यः प्रमेही स चाप्यसाध्यो भवतीति। बीजदोषादिति प्रमेहारम्भकदोषदुष्टबीजजातप्रमेहित्वात्। मधुमेहशब्देन चात्र मेहमात्रमुच्यते, यदि तु वातिक उपेक्षितो वा मेहो मधुमेह उच्यते, तदा चेतरप्रमेहयुक्तमातृपितृजनितप्रमेहिणो नासाध्यत्वमुक्तं स्यात्; किंच मधुमेहिना जनितस्य

मधुमेहित्वमेव कारणानुरूपतया युक्तं, ततश्च मधुमेही मधुमेहिना (वा) जातो न साध्य इति वक्तुमुचितं; तस्यासाध्यत्वमपि न वक्तव्यं, मधुमेहस्यासाध्यत्वादेव। अन्यत्रापि मधुमेहशब्देन मेहमात्रमुक्तम्। यथा,—"गुल्मी च मधुमेही च राजयक्ष्मी च यो नरः। अचिकित्स्या भवन्त्येते बलमांसपरिक्षयात्" (च. इं. स्था. अ. ९)—इति। यदि ह्यत्र मधुमेहोऽभीष्टः स्यात्तदा बलमांसपरिक्षयादिति न कृतं स्यात्, तस्य स्वरूपत एवासाध्यत्वात्। यथा कियन्तःशिरसीयाध्याये—"उपेक्षयाऽस्य जायन्ते पिडका माधुमेहिकाः" (च. सू. स्था. अ. १७)—इत्यादिना या मधुमेहसंबन्धित्वेनोक्तास्ता एव "प्रमेहिणां याः पिडका मयोक्ताः" (च. चि. स्था. अ. ६)—इत्यन्तेन च चिकित्सास्थाने प्रमेहिमात्रसंबन्धितयाऽनूद्य चिकित्सायां संयोजिताः। तस्माद्भाविनीं मधुमेहतामाश्रित्य सर्वे एव मेहा मधुमेहशब्दवाच्याः। उक्तं हि **वाग्भटे**,—"मधुरं यच्च मेहेषु प्रायो मध्विव मेहति। सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः" (वा. नि. स्था. अ. १०)—इति। **गदाधरेण** तु पिडकासंबन्धेनैव मधुमेहत्वमुक्तं यतश्चरके कियन्तःशिरसीयाध्याये (च. सू. स्था. अ. १७) मधुमेहमभिधाय पिडका उक्ता इति। तन्न मनोहरं, तत्र मधुमेहशब्देन प्रमेहमात्राभिधानात्। यदि तु मधुमेह एवाभीष्टः स्यात्, तदा 'उपेक्षयाऽस्य जायन्ते'—इत्युपेक्षणाभिधानमनुपपन्नं स्यात्, पिडकानां च मधुमेहभवानां चिकित्सोपदेशो व्यर्थः स्यादिति। कुलजमेहस्यासाध्यताप्रसङ्गेनापरेषामपि कुलजानामसाध्यत्वमाह—ये चापीत्यादि। केचिदिति कुष्ठादयः। कुलजा इति पितृपितामहादिसंभूताः। एतेन प्रमेहिपितृपितामहमातामहस्यापि प्रमेहमसाध्यं दर्शयति। ननु, यस्य पितामहः प्रमेही तस्य पिताऽपि प्रमेही, प्रमेहिजातत्वात्; तथाच सति 'जातः प्रमेही मधुमेहिनो वा न साध्य उक्तः स हि बीजदोषात्'—इत्यनेनैव गतार्थम्। नैवं न हि प्रमेहिना जात इत्येतावता उत्पन्नमात्र एव प्रमेही भवति, किं तर्हि कालवशेन दुष्टेरभिव्यक्त्या; यथा—कुष्ठिजातस्य कुष्ठं; एतेन यदाऽनतिदुष्टबीजेन प्रमेहिजातेन पित्रा जन्यते पुरुषः प्रमेही सोऽप्यसाध्य इति। कुलजा इत्यनेनैव मेहस्याप्यसाध्यतायां लब्धतायां पुनस्तद्वचनं प्रमेहाणां प्रायेण सन्तानानुबन्धित्वप्रदर्शनार्थम्। उक्तं च,—'प्रमेहोऽनुषङ्गिनाम्' (च. सू. स्था. अ. २५)—इति ॥ २२ ॥

***सर्वे एव प्रमेहास्तु कालेनाप्रतिकारिणः।**
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥ २३ ॥
(सु. नि. अ. ६)

मधुमेहे मधुसमं जायते स किल द्विधा।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ॥ २४ ॥

* 'सर्व एव प्रमेहा अप्रतिकारिणः प्रतिकारमकुर्वतः पुंसः कालेन मधुमेहत्वमायान्ति, तदाऽसाध्या भवन्ति'। स च द्विधा भवति, एको धातुक्षयात् कुपितवायौ, धातुक्षयकुपितवातजस्य तु मधुमेहस्य केवलवातमेहलिङ्गं; यदुक्तं—"कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः।

१ कुष्ठीति पाठान्तरम्।

आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन्।
क्षणात्क्षीणः क्षणात्पूर्णो भजते कृच्छ्रसाध्यताम् ॥ २५ ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति।
सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः ॥ २६ ॥
(वा. नि. अ. १०)

उपेक्षया हि पित्तकफजानामपि मधुमेहत्वं प्रदर्शयितुमाह—सर्व एवेत्यादि। धातुक्षयावरणाभ्यां कुपितवातेन मधुमेहसंभवमाह—मधुमेह इत्यादि। मधुसममिति 'मूत्रं' इति शेषः। स इति मधुमेहः। सावरणलिङ्गमाह—आवृत इत्यादि। आवृत इति आवृतवातकृतः। दोषलिङ्गानीति येन पित्तादिना आवृतस्तस्य वातस्य च लिङ्गानि प्रदर्शयति। अनिमित्तमकस्मात्। क्षीणः क्षणात् क्षणात्पूर्ण इति आवरणेन पुनः पूर्णो भवन् कृच्छ्रसाध्यो भवति। तथाच चरकः,—"समारुतस्य पित्तस्य कफस्य च मुहुर्मुहुः। दर्शयत्याकृतिं गत्वा क्षयमाप्याय्यते पुनः" (च. सू. स्था. अ. १७)—इति। धातुक्षयकुपितवातजस्य तु केवलवातजमेव लिङ्गम्। गदाधरस्त्वाह—मधुमेहः सावरणवायुनैव क्रियते। यदाह चरकः,—"तैरावृतगतिर्वायुरोज आदाय गच्छति। यदा बस्तिं तदा कृच्छ्रो मधुमेहः प्रवर्तते" (च. सू. स्था. अ. १७)—इति। केवलवातजेषु तु कषायादिवमनाद्यतियोगादिकृतेषु धातुक्षयजेषु वायोरावरणं नास्तीति भेदः। मधुमेहशब्दप्रवृत्तौ निमित्तमाह—मधुरं यच्च मेहेष्वित्यादि ॥ २३–२६ ॥

*शराविका कच्छपिका जालिनी विनताऽलजी।
मसूरिका सर्षपिका पुत्रिणी सविदारिका ॥ २७ ॥
विद्रधिश्चेति पिडकाः प्रमेहोपेक्षया दश।
सन्धिमर्मसु जायन्ते मांसलेषु च धामसु ॥ २८ ॥
(वा. नि. अ. १०)

प्रमेहोपेक्षया पिटकासंभवं दर्शयितुमाह—शराविकेत्यादि। इह दशपिडकासु विनतायाः पाठो भोजविरुद्धः, भोजे हि नव पिडकाः; तद्यथा,—"शराविका सर्षपिका कूर्मिका जालिनी तथा। कुलत्थिकाऽलजी पुत्री विदारी विद्रधी तथा ॥ नवैताः पिटका ज्ञेयाः"—इत्यादि। कुलत्थिका भोजे मसूरिका ज्ञेया; किंतु भोज एव विनता न्यूनेति वक्तुं दुष्करं, सुश्रुते चरके च विनताया दर्शनात्। चरके तु सप्त पिडकाः। तद्यथा,—"शराविका कच्छपिका जालिनी सर्षपी तथा। अलजी विनताख्या च विद्रधी चेति सप्तमी" (च. सू. स्था. अ. १७)—इति। तत्र प्रायोभावात् ससानामभिधानम्। यतस्तेनैव कियन्तःशिरसीये "तथाऽन्याः पिडकाः सन्ति" इत्यादिनाऽ-

अथः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः"—इति; अपरस्तु दोषैरावृतपथे, येन पित्तादिना दोषेणावृतश्च भवति तस्य लिङ्गं लक्षणं दर्शयति। ततोः शरीरस्य माधुर्यात्; अतः सर्व एव प्रमेहा मधुमेहाख्यां लभन्ते' (आ० द०) ॥ २३–२६ ॥

* 'प्रमेहोपेक्षयाऽप्रतिक्रियमाणेषु कालप्रकर्षादित्यर्थः। संधिमर्मसु संध्याश्रितेषु मर्मसु, अन्ये संधौ मर्मसु चेति व्याख्यानयन्ति' (आ० द०) ॥ २७ ॥ २८ ॥

धिकपिडकासंभवः सूचितः। प्रमेहोपेक्षयेत्यभिधानं मधुमेहेन प्रमेहमात्रेण च पिडकासंभवं दर्शयति। अत एव "विना प्रमेहमप्येताः" (च. सू. स्था. अ. १७)- इत्यत्र प्रमेहमात्रग्रहणं कृतम्। धामस्विति स्थानेषु ॥ २७ ॥ २८ ॥

*अन्तोन्नता तु तद्रूपा निम्नमध्या शराविका।
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी ॥ २९ ॥
सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः।
जालिनी तीव्रदाहा तु मांसजालसमावृता ॥ ३० ॥
अवगाढरुजाक्लेदा पृष्ठे वाऽप्युदरेऽपि वा।
महती पिडका नीला विनता नाम सा स्मृता ॥ ३१ ॥
महत्यल्पाचिता ज्ञेया पिडका चापि पुत्रिणी।
मसूराकृतिसंस्थाना विज्ञेया तु मसूरिका ॥ ३२ ॥
रक्ता सिता स्फोटचिता दारुणा त्वलजी भवेत्।
विदारीकन्दवद्वृत्ता कठिना च विदारिका ॥ ३३ ॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा।
(सु. नि. अ. ६)

सर्वासामाकृतिमाह—अन्तोन्नतेत्यादि। तद्रूपेति शरावरूपा। अल्पाचिता अल्पपिडकान्तराचिता। विद्रधेर्लक्षणैर्युक्तेत्यभिधानेन विद्रधेरस्या भेदो बोध्यः ॥२९-३३॥

†ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तन्मयाः ॥ ३४ ॥
(सु. नि. अ. ६)

विना प्रमेहमप्येता जायन्ते दुष्टमेदसः।
तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहः ॥ ३५ ॥
(च. सू. अ. १७)

पिडकानामारम्भककारणमाह—ये यन्मया इत्यादि। तन्मया इति निर्देशः क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति ङीपं बाधित्वा टापा साधनीयः। तद्दोषं मत्वा कैश्चित् 'तत्कृताः' इति पाठान्तरं कृतम्। अयमत्र पिण्डार्थः—यो यद्दोषोल्बणो मेहस्तद्दोषोल्बणेनैव पिडका भवन्ति। ननु, जालिन्यां तीव्रदाहः पठितः, स च पित्त-

* 'अन्ते उन्नता मध्ये निम्ना, तद्रूपा शरावरूपा। कच्छपिकामाह—सदाहेत्यादि। दाहयुक्ता कूर्माऽऽकारा। जालिनीमाह—जालिनीत्यादि। अतिशयदाहयुक्ता मांसजालैर्व्याप्तेव, अस्या लक्षणं तन्त्रान्तरे—"परस्पराभिसंबन्धात्पिडका चैकदेशजा। पित्तोत्कटा दाहवती भृशरुग्जालिनी मता"—इति। विनतामाह—अवगाढेत्यादि। अवगाढरुजाक्लेदा अन्तर्निविष्टवेदनाक्लेदा पृष्ठे वा जठरे वा जायते। महती स्थूला, नीला नीलवर्णा। विदारिका पिडका विदारीकन्दवद्वृत्ता परिवर्तुला, कठिना अश्मवत्' (आ० द०) ॥ २९-३३ ॥

† 'ये मेहा यन्मया यद्दोषारब्धास्तेषां मेहानामेताः पिडकास्तन्मयास्तद्दोषमया वा वाच्याः। श्लेष्मजेषु श्लेष्मजाः, पित्तजेषु पित्तजाः, वातजेषु वातजाः। कदाचित्प्रमेहान् विनाऽपि वातादिदुष्टमेदसः पुरुषस्य जायन्ते, एतास्तावन्न ज्ञायन्ते, यावद्वास्तुपरिग्रहो वास्त्वधिष्ठानं न भवति' (आ० द०) ॥ ३४ ॥ ३५ ॥

कृतः, भोजेऽपि जालिनी पित्तकृतैव पठिता,—यथा,—"परस्पराभिसंबन्धा पिडका चैकदेशजा। पित्तोत्कटा दाहवती मृदुरुग् जालिनी मता"—इति। तत्कथं जालिन्यां पित्तजत्वनियमाद्ये यन्मयेत्यादिग्रन्थार्थसंगतिः? नैवं, प्रचुरपिडकानां तन्मयत्वेन बाहुल्येनाभिधानं; यथा—छत्रिणो गच्छन्तीति गदाधरः; किंवा स्वमहिम्ना जालिनी पित्तप्रधाना भवति, श्लेष्मवातजमेहभवत्वेन श्लेष्मवातप्रधाना च तेन दोषत्रयप्रधानत्वात् सर्वदा सा भवति। अन्यस्त्वाह,—तीव्रदाहत्वं पित्तोत्कटत्वं च पैत्तिकमेहजायां जालिन्यामवगन्तव्यं, अन्यमेहजा त्वन्यदोषोत्कटा निर्दाहा च। अत एव चरके जालिनी कफोल्वणा निर्दाहा एव पठिता। तद्यथा,—"शराविका कच्छपिका जालिनी चेति दुःसहाः। जायन्ते ता ह्यतिबलाः प्रभूतश्लेष्ममेदसाम्॥ स्तब्धा सिराजालवती स्निग्धस्रावा महाश्रया। रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी" (च. सू. स्था. अ. १७)—इति। न चातिप्रसक्तिः, उक्तं हि चरके समर्थ्यते, अस्मिंश्च समाधाने ये यन्मया इत्यादि न व्याहन्यते। चरकभोजवचनयोश्चाविरोधार्थं यत्नान्तरं मृग्यम्। कार्तिकस्त्वाह,—पाककाले पित्तोत्कटत्वं, "तस्माद्धि सर्वान् परिपाककाले पचन्ति शोथांस्त्रय एव दोषाः" (सु. सू. स्था. अ. १७)—इति वचनात्; एतत्तु सर्वत्राविशेषान्नाद्रियते॥ ३४॥ ३५॥

*गुदे हृदि शिरस्यंसे पृष्ठे मर्मसु चोत्थिताः।
सोपद्रवा दुर्बलाग्नेः पिडकाः परिवर्जयेत्॥ ३६॥

(सु. नि. अ. ६)

इति श्रीमाधवकरविरचिते माधवनिदाने प्रमेहप्रमेहपिडकानिदानं समाप्तम्॥ ३३॥

असाध्यपिडकालक्षणमाह—गुद इत्यादि। सोपद्रवा इति उपद्रवाश्च तृट्कासादयः। यथाह चरकः—"तृट्कासमांससंकोचमोहहिक्कामदज्वराः। विसर्पमर्मसंरोधाः पिडकानामुपद्रवाः" (च. सू. स्था. अ. १७)—इति। पिडकास्तु प्रायेणाधःकाय एव, दोषदूष्याणामधःप्रसरणात्, "रसायनीनां च दौर्बल्यान्नोर्ध्वमुत्तिष्ठन्ति प्रमेहिणां दोषाः"—(सु. चि. स्था. अ. १२) इति वचनाच्च। केचिदाहुः—स्त्रीणां प्रमेहो न भवतीति। तथाच तन्त्रान्तरे,—"रजःप्रसेकान्नारीणां मासि मासि विशुध्यति। सर्वं शरीरं दोषाश्च न प्रमेहन्त्यतः स्त्रियः"—इति। किंतु स्त्रीषु प्रमेहदर्शनात्, एतद्धेतुबलादन्यरोगासंभवत्वाच्चैतत् प्रायोवादमाश्रित्योक्तम्। मेहनिवृत्तिलक्षणं च सुश्रुते पठितम्। तद्यथा,—"प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम्। विशदं तिक्तकटुकं तदाऽऽरोग्यं प्रचक्षते" (सु. चि. स्था. अ. १२)—इति॥ ३६॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां प्रमेहप्रमेहपिडकानिदानं समाप्तम्॥ ३३॥

---

* 'अंसे बाहुमूले, मर्मसु शरीरोक्तेषु, मेहरक्तपित्तयोर्व्यक्तिमाचष्टे वाग्भटः—"हारिद्रवर्णं रक्तं वा मेहप्राग्रूपवर्जितम्। यो मूत्रयेन्न तं मेहं रक्तपित्तं तु तं विदुः"—इति' (आ० द०)॥३६॥

अथ मेदोरोगनिदानम् ।

*अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽन्नरसः प्रायः स्नेहान्मेदः प्रवर्धयेत् ॥ १ ॥
मेदसाऽऽवृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः ।
मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु ॥ २ ॥
क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः ।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ॥ ३ ॥
मेदस्तु सर्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥ ४ ॥
मेदसाऽऽवृतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि ॥ ५ ॥
तस्मात् स शीघ्रं जरयत्याहारमभिकाङ्क्षति ।
विकारांश्चाप्नुते घोरान् कांश्चित् कालव्यतिक्रमात् ॥ ६ ॥
एतावुपद्रवकरौ विशेषादग्निमारुतौ ।
एतौ तु दहतः स्थूलं वनदावो वनं यथा ॥ ७ ॥
मेदस्यतीव संवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥ ८ ॥
मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥ ९ ॥

(च. सू. अ. २१)

इति श्रीमाधवकरविरचिते माधवनिदाने मेदोनिदानं समाप्तम् ॥ ३४ ॥

'विना प्रमेहमप्येता जायन्ते दुष्टमेदसः' इत्यत्र मेदःसंकीर्तनान्मेदोदुष्टेरभिधानं; मेदोदुष्टा च स्थौल्यम् । मधुरोऽन्नरस इति मधुरतामापन्न आम एवान्नरसः संभवन् स्नेहान्मेदो जनयति । सुश्रुतेऽप्युक्तं,—"आम एवान्नरसो मधुरतरश्च भवति"—इत्यादि । ननु, मेदस्विनस्तीक्ष्णाग्नित्वात् कथमाम एवान्नरसो भवति ? यदुक्तं चरके,—

---

* 'अव्यायामादिसेविनः पुरुषस्य प्रायो बाहुल्येनाम एव मधुरोऽन्नरसः मेदो वर्धयति । तस्यातिवृद्धां वृद्धिमाह—मेदसेत्यादि । अन्ये धातवो रसादयः शुक्रान्ता न पुष्यन्ति, मेद एवातिवृद्धिं गच्छति । क्रथनं तस्य कण्ठे घुर्घुरत्वं, सादनं शरीरस्य, क्षुत्पिपासा, अल्पप्राणो हीनबलः, अल्पमैथुनः शुक्रस्याप्रवृद्धत्वात् । दीप्ताग्नित्वादाहारमभिलषति । कोष्ठान्तः रुद्धमार्गत्वात् प्रवृद्धावग्निमारुतौ विनाशाय भवत इत्यत आह—एतावित्यादि । विशेषात्प्रवृद्धावेतौ रोगोत्पादकौ भवतः । एतौ हि स्थूलं नरं नाशयतः, यथा दावाग्निर्वनम् । पुनरतिप्रवृद्धस्य मेदसो निःशेषहेतुमाह—मेदसीत्यादि । विकारान् पूर्वोक्तानेव । स्थूललक्षणमाह—स्फिगूर्वोरुपरितनो भागः' (आ० द०) ॥ १-९ ॥

"चरन् सन्धुक्षयत्यग्निं" (च. सू. स्था. अ. २१)—इति । अग्नौ च मन्दे आमोत्पादः, यदाह,—"आमाशयस्थः कायाग्नेर्दौर्बल्यादविपाचितः । आद्य आहारधातुर्यः स आम इति कीर्तितः"—इति । उच्यते, श्लेष्मलाहाराध्यशनशीलत्वेन कदाचित् कालव्यतिक्रमभोजनेन च बहुविकारकरणाग्निव्यापत्तेरन्नरसस्यामतुल्यता, अथवा मधुरतरान्नरसोपलिप्तेऽन्नवहस्रोतसि सर्व एवान्नरसो मधुरतरो निष्पद्यते, यथा पित्तयुक्तेऽन्नवहस्रोतसि मधुररसस्यापि विदाहः । यदुक्तं,—"स्रोतस्यन्नवहे पित्तं पक्तौ वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते" (सु. सू. स्था. अ. ४६)—इति; स चामतुल्यत्वादाम इत्युच्यते । अशक्तः सर्वकर्मस्विति मेदसः सौकुमार्यात् । क्षुद्रश्वासः 'रूक्षायासोद्भव' इत्यादिनाऽभिहितः । कथनमकस्मादुच्छ्वासावरोधः । मेदसेत्यादि चरन् सन्धुक्षयत्यग्निमिति मेदोरुद्धमार्गत्वात् कुम्भकारपवनन्यायेनान्तर्बलवान् वृद्धो वायुरग्निं दीपयति । अतिवृद्धस्तु वायुरग्निवैषम्यजनकः । विकारांश्चाप्नुते घोरानिति वातविकाराणामन्यतमान्; कालव्यतिक्रमात् भोजनकालव्यतिक्रमात् । विकारान् दारुणानिति प्रमेहपिडकाज्वरभगन्दरविद्रधिवातरोगाणामन्यतमान् । अयथोपचयोत्साह इति अयथावन्मांसोपचय उत्साहश्च यस्य स तथा ॥ १–९ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां मेदोनिदानं समाप्तम् ॥ ३४ ॥

अथोदरनिदानम् ।

*रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि च ।
अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसंचयात् ॥ १ ॥
(वा. नि. अ. १२)

उदरोत्सेधसाधर्म्यादुदरनिदानम् । उदरस्य विशेषेण वह्निदुष्टिजन्यत्वमाह—रोगा इत्यादि । अग्निमान्द्यं च दोषत्रयजनकम् । यदुक्तं—"वर्षास्वग्निबले हीने कुप्यन्ति पवनादयः" (च. सू. स्था. अ. ६)—इति । मलिनैरिति अत्यर्थदोषजनकैर्विरुद्धाध्यशनादिभिः । मलसंचयादिति मला दोषाः पुरीषादयश्च, तेषामतिवृद्धत्वात् । तन्त्रान्तरं च,—"अतिसंचितदोषाणां पापं कर्म च कुर्वताम् । उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः"—इति । यद्यपि मन्दाग्नित्वमलिनान्नत्वयोः प्रत्येकमपि दोषत्रयजनकत्वमस्ति तथाऽप्यत्रोभयहेतुजनकत्वेन दोषदुष्टिप्रकर्षः ख्याप्यते, अत एव दुष्टिप्रकर्षख्यापनार्थं मलसंचयादित्यत्र संपूर्वं कृतवान् ॥ १ ॥

* 'अथोदरस्थो रोगोऽप्युदरशब्देनोच्यते । उक्तं च—"तास्थ्यतद्धर्मताभ्यां च तत्समीपतयाऽपि च । तत्साहचर्याच्छब्दानां वृत्तिरेषा चतुर्विधा"—इति' (आ० द०) ॥ १ ॥

*रुद्ध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि संचिताः ।
प्राणाग्न्यपानान् संदूष्य जनयन्त्युदरं नृणाम् ॥ २ ॥
(च. चि. अ. १८)

संप्राप्तिमाह—रुद्ध्वेत्यादि । स्वेदाम्बुवाहीनीति स्वेदवहान्यम्बुवहानि च । अनयोश्च भेदः, "उदकवहानां स्रोतसां तालु मूलं क्लोम च; स्वेदवहानां स्रोतसां मेदो मूलं, लोमकूपाश्च" (च. वि. स्था. अ. ५)–इत्यनेनोक्तो ज्ञेयः । स्रोतोरोधश्चात्र बहिरेव न पुनरन्तः । यदुक्तं चरके,–"स्वेदस्तु बाह्येषु स्रोतःसु प्रतिहतगतिस्तिर्यग्गवतिष्ठमानस्त एवोदकमाप्याययति"–(च. चि. स्था. अ. १३) इति । अत एवोदरपूर्णताऽन्तरसेन । प्राणाग्नीति पुनरग्निदूषणाभिधानेन मन्दस्याप्यग्नेः पुनर्दोषकृतं सुतरां मान्द्यं बोधयति । दोषसंचयगतेनापि वायुना प्राणापानयोर्दूषणं न विरुद्धं, यतो वायुना वाय्वन्तरदुष्टिः क्रियत एव । सुश्रुते तु पूर्वरूपमप्युक्तं, तद्यथा,–"तत्पूर्वरूपं बलवर्णकाङ्क्षावलीविनाशो जठरे हि राज्यः । जीर्णापरिज्ञानविदाहवत्यो बस्तौ रुजः पादगतश्च शोथः" (सु. नि. स्था. अ. ७)–इति ॥ २ ॥

†आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता ।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ॥ ३ ॥
दाहस्तन्द्रा च सर्वेषु जठरेषु भवन्ति हि ।
पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ॥ ४ ॥
संभवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ।
(सु. नि. अ. ७)

उदराणां सामान्यरूपमाह–आध्मानमित्यादि । दुर्बलाग्नितेति मन्दोऽग्निर्यद्यप्यत्र हेतुस्तथाऽप्यग्नेरतिशयदौर्बल्यं लिङ्गत्वेन ज्ञेयम् । उदराण्यष्टाविति यकृद्दाल्युदरस्य प्लीहोदरेण सार्धं समानचिकित्स्यतया तथोत्पत्तिविशिष्टदकोदरात् क्रमेण भूतदकोदरस्यापि समानलिङ्गचिकित्सितत्वेनाभिन्नत्वादष्टावेवोदराणि भवन्ति । प्लीहोदरादीनि च यद्यपि चत्वारि दोषजानि, तथाऽपि हेतुलिङ्गचिकित्साभेदात् पृथगुक्तानि ॥ ३ ॥ ४ ॥—

‡तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु ॥ ५ ॥
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम् ।
(च. चि. अ. १८)

---

* 'दोषाः स्वेदाम्बुवाहीनि स्रोतांसि रुद्ध्वा प्राणाग्न्यपानान् संदूष्योदरमुत्पादयन्ति । प्राणेत्यादि प्राणो वायुरग्निश्च, अपानो वायुः, एतान्; दुष्टेन वायुनाऽदुष्टस्यान्तर्वायोर्दुष्टिः क्रियत एव' (आ० द०) ॥ २ ॥

† 'सदनं सादः । वातपुरीषयोः सङ्ग इति अप्रवृत्तिः । तेषां संख्यामाह–पृथगित्यादि । वातपित्तकफैस्त्रयः, त्रिभिरेकः प्लीहा बद्धेन क्षतेनोदकेन चैकैकः, एवमष्टावेवोदराणि' (आ० द०) ॥ ३ ॥ ४ ॥—

‡ 'हस्तपादादिषु श्वयथुः, कुक्ष्यादिषु च पीडा, उदरस्य वामदक्षिणभागे कुक्षिः, पर्वभेदनं सन्धिस्फुटनं, अधो नाभेरधः पक्वाशये गुरुता, मलसंग्रहः पुरीषस्याप्रवृत्तिः । त्वगादिषु

शुष्ककासोऽङ्गमर्दोऽधोगुरुता मलसंग्रहः ॥ ६ ॥
श्यावारुणत्वगादित्वमकस्माद्वृद्धिह्रासवत् ।
सतोदभेदमुदरं तनुकृष्णसिराततम् ॥ ७ ॥
आध्मातदृतिवच्छब्दमाहतं प्रकरोति च ।
वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतोगतिः ॥ ८ ॥
(वा. नि. अ. १२)

वातोदरलक्षणमाह—तत्रेत्यादि । अकस्माद्वृद्धिह्रासवदिति अनियतवृद्धिह्रासयुक्तमुदरम् । आध्मातदृतिवदिति वातपूर्णचर्मपुटवदिति ॥ ५-८ ॥

*पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता ।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् ॥ ९ ॥
पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते ।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते ॥ १० ॥
(वा. नि. अ. १२)

पैत्तिकमाह—पित्तेत्यादि । दह्यत इति उदरमात्रं दह्यते । दाहस्तु सकलदेहस्यैव बोद्धव्यः । धूमायते धूम इवोर्ध्वमेति । क्षिप्रपाकमिति क्षिप्रपाकाज्जलोदरतां यातीत्यर्थः । प्रदूयते व्यथते ॥ ९ ॥ १० ॥

†श्लेष्मोदरेऽङ्गसदनं स्वापः श्वयथुगौरवम् ।
निद्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ॥ ११ ॥
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरम् ॥ १२ ॥
स्त्रियोऽन्नपानं नखलोममूत्रविडार्तवैर्युक्तमसाधुवृत्ताः ।
यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ॥ १३ ॥
तेनाशु रक्तं कुपिताश्च दोषाः कुर्युः सुघोरं जठरं त्रिलिङ्गम् ।
तच्छीतवाते भृशदुर्दिने च विशेषतः कुप्यति दह्यते च ॥ १४ ॥
(वा. नि. अ. १२)

श्यावारुणत्वं, आदिशब्देन नखनेत्रग्रहणम् । अकस्माद्दृतिह्रासवदिति दृतिश्चर्मखल्ली, हस्ताहतवातपूर्णदृतिवच्छब्दं करोति, उदरमिति शेषः । सर्वतोगतिः सर्वकोष्ठगतो वायुः सरुक्शब्दो धावति' (आ० द०) ॥ ५-८ ॥

* 'तिक्तास्यता तिक्तमुखत्वं, 'कटुकास्यता' इति पाठान्तरम् । भ्रमोऽत्र शक्रादौ भीतस्थानमिति, हरित् शाकवर्णनम्' (आ० द०) ॥ ९ ॥ १० ॥

† 'अङ्गसदनमङ्गसादः । स्वापोऽङ्गानामेव, अन्ये आसीनप्रचलायितम् । गौरवमङ्गानाम् । निद्रा निद्राबाहुल्यम् । उत्क्लेशो हृल्लासः । स्तिमितं निश्चलम् । शुक्लसिरानद्धम्' । चिराभिवृद्धिरिति चिरपाकमित्यर्थः । गुरु गौरवयुक्तम् । स्थिरं गुडगुडाशब्दरहितम्' (आ० द०)

'स्त्रियो नखरोमादिभिर्युक्तं यस्मै अन्नपानं प्रयच्छन्ति; असाधुवृत्ताः सौभाग्यमिच्छन्त्यः

१ अयमेवमेव पाठमूरीकरोति । २ एतच्च—"चिराभिवृद्धिः कठिनम्" इतिपाठाभिप्रायेण ।

स चातुरो मुह्यति हि प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च ।
दूष्योदरं कीर्तितमेतदेव,

(सु. नि. अ. ७)

सन्निपातोदरमाह—स्त्रिय इत्यादि । स्त्रीग्रहणमविवेकिसंनिहितजनोपलक्षणम् । गरं संयोगजं विषम् । दुष्टमम्बु सगरप्राणितृणपर्णादिकोथयुतं, विषमेवाम्न्याद्युपहतं मन्दप्रभावं वा दूषीविषमुच्यते । यदुक्तं,—"जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति" (सु. क. स्था. अ. २)—इति । तेनाशु रक्तमिति विषस्याग्नेयत्वेन रक्तदुष्टिः । कुपिताश्च दोषा इति स्वभावाद्दोषत्रयप्रकोपकं विषं भवति । तच्छीतवातादिषु कुप्यतीति । दूष्योदरं कीर्तितमेतदेवेति एतदेव सन्निपातोदरं दूष्योदरं कीर्तितं, न पुनरधिकमित्यर्थः । रक्तं दूष्यं दूषयित्वा भवतीति दूष्योदरं; किंवा परस्परं दूषयन्तीति दोषा एव दूष्यास्तैः कृतमुदरमिति ॥ ११–१४ ॥—

*प्लीहोदरं कीर्तयतो निबोध ॥ १५ ॥

विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च ।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ प्लीहोत्थमेतज्जठरं वदन्ति ॥ १६ ॥
तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः ।
सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं तदेव ॥ १७ ॥

(सु. नि. अ. ७)

प्लीहोदरमाह—प्लीहेत्यादि । असृक्कफश्चेत्यसृग्दुष्ट्यैव तत्तुल्यकारणतया पित्तदुष्टिरप्युच्यते, विदाहिना रक्तं पित्तं च दूष्यते; अत एव पश्चाद्वक्ष्यति,—'कफपित्तलिङ्गैरुपद्रुतः,—इति । अत्र पित्तस्य लिङ्गं मन्दज्वरः, कफस्य लिङ्गं मन्दाग्नित्वमिति गदाधरः । प्लीहोदर एव यकृद्दाल्युदरस्यावरोधं दर्शयन्नाह—सव्यान्यपार्श्व इत्यादि । सव्यान्यपार्श्वे दक्षिणपार्श्वे । तदेवेति तादृशमेव, प्लीहोदरसममेव न विलक्षणमित्यर्थः । यकृद्दालयति दोषैर्भेदयतीति यकृद्दाल्युदरम् ॥ १५–१७ ॥

कार्याकार्यविचारविमुखाः, आर्तवं रजः । शत्रवो वा यस्मै गरं संयोगजं विषम् । दूषीविषं विषमेव वाय्वस्न्याद्युपहतं मदल्पप्रभावं, विषपीतस्य वा विण्मूत्रं, तद्दूषीविषमुच्यते; दुष्टाम्बुदूषीविषयोः सेवनाद्वा । तेनाशु रक्तं दुष्टं भवति । सुघोरं भृशं कष्टकारि । जठरमित्युदरविकारम् । तच्छीतवातादिषु कुप्यति कोपं गच्छति, दूषीविषस्य तत्रैव कोपात् । दह्यते संतप्यते । मूर्च्छति विषयोगात् । प्रसक्तं निरन्तरम्' (आ० द०) ॥ ११–१४ ॥

* 'अभिष्यन्दीति दोषधातुमलस्रोतसां क्लेदप्राप्तिजननम् । असृक्कफश्चेति असृक्कफजैव तुल्यकारणतया पित्तदुष्टिरुच्यते' (आ० द०) ॥ १५–१७ ॥

---

१ दूषीविषस्य तत्रैव कोपात् मूर्च्छति विषयोगात् प्रसक्तं निरंतरम् ॥ इति क. ।
२ "मुह्यति" इत्यत्र "मूर्च्छति" इति पाठाभिप्रायेण ।

*उदावर्तरुजानाहैर्मोहतृड्दहनज्वरैः।
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात्॥ १८॥
(वा. नि. अ. १२)

तत्र दोषसंबन्धमाह—उदावर्तेत्यादि। उदावर्तरुजानाहैर्वातं, मोहतृड्दहनज्वरैः पित्तं, गौरवारुचिकाठिन्यैः कफं जानीयात्॥ १८॥

†यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा पिहितं यथावत्।
संचीयते तस्य मलः सदोषः शनैः शनैः संकरवच्च नाड्याम्॥१९॥
निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम्।
हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति॥ २०॥
(सु. नि. अ. ७)

बद्धगुदमाह—यस्यान्त्रमन्नैरित्यादि। उपलेपिभिः पिच्छिलैरन्नैः शाकशालुकादिभिः। पिहितं विबद्धम्। यथावदिति यथार्हम्। मलः पुरीषम्। सदोष इति दोषत्रयसहितः। नाड्यामित्यन्त्रनाड्याम्। संकरवदिति संमार्जनीक्षिप्यमाणतृणाद्यवकरो यथा चीयते क्रमेण तथेत्यर्थः। बद्धगुदमिति गुदोपर्यन्त्रस्य बद्धत्वाद्बद्धगुदम्। यदुक्तं **चरके,**—"पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे" (च. चि. स्था. अ. १३)—इति। पुरीषायतनस्य रुद्धत्वात् हृन्नाभिमध्येऽन्नपाकस्थाने वृद्धिः; गुदमात्रनिरोधे तु मलदोषैर्गुदादूर्ध्वमेवोदरवृद्धिः स्यात्॥ १९॥ २०॥

‡शल्यं तथाऽन्नोपहितं यदन्त्रं भुक्तं भिनत्त्यागतमन्यथा वा।
तस्मात्स्रुतोऽन्त्रात्सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः २१.
नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यते दाल्यति चातिमात्रम्।
एतत्परिस्राव्युदरं प्रदिष्टं,
(सु. नि. अ. ७)

क्षतोदरमाह—शल्यमित्यादि। शल्यं कण्टकशर्करादि। अन्नोपहितमन्नयुक्तम्। भुक्तमागतमिति अर्थतः पाकाशयात्; विलोमेनागतमन्त्रं भिनत्ति, ऋज्वागतं हि शल्यमपि नान्त्रभेदकम्। अन्यथा चेति जृम्भणात्यशनाभ्यामन्त्रं भिद्यते। यदुक्तं **चरके,**—"शर्करातृणलोष्टास्थिकण्टकैरन्नसंयुतैः। भिद्येतान्त्रं यदा भुक्तैर्जृम्भयाऽत्यशनेन वा" (च. चि. स्था.अ. १३)—इति। स्रुत इति गलितः। स्रावः स्रवेद्वै गुदतस्तु भूय इति बहु यथा भवति यथाऽन्त्रात् स्रुतः; दोषजेषु पुनरुपलेहन्यायेनाल्प एव स्रावो भूयः पुनःपुनर्गुदतश्च स्रवेत्। तुशब्दश्चार्थे, भूयःशब्दोऽत्रावर्तनीयः; तेनोक्ता व्याख्या साध्वी भवति। ननु, भिन्नान्त्रात्तिर्यगत्र स्रावनिर्गमः; तत्कथं 'स्रावः

* 'तत्र प्लीहोदरयकृद्दाल्युदरयोः पृथग्लक्षणलक्षितान् मलान् वातादीन् क्रमेणोदावर्तादिभिर्लिङ्गैर्विद्यात्' (आ० द०)॥ १८॥

† 'तस्य गुदे पुरीषं निरुध्यते कृच्छ्राच्चाल्पमल्पं निरेति निःसरति' (आ० द०)॥१९॥२०॥

‡ 'निस्तुद्यते शूलेन दाल्यत इव। एतत् परिस्राव्युदरमन्ये छिद्रोदरमाहुः'(आ०द०)॥२१॥

स्रवेद्वै गुदतस्तु भूय' इत्युपपद्यते ? नैवं, सच्छिद्रान्त्रमार्गेण वहिर्गतस्यातिवृद्धस्य पुनरागमनादुपस्नेहन्यायाद्वा गुदतः स्राव उपपन्न एव । **चरकेऽप्युक्तं**,—"पूरयन् गुदमन्त्रं च जनयत्युदरं नृणाम्" (च. चि. स्था. अ. १३)—इति । स्रावेण द्रवस्य निम्नगत्वान्नाभेरधो जठरं वृद्धिमेति; एतच्छिद्रोदरं जलोदरमिति भण्यत इति **गदाधरः** । यतश्चरकेणोक्तं,—"तदधो नाभेः प्रायोऽभिनिर्वर्तमानं जलोदरं स्यात्" (च. चि. स्था. अ. १३) इति । तदन्ये नानुमन्यते, यतश्छिद्रोदरं शीघ्रं जलोदरतां यातीत्यभिप्रायेण **चरकेणोक्तं**, अन्यथा दकोदरं पृथङ् स्यात् ॥ २१ ॥—

***दकोदरं कीर्तयतो निबोध ॥ २२ ॥**

यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दूष्यन्ति हि तद्वहानि ॥२३॥
स्नेहोपलिप्तेष्वथवाऽपि तेषु दकोदरं पूर्ववदभ्युपैति ।
स्निग्धं महत्तत्परिवृत्तनाभि समाततं पूर्णमिवाम्बुना च ।
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् ॥२४॥

(सु. नि. अ. ७)

उत्पत्तिविशिष्टं दकोदरमाह—यः स्नेहपीत इत्यादि । स्नेहपीत इति कर्तरि क्तः, तेन स्नेहं पीतवानित्यर्थः । दूष्यन्तीति स्वकर्मसु दुष्टानि भवन्ति । तद्वहानि उदकवहानि । तेष्विति उदकवहस्रोतःसु । पूर्ववदिति यथा पूर्वमुक्तम् । अन्नरस उपस्नेहन्यायेन बहिर्निःसृत्योदरं जनयतीत्यर्थं इति **जेज्जटः** । **गदाधरस्त्वाह**—क्षतान्त्रोदरे यथा अधोनाभेरुदराभिवृद्धिर्गुदस्रावश्च तथा जलोदरेऽपि भवतीति । ननु, सर्वेषामेवोपस्नेहन्यायेन वहिर्निःसृतान्नरसमूलत्वात् कथमनुदकत्वम् ? नैवं, तेषु हि प्रथमतो नातिमन्दत्वादग्नेरन्नरसस्याल्पत्वाच्चानुदकत्वं, अल्पत्वेन तद्व्यपदेशात्; अत्र तु प्रागेव भूरिजलोत्पत्तिरिति विशेषः । समाततं वेदनया विस्तार्यमाणमिवोदरं भवति । यथा दृतिः क्षुभ्यतीति दृतिरिव जलपूर्णो क्षुभ्यतीति, अन्तर्जलचलमिव धत्ते । शब्दायते गुडगुडायते ॥ २२-२४ ॥

†जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम् ॥ २५ ॥
पक्षाद्बद्धगुदं तूर्ध्वं सर्वं जातोदकं तथा ।
प्रायो भवत्यभावाय छिद्रान्त्रं चोदरं नृणाम् ॥ २६ ॥

(च. चि. अ. १८)

---

* 'तस्य तद्वहानि स्रोतांसि दूष्यन्तीति स्वकर्मण्यसमर्थानि भवन्ति । तदुपरं स्निग्धं भवति, तथा महत्, तथा परिवृत्तनाभि उच्छलितनाभि, समाततं वेदनया विस्तीर्णमिवोदरं भवति' (आ० द०) ॥ २२-२४ ॥

† 'उत्पत्तिमात्रेणैव कष्टसाध्यं तदुदरं वलिनः पुरुषस्य अजाताम्बु अजातोदकं सत् यत्नतः साध्यं कृच्छ्रत्वादिति' (आ० द०) ॥ २५ ॥ २६ ॥

उदररोगस्य साध्यत्वादिलक्षणमाह—जन्मनैवेत्यादि। जन्मनैवोदरमिति उत्पत्तिमात्रेणैव। अजातोदकस्योदरस्य लक्षणं चरकेऽवगन्तव्यं, तद्यथा,—"अशोथमरुणाभासं सशब्दं नातिभारिकम्। सदा गुडगुडायन्तं सिराजालगवाक्षितम्॥ नाभिं विष्टभ्य पायौ तु वेगं कृत्वा प्रणश्यति। हृद्वङ्क्षणकटीनाभिगुदप्रत्येकशूलिनः॥ कर्कशं सृजतो वातं नातिमन्दे च पावके। लालया विरसे चास्ये मूत्रेऽल्पे संहते विधि॥ अजातोदकमित्येतैर्युक्तं विज्ञाय लक्षणैः"—(च. चि. स्था. अ. १३) इति। अत्र कर्कशमिति वेगवन्तम्। जातोदकलक्षणं च चरके यथा,—"कुक्षेरतिमात्रं वृद्धिः सिरान्तर्धानगमनं उदकपूर्णदृतिसमानक्षोभस्पर्शनं च भवति"—(च. चि. स्था. अ. १३) इति। पक्षादित्यादि बद्धगुदमुदरं पक्षादूर्ध्वं विनाशाय भवतीति। जातोदकं पक्षात्। प्रायोग्रहणेन कदाचित् पक्षादूर्ध्वमपि न विनाशाय, तथा शल्यशास्त्राभिमतया चिकित्सया कदाचिज्जातोदकं छिद्रान्त्रं बद्धगुदं च सिध्यतीति दर्शयति। जातोदकं छिद्रान्त्रं च विनाशाय पक्षादूर्ध्वमिति संबन्ध इति केचित्॥ २६॥

*शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम्।
बलशोणितमांसाग्निपरिक्षीणं च वर्जयेत्॥ २७॥
(च. चि. अ. १८)

पार्श्वभङ्गान्नविद्वेषशोथातीसारपीडितम्।
विरिक्तं चाप्युदरिणं पूर्यमाणं विवर्जयेत्॥ २८॥
(सु. सू. अ. ३४)

इति श्रीमाधवकरविरचिते माधवनिदाने उदरनिदानं समाप्तम्॥ ३५॥

साध्यतयाऽभिहितानामप्यवस्थाविशेषेणासाध्यतामाह—शूनाक्षमित्यादि।—"उदरिणं" इति शेषः। कुटिलोपस्थमिति वक्रमेहनम्। उपक्लिन्नतनुत्वचमिति उपक्लिन्ना तन्वी त्वक् यस्य तम्। अग्निपरिक्षीणमिति अग्निक्षयश्च यद्यप्युदरे पूर्वमेव भवति, तथाऽप्यत्र विशेषणाग्निक्षयो लक्षणान्तरयुक्तश्चासाध्यतालिङ्गं संभवतीति ज्ञेयम्॥ २७॥ २८॥

इति श्रीकण्ठदत्तविरचितायां मधुकोशव्याख्यायामुदरनिदानं समाप्तम्॥ ३५॥

अथ शोथनिदानम्।

†रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःसिराः।
नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयम्॥ १॥

* 'अत्रोदरेणेति शेषः। भग्नं पार्श्वे। विरिक्तमपि पूर्यमाणोदरमित्यर्थः' (आ० द०) ॥२७॥२८॥

† 'पच्यतो व्रणस्य वास्तून्यष्टौ, शोथस्य त्वङ्मांसे, इति भेदः; 'सर्वहेतुविशेषैः' इति पाठा-

उत्सेधं संहतं शोथं तमाहुर्निचयादतः।
सर्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकम्॥ २॥
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि।

(वा. नि. अ. १३)

उदरे शोथस्योपद्रवत्वेनोक्तत्वात्तदनन्तरं शोथनिदानम्। तस्य संप्राप्तिमाह—रक्तपित्तकफानित्यादि। रक्तपित्तकफान् स्वहेतुभिः स्वातन्त्र्येण दुष्टान् कुपितान्, दुष्टः स्वहेतुकुपितो वायुर्बहिःसिरा बाह्या अगम्भीराः सिरा नीत्वा गमयित्वा, तै रक्तपित्तकफै रुद्धगतिरावृतमार्गो वायुरुत्सेधमुच्छ्रायं कुर्यादिति योजना। बहिःसिराशब्देनात्रागम्भीरतयोक्तानां स्रोतसामपि ग्रहणम्। त्वङ्मांससंश्रयमित्यनेन व्रणशोथाद्भेदं दर्शयति, अष्टसु व्रणवास्तुषु व्रणशोथस्य संभवात्। यदुक्तं सुश्रुतेन,—"त्वङ्मांससिरास्नाय्वस्थिसन्धिकोष्ठमर्माणीत्यष्टौ व्रणवास्तूनि भवन्ति"—(सु. सू. स्था. अ. २२) इति। संहतं संहतात्मकम्। कुतः संहतात्मकमित्यत आह—निचयादत इति।—अतोऽस्मात् पूर्वोक्ताद्रक्तसहितदोषत्रयसमुदायात्; एतेन रक्तसहितत्रिदोषजन्यत्वमस्योक्तं भवति। सर्वमित्यादि।—सर्वमिति पूर्वेण संबध्यते, सर्वमुत्सेधं शोथमाहुरित्यर्थः। हेतुविशेषैरिति दोषत्रयाभिघातप्रभृतिभिः कारणभेदैर्यो रूपभेदस्तस्मात् सर्वं नवात्मकमाहुरिति पूर्वक्रियया संबन्धः। 'सर्वहेतुविशेषैः' इति पाठान्तरे सर्वेषां हेतुविशेषैरित्यर्थः। द्वयैरिति द्वन्द्वैः, सर्वैस्त्रिभिः॥ १॥ २॥—

***तत्पूर्वरूपं दवथुः सिरायामोऽङ्गगौरवम्॥ ३॥**

(वा. नि. अ. १३)

पूर्वरूपमाह—तदित्यादि। दवथुरुपतापः। सिरायामः सिराप्रसरणवत् पीडा॥ ३॥

शुद्ध्यामयाभुक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा।
दध्याममृच्छाकविरोधिदुष्टगरोपसृष्टान्ननिषेवणं च॥ ४॥
अर्शांस्यचेष्टा न च देहशुद्धिर्मर्मोपघातो विषमा प्रसूतिः।
मिथ्योपचारः प्रतिकर्मणां च निजस्य हेतुः श्वयथोः प्रदिष्टः॥ ५॥

पूर्वरूपानन्तरं कामचारान्निदानमाह—शुद्ध्यामयेत्यादि। शुद्धिर्वमनविरेचनादिः, आमया ज्वरादयः; अभुक्तमभोजनं विगुणं च भोजनं, तैः कृशानामबलानां च क्षारादिसेवा निजस्य श्वयथोर्हेतुः। दध्यादयः स्वतन्त्रा एव हेतवः, आममपक्वं, दुष्टं दोषजनकं मन्दकनवोदकादि, गरं संयोगजं विषम्। अचेष्टा निष्क्रियत्वम्। न च देहशुद्धिरिति शोधनार्हेऽपि दोषे देहाशुद्धिः। मर्मोपघात इह दोषकृत एव ज्ञेयः,

---

न्तरे सर्वेषां शोथानां हेतुविशेषैरित्यर्थः। दोषैरिति पृथक् त्रिभिर्दोषैस्त्रयः, मिलितैर्द्वयैस्त्रयः, अभिघातेनैकः, विषेण चैकः' (आ० द०)॥ १॥ २॥

* दवथुश्चक्षुरादिषु तीव्रदाहः, यदुक्तं चरके—'दवथुश्चक्षुरादिभ्यस्तीव्र ऊष्मा प्रवर्तते'-(आ० द०)॥ ३॥

---

१ क्षीरेति पाठान्तरम्।

बाह्यहेतुजस्तु मर्मोपघात आगन्तुशोथहेतुरेव । विषमा प्रसूतिरामगर्भपतनादिका । मिथ्योपचारोऽसम्यक्करणमसम्यगुपचारः । प्रतिकर्मणां वमनादीनाम् ॥ ४ ॥ ५ ॥

*सगौरवं स्यादनवस्थितत्वं सोत्सेधमूष्माऽथ सिरातनुत्वम् ।
सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥ ६ ॥

सामान्यलिङ्गमाह—सेत्यादि । सगौरवमिति अनवस्थितत्वविशेषणं, तथा सोत्सेधमिति च ॥ ६ ॥

†चलस्तनुत्वक् परुषोऽरुणोऽसितः
सुषुप्तिहर्षार्तियुतोऽनिमित्ततः ।
प्रशाम्यति प्रोन्नमति प्रपीडितो
दिवाबली च श्वयथुः समीरणात् ॥ ७ ॥

वातशोथलिङ्गमाह—चल इत्यादि । तनुत्वक् अबहलत्वक् । असितः कृष्णः । सुषुप्तिः स्पर्शाज्ञता; हर्षो झिणिझिणिवद्वेदना, किंवा रोमहर्षः । अनिमित्ततः प्रशाम्यतीति वायोश्चलत्वेन कदाचिन्निमित्तं विनाऽपि लीनो भवति; निमित्तत इति पाठे स्नेहोष्णमर्दनादेर्निमित्ततः प्रशाम्यति उपशमं प्राप्नोतीति, उपशयार्थमेतदुक्तम् । प्रोन्नमति प्रपीडित इति प्रपीडितः सन्नन्तरुन्नमतीत्यर्थः । दिवाबलीति दिवा बलवान्, नक्तं बली । स्नेहोष्णमर्दनाद्यैश्च प्रशाम्येत्, स च वातिकः, "यश्चाप्यरुणवर्णाभः शोथो नक्तं प्रणश्यति"–(च. सू. स्था. अ. १८) इति चरकवचनात् ॥ ७ ॥

‡मृदुः सगन्धोऽसितपीतरागवान्
भ्रमज्वरस्वेदतृषामदान्वितः ।
य उष्यते स्पर्शरुगक्षिरागकृत्
स पित्तशोथो भृशदाहपाकवान् ॥ ८ ॥

पैत्तिकमाह—मृदुरित्यादि । उष्यत इति दह्यते ॥ ८ ॥

¶गुरुः स्थिरः पाण्डुररोचकान्वितः
प्रसेकनिद्रावमिवह्निमान्द्यकृत् ।
स कृच्छ्रजन्मप्रशमो निपीडितो
न चोन्नमेद्रात्रिबली कफात्मकः ॥ ९ ॥

कफजमाह—गुरुरित्यादि । अरोचकान्वित इति अरोचकव्याधिसहचारी । कृच्छ्रजन्मप्रशम इति चिरोत्पत्तिविनाशः । रात्रिबलीति रात्रौ स्रोतोऽवरोधजेन देहक्लेदेनाचेष्टया च कफस्य वृद्धत्वात्तज्जः शोथो बलवान् भवति; दिवा तु स्फुटस्रोतसि शरीरे सचेष्टे च न कफो बली भवति, किं तर्हि वायुः, तेन तज्जः शोथो दिवाबली भवति ॥ ९ ॥

---

* 'ऊष्मसंतापयुक्तं सिराकृशत्वं तासां रक्ताद्ययथाकाभात्' (आ० द०) ॥ ६ ॥

† 'चलः स्थानात् स्थानान्तरगतिः, परुषः कर्कशः, अरुणो रक्तवर्णः' (आ० द०) ॥ ७ ॥

‡ 'मृदुस्पर्शः, गन्धयुक्तः, अक्ष्णो रागकृत्, अतिशयदाहपाकवान्' (आ० द०) ॥ ८ ॥

¶ 'स्थिरः अचलः, प्रसेको लालास्रावः' ॥ ९ ॥

*निदानाकृतिसंसर्गाच्छ्वयथुः स्याद्विदोषजः।
सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः॥ १०॥
(च. सू. अ. १८)

व्यामिश्रौषधविधिविधानार्थं क्वापि क्वापि प्रकृतिसमवेता अपि शिष्यहितैषितया द्वन्द्वसन्निपाता अतिदेशेन पठ्यन्ते, ये तु विकृतिविषमवेतास्तान् कण्ठरवेण पठन्ति; अतोऽतिदेशेन द्वन्द्वत्रयसन्निपातानाह—निदानाकृतिसंसर्गादित्यादि। व्यामिश्रलक्षण इति मिलितवातादित्रयलिङ्गः। अनेनैव सर्वाकृतिरित्यस्यार्थे सिद्धे तदभिधानं वातादिप्रत्येकं कृत्स्नलिङ्गनियमार्थम्॥ १०॥

†अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः॥ ११॥
रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः॥ १२॥
(वा. नि. अ. १३)

अभिघातजं श्वयथुमाह—अभिघातेनेत्यादि। अभिघातेन यः शोथः स शस्त्रादिभिर्भवति। हिमानिलोदध्यनिलैरिति हिमानिलैरुदध्यनिलैश्च, उदधिः समुद्रः। भल्लातकपिकच्छुजै रसैः शूकैरिति भल्लातकरसैः कपिकच्छ्वाः शूकैश्च। कपिकच्छुः शूकशिम्बी॥ ११॥ १२॥

‡विषजः सविषप्राणिपरिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि॥ १३॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकरात्।
विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात्॥ १४॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।
(वा. नि. अ. १३)

---

* 'द्विदोषयोर्निदानलक्षणसंसर्गे द्विदोषजा ज्ञेयाः। सन्निपातात् सर्वाकृतिः, व्यामिश्रलक्षणा मिलितवातादित्रयलिङ्गः' (आ० द०)॥ १०॥

† 'हिमानिलः शीतवायुः, उदध्यनिलः समुद्रवातः, एतेषां स्पर्शात्; प्रसरणशीलः, भृशोष्मा अतिशयसंतापकृत्, पित्तश्वयथुलक्षणः' (आ० द०)॥ ११॥ १२॥

‡ 'सविषप्राणिनः सविषा ये जन्तवः शतपदीलूतादयः, तेषां शरीरोपरि सर्पणं मूत्रणं च द्वयमपि श्वयथोर्हेतुः; अन्ये दंष्ट्रिदन्तनखेति पठन्ति तत्र दंष्ट्रिणो व्याघ्रादयः। नखाः प्रसिद्धाः। अविषप्राणिनां मनुष्यादीनामप्यभिघातः शोथहेतुः। विण्मूत्रेत्यादि सविषप्राणिनां विण्मूत्राद्युपहतमलवद्वस्त्रस्य संस्पर्शात्; अन्ये 'मलवद्वस्तु' इति पठन्ति, तत्र सविषप्राणिनां विण्मूत्रशुक्रोपहतत्वेनैव यन्मलवद्वस्तु तस्य संपर्कादित्यर्थः। सविषा ये वृक्षास्तेषां योऽनिलः, तस्य स्पर्शादपि। गरः कृत्रिमविषं तस्यावचूर्णनात्, तस्य शरीरस्पर्शादित्यर्थः। मृदुः मृदुस्पर्शः चलः स्थानान्तरगतिः' (आ० द०)॥ १३॥ १४॥

---

१ गण्यन्ते इति क.।

विषजमाह—विषज इत्यादि । सविषप्राणिनः सर्पादयस्तेषां परिसर्पणं भ्रमणं तस्मात्, सविषप्राणिनां मूत्रणाच्च । दंष्ट्रादन्तेति दंष्ट्रा कुटिला 'दाढ' इति ख्याता; तद्विपरीतश्च दन्तो गोवलीवर्दन्यायात् । विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकरादिति सविषप्राणिनां विण्मूत्राद्युपहतं मलवच्च वस्त्रं यत्तस्य संस्पर्शात् । अवलम्बी अधोगमनशीलः । शीघ्रः शीघ्रोत्पत्तिः । अयं चागन्तुरपि विशिष्टलिङ्गचिकित्सोपयोगात् पृथक् पठितः ॥ १३॥१४॥—

*दोषाः श्वयथुमूर्ध्वं हि कुर्वन्त्यामाशयस्थिताः ॥ १५ ॥
पक्वाशयस्था मध्ये तु वर्चःस्थानगतास्त्वधः ।
कृत्स्नदेहमनुप्राप्ताः कुर्युः सर्वसरं तथा ॥ १६ ॥
(सु. चि. अ. २३)

यत्रस्था दोषा यत्र देशे शोथं कुर्वन्ति तमाह—दोषा इत्यादि । ऊर्ध्वमिति उरःप्रभृत्यूर्ध्वदेहे । मध्य इति उरःपक्वाशयमध्ये । अध इति पक्वाशयादधः । सर्वसरं सर्वशरीरसरणशीलम् ॥ १५ ॥ १६ ॥

†यो मध्यदेशे श्वयथुः स कष्टः सर्वगश्च यः ।
अर्धाङ्गे रिष्टभूतः स्याद्यश्चोर्ध्वं परिसर्पति ॥ १७ ॥
श्वासः पिपासा छर्दिश्च दौर्बल्यं ज्वर एव च ।
यस्य चान्ने रुचिर्नास्ति श्वयथुं तं विवर्जयेत् ॥ १८ ॥
(सु. चि. अ. २३)

अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीं च मुखजो गुह्यजो द्वयम् ।
नवोऽनुपद्रवः शोथः साध्योऽसाध्यः पुरेरितः ॥ १९ ॥
(वा. नि. अ. १३)

विवर्जयेत्कुक्ष्युदराश्रितं च यथा गले मर्मणि संश्रितं च ।
स्थूलः खरश्चापि भवेद्विवर्ज्यो यश्चापि बालस्थविराबलानां ॥ २० ॥

इति श्रीमाधवकरविरचिते माधवनिदाने शोथनिदानं समाप्तम् ॥ ३६ ॥

अतःपरं कृच्छ्रादिभेदमाह—यो मध्यदेश इत्यादि । मध्यदेहगस्य कष्टत्वं तद्देशागशोथप्रभावात् । सर्वग इति सर्वदेहगामी । सर्वज इति पाठान्तरे सर्वजः सान्निपातिकः । रिष्टभूत इति रिष्टतुल्यः, भूतशब्द उपमाने; यथा—मातृभूतः पितृभूत इति । व्याधेरेवात्र रिष्टभूतत्वं तस्य च निमित्तकृतत्वाद्भूतशब्द उपात्त इति कार्तिकः । अन्ये तु भूतशब्दं स्वरूपवचनमाहुः । यश्चोर्ध्वं परिसर्पतीति पुरुषविषयकमेतत्; चकारात् स्त्रियाश्चोपरिजो योऽधो याति स गृह्यते, तथा गुह्यजो यः सर्वगः । वचनं

---

* 'वर्चः स्थानं पुरीषाशयः' ।

† 'पादसमुत्थितः पुरुषं हन्ति, नारीं तु मुखजो हन्तिगुह्यजो वस्तिसंजातः, द्वयमिति साध्यासाध्यलक्षणमाह—नव इत्यादि । नवो नवोत्थानः, उपद्रवरहितः, उपद्रवाः पूर्वोक्ताः श्वासादयः, तैर्मुक्तः स साध्यः' (आ० द०) ॥ १७–२० ॥

हि-"यस्तु पादाभिनिर्वृत्तः शोथः सर्वाङ्गगो भवेत् । पुरुषं हन्ति, नारीं च मुखजो, गुह्यजो द्वयम्"-(च. सु. स्था. अ. १८) इति । अनन्योपद्रवकृत इति अन्यस्य उपद्रवा अन्योपद्रवास्तद्विपरीता अनन्योपद्रवाः, एतेनायमर्थः-शोथस्यैव ये उपद्रवास्तैः कृतः ; ते च-"श्वासः पिपासा दौर्बल्यं ज्वरश्छर्दिररोचकः । हिक्कातीसारकासाश्च शोथिनं क्षपयन्ति हि"-(सु. चि. स्था. अ. २३) इति सुश्रुतोक्ताः । चरकेऽप्युक्तं-"छर्दिस्तृष्णाऽरुचिः श्वासो ज्वरोऽतीसार एव च । सप्तकोऽयं सदौर्बल्यः शोथोपद्रवसंग्रहः" -(च. चि. स्था. अ. १८) इति । अथवा अन्यमुपद्रवं करोतीति अन्योपद्रवकृन्निदानं, नान्योपद्रवकृदनन्योपद्रवकृत्, ततः स्वनिदानात्, 'जातः' इति शेषः; तेन शोथजनकनिदानादेवोत्पन्न इत्यर्थः । पाण्डुरोगादौ तु यः शोथः पादसमुत्थितः सोऽन्योपद्रवकृतो निदानान्तराज्जातः, साध्य एव । 'आननोपद्रवगत'इति पाठान्तरेऽयमर्थः-पादयोरुत्थितः पूर्वं पश्चादाननमुपद्रवेण प्रसारेणोपद्रवत्वेन वा गतः । तथाच तन्त्रान्तरं,-"पादप्रवृत्तः श्वयथुर्नृणां यः प्राप्नुयान्मुखम् । स्त्रीणां वक्त्रादधो याति वस्तिजश्च न सिध्यति"-इति । क्षारपाणिनाऽप्युक्तम्,-"ऊर्ध्वगामी नरं पश्चामधोगामी मुखात् स्त्रियम् । उभयं वस्तिसंजातः शोथो हन्ति न संशयः"-इति । गुह्यज इति वस्तिजातः । द्वयमिति नरं नारीं च । असाध्यः पुरेरित इति 'अर्धाङ्गे रिष्टभूत' इत्यादिना ॥ १७-२० ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शोथनिदानं समाप्तम् ॥ ३६ ॥

अथो वृद्धिनिदानम् ।

*क्रुद्धोऽनूर्ध्वगतिर्वायुः शोथशूलकरश्चरन् ।
मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ॥ १ ॥
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ।
दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः ॥ २ ॥
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ।
(वा. नि. अ. ११)

शोथत्वसामान्याच्छोथानन्तरं वृद्धिरभिधीयते । वृद्धेः संप्राप्तिमाह—क्रुद्धोऽनूर्ध्वगतिर्वायुरित्यादि । अनूर्ध्वगतिरधोगतिर्वायुर्मुष्कौ प्राप्य चरन् गच्छन्, वङ्क्षणतो मेढ्रजङ्घासन्धेः सकाशात्; फलकोषाभिवाहिनीरिति फलं च कोषश्च फलकोषौ, अथवा फलयोः कोषौ, तद्वहा धमनीश्च प्रपीड्य संदूष्य, वृद्धिं करोति । फलकोषयोरिति द्विवचनमुपलक्षणं, तेनैककोषेऽपि दृश्यमाना वृद्धिः संगता । स वृद्धिरिति "चिन्त्यौ च

* 'वृद्धेः संख्यामाह—दोषेत्यादि । दोषत्रयैस्त्रयः, रक्तेनैकः, मेदसा चैकः, सत्रेणैकः, एवं सप्त' (आ० ८०) ॥ १ ॥ २ ॥

१ नवोनुपद्रवेत्यादि इति क. । २ मेढ्रोरुसन्धेरित्यर्थः ।

संज्ञायाम्"-इत्यनेन क्तिजन्तो वृद्धिशब्दः पुंलिङ्गः क्तिन्नन्तस्तु स्त्रीलिङ्गः, वृद्धिः कुरण्डोऽभिधीयते। संख्येयनिर्देशादेव संख्यायां लब्धायां सप्तधेति वचनं न्यूनाधिकसंख्यानिरासार्थं,-तेन द्वन्द्वजादिवृद्धेरधिकाया निरासः, असंभवस्तु तस्या व्याधिस्वभावात्; मूत्रान्त्रवृद्ध्योर्वातवृद्ध्यन्तर्भावात् न्यूनसंख्यानिरासार्थमनयोर्वातजत्वेऽपि निमित्तचिकित्साभेदात् पृथगभिधानं, निमित्तभेदनिबन्धन एव व्याधिभेदः। यदुक्तं;—"दोषदूष्यसंसर्गादायतनविशेषान्निमित्ततश्चैषां व्याधीनां भेदः" (सु. सू. स्था. अ. २४)—इति। अत आह—मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलमिति ॥ १ ॥ २ ॥—

*वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ॥ ३ ॥
पक्वोदुम्बरसंकाशः पित्ताद्दाहोष्मपाकवान्।
कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक् ॥ ४ ॥
कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः।
कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ॥ ५ ॥
मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः ॥ ६ ॥
मूत्रकृच्छ्रमधः स्याच्च चालयन् फलकोषयोः।
(वा. नि. अ. ११)

वातजादीनां मूत्रजान्तानां वृद्धीनां क्रमेण लक्षणान्याह—वातेत्यादि। अहेतुरुगिति अनिमित्ततो दाहादिरुक्। रक्तजे 'कृष्णस्फोटावृत इति' पित्तजवृद्धिलिङ्गादधिकं; तेन हेतुलिङ्गचिकित्साभेदाद्रक्तजवृद्धिः पृथग्गण्यते। मेदोजे तालफलोपम इति पक्वतालफलमिव नीलवर्तुलः। मूत्रजे मूत्रकृच्छ्रमिति मूत्रकृच्छ्रवद्वेदना। चालयन् फलकोषयोरिति फलकोषयोश्चालयन् चलो भवन्नितस्ततो गच्छन् सोऽधः स्यात्। चालयन्निति स्वार्थिको णिच् ॥ ३–६ ॥—

†वातकोपिभिराहारैः शीततोयावगाहनैः ॥ ७ ॥
धारणेरणभाराध्वविषमाङ्गप्रवर्तनैः।
क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा ॥ ८ ॥

---

* 'दृतिश्चर्मखल्लिः, अनिमित्ततो भेदनोदादिरुक्। पक्वोदुम्बरसंकाशः पक्वोदुम्बरफलाभः तथा दाहादियुक्तः। कफाद्वृद्धिः शीतः शीतस्पर्शः, तथा गुरुः स्निग्धः कण्डूमान् कठिनोऽश्मवत्, अल्परुक् मन्दवेदनः। रक्तजो वृद्धिः कृष्णस्फोटैश्चितः पित्तवृद्धिलिङ्गैश्च पक्वोदुम्बरसंकाशादिभिर्युतो भवेत्। कफवत्कफवृद्धिलक्षणः। मूत्रधारणशीलस्य मूत्रजो भवति, गच्छतः पुंसो जलपूर्णदृतिवत् क्षोभं याति पूरितो भवति, सरुक् सव्यथः, मृदुः मृदुस्पर्शः। 'वलयं फलकोशयोः' इति पाठे फलकोशयोरधस्ताद्वलयं कङ्कणं स्यात्' (आ० द०) ॥ ३–६ ॥—

† 'वातकोपिभिराहारै रूक्षतिक्तकषायादिभिरासेवितैस्तथा शीततोयावगाहनैस्तथा धारणेरणभारादिभिरन्यैश्च क्षोभणैः क्षोभितः कुपितः पवनो वायुर्यदा यस्मिन् काले क्षुद्रान्त्रावयवं

पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।
कुर्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ॥ ९ ॥
उपेक्षमाणस्य च मुष्कवृद्धिमाध्मानरुक्स्तम्भवतीं स वायुः ।
प्रपीडितोऽन्तःस्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ॥१०॥
(वा. नि. अ. ११)

अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः ।

इति श्रीमाधवकरविरचिते माधवनिदाने वृद्धिनिदानं समाप्तम् ॥ ३७ ॥

अन्त्रवृद्धिमाह वातकोपिभिरित्यादि । धारणं वेगस्योपस्थितस्य, ईरणमप्राप्तस्य । क्षोभणैः क्षुभितोऽन्यैरिति बलवद्विग्रहधनुराकर्षणादिभिः । क्षुद्रान्त्रावयवमिति वृहदन्त्र्युदासार्थम् । विगुणीकृत्येति संकुचीकृत्य । द्विगुणीकृत्येति पाठान्तरे संकोचेन द्विगुणीकृत्य । स्वनिवेशात् स्वस्थानात् । तदा वङ्क्षणसन्धिस्थः सन् वङ्क्षणसन्धौ ग्रन्थिरूपमसाध्यं श्वयथुं करोति, तत्र ग्रन्थिरूपेण स्थित्वा कालान्तरेण फलकोषं गच्छतीति । तां मुष्कवृद्धिमाध्मानरुक्स्तम्भवतीमुपेक्षमाणस्य अचिकित्सतः पुरुषस्य । अत्र भोजः; अन्त्रं द्विगुणमादाय जन्तोर्नयति वङ्क्षणम् । वङ्क्षणात्तद्भुजायुक्तं फलकोषं प्रपद्यते"—इति । प्रध्मापयन्निति उच्छूनयन् । असाध्योऽयमिति कथं ? यतोऽस्य चिकित्साऽभिहिता; नैवं, अप्राप्तफलकोषायामयं चिकित्साविधिः; प्राप्तफलकोषा त्वसाध्या; याप्यायां वा तस्यां चिकित्साविधिः । यदुक्तं भोजे,—"याप्यां तामन्त्रजां विदुः"—इति । व्रध्ननिदानं तु तन्त्रान्तरे पठ्यते । तद्यथाः—"अत्यभिष्यन्दिगुर्वन्नसेवनाचिचयं गतः । करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥ ज्वरशूलाङ्गसादाढ्यं तं व्रध्नमिति निर्दिशेत्"—इति ॥ ७–१० ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां वृद्धिनिदानं समाप्तम् ॥ ३७ ॥

अथ गलगण्डगण्डमालापचीग्रन्थ्यर्बुदनिदानम् ।

निवद्धः श्वयथुर्यस्य मुष्कवल्लम्वते गले ।
महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥ १ ॥

वृद्धियुक्तमुष्कसमानलिङ्गत्वात्तदनन्तरं गलगण्डनिदानम् । तस्य सामान्यलिङ्गमाह—निवद्धः श्वयथुरित्यादि । निवद्धोऽनुबन्धवान् मुष्कवदण्डवत् । भोजेऽप्युक्तं,—"महान्तं शोथमल्पं वा हनुमन्यागलाश्रयम् । लम्बन्तं मुष्कवद्दृष्ट्वा गलगण्डं विनिर्दिशेत्—" इति ॥ १ ॥

स्वनिवेशात् स्वस्थानात्, द्विगुणीकृत्वाऽधो नयेदिति पिण्डार्थः । अन्ये विगुणीकृत्येति पठन्ति । विषमाङ्गप्रवर्तनैर्विषमत्वेन शरीरमोटनैः, पवनो वङ्क्षणसंधिस्थः सन्, स च श्वयथुः करेण पीडितः सशब्दं प्रयाति, मुक्तः सन्नाध्मापयन् पूरयन् पुनरायाति । आक्षेपात्, संयोगात् वातसंचयात् मुष्कयोरन्त्रवृद्धिर्भवति' (आ० द०) ॥ ७–१० ॥

*वातः कफश्चापि गले प्रदुष्टो मन्ये च संश्रित्य तथैव मेदः ।
कुर्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ॥ २ ॥
(सु. नि. अ. ११)

तस्य संप्राप्तिमाह—वात इत्यादि । वातकफमेदांसि पृथक् गलगण्डकारणानि, तेन त्रय एव गलगण्डाः, पैत्तिकस्तु न भवत्येव, व्याधिस्वभावात्; चातुर्थकज्वरवत् । चातुर्थके हि वचनं,—"चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः । जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसंभवः"—(च. चि. स्था. अ. ३) इति । क्रमश इत्यनेन शनैरेव वर्धनं दर्शयति । स्वलिङ्गैः समन्वितमिति 'निबद्धः श्वयथुः' इत्यादिनोक्तगलगण्डलिङ्गैरन्वितम् ॥ २ ॥

वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः ।
(सु. नि. अ. ११)

†तोदान्वितः कृष्णसिरावनद्धः श्यावोऽरुणो वा पवनात्मकस्तु ।
पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात्कदाचित् ॥ ३ ॥

वातजमाह—तोदान्वित इत्यादि चिरवृद्धिरिति विकारप्रभावात् वातजोऽपि चिरेण वर्धते यदृच्छया पाकमियादिति कारणाप्रतिनियमेन कदाचित् पाकं याति, कारणाप्रतिनियमश्च बाह्योऽभिप्रेतः, आभ्यन्तरं तु पाककारणं पित्तं रक्तं च नियतमेव । कदाचिदिति न सर्वकालम् । "यदृच्छया चैव भवेत् कदाचित्—" इति पाठान्तरे 'पाकं' इति शेषः ॥ ३ ॥

‡स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतो महांश्चापि कफात्मकस्तु ॥ ४ ॥
चिराभिवृद्धिं भजते चिराद्वा प्रपच्यते मन्दरुजः कदाचित् ।
माधुर्यमास्यस्य च तस्य जन्तोर्भवेच्चथा तालुगलप्रलेपः ॥ ५ ॥
(सु. नि. अ. ११)

श्लेष्मजमाह—स्थिर इत्यादि । सवर्ण इति प्रकृतिसमवर्णः ॥ ४ ॥ ५ ॥

§स्निग्धो गुरुः पाण्डुरनिष्टगन्धो मेदोभवः कण्डुयतोऽल्परुक् च ।
प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ॥ ६ ॥
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेऽनुशब्दं कुरुते च नित्यम् ।
(सु. नि. अ. ११)

* 'मन्ये उभे कण्ठसन्धी । स्वलिङ्गैर्वातकफमेदोलक्षणैः समन्वितमिति' (आ० द०) ॥ २ ॥

† 'तोदः पीडाविशेषः, कृष्णसिरावृतः, पारुष्ययुक्तः स्पर्शनकर्कशः' (आ० द०) ॥ ३ ॥—

‡ 'स्थिरो निश्चलः, महान् स्थूलः । मन्दरुज इत्यादि कदाचिद्यदा प्रपच्यते तदा मन्दरुजएव प्रपच्यते, पाककाले पीडा न भवतीत्यर्थः । प्रलेप इति श्लेष्मणालिप्त इव' (आ० द०) ॥४॥५॥

§ 'अलाबुवत्तुम्बीफलवत्, अल्पमूलस्तनुमूलः ।' 'गलेन शब्दम्' इति पाठान्तरं सुगमम् (आ० द०) ॥ ६ ॥

मेदोजमाह—स्निग्ध इत्यादि । देहानुरूपक्षयवृद्धियुक्त इति देहक्षये क्षयं, देहवृद्धौ च वृद्धिं यातीत्यर्थः । गलेऽनुशब्दमिति अनुनादं करोति । "गले तु शब्दम्"—इति पाठान्तरं सुगमम् ॥ ६ ॥—

*कृच्छ्राच्छ्वसन्तं मृदुसर्वगात्रं संवत्सरातीतमरोचकार्तम् ॥ ७ ॥
क्षीणं च वैद्यो गलगण्डयुक्तं भिन्नस्वरं चापि विवर्जयेच्च ।
(सु. नि. अ. ११)

असाध्यतामाह—कृच्छ्राच्छ्वसन्तमित्यादि । कृच्छ्राच्छ्वसन्तं दुःखेन श्वासविमोक्षकारिणम् । भिन्नस्वरं स्वरभेदवन्तम् ॥ ७ ॥—

†कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु ॥ ८ ॥
मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः ।
(सु. नि. अ. ११)

स्थानतुल्यतया गण्डमालामिहैवाह,—कर्कन्धुकोलामलकप्रमाणैरित्यादि । कर्कन्धुः शृगालकोलिः, कोलं बृहद्बदरम् । मेदःकफाभ्यामिति मेदो दूष्यं, कफो दोषोऽत्रारम्भकः, मेदःकफौ प्राधान्येनोक्तौ; तेन वातपित्तसंबन्धोऽप्यत्र द्रष्टव्यः । यदाह भोजः,—"वातपित्तकफा वृद्धा मेदश्चापि समन्वितम् । जङ्घयोः कण्डराः प्राप्य मत्स्याण्डसदृशान् बहून् ॥ कुर्वन्ति ग्रथितांस्तेभ्यः पुनः प्रकुपितोऽनिलः । तान् दोषानूर्ध्वगो वक्षःकक्षमन्यागलाश्रितः ॥ नानाप्रकारान् कुरुते ग्रन्थीन् सा त्वपची स्मृता । तां तु मालाकृतिं विद्यात्कण्ठहृद्वङ्क्षसन्धिषु ॥ गण्डमालां विजानीयादपचीतुल्यलक्षणाम्"—इति । स्याद्गण्डमालेति मालातुल्यगण्डयोगाद्गण्डमाला । गलमात्र एव गण्डमाला चरके पठिता । यथा,—"मेदःकफाच्छोणितसंचयोत्थो गलस्य मध्ये गलगण्ड एकः । स्याद्गण्डमाला बहुभिश्च गण्डैः"—(च. चि. स्था. अ. १२ इति ॥ ८ ॥—

‡ते ग्रन्थयः केचिदवाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये ॥९॥
कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति तज्ज्ञाः ।
साध्याः स्मृताः पीनसपार्श्वशूलकासज्वरच्छर्दियुतास्त्वसाध्याः ॥

गण्डमालातुल्यतयाऽपचीमाह—ते ग्रन्थय इत्यादि । ते इति गण्डमालारम्भकदोषदूष्यकृता ये ग्रन्थयस्त एवेत्यर्थः । कालानुबन्धं चिरमिति चिरकालानुबन्धम् । सैवापचीति तादृशी अनल्परूपा अपची भण्यते । सैवापचीति इतिशब्देनाभिहितत्वात् प्रवदन्तीति क्रियायोगेऽपि न द्वितीया । अपचीनिरुक्तिश्चापरापरोपचीयमानतया ।

* 'मृदुसर्वगात्रं शिथिलसर्वगात्रं, अतिक्रान्तवत्सरम्' (आ० द०) ॥ ७ ॥—

† 'कर्कन्धुर्लघुबदरं, असौ बाहुमूले, मन्या शिरोधः, वङ्क्षणं जघनोरुसन्धिः ।' "व्यामिश्रदोषा संजाता कृच्छ्रसाध्या प्रकीर्तिता ॥ तासां वातोत्तरा रूक्षा वातवेदनयाऽन्विता । क्षिप्रपाकसमुत्थाना दाहयुक्ता च पैत्तिकी ॥ गूढपाका च कठिना कफात् स्निग्धाऽल्परुकरा । मेदोभवश्लैष्मिकी च विशेषादतिमार्दवा ॥ अपची कण्ठमन्यासु कक्षवङ्क्षणसन्धिषु । तां तु मालाकृतिसमां कण्ठहृद्दन्तसन्धिषु" ॥ कण्ठमालां विजानीयादपचीतुल्यलक्षणाम्'—इति (आ०द०)॥८॥

‡ 'अवाप्तपाका लब्धपाकाः, साध्याः स्मृता इति पूर्वग्रन्थेन संबन्धः, 'स्रवन्ति नश्यन्ति भवन्ति चान्ये', इत्यादिना' (आ० द०) ॥ ९–१० ॥

अत एव "चयप्रकर्षादपचीं वदन्ति"—(सु.नि. स्था. अ. ११) इति सुश्रुतः। चयप्रकर्षश्चापरापरभवनेनैव, साधुत्वं च नैरुक्तेन विधिना। यदुक्तम्—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"—इति। अत एवोक्तं—नश्यन्ति भवन्ति चान्य इति। साध्याः स्मृता इति छेदः। पीनसादिभिरुपद्रवैरसाध्याः अयं तु ग्रन्थिश्चरके गण्डमालायामस्ति; संग्रहकारेण तु गण्डमालया सह तुल्यत्वादपच्या अपच्यामेव पठितः॥ ९॥ १०॥

*वातादयो मांसमसृक् प्रदुष्टाः संदूष्य मेदश्च तथा सिराश्च।
वृत्तोन्नतं विग्रथितं च शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः॥ ११॥

अनन्तरमपचीगण्डकतुल्यतया ग्रन्थिमाह—वातादय इत्यादि। वातपित्तकफाः प्रत्येकं दुष्टाः; दुष्टिश्चात्र वृद्धिरेव न क्षयः, क्षीणानां विकारकरणाक्षमत्वात्। यद्येवं तर्हि कथं वातादिक्षये मन्दचेष्टादयः? उच्यते, तत्क्षये विरोधिदोषकोपात्; यथा—मधुरस्निग्धादिभिर्वाते क्षीणे तत्समानत्वाच्छ्लेष्मा प्रकुप्यति। वचनं हि,—"वृद्धिश्चापि विरोधिनाम्"—इति। संदूष्य मेदश्च मांसमसृक् सिराश्चेत्यनेन मेदोजः कफसंबन्धाद्यो भवति तथा सिराजोऽपि वायुना सिरादुष्ट्या यो जन्यते स उच्यते। एवं पञ्च ग्रन्थयः,। तथेति संदूष्य। मांसमसृगिति। अत्रासृजः क्रमोल्लङ्घनेन पाठोऽप्राधान्यप्रतिपादनार्थः, विसर्पे तु शोणितमेव प्रधानम्। अत एव क्वचित् चकारमप्राधान्यसूचकं निवेद्य 'असृक् च' इति पाठः। चरके तु ग्रन्थिर्ग्रथितकफज एव ग्रन्थिविसर्पशब्देनोक्तः। वृत्तोन्नतमिति वृत्तं वर्तुलं, उन्नतमुच्छूनम्। विग्रथितं कठिनं, कर्कशं वा; विग्रथितत्वादेव ग्रन्थिरिति संज्ञा॥ ११॥

†आयम्यते वृश्चति तुद्यते च प्रत्यस्यते मथ्यति भिद्यते च।
कृष्णो मृदुर्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम्॥१२॥
(सु. नि. अ. ११)

अनिलग्रन्थिमाह—आयम्यत इत्यादि। आयम्यते आकृष्य दीर्घीक्रियते। वृश्चतीति छिनत्तीव, अत्र दिवादेराकृतिगणत्वात् श्यन्प्रत्ययः। प्रत्यस्यते क्षिप्यते, मथ्यति आलोडयतीव, अत्रापि पूर्ववत् समाधानम्। भिद्यते विदीर्यत इव। अस्रं स्रावम्॥ १२॥

‡दन्दह्यते धूप्यति चूष्यते च पापच्यते प्रज्वलतीव चापि।
रक्तः सपीतोऽप्यथवाऽपि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रम्॥
(सु. नि. अ. ११)

* 'मांसमसृक् संदूष्य शोफं कुर्वन्तीति संबन्धः। एतेन त्रयो ग्रन्थय उक्ताः, संदूष्य मेदश्च तथा सिराश्चेत्यनेन मेदोजः सिराजश्चेवं द्वौ, विग्रथितं विच्छिद्य ग्रथितं' (आ० द०)॥ ११॥

† 'तुद्यते शूलेनेव' (आ० द०)॥ १२॥

‡ 'धूप्यति धूमायत इव, चूष्यते श्लेष्णेव, वर्णेन रक्तोऽथवा पीतः, भिन्नः सन् अतीवातिशयेन दुष्टं रक्तं स्रवति' (आ० द०)॥ १३॥

१ 'वृश्च्यते' इत्यत्र 'चूष्यते' इति पाठाभिप्रायेण।

२ एतच्च—"भिन्नः स्रवेदुष्टमतीव चास्रम्" इति पाठाभिप्रायेण।

पित्तग्रन्थिमाह—दन्दह्यत इत्यादि । दन्दह्यते अत्यर्थं दह्यते अग्निनेव । पापच्यते भृशं पच्यत इव क्षारेण, किंवा उत्कथ्यत इव । प्रज्वलतीव ज्वलन् भस्मीभवतीव ॥ १३ ॥

***शीतोऽविवर्णोऽल्परुजोऽतिकण्डुः पाषाणवत् संहननोपपन्नः ।**
चिराभिवृद्धश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनं च पूयम् ॥ १४ ॥
(सु. नि. अ. ११)

कफग्रन्थिमाह—शीत इत्यादि । अविवर्णः प्रकृतिवर्णः, ईषद्विवर्ण इति कश्चित् । पाषाणवत् संहननोपपन्न इति पाषाणवत् कठिन इत्यर्थः, किंवा पाषाणवद्भवति । संहननोपपन्न इति संघातान्वितो महानित्यर्थः ॥ १४ ॥

शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान् कण्डुयुतोऽरुजश्च ।
मेदःकृतो गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमं तु मेदः ॥१५॥
(सु. नि. अ. ११)

मेदोजग्रन्थिमाह—शरीरेत्यादि । शरीरवृद्धिक्षयवृद्धिहानिरिति शरीरवृद्धिक्षयाभ्यां यथाक्रमं वृद्धिहानी यस्य स तथा । मेदोजेष्वेवं युक्तिर्धातुस्वभावात् चिरस्थायित्वाद्वा । गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमं तु मेद इति भिन्ने सति पिण्याकस्तिलकल्कः, सर्पिरत्र स्त्यानं, तत्सदृशं मेदः स्रवति । भोजेन तु मेदोग्रन्थेः संप्राप्तिः पठ्यते । यथा,—"मेदोवायुर्यदा मांसे निक्षिपेदथवा त्वचि । तत्र मेदोभवो ग्रन्थिः श्यावो भवति पाण्डुरः ॥ कृशः कृशे महान् स्थूले ग्रन्थिर्भिन्नश्च पीडितः । तिलकल्कनिभः स्रावो घृतवच्चास्य जायते"—इति ॥ १५ ॥

†व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु सिराप्रतानम् ।
संकुच्य संपीड्य विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम्१६
ग्रन्थिः सिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात् सरुजश्चलश्च ।
अरुक्सएवाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्जनीयः ॥ १७ ॥
(सु. नि. अ. ११)

सिराजग्रन्थेः संप्राप्तिमाह—व्यायामजातैरित्यादि । संकुच्येत्यन्तर्भावितोऽत्र ण्यर्थः, तेन संकोच्येत्यर्थः । संपिण्ड्येति संहतीकृत्य । उन्नतमाशु वृत्तमिति अस्य सामान्यलक्षणेनैव सिद्धे पुनस्तदुक्तिरतिशयार्थम् । स च सिराजो ग्रन्थिर्यदि सरुज श्चलश्च स्यात्तदा कृच्छ्रसाध्यः । स चारुजश्चापीत्यादिना न साध्यः । स चेति चकारेणा-

* 'पाषाणवत् संघातान्वितो महानित्यर्थः । भिन्नः सन् शुक्लं घनं पूयं स्रवेत्' (आ० द०) ॥ १४ ॥

† 'तैस्तैरिति बलवद्विग्रहादिभिः सिराप्रतानं सिराभ्यो निर्गतं सूक्ष्मसिराजालम् । उन्नतमुच्चं, वृत्तं वर्तुलम्' (आ० द०) ॥ १६–१७ ॥

१ अरुक्सएवा इति ख. ।

रुजत्वादिधर्मयोगादपरेऽपि ग्रन्थयोऽसाध्या इति सूचयति । यदुक्तं भोजे,—"पर्वैता-नरुजो ग्रन्थीन् मर्मजानचलांस्त्यजेत् । कपोलगलमन्यासु दुश्चिकित्स्याश्च सन्धिषु"—इति । अन्ये तु मांसासृग्भ्यां षष्ठं ग्रन्थिं वदन्त एवं पठन्ति,—"मांसासृजं चार्बुदल-क्षणेन तुल्यं हि दृष्टं लथ लक्षणज्ञैः"—इति । किंत्वनार्षोऽयं पाठः, भोजादिसर्मतन्त्रे-ष्वदृष्टत्वात् ॥ १६ ॥ १७ ॥

*गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य ।
वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकम् ॥ १८ ॥
कुर्वन्ति मांसोच्छ्रयमत्यगाधं तदर्बुदं शास्त्रविदो वदन्ति ।
वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा ॥ १९ ॥
तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि सदा भवन्ति ।
(सु. नि. अ. ११)

मांसशोणितदूष्यसाम्यादर्बुदाभिधानम् । तस्य संप्राप्तिमाह—गात्रप्रदेशे क्वचिदि-त्यादि । क्वचिदेवेत्यनेनानियतदेशे, न पुनरपचीवन्नियतदेशे । 'संमूर्च्छिता' इति पाठान्तरे संमूर्च्छिता वृद्धाः, दूष्यसंसृष्टा इति कार्तिकः । मांसमसृक् प्रदूष्येति सर्वा-र्बुदसाधारणं दूष्यं, मांसार्बुदमेदोर्बुदयोस्तु विशेषेण मांसदुष्टिः; मांसार्बुदमेदोर्बुदयो-रपि तद्दूषको दोषोऽस्ति, तेन तत्रापि दोषकर्तृतया संप्राप्तिरियं भवति । मांसोच्छ्रयमिति मांसोच्छ्रयतया प्रतीयमानम् । मेदोजेऽपि मांसमुद्गतं भवति । अत्यगाधमिति दूरानु-प्रविष्टं; अत एवानल्पमूलमित्युक्तम् । वातादिभिस्तदर्बुदं जायते भवति, तेन षडर्बु-दानि भवन्ति । ग्रन्थेः समानानीति वातपित्तकफमेदोग्रन्थिभिर्वातपित्तकफमेदोर्बुदानां लक्षणानि, समानानि, शोणितजमांसजयोस्तु लक्षणं पृथक् वक्ष्यति ॥१८॥१९॥—

†दोषः प्रदुष्टो रुधिरं सिराश्च संकुच्य संपिण्ड्य ततस्त्वपाकम् ॥२०॥
सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशुवृद्धम् ।
करोत्यजस्रं रुधिरप्रवृत्तिमसाध्यमेतद्रुधिरात्मकं तु ॥ २१ ॥
रक्तक्षयोपद्रवपीडितत्वात् पाण्डुर्भवेदर्बुदपीडितस्तु ।
(सु. नि. अ. ११)

रक्तार्बुदमाह—दोषः प्रदुष्ट इत्यादि । संकुच्येति अन्तर्भावितोऽत्र ण्यर्थः । अपा-कमीषत्पाकं, तेन सास्रावमित्युपपन्नं भवित । दोष उन्नह्यति उच्छ्रितो भवति । सास्रा-वमीषत्स्रावम् । मांसपिण्डमाशुवृद्धं शीघ्रवर्धनं, मांसाङ्कुरैराचितं करोति, तथा अजस्रं रुधिरप्रवृत्तिमपि करोति; रुधिरं चात्राधिष्ठानभूतं सिरागतं प्रवर्तते न तु पाकात्,

* 'मांसार्बुदमेदोर्बुदयोश्च विशेषेण मांसमेदोदुष्टिः, वृत्तं वर्तुलं, मृदु मृदुस्पर्शं, मांसमेदा-श्रयत्वात्' (आ० द०) ॥ १८ ॥ १९ ॥

† 'सुश्रुतोक्ते रक्तक्षयोपद्रवैः पाण्डुः स्यात्' (आ० द०) ॥ २० ॥ २१ ॥

१ पतश्च—"वृत्तं मृदु मन्दरुजम्" इति पाठाभिप्रायेण ।

ईषदेव स्रावस्य क्लेदरूपस्योक्तत्वात् । किंवा उन्नह्यतीत्यन्तर्भावितण्यर्थः, तेन मांसपिण्डमुन्नाहयति उन्नतं करोति । 'दोषाः प्रदुष्टाः' इति पाठपक्षे 'स्रावमुन्नह्य हि' इति पाठः । उन्नह्य उन्नाह्य, अन्तर्भावितण्यर्थत्वात् । हि पादपूरणे ॥ २० ॥ २१ ॥—

*मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथम् ॥ २२ ।
अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यम् ।
प्रदुष्टमांसस्य नरस्य गाढमेतद्भवेन्मांसपरायणस्य ॥ २३ ॥
मांसार्बुदं त्वेतदसाध्यमुक्तं,

(सु. नि. अ. ११)

मांसजन्यसंप्राप्तिमाह—मुष्टिप्रहारादिभिरित्यादि । अश्मोपमं पाषाणवत् कठिनम् । अप्रचाल्यं स्थिरम् । यद्यपि रक्तमांसार्बुदयो रक्तमांसयोर्हेतुत्वेनोक्तिस्तथाऽपि रक्तजे पित्तं, मांसजे वायुरारम्भकः, एवमपि ताभ्यां घृतदुग्धन्यायेन व्यपदेशः । मांसपरायणस्य मांसाशनशीलस्य । तस्य चातिमात्रं मांसवृद्धिः, "मांसं मांसेन वर्धते" इत्यभिधानात् ॥ २२ ॥ २३ ॥—

साध्येष्वपीमानि तु वर्जयेच्च ।
†संप्रस्रुतं मर्मणि यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यम् ॥ २४ ॥
(सु. नि. अ. ११)

साध्येष्वप्यसाध्यप्रकारानाह—साध्येष्वपीत्यादि । संप्रस्रुतं स्रावयुक्तं, स्रावश्चाप्राकित्वेऽपि त्वगवदरणान्मनागवगन्तव्यः । स्रोतःसु नासादिषु । अचाल्यं स्थिरम् ॥ २४ ॥

यज्जायतेऽन्यत् खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः ।
यद्द्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यम् ॥ २५ ॥
(सु. नि. अ. ११)

अध्यर्बुदमाह—यज्जायत इत्यादिना । अधिकमर्बुदमध्यर्बुदं, एतद्विरर्बुदमेव । यद्द्वन्द्वजातं युगपत् क्रमाद्वेति द्वन्द्वजातं युग्मेन जातं, युगपदेकदा क्रमेण वा, तद्विरर्बुदं न साध्यम् । तथाच भोजः—"अर्बुदे त्वर्बुदं जातं द्वन्द्वजं चानुजं च यत् । द्विरर्बुदमिति ज्ञेयं तच्चासाध्यं विनिर्दिशेत्"—इति ॥ २५ ॥

न पाकमायान्ति कफाधिकत्वान्मेदोबहुत्वाच्च विशेषतस्तु ।
दोषस्थिरत्वाद्ग्रथनाच्च तेषां सर्वार्बुदान्येव निसर्गतस्तु ॥ २६ ॥
(सु. नि. अ. ११)

इति श्रीमाधवकरविरचिते माधवनिदाने गलगण्डगण्डमालापचीअन्थ्यर्बुदनिदानं समाप्तम् ॥ ३८ ॥

---

* 'मुष्टिप्रहारादिभिरर्दितेऽङ्गप्रदेशे, अनन्यवर्ण, अपाकं पाकरहितम्' (आ० द०) ॥२२॥२३

† 'स्रोतस्सु सिरादिषु' (आ० द०) ॥ २४ ॥

अर्बुदानां पाकाभावे हेतुमाह—न पाकमायान्तीत्यादि । सर्वार्बुदानि पित्तरक्तजान्यपि न पाकमायान्ति, कुत इत्यत आह—कफाधिकत्वान्मेदोबहुलत्वाच्च । ननु, अपच्यामपि विशेषतः कफमेदसी अधिके, अथ च तस्याः पाकोऽस्त्येव, इत्यत आह–दोषस्थिरत्वादिति ।–अपच्यां कालान्तरेण हि रक्तपित्तमधिकं पाकमारभते, तच्चेह दोषस्थिरत्वात् सदा सदृशदोषत्वाद्ग्रथितत्वाच्च न पाकारम्भकम् । अन्ये तु दोषस्थिरत्वादिति दोषोच्छ्रायरूपशोथकाठिन्यादित्याहुः; तदप्रयोजनकं, अन्यत्र दोषोच्छ्रायशोथकाठिन्येऽपि पाकदर्शनात् । अथ कुतोऽशोफहेतुसंपदित्याह—निसर्गतस्त्विति ।–निसर्गतो व्याधिस्वभावात् । भोजेऽप्युक्तं,–"न पच्यते स्थिरत्वाच्च ग्रथितत्वात् स्वभावतः"–इति ॥ २६ ॥

इति श्रीकण्ठदत्तविरचितायां मधुकोशव्याख्यायां गलगण्डगण्डमालापची-ग्रन्थ्यर्बुदनिदानं समाप्तम् ॥ ३८ ॥

अथ श्लीपदनिदानम् ।

*यः सज्वरो वङ्क्षणजो भृशार्तिः शोथो नृणां पादगतः क्रमेण ।
तच्छ्लीपदं स्यात् करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः ॥ १ ॥

वातजं कृष्णरूक्षं च स्फुटितं तीव्रवेदनम् ।
अनिमित्तरुजं तस्य बहुशो ज्वर एव च ॥ २ ॥
पित्तजं पीतसंकाशं दाहज्वरयुतं मृदु ।
श्लैष्मिकं स्निग्धवर्णं च श्वेतं पाण्डु गुरु स्थिरम् ॥ ३ ॥

उत्सेधसाधर्म्यादर्बुदेन सह कफसंबन्धाव्यभिचारसाम्याच्चाथ श्लीपदनिदानम् । तस्य संप्राप्तिमाह—य इत्यादि वङ्क्षणावस्थानमेवास्य पूर्वरूपम् । क्रमेणेति शनैः–शनैः । तच्छ्लीपदं स्यादित्यनेन निरुपाधिरेवेयं संज्ञेति दर्शयति, अन्ये शिलावत् पदं श्लीपदमिति वदन्ति, नैरुक्त्येन च विधिना साधुत्वम् । करकर्णादिगतश्लीपदानां यथोक्तसंप्राप्त्यभावात् केचिदाहुरिति परमतेनोक्तिः ॥ १–३ ॥

†वल्मीकमिव संजातं कण्टकैरुपचीयते ।
अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः ॥ ४ ॥

एषामसाध्यतामाह—वल्मीकमिवेत्यादि । संजातं प्रवृद्धं सत् वल्मीकवद्बहुशिख-

---

* 'वङ्क्षणमूरुमेढ्संधिः, वङ्क्षणस्थः श्वयथुर्भृशार्तिसहितश्च चरणं गच्छतीत्यर्थः, अकारणेनैव पीडा । बहुशो वारंवारं ज्वरः—पीतसंकाशं पीतावभासं, मृदु मृदुस्पर्शम् । स्निग्धवर्णो यस्य चिक्कणमित्यर्थः । पाण्डु पीतश्वेतम्' (आ० द०) ॥ १–३ ॥

† 'सर्वात्मकं त्रिदोषजम् । अन्ये अब्दात्मकमिति पठन्ति, तत्रातिक्रान्तवत्सरमित्यर्थः' (आ० द०) ॥ ४ ॥

राकारं ग्रन्थिभिरुपचितं यद्भवति तदसाध्यम् । अन्ये तु पुनरमुं ग्रन्थिं कफजलक्षणत्वेन वर्णयन्ति; तन्न मनो धिनोति, सुश्रुते वल्मीकवज्जातस्यासाध्यत्वेनाभिधानात् । तद्यथा,–"तत्र संवत्सरातीतमतिमहद्वल्मीकमिव संजातं संप्रस्नुतमिति वर्जनीयानि भवन्ति" (सु. नि. स्था. अ. १२)—इति । अब्दात्मकमित्यादि ।—अब्दात्मकं संवत्सरातीतं, अब्दमेकमिति पाठे तु 'अतिक्रान्तं' इति शेषः । महदिति अत्यन्तमुच्छूनम् । वर्जनीयं विशेषत इति प्रत्याख्येयम् ॥ ४ ॥

*त्रीण्यप्येतानि जानीयाच्छ्लीपदानि कफोच्छ्रयात् ।
गुरुत्वं च महत्त्वं च यस्मान्नास्ति कफं विना ॥ ५ ॥

श्लीपदेषु कफस्याव्यभिचारेण प्राधान्यमाह—त्रीण्यप्येतानीत्यादि । ननु, यद्यव्यभिचारी सर्वत्र कफः कथं तर्ह्येकदोषजत्वव्यपदेशः, सर्वस्य द्विदोषजत्वप्रसङ्गात्? उच्यते, अनुबन्धोऽत्र कफः, न त्वनुबन्ध्यः; एतेनात्र न द्विदोषजप्रसङ्ग इत्यभिप्रायः ॥५॥

†पुराणोदकभूयिष्ठाः सर्वर्तुषु च शीतलाः ।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥ ६ ॥

श्लीपदसंभवहेतुं देशमाह—पुराणोदकेत्यादि । अनूपदेशे हि सलिलं पतितं बहूदकं निम्नतया न शोषमुपयाति; जाङ्गले त्वाग्नेयोन्नतभूभागत्वान्न पुराणोदकभूयिष्ठता । स्तिमितस्यानूपस्य मन्दातपत्वेनोष्णर्तावपि शीतत्वेत्यत उक्तं—सर्वर्तुषु च शीतला इति । करकर्णादिगतश्लीपदसंदेहे कोपद्वारेण ज्वरेण च श्लीपदावधारणं करणीयम् ॥ ६ ॥

‡यच्छ्लेष्मलाहारविहारजातं पुंसः प्रकृत्याऽपि कफात्मकस्य ।
सास्रावमत्युन्नतसर्वलिङ्गं सकण्डुरं श्लेष्मयुतं विवर्ज्यम् ॥७॥

इति श्रीमाधवकरविरचिते माधवनिदाने श्लीपदनिदानं समाप्तम् ॥ ३९ ॥

सास्रावं इति अपरमसाध्यलक्षणमाह—यदित्यादि । अत्युन्नतसर्वलिङ्गमिति येन दोषेणारब्धं श्लीपदं तस्यात्युन्नतानि अतिवृद्धानि सर्वाणि लिङ्गानि यत्र तत्तथा । सकण्डुरमिति अत्यन्तकण्डुमत् । श्लेष्मयुतमिति श्लेष्मानुगम् ॥ ७ ॥

इति श्रीकण्ठदत्तविरचितायां मधुकोशव्याख्यायां श्लीपदनिदानं समाप्तम् ॥ ३९ ॥

---

* 'त्रीणि वातजादीनि, यतो गुरुत्वं च श्लेष्मणा विना न स्यात्,' अतः श्लीपदं कफाधिकम् (आ० द०) ॥ ५ ॥

† 'पुराणोदकभूयिष्ठा इति अनूपदेशे सलिलं पतितं बहूदकं निम्नभूभागतया न शोषमुपयाति, अतोऽनूपदेशस्य पुराणोदकभूयिष्ठता; जाङ्गले त्वाग्नेयोन्नतभूभागतया सलिलं पतितं न तिष्ठति, स्थितमपि रूक्षोष्णशुष्कदेशस्य शोषमुपयाति, इति जाङ्गलदेशस्य न पुराणोदकभूयिष्ठता । सर्वेष्वपि ऋतुषु शीतला ये देशा इति हिमवत्प्रदेशाः' (आ० द०) ॥ ६ ॥

‡ 'श्लेष्मलाहारो मधुरादिः, विहारो दिवास्वप्नादिः, कफप्रकृतिकस्य । सास्रावमास्रावयुतम् । अत्युन्नतसर्वलिङ्गं येन दोषेणारब्धं श्लीपदं, तस्यात्युन्नतान्यतिप्रवृद्धानि, सर्वाणि त्रिदोषलिङ्गानि च यत्र तत्' (आ० द०) ॥ ७ ॥

अथ विद्रधिनिदानम् ।

*त्वग्रक्तमांसमेदांसि संदूष्यास्थिसमाश्रिताः ।
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम् ॥ १ ॥
महामूलं रुजावन्तं वृत्तं चाऽप्यथवाऽऽयतम् ।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥ २ ॥
पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ।
षण्णामपि हि तेषां तु लक्षणं संप्रवक्ष्यते ॥ ३ ॥

(सु. नि. अ. ९)

शोथत्वसामान्याद्विद्रधिनिदानम् । तस्य संप्राप्तिमाह—त्वग्रक्तमांसमेदांसीत्यादि । घोरमित्यन्येभ्योऽपि शोथसमुत्थानेभ्यो ग्रन्थ्यादिभ्य आशुकारित्वाद्दारुणम् । उच्छ्रिता भृशमिति अत्यर्थं वृद्धाः । अस्थिसमाश्रिता इत्यनेन स्थानसंश्रयोऽभिहितः । उच्छ्रिता भृशमित्यनेन प्रकोप आविष्कृतः, एतेनैवान्तरीयकतया चयप्रसरावप्याक्षिप्तौ मन्तव्यौ । महामूलमस्थ्यादिसमाश्रयणाद्गम्भीरमूलम् । रुजावन्तमिति उत्पत्तावेव रुजाप्रकर्षवन्तं, अतिशायने मतुप् । वृत्तमित्यादि ।—वृत्तं वर्तुलम् । आयतं दीर्घम् । वृत्तायताभ्यां ग्रन्थ्यादिविलक्षणता । विद्रधिरिति ख्यात इति इतिशब्देन निरुपाधिसंकेतमात्रा विद्रधिसंज्ञेति दर्शयति । चरके तु विदाहप्रकर्षाद्विद्रधिसंज्ञा । यदुक्तं—"स वै शीघ्रविदाहित्वाद्विद्रधीत्यभिधीयते" (च. सू. स्था. अ. १७)—इति ॥१-३॥

कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः ।
चित्रोत्थानप्रपाकश्च विद्रधिर्वातसंभवः ॥ ४ ॥

(सु. नि. अ. ९)

वातिकमाह—कृष्ण इत्यादि । विषमो भृशमिति कदाचिदल्पः कदाचिन्महान् । चित्रोत्थानप्रपाक इति चित्रौ नानाविधौ वायोर्विषमक्रियत्वादुद्गमप्रपाकौ यस्य स तथा ॥ ४ ॥

†पक्वोदुम्बरसंकाशः श्यावो वा ज्वरदाहवान् ।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसंभवः ॥ ५ ॥

(सु. नि. अ. ९)

पैत्तिकमाह—पक्वेत्यादि । ज्वरदाहावुत्थानकाल एव, पाककाले तु प्रकर्षवन्तौ ताविति विशेषः ॥ ५ ॥

---

* 'स षट्प्रकारः—त्रिभिर्दोषैस्त्रयः, सन्निपातेनैकः, क्षतेनैकः, असृजाऽप्येक इति षट् । षण्णामपि लक्षणं कथ्यते' (आ० द०) ॥ २-३ ॥

† 'पक्वोदुम्बरसदृशः, श्यावः श्यामवर्णः, क्षिप्रमुत्थानप्रपाकौ यस्य स तथा' (आ०द०) ॥५॥

---

१ एतच्च 'क्षिप्रोत्थानप्रपाकश्च' इति पाठाभिप्रायेण ।

*शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधिः कफसंभवः ॥ ६ ॥
(सु. नि. अ. ९)

कफजमाह—शरावेत्यादि । शरावसदृश इति महत्त्वसूचनपरम् ॥ ६ ॥

तनुपीतसिताश्चैषामास्रावाः क्रमशः स्मृताः ।

पाकानन्तरं संभूतास्रावलिङ्गमाह—तनुपीतसिताश्चैषामित्यादि । क्रमश इति यथाक्रमं; तेन वातेन तनुः, पित्तेन पीतः, कफेन सितः; तनुस्रावे वातानुरूपो वर्णो ज्ञेयः ॥—

नानावर्णरुजास्रावो घाटालो विषमो महान् ॥ ७ ॥
विषमं पच्यते चापि विद्रधिः सान्निपातिकः ।
(सु. नि. अ. ९)

सन्निपातजमाह—नानेत्यादि । नानावर्णरुजास्राव इति नानाशब्दः प्रत्येकमभिसंबध्यते, नाना बहुविधा वर्णाः कृष्णपीतशुक्लवर्णाः, रुजास्तोददाहकण्ड्वादिकाः तनुपीतसिता आस्रावाश्च यस्य स तथा । अन्यत्र शोथे पाककाले नानारुजा, अत्र तु सर्वदा । घाटाल इति घाटा अस्यास्ति स घाटाल इति मत्वर्थीयो लच्, अत्युच्छ्रिताग्रत्वेन घाटाल इव । विषमोऽसाध्यत्वात् । विषमं पच्यत इति चिराचिरगम्भीरोत्तानोर्ध्वानूर्ध्वभेदेन विषमं यथा भवति तथा पच्यत इति विषमसमम् । ननु, विषमपाकित्वं वातिके विद्रधावुक्तं, तथाऽनुपक्रान्ते च शोथे; यथा,—"योऽभ्युत्थितोऽल्पो यदि वा महान् स्यात् क्रियां विना पाकमुपैति शोथः । विशालमूलो विषमो विदग्धः स कृच्छ्रतां यात्यवगाढदोषः" (सु. सू. स्था. अ. १७)—इति; अतः संशये कथं मिथो भेदप्रतीतिः ? उच्यते, वातिकेऽप्रतीकारेणैव विषमपाकित्वं, इह पुनः प्रतीकारेऽपि वैषम्यं; वातिके तु पाकमात्रवैषम्यं, न तु गाम्भीर्यादिना, अतो वातिकः साध्यः ॥ ७ ॥—

†तैस्तैर्भावैरभिहते क्षते चाऽपथ्यकारिणः ॥ ८ ॥
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ।
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ॥ ९ ॥
आगन्तुर्विद्रधिर्ज्ञेयः पित्तविद्रधिलक्षणः ।
(सु. नि. अ. ९)

अभिघातजस्यागन्तोः संप्राप्तिमाह—तैस्तैरित्यादि । तैस्तैरिति काष्ठलोष्टपाषाणादिभिः, अभिहत इति अक्षुतरक्तस्य मथितपिच्चितादेरुपलक्षणं, क्षत इति स्रुतरक्तस्य छिन्नभिन्नादेः, द्वयोरभिहतयोरपथ्यकारिण इति विशेषणम् । क्षतोष्मेति क्षतशब्दस्य

---

* 'चिरमुत्थानप्रपाकौ यस्य स तथा' (आ० द०) ॥ ६ ॥

† 'वातेन विस्तारितः, क्षतेन रक्तक्षयात्, रक्तं पित्तं चेरयेत् कोपयेत्' (आ०द०) ॥८।९॥

हिंसामात्रपरिग्रहात् क्षताभिहतयोरप्यूष्मा क्षतोष्मशब्देनोच्यते । वायुविसृत इति क्षते रक्तक्षयादभिहतेऽभिघातादेव वातकोपः, कुपितेन वातेन हेतुभूतेन विसृतः प्रसृतो वायुविसृतः । यद्यप्ययं वातपित्तरक्तजस्तथाऽपि प्रागभिघातसंभवत्वेनागन्तुः, वातपित्तरक्तजानां जनकत्वेनैव विलक्षणाऽस्य संप्राप्तिः । पित्तविद्रधिलक्षण इति अत्रोक्तज्वरादिव्यतिरिक्तसंस्थानवर्णवेदनादिपित्तविद्रधिलिङ्गयुक्त इत्यर्थः ॥ ८ ॥ ९ ॥—

*कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाकरः ॥ १० ॥
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ।

(सु. नि. अ. ९)

रक्तजमाह—कृष्णेत्यादि । पित्तविद्रधिलिङ्गातिदेशेन लब्धावपि दाहज्वरौ तीव्रताविशेषार्थमुक्तौ । श्याव इति पित्तविद्रधिलिङ्गातिदेशेन प्रसक्तस्य पक्वोदुम्बरसंकाशस्यापवादः । भोजप्रभृतयस्तु धातुरक्तजं विद्रधिं परित्यज्य मक्कल्लसंज्ञायाऽऽर्तवलक्षणरक्तजं पठन्ति । तेषां मते आर्तवजेन सह षड्विद्रधयः, सुश्रुते तु धातुरक्तजोऽपि तथा मक्कल्लसंज्ञकोऽपि विद्रधिः सामान्येन रक्तज एवेति षड्विद्रधय इति बोद्धव्यम् ॥१०॥—

†पृथक् संभूय वा दोषाः कुपिता गुल्मरूपिणम् ॥ ११ ॥
वल्मीकवत् समुन्नद्धमन्तः कुर्वन्ति विद्रधिम् ।
गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा ॥ १२ ॥
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाऽप्यथ ।
तेषामुक्तानि लिङ्गानि बाह्यविद्रधिलक्षणैः ॥ १३ ॥
अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः ।
गुदे वातनिरोधश्च वस्तौ कृच्छ्राल्पमूत्रता ॥ १४ ॥
नाभ्यां हिक्का तथाऽऽटोपः कुक्षौ मारुतकोपनम् ।
कटीपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ ॥ १५ ॥

---

* 'कृष्णः कृष्णवर्णः, स्फोटावृतः पिडकायुक्तः, श्यावः श्यामवर्णः; अन्ये 'कृष्णस्फोटावृतः' इति पठन्ति, तत्र कृष्णैः स्फोटैरावृतः' (आ० द०) ॥ १० ॥

† 'दोषा वातादयः, पृथग् भिन्नाः, संभूय मिलित्वा वा, अन्तर्मध्ये, गुल्मरूपिणं गुल्मवत्संहतं वल्मीकवत्समुन्नतं, वल्मीकं भूमौ कृमिविशेषैः कृतं, तद्वत्समन्तादुन्नतम् । स्थानसंश्रयमाह-गुद इत्यादि । वस्तिमुख इति वस्तिमुखाश्रितमांसादौ; न च वस्तौ, तत्तुल्यात् । कुक्षौ पार्श्वयोरधोभागे, वङ्क्षणयोरूरुमेढ्रसंध्योः । वृक्कौ मांसपिण्डद्वयं, एको वामपार्श्वे स्थितः, द्वितीयो दक्षिणपार्श्वे स्थितः, प्लीहा उदरस्य वामपार्श्वे स्थितः, यकृत् कालखण्डं दक्षिणपार्श्वस्थं, हृदयं कमलमुकुलाकारमधोमुखं, क्लोम कालखण्डाधस्तात् स्थितं दक्षिणपार्श्वस्थं तिलकं प्रसिद्धम् । तेषामाभ्यन्तराणां विद्रधीनां लिङ्गानि बाह्यविद्रधिलक्षणैरुक्तानि । प्रत्येकं स्थानसंश्रयत्वेन रूपमाह-गुद इत्यादि । गुदे जाते विद्रधौ वातनिरोधो भवति, तथा वस्तौ कृच्छ्रमूत्रताऽल्पमूत्रता च । नाभ्यां हिक्का, तथा आटोपो रुजापूर्वकः क्षोभः । वङ्क्षणोत्थे

---

१ एतच्च—"कृष्णः स्फोटावृतः" इति पाठाभिप्रायेण ।

वृक्कयोः पार्श्वसंकोचः प्लीह्न्युच्छ्वासावरोधनम् ।
सर्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते ॥
श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः ॥ १६ ॥
(सु. नि. अ. ९)

अधिष्ठानविशेषेण लिङ्गविशेषं साध्यतामसाध्यतां च प्रतिपादयितुमाभ्यन्तरविद्रधिमाह—पृथगित्यादि । इयमधिकविधानार्थमुक्ताऽपि संप्राप्तिर्विद्रधेः पुनरुच्यते । आभ्यन्तरस्य रक्तजस्य तथाऽऽगन्तोश्च विद्रधेर्दोषेण व्यपदेशादियमेव तत्रापि संप्राप्तिर्ज्ञेयेति कश्चित् । बाह्यागन्तुवदाभ्यन्तरागन्तुसंप्राप्तिरित्यर्थः । क्षतजस्याभ्यन्तराभावान्न[1] निर्दिष्टः क्षतज इति तु जेज्जटः । गुल्मरूपिणमिति गुल्मवत् संहतम् । एतदाभ्यन्तरविद्रधीनां सामान्यरूपं; विशेषलक्षणं तु बाह्यविद्रधिलक्षणैरेव ज्ञेयम् । वल्मीकवत् उच्छूनत्वं समुन्नद्धं समन्तादुन्नतं; एतदपि पच्यमानावस्थायां सर्वेषां समानम् । बस्तिमुख इति बस्तिमुख एव, विद्रध्याधारभूतमांसादिसंभवात्; न बस्तौ, तस्य तनुत्वात् । आटोपो रुजापूर्वकक्षोभः । मारुतकोपनमिति मार्गावरोधाद्वायोः कोपः । वृक्कयोरिति वृक्कमग्रमांसम् । सर्वाङ्गप्रग्रहः प्रत्यङ्गव्यथा, सर्वसिराधिष्ठानत्वाद्धृदयस्य । क्लोम्नीति क्लोम वृक्कादूर्ध्वं पिपासास्थानम् । पेपीयते पय इति पुनः पुनर्जलं पातुमिच्छतीत्यर्थः ॥ ११–१६ ॥

नाभेरुपरिजाः पक्वा यान्त्यूर्ध्वमितरे त्वधः ।
(सु. नि. अ. ९)

स्रावनिर्गममार्गमाह—नाभेरित्यादि । उपरिजा वृक्कप्लीहादिजाः । यान्ति स्रवन्ति । नाभिजस्तूभयमार्गस्रावी, ऊर्ध्वाधःस्रावश्च तथागतित्वाद्वातस्य । यदाह **हारीतः**,—"ऊर्ध्वं प्रभिन्नेषु मुखान्तराणां प्रवर्ततेऽसृक्सहितोऽपि पूयः । अधःप्रभिन्नेषु च पायुमार्गात्, द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु"—इति । इतर इति नाभिबस्तिवङ्क्षणजाः ॥—

*अधःस्रुतेषु जीवेत्तु स्रुतेषूर्ध्वं न जीवति ॥ १७ ॥
हृन्नाभिबस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः ।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन ॥ १८ ॥
(सु. नि. अ. ९)

विद्रधौ, तीव्रः कटीपृष्ठग्रहो भवति । वृक्कयोरित्यादि । पार्श्वसंकोचः पार्श्वोत्पाटनमिव, प्लीह्नि उच्छ्वासावरोधनं भवति । तथा हृदीति हृदयोत्थे विद्रधौ सर्वाङ्गप्रग्रहादय उपद्रवा भवन्तीत्यर्थः । तीव्रो दुःसहः, सर्वेषामङ्गानां प्रकर्षेण ग्रहणमिव सर्वाङ्गप्रग्रहः प्रत्यङ्गव्यथा, सर्वाधिष्ठानत्वाद्धृदयस्य, यकृति जाते विद्रधौ श्वासस्तथा हिक्का च भवति' (आ० द०) ॥ ११–१६ ॥

* 'साध्यासाध्यत्वमाह—अध इत्यादि । वातिकपैत्तिकश्लैष्मिकागन्तुरक्तजा इति, अयं व्रणेषु विषयः, त्रिदोषजस्त्वसाध्यः । तेषां विद्रधीनामाभ्यन्तरेष्वसाध्यत्वमाह—आध्मातमित्यादि ।

---

[1] 'क्षतस्यान्तरभावान्न' इति पाठः.

साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः ।
आमपक्वविदग्धत्वं तेषां शोथवदादिशेत् ॥ १९ ॥
(मा. नि. अ. ११)

आध्मातं बद्धनिष्यन्दं छर्दिहिक्कातृषान्वितम् ।
रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम् ॥ २० ॥
(सु. सू. अ. ३३)

इति श्रीमाधवकरविरचिते माधवनिदाने विद्रधिनिदानं समाप्तम् ॥ ४० ॥

साध्यत्वादिकमाह—अध इत्यादि । अधःस्रुतेष्विति स्वयमेव यदा नाभ्यादिजा भिन्ना अधः स्रवन्ति तदा जीवति । स्रुतेपूर्ध्वं न जीवतीति ऊर्ध्वं पूयस्रावासम्यङ्निर्गमात् जीवनम् । हृन्नाभिवस्तिवर्ज्या इति क्लोमादिजाः । भिन्नेषु वाह्यत इति वैद्यव्यापारेण भिन्नेषु; अन्ये मर्माशयजेषु स्वयमेव भिन्नेष्विति व्याचक्षते, अन्तर्भिन्नेष्वप्यधःस्राविषु जीवनोक्तेः । नेतरेष्विति हृन्नाभिवस्तिजेषु भिन्नेषु तेषां मर्मत्वात् वाह्या आभ्यन्तरा वा वर्ज्याः । कदाचनेति पाके अपाके वा । तथाच भोजः—"असाध्यो मर्मजो ज्ञेयः पक्वोऽपक्वश्च विद्रधिः । सन्निपातोत्थितोऽप्येवं पक्व एव तु वस्तिजः ॥ त्वग्जो नाभेरधो यश्च साध्यो मर्मसमीपजः । अपक्वश्चैव पक्वश्च साध्यो नोपरिनाभिजः"—इति । अत्र मर्मजशब्देन हृदयनाभिजावुच्येते । बद्धनिष्यन्दमिति बद्धमूत्रम् । एतद्वस्तिजे प्रायः ॥ १७–२० ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विद्रधिनिदानं समाप्तम् ॥ ४० ॥

अथ व्रणशोथनिदानम् ।

*एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणम् ।
षड्विधः स्यात् पृथक्सर्वैरक्तागन्तुनिमित्तजः ॥ १ ॥
शोथाः षडेते विज्ञेयाः प्रागुक्तैः शोथलक्षणैः ।
विशेषः कथ्यते चैषां पक्वापक्वादिनिश्चये ॥ २ ॥

प्रायेण चिकित्सासाधर्म्यात् भाविव्रणत्वसंबन्धतुल्यत्वाच्च व्रणशोथनिदानमाह—एकदेशोत्थित इत्यादि । षड्विध इति संख्याकथनं द्वन्द्वजनिषेधार्थम् । प्रागुक्तैरिति

अत्र केचित्तन्त्रान्तरोक्तं स्तनविद्रधिलक्षणं पठन्ति, तद्यथा—"एवमेव स्तनसिरा विवृताः प्राप्य दोषिताम् । सूतानां गर्भिणीनां च संभवेच्छ्वयथुर्घनः ॥ स्तने सदुग्धे चासासृग्बाह्यविद्रधिलक्षणः । नाडीनां सूक्ष्मरन्ध्रत्वात्स कन्यानां न जायते" इति' (आ० द०) ॥ १७–२० ॥

* 'एकदेशे जातः शोथः, एतद्व्रणपूर्वरूपं; स च षड्विधः—त्रिभिर्दोषैस्त्रयः, सन्निपातेनैकः, रक्तेनैकः, अन्य आगन्तुकोऽभिघातजः, एवं षट् । तेषां लक्षणनिर्देशं दर्शयन्नाह—प्रागुक्तैरिति; शोथनिदानोक्तैश्च, 'रसस्तन्तुत्वक्परुषारुणादिकैः' इत्यादि' (आ० द०) ॥ १ ॥ २ ॥

आमपक्वैषणीयोक्तैः, तत्र हि "वातश्वयथुररुणः कृष्णो वा परुषो मृदुरनवस्थितः" (सु. सू. अ. १७)—इत्यादिना पद्शोथलक्षणान्युक्तानि । विशेषः कथ्यते चैषामिति तत्रानुक्तो विशेषः कथ्यत इत्यर्थः । पक्वापक्वादिनिश्चय इति अत्रादिशब्देन पच्यमानस्य परिग्रहः ॥ १ ॥ २ ॥

*विषमं पच्यते वातात् पित्तोत्थश्चाचिराच्चिरम् ।
कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवः ॥ ३ ॥

वातादिभेदेन विशेषलक्षणमाह—विषममित्यादि । पित्तवदिति पित्तशोथवदचिरं पच्यते ॥ ३ ॥

†मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता ।
मन्दवेदनता चैतच्छोथानामामलक्षणम् ॥ ४ ॥
‡दह्यते दहनेनेव क्षारेणेव च पच्यते ।
पिपीलिकागणेनेव दश्यते छिद्यते तथा ॥ ५ ॥
भिद्यते चैव शस्त्रेण दण्डेनेव च ताड्यते ।
पीड्यते पाणिनेवान्तः सूचीभिरिव तुद्यते ॥ ६ ॥
सोषाचोषो विवर्णः स्यादङ्गुल्येवावघट्यते ।
आसने शयने स्थाने शान्तिं वृश्चिकविद्धवत् ॥ ७ ॥
न गच्छेदाततः शोथो भवेदाध्मातवस्तिवत् ।
ज्वरस्तृष्णाऽरुचिश्चैव पच्यमानस्य लक्षणम् ॥ ८ ॥

पच्यमानलक्षणमाह—दह्यत इत्यादि । पच्यमानशोथे पित्तलिङ्गान्येव भूयसा भवन्ति, विदाहस्य पित्तप्रकोपजत्वात्; विदाहश्चात्र दोषादीनामेव । तेन ज्वरतृष्णारुच्यादयोऽत्र पित्तलिङ्गानि । छिद्यत इति द्विधा क्रियत इव । भिद्यत इति विदार्यते । सोषाचोष इति उषा दाहः, चोषः पार्श्वस्थाग्निसंतापवद्व्यथा, ताभ्यां सह वर्तते यः स तथा ॥ ५–८ ॥

---

* 'विषमं श्वयथोरेकदेशे अर्धे वा, पित्तोत्थोऽचिरं शीघ्रं, कफजश्चिरं चिरकालं पच्यते' (आ० द०) ॥ ३ ॥

† 'आमशोथलक्षणमाह—मन्देत्यादि । मन्दोष्मता ईषदुष्णता, त्वक्सवर्णता, त्वक्सदृश एव वर्णः' ॥ ४ ॥

‡ 'अग्निना दह्यत इव, क्षारेण पच्यत इव, पिपीलिकाभिर्दश्यत इव, भिद्यत इव दण्डेन ताड्यत इव, अन्तर्मध्ये, हस्तेन पीड्यत इव, सूचीभिर्विध्यत इव । उषा एकदेशिको दाहः, ताभ्यां सह वर्तते यः स तथा । विवर्णो म्लानः, अङ्गुल्या इवावघट्यते चाल्यते । आसने तथा शयने तथा स्थाने ऊर्ध्वभवने वृश्चिकविद्धवच्छान्तिं न गच्छेत् । आध्मातवस्तिवद्वायुपूर्णवस्त्याख्यमूत्रकोशवत्, श्वयथुराततो भवति, त्वक्संकोचरहित इत्यर्थः । ज्वरतृष्णादयश्चोपद्रवा भवन्ति पच्यमानव्रणशोथे' (आ० द०) ॥ ५–८ ॥

*वेदनोपशमः शोथोऽलोहितोऽल्पो न चोन्नतः ।
प्रादुर्भावो वलीनां च तोदः कण्डूर्मुहुर्मुहुः ॥ ९ ॥
उपद्रवाणां प्रशमो निम्नता स्फुटनं त्वचाम् ।
वस्ताविवाम्बुसंचारः स्याच्छोथेऽङ्गुलिपीडिते ॥ १० ॥
पूयस्य पीडयत्येकमन्तमन्ते च पीडिते ।
भक्ताकाङ्क्षा भवेच्चैतच्छोथानां पक्वलक्षणम् ॥ ११ ॥

पक्वलक्षणमाह—वेदनोपशम इत्यादि । दाहादिवेदनोपशान्तिः, विदाहोपशमेन पित्तस्यावलत्वात् । तोदः कण्डूश्चात्र वातकफलिङ्गम् । प्रादुर्भावो वलीनामिति मांसशैथिल्याद्वलीसंभवः । उपद्रवाणां प्रशम इति पित्तकोपजनिता उषाचोषतृष्णारुच्यादयो रोगा एव उपद्रवास्तेषां प्रशमः । निम्नता स्वरूपतः, अङ्गुलिपीडनाद्वा । स्फुटनं त्वचामिति किंचित्त्वगवदरणम् । वस्ताविवेत्यादि ।—वस्तिश्चर्मपुटकं, पूयस्येत्यत्र 'संचार' इति शेषः । अयमर्थः—वस्तौ यथाऽम्बुसंचारस्तथा शोथेऽङ्गुलिपीडिते सति पूयस्य संचारः । पीडयत्येकमन्तमन्ते च पीडित इति एकमन्तं देशं, अन्ते अवयवे पीडिते पीडयत्यवगाहते, 'पूय' इति शेषः ॥ ९–११ ॥

†नर्तेऽनिलाद्रुङ् विना च पित्तं पाकः कफं चापि विना न पूयः ।
तस्माद्धि सर्वान् परिपाककाले पचन्ति शोथांस्त्रय एव दोषाः॥१२॥
(सु. सू. अ. १७)

एकदोषारब्धेऽपि शोथे पाककाले सर्वदोषसंबन्धमाह—नर्तेऽनिलाद्रुगित्यादि । रुग्रुजा तोदादिरूपा । सुश्रुते,—"त्रिभिरेतैः शोणितचतुर्थैश्च शरीरमिदं धार्यते" (सु. सू. स्था. अ. २१)—इति द्वितीयदर्शने शोणितप्राधान्याख्यापकमाश्रित्योक्तम्,—"कालान्तरेणाभ्युदितं तु पित्तं कृत्वा वशे वातकफौ प्रसह्य । पचत्यतः शोणितमेष पाको मतः परेषां विदुषां द्वितीयः" (सु. सू. स्था. अ. १७)—इति । अत्र दर्शने पित्तं विदाहकुपितं शोणितं दूष्यं कर्मभूतं पचति, वातकफौ वशे कृत्वा क्रोडीकृत्य, हीनार्थौ वा वशेशब्दः, वातकफौ हीनौ कृत्वेत्यर्थः; शोणितं कर्तृभूतं वा, तेन पक्त्य-

* 'अलोहितः पाण्डुः धूसरो वा, यदुक्तं सुश्रुते—"पाण्डुताऽल्पशोथता" इति । भक्ताकाङ्क्षेति वेदनापगमादेव' (आ० द०) ॥ ९–११ ॥

† 'अनिलाद्वाताहृते रुङ् न भवति, पित्तं विना पाको न भवति, कफं विना पूयो न भवति, तस्माद्धेतोः सर्वे शोफाः परिपाककाले त्रिभिरेव दोषैः पाकं गच्छन्ति । प्रकोपप्रसरस्थानसंश्रयकालावधिना अभि समन्ततो भावेनाभ्युदितं कुपितं पित्तं, पित्तमत्र दोषो ज्ञेयः, शोणितं दूष्यं, तु—शब्दोऽत्र पुनरर्थे, वातकफौ वशे कृत्वा आत्मसात् कृत्वा, पाकक्रियायां पित्तस्य प्राधान्यात् । पूर्वमते कफात् पूयः, अत्र तु शोणितादिभिरिति तात्पर्यार्थः' (आ० द०) ॥ १२ ॥

१ 'सर्वे परिपाककाले पचन्ति शोथास्त्रिभिरेव दोषैः' इति वा पाठः ।

नुकूलत्वाद्विवक्षितं; पूर्वदर्शने कफात् पूयः, अत्र दर्शने शोणितात् पूय इति विशेषः। गम्भीरपाके शोथे सकलामपच्यमानलक्षणानुदयादज्ञायमाने लक्षणान्तरमुक्तं सुश्रुतेन। तद्यथा,-"कफजेषु खलु शोथेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति भिषग्मोहमुपैति, यत्र हि त्वक्सवर्णता शीतशोथताऽल्परुजताऽश्मवद्घनता च, न तत्र मोहमुपेयात्" (सु. सू. स्था. अ. १७)—इति। अस्यार्थः-तदा रागदाहादिवेदनासमुदयानन्तरं त्वक्सवर्णतादीनि भवन्ति तदा न मोहमज्ञानतामुपेयात् पक्वमेवेति निश्चिनुयात्। गदाधरेण तु त्वक्सवर्णतादीनि संशयहेतून्युक्तानि; यतस्तेन "गम्भीरपाकित्वादन्तः पाको बहिः पुनस्त्वक्सावर्ण्यं, गम्भीरपाकित्वादेव बहिः शीतता, कफारब्धत्वान्मन्दरुजताऽश्मवच्च घनता"-इत्यभिधाय "शेषं पक्वलक्षणैर्जानीयात्"-इत्युक्तम्॥ १२॥

*कक्षं समासाद्य यथैव वह्निर्वाय्वीरितः संदहति प्रसह्य।
तथैव पूयो ह्यविनिःसृतो हि मांसं सिराः स्नायु च खादतीह १३
(सु. सू. अ. १७)

अविनिःसृतस्य पूयस्य दोषमाह—कक्षमित्यादि। कक्षं समासाद्येति कक्षं तृणादिगहनम्॥ १३॥

†आमं विदह्यमानं च सम्यक् पक्वं च यो भिषक्।
जानीयात् स भवेद्वैद्यः शेषास्तस्करवृत्तयः॥ १४॥
यश्छिनत्त्याममज्ञानाद्यो वा पक्वमुपेक्षते।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ॥ १५॥
(सु. सू. अ. १७)

इति श्रीमाधवकरविरचिते माधवनिदाने व्रणशोथनिदानं समाप्तम्॥ ४१॥

श्वपचाविव चण्डालाविव, मन्तव्यौ ज्ञातव्यौ। शेषास्तस्करवृत्तय इति लोभमात्रप्रयुक्तत्वात्तस्करा इव शेषाः॥ १४॥ १५॥

इति श्रीकण्ठदत्तविरचितायां मधुकोशव्याख्यायां व्रणशोथनिदानं समाप्तम्॥ ४१॥

---

* 'कक्षं तृणादीनां समूहं, स्नायुमूलाः सिराः (?), वाय्वीरितो वायुप्रेरितः (आ० द०)॥ १३॥

† 'आममपक्वं, विदह्यमानं, पच्यमानं सम्यक् पक्वं च, यो भिषक् जानीयात्, स वैद्यो भवेदायुर्वेदवित् स्यात्; शेषा अन्ये आमादिज्ञानवर्जिता लोभमात्रप्रयुक्तत्वात्तस्करा एव। अपक्वपक्वयोश्छेदनाच्छेदनेन वैद्यदोषमाह-य इत्यादि। श्वपचश्चाण्डालः, स हि सर्वभक्षित्वात् श्वानमपि पचति' (आ० द०)॥ १४॥ १५॥

अथ शारीरव्रणनिदानम् ।

*द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः ।
दोषैराद्यस्तयोरन्यः शस्त्रादिक्षतसंभवः ॥ १ ॥
स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुरति श्यावो व्रणो मारुतसंभवः ॥ २ ॥
तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः ।
व्रणं पित्तकृतं विद्याद्गन्धैः स्रावैश्च पूतिकैः ॥ ३ ॥
बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ॥ ४ ॥
रक्तो रक्तस्रुती रक्तात्

(च. चि. अ. १३)

शोथानामनुपक्रान्तानां व्रणभावापत्तेर्व्रणनिदानमाह—द्विधेत्यादि । 'व्रण गात्रविचूर्णने'—इत्यस्माद्धातोर्व्रणस्य साधुत्वमुक्तम् । व्रणनिरुक्तिश्च सुश्रुतेन कृता । यथा,— "वृणोति यस्माद्रूढेऽपि व्रणवास्तु न नश्यति । आदेहधारणाज्जन्तोर्व्रणस्तस्मान्निरुच्यते" (सु. सू. स्था. अ. २१)—इति । अन्य इत्यागन्तुः । आगन्तुव्रणे यद्यपि दोषस्तत्कालं तदात्वे न संचयकोपप्रसरणशाली विकारकरणसमर्थः कल्पयितुं शक्यते, तथाऽपि सप्तरात्रं क्षतोष्मनिर्वापणाय मधुसर्पिरुपयोगात् शीतक्रियाविधानाच्च निजव्रणविलक्षणचिकित्सार्थं व्यपदिश्यते ॥ १-४ ॥—

†द्वित्रिजः स्यात्तदन्वयैः ।

रक्तस्यैकैकस्मिन् दोषे द्वन्द्वे च प्रसरमाह—द्वित्रिजः स्यात्तदन्वयैरिति । रक्तान्वयैरेकैकदोषैर्द्वन्द्वैश्च; रक्तान्वितैरेकैकदोषैर्द्विजो व्रणः, रक्तान्वितैर्द्वन्द्वत्रयैस्त्रिजः; एवं दोषत्रयेऽपि रक्तसंबन्ध ऊहनीयः; एवं पञ्चदशधा प्रसरो दोषाणामुपगृहीतो भवति । अथवाऽयमर्थः—तदन्वयैर्दोषद्वन्द्वत्रयान्वयैः, तेन दोषद्वयान्वयेन द्विजो द्वन्द्वजो व्रणः, दोषत्रयान्वयेन त्रिजः सन्निपातजः ॥—

---

* 'शारीरागन्तुभेदतो व्रणो द्विधा ज्ञेयः, तयोर्द्वयोर्मध्ये आद्यः शारीरः स च दोषैः पवनकफपित्तशोणितसंनिपातैः स्यात्, अन्य इत्यागन्तुः शस्त्रादिक्षतसंभवो भवति । वातिकमाह—स्तब्ध इत्यादि । स्तब्धोऽचलः, तुद्यते शूलेनेव, श्यावः श्याववर्णः । पैत्तिकमाह—तृष्णेत्यादि । एतैर्लिङ्गैः पित्तकृतं जानीयात् । क्लेद आर्द्रता, दाहदुष्टिः दाहवान्, अवदारणं त्वक्स्फोटनं, पूतिकैर्दुर्गन्धैः । कफजमाह—बह्वित्यादि । बहुपिच्छः भूयः पिच्छिलः, स्तिमितो निश्चलः, अल्पसंक्लेद ईषदार्द्रः' (आ० द०) ॥ १-४ ॥—

† 'रक्तवर्णो भवति, रक्तस्रावो वा । द्वित्रिजः स्यात्तदन्वयैरिति पृथग्दोषै रक्तानुगैः द्वन्द्वैश्च, तेन पृथग्दोषैः सरक्तैर्द्विजः, द्वन्द्वजैः, सरक्तैस्त्रिजः, एवं त्रिदोषजेऽपि रक्तः संबन्धनीयः । तद्यथा—वातजः, पित्तजः, श्लेष्मजः, संघातजः, रक्तजः, वातपित्तजः, वातश्लेष्मजः पित्तश्लेष्मजः, एवमष्टौ; शोणितसंबन्धात् सप्त, वातशोणितसंबन्धात्तज्जः, पित्तशोणितजः, श्लेष्मशोणितजः, वातपित्तशोणितजः, वातश्लेष्मशोणितजः, पित्तश्लेष्मशोणितजः, सन्निपातशोणितज इति; एवं दोषाणां भेदेन पञ्चदशधा प्रसर उक्तः' (आ० द०) ॥—

*त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः ॥ ५ ॥
(च. चि. अ. १३)
धीमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः ।
गुणैरन्यतमैर्हीनस्ततः कृच्छ्रो व्रणः स्मृतः ॥ ६ ॥
सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो भूर्युपद्रवः ।

साध्यत्वादिकमाह—त्वगित्यादि । सुखे देश इति मर्मरहिते देहावयवे । अनुपद्रव इति ज्वरतृष्णाद्युपद्रवरहितः । धीमत इति हिताहितज्ञस्य । काले सुखे इति हेमन्ते शिशिरे च । अन्यतमैरिति उक्तानां गुणानां मध्ये एकतमैर्गुणैः ॥ ५ ॥ ६ ॥—

पूतिः पूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः ॥ ७ ॥
दुष्टो व्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः ।

दुष्टव्रणलिङ्गमाह—पूतिरित्यादि । पूयातिदुष्टासृक्स्रावीति पूययुक्तमतिदुष्टं रक्तं सततं स्रवतीत्यर्थः । उत्सङ्गी कोटरवान् । चिरस्थितिरित्यनेन बहुलदोषसंबन्धं दर्शयति । तथाचोक्तम्, "अनात्मवतामज्ञैश्चोपक्रान्ता व्रणाः प्रदूष्यन्ति, वृद्धलाद्दोषाणाम्" (सु. सू. स्था. अ. २२) इति । दुष्टव्रण इत्यत्र 'परिभावित' इति शेषः । अतिगन्धादिरिति आदिशब्देन वर्णस्राववेदनाकृतयो गृहीताः, अतिशब्देन च विशिष्यन्ते । शुद्धलिङ्गविपर्यय इति वक्ष्यमाणशुद्धलिङ्गविपरीतः पूतित्वादियोगादेव । 'पूतिपूयातिदुष्टासृक्स्रावी'–इति क्वचित् पाठे पूतिशब्दः पूयदुष्टासृग्विशेषणम् ॥ ७ ॥

[1]जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ॥ ८ ॥
सुव्यवस्थो निरास्रावः शुद्धो व्रण इति स्मृतः ।

शुद्धव्रणलक्षणमाह—जिह्वेत्यादि । जिह्वातलाभ इति जिह्वातलवदाभा प्रभा यस्य स तथा, तलशब्दः स्वरूपवचनः । जिह्वातलाभशब्दश्चात्र मृदुश्लक्ष्णस्निग्धशब्दैः प्रत्येकमभिसंबध्यते; तेन जिह्वातलाभो मृदुः श्लक्ष्णः स्निग्धश्चेत्याहुः । सुव्यवस्थ इति उत्सन्नोत्सङ्गित्वरहितः । निरास्राव इति दोषकृतस्रावरहितः । चरके तु पठ्यते,—
"नातिरक्तो नातिपाण्डुर्नातिस्रावो न चातिरुक् । न चोत्सन्नो न चोत्सङ्गीशुद्धो रोप्यः परं व्रणः" (च. चि. स्था. अ. २५)–इति, तद्दर्शनादत्र निरास्रावत्वं दोषकृतस्रावहीनत्वं, विगतवेदनत्वं च वाताद्युक्तवेदनारहितत्वम् । व्रणस्रावकृतवेदनायुक्तत्वं पुनरस्त्येव, अत एव रूढलिङ्गे अरुजमित्युक्तम् ॥ ८ ॥—

* 'धीमतोऽतरलबुद्धेः । व्रणस्य कष्टसाध्यत्वमाह–गुणैरित्यादि । प्रागुक्तानां गुणानां मध्येऽन्यतमैर्गुणैर्हीनो रहितः, त्वङ्मांसजादीनामित्यर्थः । स व्रणः कष्टसाध्यः । असाध्यमाह–सर्वैरित्यादि । सर्वैस्त्वग्मांसजादिकैर्गुणै रहितः, निरुपक्रमोऽनुपक्रान्तः' (आ० द०) ॥५॥६॥

[1] 'सुव्यवस्थ- इति शोभनाकृतिः, तेनोत्सन्नोत्सङ्गित्वरहितः, किंतु सम इत्यर्थः' (आ० द०) ॥ ८ ॥–

१ "भूर्युपद्रवः" इत्यत्र "निरुपक्रमः" इति पाठाभिप्रायेण । "सर्वैर्विहीनोऽसाध्यस्तु तथैवोपद्रवान्वितः" इत्यपि पाठान्तरम् ।

*कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः ॥ ९ ॥
स्थिराश्च पिडकावन्तो रोहतीति तमादिशेत् ।
(सु. सू. अ. २३)

रुह्यमाणलक्षणमाह—कपोतेत्यादि । कपोतवर्णप्रतिमा इति पाण्डुधूसराः स्थिरा अचरणाः । 'चिपिटिकावर्णा' इति पाठान्तरे चिपिटिका मांसचेली, तद्वर्णाः ॥९॥—

†रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम् ॥ १० ॥
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत् ।
(सु. सू. अ. २३)

सम्यग्रूढलक्षणमाह—रूढवर्त्मानमित्यादि । रूढवर्त्मानमिति वर्त्म व्रणमार्गो व्रणवास्तु रूढो यस्य तम् । अन्तःपूयाभावादशूनमरुजं च । त्वक्सवर्णं त्वचा समानवर्णम् । समतलमिति समं तलेन जिह्वातलेन करतलेन वा, अग्रन्थिमित्यनेनोपर्युच्छूनताया निषेधः, समतलेन त्वधोनिम्नताया निषेधः ॥ १० ॥—

‡कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ॥ ११ ॥
व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः ।
वसां मेदोऽथ मज्जानं मस्तुलुङ्गं च यः स्रवेत् ॥ १२ ॥
आगन्तुजो व्रणः सिद्ध्येन्न सिद्ध्येद्दोषसंभवः ।
(सु. सू. अ. २३)

व्याधिविशेषेण व्रणस्य कृच्छ्रसाध्यत्वमाह—कुष्ठिनामित्यादि कुष्ठे विशेषेणात्यन्तदोषदूषितरक्तादिदूष्यत्वेन सर्वदा दुष्टिरधिकेति कृच्छ्रसाध्यत्वम् । विषजुष्टानामिति दूषीविषार्तानाम् । शोषे मधुमेहे च धातुक्षयात्, व्रणे च रक्तस्रावादाहारसंयमनादधिका दुष्टिः । वसां मेदोऽथ मज्जानं मस्तुलुङ्गं च यः स्रवेदिति मज्जा अस्थिस्नेहः, मस्तुलुङ्गं घृतिका । न सिध्येद्दोषसंभव इति दोषैरतिदूषितानां वसादीनां स्रावस्य बहुव्यापत्तिकरत्वात् ॥ ११ ॥ १२ ॥—

§मद्यागुर्वाज्यसुमनःपद्मचन्दनचम्पकैः ॥ १३ ॥
सगन्धा दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः ।

---

* 'यस्य व्रणस्यान्ताः प्रान्ताः क्लेदेन वर्जिताः । स्थिरा अचलाः कठिना इत्यर्थः । "चिपिटिकावन्तः" इति पाठे चिपिटिका मांसचेली चर्मवलीति यावत्, 'करोचडी' इति लोके, ता विद्यन्ते येषां ते चिपिटिकावन्तः' (आ० द०) ॥ ९ ॥—

† 'अशूनं श्वयथुरहितं, अरुजं पीडारहितं,' (आ० द०) ॥ १० ॥—

‡ 'वसा मांसस्नेहः, मस्तुलुङ्गो मस्तकाभ्यन्तरस्नेहः, वसादीनां स्रावादागन्तुजे व्रणे कृच्छ्रसाध्यत्वं, किंतु दोषजे व्रणेऽसाध्यत्वं,' (आ० द०) ॥ ११ ॥ १२ ॥—

§ 'मद्यं प्रसिद्धं, अगुरु गन्धद्रव्यं, आज्यं घृतं, पद्मं कमलं, मद्यादिभिः समानगन्धाः' (आ० द०) ॥ १३ ॥—

---

१ "चर्मवली शुक्लाः—वियुज्यमानस्वात्वक्छ्थ चर्मवलीसंभवः रोहं गच्छति व्रणे शुष्कसूक्ष्मक्षयात्त्वचरिति स्वक्साचर्मचेलीपिटकावन्त इति पाठांतरे पिडका—मांसवलीतद्वन्तः ॥" (इति क.)

रिष्टरूपां गन्धविकृतिमाह—मद्यागुर्वाज्येत्यादि । सुमना जाती, सगन्धाः समानगन्धाः, दिव्यगन्धा अपरिकल्पिताद्भुतपारिजातादिगन्धाः ॥ १३ ॥—

*ये च मर्मस्वसंभूता भवन्त्यत्यर्थवेदनाः ॥ १४ ॥
दह्यन्ते चान्तरत्यर्थं वहिः शीताश्च ये व्रणाः ।
दह्यन्ते वहिरत्यर्थं भवन्त्यन्तश्च शीतलाः ॥ १५ ॥
प्राणमांसक्षयश्वासकासारोचकपीडिताः ।
प्रवृद्धपूयरुधिरा व्रणा येषां च मर्मसु ॥ १६ ॥
क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः ।
वर्जयेदपि तान् वैद्यः संरक्षन्नात्मनो यशः ॥ १७ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने शारीरव्रणनिदानं समाप्तम् ॥ ४२ ॥

ये च मर्मस्वसंभूता इति मर्मसु न जाता अपि भृशवेदनाः, मर्मजातत्वेन हि भृशवेदनावत्त्वं युक्तम् । प्राणमांसक्षय इति प्राणक्षयेण शक्तिक्षयः, मांसक्षयेण चोपचयक्षयः । अनुक्तमप्यशेषं रिष्टं संगृह्णन्नाह—क्रियाभिरित्यादि ॥ १४–१७ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शारीरव्रणनिदानं समाप्तम् ॥ ४२ ॥

अथ सद्योव्रणनिदानम् ।

†नानाधारमुखैः शस्त्रैर्नानास्थाननिपातितैः ।
भवन्ति नानाकृतयो व्रणास्तांस्तान्निबोध मे ॥ १ ॥
छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ।
घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् ॥ २ ॥
(सु. चि. अ. २)

शारीरव्रणमभिधायागन्तुव्रणमाह—नानाधारमुखैरित्यादि । नाना धारा मुखानि च येषां तानि तथा । स्थानविशेषोऽपि शस्त्रनिपाततुल्यत्वेनाकृतिविशेषे हेतुरित्यत उक्तं—नानास्थाननिपातितैरिति ॥ १ ॥ २ ॥

---

* 'ये वहिःशीतलाः, अन्तर्मध्ये अत्यर्थं दह्यन्ते । मर्मसु पायुनाभिहृदयादिषु । पुनश्चासाध्यत्वमाह—क्रियाभिरित्यादि पादचतुष्टयान्विताभिः' (आ० द०) ॥ १४–१७ ॥

† 'नानाधारामुखैः शस्त्रैः, नानास्थाननिपातितैः, एभिर्नानाकृतयो व्रणा भवन्ति, मेमत्सकाशात्तान् व्रणान् निबोध जानीहि । तत्षाड्विध्यमाह–छिन्नमित्यादि । एवं छिन्नादिभेदेनागन्तवः षड्विधा भवन्ति' (आ० द०) ॥ १ ॥ २ ॥

---

१ व्रणे श्वयथुरायासात्–सचरागश्च जागरात् ॥ तौ चतुष्क दिवास्वापात्—ताश्च मृत्युश्च मैथुनात् ॥ (इति ख.)

*तिर्यक् छिन्न ऋजुर्वाऽपि यो व्रणस्त्वायतो भवेत् ।
गात्रस्य पातनं तच्च छिन्नमित्यभिधीयते ॥ ३ ॥
(सु. चि. अ. २)

छिन्नलक्षणमाह—तिर्यगित्यादि । तिर्यगिति तिर्यग्व्यवस्थितः । छिन्नश्छेदसंपन्नः । ऋजुरवक्रः । गात्रस्य पातनमिति गात्रावयवस्य तदेकदेशरूपस्य वा गात्रस्य पातनम् ॥ ३ ॥

†शक्तिदन्तेषुखड्गाग्रविषाणैराशयो हतः ।
यत्किंचित् प्रस्रवेत्तद्धि भिन्नलक्षणमुच्यते ॥ ४ ॥
(सु. चि. अ. २)

भिन्नलक्षणमाह—शक्तीत्यादि । विषाणं दन्तः शृङ्गं च । एतद्भिन्नलक्षणं पारिभाषिकं, तेन व्यध एवाशयदेशे भेद उच्यते, आशयदेशरहिते तु व्यधः । यत्किंचिदित्यादि । यस्य मूत्ररुधिरादेर्य आशयो भिन्नः स तत् प्रस्रवेत्, तेन बस्तिर्भिन्नो मूत्रं, रुधिराशयो रुधिरमिति ॥ ४ ॥

‡स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥ ५ ॥
तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते ।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ॥ ६ ॥
मूर्च्छा श्वासस्तृषाऽऽध्मानमभक्तच्छन्द एव च ।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता ॥ ७ ॥
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च ।
हृच्छूलं पार्श्वयोश्चापि विशेषं चात्र मे शृणु ॥ ८ ॥
आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि ।
आध्मानमतिमात्रं च शूलं च भृशदारुणम् ॥ ९ ॥
पक्वाशयगते चापि रुजा गौरवमेव च ।
अधःकाये विशेषेण शीतता च भवेदिह ॥ १० ॥
(सु. चि. अ. २)

---

* 'यो व्रणस्तिर्यक्छिन्नोऽथवा ऋजुश्छिन्नः सन्नायतो भवेत्, 'तिरश्चीनः' इति पाठान्तरे स एवार्थः, ऋजुरवक्रः, अनयोर्द्वयोरप्यायत इति विशेषणम् । डल्हणस्तु व्याचष्टे-शस्त्रादिप्रहारेण गात्रस्य हस्तादेः पातनं, चकारादपातनं च' (आ० द०) ॥ ३ ॥

† 'शक्त्यादिभिराशयो हतः सन् यत्किंचित् प्रस्रवेत्, तद्भिन्नलक्षणमुच्यते । कुन्तो भल्लः, यत्किंचित् प्रस्रवेदिति किमपि निर्देष्टव्यमित्यर्थः, उदरं मेदः, पुरिषाशयः पुरीषं,' (आ० द०) ४

‡ 'स्थानशब्द आमादिभिः प्रत्येकं संबध्यते, आमादीनां स्थानानि कोष्ठ इत्यभिधीयते । ज्वरमूर्च्छादय उपद्रवा भवन्ति, विण्मूत्रवातानां सङ्गोऽप्रवृत्तिः, मुखस्य लोहगन्धता, हृत्पार्श्वयोः शूलमिति संबन्धः । अतिमात्रमाध्मानं आध्मातबस्तिरिवोदरपूर्णता, दारुणं मारणात्म-

---

१ कुंतेषु इत्यपि पाठः

यत्र भूयसामाशयानां स्थाने भेदव्यपदेशस्तमाह—स्थानानीत्यादि। आमस्य स्थानमामाशयः, अग्नेः पच्यमानाशयः, मलस्य पक्वाशयः, मूत्रस्य वस्तिः, रुधिरस्य यकृत्प्लीहानौ, हृत् हृदयं, उण्डुक इक्षुरसपाकमलवद्यः शोणितमलस्तज्ज उण्डुकः, स चान्त्रदेशे व्यवस्थितः पुरीषाधानमिति, फुफ्फुस इति हृदयस्य वामपार्श्वे (रक्ताधारः) 'फुफ्फुस' इति ख्यातः। मूत्रमार्गगुदास्येभ्यो रक्तं प्राणाच्च गच्छतीति यस्त्वादौ भिन्ने मेहनगुदाभ्यां रक्तं निःसरति, आमाशयादिभेदे तु मुखघ्राणाभ्यां रक्तनिर्गमः। खेदास्राव इति खेदस्यात्यन्तस्रुतिः। पार्श्वयोश्चापीति शूलमिति संबन्धः। मे इत्यव्ययं मत्त इत्यर्थः। आमाशयस्थ इत्यादि आध्मानं रक्तावततत्वाद्वायोः। रुजा शूलम्। गौरवं रक्तबहुलात्। अधःकाये विशेषेण शीततेति व्यधिप्रभावात्॥ ५-१०॥

*सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत्॥ ११॥
(सु. चि. अ. २)

विद्धलक्षणमाह—सूक्ष्मास्यशल्येत्यादि। आशयं विनेति उक्तामाद्याशयं विना। उत्तुण्डितमनिर्गतशल्योपलक्षणं तेनानुत्तुण्डितमुत्तुण्डितं च विद्धं गृह्यते, निर्गतेन च निर्गतमुखं विद्धं सर्वथा निर्गतं च गृह्यते; तेन तन्त्रान्तरे "विद्धमुत्तुण्डितमनुत्तुण्डितं भिन्नं निर्भिन्नम्"-इति यच्चतुष्प्रकारमभिहितं तत् सर्वं संगृहीतम्॥ ११॥

†नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्।
विषमं व्रणमङ्गे यत्तत् क्षतं त्वभिधीयते॥ १२॥
(सु. चि. अ. २)

क्षतमाह—नातिच्छिन्नमित्यादि। नातिच्छिन्नमिति नावगाढच्छेदम्। नातिभिन्नमिति नातिविदीर्णाशयम्। उभयोर्लक्षणान्वितमिति स्तोकच्छेदस्तोकावदरणयोगादुभयलक्षणयुक्तम्। विषमं व्रणमङ्गे यदिति अङ्गवैषम्यकरं व्रणं यत्तत् क्षतम्॥ १२॥

‡प्रहारपीडनाभ्यां तु यदङ्गं पृथुतां गतम्।
सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम्॥ १३॥
(सु. चि. अ. २)

पिच्चितलक्षणमाह—प्रहारेत्यादिना। प्रहारो मुद्गरादिना, पीडनं कपाटादिना। पृथुतामिति चिप्पिटताम्। मज्जरक्तपरिप्लुतमित्यनेन व्रणभावात् मज्जरक्तागमं दर्शयति। तेन यत् व्रणं पिच्चितं, तद्भग्नस्य तथा सद्योव्रणस्य च चिकित्साविषयम्॥ १३॥

कम्। पक्वाशयस्थितस्य रक्तस्य लक्षणमाह-पक्वेत्यादि। रुजा शूलम्। गौरवमिति नाभेरधो बोद्धव्यम्' (आ० द०)॥ ५-१०॥

* 'आशयं विना सूक्ष्मास्येन शल्येन यदङ्गमभिहतमुत्तुण्डितमुन्नमितत्वङ्मांससमीपदृष्टमुखं वा, निर्गतं निर्गतशल्यं, तेनानुत्तुण्डितं च विद्धं गृह्यते' (आ० द०)॥ ११॥

† 'उभयोरिति छिन्नभिन्नयोरित्यर्थः' (आ० द०)॥ १२॥

‡ 'पीडनं करादिना, पृथुतां विपुलतां, सास्थि अस्थिखण्डान्वितम्' (आ० द०)॥ १३॥

*घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम्।
उषास्रावान्वितं तच्च घृष्टमित्यभिधीयते ॥ १४ ॥
(सु. चि, अ. २)

घृष्टलक्षणमाह—घर्षणादित्यादि। घर्षणात् कर्कशवस्त्रादिना। विगतत्वचमिति पाठं त्यक्त्वा विगतत्वचेति पाठः साधुः, विगतत्वचोपलक्षितमङ्गम्। उषा ऊष्मनिर्गमव्यथा ॥ १४ ॥

†श्यावं सशोथं पिडकाचितं च मुहुर्मुहुः शोणितवाहिनं च।
मृदूद्गतं बुद्बुदतुल्यमांसं व्रणं सशल्यं सरुजं वदन्ति ॥ १५ ॥
त्वचोऽतीत्य सिरादीनि भित्त्वा वा परिहृत्य वा।
कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुक्तानुपद्रवान् ॥ १६ ॥
(सु. चि. अ. २)

कोष्ठभेदमाह—त्वच इत्यादि। त्वच इति सप्त त्वचः। सिरादीनीति मांसस्नाय्वस्थिसन्धीनि। परिहृत्य वेति परिहारपक्षेऽपि कोष्ठभेदस्य संगतत्वात्; सिराव्यधलिङ्गं चात्रैव "सुरेन्द्रगोपप्रतिमं"—इत्यादिना व्यक्तीभविष्यति। उक्तानिति प्रनष्टशल्यविज्ञानीये। तत्र ह्युक्तं,—"कोष्ठगते त्वाटोपानाहौ मूत्रपुरीषाहारदर्शनं च व्रणमुखाद्भवति" (सु. सू. स्था. अ. २६)—इति ॥ १५ ॥ १६ ॥

‡तत्रान्तर्लोहितं पाण्डुशीतपादकराननम्।
शीतोच्छ्वासं रक्तनेत्रमानद्धं च विवर्जयेत् ॥ १७ ॥

असाध्यकोष्ठभेदलिङ्गमाह—तत्रेत्यादि। तत्र कोष्ठे। अन्तर्लोहितमिति अभ्यन्तरस्थितरक्तं, अनिःसृतरक्तमिति यावत्। आनद्धमित्यानाहवन्तम् ॥ १७ ॥

§भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च।
स्रस्ताङ्गता मूर्च्छनमूर्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः ॥१८॥
मांसोदकाभं रुधिरं च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव।
दशार्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम् ॥ १९ ॥
(सु. सू. अ. २५)

---

* 'यदङ्गं घर्षणात् कर्षणात् कर्कशवस्त्रादिना अभिघाताद्वा विगतत्वचं भवति, अन्ये 'विगतत्वचा' इति पाठं पठन्ति, विगतत्वचा लक्षितमङ्गम्' (आ० द०) ॥ १४ ॥

† 'श्यावं श्याववर्णम्। मुहुर्वारंवारं, शोणितस्रावयुक्तं, मृदु कोमलं, उद्गतं तुम्ब्याकारावस्थितं बुद्बुदेन सदृशं मांसं यस्य तं, सरुजं पीडायुक्तम्। कोष्ठभेदमाह—त्वच इत्यादि। परिहृत्य वेति संत्यज्य वा' (आ० द०) ॥ १५ ॥ १६ ॥

‡ 'पाण्डूनि शीतानि पादकराननानि यस्य तं, तथा आनद्धं आनाहयुक्तम्' (आ० द०) ॥ १७ ॥

§ 'भ्रमश्चक्रारूढस्येव, पतनं भूमौ, प्रमोहः मनोमोहः, शरीरशैथिल्यं वा, प्रमोहस्तु मनोमोहः, ऊर्ध्ववात इति उद्गारबाहुल्यं, वातकृता रुजस्तास्ता दण्डापतानकाक्षेपकाद्याः' (आ० द०) ॥ १८ ॥ १९ ॥

मांससिरास्नाय्वस्थिसन्धिमर्मसु पञ्चसु क्षतेषु सामान्यलिङ्गमाह—भ्रम इत्यादि । विचेष्टनं विरुद्धचेष्टनं करचरणादिक्षेपादिकम् । ग्लानिर्बलक्षयः । स्तब्धाङ्गता अङ्गसन्धिविश्लेषव्यथा । मूर्च्छनमिन्द्रियमोहः । इन्द्रियार्थोपरम इन्द्रियाणां स्वविषयेषु रूपादिषु उपरमो ग्रहणाशक्तिः । दशार्धसंख्येषु पञ्चसु ॥ १८ ॥ १९ ॥

*सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत्क्षतजश्च वायुः ।
करोति रोगान् विविधान् यथोक्तान् सिरासु विद्धास्वथ वा क्षतासु ॥ २० ॥
कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजश्च ।
चिराद्व्रणो रोहति यस्य चापि तं स्नायुविद्धं पुरुषं व्यवस्येत् ॥ २१ ॥
शोफाभिवृद्धिस्तुमुला रुजश्च बलक्षयः सर्वत एव शोथः ।
क्षतेषु सन्धिष्वचलाचलेषु स्यात् सर्वकर्मोपरमश्च लिङ्गम् ॥ २२ ॥
घोरा रुजो यस्य निशादिनेषु सर्वास्ववस्थासु च नैति शान्तिम् ।
भिषग्विपश्चिद्विदितार्थसूत्रस्तमस्थिविद्धं पुरुषं व्यवस्येत् ॥ २३ ॥
(सु. सू. अ. २५)

सिरादयो मर्मरूपा अमर्मरूपाश्च सन्ति, तत्र पूर्वं मर्मरहितानां सिरादीनां विद्धलिङ्गमाह—सुरेन्द्रगोपेत्यादि । यथोक्तानिति शोणितवर्णनीयोक्तान् । तथा चोक्तं,—"तदतिप्रवृत्तं शिरोऽभितापमान्ध्यमाक्षेपादींश्च करोति" (सु. सू. स्था. अ. १४)—इति । विद्धासु बाणादिना । क्षतासु खड्गादिना । कौब्ज्यं कुब्जता । तुमुला गहनाः । सन्धिष्वचलाचलेष्विति अचलेषु, निश्चेष्टेषु, चलेषु चेष्टावत्सु, सन्धयश्चलाचलभेदेन द्विविधाः । तथाच सुश्रुतः,—"शाखासु हन्वोः कट्यां च चेष्टावन्तश्च सन्धयः । शेषास्तु सन्धयः सर्वे विज्ञातव्याः स्थिरा बुधैः" (सु. शा. स्था. अ. ५)—इति ॥२०–२३॥

मर्मरहितानां सिरादीनां विद्धलक्षणमभिधाय सिरादिमर्मविद्धलिङ्गमतिदेशयन्नाह—

†यथास्वमेतानि विभावयेच्च लिङ्गानि मर्मस्वभिताडितेषु ।
(सु. सू. अ. २५)

यथास्वमेतानीत्यादि । विभावयेच्चेति चकारो भिन्नक्रमे; तेन एतानि लिङ्गानि तथा सामान्यलिङ्गानि च जानीयादित्यर्थः ॥—

---

* 'इन्द्रगोपो वार्षिकः कीटः, तत्सवर्णः तस्य रुधिरस्य क्षयाज्जातो वायुः, यस्य कौब्ज्यादिचिह्नं भवति, तं पुरुषं स्नायुविद्धं व्यवस्येत् जानीयात् । तच्च अन्तर्बहिरावामजं द्विधा, अवयवावसादोऽवयवानां स्वकर्मण्यसामर्थ्यं, क्रियास्वशक्तिः; सर्वशरीरस्रोतसां गणापक्षेपणप्रसारणाकुञ्चनक्रियाणामशक्तिः । अन्ये तु वातपित्तकफजनिता एकत्र व्याकुलीभूतवेदनास्तुमुला उच्यन्त इति वदन्ति । अचलाचलेषु सन्धिषु क्षतेषु सत्सु शोफातिवृद्ध्यादिलिङ्गं स्यादिति । कर्मोपरमः कर्मोपरतिः । अस्थिविद्धमाह—घोरा इत्यादि । तमस्थिविद्धं जानीयात्, सर्वास्ववस्थासु शयनासनादिकासु, विदितार्थसूत्रोऽधिगतशल्यतन्त्रः' (आ०द०) ॥ २०–२३ ॥

† 'तेनैतानि मर्मविद्धसिरादिलिङ्गानि तथा सामान्यलिङ्गानि भ्रमप्रलापादीनि च'(आ०द०)॥—

पाण्डुर्विवर्णः स्पृशितं न वेत्ति यो मांसमर्मण्यभिपीडितः स्यात् २४
(सु. सू. अ. २५)

अनुक्तमांसमर्मणो विद्धस्य लिङ्गमाह—पाण्डुर्विवर्ण इत्यादि । ननु, सिरादिविद्धलिङ्गवत् मांसविद्धलिङ्गमपि पूर्वं कुतो नोपदिष्टं ? उच्यते, केवलमांसविद्धस्यावहुव्याप्त्करत्वात् पूर्वमनुपादानम् ॥ २४ ॥

*विसर्पः पक्षघातश्च सिरास्तम्भोऽपतानकः ।
मोहोन्मादव्रणरुजो ज्वरस्तृष्णा हनुग्रहः ॥ २५ ॥
(च. चि. अ. २३)
कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः ।
षोडशोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ॥ २६ ॥
(च. चि. अ. १३)

इति श्रीमाधवकरविरचिते माधवनिदाने सद्योव्रणनिदानं समाप्तम् ॥ ४३ ॥

सर्वव्रणानामुपद्रवानाह—विसर्प इत्यादि ॥ २५ ॥ २६ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां सद्योव्रणनिदानं समाप्तम् ॥ ४३ ॥

अथ भग्ननिदानम् ।

[1]भग्नं समासाद्द्विविधं हुताश काण्डे च सन्धौ च हि तत्र सन्धौ ।
उत्पिष्टविश्लिष्टविवर्तितं च तिर्यग्गतं क्षिप्तमधश्च षड्* च ॥ १ ॥

आगन्तुसामान्याद्भग्ननिदानम् । द्विविधं हि भग्नं सव्रणमव्रणं च, तत्र सव्रणमभिधायाव्रणमाह—भग्नं समासादित्यादि । हुताश इति अग्निवेशसंबोधनं, चरके हुताशशब्देनाग्निवेशोऽभिधीयते, एकदेशेनापि समुदायप्रतीतेः । काण्डे च सन्धौ चेति सन्धिविच्छिन्नमेकं, द्वितीयं काण्डभग्नं; काण्डमस्थिकाण्डः, काण्डेन च नलककपालवलयतरुणरुचकानां ग्रहः, तत्र भग्नं काण्डेभग्नं; द्वयोरस्थ्नोः, सन्धानं सन्धिः, तद्विश्लेषः सन्धिमुक्तम् । तत्र सन्धाविति सन्धौ मुक्तं 'लिङ्गमभिधीयते' इति शेषः । ननु कथं सन्धिमुक्तं भग्नमुच्यते ? अस्थ्नां हि भङ्गो युक्तः । उच्यते, अस्थिविश्लेषोऽत्र भङ्गोऽभिप्रेतः, स च काण्डभग्ने सन्धिमुक्ते चास्तीति न दोषः ॥ १ ॥

---

* 'व्रणरुजो व्रणपीडाः, वेपथुः कम्पः' (आ० द०) ॥ २५ ॥ २६ ॥

† 'तं चागन्तुव्रणं समासाद्द्विविधमाहुः, कथमित्याह—काण्डे भग्नं तथा सन्धौ चेति; सन्धिमुक्तस्य षाड्विध्यमाह—उत्पिष्टेत्यादि । तत्र सन्धाविति तत्र तयोः काण्डभग्नसन्धिभग्नयोर्मध्ये, उत्पिष्टादिभेदेन षोढा भवति' (आ० द०) ॥ १ ॥

---

१ 'षोढा' इति पा० ।

*प्रसारणाकुञ्चनवर्तनोग्रा रुक् स्पर्शविद्वेषणमेतदुक्तम् ।
सामान्यतः सन्धिगतस्य लिङ्गं

सन्धिभग्नस्य सामान्यलिङ्गमाह—प्रसारणेत्यादि । प्रसारणाकुञ्चनवर्तनोग्रा रुगिति प्रसारणादिषु उग्रा रुक् । वर्तनं निष्क्रियतयाऽवस्थानम् ॥—

†उत्पिष्टसन्धेः श्वयथुः समन्तात् ॥ २ ॥
विशेषतो रात्रिभवा रुजा च विश्लिष्टजे तौ च रुजा च नित्यम् ।
विवर्तिते पार्श्वरुजश्च तीव्रास्तिर्यग्गते तीव्ररुजो भवन्ति ॥ ३ ॥
‡क्षिप्तेऽति शूलं विषमत्वमस्थ्नोः क्षिप्ते त्वधो रुग्विघटश्च सन्धेः ।

उत्पिष्टादिलिङ्गमाह—उत्पिष्टसन्धेरित्यादि । उत्पिष्टं द्वाभ्यामस्थिभ्यां सन्धौ घर्षणम् । श्वयथुः समन्तादिति उभयभागे शोथः, उभयतः सन्ध्यस्थ्नोर्घर्षितत्वात् । विशेषतो रात्रिभवा रुजा चेति अभिघातकुपित एव रात्रौ शैत्येनात्यन्तं वृद्धो वायुः रुजां करोति । अत्र चूर्णितत्वेन मार्गावरणाद्वातकोप इत्यर्थः । विश्लिष्टज इति विश्लिष्टजाते सन्धिमुक्ते, विश्लिष्टं मनाक् सन्धिविश्लेषः शिथिलतामात्रं, विश्लिष्टमिति भावे क्तः । तौ चेति विश्लिष्टे रात्रिरुजासमन्ताच्छोथौ; समन्ताच्छोथोऽप्यत्राल्पो बोध्यः, सन्धेरनभि(ति)घातात् । सन्धिविक्रियया अस्थ्नोरपद्रुतत्वान्मध्यनिम्नत्वं, "उत्पिष्टमथ विश्लिष्टं सन्धिं वैद्यो न घट्टयेत्"—(सु. चि. स्था. अ. २) इति वचनात्; मनाग्विक्रियया वा । रुजा च नित्यमिति सर्वदा रुजा बलवती भवतीत्युत्पिष्टाद्विशेषः । विवर्तिते, इति 'सन्धौ' इति शेषः, विवर्तिते विपरीतं वर्तिते, विवर्तनं सन्धौ द्वयोरस्थ्नोर्विवृतिर्विभ्रमणमनार्जवता । पार्श्वरुजश्च तीव्रा इति आभ्यन्तरसन्धिस्थानयोः पार्श्वसन्ध्यस्थ्नोः पार्श्वगमनत्वात्तीव्राः पार्श्वरुजः । तिर्यग्गत इति तिर्यक्क्षिप्ते । अत्र ह्येकं सन्ध्यस्थि सन्धिस्थानं त्यक्त्वा तिर्यग्याति । क्षिप्तेऽतीति अतिक्षिप्ते; 'ऊर्ध्वं' इति शेषः । अत्र ह्येकास्थिविक्रियया उभयास्थिविक्रियया वा द्वयोरप्यस्थ्नोः परस्परातिक्रमणं दूरगमनं वा; विश्लिष्टे तु मनाक् शिथिलतामात्रं; अधःक्षिप्ते तु किंचिदधोगमनमिति विशेषः । 'विषमाथ सक्थ्नोः' इति पाठे तु 'रुज–' इति शेषः ।[१] क्षिप्ते त्वधोरुग्विघटश्च सन्धेरिति अधःक्षिप्ते रुक् रुजा सन्धेर्विघटश्च विघट्टनम् । 'विरुद्धचेष्टा विघटस्य' इति पाठान्तरे विघटितस्य सन्धेरित्यर्थः । अत्र अधोऽस्थिगमनम् । अधः क्षिप्तवदूर्ध्वं क्षिप्तस्याप्यभिधाने प्राप्ते, अनुक्तिरतिक्षिप्तेऽवरोधात् ॥२॥३॥—

* 'प्रसारणादिषु उग्रा रुक् व्यथा, एतत्सामान्यलिङ्गम्' (आ० द०) ॥—

† पार्श्वरुजश्चेति चकारात् सन्धिसंश्रययोरप्यस्थ्नोर्व्यावर्तनेन पार्श्वोपगमनाद्विषमाङ्गतेति लक्षणः । शूलं विषममिति कदाचिद्धीनं कदाचिद्विवृद्धम्' (आ० द०) ॥ २ ॥ ३ ॥

‡ 'छिन्नं द्विधेति कश्चिदेकतरपार्श्वलग्नमपरत्र विदीर्णमित्याह, सामान्येन काण्डभग्नलक्षणमाह–सस्ताङ्गतेत्यादि । काण्डे भग्नस्यैतच्चिह्नं स्रस्ताङ्गता शोफरुजयोरतिवृद्धिः । संपीड्यमाने

१ 'विषमा सगस्थ्नोः' इति पा० । २ 'रात्रिघूर्णितत्वेन' इति क. ।

काण्डे त्वतः कर्कटकाश्वकर्णविचूर्णितं पिच्चितमस्थिछल्लिका ॥४॥
काण्डेषु भग्नं ह्यतिपातितं च मज्जागतं च स्फुटितं च वक्रम् ।
छिन्नं द्विधा द्वादशधाऽपि काण्डे स्रस्ताङ्गता शोथरुजातिवृद्धिः ५
संपीड्यमाने भवतीह शब्दः स्पर्शासहः स्पन्दनतोदशूलाः ।
सर्वास्ववस्थासु न शर्मलाभो भग्नस्य काण्डे खलु चिह्नमेतत् ॥ ६ ॥

अतःपरं काण्डे भग्नमभिधीयते—काण्डे त्वत इत्यादि । काण्डे इत्यत्र भग्नमिति शेषः । अत इति अतः परम् । कर्कटकेति उभयोः पार्श्वयोर्निपीडनेनाहतावनतं, अत एव मध्ये ग्रन्थिरिवोन्नतं, कर्कटतुल्यत्वात् कर्कटकम् । अश्वकर्णेति अश्वकर्णवत् विपुलास्थिनिर्गमादश्वकर्णम् । विचूर्णितमिति क्षुण्णमस्थि, तच्च शब्दस्पर्शाभ्यामवगन्तव्यम् । पिच्चितमिति यन्त्रितं बहुशोथम् । अस्थिछल्लिकेति छल्लं वल्कलं तदत्रास्तीत्यस्थिछल्लिका, अत्र मत्वर्थीयष्ठिकन् । [1]अत्र तु आ न भवति, वृद्धेरनित्यत्वात् । एषा पार्श्वगतस्तोकास्थि अवयवविश्लेषाद्भवति । 'अस्थिछल्लितम्' इति वा पाठः छल्लमस्य संजातमिति छल्लितम् । काण्डेषु भग्नमित्यनेन काण्डभग्नमभिधीयते, प्रसारणे [2]कम्पमानं काण्डभग्नम् । यद्यपि काण्डभग्नं सर्वमेव कर्कटादि, तथाऽपि विशिष्टे काण्डभग्ने काण्डभग्नसंज्ञेयं बोद्धव्या । यथा जाङ्गलशब्दो जङ्घालाद्यष्टविधमांसवर्गे[3] सामान्ये, विशेषे पुनरेणादावेव च वर्तते अतिपातितमिति अस्थि निःशेषतश्छिन्नमतिपातितम् । मज्जागतमिति अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जानं निःसारयतीति मज्जागतम् । स्फुटितं स्तोकं बहुधा विदीर्णं शूकपूर्णमिव वेदनावत् । वक्रमिति अविमुक्तास्थि कुब्जीभूतं वक्रम् । वक्रताऽपि भग्नत्वं ज्ञेयम् । छिन्नं द्विधेति एकमणुविदीर्णं, बहुविदीर्णमन्यत्; एकतरपार्श्वलग्नम् एकं विदीर्णं संलग्नं अपरं विदीर्णं द्विधाभूतं; अन्यस्तु विपुलैकविदरणमित्याह; सुश्रुते एतत् पाटितसंज्ञम् । काण्डभग्नस्य द्वादशविधत्वं नियमयति—काण्ड इति । अत्र भग्नमिति शेषः । अपिशब्दोऽत्र भिन्नक्रमः, स चावधारणार्थे, तेन छिन्नमित्यत्र संबध्यते । छिन्नमेव द्विधा, न कर्कटादि ॥ ४–६ ॥

*भग्नं तु काण्डे बहुधा प्रयाति समासतो नामभिरेव तुल्यम् ॥ ७ ॥

काण्डे भग्नस्य द्वादशप्रकारादप्यधिकत्वमाह—भग्नमित्यादि । समासतो नामभिरेव तुल्यमिति संक्षेपतो नामानुरूपमेतदवगन्तव्यमित्यर्थः ॥ ७ ॥

†अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च ।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥ ८ ॥

(सु. चि. अ. ३)

हस्तादिना मृदिते सति शब्दः, स्पर्शासहश्च, तथा स्पन्दनतोदशूला भवन्ति । सर्वासु शयनासनादिकास्ववस्थासु शर्मलाभो न भवति' (आ० द०) ॥ ४–६ ॥

* 'यस्येदृशास्ति भग्नं तस्यैवं नामेत्यर्थः' (आ० द०) ॥ ७ ॥

† 'अल्पाशिन आहाररहितस्य, अनात्मवतोऽपथ्याशिनः' (आ० द०) ॥ ८ ॥

---

१ अत्र मत्वर्थी यष्ठन् यत्तु गलाचेत्यर्थोऽभवति इति क. । २ कंपनम् तत् इति क. ।
३ विश्लेषयादौ इति क. ।

कष्टसाध्यतामाह—अल्पेत्यादि। वातात्मकस्येति वातप्रकृतेः। उपद्रवैरिति उपद्रवा ज्वराध्मानमूत्रपुरीषसङ्गादयः॥ ८॥

भिन्नं कपालं कट्यां तु सन्धिमुक्तं तथा च्युतम्।
जघनं प्रतिपिष्टं च वर्जयेद्धि विचक्षणः॥ ९॥
असंश्लिष्टकपालं च ललाटे चूर्णितं च यत्।
भग्नं स्तनान्तरे पृष्ठे शङ्खे मूर्ध्नि च वर्जयेत्॥ १०॥
(सु. नि. अ. १५)

असाध्यतामाह—भिन्नं कपालमित्यादि। भग्नमिति वाच्ये भिन्नमिति यत् कृतं तत् कपालानां प्रायशो भेदात्। अत एवोक्तं,–"कपालानि विभज्यन्ते" (सु. शा. स्था. अ. ५)–इति। ननु, कट्यस्थ्नः कपालसंज्ञाया अभावात् कथमुच्यते भिन्नं कपालं कट्यामिति? तदुक्तं सुश्रुते,–"जानुनितम्बांसगण्डतालुशङ्खवङ्क्षणशिरःसु कपालानि" (सु. शा. स्था. अ. ५)–इति; उच्यते, नितम्बग्रहणेन तत्र कटीग्रहणाददोषः; अथवा सर्वं कपालसंज्ञितमस्थिभिन्नं, तथा कट्यां चास्थिभिन्नं वर्जयेत्। असंश्लिष्टकपालं चेति तु नियमार्थं; तेन ललाटे कपालस्यासंश्लिष्टस्यासाध्यत्वं, नान्यथा भिन्नस्येति। भिन्नं कपालमिति काण्डभग्नमेतत्। सन्धिमुक्तमिति नानाविधमपि सन्धिमुक्तं कट्यां न सिध्यतीति। च्युतमिति अधःक्षिप्तं, अन्यस्तु विश्लिष्टमाह; अथवा कट्यां सन्धिमुक्तं च्युतलक्षणं न सर्वम्। जघनं प्रतिपिष्टं चेति जघनस्थाने पिष्टमुत्पिष्टमेतत्तथा च्युतमिति च। सन्धिमुक्तं पुनर्विशेषार्थमुक्तं, विशेषाभिधानादन्यस्य कटीसन्धिमुक्तस्य कदाचित् साध्यता सूच्यते, अत एव चिकित्सिते "ततः स्थानस्थिते सन्धौ" (सु. चि. स्था. अ. ३)–इति वक्ष्यति। असंश्लिष्टकपालं च ललाटे चूर्णितं च यदिति यथा अविद्यमानसंश्लेषं यत् कपालं, तथा ललाटे चूर्णितं च यत् विघटितसन्धि तदसाध्यम्। भग्नमिति सामान्येन सन्धिमुक्तं काण्डभग्नं गृह्यते। अन्ये तु भग्नमित्यनेन काण्डभग्नविशेषं 'प्रसारणे कम्पमानं' इत्यनेनोक्तं वदन्ति। उक्तं च भालुकिना–"शङ्खे मूर्ध्नि स्तनान्तरे वा काण्डेभग्नं मरणाय"–इति। स्तनान्तरे उरसि, मूर्ध्नि चूडास्थाने॥ ९॥ १०॥

सम्यक् सन्धितमप्यस्थि दुर्निक्षेपनिबन्धनात्।
संक्षोभाद्वाऽपि यद्गच्छेद्विक्रियां तच्च वर्जयेत्॥ ११॥
(सु. नि. अ. १५)

सर्वेषामनवधानतोऽसाध्यत्वमाह—सम्यगित्यादि। सन्धितं संयमितम्। दुर्निक्षेपनिबन्धनादिति दुःस्थापनात्तथा दुष्टबन्धनात्। संक्षोभादिति अभिघातभयादिसंक्षोभात्। अयमर्थः–सम्यक् संयमितमपि दुःस्थापनात्, सुन्यस्तमपि दुष्टबन्धनात्, सुन्यस्तं सुबद्धमपि संक्षोभाद्विकृतमसाध्यम्॥ ११॥

*तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि च।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥ १२ ॥
(सु. नि. अ. १५)

इति श्रीमाधवकरविरचिते माधवनिदाने भग्ननिदानं समाप्तम् ॥ ४४ ॥

अस्थिविशेषे भग्नविशेषमाह—तरुणास्थीनीत्यादि। नम्यन्ते वक्रीभवन्ति, तेनात्र वक्रलक्षणं भग्नम्। घ्राणकर्णाक्षिपुटेषु तरुणं कोमलमस्थि। भिद्यन्ते नलकानि चेति अस्थ्यन्तरानुप्रवेशाद्भिद्यन्ते, अतिपातितलक्षणेन च भग्नेन नलकानि युज्यन्ते; अन्ये तु द्वादशविधमपि भग्नमत्रेच्छन्ति। कपालानि विभज्यन्त इति कपालेषु विदरणलक्षणो भङ्गः। 'विभिद्यन्ते' इति पाठान्तरं, अर्थस्तु स एव। रुचकानि दन्ताः, तेषु स्फुटितलक्षणो भङ्गः। अस्थीनि पञ्चविधानि तरुणनलककपालवलयरुचकभेदात्। रुचकानि चेति चकाराद्वलयान्यपि स्फुटितानि भवन्तीति। एतंत सुश्रुते स्फुटितं भग्नम् ॥ १२ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां भग्ननिदानं समाप्तम् ॥ ४४ ॥

अथ नाडीव्रणनिदानम्।

†यः शोथमाममतिपक्वमुपेक्षतेऽज्ञो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः।
अभ्यन्तरं प्रविशति प्रविदार्य तस्य
स्थानानि पूर्वविहितानि ततः स पूयः ॥ १ ॥
(सु. नि. अ. १०)

भग्नस्यापि व्रणस्योपेक्षया नाडी भवति, अतोऽनन्तरं नाडीमाह—यः शोथमित्यादि। उपेक्षत इति पीडनशोधनादिकं न करोति। प्रचुरपूयमित्यनेन गम्भीरपाकित्वमुक्तम्। असाधुवृत्तोऽहिताहाराचारः। स्थानानि पूर्वविहितानीति व्रणास्रावविज्ञानीयोक्तानि त्वङ्मांससिरास्नायुसन्ध्यस्थिकोष्ठमर्माणि ॥ १ ॥

‡तस्यातिमात्रगमनाद्गतिरिष्यते तु
नाडीव यद्वहति तेन मता तु नाडी।
(सु. नि. अ. १०)

तस्येति पूयस्य। नाडीवेति अन्तःशुषिरलतादिनाडीवत्।

---

* 'घ्राणकर्णाक्षिकूटेषु तरुणास्थीनि कोमलास्थीनि' (आ० द०) ॥ १२ ॥

† 'योऽपक्वं शोफमाममित्युपेक्षते अथवा—यः पुरुषः प्रचुरपूयं व्रणमुपेक्षत इति संबन्धः। स पूयस्तस्य पूर्वोक्तानि स्थानानि विदार्यान्तः प्रविशति' (आ० द०) ॥ १ ॥

‡ 'पूयस्यातिमात्रगमनाद्गतिरिष्यते, इष्यते चेति चशब्दो नाडीनिरुक्तिपक्षान्तरसमु-

दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ॥ २ ॥
(सु. नि. अ. १०)

तासां कालान्तरसंभवेन दोषानुबन्धेन संख्यामाह—दोषैस्त्रिभिरित्यादि । दोषैः पृथक् तिस्रः । एकशश्च संमूर्च्छितैरिति प्रत्येकं वृद्ध्या मिश्रीभूतैस्त्रिभिश्चतुर्थी; कार्तिकस्तु सन्निपतितैरित्यध्याहार्य एकशश्च सन्निपतितैरन्या । संमूर्च्छितैः संश्लिष्टैरपरास्तिस्रः । अत एवोक्तं सुश्रुते,—"दोषद्वयाभिहितलक्षणदर्शनेन तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात्" (सु. चि. स्था. अ. ५)—इति । व्यतिकरप्रभवा द्वन्द्वप्रभवाः; अपिचकारौ सार्थकाविलाहुः । न चोक्तपञ्चसंख्याहानिः, अस्मिन् पक्षेऽतिदेशेनोक्तयोर्द्वन्द्वसन्निपातयोः सर्वत्रागणनात् । शल्यनिमित्ततोऽन्येति आगन्तुरपरेत्यर्थः । इति पञ्च नाड्यः ॥ २ ॥

*तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपासु ।
(सु. नि. अ. १)

वातजामाह—तत्रेत्यादि । अधिकं स्रवति क्षपास्विति शैत्ये वातवृद्धे रात्रावधिकं स्रवणम् ॥—

†पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्णमहःसु चापि ॥ ३ ॥
(सु. नि. अ. १)

पित्तजामाह—पित्तादित्यादि । अधिकमुष्णमहःसु चेति दिवा औष्ण्येन पित्तकोपात् ॥ ३ ॥

‡ज्ञेया कफाद्बहुघनार्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा ।
(सु. नि. अ. १)

कफजामाह—ज्ञेयेत्यादि । बहुघनार्जुनपिच्छिलास्रेति । अत्रार्जुनः श्वेतः, घनः सान्द्रः, आस्रशब्द आस्रावशब्दैकदेशपाठः, पदेऽपि पदैकदेशप्रयोगात् । यथा "जे ओष्ठपदानाम्"—इत्यत्र जे इत्यनेनैव जात इत्युच्यते । पिच्छिलास्रुरिति पाठेऽप्ययमेवार्थः । आस्रुशब्दः संपदादिषु पाठात् क्विबन्तः; तुगभावस्त्वागमानित्यत्वात् ॥—

च्यं, तामेव नाडीनिरुक्तिमाह–नाडीत्यादि । येन हेतुना नाडीव प्रणालीव यद्वहति, तेन हेतुना नाडी मतेत्यर्थः । अन्तःशुषिरनाला नाडी' (आ० द०)—

* 'परुषं कर्कशं सूक्ष्मं मुखं यस्याः सा तथा' (आ० द०)

† 'परिदाहः समन्ताद्दाहः' (आ० द०) ॥ ३ ॥

‡ 'बहुरधिकः, घनः सान्द्रः, अर्जुनः श्वेतः, पिच्छिल आस्र आस्रावो यस्यां सा तथा । रजनीप्रवृद्धेति शैत्येन श्लेष्मणः प्रकोपात्' (आ० द०)—

दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि ॥ ४ ॥
तामादिशेत्पवनपित्तकफप्रकोपा-
द्घोरामसुक्षयकरीमिव कालरात्रिम् ।
(सु. नि. अ. १)

त्रिदोषजामाह—दाहेत्यादि । अभिहितानीति प्रत्येकं वातादिजनाडीकथितानि । असुक्षयकरीमिति मारणात्मिकां, कालरात्रिं मरणकारिणीं यमभगिनीमिव । 'गतिं त्वसुहरां' इति पाठान्तरम् ॥ ४ ॥—

*नष्टं कथंचिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ॥ ५ ॥
सा फेनिलं मथितमुष्णमसृग्विमिश्रं
स्रावं करोति सहसा सरुजा च नित्यम् ।
(सु. नि. अ. १)

शल्यनिमित्तामाह—नष्टमित्यादि । नष्टमदृश्यमानम् । कथंचिदिति वेगक्षयादिकारणानामनियमार्थमुक्तम् । अनुमार्गं मार्गं लक्षीकृत्य । केचित् 'अणुमार्गं' इति पठित्वा शल्यविशेषणतया योजयन्ति । किंत्वस्मिन् पक्षेऽणुमार्गत्वेनैव शल्यस्यादर्शने प्रयुक्ते कथंचिदिति निरर्थकं स्यात् । उदीरितेष्विति त्वगादिषु । फेनिलं फेनवन्तम् । मथितमुन्मथितम् । उष्णमुष्णस्पर्शम् । एते च धर्माः प्रसारणाकुञ्चनादौ चलता शल्येन मांसादिक्षोभेण भवन्ति ॥ ५ ॥

†नाडी त्रिदोषप्रभवा न सिध्ये-
च्छेषाश्चतस्रः खलु यत्नसाध्याः ॥ ६ ॥
(सु. नि. अ. १)

इति श्रीमाधवकरविरचिते माधवनिदाने नाडीव्रणनिदानं समाप्तम् ॥४५॥

असाध्यत्वादिकमाह—नाडीत्यादि । ननु, नाडी त्रिदोषप्रभवा न सिध्येदिति पुनरुक्तं असुक्षयकरीमित्यनेनैवासाध्यत्वस्योक्तत्वात् । नैवं, अयं ग्रन्थः सुश्रुतेन निदानस्थानोक्तमेव त्रिदोषनाड्या असाध्यत्वमनूद्य तदन्यासां शेषत्वनिश्चयेन यत्नसाध्यत्वप्रतिपादनाय चिकित्सिते पठितः, स एवात्र **माधवकरेण** लिखित इत्यदोषः ॥ ६ ॥

इति श्रीकण्ठदत्तविरचितायां मधुकोशव्याख्यायां नाडीव्रणनिदानं समाप्तम् ॥४५॥

---

* 'कथंचित् प्रमादात्' ॥ ५ ॥
† 'शेषा वातपित्तकफशल्यजा इति' (आ० द०)

अथ भगन्दरनिदानम्।

*गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडकाऽऽर्तिकृत्।
भिन्ना भगन्दरो ज्ञेयः स च पञ्चविधो मतः ॥ १ ॥

नाडीविशेषत्वात् संख्यासाम्याच्च भगन्दरनिदानम्। भगन्दरपूर्वरूपपिडकामाह—गुदस्येत्यादि। क्षेत्रे देशे। सैव भिन्ना भगन्दरः। निरुक्तिरस्य सुश्रुतेन कृता। तद्यथा,—"गुदभगवस्तिप्रदेशदारणात् भगन्दराः" (सु. नि. स्था. अ. ४)–इति। भगशब्दो गुदाद्युपलक्षणम्। भोजेऽप्युक्तं,—"भगं परिसमन्ताच्च गुदं वस्तिं तथैव च। भगवद्दारयेद्यस्मात्तस्माज्ज्ञेयो भगन्दरः"–इति। पूर्वरूपं त्वस्य सुश्रुते पठ्यते; यथा,—"कटीकपालवेदना गुदकण्डूर्दाहः शोथश्च गुदस्य भवति" (सु. नि. स्था. अ. ४)–इति। एतत् सामान्यं पूर्वरूपम्। कटीकपालमत्र कटीफलकम्। पञ्चविध इति संख्याकथनं रक्तजद्वन्द्वजभगन्दरसंभावनानिरासार्थम् ॥ १ ॥

कषायरूक्षैस्त्वतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम्।
उपेक्षणात् पाकमुपैति दारुणं रुजा च भिन्नाऽरुणफेनवाहिनी ॥ २ ॥
तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत्।

शतपोनकमाह—कषायेत्यादि। अपानदेश इति गुददेशे। उपेक्षणादिति विम्लापनाद्यकरणात्। रुजा च भिन्नेति रुजा रुजान्विता, अर्शआदेराकृतिगणत्वादच्, भिन्ना विदीर्णा। व्रणैरनेकैः शतपोनकं वदेदिति शतपोनकतुल्यत्वात् शतपोनकः; शतपोनकश्चालनिका, सहस्रधारेत्यन्ये; किंवा शतपोनकः शूकदोषे पठितो विकारः "छिद्रैरणुमुखैः"—इत्यादिना, किंतु यदि शूकदोषपठितशतपोनकतुल्यत्वमस्य तदा छिद्रैरणुमुखैरित्यादिनिमित्तस्योभयत्र पठितत्वात् किं तत्सादृश्यप्रवृत्तेयं। संज्ञा, सा वा एतत्सादृश्यप्रवृत्तेति दुर्विज्ञानात्तत्रापि चालनिकातुल्यत्वमेव प्रवृत्तिनिमित्तमिति मन्यमानेन जेज्जटेन चालनिकातुल्यत्वमत्र वर्णितम्। शतपोनकवदनेकमुखत्वे वातिकभगन्दरस्वभाव एव हेतुः ॥ २ ॥—

प्रकोपणैः पित्तमतिप्रकोपितं
करोति रक्तां पिडकां गुदाश्रिताम् ॥ ३ ॥
तदाऽऽशुपाकाहिमपूतिवाहिनीं
भगन्दरं तूष्ट्रशिरोधरं वदेत् ॥ ४ ॥

उष्ट्रग्रीवलक्षणमाह—प्रकोपणैरित्यादि। तदाशुपाकाहिमपूतिवाहिनीमिति तदेति तत्काले, पित्तजत्वेनाशुपाका च सा, अहिमपूतिवाहिनी उष्णपूतिवाहिनी च सा आशुपाकाहिमपूतिवाहिनी ताम्। अत्र पिडकावस्थागतगलवक्रत्वेनोष्ट्रग्रीवाकारत्वं, तेनोष्ट्रग्रीवसंज्ञा ॥ ३ ॥ ४ ॥

* 'पार्श्वतः समीपतः, पिडका, सैव भिन्ना भगन्दरार्तिकृत्, स च पञ्चविधः–दोषैस्त्रयः, सन्निपातेनैकः, शल्येन चापरः' (आ० द०) ॥ १ ॥

१ कटीकपालनिस्तोद–दाहकण्डू रुजादयः। भवंति पूर्वं रूपाणि भविष्यति भगंदरे॥ इति ख॰।

*कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
†श्वेतावभासः कफजः परिस्रावी भगन्दरः ॥ ५ ॥

परिस्राविणमाह—कण्डूयन इत्यादि । परिस्रावी कफजः, स च घनस्रावयोगात् परिस्रावी ॥ ५ ॥

†बहुवर्णरुजास्रावा पिडका गोस्तनोपमा ।
शम्बूकावर्तवन्नाडी शम्बूकावर्तको मतः ॥ ६ ॥

सन्निपातजं शम्बूकावर्तमाह—बहुवर्णरुजास्रावेत्यादि। प्रत्येकदोषजभगन्दरपठितवर्णवेदनाः स्रावश्च । शम्बूकावर्तवत् पूर्णनद्याः शम्बूकावर्तवदावर्तनं वेदना दोषगतिविशेषाद्भवन्तीति शम्बूकावर्तः । तथाच भोजः,–"नदीनां परिपूर्णानां शम्बूकावर्तका यथा । समुत्तिष्ठन्ति वेगेन तोयवेगसमीरिताः"–इति ॥ ६ ॥

क्षताद्गतिः पायुगता विवर्धते
ह्युपेक्षणात् स्युः क्रिमयो विदार्य ते ।
प्रकुर्वते मार्गमनेकधा मुखै-
र्व्रणैस्तदुन्मार्गि भगन्दरं वदेत् ॥ ७ ॥

उन्मार्गिभगन्दरमागन्तुमाह—क्षताद्गतिरित्यादि । क्षतादिति कण्टकादिघातात् । विदार्येत इति ते क्रिमयो विदार्य मार्गं प्रकुर्वते इति योजना । अनेकधा मुखैरनेकमुखैः । अत्रोन्मार्गेण क्रिमिकृतविमार्गेण पुरीषादिगमनादुन्मार्गिसंज्ञा ज्ञेया । तन्त्रान्तरे त्वर्शोभगन्दरः पठितः । तद्यथा,–"कफपित्ते तु पूर्वोत्थे दुर्नामाश्रित्य कुप्यतः । अर्शोमूले ततः शोथः कण्डूदाहार्तिमान् भवेत् ॥ स शीघ्रं पक्वभिन्नोऽस्य क्लेदयन् मूलमर्शसः । स्रवत्यजस्रं गतिभिरयमर्शोभगन्दरः"–इति । अयमन्यतमस्मिन् शतपोनकादीनां दोषलक्षणदर्शनादन्तर्भाव्यः ॥ ७ ॥

घोराः साधयितुं दुःखाः सर्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥ ८ ॥
(सु. नि. अ. ४)

प्रतीकारप्रयत्नायाह—घोरा इत्यादि । दुःखा इति दुःखप्रदाः । क्षतजश्च विशेषत इति क्षतजोऽपि विशेषमनेकव्रणयोगं क्रिमिसंभवादिकं च वीक्ष्यासाध्यः, अत एव चिकित्सितेऽसाध्यतां प्रतिज्ञाय क्रियां वक्ष्यति । विशेषत इति ल्यब्लोपे पञ्चमी विशेषतोऽतिशयादसाध्य इत्यर्थः, यापनार्थं क्रियाविधिरिति । क्वचित् 'क्षतजश्च भगन्दरः'–इति पाठः । क्षतजो विशेषतः साधयितुं घोरोऽसाध्य एव, स्रावरूपविशेषस्य शुक्लत्वादिति गदाधरः ॥ ८ ॥

* 'कण्डूयनः कण्डूबहुलः' (आ० द०) ॥ ५ ॥
† 'शम्बूकावर्तवत् लघुशङ्खवदावर्तः' (आ० द०) ॥ ६ ॥

१ व्रणयोगात् ।

*वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च ।
भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरम् ॥ ९ ॥
(सु. नि. अ. ३३)

इति श्रीमाधवकरविरचिते माधवनिदाने भगन्दरनिदानं समाप्तम् ॥ ४६ ॥

अवस्थायामसाध्यतामाह—वातमूत्रपुरीषाणीत्यादि । भगन्दरात्स्रवन्त इत्यत्र 'अमी विशेषा' इति शेषः ॥ ९ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां भगन्दरनिदानं समाप्तम् ॥ ४६ ॥

अथोपदंशनिदानम् ।

†हस्ताभिघातान्नखदन्तपाताद्धावनाद्रत्यतिसेवनाद्वा ।
योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः ॥ १ ॥

स्थानप्रत्यासत्तेरुपदंशनिदानमाह—हस्तेत्यादि । नखदन्तपातादिति बलवदनुरागोदयान्नखदन्तच्छेदस्थानत्वेनानुक्तेऽपि मेहने नखदन्तपातः; यदुक्तं कामशास्त्रे,—"शास्त्रस्य विषयस्तावद्यावन्मन्दरसा नराः । प्रवृत्ते रतिचक्रे तु न शास्त्रं नापि च क्रमः" (का. सू. सां. अ. अ. २)—इति । कलहादिवशाद्वा मेहने नखदन्तपातः । अधावनादप्रक्षालनात् । रत्यतिसेवनादिति व्यवायस्यात्यन्तसेवनात् । योनिप्रदोषादिति दीर्घकर्कशरोमादियोगाद्योनिदुष्टेः । शिश्ने मेहने । विविधापचारैरिति अशुद्धसलिलप्रक्षालनब्रह्मचारिणीगमनादिभिः । उपदंशसंज्ञा च दंशनोपाधिमन्तरेणापि रूढा बोद्धव्या । यद्यप्यभिघातक्षते मेहने उपदंश आगन्तुः षष्ठः संभाव्यते, तथाऽपि तस्य दोषलिङ्गयुक्ततया दोषज एवान्तर्भावः ॥ १ ॥

‡सतोदभेदैः स्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत् पवनोपदंशम् ।
पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन

पैत्तिकमाह—पीतैरित्यादि । स्फोटैरित्यनुसंजनीयम् । एवमुत्तरत्रापि ॥—

§रक्तात् पिशितावभासैः ॥ २ ॥

स्फोटैः सकृष्णै रुधिरं स्रवन्तं रक्तात्मकं पित्तसमानलिङ्गम् ।
सकण्डुरैः शोथयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन ॥ ३ ॥

---

* 'अमी वाताद्या विशेषा भगन्दरात्स्रवन्तस्तमातुरं विनाशयन्ति' (आ० द०) ॥ ९॥

† 'नखदन्तपातादिति बलवदनुरागोदयात्प्रबलकामरागवशात् कामिनां मेहने दन्तनखपातो भवति, योनिप्रदोषात् अल्पमहाद्वारदीर्घकर्कशरोमसंकीर्णदेशत्वादियोनिदोषात्, रोगप्रभृतेर्वा योनिदुष्टेः । विविधापचारैरिति क्षारोष्णमलिनाम्भःप्रक्षालनब्रह्मचारिणीगमनादिभिः । पञ्चोपदंशा इति वातेन, पित्तेन, शोणितेन, कफेन, संनिपातेन—एवं पञ्च' (आ० द०) ॥ १ ॥

‡ 'भेदो द्विधा क्रियत इव । व्यवस्येत् जानीयात् । पित्तजमाह—पीतैरित्यादि । पीतै रक्तैर्वेति विकल्पः, पित्तेन बहुक्लेदयुतैरार्द्रताबहुलैः, स्फोटैरिति शेषः' (आ० द०) ॥—

§ 'कफजमाह—सकण्डुरैः कण्डूयुतैः, महद्भिः महत्परिग्रहैः, घनैर्निबिडैः, स्फोटैरिति शेषः' (आ० द०) ॥ २ ॥ ३ ॥

रक्तजमाह—रक्तादित्यादि। रक्तात् पिशितावभासैरिति मांसवत्ताम्रैः स्फोटैः रक्ताच्छोणितादुपदंशं व्यवस्येत्। 'रक्तैः' इति पाठान्तरे रक्तैः शोणितैः ॥ २ ॥ ३ ॥

नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम्।

सन्निपातजमाह—नानाविधेत्यादि। नानाविधस्रावरुजोपपन्नमिति प्रत्येकदोषोक्तस्राववेदनायुक्तम्। त्रिमलोपदंशमिति त्रिदोषोपदंशम् ॥—

*विशीर्णमांसं क्रिमिभिः प्रजग्धं मुष्कावशेषं परिवर्जयेच्च ॥ ४ ॥

असाध्यतामाह—विशीर्णेत्यादि। मुष्कावशेषमिति विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रम् ॥ ४ ॥

†संजातमात्रे न करोति मूढः क्रियां नरो यो विषये प्रसक्तः।
कालेन शोथक्रिमिदाहपाकैर्विशीर्णशिश्नो म्रियते स तेन ॥ ५ ॥

उपक्रमे चिकित्साकरणार्थमाह—संजातेत्यादि। विषये प्रसक्त इति अतिव्यवायरतः; कालेन चिरकालेन ॥ ५ ॥

अङ्कुरैरिव संघातैरुपर्युपरि संस्थितैः।
क्रमेण जायते वर्तिस्ताम्रचूडशिखोपमा ॥ ६ ॥
कोपस्याभ्यन्तरे सन्धौ सर्वसन्धिगताऽपि वा।
(सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा।)
लिङ्गवर्तिरभिख्याता लिङ्गार्श इति चापरे ॥ ७ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने उपदंशनिदानं समाप्तम् ॥ ४७ ॥

एकस्थानत्वेनात्र लिङ्गार्श आह—अङ्कुरैरित्यादि। अङ्कुरैरङ्कुरसदृशैरीषद्दीर्घैः, संघातैर्मांसप्रतानैः, 'संजातैः' इति पाठे 'मांसैः' इति शेषः। ताम्रचूडशिखोपमेति ताम्रचूडः कुक्कुटः, तच्चूडातुल्या। सन्धाविति मेढ्रप्रसन्धौ, सर्वसन्धिगतेत्यनेन सर्वसन्धेरुक्तत्वात्। एषा त्रिदोषजा; अत एव 'सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा'—इति क्वचित् पाठः। सुश्रुते क्वचित् स्त्रीणामप्युपदंशः पठ्यते। यथा, "मेढ्रसंधौ व्रणाः केचित् केचित् सर्वाश्रयास्तथा। कुलत्थाकृतयः केचित् केचित् पद्मदलोपमाः ॥ रुजादाहार्तिबहुलाः कृष्णास्तोदसमन्विताः। शीघ्रं केचिद्विसर्पन्ति शनैः केचित्तथाऽपरे। स्त्रीणां पुंसां च जायन्ते उपदंशाः सुदारुणाः"—इति। किंतु समानतन्त्रेष्वदर्शनादेतदनार्षमाहुः ॥ ६ ॥ ७ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायामुपदंशनिदानं समाप्तम् ॥ ४७ ॥

---

* 'विशीर्णमांसं शटितमांसं, क्रिमिभिः प्रजग्धं भक्षितं' ॥ ४ ॥

† 'यो मूढो विषयप्रसक्तो व्यवायादितत्परः, स तेनोपदंशेन कालेन कालान्तरेण म्रियते, शोथादिभिरुपद्रवैः प्रशीर्णशिश्नो गलितमेहनः' (आ० द०) ॥ ५ ॥

अथ शूकदोषनिदानम् ।

*अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः ।
व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः ॥ १ ॥

समानस्थानत्वाच्छूकदोषनिदानमाह—अक्रमादित्यादि । शूको जलशूकः, स तु विषजन्तुर्जलमलोद्भवः सशूकः, तथा शूकप्रधानो लिङ्गवृद्धिकरो वात्स्यायनाद्युक्तो योगः शूक उच्यते; तस्य दोषो वैकृतमसम्यक्करणात्, ततो वा दोषो वातादिः, तत्कृतो वा विकारः, "दोषा अपि व्याघ्याख्यां लभ्यन्ते"—इत्यागमात्; अत एव शूकदोषविवरणे शूकदोषनिमित्ता व्याधय एव बोद्धव्याः । एवं च यदत्र 'कुम्भिका, रक्तपित्तोत्था' इत्यादिकारणान्तरोपवर्णनं तत् शूककृतरक्तपित्तादिरूपं ज्ञेयम् । अन्ये त्वादिशब्दलोपात् शूकादिदोषनिदानमाहुः । आदिशब्देन दुष्टयोनिगूढान्तर्लोमदुर्भगागमनादि गृह्यते; तन्न मनोहरं, 'वृद्धिं योऽभिवाञ्छति' इत्यनेन विशेषणेन दुष्टयोन्यादेरवोधस्य ग्रहीतुमनर्हत्वात् । अन्ये तु दुष्टयोन्यादीन्युपदंशहेतुत्वेनोक्तत्वाना-नुमन्यन्ते; तदनैकान्तिकं, एकजातीयहेतूनामनेकरोगकरणदर्शनात् । अक्रमादित्यनुचितवृद्धिक्रमात्; अनुचिता च वृद्धिर्भूरिविकारकरजलशूकयोगानामवचारणात्, जलशूकयोगानां वात्स्यायनादौ विस्तरः । यथा,—भल्लातकास्थिजलशूकमथाब्जपत्रमन्तर्विदह्य मतिमान् सह सैन्धवेन । एतद्विरूढबृहतीफलतोयपिष्टमालेपनं महिषविड्विमलीकृतेऽङ्गे ॥ स्थूलं महत्तरतुरङ्गमतुल्यमाशु शेफं करोत्यभिमतं न हि संशयोऽस्ति" इत्यादि । यच्च जलशूकरहितमश्वगन्धादितैलं तदुचितमेव लिङ्गवर्धनम् । यदुक्तं,—अश्वगन्धावरीकुष्ठमांसीसिंहीफलान्वितम् । चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत् ॥ स्तनलिङ्गकर्णपालिवर्धनं म्रक्षणादिदम्"—इति । गदाधरस्त्वाह लिङ्गवृद्धिरेव कामपरायणनिन्दितपुरुषैः क्रियमाणा अक्रमः । दश चाष्टौ चेत्यष्टादश; संख्येयनिर्देशादेव लब्धायां संख्यायां पुनरुक्तिः संमूढपिडकादौ द्वित्वशङ्कानिरासार्थम् ॥ १ ॥

†गौरसर्षपसंस्थाना शूकदुर्भुग्नहेतुका ।
पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा ॥ २ ॥
(सु. नि. अ. १४)

सर्षपिकामाह—गौरेत्यादि । शूकदुर्भुग्नहेतुकेति दुर्भुग्नशूकहेतुकेत्यर्थः । पिडकादिषु उभयवचनमिति (?) परनिपातः । दुर्भुग्नो दुरवचारितः । 'शूकदुर्भगहेतुका' इति पाठान्तरे शूकनिमित्ता दुष्टयोनिनिमित्ता चेत्यर्थः ॥ २ ॥

‡कठिना विषमैर्भुग्नैर्वायुनाऽष्ठीलिका भवेत् ।
(सु. नि. अ. १४)

---

* 'तन्मुख्यत्वाल्लिङ्गवृद्धावन्येऽपि योगाः शूकाः कथ्यन्ते, शूकस्य दोषो विकारः, शूककारणत्वादत्र शूकजा इति शूकदोषजा व्याधयः' (आ० द०) ॥ १ ॥

† 'गौरसर्षपतुल्या' (आ० द०) ॥ २ ॥

‡ 'भुग्नैर्वक्रैः' (आ० द०) ॥—

अष्ठीलिकामाह—कठिनैरित्यादि । विषमैर्भुग्नैरिति वक्ष्यमाणशूकैरित्यनेन संबध्यते । विषमैरित्यप्रशस्तैः । अष्ठीलिका लोहकारस्य भाण्डीविशेषः, तत्तुल्यत्वादष्ठीलिका ॥—

*शूकैर्यत् पूरितं शश्वद्ग्रथितं नाम तत् कफात् ॥ ३ ॥
(सु. नि. अ. १४)

ग्रथितमाह—शूकैरित्यादि । शूकैर्यत् पूरितं शश्वद्ग्रथितमिति शूकैः सर्वदा पूरितं लिङ्गं यत् ग्रन्थिलं तत् ग्रथितमित्यर्थः, ग्रन्थितुल्यत्वात् ग्रथितसंज्ञा ॥ ३ ॥

†कुम्भिका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ।
(सु. नि. अ. १४)

कुम्भिकामाह—कुम्भिकेत्यादि । कुम्भी कुम्भीडुलता, तस्याः फलं कुम्भी; तद्धितस्य लुक्; इवे प्रतिकृतौ इति कन्, कुम्भीफलवत् कुम्भिका । अशुभेति शुभं शुक्लं तद्विरोधे नञ्, कृष्णेत्यर्थः । 'आशुजा' इति पाठान्तरम् ॥—

‡तुल्यजां त्वलजीं विद्याद्यथाप्रोक्तां विचक्षणः ॥ ४ ॥
(सु. नि. अ. १४)

अलजीमाह—तुल्यजामित्यादि । तुल्यजामिति प्रमेहपिडका अलजी तत्तुल्यसंभवा, सा च रक्ताऽसिता स्फोटचिता । तुल्यत्वमेव विवृणोति—यथाप्रोक्तामिति, अलजी यथा प्रोक्ता यादृशलक्षणा तथेयमपीत्यर्थः । एषा च कारणचिकित्साभेदात् प्रमेहं विना लिङ्ग एव संभवाच्च ततः पृथग्भूता ज्ञेया ॥ ४ ॥

मृदितं पीडितं यच्च संरब्धं वातकोपतः ।
(सु. नि. अ. १४)

मृदितमाह—मृदितमित्यादि । पीडितमिति अधिकृतत्वात् शूकपातानन्तरं पीडितमिति ज्ञेयं, पीडितं 'लिङ्गं' इति शेषः, संरब्धं सशोथम् ॥—

पाणिभ्यां भृशसंमूढे संमूढपिडका भवेत् ॥ ५ ॥
(सु. नि. अ. १४)

संमूढपिडकामाह—पाणिभ्यामित्यादि । पाणिभ्यां भृशसंमूढे इत्यधिकारात् पातितशूके लिङ्गे पाणिभ्यां भृशसंमूढे पिच्चितावनते, अत्रापि 'वातकोपात्' इत्यनुवर्तते ॥ ५ ॥

---

* 'ग्रथितत्वाद् ग्रथितसंज्ञा । शश्वदिति अहरहः । शूकपूर्णं शेफसि, एतेनैकदिनान्तरपूर्णं प्रशस्तमिच्छन्ति कामतन्त्राचार्याः । नित्यपूरणाद्ग्रथितनाम्नो रोगस्योत्पत्तिः' (आ० द०) ॥ ३ ॥

† 'कुम्भिका कुम्भिकाकारा, तथा जाम्बवास्थिरूपा जम्बूफलास्थिसदृशी, सा च रक्तपित्तजनिता' (आ० द०)

‡ 'विचक्षणोऽलजीपिडिकां विद्यात् । किंभूतां ? तुल्यजामिति । इयमपि दुष्टशूकावचारणाज्ज्ञेया' (आ० द०) ॥ ४ ॥

*दीर्घा वह्वयश्च पिडका दीर्यन्ते मध्यतस्तु याः ।
सोऽधिमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत् ॥ ६ ॥
(सु. नि. अ. १४)

अधिमन्थमाह—दीर्घा इत्यादि । कफासृग्भ्यामिति शूकपातकृताभ्याम् । एवमन्यत्रापि सामान्येन शूकदोषाभिहिते शूकपातोऽनुक्तोऽपि ज्ञेयः । वेदनारोमहर्षकृदिति वेदनया रोमहर्षं करोति ॥ ६ ॥

†पिडका पिडकाव्याप्ता पित्तशोणितसंभवा ।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिका तु सा ॥ ७ ॥
(सु. नि. अ. १४)

पुष्करिकामाह—पिडकेत्यादि ॥ ७ ॥

‡स्पर्शहानिं तु जनयेच्छोणितं शूकदूषितम् ।
(सु. नि. अ. १४)

स्पर्शहानिमाह—स्पर्शहानिं त्वित्यादि ॥—

§मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा तु या ॥ ८ ॥
व्याधिरेषोत्तमा नाम शूकाजीर्णनिमित्तजा ।
(सु. नि. अ. १४)

उत्तमामाह—मुद्गमाषेत्यादिना । एषोत्तमा व्याधिः शूकाजीर्णनिमित्तजा भवति, शूकाजीर्णं पुनः पुनर्दुरवचारितशूकविकृतिरूपमेव । व्याधिरेषोत्तमो नामेति पाठान्तरे-एषोत्तम इति निर्देशः पूर्वत्रासिद्धविधेरनित्यत्वात् साधुः ॥ ८ ॥—

¶छिद्रैरणुमुखैर्लिङ्गं चितं यस्य समन्ततः ॥ ९ ॥
वातशोणितजो व्याधिः स ज्ञेयः शतपोनकः ।
(सु. नि. अ. १४)

शतपोनकमाह—छिद्रैरणुमुखैरित्यादिना । छिद्रैरिति दुरवचारितशूकदोषजनितवातशोणितजैः चितमुपचितम्, अत एव चिकित्सायां लेखनोपदेशः । शतपोनकश्चालनिका, तत्तुल्यत्वात् शतपोनकः ॥ ९ ॥—

* 'दीर्घा विस्तीर्णाः, वह्वयो बहुलाः' (आ० द०) ॥ ६ ॥

† 'या पिडकैव पिडकाभिश्चिता व्याप्ता । पद्मकर्णिकसंस्थानेति कमलकोशतुल्या, पुष्करिकेति संज्ञा पित्तशोणिताद्विज्ञेया' (आ० द०) ॥ ७ ॥

‡ 'स्पर्शहानिनामानं व्याधिविशेषं, शूकदूषितं शूकेन दुष्टिं नीतं रक्तं जनयेत्' (आ० द०) ॥—

§ 'एष उत्तमो नाम व्याधिः शूकाजीर्णनिमित्तजो भवति, शूकाजीर्णं पुनः पुनर्दुरवचारितशूकविकृतिरूपमेव, तदेव निमित्तं, ततो जायत इति । 'व्याधिरेषोत्तम' इति निर्देशः पूर्वत्रासिद्धविधेरनित्यत्वात्साधुः' (आ० द०) ॥ ८ ॥

¶ 'यस्य लिङ्गं छिद्रैः सूक्ष्ममुखैः समन्ततः सर्वतश्चितं व्याप्तं, स व्याधिः शतपोनको ज्ञेयः' (आ० द०) ॥ ९ ॥

१ अयमिममेव मुख्यं पाठं मनुते ।

*वातपित्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहकृत् ॥ १० ॥
(सु. नि. अ. १४)

त्वक्पाकमाह—वातपित्तकृत इत्यादि । शुक्रदोषेषु क्वचित् कस्यचिद्दोषस्याभिधानं शुक्रविशेषादाहाराचारभेदाच्च समर्थनीयम् ॥ १० ॥

कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम् ।
यस्य वास्तुरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम् ॥ ११ ॥
(सु. नि. अ. १४)

शोणितार्बुदमाह—कृष्णैः स्फोटैरित्यादिना । पिडकाभिरिति स्वल्पाभिर्निपीडितं लिङ्गमिति बोद्धव्यम् । यस्य वास्तुरुज इति वास्तु व्रणाधिष्ठानं, तत्र रुजः, अगाधोच्छ्रितमांसशोथत्वात् । 'बस्तिरुजश्चोग्रा' इति पाठान्तरम् । अर्बुदं दुरवचारितशुक्रजशोणितकृतम् ॥ ११ ॥

†मांसदोषेण जानीयादर्बुदं मांससंभवम् ।
(सु. नि. अ. १४)

मांसार्बुदमाह—मांसदोषेणेत्यादि । मांसदोषेणेति शुक्रपातानन्तरं प्रहारादिना कृतेन मांसदोषेण ॥—

शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः ॥ १२ ॥
विद्यात्तं मांसपाकं तु सर्वदोषकृतं भिषक् ।
(सु. नि. अ. १४)

मांसपाकमाह—शीर्यन्ते यस्येत्यादि । शीर्यन्ते गलन्ति, सर्वाश्च वेदना इति वातपित्तकफजाः ॥ १२ ॥—

विद्रधिं सन्निपातेन यथोक्तमिति निर्दिशेत् ॥ १३ ॥
(सु. नि. अ. १४)

विद्रधिमाह—विद्रधिमित्यादि । सन्निपातेन यथोक्तमिति 'नानावर्णरुजास्रावः' इत्यादिना सन्निपातजविद्रधिलक्षणं विद्रधिमिह जानीयादित्यर्थः ॥ १३ ॥

‡कृष्णानि चित्राण्यथवा शूकानि सविषाणि वा ।
पातितानि पचन्त्याशु मेढ्रं निरवशेषतः ॥ १४ ॥
कालानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः ।
सन्निपातसमुत्थांस्तु तान् विद्यात्तिलकालकान् ॥ १५ ॥
(सु. नि. अ. १४)

---

* 'वातपित्तकृतः त्वक्पाकनामा व्याधिर्ज्ञेयः । च ज्वरदाहौ करोति । अयं च दुरवचारितशुक्रदूषितवातपित्तज इत्यर्थः' (आ० द०) ॥ १० ॥

† 'अत्रापि शोणितं हेतुः, मांसार्बुदसंज्ञा' (आ० द०) ॥—

‡ 'यस्य पुंसः शूकानि कृष्णानि, अथवा चित्राणि, अथवा सविषाणि, तानि संहत्याशु शीघ्रं निरवशेषतः समग्रं मेढ्रं पचन्ति, तथा कालानीति कृष्णानि परिणततिलफलवर्णानि भूत्वा, शीर्यन्ते गलन्ति, तान् सन्निपातजान् तिलकालकान् विद्यात्' (आ० द०) ॥१४॥१५॥

तिलकालकमाह—कृष्णानीत्यादि । चित्राणीति नानावर्णानि । सविषाणीति शूकानां सविषत्वेऽपि विशेषार्थमुक्तम् । कालानीति कृष्णानि, कृष्णतिलतुल्यत्वात्तिलकालकसंज्ञा । शीर्यन्ते गलन्ति ॥ १४ ॥ १५ ॥

*तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ।
विद्रधिश्च न सिद्ध्यन्ति ये च स्युस्तिलकालकाः ॥ १६ ॥
(सु. नि. अ. १४)

इति श्रीमाधवकरविरचिते माधवनिदाने शूकदोषनिदानं समाप्तम् ॥ ४८ ॥

शूकदोषेष्वसाध्यानाह—तत्र मांसार्बुदमित्यादि । यच्चेति चकारोऽयं भिन्नक्रमः, स च न सिद्ध्यतीत्यनन्तरं द्रष्टव्यः, तेन साध्यताऽप्येषामचिरत्वादिना भवति, अत एव प्रत्याख्याय चिकित्साविधानमुपपन्नमिति गदाधरः । दुर्ज्ञानात् साध्ये एवासाध्यतारोपादसंपूर्णावस्थायामसाध्येऽपि क्रियासिद्धेश्च मा निवर्ततां भिषगिति प्रत्याख्याय चिकित्सां कारुणिकतया आचार्य उपदिशतीति मन्तव्यम् ॥ १६ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शूकदोषनिदानं समाप्तम् ॥ ४८ ॥

अथ कुष्ठनिदानम् ।

†विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्दिं वेगांश्चान्यान् प्रतिघ्नताम् ॥ १ ॥
व्यायाममतिसन्तापमतिभुक्त्वा निषेविणाम् ।
घर्मश्रमभयार्तानां द्रुतं शीताम्बुसेविनाम् ॥ २ ॥
अजीर्णाध्यशिनां चैव पञ्चकर्मापचारिणाम् ।
नवान्नदधिमत्स्यातिलवणाम्लनिषेविणाम् ॥ ३ ॥
माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम् ।
व्यवायं चाप्यजीर्णेऽन्ने निद्रां च भजतां दिवा ॥ ४ ॥
विप्रान् गुरून् धर्षयतां पापं कर्म च कुर्वताम् ।
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ॥ ५ ॥
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ।
अतः कुष्ठानि जायन्ते सप्त चैकादशैव च ॥ ६ ॥
(च. चि. अ. ७)

---

* 'तत्र तेषु शूकदोषेषु मध्ये यन्मांसार्बुदं, तथा विद्रधिः, तथा ये च तिलकालकाः स्युः एते न सिध्यन्ति' (आ० द०) ॥ १६ ॥

† 'एतदाचरतां नृणां कुष्ठानि जायन्ते इति संबन्धः प्रतिघ्नतां प्रतिघातं कुर्वताम् । अजीर्णमनग्निपक्वमन्नं, पञ्चकर्मापचारिणामिति पञ्चकर्माणि वमनविरेकादीनि, तेषामपचारिणां व्यापत्त्वयोगिनाम् । व्यवायं मैथुनं, दिवा च निद्रां भजताम्' (आ० द०) ॥ १–६ ॥

अष्टादशसंख्यारूपेण तुल्यत्वात् कुष्ठनिदानमुच्यते । विशेषेण कुष्ठजनकं निदानमाह—विरोधीनीत्यादि । विरोधीनि "न मत्स्यान् पयसाऽभ्यवहरेत्" (च. सू. स्था. अ. २६) इत्यादिनोक्तानि । अजतामिति पूर्वेण संबध्यते । आगतामिति उपस्थितवेगाम् । वेगांश्चान्यानिति मूत्रपुरीषादिवेगान् । व्यायाममतिसन्तापमविभुक्त्वेति भुक्त्वा व्यायाममतियुज्य सन्तापमतियुज्य निषेविणामिति एतयोरेव सेवनशीलानां, निषेविणामित्यनेन सह प्रथमतः संबन्धे कृद्योगलक्षणा षष्ठी स्यात्, ततश्च व्यायामस्यातिसन्तापस्यातिनिषेविणामिति प्रयोगः प्रसज्येत । 'शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणां' इति पाठान्तरे शीतोष्णादीनां यदा येन क्रमेण सेव्यत्वमुक्तं, तद्विपरीत्येन तान् सेव्यमानानां; शीतोष्णलङ्घनाहारानित्यनन्तरं प्रतीति द्रष्टव्यं, तेन शीतोष्णादीन् प्रति यः क्रमस्तं मुक्त्वा एतेषामेव निषेविणाम् । घर्मश्रमभयार्तानामिति घर्मादिभिरार्तत्वे सति द्रुतमविश्रम्य शीताम्बुसेविनाम् । घर्म आतपः । अजीर्णाऽध्यशिनामिति अजीर्णमाममपक्वमिति यावत्, तद्भुञ्जानानां; अध्यशिनामाहारे एवापरिणते भुञ्जानानाम् । अशिनामिति अजीर्णाधिशब्दाभ्यां सह संबध्यते । पञ्चकर्मापचारिणामिति पञ्चकर्मणि क्रियमाणेऽपचारिणाम् । नवान्नदधिमत्स्यानीति अतिशब्दो नवान्नादिभिः सर्वैः संबध्यते । व्यवायं चाप्यजीर्णे इति विदग्धादिरूपे अजीर्णे । धर्षयतामिति अभिभवताम् । पापं कर्म च कुर्वतामित्यनेनैव विप्रादिधर्षणे लब्धे पुनस्तद्वचनं विशेषार्थम् । दोषदूष्यसंग्रहमाह—वातादय इत्यादिना वातादीनां त्रित्वे प्रतीतेऽपि त्रय इति वचनं सर्वकुष्ठेषु मिलितानामेव त्रयाणां दुष्टिप्रदर्शनार्थम् । द्रव्यसंग्रह इति द्रव्यमारम्भकं कारणमुच्यते; यथा,-"रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा"-(च. सू. स्था. अ. १)-इति । अर्थलब्धमपि सप्तकमिति पदं सर्वत्र सप्तकनियमार्थं पुनरुक्तम् । ननु, विसर्पाणां समुत्पादे एतावत्येव सामग्री, यदुक्तं,- "रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः । विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः"-(च. चि. स्था. अ. २१) इति । इति लसीकया च तत्रोदकमुच्यते, तत् किंनिबन्धनः कुष्ठविसर्पयोर्भेदः ? उच्यते, कुष्ठं चिरक्रियैः स्थिरैरप्रबलरक्तपित्तैर्दोषैर्जन्यते, विसर्पस्त्वचिरविसर्पणशीलैः प्रबलरक्तपित्तैः कुष्ठे गुरुप्रधर्षणपरद्रव्यापहारादयो निमित्तं न विसर्पे । अन्ये त्वाहुः-विसर्पा वातादिभिरेकैकशोऽपि भवन्ति, यदुक्तं,-"पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः" (च. चि. स्था. अ. २१)- इति, कुष्ठं तु त्रिदोषजमेवेति । किं त्वेतत्समाधानं त्रिदोषत्वेऽपि विसर्पाणामेकदोषजकुष्ठवदेकदोषजत्वकीर्तनं सङ्गतमिति न मनोहरम् । अतः कुष्ठानीति अत इत्यस्मात् दोषदूष्यसमुदायात् । सप्त चैकादशैव चेति विच्छेदपाठेन सप्तानां महाकुष्ठत्वमेकादशानां क्षुद्रत्वमिति चोधयति ॥ १-६ ॥

*कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः ।
सर्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः ॥ ७ ॥

(वा. नि. अ. १४)

* 'कुष्ठानि सप्तधा सप्तप्रकाराणि, कथमित्याह-पृथग्दोषैः वातेन, पित्तेन, श्लेष्मणा, त्रीणि; तथा तैरेव दोषैर्द्वन्द्वैर्वातपित्ताभ्यां, वातकफाभ्यां, कफपित्ताभ्यां, त्रीणि; तथा तैरेव दोषैः

कुष्ठानां त्रिदोषजत्वेऽप्युल्बणदोषेण सप्तप्रकारतामाह—कुष्ठानीत्यादि । दोषैः पृथक् त्रयः, द्वन्द्वैस्त्रयः, समागतैः सन्निपातैरेक इति सप्तत्वम् । व्यपदेशोऽधिकत्वत इति यथा—वातेन कुष्ठं कापालमित्यादि ॥ ७ ॥

*अतिश्लक्ष्णखरस्पर्शस्वेदास्वेदविवर्णताः ।
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिभ्रमः[१] ॥ ८ ॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽतिकोपनम् ॥ ९ ॥
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम् ।
(वा. नि. अ. १४)

पूर्वरूपमाह—अतिश्लक्ष्णेत्यादिना । अतिश्लक्ष्णोऽतिमसृणः । खरो रूक्षः (खरः कर्कशः), अतिश्लक्ष्णो वा खरो वा स्पर्शः । स्वेदास्वेदौ स्वेदवहस्रोतोऽवरोधानवरोधकृतौ । स्वापः स्पर्शाज्ञानम् । कोठोन्नतिः वरटीदष्टसंकाशः शोथः कोठः, तस्योन्नतिः । शीघ्रोत्पत्तिश्चिरस्थितिश्च व्रणानामेव । निमित्तेऽल्पेऽतिकोपनमिति अन्यथाऽपि दुष्टशोणितत्वाद्व्रणानां देहगतानामल्पेऽपि हेतौ कोपः । कुष्ठलक्षणमग्रजमिति कुष्ठानां पूर्वरूपमित्यर्थः ॥ ८ ॥ ९ ॥—

†कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ॥ १० ॥
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ।
रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम् ॥ ११ ॥
उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेत् ।
श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् ॥ १२ ॥
कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ।
कर्कशं रक्तपर्यन्तमन्तःश्यावं सवेदनम् ॥ १३ ॥
यदृष्यजिह्वसंस्थानमृष्यजिह्वं तदुच्यते ।
सश्वेतं रक्तपर्यन्तं पुण्डरीकदलोपमम् ॥ १४ ॥
सोत्सेधं च सरागं च पुण्डरीकं तदुच्यते ।
श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ॥ १५ ॥

समागतैः सन्निपातितैरेकं, इति सप्तत्वम् । नन्वेवं सत्येकदोषजं द्विदोषजं कुष्ठं तत्सर्वं त्रिदोषजं स्यादित्याह—सर्वेष्वित्यादि । सर्वेष्वपि कुष्ठेषु त्रिदोषजेषु सत्स्वधिकत्वतोऽधिकत्वाद्व्यपदेशो निर्देशः कार्यः, सन्निपातस्य समविषमत्वात्' (आ० द०) ॥ ७ ॥

* 'विवर्णता वैवर्ण्यं, दाहः सर्वाङ्गीणः, कण्डूस्त्वचि, श्रमोऽनायासजः । अल्पेऽपि निमित्ते कोपो व्रणानाम् (आ० द०) ॥ ८ ॥ ९ ॥—

† 'कृष्णारुणा ये स्फुटितघट्याः खण्डास्तद्वर्णं, अन्ये कृष्णारुणकपालं शर्करावर्णमाहुः । रूक्षं रूक्षस्पर्शं, तोदबहुलं तोदाढ्यं, त्वग्दाहरागकण्डूभिर्युक्तं, उदुम्बरफलाभासं पक्वोदुम्बरवर्णम् । मण्डलकुष्ठमाह—एवंविधं कुष्ठं मण्डलं मण्डलसंज्ञयोच्यते, श्वेतं रक्तं तदाभासं

---

१ "भ्रमः" इत्यत्र "श्रमः" इति पाठाभिप्रायेण ।

प्रायश्चोरसि तत् सिध्ममलाबुकुसुमोपमम् ।
यत्काकणन्तिकावर्णं सपाकं तीव्रवेदनम् ॥ १६ ॥
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति ।
(च. चि. अ. ७)

सप्तमहाकुष्ठानां लक्षणमाह—कृष्णारुणकपालाभमित्यादि । कृष्णारुणकपालाभं कृष्णारुणकपालवर्णं, कपालं खर्परशकलम् । परुषं खरस्पर्शम् । तनु तनुत्वक्, विषमं दुश्चिकित्स्यम् । औदुंबरमाह, रुगित्यादि रोमपिञ्जरमिति रोमभिः पिञ्जरं कपिलरोममित्यर्थः । मंडलकुष्ठमाह श्वेतेत्यादि स्थिरं कठिनं स्त्यानमार्द्रं सजलं वा । उत्सन्नमण्डलमुन्नतमण्डलम् । कृच्छ्रं कृच्छ्रसाध्यम् । अन्योन्यसंयुक्तमिति अपरापरैर्मिलितम् । ऋष्यजिह्वमाह कर्कशमित्यादि ऋष्यजिह्वासंस्थानमिति ऋष्यो नीलाण्डो हरिणः, रोभु-इतिप्रसिद्धः तस्य जिह्वाकारम् । पुण्डरीकमाह स श्वेतमित्यादि । पुंण्डरीकदलोपममिति पुण्डरीकं रक्तपद्मं तत्पत्रोपमं, तेन सश्वेतं रक्तपर्यन्तम् । सरागमिति सलोहितं, मध्ये श्वेतलोहितमित्यर्थः सिध्मलक्षणमाह श्वेतमित्यादि श्वेतं ताम्रमिति श्वेतलोहितात्मकम् । प्रायश्चोरसीत्युरसि तद्बाहुल्येन भवति, कफप्रधानत्वात् । प्रायोग्रहणादन्यत्रापि भवति । काकणमाह यदित्यादि यत् काकणन्तिकावर्णमिति काकणन्तिका गुञ्जागुञ्जासवर्णत्वेन च मध्ये कृष्णमन्ते रक्तं अथवा मध्ये रक्तमन्ते कृष्णम् । कुष्ठत्वेनैव त्रिदोषलक्षणत्वे सिद्धे त्रिदोषलिङ्गमिति पुनरुक्तं प्रबलदोषत्रयलिङ्गत्वोपदर्शनार्थम् । इति सप्तमहाकुष्ठानि । महत्त्वं चैषां शीघ्रमुत्तरोत्तरधात्ववगाहनबहुदोषजत्वक्रियाभूयस्त्वयोगात् ॥१०-१६॥—

*अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ॥ १७ ॥
तदेककुष्ठं, चर्माख्यं बहलं हस्तिचर्मवत् ।
श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम् ॥ १८ ॥
वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ।
कण्डूमद्भिः सरागैश्चः गण्डैरलसकं चितम् ॥ १९ ॥

स्त्यानं सान्द्रं सदलं वा, अन्योन्यसंसक्तमिति, परस्परैर्मिलितम् । ऋक्षजिह्वमाह-कर्कशमित्यादि । कर्कशं खरस्पर्शम् । ऋश्यो नीलाण्डो हरिण इति, अन्ये ऋक्षः 'रिछ' इत्याहुः, तज्जिह्वाकारम् । पुण्डरीकं श्वेतकमलं, सोत्सेधमुन्नतम् । सरागमिति प्रान्तेऽधिकरागप्रतिपादकं, सरागमित्यत्र 'सदाहम्' इति क्वचित्पाठः । तनु अघनं, यद्दृष्टं सद्रजश्चूर्णं मुञ्चतीति । तथा सपाकं, तथा तीव्रवेदनं, तथा त्रिदोषलिङ्गं, तत् काकणाख्यं कुष्ठं नैव सिध्यति' (आ० द०) ॥ १०-१६ ॥—

* 'तदेककुष्ठं नाम, अस्वेदनं स्वेदरहितम् । श्यावं श्याववर्णम् । पाणिपादयोः स्फुटनं, विदारणं, वैपादिकं कुष्ठम् । अलसकुष्ठमाह-कण्डूमद्भिरित्यादि । चितं युक्तं, अलसकाख्यं कुष्ठम् । दद्रुमण्डलमाह-सकण्डूरागाः कण्डूरागसंयुक्ताः पिडका यत्र तत् सकण्डूरागपि-

---

१ अयमेवमेव पाठमूरीकरोति । २ 'यदृक्षजिह्वसंस्थानमृक्षजिह्वम्' इति पाठाऽभिप्रायेणैतत् ।

सकण्डूरागपिडकं दद्रुमण्डलमुद्गतम् ।
रक्तं सशूलं कण्डूमत् सस्फोटं यद्दलत्यपि ।
तच्चर्मदलमाख्यातं संस्पर्शासहमुच्यते ॥ २० ॥

सूक्ष्मा बह्वयः पिडकाः स्राववत्यः
पामेत्युक्ताः कण्डुमत्यः सदाहाः ।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्रा स्फिचोश्च ॥ २१ ॥

स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ।
रक्तं श्यावं सदाहार्ति शतारुः स्याद्बहुव्रणम् ॥ २२ ॥
सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिका ।

(च. चि. अ. ७)

अतः परमेकादशक्षुद्रकुष्ठान्युच्यन्ते—अस्वेदनमित्यादि । महावास्तु महास्थानम् । मत्स्यशकलोपममिति मत्स्यस्य त्वक्सदृशम् । चर्माख्यं चर्मकुष्ठम् । बहलमपतलम् । किटिभमाह श्याविमित्यादि किणखरस्पर्शमिति किणो व्रणस्थानम्। परुषं रूक्षम् । वैपादिकमिति विपादिकायाः स्वार्थेऽण् । अलसकमाह कण्डूमद्भिरित्यादि गण्डैरिति स्फोटैः दद्रुमण्डलमाह कण्डिवत्यादि दद्रुमण्डलमिति मण्डलरूपतयोत्पादाद्दद्रुमण्डलमिति कीर्तनम् । ननु, कथमस्य चरके क्षुद्रत्वेनाभिधानं, सुश्रुते महाकुष्ठे दद्रोरुक्तत्वात्; तथा सिध्म चरके महाकुष्ठे, सुश्रुते क्षुद्रकुष्ठे दर्शितम् । उच्यते,—असिता दद्रुरवगाढमूला सुश्रुते महाकुष्ठं, असितेतरदद्रुश्चरकेऽनवगाढमूला क्षुद्रकुष्ठं, सुश्रुते असितेतरदद्रुा विसर्पकुष्ठेऽन्तर्भावः, विसर्पणयोगात्; तथा ऽवगाढं सिध्म चरके महाकुष्ठं, सिध्मपुष्पिका तु त्वङ्मात्रगता सुश्रुते क्षुद्रकुष्ठं; असितदद्रौ असितसिध्मनोऽवरोध इति गदाधरः । जेज्जटस्त्वाह—चरकोक्तं सिध्मैव सुश्रुते दद्रुशब्दाभिहितं, नामभेदः केवलं परं न वस्तुभेदः, सन्ति ह्यर्थान्तराणि समानशब्दाभिहितानीत्यविरोधः । किंत्वियमसाध्वी व्याख्या, लक्षणवैलक्षण्यात्; किंच चरकसुश्रुतयोः कुष्ठं प्रति बहुप्रकारो विरोधः, तथाहि—सुश्रुतोक्तमरुणं न चरके पठ्यते, मण्डलं चरकोक्तं न सुश्रुते, क्षुद्रकुष्ठे चरकोक्तचर्माख्यालसकशतारुप्रभृतीनि न सुश्रुते, सुश्रुतो-

---

क्तं, तथा उद्गतमुत्सन्नं एवंविधं मण्डलं यत्, तद् दद्रुनाम कुष्ठम् । चर्मदलमाह—रक्तमित्यादि । दलयति विदारयति, अस्पर्शसहं च वस्त्रादिस्पर्शनाक्षमं, तच्चर्मदलनाम । पामामाह—सूक्ष्मा इत्यादि । एवंविधाः पिडकाः पामा इत्युक्ता वैद्यैरित्यर्थः । बह्वयः प्रभूताः, स्राववत्यः स्रावयुक्ताः, कण्डूमत्यः कण्डूयुक्ताः । कच्छुमाह—सैवेत्यादि । सैव पामा पाण्योः हस्तयोः, स्फिचोः कटिप्रोथयोश्च कच्छुः कथ्यते । तीव्रदाहैस्तीव्रसंतापैः, स्फोटैरित्यर्थः । विचर्चिकामाह—सकण्डूरित्यादि । सकण्डूः पिडका भवेत् । श्यावा वर्णतः, बहुस्रावा भूरिप्रस्रावा[1] (आ० द०) ॥ १७–२२ ॥—

---

१ एतादृशपाठाभिप्रायेण ।

क्षुद्रकुष्ठा रकसादयश्च न चरके; तस्मादयं समाधिरुचितः—कुष्ठानामसंख्येयत्वमिति केचित् चरके केचित् सुश्रुते कुष्ठप्रकारा उच्यन्ते । उक्तं हि चरके,—"कुष्ठं सप्तविधं, अष्टादशविधं, असंख्येयं वा" (च. नि. स्था. अ. ५)-इति । चर्मदलमाह रक्तमित्यादि यद्दलत्यपीति गलति विदीर्यते शतारुमाह रक्तेत्यादि शतारुरिति बहुव्रणयोगान्वितं नाम विचर्चिकामाह संकण्डूत्यादि सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिके" ति अत्र कफकार्यं कण्डूः, बहुस्रावत्वं पित्तात्, श्यावत्वं वातात्, एवं सर्वत्र दोषत्रयलिङ्गमूह्यम् । ननु, एककुष्ठमारभ्य विचर्चिकापर्यन्तेन द्वादशक्षुद्रकुष्ठानि भवन्ति, तत्कथमेकादश इति ? उच्यते, विचर्चिकैव पादयोर्भवन्ती विदारणयोगाद्विपादिका भवति, तेन न संख्यातिरेकः । तथा च भोजः,—"दोषाः प्रदूष्य त्वङ्मांसं पाणिपादसमाश्रिताः । पिडकां जनयन्त्याशु दाहकण्डूसमन्विताम् ॥ दाल्यते त्वक् खरा रूक्षा पाण्योर्ज्ञेया विचर्चिका । पादे विपादिका ज्ञेया स्थानान्यत्वाद्विचर्चिका"-इति गदाधरः । अन्ये त्वाहुः—सैव स्फोटैस्तीव्रदाहैरित्यभिधानेन पामैव तीव्रदाहबृहत्स्फोटयुक्ता कच्छूर्न ततो भिन्नेति ॥ १७–२२ ॥—

*खरं श्यावारुणं रूक्षं वातात्कुष्ठं सवेदनम् ॥ २३ ॥
पित्तात्प्रकथितं दाहरागस्रावान्वितं मतम् ।
कफात्क्लेदि घनं स्निग्धं सकण्डूशैत्यगौरवम् ॥ २४ ॥
द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम् ।

दोषत्रयनियतं कुष्ठलिङ्गमाह—खरं श्यावारुणमित्यादि । श्यावारुणमिति श्यावं वा अरुणं वा भवति । चरके कुष्ठमधिकृत्य दोषविशेषकुष्ठजनकहेतूनां परस्परं ज्ञाप्यज्ञापकत्वमुक्तं, यथा—"कुष्ठविशेषैर्दोषा दोषविशेषैः पुनश्च कुष्ठानि । ज्ञायन्ते ते हेतुं हेतुस्तांश्च प्रकाशयति" (च. चि. स्था. अ. ७) इति ॥ २३ ॥ २४ ॥—

†त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यं च जायते ॥ २५ ॥
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्तनम् ।
कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते ॥ २६ ॥
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः ।
तोदः स्फोटः स्थिरत्वं च कुष्ठे मांससमाश्रिते ॥ २७ ॥
कौण्यं गतिक्षयोऽङ्गानां संभेदः क्षतसर्पणम् ।
मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च ॥ २८ ॥

---

* 'सवेदनं वेदनायुक्तं, एतद्वातकुष्ठं जानीयात् । पित्ताच्च प्रकथितं शङ्कितमिव । क्लेदि छिन्नतायुक्तं, घनं निबिडम् । द्वन्द्वजे कुष्ठे द्विदोषलिङ्गं, सान्निपातिके त्रिदोषलिङ्गम्' (आ० द०) ॥ २३ ॥ २४ ॥—

† 'वैवर्ण्यमङ्गानां विवर्णता । बाहुल्यं स्थूलमण्डलता, स्फोटस्त्वचः स्फुटनं, स्थिरत्वमचलत्वम् । गतिक्षयो गमनाशक्तिः, क्षतप्रसरणम् । नासाया भङ्गोऽवदरणं, अक्षिरागो नेत्रलौ-

नासाभङ्गोऽक्षिरागश्च क्षतेषु क्रिमिसंभवः।
स्वरोपघातश्च भवेदस्थिमज्जसमाश्रिते ॥ २९ ॥
दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः।
यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितम् ॥ ३० ॥
(सु. नि. अ. ५)

इदानीमुत्तरोत्तरसप्तधातुगतकुष्ठस्य लक्षणं क्रमेणाह—त्वक्स्थे वैवर्ण्यमित्यादि। त्वक्शब्देनात्र रसोऽभिधीयते, धातुप्रस्तावात्; त्वक्शब्देन रसस्याभिधानं तात्स्थ्यात्; जेज्जटस्तु त्वचमेवाह। बाह्यायास्त्वचश्चरके उदकधरत्वेनोक्ते रसग्रहणस्यानर्हत्वाद्वितीयाऽसृग्धराऽत्रोक्ता, उदकाच्च रसो भिन्नः, तथाह्युक्तम्,—"उदकं दशाञ्जलिमितं, रसो नवाञ्जलिमितः" (च. चि. स्था. अ. ७) इति। रसं विहाय रक्तादुक्तिश्च प्रागेव रसं क्षोभीकृत्य तिर्यक्सिरागतैर्दोषैः कुष्ठजननात्, सिरासु रक्तव्यवस्थितेश्चेति तस्याशयः। साक्षाद्रस इत्यनभिधानाद्वृहत्कुष्ठं रसगतं न भवतीति नाशङ्कनीयम्। यतः सुश्रुतेनैवोक्तं,—"तेषां तु महत्त्वं सर्वधात्वनुसारित्वात्" (सु. नि. स्था. अ. ५)-इति, सर्वशब्देन च रसस्यापि ग्रहणम्। भोजेऽप्युक्तं,—"प्रदुष्टाः प्रच्युता दोषा रसासृङ्मांससंश्रिताः। कुष्ठानि जनयन्त्याशु शरीरेषु शरीरिणाम्"—इति। "त्वक्स्वावो रोमहर्षश्च स्वेदस्यातिप्रवर्तनम्" इत्येतत् केचिच्छोणितगतस्यैव लिङ्गं मन्यन्ते, अन्ये रसगतस्येति। इह रौक्ष्यं स्वेदातिप्रवृत्तिर्लोमहर्षश्च कुष्ठारम्भकदोषैः स्वेदवहस्रोतोदुष्ट्या भवति। यदुक्तं,—"स्वेदवाहिषु दुष्टेषु पारुष्यं रोमहर्षणम्। अतिस्वेदनमस्वेदः परिदाहश्च जायते"—इति। विपूयक इति विशेषेण पूययोगित्वम्। कौण्यं करभङ्गः। अङ्गानां संभेद इति अङ्गानां भङ्गः। प्रागुक्तानि तथैव चेति रसरक्तमांसधातुगतकुष्ठलिङ्गानीत्यर्थः; एतच्चैकत्राभिहितमपि क्रमेण परापरधातुदुष्टौ पूर्वपूर्वधातुदुष्टिलिङ्गख्यापनपरं, न्यायस्य समानत्वात्। यदुच्यते,—"समानेष्वर्थेष्वेकत्राभिहितो विधिरन्यत्राप्यासंजनीयः"—इति। शुक्रगतकुष्ठलिङ्गमाह—दम्पत्योरित्यादि। कुष्ठं शुक्रगतमपत्येन व्यज्यत इत्यर्थः। अत्र शुक्रदुष्टिलक्षणप्रस्तावेन तत्तुल्यकार्या स्त्रीगताऽऽर्तवदुष्टिरप्युक्ता। तदपीत्यपिशब्दात् पूर्वोक्तान्यपि रसादिमज्जान्तर्गतकुष्ठलिङ्गानि भवन्ति। कुष्ठितमिति संजातं कुष्ठमस्येति तारकादित्वादितच्। अत्र दुष्टं शुक्रमार्तवं वा सर्वथा बीजत्वानुपघातादपत्यजनकं, परंतु विकृतं जनयतीति द्रष्टव्यम् ॥ २५–३० ॥

*साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत्।
मेदसि द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम् ॥ ३१ ॥
(सु. नि. अ. ५)

हित्यं, क्षतेषु कृमिसंभूतिः, स्वरहानिश्च। दम्पत्योः स्त्रीपुरुषयोः, कुष्ठबाहुल्यात् शुक्रार्तवयोर्दुष्टिः; अल्पे कुष्ठिलमिति पठन्ति, तत्रापि स एवार्थः' (आ० द०) ॥ २५–३० ॥

* 'त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत्तत् साध्यं, वातश्लेष्माधिकं च यदिति चमैक'

क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम् ।
प्रभिन्नं प्रस्रुताङ्गं च रक्तनेत्रं हतस्वरम् ॥ ३२ ॥
पञ्चकर्मगुणातीतं कुष्ठं हन्तीह मानवम् ।
(सु. सू. अ. ३३)

साध्यादिभेदमाह—साध्यं त्वग्रक्तमांसस्थमित्यादि । वातश्लेष्माधिकं च यदिति एककुष्ठकिटिभादिवर्ज्यम् । मज्जास्थिसंश्रितमिति अत्र मज्जास्थिप्रत्यासत्त्या शुक्रगतस्याप्यसाध्यत्वं बोद्धव्यम् । प्रभिन्नमिति विदीर्णम् । पञ्चकर्मगुणातीतमिति पूर्वरूपक्रियया सह रसादिधातूनां चतुर्णां क्रियाकलापाः पञ्चकर्माणि, तेषां गुणा वीर्याणि, तान्यतीतो यः स तथा, अस्थिमज्जागत इत्यर्थः, ताश्च क्रियाः पूर्वरूपे शोधनमुभयतः; त्वक्प्राप्ते शोधनालेपनादि, रक्तप्राप्ते शोधनालेपनकषायपानशोणितावसेकादि, एवं मांसमेदसोऽपि द्रष्टव्यमिति । अथवा पञ्चकर्माणि वमनादीनि तेषां गुणाः फलानि, तान्यतीतः ॥ ३१ ॥ ३२ ॥—

*वातेन कुष्ठं कापालं पित्तेनौदुम्बरं कफात् ॥ ३३ ॥
मण्डलाख्यं विचर्ची च ऋष्याख्यं वातपित्तजम् ।
चर्मैककुष्ठं किटिभं सिध्मालसविपादिकाः ॥ ३४ ॥
वातश्लेष्मोद्भवाः श्लेष्मपित्ताद्दद्रुशतारुषी ।
पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा ॥ ३५ ॥
सर्वैः स्यात्काकणं पूर्वत्रिकं दद्रु सकाकणम् ।
पुण्डरीकर्ष्यजिह्वे च महाकुष्ठानि सप्त तु ॥ ३६ ॥

कुष्ठेषु चिकित्सार्थं प्रधानं दोषमाह—वातेन कुष्ठं कापालमित्यादि । विचर्च्यपि कफात्तथेति श्लेष्मपित्तात्, तेन दद्रुप्रभृति चर्मदलान्तं श्लेष्मपित्तजमित्यर्थः । पूर्वत्रिकमिति कापालोदुम्बरमण्डलाख्यं, अतः सप्तमहाकुष्ठादन्यत् क्षुद्रकुष्ठम् ॥ ३३—३६ ॥

कुष्ठकिटिभसिध्मालसविपादिका वातश्लेष्मजाः साध्याः, मेदोगतं द्वन्द्वजं याप्यं, अस्थिमज्जासंश्रयं वर्ज्यम् । प्रभिन्नं विदीर्णं, प्रस्रुताङ्गं प्रस्रावयुक्तशरीरं, हतस्वरं घर्घरस्वरं; पञ्चकर्मगुणातीतं पञ्चकर्माणि वमनादीनि तेषां गुणाः फलानि, तानि निष्फलीकृत्य जातम्' (आ० द०) ॥ ३१ ॥ ३२ ॥—

* 'दद्रुशतारुषी द्वे कुष्ठे न केवलं श्लेष्मपित्तात्, यावत्पुण्डरीकं तथा विस्फोटं तथा पामा तथा चर्मदलं जायते, तथेति श्लेष्मपित्तात्; तेन दद्रुप्रभृति चर्मदलान्तं श्लेष्मपित्ताधिकसन्निपातजमित्यर्थः । सर्वैरिति सर्वैस्त्रिभिरेव समैर्दोषैः काकणं नाम कुष्ठमुत्पद्यते । एतान्यष्टादश कुष्ठानि भवन्ति' (आ० द०) ॥ ३३ ॥ ३६ ॥

---

१ यदुक्तं—कुष्ठेषु चैव सर्वेषु पंचकर्माणि कारयेत् । पक्षे पक्षे च वमनं मासि मासि विरेचनं ॥ षण्मासेन शिरामोक्षो नस्य सप्तदिनांतरमिति इति क. ।

*कुष्ठैकसंभवं श्वित्रं किलासं वारुणं भवेत् ।
निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥ ३७ ॥
वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥ ३८ ॥
सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥ ३९ ॥
(वा. नि. अ. १४)

त्वग्दुष्टितुल्यत्वादत्रैव किलासमाह—कुष्ठैकसंभवमित्यादि । कुष्ठेन सह एकं समानं विरुद्धाशनपापकर्मादि संभवो निदानं यस्य तत्तथा, कुष्ठेन सह समानचिकित्सितत्वं च बोद्धव्यं, "कुर्याच्चास्मै कुष्ठोक्तं विधानम्" इति वचनात् । **चरके** त्वस्य हेतुविशेषोऽपि पठ्यते, यथा;—"वचांस्यतथ्यानि कृतघ्नभावो निन्दा गुरूणां गुरुधर्षणं च । पापक्रिया पूर्वकृतं च कर्म हेतुः किलासस्य विरोधि चान्नम्" (च. चि. स्था. अ. ७)—इति । किलासमेव मांसमेदःसमाश्रयणयोगित्वादरुणं श्वित्रं च भण्यते, त्वग्गतमेव किलासं, तस्य लक्षणं निर्दिष्टमपरिस्रावीति । स्रावो हि रक्तादिदुष्ट्या भवति, तेनास्य त्वग्गतत्वेन स्रावाभावः । उक्तं च,—"त्वग्गतं च यदस्रावि तत् किलासं प्रकीर्तितम्"—इति । त्रिधातूद्भवसंश्रयमिति त्रिधातुस्त्रयो दोषास्तथा रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्तथा; अथवा त्रिधातुः रक्तमांसमेदांसि उद्भवाय संश्रयो यस्य तत्तथा, दोषास्तु सर्वसाधारणत्वाल्लभ्यन्त एव । ननु, यदि धातुत्रयाश्रितं किलासं, तत्कथं "यदा त्वचमतिक्रम्य तद्धातूनवगाहते । हित्वा किलाससंज्ञां च कुष्ठसंज्ञां लभेत्तदा"—इति विश्वामित्रवचनं किलाससंज्ञाप्रतिक्षेपकं न विरुध्यते? तथा"त्वग्गतमेव किलासं" (सु. नि. स्था. अ. ५)—इति **सुश्रुते**ऽवधारणं विरुद्धं? उच्यते, **विश्वामित्रवचनस्य** तावदयमर्थः प्रत्येतव्यः—यदोक्तरक्तादिगतसमस्तकुष्ठलक्षणजनकतया धातूनवगाहते तदा न तत् किलासं, किं तर्हि कुष्ठजनकहेत्वन्तरबृंहितदोषोपप्लवात् धातून् दूषयेत्, तथा हेतुलक्ष्यलक्षणमरुणादिकुष्ठं तत्; अन्यदितररक्तादिगतकुष्ठलिङ्गव्यतिरिक्तमुत्पादसमकालभाविरक्तताम्रादिवर्णतामात्रकारकं रक्तादिगतदोषजन्यं किलासमेव, अन्यथा रक्तादिगतकिलासलक्षणेन **चरकोक्तेन** विरोधः स्यात् । स यदाह—"दोषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते । श्वेतं मेदःश्रिते श्वित्रं गुरु तच्चोत्तरोत्तरम् (च. चि. अ. ७)"—इति । **चरके** हि किलासस्यैव धातुत्रयसंबन्धकृतवर्णेन दारुणादिसंज्ञान्तरमात्रं कृतं, **सुश्रुते**ऽपि त्वग्गतमेवेत्यनेन रक्तादिदुष्ट्या विशिष्टरक्तादिगतमहाकुष्ठलिङ्गरहितत्वं, तथा

---

* 'कुष्ठतुल्यनिदानमित्यर्थः । त्रिधातूद्भवसंश्रयमिति त्रिधातुशब्देन पृथग्दोषाः, त्रिधातुः संश्रयो यस्य तत्तथा, अथवा—त्रिधातुः रक्तमांसमेदांसि, तेन वातादिना पृथगुद्भव उत्पादस्तथा रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्तथा । वातादिना धातुसंश्रयभेदेन वर्णभेदमाह—वातादित्यादि । वातात् श्वित्रं रूक्षं स्पर्शतः; अरुणं रक्तं वर्णतः । पित्तादित्यादि । पित्तात् श्वित्रं कमलपत्रवत् पद्मदलमिव ताम्रं वर्णेन भवेत् । तथा सदाहं दाहयुक्तम् ।—रोमविध्वंसि रोमघाति । कफादिति कफात् श्वित्रं श्वेतं शुक्लं, घनं सान्द्रं तथा गुरु अङ्गेनानुभूयते; तथा सह कण्ड्वा वर्तत इति सकण्डु, कण्डुयुक्तम्' (आ० द०) ॥ ३७ ॥ ३९ ॥

क्षुद्रकुष्ठवद्युगपद्रक्तलसीकात्वङ्मांससंदूषकत्वविरहः ख्याप्यते; अथवा एवकारोऽयोगव्यवच्छेदे, यथा—नीलं सरोजं भवत्येवेति। उक्तप्रकारेण धातुत्रयमात्रगतत्वेनैकदोषजत्वेन चास्य कुष्ठाद्भेदः; 'श्वित्रसंज्ञां लभेत्तदा' इति जेज्जटपाठे तु श्वित्रसंज्ञामात्रव्यवहारः [1]किलासस्य, न पुनरर्थभेदः कश्चिदिति। भालुकिना तु धातुभेदेन किलासस्य संज्ञान्तरं दर्शितं,—"वारुणं तत्तु विज्ञेयं मांसधातुसमाश्रयम्। मेदःश्रितं भवेच्छ्वित्रं दारुणं रक्तसंश्रयम्"—इति। तथा चरकेऽपि,—"दारुणं वारुणं श्वित्रं किलासं नामभिस्त्रिभिः" (च. चि. स्था. अ. ७)—इति। तेनेहापि तथा बोद्धव्यम्। क्रमाद्रक्तमांसमेदःसु चादिशेद्वर्णैरेवेदमुभयमिति ईदृशमेव वर्णेनारुणं ताम्रं श्वेतं च किलासं रक्तमांसमेदःसु यथाक्रमेणादिशेत्। उभयमिति व्रणजं दोषजं च तच्छ्वित्रं भवति, तथाच भोजः— "श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथा। तत्र मिथ्योपचाराद्धि व्रणस्य व्रणजं स्मृतम्॥ दोषजं च द्विधा प्रोक्तमात्मजं परजं तथा। परसंस्कारसंस्पर्शाद्यत्तत् परजमुच्यते। तदात्मजं विजानीयाद्यद्देहेष्वनिलादिजम्"—इति। रक्तादिधातुत्रयगतस्य च किलासस्य दूष्यप्रभावादस्य कस्यापि दोषस्य संबन्धनियता एवारुणादयो वर्णा बोद्धव्याः, यदि तु तत्र दोषनियतो वर्णः कल्प्यते तदा वर्णातिदेशो व्यर्थः स्यात्, वाताद्रूक्षारुणमित्यादिनैव सिद्धत्वात्। यद्येवं दोषेणात्र वर्णाभिधानं विफलं? निर्विषयत्वात्; नैवं, त्वङ्मात्रगते किलासे दोषवर्णस्य चरितार्थत्वात्। हन्त तर्हि कथं रक्तादिगतत्वमस्य निश्चेतव्यं? त्वग्गते स्वभावेनारुणादिवर्णस्य सद्भावेन सन्दिग्धत्वात्। उच्यते, क्रमेणारुणादिवर्णोत्पादाद्रक्तादिगतत्वं निश्चेतव्यं, उत्पत्तिमात्रे त्वरुणादियोगात्त्वग्गतत्वमिति॥ ३७–३९॥

*अशुक्लरोमाऽबहुलमसंश्लिष्टमथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा॥ ४०॥
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्
वर्जनीयं विशेषेण किलासं सिद्धिमिच्छता॥ ४१॥
(वा. नि. अ. १४)

तस्य साध्यत्वमसाध्यत्वं चाह—अशुक्लेत्यादि। अशुक्लरोम कृष्णरोम, अबहुलं तनु, असंश्लिष्टं परस्परमसंयुक्तम्। अनग्निदग्धजं अग्निदग्धजं यत्र भवति, एतत् साध्यम्। अतोऽन्यथा अतोऽन्यथोक्तसर्वप्रकारमसाध्यं, चरकेऽप्येवंविधस्यासाध्यत्वमुक्तम्। यथा,—"यच्छुक्लरोम बहुलं यत् संलग्नं परस्परम्[2]। यच्च वर्षगणोपेतं तच्छ्वित्रं नैव सिध्यति' (च. चि. स्था. अ. ७)—इति। गुह्यपाणितलौष्ठेष्विति तलमत्र पादतलं सुश्रुते "अन्ते जातं" इति सामान्येन निर्देशात्॥ ४०॥ ४१॥

प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात्।
एकशय्यासनाच्चैव वस्त्रमाल्यानुलेपनात्॥ ४२॥

---

* 'अशुक्लरोम यावन्न रोमाणि शुक्लानि भवन्ति, असाध्यमाह—गुह्येत्यादि। एषु स्थानेष्वनवमपि त्याज्यम्। गुह्यं लिङ्गम्' (आ० द०)॥ ४०॥ ४१॥

---

२ 'यत्परस्परतोऽभिन्नं बहु यद्रक्तलोमवत्' इति वर्तमानचरकप्रतिषु पाठः।

कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च ।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् ॥ ४३ ॥
(सु. नि. अ. ५)

इति श्रीमाधवकरविरचिते माधवनिदाने कुष्ठनिदानं समाप्तम् ॥ ४९ ॥

कुष्ठस्य संसर्गजप्रसङ्गेन सर्वानेव संसर्गजान् रोगानाह–प्रसङ्गादित्यादि । प्रसङ्गो मैथुनं, अथवा प्रसङ्गः सातत्यं, तेन कृतात् गात्रसंस्पर्शादेः । औपसर्गिकरोगा इति औपसर्गिकाः पापरोगादयो भूतोपसर्गजाश्च । संक्रामन्ति आविशन्ति । रोगसंक्रान्तिश्च कुष्ठिप्रभृतिपापिजनसंसर्गेण पापसंक्रान्तेर्विकारप्रभावाद्वा बोद्धव्या ॥ ४२ ॥ ४३ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां कुष्ठनिदानं समाप्तम् ॥ ४९ ॥

अथ शीतपित्तोदर्दकोठनिदानम् ।

शीतमारुतसंस्पर्शात्प्रदुष्टौ कफमारुतौ ।
पित्तेन सह संभूय वहिरन्तर्विसर्पतः ॥ १ ॥

त्वग्दुष्टिदोषत्रयजन्यत्वसामान्यात् कुष्ठानन्तरं शीतपित्तोदर्दादिनिदानम् । तस्य दोषत्रयजन्यत्वमाह–शीतमारुतसंस्पर्शादित्यादि । पित्तेन सह संभूयेति स्वहेतूपचितेन पित्तेन संभूय मिलित्वा । वहिरन्तरिति वहिस्त्वचि, अन्तः शोणितादौ, विसर्पतः प्रसरतः ॥ १ ॥

पिपासारुचिहृल्लासदेहसादाङ्गगौरवम् ।
रक्तलोचनता तेषां पूर्वरूपस्य लक्षणम् ॥ २ ॥

पूर्वरूपमाह—पिपासेत्यादि । रक्तलोचनता प्रभावात् । पूर्वरूपस्य लक्षणमिति पूर्वरूपस्य स्वरूपमित्यर्थः; न तु लक्षणमत्र लिङ्गं, पिपासादिव्यतिरिक्तस्य पूर्वरूपस्याभावात् ॥ २ ॥

*वरटीदष्टसंस्थानः शोथः संजायते वहिः ।
सकण्डूस्तोदवहुलश्छर्दिज्वरविदाहवान् ॥ ३ ॥
उदर्दमिति तं विद्याच्छीतपित्तमथापरे ।
वाताधिकं शीतपित्तमुदर्दस्तु कफाधिकः ॥ ४ ॥

उदर्दलक्षणमाह—वरटीत्यादि । सकण्डूस्तोदवहुलश्छर्दिज्वरविदाहवानिति अत्र कण्डूः कफात्, तोदो वातात्, छर्दिज्वरविदाहाः पित्तादिति दोषत्रयलिङ्गम् । अनयोः शीतपित्तोदर्दयोः समानसंस्थानत्वेऽपि वाताधिकं शीतपित्तं, कफाधिक* उदर्दः ॥ ३ ॥ ४ ॥

* 'वरटी कीटविशेषः, तद्दष्टसदृशाकारः, वहिःशरीरे शोथो जायते' (आ० द०) ॥३॥४॥

१ 'औपसर्गिकरोगाः शीतलिकादयः' इति डल्हणः ।

सोत्सङ्गैश्च सरागैश्च कण्डूमद्भिश्च मण्डलैः ।
शैशिरः कफजो व्याधिरुदर्द इति कीर्तितः ॥ ५ ॥

उदर्दस्य धर्मान्तरमाह—सोत्सङ्गैरित्यादि । उत्सङ्गैर्मध्यनिम्नैः. शैशिर इति शिशिरसंभवः ॥ ५ ॥

*असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते ॥ ६ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने शीतपित्तोदर्दकोठनिदानं समाप्तम् ।

त्वग्दुष्टिसाम्यादत्रैव कोठोऽभिधीयते—असम्यग्वमनेत्यादि । असम्यक्त्वं वमनस्यायोगमिथ्यायोगादिना, तथोदीर्णानां पित्तश्लेष्मान्नानां निग्रहो वेगविधारणं, तैर्मण्डलानि जायन्ते, स कोठः; अथवाऽयमर्थः,—असम्यग्वमनोदीर्णौ पित्तश्लेष्माणौ, तथाऽन्ननिग्रह उपस्थितवेगस्यान्नस्य निग्रहश्छर्दिनिग्रह इति यावत्, तैर्हेतुभिर्भवन्ति । वमनस्य चासम्यक्त्वमयोगमिथ्यायोगाभ्यां ज्ञेयं, अतियोगस्य तु पित्तश्लेष्मकोठाकरत्वात् । एतेन हेतुलक्षणभेदाद्भिन्नः कोठ उदर्दात् । कोठो निरनुबन्धः । तथा चोक्तं,—"क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः"—इति । सानुबन्ध उत्कोठोऽभिधीयते । सानुबन्धता च पुनःपुनर्भवनेन ॥ ६ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शीतपित्तोदर्दकोठनिदानं समाप्तम् ॥५०॥

अथाम्लपित्तनिदानम् ।

विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम् ।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥ १ ॥

कोठहेतौ पित्तश्लेष्मोल्लेखात् पित्तश्लेष्ममिलितरूपस्याम्लपित्तस्य निदानम् । निदानपूर्वकमम्लपित्तस्य स्वरूपमाह—विरुद्धेत्यादि । विरुद्धं क्षीरमत्स्यादि, दुष्टं व्यापन्नमन्नं, विदाहिस्थाने विदग्धेति पाठान्तरे विदग्धं भर्जितं; पित्तप्रकोपिपानान्नभुज इति पित्तप्रकोपि पानं तक्रसुरादि, अन्नमाशुधान्यमाषादि; पित्तप्रकोपिपानान्नग्रहणेनैवाम्लविदाहिनो ग्रहणे सिद्धे तदभिधानं विशेषार्थं, 'पित्तप्रकोपणाद्यन्नभुज' इति पाठान्तरे आदिशब्दात् कफादिप्रकोपणमन्नं गृह्यते । एवंविधपानान्नमुपभुञ्जानस्य विदग्धं कुपितं, स्वहेतूपचितं पुरा यदिति वर्षासु जलौषधिगतविदाहादिभिः स्वहेतुभिरुपचितं संचयमापन्नम् । यदुक्तं,—"वर्षास्वम्लविपाकिलादद्भिरौषधिभिस्तथा" (च. चि. स्था. अ. ३)—इति । विदाहाद्यम्लगुणोद्रिक्तं पित्तमम्लपित्तम् ॥ १ ॥

---

* 'उदीर्णानि प्रेरितानि पित्तश्लेष्मान्नानि, तेषां निग्रहैः शरीरे मण्डलानि वर्तुलकमलादीन्यतिकण्डूमन्ति लौहित्ययुक्तानि बहूनि च जायन्ते' (आ० द०) ॥ ६ ॥

अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः।
हृत्कण्ठदाहारुचिभिश्चाम्लपित्तं वदेद्भिषक् ॥ २ ॥

तस्य लिङ्गमाह—अविपाकेत्यादि। अविपाक इत्याहारापाकः, क्लमोऽनायासजः श्रमः। अम्लपित्ते पित्तं प्रधानं, वातकफावप्यत्रानुगौ गौरवोद्गारकम्पादिना ज्ञेयौ ॥२॥

*तृड्दाहमूर्च्छाभ्रममोहकारि प्रयात्यधो वा विविधप्रकारम्।
हृल्लासकोठानलसादहर्षस्वेदाङ्गपीतत्वकरं कदाचित् ॥ ३ ॥

तस्य कदाचिदधऊर्ध्वगमनमेदाद्वि(द्वि)विधस्याधोगतिं तावदाह—तृड्दाहेत्यादि। मूर्च्छा सर्वथा ज्ञानशून्यत्वं, मोहो विपरीतज्ञानम्। प्रयात्यधो वेत्यत्र वाशब्दो भाव्यूर्ध्वगमनापेक्षया। विविधप्रकारमिति हरित्पीतकृष्णरक्तादिबहुवर्णत्वदुर्गन्धित्वयोगान्नानाविधम्। कदाचिदिति न सर्वकालम् ॥ ३ ॥

†वान्तं हरित्पीतकनीलकृष्णमारक्तरक्ताभमतीव चाम्लम्।
मांसोदकाभं त्वतिपिच्छिलाच्छं श्लेष्मानुजातं विविधं रसेन ॥४॥
भुक्ते विदग्धे त्वथवाऽप्यभुक्ते करोति तिक्ताम्लवमिं कदाचित्।
उद्गारमेवंविधमेव कण्ठहृत्कुक्षिदाहं शिरसो रुजं च ॥ ५ ॥
करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तम्।
जनयति कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयम् ॥ ६ ॥

ऊर्ध्वगतिमाह—वान्तमित्यादि। नीलं स्निग्धकृष्णं, कृष्णं मर्दनाञ्जनवद्रूक्षकृष्णं, आरक्तमीषल्लोहितं, रक्तमन्तर्लोहितम्। मांसोदकाभमिति मांसधावनतोयाभं कृष्णलोहितमित्यर्थः। विविधं रसेनेति रसेन लवणकटुतिक्ताख्येन नानारूपम्। करोति तिक्ताम्लवमिमिति तिक्तस्य अम्लस्य वा वमिं वान्तिं करोति। उद्गारमेवंविधमेवेति अत्र करोतीति संबध्यते, एवंविधमिति अम्लतिक्तम्। कण्ठहृत्कुक्षिदाहं शिरसो रुजं चेति अत्रापि करोतीति संबध्यते करचरणेत्यादि कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयमिति कण्ड्वादिनिचितगात्रं च रोगचयं चेति द्वन्द्वः, तेन कण्ड्वादिनिचितगात्रं रोगचयं च करोतीत्यर्थः, रोगचयोऽविपाकोत्क्लेशादिः ॥ ४–६ ॥

‡रोगोऽयमम्लपित्ताख्यो यत्नात् संसाध्यते नवः।
चिरोत्थितो भवेद्याप्यः कृच्छ्रसाध्यः स कस्यचित् ॥ ७ ॥

साध्यत्वादिकमाह—रोग इत्यादि। कृच्छ्रसाध्यः स कस्यचिदिति हिताहाराचारशीलिनः कस्यचिच्चिरोत्थितोऽपि कृच्छ्रसाध्यः ॥ ७ ॥

* 'अधोविविधप्रकारं कदाचित्प्रयाति, तथा तृड्दाहादिकारि, तथा हृल्लासादिकरं' (आ० द०) ॥ ३ ॥

† 'हरितशाकपत्राभं, नीलं चाषपक्षप्रभं, कृष्णमञ्जनाभं, रक्तमलक्तलोहितं, अच्छं निर्मलम्। भुक्ते आहारे विदग्धे अथवा कदाचिदभुक्तेऽपि सति तिक्ताम्लवमिं करोतीति संबध्यते। अम्लपित्ते कफपित्तवत्सामान्यमाह—करेत्यादि। कफपित्तं करचरणदाहादिकं जनयति' (आ० द०) ॥ ४–६ ॥

‡ अयमम्लपित्ताख्यो रोगो नवः सन् यत्नात्संसाध्यते, चिरोत्थितो याप्यो भवेद्' (आ० द०) ॥ ७ ॥

*सानिलं सानिलकफं सकफं तच्च लक्षयेत्।
दोषलिङ्गेन मतिमान् भिषङ्मोहकरं हि तत्॥ ८॥
कम्पप्रलापमूर्च्छाचिमिचिमिगात्रावसादशूलानि।
तमसो दर्शनविभ्रमविमोहहर्षाण्यनिलकोपात्॥ ९॥
कफनिष्ठीवनगौरवजडतारुचिशीतसादवमिलेपाः।
दहनबलसादकण्डूनिद्राश्चिह्नं कफानुगते॥ १०॥
उभयमिदमेव चिह्नं मारुतकफसंभवे भवत्यम्ले।
(तिक्ताम्लकटुकोद्गारहृत्कुक्षिकण्ठदाहकृत्॥ ११॥)
भ्रमो मूर्च्छारुचिश्छर्दिरालस्यं च शिरोरुजा।
प्रसेको मुखमाधुर्यं श्लेष्मपित्तस्य लक्षणम्॥ १२॥

इति श्रीमाधवकरविरचिते माधवनिदानेऽम्लपित्तनिदानं समाप्तम्॥ ५१॥

तत्रैव केवलानिलकफानिलकफमात्राणां संसर्गमाह—सानिलमित्यादि। भिषङ्मोहकरमिति तस्योर्ध्वाधःप्रवर्तमानत्वेन छर्द्यतीसाराभ्यां सकाशाद्भेदस्य दुर्ज्ञेयत्वाद्वैद्यमोहकरत्वम्। कफेत्यादि सादवमिलेपा इत्यत्र सादोऽङ्गसादः, लेपः श्लेष्मलिप्तास्यता। दहनबलसादेति सादशब्दो दहनबलाभ्यां संबध्यते॥ ८–१२॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायामम्लपित्तनिदानं समाप्तम्॥ ५१॥

अथ विसर्पनिदानम्।

†लवणाम्लकटूष्णादिसंसेवाद्दोषकोपतः।
विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्॥ १॥
पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः॥ २॥
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः।
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः॥ ३॥
यस्तु कर्दमको घोरः स पित्तकफसंभवः।

(च. चि. अ. ११)

* 'तच्चाम्लपित्तं सानिलं सवातं, सानिलकफं सवातकफं लक्षयेत्। दोषलिङ्गेन वातपित्तकफलिङ्गेनेत्यर्थः। यतस्तद्भिषङ्मोहकरं वैद्यभ्रान्तिजनकम्। सानिलस्याम्लपित्तस्य लक्षणमाह—कम्पेत्यादि। वातयुतेऽम्ले कम्पादयस्तथा तमोदर्शनादयो भवन्ति। कफानुगतस्य लक्षणमाह—कफेत्यादि। कफानुगतेऽम्ले कफनिष्ठीवनादिलिङ्गं स्यात्' (आ० द०)॥ ८–१२॥

† 'लवणादिभिर्विसर्पो रोगो भवति, स सप्तधा ज्ञेयः। संख्यासंप्राप्तिमाह—पृथगुत्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रय इत्यादि। सुगमम्' (आ० द०)॥ १–२॥—

१ "विभ्रमहर्षणमोहाश्च वातयुते" इति पाठाभिप्रायेण।

अम्लपित्तसंभवच्छर्देर्वेगविधारणाद्रक्तदुष्टौ सत्यां विसर्पोत्पत्तेर्हेतुसाम्यात्तदनन्तरं विसर्पनिदानम्। छर्दिवेगविघातस्य रक्तदूषकत्वे चरकवचनं यथा,–"छर्दिवेगप्रतीघातात् काले चानवसेचनात्। शरत्कालप्रभावाच्च शोणितं संप्रदुष्यति"–(च. सू. स्था. अ. २४) इति। तस्य निदानपूर्विकां संख्यां निरुक्तिं चाह—लवणाम्लेत्यादि। 'विसर्पो न ह्यसंसृष्टो रक्तपित्तेन लक्ष्यते'–इति वचनात् लवणाम्लादिकं विशेषेण रक्तपित्तनिदानमुक्तम्। संसेवया सततसेवया दोषकोपः संसेवाद्दोषकोपस्ततः। अत्र, आदिग्रहणाच्चरकोक्तानां हरितशाकशिण्डाकीप्रभृतीनां ग्रहणम्। सप्तधेति उल्बणैकैकदोषजास्त्रयः, सन्निपातज एकः, त्रयो द्वन्द्वजाः, इति सप्तप्रकारत्वमुक्तम्। सर्वतः परिसर्पणादिति सर्वतः परिसर्पणात् परिसर्पः, विविधं सर्पणाद्विसर्पः। यदुक्तं **चरके**,–"विविधं सर्पति यतो विसर्पस्तेन स स्मृतः। परिसर्पोऽथवा नाम्ना सर्वतः परिसर्पणात्"–(च. चि. स्था. अ. २१) इति ॥ १–३ ॥—

***रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः ॥ ४ ॥**
विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः।
(च. चि. अ. ११)

तत्र वातात् स वीसर्पो वातज्वरसमव्यथः ॥ ५ ॥
शोथस्फुरणनिस्तोदभेदायासार्तिहर्षवान्।
पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥ ६ ॥
कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक्।
सन्निपातसमुत्थश्च सर्वलिङ्गसमन्वितः ॥ ७ ॥
(वा. नि. अ. १३)

सर्वेषामेव रक्तादिदूष्यचतुष्टयदोषत्रयजन्यत्वमाह–रक्तमित्यादि। विसर्पस्य समानसामग्रीकत्वेऽपि कुष्ठाद्भेदः कुष्ठाध्याये एव निरूपितः। दोषशब्देनैव वातादिग्रहणे सिद्धे मला इति यत् कृतं, तदन्वर्थबुद्ध्या शरीरमलिनीकरणत्वं दोषाणां प्रतिपादयितुम्। सन्निपातजेऽसाध्यत्वमपि "सर्वात्मकः क्षतकृतश्च न सिद्धिमेति" (सु. नि. स्था. अ. १०)–इति वचनात्। तेन विकृतिविषमसमवेतत्वमस्य। **चरके** त्वन्तर्जबहिर्जभेदेन विसर्पः पठितः। यदाह,–"मर्मोपघातात् संमोहादयनानां विघट्टनात्। तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात्॥ विद्याद्विसर्पमन्तर्जमाशु चाग्निबलक्षयात्। अतो विपर्ययाद्बाह्यमन्यं विद्यात् स्वलक्षणैः" (च. चि. स्था. अ. २१) इति ॥४–७॥

* 'लसीका जलं, त्वक्शब्देनात्र रसस्य सप्तधातुषु कृतत्वात्। वातजं विसर्पमाह–तत्रेत्यादि। वातज्वरसमव्यथ इति 'वेपथुर्विषमो वेगः' इत्यादिकः। निस्तोदः शूलेन तुद्यत इव, भेदो विदीर्यत इव, अर्तिः पीडा, आयामो विस्तारवान्, हर्षो रोमहर्षः। पैत्तिकमाह—पित्तादित्यादि। द्रुतगतिः शीघ्रगतिः। पित्तज्वरलिङ्गं इति "वेगस्तीक्ष्णोऽतिसारः" इत्यादिकः। अतिलोहितोऽतिरक्तः। कफजमाह–कफादित्यादि। कफज्वरसमानरुगिति "स्तैमित्यं स्तिमितो वेगः" इत्यादिकः। सान्निपातिकमाह–सन्निपातेत्यादि। सर्वदोषलक्षणैर्युक्त इत्यर्थः (आ० द०)॥४–७॥

१ "वा वातसेवनात्" इति क.। २ "भेदार्त्यायामहर्षवान्" इति पाठाभिप्रायेण।

*वातपित्ताज्ज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमैः।
ग्रन्थिभेदाग्निसदनतमकारोचकैर्युतः ॥ ८ ॥
करोति सर्वमङ्गं च दीप्ताङ्गारावकीर्णवत्।
यं यं देशं विसर्पश्च विसर्पति भवेत् स सः ॥ ९ ॥
शान्ताङ्गारासितो नीलो रक्तो वाऽऽशु च चीयते।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद्द्रुतं स च ॥ १० ॥
मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः।
व्यथतेऽङ्गं हरेत्संज्ञां निद्रां च श्वासमीरयेत् ॥ ११ ॥
हिक्कां च स गतोऽवस्थामीदृशीं लभते न ना।
क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु ॥ १२ ॥
चेष्टमानस्ततः[१] क्लिष्टो मनोदेहप्रमोहवान्[२]।
दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥ १३ ॥
(वा. नि. अ. १३)

आग्नेयविसर्पमाह,—वातपित्तादित्यादि। दीप्ताङ्गारावकीर्णवदिति ज्वलदङ्गारेणैव व्याप्तमङ्गं मन्यते। शान्ताङ्गारासित इति निर्वाणाङ्गारवत् कृष्णवर्णः स देशो भवति। नीलो रक्तो वेति स देशः स्निग्धनीलो रक्तो वा भवति। अग्निदग्ध इवेति अग्निदग्धदेश इव। शीघ्रगत्वादिति शीघ्रकारित्वात्। मर्मानुसारी हृदयाद्यनुसारी। व्यथतेऽङ्गमित्यत्रान्तर्भावितो ण्यर्थः, तेन व्यथयतीत्यर्थः। निद्रां चेत्यत्र हरेदिति संबध्यते। शर्म सुखम्। दुष्प्रबोधोऽश्नुते निद्रामिति निद्रां मरणरूपां प्राप्नोति ॥ ८–१३ ॥

†कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम्।
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्नायुमांसगम् ॥ १४ ॥
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम्।
ग्रन्थीनां कुरुते मालां सरक्तां तीव्ररुग्ज्वराम् ॥ १५ ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः।
(वा. नि. अ. १३)
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युताम् ॥ १६ ॥
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः। (वा. नि. अ. १२)

* 'वातपित्तजोऽयं ज्ञेयः। ज्वरादिभिरुपद्रवैर्युतः। नीलः चाषपक्षिवद्वा रक्तो वा स देशो भवति। अग्निदग्ध इवेति आशु शीघ्रमग्निदग्ध इव स्फोटैरुपचीयते वृद्धिं नीयते, द्रुतं शीघ्रं, सविसर्पः। अतीव बलवान् वातो निद्रां संज्ञां च हरेन्नाशयेत्, श्वासं हिक्कां च ईरयेत् प्रकोपयेत्। ईदृशीमवस्थां गतो ना पुरुषः, क्वचिच्छर्म सुखं न प्राप्नोति, केषु भूमिशय्यासनादिषु, स्वत आत्मनैव, क्लिष्टः पीडितः, चेष्टमानो विद्रुतां चेष्टां कुर्यात्, दुःखप्रबोधो मनोदेहप्रमोहवां निद्रां मरणरूपां, अश्नुते प्राप्नोति' (आ० द०) ॥ ८–१३ ॥

† 'कफं भित्त्वा विदार्य, वृद्धरक्तस्य मनुष्यस्य। त्वक्सिरास्नायुमांसगमिति रक्तविशेषणम्। अणु सूक्ष्मं, स्थूलमसूक्ष्मम्' (आ० द०) ॥ १४–१६ ॥—

१ "ततः" इत्यत्र "स्वतः" इति पाठाभिप्रायेण। २ "मनोदेहप्रमोहवान्" इति पाठाभिप्रायेण।

ग्रन्थिविसर्पमाह—कफेन रुद्ध इत्यादि। कफेनेति स्वहेतुकुपितेन, पवनः स्वहेतुकुपितः, तेन कफमारुतजत्वमस्योपपन्नं भवति। भित्त्वा तं बहुधा कफमिति कफं विस्तार्य। रक्तं वेति दूषयित्वेत्यनेन वक्ष्यमाणेन संबध्यते। दीर्घाणुवृत्तस्थूलखरात्मनामिति वृत्तं वर्तुलं, स्थूलमुच्छूनं, खरं कठिनं, एवंरूपाणां ग्रन्थीनां मालां करोति, अयं च ग्रन्थिविसर्पः सुश्रुतेऽपचीसंज्ञया पठ्यते ॥ १४–१६ ॥—

*कफपित्ताज्ज्वरः स्तम्भो निद्रा तन्द्रा शिरोरुजा ॥ १७ ॥
अङ्गावसादविक्षेपौ प्रलेपारोचकभ्रमाः।
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ॥ १८ ॥
आमोपवेशनं लेपः स्रोतसां स च सर्पति।
प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् ॥ १९ ॥
पिडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः।
स्निग्धोऽसितो मेचकाभो मलिनः शोथवान् गुरुः ॥ २० ॥
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते।
(वा. नि. अ. १२)
पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः ॥ २१ ॥
(वा. नि. अ. १३)
शवगन्धी च वीसर्पः कर्दमाख्यमुशन्ति तम्।

कर्दमविसर्पमाह,—कफपित्तादित्यादि। स्तम्भ इति गात्रस्य स्तब्धता, आमोपवेशनमामस्य वर्चसस्त्यजनम्। स च सर्पति प्रायेणामाशयं गृह्णन्नेकदेशमिति कफपित्तयोरामाशयस्थत्वात् प्रायेणामाशये भवन्नेकदेशव्यापी भवतीत्यर्थः। पिडकैरिति पिडकाभिः। मलिन इति मलदिग्धः। गम्भीरपाक इत्यन्तःपाकः, प्राज्योष्मा प्रचुरोष्मा। स्पष्टस्नायुसिरागण इति पूतिमांसगलेन स्नाय्वादीनां स्पष्टता। कर्दमाख्यमुशन्ति तमिति तं कर्दमसारूप्यात् कर्दमाख्यमिच्छन्ति ॥ १७–२१ ॥—

†बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ॥ २२ ॥
(वा. नि. अ. १३)
वीसर्पं मारुतः कुर्यात्कुलत्थसदृशैश्चितम्।
स्फोटैः शोथज्वररुजादाहाढ्यं श्यावशोणितम् ॥ २३ ॥
ज्वरातिसारौ वमथुस्त्वङ्मांसदरणं क्लमः।
(सु. नि. अ. १०)
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ॥ २४ ॥

---

* 'अङ्गावसादोऽङ्गखेदः, विक्षेपोऽङ्गानामितश्चेतश्च प्रेरणम्। इन्द्रियगौरवमिति चक्षुरादीनां गौरवम्। लेपः स्रोतसां शुषिराणां लिप्तता श्लेष्मादिना। न चातिपीडाकरः। पिडकैः पिडकाभिरवकीर्णो व्याप्तः, किंभूतैः? अतिपीतलोहितपाण्डुरैः। असितः कृष्णः, मेचकाभोऽञ्जनाभः, स्फुटस्नायुसिरागण इति पूतिमांसापगमेन स्नाय्वादीनां स्फुटता, श्यावलोहितं वर्णेन' (आ० द०) ॥ १७–२१ ॥—

† 'विसर्पोपद्रवानाह–ज्वरेत्यादि। मांसदरणं मांसविदरणम्। शेषं सुगमम्' (आ० द०) ॥ २२–२४ ॥

---

१ "स्पष्ट" इत्यत्र "स्फुट" इति पा०।

क्षतविसर्पमाह—बाह्यहेतोरित्यादि । अयं च पित्तजे विसर्पेऽन्तर्भावनीयः, तेन न संख्याधिक्यम् । तथाच भोजः,—"शस्त्रप्रहारैस्तैस्तैस्तु व्याडदन्तनखैरपि । क्षते वाऽप्यथवा भग्ने बहुदोषस्य देहिनः । रक्तं पित्तं च कुपितं व्रणमाशु प्रपद्यते । कुरुतस्ते समेते तु व्रणशोथं सुदारुणम् । आचितं तनुविस्फोटैः कृष्णैः पीतकसन्निभैः । पित्तवीसर्पवल्लिङ्गं तस्य शेषं विनिर्दिशेत्"—इति ॥ २२–२४ ॥

*सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्वात्मकः क्षतकृतश्च न सिद्धिमेति ।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च मर्मसु भवन्ति हि सर्व एव ॥ २५ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने विसर्पनिदानं समाप्तम् ॥ ५२ ॥

साध्यत्वादिकमाह—सिध्यन्तीत्यादि । पित्तात्मकोऽञ्जनवपुरिति अत्यन्तमुद्रिक्तपित्तोऽञ्जनसमवर्णतनुः, अग्निविसर्पाख्यो न साध्य इति व्याख्यानयन्ति । कृच्छ्राश्च मर्मस्विति असाध्यत्वेन कृच्छ्रत्वं बोद्धव्यम् । यदाह । भोजः,—"वर्ज्यस्तु क्षतजस्तेषां सन्निपातात्तु यो भवेत् । भिषजा जानता त्याज्याः सर्व एव तु मर्मजाः"—इति ॥२५॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विसर्पनिदानं समाप्तम् ॥ ५२ ॥

अथ विस्फोटनिदानम् ।

†कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च ।
तथर्तुदोषेण विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु ॥ १ ॥
त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च ।
घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान् ॥ २ ॥

प्रायेण दोषदूष्यचिकित्सासाम्याद्विस्फोटनिदानमाह—कट्वित्यादि । अजीर्णाध्यशनातपैश्चेति । अजीर्णादानमपक्वद्रव्यस्याशनं, अध्यशनमजीर्णे भोजनं, अथवा अजीर्ण स्वरूपतो हेतुरध्यशनं च । ऋतुदोषेणेति शीतोष्णादीनामतियोगेन । विपर्ययेणेति ऋतुविपर्ययश्च ऋतुस्वभावस्यान्यथाभावः । एभिर्हेतुभिर्यथासंभवं प्रत्येकं दोषत्रयप्रकोपो बोद्धव्यः । ज्वरपुरःसरानित्यनेन ज्वरस्य पूर्वरूपतां दर्शयति ॥ १ ॥ २ ॥

---

* 'एकैकदोषजनितास्त्रयः साध्याः, त्रिदोषजः क्षतजश्चासाध्यः' (आ० द०) ॥ २५ ॥
† 'विस्फोटकसंप्राप्तिमाह–त्वचमित्यादि' (आ० द०) ॥ १ ॥ २ ॥

---

१ "व्याळ" इति पाठान्तरम् ।

*अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः ।
क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः ॥ ३ ॥
(सु. नि. अ. १३)

शिरोरुक्शूलभूयिष्ठं ज्वरस्तृड् पर्वभेदनम् ।
सकृष्णवर्णता चेति वातविस्फोटलक्षणम् ॥ ४ ॥
ज्वरदाहरुजास्रावपाकतृष्णाभिरन्वितम् ।
पीतलोहितवर्णं च पित्तविस्फोटलक्षणम् ॥ ५ ॥
छर्द्यरोचकजाड्यानि कण्डूकाठिन्यपाण्डुताः ।
अवेदनश्चिरात्पाकी स विस्फोटः कफात्मकः ॥ ६ ॥
वातपित्तकृतो यस्तु कुरुते तीव्रवेदनाम् ।
कण्डूस्तैमित्यगुरुभिर्जानीयात्कफवातिकम् ॥ ७ ॥
कण्डूर्दाहो ज्वरश्छर्दिरेतैस्तु कफपैत्तिकः ।

विस्फोटस्वरूपमाह—अग्निदग्धनिभा इत्यादि । रक्तपित्तजा इति सर्वत्रैव विस्फोटे रक्तपित्तयोरव्यभिचारित्वं, यथा शूले वातस्य; वातानुबन्धोऽप्यत्र बोद्धव्यः । यदाह भोजः,—"यदा रक्तं च पित्तं च वातेनानुगतं त्वचि । अग्निदग्धनिभान् स्फोटान् कुरुतः सर्वदेहगान् ॥ सज्वरान् सपरीदाहान् विद्याद्विस्फोटकांस्तु तान्"— इति ॥ ३–७ ॥—

†मध्ये निम्नोन्नतोऽन्ते च कठिनोऽल्पप्रपाकवान् ॥ ८ ॥
दाहरागतृषामोहच्छर्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यः स्यात्त्रिदोषजः ॥ ९ ॥

सान्निपातिकलक्षणमाह—मध्य इत्यादि । मध्ये निम्नोन्नतोऽन्ते चेति मध्ये निम्नोऽन्ते चोन्नत इत्यर्थः । निम्नोन्नत इति प्रयोगोऽसिद्धस्यानित्यत्वेन । एवं संपूर्णलक्षणो यस्त्रिदोषजः सोऽसाध्यः ॥ ८ ॥ ९ ॥

‡रक्ता रक्तसमुत्थाना गुञ्जाविद्रुमसन्निभाः ।
वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना ॥ १० ॥
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि ।
एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ॥
सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥ ११ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने विस्फोटनिदानं समाप्तम् ॥ ५३ ॥

---

* 'सज्वरा इति ज्वरस्तेषां पूर्वरूपत्वेन ज्ञेयः । क्वचिदिति कचिच्छरीरदेशे । शूलं शरीरस्य तोदरूपं, पर्वभेदनं सन्धिस्फुटनम्' (आ० द०) ॥ ३–७ ॥

† '[१]अल्पप्रपाक इति अल्पपाकवानित्यर्थः । मोह इन्द्रियाणाम्' (आ० द०) ॥ ८ ॥ ९ ॥

‡ 'रक्ता रक्तवर्णाः, रक्तसमुत्थाना इति रक्तसमुत्थानाश्च विस्फोटा भवन्तीत्यर्थः । ते च पित्तहेतुभिः कुपितेन रक्तेन वेदितव्याः' (आ० द०) ॥ १० ॥ ११ ॥

---

१ अयमेतादृशमेव पाठं मनुते ।

रक्तजलक्षणमाह—रक्ता इत्यादि। रक्तसमुत्थाना इति लक्ष्यपदं, वेदितव्यास्तु रक्तेनेति लक्षणपदं, यथा अश्मरीहेतु तत्पूर्वमिति; अयमर्थः—रक्तसमुत्थानाश्च विस्फोटा भवन्ति ते च कथं विज्ञेया इत्यत उक्तं वेदितव्यास्तु रक्तेनेति; अथवा रक्तसमुत्थाना इति रक्तं समुत्थापयन्तीति निरुच्य रक्तच्छर्दनमभिमतमाचार्यस्य, वेदितव्यास्तु रक्तेनेति पदस्य कारणद्योतकस्याव्यवस्थानात्। घोरोऽसन्तदुःखदः। भूर्युपद्रव इति अत्र विसर्पोक्त एवोपद्रवो ज्ञेयः ॥ १० ॥ ११ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विस्फोटनिदानं समाप्तम् ॥ ५३ ॥

अथ मसूरिकानिदानम्।

कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥ १ ॥
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ॥ २ ॥
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः।
तासां पूर्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ॥ ३ ॥
त्वचि शोथः सवैवर्ण्यो नेत्ररागश्च जायते।

विस्फोटप्रभेदत्वात् प्रायेण तुल्यनिदानत्वाच्च मसूरिकानिदानम्। तस्या निदानपूर्विकां संप्राप्तिमाह—कट्वम्लेत्यादि। विरुद्धाध्यशनाशनैरिति विरुद्धैरन्नैरध्यशनैश्च, 'विरुद्धाध्यशनेन तु' इति पाठो वा। दुष्टनिष्पावशाकाद्यैरिति दुष्टं व्यापन्नमन्नं, निष्पावः शिम्बिबीजं, आद्यशब्दान्मध्वालुकादिग्रहणम्। प्रदुष्टपवनोदकैरिति विषकुसुमादिसंस्पर्शात् प्रदुष्टः पवनस्तथोदकं च तैः। क्रूरग्रहेक्षणाच्चेति शनैश्चरादयो देशक्षोभकराः क्रूरग्रहास्तेषामीक्षणात्। दुष्टरक्तेन सङ्गता इत्यनेन रक्तस्य कट्वम्लादिभिर्हेतुभिर्विशेषेण कोपं दर्शयति। अत एवोक्तं तन्त्रान्तरे—"पित्तं शोणितसंसृष्टं यदा दूषयति त्वचम्। तदा करोति पिडकाः सर्वगात्रेषु देहिनाम् ॥ मसूरमुद्गमाषाणां तुल्याः कोलोपमा अपि। मसूरिकास्तु ता ज्ञेयाः पित्तरक्ताधिका बुधैः"—इति ॥ १-३ ॥—

स्फोटाः श्यावारुणा रूक्षास्तीव्रवेदनयाऽन्विताः ॥ ४ ॥
कठिनाश्चिरपाकाश्च भवन्त्यनिलसंभवाः।
सन्ध्यस्थिपर्वणां भेदः कासः कम्पोऽरतिः क्लमः ॥ ५ ॥
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता।

वातजामाह—स्फोटा इत्यादि। चिरपाका इति विकारप्रभावात् ॥ ४ ॥ ५ ॥—

रक्ताः पीतसिताः स्फोटाः सदाहास्तीव्रवेदनाः ॥ ६ ॥
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः।
विड्भेदश्चाङ्गमर्दश्च दाहस्तृष्णाऽरुचिस्तथा ॥ ७ ॥
मुखपाकोऽक्षिरागश्च ज्वरस्तीव्रः सुदारुणः।

पित्तजामाह—रक्ता इत्यादि । ज्वरस्तीव्रः सुदारुण इति तीव्रश्चण्डवेगः, सुदारुणो बहुदुःखेनातिदुःसहः ॥ ६ ॥ ७ ॥—

रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः ॥ ८ ॥
कफप्रसेकः स्तैमित्यं शिरोरुग्गात्रगौरवम् ।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः ॥ ९ ॥
श्वेताः स्निग्धा भृशं स्थूलाः कण्डुरा मन्दवेदनाः ।
मसूरिकाः कफोत्थाश्च चिरपाकाः प्रकीर्तिताः ॥ १० ॥

रक्तजामाह—रक्तजायामित्यादि । एते विकाराः पित्तलक्षणा इति पित्तजमसूरीलक्षणत्वेन उक्ता 'रक्ताः पीतासिताः स्फोटा' इत्यादयो ये ये विकारास्ते रक्तजायां भवन्ति । अत्र कफजामनुक्त्वैव पित्तजाया अनन्तरं रक्तजाया उक्तिः पित्तलक्षणस्यातिदिष्टस्याव्यवहितत्वेन सुखग्रहणार्थं, रक्तरससमलाद्रक्तमलत्वाद्वा पित्तस्य पित्तजामभिधायास्याः कथनं, सर्वत्र कृतस्य समर्थनाय ॥ ८—१० ॥

*नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः ।
चिरपाकाः पूतिस्रावाः प्रभूताः सर्वदोषजाः ॥ ११ ॥
कण्ठरोधारुचिस्तम्भप्रलापारतिसंयुताः ।
दुश्चिकित्स्याः समुद्दिष्टाः पिडकाश्चर्मसंज्ञिताः ॥ १२ ॥

सान्निपातिकलक्षणमाह—नीला इत्यादि । चिपिटविस्तीर्णा इति चिपिटश्चिटढा इति ख्यातः, तद्वद्विस्तृताः । चर्मसंज्ञिता इति 'चर्मदल' इति ख्याताः ॥ ११ ॥ १२ ॥

†रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः ।
कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्विकाः ॥ १३ ॥

मसूरिकायाः प्रकारं रोमान्तिकामाह—रोमकूपोन्नतिसमा इत्यादि । रागिण्य इति लोहिताः, ज्वरपूर्विका इति ज्वरपूर्वरूपाः ॥ १३ ॥

‡तोयबुद्बुदसंकाशास्त्वग्गतास्तु मसूरिकाः ।
स्वल्पदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च ॥ १४ ॥
रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः ।
साध्या नात्यर्थदुष्टाश्च भिन्ना रक्तं स्रवन्ति च ॥ १५ ॥
मांसस्थाः कठिनाः स्निग्धाश्चिरपाका घनत्वचः ।
गात्रशूलतृषाकण्डूज्वरारतिसमन्विताः ॥ १६ ॥

---

* 'नीलाश्चाषपक्षप्रतिमाः । मध्ये निम्ना इत्युक्ते प्रान्तोन्नतत्वं ज्ञेयम् । प्रभूताः प्रचुराः । कण्ठरोधः कण्ठग्रहः, प्रलापोऽसम्बद्धभाषणं, दुश्चिकित्स्या असाध्याः, चर्मसंज्ञिता 'चामघांस' इति ख्याताः' (आ० द०) ॥ ११ ॥ १२ ॥

† 'रोमकूपोच्छ्रायाः' ॥ १३ ॥

‡ 'अत्यर्थं चेन्न दुष्टा तदा साध्या । अत्रापि स्वल्पदोषानुबन्धत्वेन साध्यत्वम् । मृदवो मृदुस्पर्शाः, घोरज्वरपरीता इति दारुणज्वरो यतः । संमोह इन्द्रियाणाम् । क्षुद्राः तन्व्यः,

मेदोजा मण्डलाकारा मृदवः किंचिदुन्नताः।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ॥ १७ ॥
संमोहारतिसंतापाः कश्चिदाभ्यो विनिस्तरेत्।
क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किंचिदुन्नताः ॥ १८ ॥
मज्जोत्था भृशसंमोहवेदनारतिसंयुताः।
छिन्दन्ति मर्मधामानि प्राणानाशु हरन्ति हि ॥ १९ ॥
भ्रमरेणेव विद्धानि कुर्वन्त्यस्थीनि सर्वतः ॥
पक्वाभाः पिडकाः स्निग्धाः सूक्ष्माश्चात्यर्थवेदनाः ॥ २० ॥
स्तैमित्यारतिसंमोहदाहोन्मादसमन्विताः।
शुक्रजायां मसूर्यां तु लक्षणानि भवन्ति हि ॥ २१ ॥
निर्दिष्टं केवलं चिह्नं दृश्यते न तु जीवितम्।
दोषमिश्रास्तु सप्तैता द्रष्टव्या दोषलक्षणैः ॥ २२ ॥
त्वग्गता रक्तजाश्चैव पित्तजाः श्लेष्मजास्तथा।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः ॥ २३ ॥

रसादिसप्तधातुगतमसूरिकालिङ्गमाह—तोयबुद्बुदसंकाशा इत्यादि। अत्र दुष्टदूष्यप्रभावात्तोयबुद्बुदसंकाशादीनि दोषलक्षणानि च भवन्ति, दोषमन्तरेण दूष्यदुष्टेरभावात्; अत एव वक्ष्यति,—'दोषमिश्राश्च सप्तैता द्रष्टव्या दोषलक्षणैः' इति। त्वक्शब्देनात्र रसोऽभिधीयते, धातुगतप्रस्तावात्। त्वग्गताः साध्याः, अल्पदोषसंबन्धाद्रक्तजाया अपि साध्यत्वेनाभिधानात्। मांसस्थाः कृच्छ्रसाध्याः, अत्यवगाढदोषदुष्टेः। मेदोजायां कश्चिदाभ्यो विनिस्तरेदित्यनेनात्यन्तकृच्छ्रसाध्यत्वं बोधयति, अस्थिमध्यस्थितत्वान्मज्ज्ञः। क्षुद्रा इत्यादिना अस्थिमज्जगतयोः समानं लिङ्गम्। मज्जोत्था इत्यत्र मज्जग्रहणादस्थ्नोऽपि ग्रहणं, आधारत्वात्; अत एव वक्ष्यति,—'भ्रमरेणेव विद्धानि कुर्वन्त्यस्थीनि सर्वतः'—इति। मर्मधामानीति मर्मस्थानानि। पक्वाभा इत्यादिना शुक्रजाया लिङ्गम्। दृश्यते न तु जीवितमिति गम्भीरधातुगतदोषदुष्टेः शुक्रजाया असाध्यत्वम्। अस्य न्यायस्य समानतया अस्थिमज्जगतयोरप्यसाध्यत्वं बोद्धव्यम् ॥ १४-२३ ॥

*वातजा वातपित्तोत्थाः श्लेष्मवातकृताश्च याः।
कृच्छ्रसाध्यतमास्तस्माद्यत्नादेता उपाचरेत् ॥ २४ ॥
असाध्याः संनिपातोत्थास्तासां वक्ष्यामि लक्षणम्।
प्रवालसदृशाः काश्चित् काश्चिज्जम्बूफलोपमाः ॥ २५ ॥
लोहजालसमाः काश्चिदतसीफलसंनिभाः।
आसां बहुविधा वर्णा जायन्ते दोषभेदतः ॥ २६ ॥

गात्रसमाः शरीरसमवर्णाः, चिपिटाः चिपिटाकाराः। मर्मधामानि मर्मस्थानानि हृदयादीनि। पक्वाकारा अननुपक्वाः। अन्ये 'पङ्काभाः' इति पठन्ति, तत्र कर्दमाभाः। श्लक्ष्णाः मसृणाः। धातुगतानां दोषजानामपि साध्यत्वमाह—'त्वग्गता इत्यादि' (आ० द०) ॥ १४-२३ ॥

* 'दोषदूष्यसंमूर्च्छनाद्विशेषवर्णत्वेन लक्षणमाह—प्रवालेत्यादि' (आ० द०) ॥ २४-२६ ॥

---

१ "सूक्ष्माः" इत्यत्र "श्लक्ष्णाः" इति पा०।

वातजा इत्यादि। वातजादयः सन्निपातोत्थान्ता असाध्याः। एतासां संमूर्च्छनविशेषजनितवक्ष्यमाणप्रवालादिवर्णयोगादसाध्यत्वं, तेनैतद्वर्णविरहे वातजायाश्चिकित्साविधिरप्युक्त उपपद्यत इति केचित्। अन्ये तु वातजादय एताः स्वल्पत एवासाध्याः, चिकित्सोक्तिस्तु वातजादीनां मद्यात्ययनिषेधार्थं, लिङ्गान्तरसंभवार्थं च तासां वक्ष्यामि लक्षणमित्युक्तमित्याहुः। तासामिति असाध्यवातजादीनाम्। लोहजालसमा इति जालं जालकं गुडकमिति यावत्, तद्वत्कृष्णवर्णाः। अतसीफलसंनिभा इति उमाफलवर्णतुल्यवर्णाः। अनुक्तवर्णान्तरसंग्रहार्थमाह—आसां बहुविधा इत्यादि। दोषभेदत इति वातपित्तादिदोषविशेषात्, दुष्टिविशेषादित्यन्ये॥ २४–२६॥

*कासो हिक्का प्रमेहश्च ज्वरस्तीव्रः सुदारुणः।
प्रलापश्चारतिर्मूर्च्छा तृष्णा दाहोऽतिघूर्णता॥ २७॥
मुखेन प्रस्रवेद्रक्तं तथा घ्राणेन चक्षुषा।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यत्यर्थवेदनम्॥ २८॥
मसूरिकाभिभूतस्य यस्यैतानि भिषग्वरैः।
लक्षणानि च दृश्यन्ते न दद्यादत्र भेषजम्॥ २९॥

सर्वमसूरिकायां आवस्थिकं लिङ्गमाह—कास इत्यादि। ज्वरस्तीव्रः सुदारुण इति अत्र सुदारुण इति परेण संबध्यते, तेन सुदारुणः प्रलापः। अतिघूर्णता जिह्मायनम्। तथा घ्राणेन चक्षुषेत्यत्र रक्तं स्रवेदिति संबध्यते। श्वसितीति श्वासो भवति॥ २७–२९॥

†मसूरिकाभिभूतो यो भृशं घ्राणेन निःश्वसेत्।
स भृशं त्यजति प्राणान् तृषार्तो वायुदूषितः[१]॥ ३०॥

सामान्येनासाध्यत्वमाह—मसूरिकाभिभूतो य इत्यादि। घ्राणेन निःश्वसेदिति मुखव्यतिरेकेण घ्राणेनैव निःश्वसेत्, सर्ववाक्यानामवधारणफलत्वात्॥ ३०॥

‡मसूरिकान्ते शोथः स्यात् कूर्परे मणिबन्धके।
तथांऽसफलके चापि दुश्चिकित्स्यः सुदारुणः॥ ३१॥

इति श्रीमाधवकरविरचिते माधवनिदाने मसूरिकानिदानं समाप्तम्॥ ५४॥

मसूरिकाया उपद्रवमाह—मसूरिकान्ते इत्यादि। दुश्चिकित्स्य इति दुःशब्दोऽयं निषेधे, तेनासाध्य इत्यर्थः॥ ३१॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां मसूरिकानिदानं समाप्तम्॥ ५४॥

---

* 'प्रमोह इन्द्रियाणाम्। ज्वरस्तीव्र इति तीव्रवेगः। सुदारुणो घोरः' (आ० द०)॥२७–२९॥

† 'यः प्रदूषितो मसूरिकाभिः पीडितो नरो भृशं तृषार्तो भवति, स तथाविधो नरः प्राणांस्त्यजति' (आ० द०)॥ ३०॥

‡ 'मसूरिकान्त इत्यादि। कूर्परे, जानुकूर्परे, मणिबन्धने घुटिकायां, अंसफलके पार्श्वयोरुपरि' (आ० द०)॥ ३१॥

---

१ "वा प्रदूषितः" इति पाठाभिप्रायेण।

अथ क्षुद्ररोगनिदानम् ।

*स्निग्धाः सवर्णा ग्रथिता नीरुजो मुद्गसंनिभाः ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिकाः ॥ १ ॥
(सु. नि. अ. १३)

विसर्पादीनामक्षुद्रहेतुलक्षणचिकित्सितानामभिधानेन क्षुद्रहेतुलक्षणचिकित्सितानां क्षुद्ररोगाणां पारिशेष्यात् क्षुद्ररोगनिदानम् । ननु, यदि क्षुद्रत्वमेषां हेतुलक्षणचिकित्साल्पत्वेन तर्हि अग्निरोहिणीवल्मीकादीनां त्रिदोषत्वेन हेत्वादिबाहुल्यात् कथं क्षुद्रत्वं ? नैवं, बाहुल्येन तावत्, छत्रिणो गच्छन्तीतिवत्; किंवा अवान्तरभेदविरहः क्षुद्रत्वं, येनात्र वक्तव्यानामजगल्लिकादीनां न दोषदूष्यादिकृतभूरिसंख्याभेदेन व्रणज्वरादिवन्निर्देशः, किंतु प्रत्येकं स्तोकसंख्ययाऽभिधानं तेषाम् । अन्यस्त्वाह—क्षुद्रशब्दोऽल्पे रौद्रे च वर्तते, तेन यथायोग्यं सर्वत्र व्यवस्था दृश्यते; रौद्रे क्षुद्रशब्दो यथा—"क्षुद्रा मृगा यत्र शान्ताश्चेरुरन्यैः समं मृगैः"—इति । क्षुद्राणां बालानां रोगाः क्षुद्ररोगा इति केचित् । एवमप्यजगल्लिकाहिपूतनादीनामेव परिग्रहो न त्वन्येषाम् । संक्षेपेण चतुश्चत्वारिंशद्विकारानत्र वक्तव्यान् क्रमेण दर्शयति—स्निग्धेत्यादि । भोजे तु मूषिकाकर्णमुष्ककोशफलार्शःप्रभृतयोऽधिकविकाराः पठ्यन्ते, ते च सुश्रुते विकारस्थानन्त्यादनुमता एव । बालानामिति प्रायोभावित्वादुक्तं, तेनाबालानामपि दृश्यमानाः संगच्छन्ते ॥ १ ॥

यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पिडका कफवाताभ्यां यवप्रख्येति सोच्यते ॥ २ ॥
(सु. नि. अ. १३)

यवप्रख्यमाह—यवाकारेत्यादि । यवाकारेति यववन्मध्ये स्थूला ॥ २ ॥

[1]घनामवक्त्रां पिडकामुन्नतां परिमण्डलाम् ।
अन्धालजीमल्पपूयां तां विद्यात्कफवातजाम् ॥ ३ ॥
(सु. नि. अ. १३)

अन्धालजीमाह—घनामित्यादि । अन्धालजी स्नायुगता भोजवचनादवगन्तव्या । यदुक्तं,—"श्लेष्मानिलौ श्रितौ स्नायुं पिडकां [2]परिमण्डलाम् । दुष्टौ जनयतोऽवक्त्रामल्पपूयामकण्डुराम् ॥ आमोदुम्बरसंकाशां विद्यादन्धालजीं तु ताम्"—इति ॥ ३ ॥

* 'क्षुद्ररोगाणां मसूरिकारम्भकत्वादतोऽनन्तरं क्षुद्ररोगनिदानारम्भः । क्षुद्रा लघवः, तिलकालकाभिप्रायेण; अग्निरोहिणीवल्मीकप्रभृतीनामभिप्रायेण क्षुद्रास्तीक्ष्णाः, अथवा पूर्वाचार्यपठिता पारिभाषिकीयं संज्ञा, काथपाक्यसंज्ञावत् । सवर्णा शरीरसमवर्णा, ग्रथिताकारत्वेन व्यवस्थिता । प्रायेण बालानामन्येषामप्यजगल्लिका भवति' (आ० द०) ॥ १ ॥

† 'अन्धालजी बहिर्वक्त्ररहिता, अन्तर्मुखी, स्नाय्वाश्रिता च' ॥ ३ ॥

१ अंधालजी इति क. । २ प्रायो इति क. ।

विवृतास्यां महादाहां पक्वोदुम्बरसंनिभाम् ।
विवृतामिति तां विद्यात्पित्तोत्थां परिमण्डलाम् ॥ ४ ॥
(सु. नि. अ. १३)

विवृतामाह—विवृतास्यामित्यादि । पित्तेनाधिकपाकाद्विवृतमुखतायां विवृतासंज्ञा ॥४॥

*ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छपोपमाः ।
कफानिलाभ्यां पिडका ज्ञेयाः कच्छपिका बुधैः ॥ ५ ॥
(सु. नि. अ. १३)

कच्छपिकालक्षणमाह—ग्रथिता इत्यादि । दारुणाः कठिनाः । मध्योन्नतत्वेन पर्यन्ताल्पत्वेन च कच्छपिकासंज्ञा ॥ ५ ॥

†ग्रीवांसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः ।
ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिम् ॥६॥
मुखैरनेकैः स्रुतितोदवद्भिर्विसर्पवत्सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात् ॥ ७ ॥

वल्मीकलक्षणमाह—ग्रीवांसेत्यादि । वल्मीकवदित्यनेन प्रचुरशिखरत्वेन समुच्छ्रितत्वं दूरावगाढमूलत्वं च ख्याप्यते । अत एव चिकित्सायामवगाढमूलशोधनार्थमग्निक्षाराभ्यां चिकित्सेत्युक्तम् ॥ ६—७ ॥

‡पद्मकर्णिकवन्मध्ये पिडकाभिः समाचिताम् ।
इन्द्रविद्धां तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥ ८ ॥
(सु. नि. अ. १३)

इन्द्रविद्धामाह—पद्मकर्णिकवदित्यादि । पद्मकर्णिकवन्मध्ये इति पद्मवराटवत् ॥८॥

§मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम् ।
रुजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम् ॥ ९ ॥

गर्दभिकामाह—मण्डलमित्यादि । गर्दभिका यद्यपि समानतन्त्रे न पठ्यते तथाऽपि सर्वत्र सुश्रुतेऽभिधीयते; अविगीतपाठेन व्यवस्थितैव ॥ ९ ॥

वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ॥ १० ॥

पाषाणगर्दभलक्षणमाह—वातेत्यादि । स्थिरः कठिनः, पाषाणवत् काठिन्यात् पाषाणगर्दभः लोके 'गलवद्द' इति ख्यातः ॥ १० ॥

कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम् ।
स्थिरां पनसिकां तां तु विद्याद्वातकफोत्थिताम् ॥ ११ ॥

---

* 'मध्ये उन्नतत्वेन पर्यन्ते नतत्वेन च कच्छपिकासंज्ञा' (आ० द०) ॥ ५ ॥

† 'निष्प्रत्यनीकमसाध्यम्' (आ० द०) ॥ ६ ॥ ७ ॥

‡ 'पद्मकर्णिकावन्मध्ये पिडकाभियुक्ताम्' (आ० द०) ॥ ८ ॥

§ 'वृत्तं वर्तुलम् । उत्सन्नमुन्नतम्' (आ० द०) ॥ ९ ॥

---

१ "अन्तःप्रपाकिनीम्" इति पाठान्तरम् ।

पनसिकामाह—कर्णस्येत्यादि । एषा भोजे 'समन्ततः' इति वचनात् कर्णस्य बहिरपि भवतीति केचिद्व्याचक्षते । यदुक्तं,-"कफवातौ प्रकुपितौ मांसमाश्रित्य कर्णयोः । समन्ततः परिस्तब्धां कुरुतः पिडकां स्थिराम् ॥ विषमां दाहसंयुक्तां विद्यात् पनसिकां तु ताम्"—इति । तत्तु न सम्यक्, समन्तत इत्यस्य कर्णाभ्यन्तर एवोपपन्नत्वात् । दृश्यते बाह्यरन्ध्रे शाल्ककाकारेयमिति केचित् । अस्यां वातकफजायां भोजे दाहपाठो विकृतिविषमसमवायादधिष्ठानभूतरक्तप्रभावाद्वाऽवगन्तव्यः ॥ ११ ॥

विसर्पवत्सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात्स ज्ञेयो जालगर्दभः ॥ १२ ॥

जालगर्दभलक्षणमाह—विसर्पवदित्यादि । अपाकवानिति ईषत्पाकवान्, पित्तकृतत्वेन सर्वथा पाकाभावस्यायुक्तत्वादिति चक्रः, किंतु पाकरहित एवायमुपलभ्यते । पित्तादित्युद्भूतपित्तात्, तेन भोजोक्तः पित्तोल्बणदोषत्रयजन्यत्वमस्याविरुद्धं भवति । स यदाह,-"पित्तोत्कटास्त्रयो दोषा जनयन्ति त्वगाश्रिताः । श्यावं रक्तं तनुं शोथमपाकं बहुवेदनम् ॥ विसर्पिणं सदाहं च तृष्णाज्वरसमन्वितम् । विसर्पमाहुस्तं व्याधिमपरे जालगर्दभम्"—इति । जतुकर्णस्त्वाह—"पित्ताधिकस्तत्र तीव्रदाहो रक्तपाको विसर्पज्वरकरो जालगर्दभः—"इति । अयमग्निवात इति ख्यातो विकारः ॥ १२ ॥

***पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् ।**
सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकाम् ॥ १३ ॥
बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसंभूतां कक्षामित्यभिनिर्दिशेत् ॥ १४ ॥
(सु. नि. अ. १३)

इरिवेल्लिकालक्षणमाह—पिडकामित्यादि । सर्वात्मिकां सर्वलिङ्गामिति । सर्वात्मिकां सर्वदोषजाम् । सर्वात्मिकामित्यनेनैव सर्वलिङ्गत्वे सिद्धे पुनः सर्वलिङ्गामिति वचनं विकृतिविषमसमवायारब्धलिङ्गव्यतिरेकेण प्रत्येकदोषलिङ्गयुक्ततां ख्यापयति ॥ १३॥ १४॥

एकामेतादृशीं दृष्ट्वा पिडकां स्फोटसंनिभाम् ।
त्वग्गतां पित्तकोपेन गन्धमालां प्रचक्षते ॥ १५ ॥

गन्धमालामाह—एकामित्यादि । एकामेतादृशीमिति कक्षोक्तैककृष्णस्फोटसदृशीम् ॥ १५ ॥

†कक्षभागेषु ये स्फोटा जायन्ते मांसदारणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसंनिभाः ॥ १६ ॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा हन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सर्वदोषजाम् ॥ १७ ॥

---

* 'उत्तमाङ्गस्थां शिरोगताम्' (आ० द०) ॥ १३ ॥ १४ ॥

† 'वाताधिकैः सप्ताहात्, पित्ताधिकैर्दशाहात्, कफाधिकैः पक्षादित्यूह्यम्' (आ० द०) ॥ १६ ॥ १७ ॥

अग्निरोहिणीलक्षणमाह—कक्षेत्यादि । सप्ताहाद्वा दशाहाद्वेत्यभिधानमसाध्यत्वख्यापकमनुपक्रमाद्बोद्धव्यम् । उपक्रमात् पुनरियं साध्यैव, अत एवास्याश्चिकित्साभिधानं चरकेणाप्यग्निरोहिणीं प्रत्यभिहितं,—"सन्ति ह्येवंविधा रोगाः साध्या दारुणसंमताः । ये हन्युरनुपक्रान्ता मिथ्यारम्भेण वा पुनः" (च. सू. स्था. अ. १८)—इति । तन्त्रान्तरमपि,—"पित्तरक्तोत्कटा दोषाः प्रदीप्ताङ्गारसंनिभान् । पक्षभागेषु कुर्वन्ति तीव्रदाहरुजाज्वरान् ॥ मांसावदारणान् स्फोटान् ये हन्युरनुपक्रमात् । पक्षाद्दशाहाद्वाऽथवा सा ज्ञेया बहिरोहिणी"—इति । वातपित्तकफाधिक्याद्यथाक्रमं सप्ताहादिविकल्पः ॥ १६ ॥ १७ ॥

*नखमांसमधिष्ठाय वायुः पित्तं च देहिनाम् ।
कुर्वाते दाहपाकौ च तं व्याधिं चिप्पमादिशेत् ॥ १८ ॥
तदेवाल्पतरैर्दोषैः परुषं कुनखं वदेत् ॥ १९ ॥
(सु. नि. अ. १३)

चिप्पमाह—नखेत्यादि । तं व्याधिं चिप्पमिति चिप्पमङ्गुलिवेष्टकमिति ख्यातम् । चरके त्वक्षतनामायं विकारः । यदुक्तं,—"रोगोऽक्षतश्चर्मनखान्तरे स्यान्मांसास्रदोषी भृशदाहपाकः" (च. चि. स्था. अ. १२)—इति ॥ १८ ॥ १९ ॥

†गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् ।
पादस्यानुशयीं तां तु विद्यादन्तःप्रपाकिनीम् ॥ २० ॥
(सु. नि. अ. १३)

अनुशयीलक्षणमाह—गम्भीरामित्यादि । गम्भीरामित्यन्तःपाकेन । अल्पसंरम्भामित्यल्पशोथाम् ॥ २० ॥

विदारीकन्दवद्वृत्ता कक्षावङ्क्षणसन्धिषु ।
विदारिका भवेद्रक्ता सर्वजा सर्वलक्षणा ॥ २१ ॥

विदारीलक्षणमाह—विदारीत्यादि । विदारिका भवेद्रक्ता सर्वजा सर्वलक्षणेत्यत्र केचिदसर्वजा, असर्वलक्षणेति उभयत्रापि नञः प्रयोगमिच्छन्ति, तेनासर्वजा इति सर्वदोषैः सन्निपतितैर्न भवति, असर्वलक्षणेति सन्निपातलक्षणरहितेत्यर्थः । तेन प्रत्येकदोषद्वन्द्वजत्वेन षड्विधा सन्निपातमात्रेण न भवतीति वाक्यार्थः । किंत्वयं पक्षो यद्यभिमतः स्यादाचार्यस्य, तदा व्यक्त्यर्थं 'षड्विधा ह्येकदोषजा' इति पदं कृतं स्यात् । किंच बहुप्रपञ्चत्वेन क्षुद्रत्वासङ्गतिश्च । अपरे 'असर्वजा सर्वलक्षणा' इति पठन्ति;

* 'अन्ये तु "तमेवाक्षतरोगाख्यं तथोपनखमित्यपि" इत्यधिकं ग्रन्थमधीयते । तदेव चिप्पमिति' (आ० द०) ॥ १८ ॥ १९ ॥

† कफादन्तःप्रपाकान्तां विद्यादनुशयीं भिषक्' इति केचन पाठं पठन्ति । उपरिस्थितां मस्तके स्थितामिति व्याचक्षते' (आ० द०) ॥ २० ॥

१ दर्शन इति क. । २ मिथ्याचारेण इति क. ।

तदपि न संगतं, सर्वदोषैर्न भवत्यथ सर्वदोषलक्षणा भवति हन्त तर्हि लिङ्गिनमन्तरेण लिङ्गप्रादुर्भावप्रसङ्गः। अन्ये तूत्तरपद एव नञः प्रयोगात् 'सर्वजाऽसर्वलक्षणा' इति वदन्ति; तत्र यदि सर्वेषां लक्षणानि सर्वलक्षणानि तान्यविद्यमानानि यस्यामिति; तद् कथं लिङ्गमन्तरेण लिङ्गिनः परोक्षस्य परिच्छेदोदयः। अथ सर्वाणि च तानि लक्षणान्यविद्यमानानि यस्यामिति, सन्निपातजत्वेऽप्यसंपूर्णलक्षणेत्यर्थः। एतदपि न सङ्गतं, यद्ययं पक्षोऽभीष्टः स्यात्तदाऽसर्वलक्षणेति न वक्तव्यमत्र स्यात्, सर्वत्र न्यायस्यास्य समानत्वात्; हेत्वनुरूपकोपबलेन हि सर्वत्र सर्वार्थाल्पलिङ्गसङ्गतिः। असंपूर्णलक्षणत्वेन दोषाणां हीनबलत्वं समवृद्ध नामनारम्भकत्वं वा शक्यमेवास्मिन् पक्षे वक्तुं, किंतु तन्नाद्रियन्ते; ततश्चोभयत्रापि नञः प्रयोगं विना सर्वजा सर्वलक्षणेति पाठो युक्तः सर्वजेत्यभिधायापि सर्वलक्षणेति वचनमिरिवेल्लिकायामिव प्रकृतिसमसमवायजन्यवातादिलक्षणदर्शनार्थं, तेन विकृतिविषमसमवायजन्यासाध्यत्वादिलक्षणानि न भवन्ति। अस्मिन्नपि पाठे सर्वजा सर्वैरेकादिप्रकारैर्वातादिभिर्जन्यते, एवं सर्वलक्षणेति वक्तुं पार्यते, किंतु क्षुद्ररोगत्वाद्दोषभेदेन गणना न युक्ता। चरके त्वियं कफमारुतजा पठ्यते। यदुक्तं,—"ज्वरान्विता वङ्क्षणकक्षसन्धौ वार्तिर्निरार्तिः कठिना मता या। विदारिका सा कफमारुताभ्याम्" (च. चि. स्था. अ. १)-इति। तेनात्राप्यल्पपित्तयुक्तकफवातजत्वेन सर्वजत्वं ज्ञेयम्। यथा—ज्वरयोगेनाल्पपित्तत्वम्। यदुक्तम्,—"ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना" (वा. चि. स्था. अ. १)—इति। 'विदारीमिति तां विद्यात् सर्वजां सर्वलक्षणां' इति पाठान्तरे न कश्चिद्व्याख्यानप्रपञ्चः॥ २१॥

*प्राप्य मांससिरास्नायूः श्लेष्मा मेदस्तथाऽनिलः।
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥ २२॥
स्रवत्यास्रावमनिलस्तत्र वृद्धिं गतः पुनः।
मांसं संशोष्य ग्रथितां शर्करां जनयेत्ततः॥ २३॥
दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं ततः सिराः।
स्रवन्ति रक्तं सहसा तं विद्याच्छर्करार्बुदम्॥ २४॥
(सु. नि. अ. १३)

शर्करामाह—प्राप्येत्यादि। इयमेव शर्करार्बुदस्य हेतुः। अस्यां कफानिलौ दोषौ, मांससिरास्नायुमेदांसि दूष्याणि। अनिलस्तत्र वृद्धिं गत इति पूर्वमेव तावद्वृद्धोऽनिलो धातुक्षयेण वृद्धिमतिशयेन गतोः मांसं विशोष्य काठिन्यात् शर्करातुल्यां शर्करां जनयति। अतः शर्करायास्तुल्यं शर्करार्बुदं भवति। दुर्गन्धि क्लिन्नमित्यादिना शर्करोत्पन्नं शर्करार्बुदलक्षणं, शर्करार्बुदं च शर्करावस्थैवेत्येक एवायं विकारः; तेन न संख्याति-

* 'शर्करा पाषाणशर्करा। तत इति, शर्करार्बुददेशे. अत्र सप्तम्यर्थे पञ्चमी' (आ० द०) ॥ २२–२४॥

१ अस्याग्रे "दोषे विरुद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणाः"—इत्यातङ्कदर्पणेऽधि पठ्यते।

रेकः। नानावर्णमिति घृतमेदोवसावर्णं रक्तम्। तत इति शर्करार्बुदादेवं। भोजेऽपि पठ्यते,—"तमेव भिन्नं दुर्गन्धं घृतमेदोनिभं सिराः। स्रवन्ति स्रावमनिशं तदा स्याच्छर्करार्बुदम्"—इति। तमेवेति ग्रन्थिम्॥ २२–२४॥

परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः।
पादयोः कुरुते दारीं पाददारीं तमादिशेत्॥ २५॥

(सु. नि. अ. १३)

पाददारीमाह—परिक्रमणशीलस्येत्यादि। परिक्रमणं पादविहरणं, दारी दारणमात्रं, विपादिकाकुष्ठं तु पिडका सविदारणेति भेदः॥ २५॥

***शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।**
ग्रन्थिः कोलवदुत्सन्नो जायते कदरं हि तत्॥ २६॥

(सु. नि. अ. १३)

कदरमाह—शर्करोन्मथित इत्यादि। कदरं कोलाछीति ख्यातम्। कोलवदित्यस्य स्थाने कीलवदिति पाठान्तरम्। कदरं हस्तेऽपि भवति। तथाच भोजः,—"हस्तयोः पादयोश्चापि गम्भीरानुगतं खरम्। मांसकीलं जनयतः कुपितौ कफमारुतौ॥ सशल्यमिव तं देशं मन्यते तेन पीडितः। शर्कराकदरं केचिन्मन्यन्ते वातकण्टकम्"—इति कोलवदिति बदरवत्॥ २६॥

क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्॥ २७॥

(सु. नि. अ. १३)

अलसकलक्षणमाह—क्लिन्नेत्यादि। अयं कफरक्तजो विकारः 'पाकुँया' इति ख्यातः। अत्र कण्डूः कफस्य, दाहरुजे रक्तस्य॥ २७॥

†रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः॥ २८॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसंभवः।
तदिन्द्रलुप्तं खालित्यं रुह्येति च विभाव्यते॥ २९॥

(सु. नि. अ. १३)

इन्द्रलुप्तस्य लक्षणमाह—रोमकूपेत्यादि। एतन्निभिर्दोषैः सशोणितैः स्वभावान्नियतकालव्यापारैर्भवति। एतच्च स्त्रीणां न भवतीति विदेहवचनाद्व्याख्यानयन्ति। यदुक्तं—"अत्यन्तसुकुमाराङ्ग्यो रजो दुष्टं स्रवन्ति च। अन्यायामरता यस्मात्तस्मान्न

* 'पादे शर्करा घटकर्परखण्डादयः, ताभिरुन्मथिते पीडिते कण्टकादिभिर्वा क्षते कोलवदुत्सन्नो ग्रन्थिर्जायते, तत्कदरं नाम' (आ० द०)॥ २६॥

† मूर्च्छितं, वृद्धिंगतं, प्रच्यावयति पातयति। ततोऽन्येषामसंभव इति अन्येषां रोम्णामप्रादुर्भावः' (आ० द०)॥ २८॥ २९॥

१ संभवोप्येकत्वेनास्तीति क.। २ रूक्षयोः इति ख.। ३ धुकन्जा इति क.।

खलितिः स्त्रियाः—" इति। अव्यायामाद्वातपित्तयोरकोपेन नातिरोमच्युतिः, रजःस्रावेण च स्रोतोऽवरोधाभावाच्च्युतानामपि रोम्णां पुनर्विरोहः; किंतु स्त्रीष्वपि खलितिदर्शनात् प्रायिकं विदेहवचनम्। खालित्यं रुह्येति च तस्य पर्यायकथनम्। तथाच भोजः,—"तदिन्द्रलुप्तमित्याहुः खल्तीं रुह्यां च केचन"—इति। कार्तिकस्त्वाह,—"इन्द्रलुप्तं श्मश्रुणि भवति, खालित्यं शिरस्येव, रुह्या च सर्वदेहे"—इति। आगमस्त्वत्र नास्ति॥ २८॥ २९॥

*दारुणा कण्डुरा रूक्षा केशभूमिः प्रपाट्यते।
कफमारुतकोपेन विद्याद्दारुणकं तु तम्॥ ३०॥
(सु. नि. अ. १३)

दारुणलक्षणमाह—दारुणेत्यादि। दारुणेति कठिना। कफमारुतकोपादिति यद्यप्युक्तं तथापि पित्तरक्तानुबन्धोऽप्यत्र द्रष्टव्यः। तथाहि विदेहः,-"यदत्र पटलाभासं सरुजस्कं शिरस्त्वचि। परुषं जायते जन्तोस्तस्य रूपं विशेषतः॥ तोदैः समन्वितं वातात् सकण्डूगौरवं कफात्। सपिपासं सदाहार्तिरागं पित्तास्रजं तथा"—इति। अत्र वचने सदाहरागं च पित्तात्, सार्तिं तु रक्तात्, अर्तिर्हि रक्तजाऽपि भवति। यदुक्तं,—"रक्तं हि व्यम्लतां याति तच्चेन्नास्ति न चास्ति रुक्"—इति। दारुणं रुक्षीति लोके॥ ३०॥

†अरूंषि वहुवक्त्राणि बहुक्लेदीनि मूर्ध्नि तु।
कफासृक्क्रिमिकोपेन नृणां विद्यादरूंषिकाम्॥ ३१॥
(सु. नि. अ. १३)

अरूंषिकामाह—अरूंषीत्यादिना। अरूंषीति व्रणाः॥ ३१॥

‡क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः।
पित्तं च केशान् पचति पलितं तेन जायते॥ ३२॥
(सु. नि. अ. १३)

पलितमाह—क्रोधेत्यादि। शरीरोष्मेति देहाग्निः। पित्तं चेति पित्तमपि शिरोगतं पलितहेतुः। ननु, पित्तमेवाग्निः, तत्र तत्र पित्तस्य पाचकत्वेनाभिधानात्; यदुक्तवान् सुश्रुतः,—"न पाकः पित्तादृते" (सु. सू. स्था. अ. १७)—इति, तथा—"पित्ते तस्मिन् पाचकोऽग्निरिति संज्ञा" (सु. सू. स्था. अ. २१)—इति, तथा स एव—"न खलु पित्तव्यतिरेकेणान्योऽग्निरुपलभ्यते, आग्नेये तु पित्ते दहनपचनदारणादिष्वभिवर्त-

---

* 'प्रपाट्यते पुटपुटायते' (आ० द०)॥ ३०॥

† 'नृणां पुरुषाणां कफासृक्क्रिमिकोपेन मूर्धनि मस्तके बहुवक्त्राणि तथा बहुक्लेदानि, अरूंषीति व्रणा भवन्ति, तामरूंषिकां विद्यात्' (आ० द०)॥ ३१॥

‡ 'क्रोधादिकृतेन शरीरोष्मणा पित्तेन शिरोगतेन वैकृतं वयःकृतं तु प्राप्तेनेत्यर्थः। अन्ये तु पित्ताग्न्योर्भेदवादिन उभाभ्यां मन्यन्ते कालजलक्षणं, अन्येऽपि त्रिभिरेव दोषैः स्यादिति कथयन्ति' (आ० द०)॥ ३२॥

मानेऽग्निवदुपचारः क्रियते अन्तरग्निरिति, क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामः न खलु पित्तव्यतिरेकेणान्योऽग्निः" (सु. सू. स्था. अ. २१)–इति; चरकाचार्योऽप्याह,–"दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्। प्रभाप्रसादौ मेधा च पित्तकर्माविकारजम्" (च. सू. स्था. अ. १८)–इति; पाकस्यान्यथानुपपत्त्या चाग्नेरङ्गीकारः; किंच मन्देऽग्नौ पित्तकरमरीचादिद्रव्योपयोगादग्नेर्वृद्धिः, पित्तप्रतिकूलशीतमधुरादिद्रव्योपयोगाच्चोपशम उपलभ्यते; यदि हि पित्ताद्भिन्नोऽग्निः स्यात्तदा पित्तस्य वृद्धिह्रासानुविधानमस्यानुपपन्नं स्यात्, न हि तुहिनकरमण्डले हिमभाज्यऽहिमोपलम्भः, अतुहिनमण्डले अहिमभाजि भगवति भास्करेऽभिमतो हिमोपलम्भः, यद्यतो भिन्नं तत्ततो भेदेनोपलभ्यते, यथा सागरादजगरः, न चैवं पित्तादग्निः, तत्कुतः पित्तादग्नेः पृथगुपादानमिति ? अत्र प्रत्यभिधीयते–न तावदन्तरग्निः पित्तादभिन्नः भेदसाधकप्रमाणस्य भूयः सद्भावात्; तथाह्यभेदे 'समदोषः समाग्निश्च' (सु. सू. स्था. अ. १५) इत्यत्र, "समप्रकोपौ दोषाणां सर्वेषामग्निसंश्रयौ" इत्यत्र च दोषपदलब्धत्वादग्नेः पृथगुपादानमसङ्गतं; तीक्ष्णः पित्तेन चेति स्वात्मनि क्रियाविरोधादसङ्गतं; यत्पुनः "न खलु पित्तव्यतिरेकेणान्योऽग्निः" इत्याद्युक्तः तद्भेदमेव साधयति, उपचाराभिधानात्, न ह्यभेदे उपचारः संभवति। यदप्यग्नेः पित्तवृद्धिह्रासानुविधानमभिहितं तदप्रयोजकं, भेदेऽपि समानत्वेन तदुपपत्तेः। यथा कफवृद्धिह्रासकराभ्यामेव द्रव्याभ्यां शुक्रस्य वृद्धिह्रासौ दृष्टौ, न च कफशुक्रयोरैक्यं; किंच घृतं पित्तशमनमग्नेश्च दीपनं, पित्तस्य संचयादौ नाग्नेर्वृद्धिः, पेयादिकं चाग्निकरं, न पित्तकृत्; ततश्च पित्ताद्विलक्षणोऽन्तरग्निः। स च द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजोभागो न बहिरनलवद्भस्माङ्गाराकारः, समुदायतश्च समुदायी अन्य एव करचरणादिभ्य इव शरीरं; अत्यन्तभेदेन चाग्रहणं, तस्य नित्यसंश्लेषणशालित्वात्[1]। पित्तस्य तेजोंऽश एव पाच(व)कः, तदाह भोजः,–"दृढमुष्णोचितं ह्येतत् पित्तोष्मा पचतीति यत्। मूर्च्छितो रसवीर्याभ्यां समानव्यानसहितः"–इत्यारभ्य, "तस्मात् तेजोमयं पित्तं पित्तोष्मा यः स पक्तिमान्। स कायाग्निः स कायोष्मा स पक्ता स च जीवनः"–इति। पित्तैकदेशत्वात्तेजसि पित्तोपचारमाश्रित्य सुश्रुतेनोक्तं,–"न पाकः पित्तादृते"–इति, तथा–"न खलु पित्तव्यतिरेकेणान्योऽग्निः"–इति। एवमन्यदप्यग्नेरभेदसाधकं वचनं समाधेयम्। ननु, यदि तीक्ष्णः पित्तेनेत्युक्तं, तत् कथं पित्तेनैवाग्नेः प्रशमनमभिधीयते। यदुक्तं चरके,–"कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम्। आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम्" (च. चि. स्था. अ. १५)–इति उच्यते, यदा कटुकेन रूक्षोष्णेन पित्तं वृद्धं भवति, तदा तेजोभागरूपायाः पित्तस्यावस्थाया उल्बणत्वात्तीक्ष्णः पित्तेनेति सङ्गतं; यदाऽलवणेन स्निग्धोष्णेन कफानुगमनभाजा वृद्धं पित्तं तदा पित्तस्य द्रवावस्थाया उद्रिक्तत्वान्निर्वापणमग्नेरुक्तमिति। जतुकर्णोऽप्युक्तं–"कुपितेन वायुना दीपस्येवाग्नेर्निर्वापणं, पित्तेनोष्णजलवत्, कफेनाम्बुवत्"–इति। ततश्च युक्तमग्नेः पृथगुपादानमिति। अग्निश्च पित्तगतत्वेन क्रोधकृतो भवत्येव, क्रोधेन पित्तकोपात्; शोकश्रमाभ्यां तु जनितवातेन शरीरोष्मणोपि

[1] तत्पुनर्मुनमूक डाकिनीवृत्तमनुहरति इति क.।

विक्षेपणाच्छिरोगतत्वं, तेनानिलोऽपि लभ्यते, पित्तं च साक्षादुपात्तं, चकारेण श्लेष्माऽपि केशशुक्लताकरो गृह्यते। एतेन दोषत्रयसहितशरीरोष्मा पलितहेतुरिति वाक्यार्थश्चरकोक्तार्थेन सह संवादी भवति। यदाह—"तेजोऽनिलाद्यैः सह केशभूमिं दग्ध्वा तु कुर्यात् खलितिं नरस्य। किंचित्तु दग्ध्वा पलितानि कुर्याद्धरिप्रभत्वं च शिरोरुहाणाम्" (च. चि. स्था. अ. २)–इति। एतच्चाकालजपलितव्यापकं लक्षणम्। कालजे तु क्रोधादिग्रहणं कारणान्तरोपलक्षणं, तेन वयःपरिणामकृताश्चोष्मा दोषत्रययुक्तः कालजपलितहेतुः। अन्यथा कालजपलितस्य संग्रहो न स्यात्। किंवा; कालजं स्वाभाविकत्वादेव नोच्यते। अन्ये तु पित्तगतश्चेच्छरीरोष्मा तत् किमुभयोरुपादानेनेत्यभिधाय शरीरोष्मा पित्तं चेति कर्तृद्वयमाचक्षते; तेन नात्रैकस्मिन् विषये समुच्चयः, किं तर्हि विषयभेदात्। कर्तृद्वयं–तत्र शरीरोष्मा वैकृतं पलितं करोति, पित्तं च प्राकृतं पित्तप्रकृतेः पलितं करोति। यदुक्तं,–"पित्तप्रकृतिरकालजवलीपलितयुक्तश्च भवति"–इति। एवं स्वाभाविकजरापलितमपि पित्तेनैवास्य हेतोः कृतत्वात्। न चोष्मकृतत्वेन पलितस्यादोषजत्वप्रसङ्गः, ऊष्मणः पित्तधर्मत्वेन पित्तेऽन्तर्भावात्॥ ३२॥

*शाल्मलीकण्टकप्रख्याः कफमारुतरक्तजाः।
युवानपिडका यूनां विज्ञेया मुखदूषिकाः॥ ३३॥
(सु. नि. अ. १३)

युवानपिडकालक्षणमाह—शाल्मलीत्यादि। युवानपिडका लोके 'वरण्डका' उच्यंते यूनामाननपिडका युवानपिडका, पृषोदरादित्वान्नकारलोपः; एषा च यूनामेव, मुख एव, स्वभावात्॥ ३३॥

†कण्टकैराचितं वृत्तं मण्डलं पाण्डुकण्डुरम्।
पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम्॥ ३४॥
(सु. नि. अ. १३)

पद्मिनीकण्टकमाह—कण्टकैरित्यादि। तदाख्यमिति पद्मिनीकण्टकाख्यम्॥ ३४॥

सममुत्सन्नमरुजं मण्डलं कफरक्तजम्।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः॥ ३५॥
(सु. नि. अ. १३)

जतुमणिमाह—सममित्यादि। समं मसृणम्। उत्सन्नमुद्गतम्। अयं 'जडुल' इति लोके प्रसिद्धः। कफरक्तजमिति प्राधान्येनोक्तं, तेन चरकोक्तं त्रिदोषजत्वमप्यस्योपपन्नं भवति। यदुक्तं तेन,–"कृष्णः स्निग्धो जतुमणिर्ज्ञेयो वातोत्तरैस्त्रिभिः। असृजं त्वपरैरुक्तं लक्ष्मेत्याहुर्भिषग्वराः"–इति। सहजं लक्ष्म चैकेषामिति एकेषामाचार्याणां[१] मतेन सहजं लक्ष्म लक्षणं स्त्रीपुंसयोरङ्गभेदेन शुभाशुभफलप्रदं भवति। सहजं शरीरेण सह जातं जन्मकालप्रवृत्तमित्यर्थः॥ ३५॥

* 'मुखदूषिका मुखकान्तिहारकाः' (आ० द०)॥ ३३॥
† 'पद्मिनीकण्टकसदृशैः कण्टकैराचितं वृत्तादिलक्षणं यन्मण्डलं भवति' (आ० द०)॥ ३४॥

१ कोपजाः इति ख.। २ बहुल इति क.।

अवेदनं स्थिरं चैव यस्मिन् गात्रे प्रदृश्यते ।
माषवत्कृष्णमुत्सन्नमनिलान्मषकं तु तत् ॥ ३६ ॥

(सु. नि. अ. १३)

मषकलिङ्गमाह—अवेदनमित्यादि। स्थिरं कठिनमिति गयदासः; अचलमिति युक्तं, भोजे मृद्विति पाठात्। मषकमादिशेदिति माषशब्दात् "इवे प्रतिकृतौ" इति कन्, नैरुक्तयेन च विधिना ह्रस्वत्वम्। अत्र चकारेण कफमेदसी समुच्चीयेते। तथा च भोजः,—"वातेरिते त्वचि यदा दूष्येते कफमेदसी। श्लक्ष्णं मृदु सवर्णं च कुरुतो मषकं वदेत्"—इति ॥ ३६ ॥

***कृष्णानि तिलमात्राणि नीरुजानि समानि च ।**
वातपित्तकफोच्छोषात्तान्विद्यात्तिलकालकान् ॥ ३७ ॥

(सु. नि. अ. १३)

तिलकालकलक्षणमाह—कृष्णानीत्यादि। "वातपित्तकफोच्छोषात्" इति पाठे वातपित्ताभ्यां हेतुभ्यां कफस्योच्छोषः शोषणं तस्मात्। अन्ये चरकं दृष्ट्वा 'वातपित्तासृगुच्छोषात्' इति पठन्ति। तथा च चरकः—"यस्य पित्तं प्रकुपितं शोणितं प्राप्य शुष्यति। तिलका पिप्लवा व्यङ्गा नीलिका चास्य जायते" (च. सू. स्था. अ. १८)—इति; अस्मिन् वचने वातोऽप्यवगन्तव्यः, तेनापि शोषस्य क्रियमाणत्वात्। अन्येऽपि तन्त्रान्तरं दृष्ट्वा 'वातपित्तकफोत्सेकात्' इति पठन्ति। उत्सेकादित्युद्रेकात्। तथाहि तन्त्रान्तरं,—"मारुतः पित्तमादाय कफरक्तसमाश्रितः। चिनोति तिलमात्राणि त्वचि ते तिलकालकाः"—इति; किंत्वस्मिन्नपि तन्त्रे कफरक्तसमाश्रित इत्यनेन कफरक्तयोराश्रितवातेन पित्तसहितेनोच्छोषादेव तिलकालके कार्ष्ण्यस्य संभवोऽवगम्यते, ततश्च "वातपित्तकफोच्छोषात्" इति पाठो युज्यते। 'वातपित्तरसोद्रेकात्' इति पाठान्तरम् ॥ ३७ ॥

†महद्वा यदि वाऽल्पं श्यावं वा यदि वाऽसितम् ।
नीरुजं मण्डलं गात्रे न्यच्छमित्यभिधीयते ॥ ३८ ॥

(सु. नि. अ. १३)

न्यच्छलिङ्गमाह—महद्वेत्यादि। असितं कृष्णम्। 'नीरुजं मण्डलं' इत्यस्य स्थाने 'सहजं मण्डलं' इति केचित् पठन्ति, तेन जन्मकालप्रवृत्तं न्यच्छमिच्छन्ति, अत एव न्यच्छस्य पर्याये लाञ्छनमिति तैः पठ्यते। यथा,—'न्यच्छं लाञ्छनमुच्यते'—इति। लाञ्छनं लक्षणम्। अत्र भोजवचनात् पित्तरक्तान्वितो वायुः कारणम्। यदाह,—"रक्तपित्तान्वितो वायुस्त्वक्प्रदेशाश्रितो यदा। जनयेन्मण्डलं कृष्णं श्यावं वा न्यच्छमादिशेत्" इति। अत्र श्यावत्वपक्षे मुखेतरदेश एव संभवेन बहुलत्वेन व्यङ्गाद्भेदोऽवगन्तव्यः ॥ ३८ ॥

* 'शरीरत्वक्समानि नोद्गतानीत्यर्थः। अन्ये तु "वातपित्तासृगुच्छोषात्" इति पठन्ति। तत्र वातपित्ताभ्यां रक्तस्य शोषादित्यर्थः। अत एव तिलकालके कार्ष्ण्यं' (आ० द०) ॥ ३७ ॥
† 'श्यावं शुक्लानुविद्धं कृष्णवर्णं' (आ० द०) ॥ ३८ ॥

१ वातपित्तकफोच्छेदात् इति क.।

*क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः ।
मुखमागत्य सहसा मण्डलं विसृजत्यतः ॥ ३९ ॥
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ।
(सु. नि. अ. १३)

व्यङ्गलिङ्गमाह—क्रोधायासेत्यादि । श्यावमिति शुक्लानुविद्धकृष्णवर्णम् । अस्य 'छयावक' इति 'मेछेता' इति च लोके ख्यातिः ॥ ३९ ॥—

कृष्णमेवंगुणं गात्रे मुखे वा नीलिकां विदुः ॥ ४० ॥
(सु. नि. अ. १३)

नीलिकालक्षणमाह—कृष्णमेवंगुणमिति । एवंगुणमिति नीरुजतनुकमण्डलधर्मं; व्यङ्गोक्तदोषोऽत्रापि बोद्धव्यः, संमूर्च्छनविशेषात्तु नीलित्वकारी । कृष्णन्यच्छादति-कृष्णत्वेन भिन्ना नीलिका, व्यङ्गनीलिकयोस्तु व्यक्त एव भेदः—श्यावो व्यङ्गः, कृष्णा नीलिका; भोजे तु नीलिका गात्र एवोक्ता । यदुक्तं,—"मारुतः क्रोधहर्षाभ्यामूर्ध्वगो मुखमाश्रितः । पित्तेन सह संयुक्तः करोति वदनत्वचि ॥ नीरुजं तनुकं श्यावं व्यङ्गं तमिति निर्दिशेत् । कृष्णमेवंगुणं गात्रे नीलिकां तां विनिर्दिशेत्"—इति ॥ ४० ॥

मर्दनात् पीडनाद्वाऽति तथैवाप्यभिघाततः ।
मेढ्रचर्म यदा वायुर्भजते सर्वतश्चरन् ॥ ४१ ॥
तदा वातोपसृष्टत्वात्तच्चर्म परिवर्तते ।
मणेरधस्तात् कोशश्च ग्रन्थिरूपेण लम्बते ॥ ४२ ॥
(सु. नि. अ. १३)

सरुजां वातसंभूतां तां विद्यात् परिवर्तिकाम् ।
सकण्डूः कठिना चापि सैव श्लेष्मसमुत्थिता ॥ ४३ ॥

मेढ्रगताभिघातजे रोगत्रये परिवर्तिकामाह—मर्दनादित्यादि । पीडनाद्वाऽतीत्यतिशब्दो मर्दनपीडनाभ्यां सह संबध्यते । अतियोगादेव ते वातं कोपयतः । सर्वतश्चरन्निति व्यानः, 'सर्वतश्चरः' इति पाठे स एवार्थः । परिवर्तत इति सर्वतो विवर्तते । कोष इति चर्मकोषः । परिवर्तिकेति वृतधातोः "रोगाख्यायां ण्वुल् बहुलम्"—इति ण्वुल् (वृत-णक-आप्) । एवमवपाटिकायां च बोद्धव्यम् । अस्यां वातजायामपि पित्तानुबन्धाद्दाहपाकौ भवतः, कफसंबन्धस्तु सकण्डूः कठिना चापीत्यादिनाभिहितः । भोजेऽप्युक्तं,—"मणेरधो मेढ्रचर्म व्यानस्तु परिवर्तयेत् । सशूलतोददाहाद्यैर्विज्ञेया परिवर्तिका । श्लैष्मिकी कठिना स्निग्धा कण्डूमत्यल्पवेदना"—इति ॥ ४१-४३ ॥

अल्पीयःखां यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादपि वा चर्मण्युद्वर्तिते बलात् ॥ ४४ ॥
(सु. नि. अ. १३)

* 'मुखछाई' इति लोके' (आ० द०) ॥ ३९ ॥—

१ सवेदनं सदाहं च पाकं च व्रजति क्वचित् । परिवर्तिकेति तां विद्यात् सरुजां वातसंभवाम् ॥ इति ख. । २ "सर्वतश्चरः" इति मुख्योऽस्य पाठः ।

यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् ।

अवपाटिकामाह—अल्पीयःखामित्यादि । अल्पीयःखामित्यल्पतरं खं योनिमुखं यस्याः सा तथा, कन्या ह्यनार्तवा अल्पीयःखा भवति । अत्र हेत्वन्तरं हस्ताभिघातादपि वेति । उद्धर्तित इति ऊर्ध्वं वर्तिते । यस्यावपाट्यत इति स्वयमेव विदीर्यते । एषा च पृथक् दोषत्रयेणानुबध्यते । तथाच भोजः,—"मर्दनादभिघाताद्वा कन्यायोनिप्रपीडनात् । लक्ष्यते यदि मेढ्रस्य चर्म दर्भैरिव क्षतम् ॥ ज्ञेयाऽवपाटिका सा तु पृथग्दोषैः समन्विता । वातात् सा परुषा रूक्षा शूलनिस्तोदकारिणी ॥ पित्तात् सदाहा रक्ताद्वा दाहतृष्णासमन्विता । श्लैष्मिकी कठिना स्निग्धा कण्डूमत्यल्पवेदना"–इति ॥ ४४ ॥—

*वातोपसृष्टे मेढ्रे वै चर्म संश्रयते मणिम् ॥ ४५ ॥
मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ।
निरुद्धप्रकशे तस्मिन् मन्दधारमवेदनम् ॥ ४६ ॥
मूत्रं प्रवर्तते जन्तोर्मणिर्विव्रियते नच ।
निरुद्धप्रकशं विद्यात् सरुजं वातसंभवम् ॥ ४७ ॥
(सु. नि. अ. १३)

निरुद्धप्रकशमाह—वातोपसृष्ट इत्यादि । संश्रयत इति समग्रं श्रयते, अत्रैव नीयत इत्यर्थः । अवपाटिका त्वरूढा चर्मसंकोचान्निरुद्धप्रकशो भवतीति ब्रुवते, सन्निरुद्धगुदवत् स्वतन्त्रोऽपि भवतीति शक्यते वक्तुं; निरुद्धप्रकाश इत्यस्मिन्नर्थे निरुद्धप्रकशः, नैरुक्तेन च रूपसिद्धिः । मूत्रस्रोतः संकुचितचर्मपीडनेन मणेः स्वल्पद्वारत्वान्मूत्रस्रोतो रुणद्धि । अवेदनमित्यस्य स्थाने सवेदनमिति केचित् । अत्र भोजाभिप्रायेण व्याचक्षते एकदा विरुद्धे स्रोतसि सवेदनमन्यदा तु प्रकाशे मन्दधारं प्रवर्तते, मणिश्च नावदीर्यते मूत्रेणेति । तथाच भोजः—"मेढ्रान्ते चर्मणि यदा मारुतः कुपितो भृशम् । द्वारं रुणद्धि स शनैः प्रकाशश्च मुहुर्भवेत् ॥ मूत्रं मूत्रयते कृच्छ्रात् प्रकाशस्तु यदा भवेत् । वातोपसृष्टमेढ्रस्तु मणिर्न च विदीर्यते । निरुद्धं च प्रकाशं च व्याधिं विद्यात् सुदारुणम्"–इति । सुश्रुते तु निरुद्धप्रकाशत्वात् निरुद्धप्रकशः । मणिर्विव्रियते न चेति मणिर्विवृतो न भवति ॥ ४५–४७ ॥

वेगसंधारणाद्वायुर्विहतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मद्वारं करोति च ॥ ४८ ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदारुणम् ॥ ४९ ॥
(सु. नि. अ. १३)

मूत्रमार्गरोधकनिरुद्धप्रकाशानन्तरं पुरीषमार्गरोधकं सन्निरुद्धगुदमाह—वेगसंधारणादित्यादि तस्येति गुदस्य । 'महत्स्रोत' इति पाठे तु महत्स्रोतो गुदविवरं, निरुद्धप्रकाशवदत्रापि चर्मसंकोचात् सन्निरुद्धगुदम् ॥ ४८ ॥ ४९ ॥

* 'वातदुष्टमेढ्रे चर्म संश्रयत इति समग्रं श्रयते तत्रैव लीयत इत्यर्थः । चर्मसंकोचान्मूत्रस्रोतो रुध्यते' (आ० द०) ॥ ४५–४७ ॥

शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्ने वाऽस्नाप्यमाने वा कण्डू रक्तकफोद्भवा ॥ ५० ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम् ॥ ५१ ॥
(सु. नि. अ. १३)

अहिपूतनमाह—शकृन्मूत्रेत्यादि। अपान इति गुदे, स्विन्ने स्वेदवति, अस्नाप्यमाने अक्रियमाणक्षालने; स्वेदमलक्लेदादेव कण्डूर्भवतीत्यर्थः। एकीभूतमिति अपानं व्रणैः सहैकीभूतम्। अहिपूतनं च बालानामेव भवति, भोजे पुनरिदं दुष्टस्तन्यपानादपि भवतीति पठितम्। यदुक्तं,—"दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च कण्डूदाहरुजावद्भिः पिडकैश्च समाचिता ॥ संभवन्ति यथादोषं दारुणा ह्यहिपूतना"—इति ॥ ५० ॥ ५१ ॥

*स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः।
यदा प्रक्लिद्यते स्वेदात् कण्डूं जनयते तदा ॥ ५२ ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥ ५३ ॥
(सु. नि. अ. १३)

अहिपूतनसमानहेतुलिङ्गतया गुदाश्रयं गुदभ्रंशमुल्लङ्घ्यानन्तरं वृषणकच्छूमाह—स्नानोत्सादनहीनस्येत्यादि। एषा च निदानविशेषात् प्रायो वृषणभावित्वाद्विशिष्टचिकित्सोपयोगित्वाच्च कुष्ठोक्तकच्छूतो भेदेन पठ्यते ॥ ५२ ॥ ५३ ॥

†प्रवाहणातीसाराभ्यां निर्गच्छति गुदं बहिः।
रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥ ५४ ॥
(सु. नि. अ. १३)

गुदभ्रंशलिङ्गमाह—प्रवाहणेत्यादि। प्रवाहणं प्रकर्षेण कुन्थनम्। 'वाह प्रयत्ने' इत्यस्य रूपम्। प्रवाहणेनातिवेगोदीरणेन वातकोपः, अतीसारेण तु धातुक्षयात्; यद्वा प्रवाहणेनातीसारेण चाधोगतमारुतत्वेन गुदनिर्गमो रूक्षादिदेहस्य ॥ ५४ ॥

‡सदाहो रक्तपर्यन्तस्त्वक्पाकी तीव्रवेदनः।
कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः ॥ ५५ ॥
(सु. नि. अ. १३)

इति श्रीमाधवकरविरचिते माधवनिदाने क्षुद्ररोगनिदानं समाप्तम् ॥ ५५ ॥

वराहदंष्ट्रलिङ्गमाह—सदाह इत्यादि। अयं 'वराहदाढ' इति लोके प्रसिद्धः ॥५५॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां क्षुद्ररोगनिदानं समाप्तम् ॥ ५५ ॥

---

* 'उत्सादनमाहरणवत्वम्' (आ० द०) ॥ ५२ ॥ ५३ ॥

† 'ह्रस्कण्ठबलेन वायोरानयनम्। प्रवाहणं प्रवाहणेन वातकोपः, अयं वातकोपजः' (आ० द०) ॥ ५४ ॥

‡ 'सूकरदंष्ट्राकारत्वेन सूकरदंष्ट्रको विसर्पलिङ्गः' (आ० द०) ॥ ५५ ॥

अथ मुखरोगनिदानम्।

आनूपपिशितक्षीरदधिमत्स्यातिसेवनात्।
मुखमध्ये गदान् कुर्युः क्रुद्धा दोषाः कफोत्तराः ॥ १ ॥

रोगगणत्वसामान्यान्मुखरोगनिदानमुच्यते-आनूपेत्यादि। मुखरोगाश्च पञ्चषष्टिर्भवन्ति। यदाह भोजः,-"दन्तेष्वष्टावोष्ठयोश्च मूलेषु दश पञ्च च। नव तालुनि जिह्वायां पञ्च सप्तदशामयाः। कण्ठे त्रयः सर्वसरा एकषष्टिश्चतुःपराः"-इति ॥ १ ॥

तत्राष्टावोष्ठगतानाह—

*कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥ २ ॥

वातिकलक्षणमाह—कर्कशावित्यादि। दाल्येते इति विदार्येते। परिपाट्येते इति किंचिदवदीर्णत्वचौ भवत इत्यर्थः ॥ २ ॥

चीयेते पिडकाभिश्च सरुजाभिः समन्ततः।
सदाहपाकपिडकौ पीताभासौ च पित्ततः ॥ ३ ॥
(सु. नि. अ. १६)

पैत्तिकलक्षणमाह—चीयेते इत्यादि। सरुजाभिरिति पित्तकृतरुजान्विताभिः। यद्येवं सदाहपाकपिडकाविति किमर्थमुच्यते? पूर्वेणैव गतार्थत्वात्। नैवं, पक्षान्तरप्रतीत्यर्थं पुनरुच्यते; अयमर्थः—कदाचित् पित्तरुजान्वितबहुपिडकाचितावोष्ठौ कदाचिद्दाहपाकान्वितपिडकाचितौ वा भवतः; अन्यस्त्वाह—अनतिभिन्नार्थत्वादव्यक्तशब्दार्थत्वाच्च दाहपाकातिशयदर्शनार्थं पिडकानुवादः ॥ ३ ॥

सवर्णाभिश्च चीयेते पिडकाभिरवेदनौ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू ॥ ४ ॥
(सु. नि. अ. १६)

कफजमाह—सवर्णाभिरित्यादि। सवर्णाभिरिति ओष्ठसमानवर्णाभिः। अवेदनौ ईषद्वेदनौ ॥ ४ ॥

सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिडकाचितौ ॥ ५ ॥
(सु. नि. अ. १६)

सान्निपातिकलक्षणमाह—सकृदित्यादि। सकृदिति कदाचिद्विकृतिवशादेवं भवति। अनेकपिडकाचिताविति वातादिवेदनान्वितबहुपिडकौ, अनेकवर्णपिडकाचिताविलन्ये; अनेकाश्च वर्णा वातादीनां कृष्णपीतश्वेताः, अत्र पक्षे सकृत्कृष्णावित्यादिपिडकातोऽन्यत्र कल्पनीयम् ॥ ५ ॥

---

* कर्कशौ शाकपत्रसदृशौ, परुषौ रूक्षौ, स्तब्धौ निश्चलौ। संप्राप्तानिलवेदनावित्यत्र "कृष्णौ तीव्ररुजान्वितौ" इति पाठान्तरम् (आ० द०) ॥ २ ॥

खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ ॥ ६ ॥
(सु. चि. अ. १६)

१ रक्तजमाह—खर्जूरेत्यादि। खर्जूरफलवर्णाभिरित्यनेन वर्णमात्रेणैव साधर्म्यं प्रतिपाद्यते, यदि तु सर्वात्मना साधर्म्यमभीष्टं स्यात्, तदा 'खर्जूरफलतुल्याभिः' इत्येवोच्येत। रक्तोपसृष्टाविति रक्तदूषितौ ॥ ६ ॥

*गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुद्गतौ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात् ॥ ७ ॥
(सु. चि. अ. १६)

मांसजमाह—गुरू स्थूलावित्यादि। जन्तवश्चात्र मूर्च्छन्तीति क्रिमयोऽप्यत्र उच्छ्रिता भवन्ति। उभयतो मुखादिति मुखविवरमपेक्ष्योभयभागयोः, सृक्कणीप्रदेशयोरिति यावत्। मुखादिति ल्यब्लोपे पञ्चमी। 'उभयतोमुखा' इति पाठान्तरे उभयसृक्कणीभागो मुखमाश्रयो येषां ते तथा। द्विमुखा इत्यन्ये ॥ ७ ॥

सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू।
अच्छं स्फटिकसंकाशमास्रावं स्रवतो भृशम् ॥ ८ ॥
तयोर्व्रणो न संरोहेन्मृदुत्वं च न गच्छति।
(सु. चि. अ. १६)

मेदोजमाह—सर्पिर्मण्डप्रतीकाशावित्यादि। सर्पिर्मण्डप्रतीकाशाविति सर्पिर्मण्डो घृतस्योपरितनः स्वच्छभागः, तत्प्रतीकाशौ तत्सदृशौ। तयोरिति तादृशयोः ॥८॥—

†क्षतजाभौ विदीर्येते पाट्येते चाभिघाततः ॥ ९ ॥
ग्रथितौ च तथा स्यातामोष्ठौ कण्डूसमन्वितौ।
(सु. चि. अ. १६)

अभिघातजमाह—क्षतजाभावित्यादिना। अत्र कफरक्तयोरप्यनुबन्धो बोद्धव्यः। यदुक्तं भोजे,—"क्षतावभिहतौ चापि रक्तावोष्ठौ सवेदनौ। भवतः सपरिस्रावौ कफरक्तप्रदूषितौ"—इति। वायुरप्यत्राभिघाताल्लभ्यते, अयं चाभिघातजशोथाद्यथोक्तलक्षणकरणभेदेन तथा वातिकोष्ठप्रकोपादपि कफरक्तरूपहेतुभेदयोगाद्भिद्यते ॥ ९ ॥

दन्तमूलगतान् पञ्चदश व्याकरोति—

‡शोणितं दन्तवेष्टेभ्यो यस्याकस्मात्प्रवर्तते।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥ १० ॥
दन्तमांसानि शीर्यन्ते पचन्ति च परस्परम्।
शीतादो नाम स व्याधिः कफशोणितसंभवः ॥ ११ ॥
(सु. चि. अ. १६)

१ * 'उभयतोमुखाः' इति पाठान्तरं, तत्र 'द्विमुखाः' (आ० द०) ॥ ७ ॥

† 'विदीर्येते पाट्येते खण्डीक्रियेते। वातजः केवलः स्वकारणकुपितः, अत्र तु वायुरभिघाताल्लभ्यते; तयोरयमेव भेदः। एवमष्टावोष्ठगताः' (आ० द०) ॥ ९ ॥—

‡ 'रक्तं प्रवर्तते; दन्तमांसानि दुर्गन्धीनि ईषदसितानि क्लेदयुक्तानि मृदूनि च भवन्ति, तथा शीर्यन्ते गलन्ति, स शीतादो नाम व्याधिरिति' (आ० द०) ॥ १० ॥ ११ ॥

शीतादमाह—शोणितमित्यादि। दन्तवेष्टेभ्य इति दन्तबन्धनमांसेभ्यः। अकस्मादिति अभिघातादिनिमित्तं विना। 'शीर्यन्त' इत्यस्य स्थाने, 'पच्यन्त' इति गदाधरः, व्याचष्टे च—'स्वयं इति शेषः। पचन्ति च परस्परमित्यन्योन्यं पचन्ति, पाकोष्मदूषितशोणितसंचरणेन ॥ १० ॥ ११ ॥

*दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान्।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ १२ ॥
(सु. नि. अ. १६)

दन्तपुप्पुटकमाह—दन्तयोरित्यादि। अयं च दन्तयोस्त्रिष्वित्यभिधानात् द्वित्रिदन्तनियतः, कफरक्तजत्वेऽपि शौषिराद्भिन्नोऽयं, रुजालालास्रावाभावात् ॥ १२ ॥

स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसंभवः ॥ १३ ॥
(सु. नि. अ. १६)

दन्तवेष्टमाह—स्रवन्तीत्यादि। स्रवन्ति पूयरुधिरमित्यत्र 'दन्तमूलानि' इति शेषः। चला दन्ता भवन्ति चेति चकारेण पचन्ति चेति द्रष्टव्यम् ॥ १३ ॥

†श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः।
लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥ १४ ॥
(सु. नि. अ. १६)

शौषिरलिङ्गमाह—श्वयथुरित्यादि। नामत इति प्रसिद्धितः ॥ १४ ॥

‡दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्यते।
यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञितः ॥ १५ ॥
(सु. नि. अ. १६)

महाशौषिरलिङ्गमाह—दन्ता इत्यादि। तालु चाप्यवदीर्यत इत्यत्र चकारेण दन्ता ओष्ठौ चाप्यवदीर्यन्ते इति बोद्धव्यम्। सप्तरात्राच्चायं मारकः। यदाह भोजः,—'सदाहो दन्तमूलेषु शोथः पित्तकफानिलात्। जातः कफं क्षपयति क्षीणे तस्मिंस्तु, शोणितम् ॥ विद्धमनिशं दन्तान् ताल्वोष्ठमपि दारयेत्। महाशौषिर इत्येतद् सप्तरात्राज्जिहन्त्यसून्"—इति। यस्मिन् शौषिरे एवमपि भवति स महाशौषिर इति गदाधरः ॥ १५ ॥

§दन्तमांसानि शीर्यन्ते यस्मिन् ष्ठीवति चाप्यसृक्।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ १६ ॥
(सु. नि. अ. १६)

* 'दन्तयोर्द्वयोस्त्रिषु वा नियतः कफरक्तजो दन्तपुप्पुटकः' (आ० द०) ॥ १२ ॥
† 'दन्तमूलेषु श्वयथुः पीडावान् कफरक्तोत्थो लालास्रावी स शौषिरो नाम नामतः प्रसिद्ध इति' (आ० द०) ॥ १४ ॥
‡ 'यस्मिन् व्याधौ वेष्टेभ्यो दन्ताश्चलन्ति, स सर्वजः सर्वदोषजः' (आ० द०) ॥ १५ ॥
§ 'यस्मिन् मांसानि शीर्यन्ते, ष्ठीवति चाप्यसृगिति रोगी लोहितं थूत्करोतीत्यर्थः। स व्याधिः परिदरो ज्ञेयः। कथंभूतः? पित्तासृक्कफजः' (आ० द०) ॥ १६ ॥

परिदरमाह—दन्तमांसानीत्यादि। दन्तमांसस्य परिदारणात् परिदरसंज्ञा ॥१६॥

*वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च।
यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः ॥ १७ ॥
(सु. चि. अ. १६)

उपकुशलक्षणमाह—वेष्टेष्वित्यादि। ताभ्यामिति दाहपाकाभ्याम्। सोपकुश इति निर्देशोऽसिद्धत्वानित्यत्वादसाधुः, तेन स उपकुश इत्यर्थः ॥ १७ ॥

†घृष्टेषु दन्तमांसेषु संरम्भो जायते महान्।
चला भवन्ति दन्ताश्च स वैदर्भोऽभिघातजः ॥ १८ ॥
(सु. चि. अ. १६)

वैदर्भलिङ्गमाह—घृष्टेष्वित्यादि। संरम्भ इति शोथः, वेदनापाकौ वा ॥ १८ ॥

‡मारुतेनाधिको दन्तो जायते तीव्रवेदनः।
खलिवर्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥ १९ ॥
(सु. चि. अ. १६)

खलिवर्धनलिङ्गमाह—मारुतेनेत्यादि। जाते रुक् च प्रशाम्यतीति उत्थितेऽधिके दन्ते प्रभावाद्वेदनाया अभावः ॥ १९ ॥

§शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः।
करालान्विकटान् दन्तान् करालो न स सिध्यति ॥ २० ॥
(सु. चि. अ. १६)

कराललक्षणमाह—शनैरित्यादि। करालान् विषमान्। करालस्तु सुश्रुतेऽनुक्तोऽधिकः संग्रहकारेण पठितः, तेन सुश्रुतोक्तपञ्चदशसंख्याहानिः ॥ २० ॥

हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः।
(सु. चि. अ. १६)

अधिमांसकमाह—हानव्य इत्यादि। अधिमांसक इति संज्ञायां कन्। हानव्य इति हनुकुहरे। पश्चिम इत्यवसानजे, अन्तजे इति यावत् ॥—

---

* 'वेष्टेषु दन्तवेष्टनमांसेषु दाहः पाकश्च स्यात्। दन्ताश्चलन्ति (आघट्टिता आचालिताः शोणितं स्रवन्ति, मन्दरुजः, रक्ते स्रुते सति ते तस्याध्मायन्ते, मुखं पूति च भवति।) ताभ्यामित्यत्र 'तेभ्य' इति पाठे, तेभ्यो दन्तवेष्टेभ्यः। सोपकुश इति निर्देशोऽसिद्धत्वात्साधुः' (आ० द०) ॥ १७ ॥

† 'दन्तमूलेषु दन्तमांसेषु दन्तकाष्ठादिना घृष्टेषु सत्सु महान् संरम्भो जायते, दन्ताश्च चला भवन्ति, स व्याधिरभिघातजो वैदर्भाख्यः' (आ० द०) ॥ १८ ॥

‡ 'मारुतेन वायुना तीव्रवेदनोऽधिको दन्तो जायते, असौ विकारः खलिवर्धनसंज्ञः' (आ० द०) ॥ १९ ॥

§ 'वायुर्दन्तसमाश्रितः सन् शनैःशनैर्दन्तान् करालान्विषमान् विकटान् कुरुते, स व्याधिः करालो न सिध्यति' (आ० द०) ॥ २० ॥

*दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥ २१ ॥
(सु. नि. अ. १६)

पञ्च दन्तनाडीराह—दन्तेत्यादि। नाड्यः पञ्च ज्ञेया यथेरिता इति नाडीनिदाने यथोक्ता वातपित्तकफसन्निपातागन्तुनिमित्तास्तथा दन्तमांसगता अपि नाड्यः। एताश्च नाडीव्रणसमानलक्षणा अपि शालाक्यसिद्धान्तेन संख्यापूरणाय चिकित्सा-भेदाच्च पुनरुक्ताः ॥ २१ ॥

दन्तगतानष्टौ प्राह—

†दीर्यमाणेष्विव रुजा यस्य दन्तेषु जायते।
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥ २२ ॥
(सु. नि. अ. १६)

सदागतिनिमित्तज इति सदागतिर्वायुः, तस्मान्निमित्ताज्जात इति। सदागतिनिमित्त इति वक्तव्ये सदागतिनिमित्तज इति यत्कृतं तद्बलवद्धेतुजन्यवातकृतत्वबोधनार्थ-मिति कार्तिकः, केवलवातजत्वख्यापनार्थमित्यन्ये ॥ २२ ॥

‡कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः।
अनिमित्तरुजो वाताद्विज्ञेयः क्रिमिदन्तकः ॥ २३ ॥
(सु. नि. अ. १६)

क्रिमिदन्तकमाह—कृष्णच्छिद्र इत्यादि। कृष्णच्छिद्र इति दुष्टरक्तजक्रिमिकृतशोथ-पाकद्वारेण कृष्णच्छिद्र इत्यर्थः। अन्ये 'कृष्णश्चित्र' इति पठन्ति, चित्र इति चित्रवान्, अर्शआदित्वादच्। स्रावीति दन्तमूलेषु स्रावो बोद्धव्यः, दन्तानां नीरसत्वेन स्रावा-भावात्। अनिमित्तरुज इति अवघट्टनादिनिमित्तं विनैव महारुजत्वेन रुजावानिति कार्तिकः ॥ २३ ॥

§वक्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ २४ ॥
(सु. नि. अ. १६)

भञ्जनकलक्षणमाह—वक्रमित्यादि। वक्रं वक्रमिति दन्तभङ्गकारिणा दोषेण वक्र-स्यापि वक्रत्वम् ॥ २४ ॥

---

* 'तासां मध्ये त्रिलिङ्गा नाडी असाध्या' (आ० द०) ॥ २१ ॥

† 'दन्तेषु दीर्यमाणेष्विव दाल्यमानेष्विव भृशं रुजा भवति, स दालनो नाम व्याधिः। असाध्योऽयं व्याधिः' (आ० द०) ॥ २२ ॥

‡ 'कृष्णः कृष्णदन्तकः, छिद्र इति छिद्रवान्, अर्शआदित्वादच्। क्रिमिकृतच्छिद्रत्वात्स-च्छिद्रदन्त इत्यर्थः। चलश्चलद्दन्तः। ससंरम्भः सश्वयथुः। स तथाविधो वातात्क्रिमिदन्तको ज्ञेयः' (आ० द०) ॥ २३ ॥

§ 'यस्मिन् रोगे दन्तभङ्गकारिणा दोषेण वक्रस्यापि वक्रत्वं भवेद्दन्तभङ्गश्च भवेत्; 'जायते' इत्यत्र 'तीव्ररुक्' इति पाठान्तरं; स व्याधिर्भञ्जनक इति ख्यातः कथंभूतः? कफवातकृतः। असाध्योऽयं व्याधिः' (आ० द०) ॥ २४ ॥

*शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ २५ ॥
(सु. नि. अ. १६)

दन्तहर्षलक्षणमाह—शीतेत्यादि। 'शीतमुष्णं च दशनाः सहन्ते स्पर्शनं न च। यस्य तं दन्तहर्षं तु व्याधिं विद्यात् समीरणात्'—इति श्लोकान्तरं पठन्ति। तत्र दन्तहर्षस्य वातजत्वेऽप्युष्णासहत्वं व्याधिप्रभावात्, कफरक्तावृतत्वाद्वा बोद्धव्यम् ॥ २५ ॥

†मलो दन्तगतो यस्तु पित्तमारुतशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ २६ ॥
(सु. नि. अ. १६)

दन्तशर्करालक्षणमाह—मल इत्यादि। 'शर्करेव खरस्पर्शा' इत्यस्य स्थाने 'सा दन्तानां गुणहरी' इति क्वचित् पठ्यते, दन्तानां गुणस्य शुक्लत्वदृढत्वादिकस्य हरणशीला ॥ २६ ॥

‡कपालेष्विव दीर्यत्सु दन्तानां सैव शर्करा।
कपालिकेति विज्ञेया सदा दन्तविनाशिनी ॥ २७ ॥
(सु. नि. अ. १६)

कपालिकालक्षणमाह—कपालेष्वित्यादि। कपालेष्विवेति मलसहितदन्तावयवेषु काठिन्यात् कपालतुल्येषु; दन्तमल एव कठिने कपालप्राये दीर्यमाणे सैव शर्करा कपालिका। सदेति बाल्यादौ। अत्रावकाशे हनुमोक्षः सुश्रुते दन्तदेशसामीप्याद्दन्तपीडनाच्च पठितः, स इह संग्रहकारेण मुख्यदन्तगतत्वाभावान्न पठितः, पठितस्तु हनुग्रहसंज्ञया वातव्याधौ भोजवचनात्। यदुक्तं,—"वाताभिघाताजन्तोर्हि हनुसन्धिर्विमुच्यते। निरस्तजिह्वः कृच्छ्रेण भाषितं तत्र गच्छति ॥ सम्यक् तमनिलव्याधिं हनुमोक्षं विनिर्दिशेत्"—इति ॥ २७ ॥

§योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥ २८ ॥

---

* 'यस्य द्विजा दन्ताः शीतस्य भक्ष्यस्य प्रवातस्य प्रचण्डवातस्याम्लस्यासहा अक्षमा भवन्ति, स नामतः प्रसिद्धितः कफमारुतकोपेन दन्तहर्षो ज्ञेयः। भक्ष्य इत्यत्र "रूक्ष" इति पाठान्तरम्' (आ० द०) ॥ २५ ॥

† 'यो दन्तगतो मलः कफमारुतशोषितो भवति सा दन्तशर्करा। तथा च वाग्भटः—"अधावनान्मलो दन्ते कफवातेन शोषितः। पूतिगन्धः स्थिरीभूतः शर्करा साऽप्युपेक्षिता"—इति' (आ० द०) ॥ २६ ॥

‡ 'दन्तविनाशिनी। "दलन्ति दन्तवल्कानि यदा शर्करया सह" इति केचित्पठन्ति, तत्रापि स एवार्थः' (आ० द०) ॥ २७ ॥

§ 'श्यावदन्तकमाह—य इत्यादि। यो दन्तोऽसृग्विमिश्रेण पित्तेनाशेषतो दग्धस्तथा श्याव-

---

१ अयं "रूक्ष—" इत्यत्र "भक्ष्य—" इत्येव पाठं मुख्यं मनुते।

दन्तमांसे मलैः सास्रैर्बाह्यान्तः श्वयथुर्गुरुः।
सदाहरुक् स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥ २९ ॥
(सु. नि. अ. १६)

*जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा।
पित्तेन दह्यत्युपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च।
कफेन गुर्वी बहुलाचिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः॥३०॥
(सु. नि. अ. १६)

संप्रति जिह्वागतानाह—जिह्वाऽनिलेनेत्यादि। स्फुटितेति मनाग्विदीर्णा। प्रसुप्तेति सुप्तेव, रसस्यानवबोधात्। शाकच्छदनप्रकाशेति शाकतरुपत्रवत् कण्टकाचितेत्यर्थः; शाको मरुजद्रुमः। पैत्तिककण्टकलक्षणे दह्यतीति आत्मनेपदानित्यत्वात् साधु। अयं च रोगो जाडीति ख्यातः ॥ ३० ॥

†जिह्वातले यः श्वयथुः प्रगाढः
सोऽलाससंज्ञः कफरक्तमूर्तिः।
जिह्वां स तु स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥ ३१ ॥
(सु. नि. अ. १६)

अलासमाह—जिह्वेत्यादि। प्रगाढ इति प्रकर्षेण गाढो दारुण इत्यर्थः। तेन 'जिह्वागतेष्वलासस्तु' इत्यादिनाऽलसस्यासाध्यतोक्ता सूच्यते। कफरक्तमूर्तिरिति कफरक्ताभ्यां हेतुभ्यां लब्धमूर्तिः। कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः, भृशपाकेन पित्तं, अतस्त्रिदोषजो ज्ञेयः, अत एवास्यानुपक्रमेणासाध्यत्वं, कफरक्तयोस्तु प्राधान्येनाभिधानम्। 'अधोगतः' इति पाठान्तरे जिह्वाया अधोगतः ॥ ३१ ॥

‡जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तमूलः
लालाकरः कण्डुयुतः सचोषः सा तूपजिह्वा पठिता भिषग्भिः ३२
(सु. नि. अ. १६)

तामथवा नीलतां गतो भवति, स श्यावदन्तको ज्ञेयः। श्यावदन्तक इति संज्ञायां कन्। असाध्योऽयं व्याधिः' (आ० द०) ॥ २८ ॥ २९ ॥

* 'सुप्तेति सुप्तेव रसस्यानवबोधादचेतनेत्यर्थः। सरक्तैः कण्टकैर्व्याप्ता। अयं च रोगो नाडीति ख्यातः। 'पित्तात्सदाहैरुपचीयते तु दीर्घैः' इति पाठान्तरे पित्ताज्जिह्वा एवंविधैः कण्टकैर्व्याप्यते। कफकण्टकानाह–कफेनेत्यादि। कफेन दूषिता जिह्वा गुर्वी बहुला स्थूला शाल्मलिकण्टकाभैर्मांसोच्छ्रयैर्मांसाङ्कुरैश्चिता व्याप्ता भवतीति संबन्धः' (आ० द०) ॥ ३० ॥

† 'यो जिह्वातले श्वयथुः, सोऽलासनामा विकारः, स तु शोफः प्रवृद्धो जिह्वां स्तम्भयति, जिह्वामूले भृशं पाकं प्राप्नोति' (आ० द०) ॥ ३१ ॥

‡ 'उन्नम्य ऊर्ध्वीकृत्य, एतेन जिह्वाया अधो भवतीत्युक्तं, जिह्वाग्ररूपो जिह्वाग्रसन्निभः, कफरक्तमूलः कफरक्तकारणम्। भिषग्भिः सा उपजिह्विका पठिता' (आ० द०) ॥ ३२ ॥

१ चक्षिङो ङित्करणेनाऽनुदात्तेत्त्वलक्षणाऽऽत्मनेपदस्याऽनित्यत्वेऽपि "भावकर्मणोः" इति विहितात्मनेपदस्याप्यनित्यत्वेनात्र—साधुत्वसाधनं—साध्वसाधु—वेति—सुधीभिरेवानुसंधेयम्; कण्ड्वादेराकृतिगणत्वादेतत्सूपपादमिति परे।

उपजिह्विकामाह—जिह्वाग्ररूप इत्यादि । सचोष इति चोषः साक्षादग्निसंबन्धेनेवोपतापः, चोषश्चात्र रक्तयोनिना पित्तेन ॥ ३२ ॥

तालुगतानाह—

*श्लेष्मासृग्भ्यां तालुमूले प्रवृद्धो
दीर्घः शोथो ध्मातवस्तिप्रकाशः ।
तृष्णाकासश्वासकृत्तं वदन्ति
व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना ॥ ३३ ॥

(सु. नि. अ. १६)

कण्ठशुण्डीमाह—श्लेष्मासृग्भ्यामित्यादि । ध्मातवस्तिप्रकाश इति वायुपूरितचर्मपुटतुल्यः ॥ ३३ ॥

शोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु ।

(सु. नि. अ. १६)

तुण्डिकेरीलक्षणमाह—शोथ इत्यादि । प्रागुक्ताभ्यामिति श्लेष्मासृग्भ्याम् । तुण्डिकेरी वनकार्पासीफलं, तत्तुल्यशोथतया तुण्डिकेरी । तोददाहाभ्यामिह वातपित्तानुबन्धो ज्ञेयः ॥—

†मृदुः शोथो लोहितः शोणितोत्थो
ज्ञेयोऽध्रुषः सज्वरस्तीव्ररुक् च ॥ ३४ ॥

(सु. नि. अ. १६)

अध्रुषलक्षणमाह—मृदुरित्यादि । शोणितोत्थ इति रक्तसमुत्थः ॥ ३४ ॥

‡कूर्मोन्नतोऽवेदनोऽशीघ्रजन्मा
रोगो ज्ञेयः कच्छपः श्लेष्मणा तु ।

(सु. नि. अ. १६)

कच्छपलक्षणमाह—कूर्मोन्नत इत्यादि । अवेदन इत्यल्पवेदनः । अशीघ्रजन्मेति चिरजः ॥—

§पद्माकारं तालुमध्ये तु शोथं
विद्याद्रक्तादर्बुदं प्रोक्तलिङ्गम् ॥ ३५ ॥
दुष्टं मांसं नीरुजं तालुमध्ये
कफाच्छूनं मांससंघातमाहुः ।

(सु. नि. अ. १६)

---

* 'श्लेष्मरक्ताभ्यां तालुमूले प्रवृद्धस्तथा दीर्घः प्रलम्बः शोफः कण्ठशुण्डीति गलशुण्डीति नाम्नाऽयं व्याधिः पठितः' (आ० द०) ॥ ३३ ॥

† 'स्तम्भादिलक्षणः शोथोऽध्रुषो ज्ञेयः । अध्रुष इति छन्दोनुरोधात्' (आ० द०) ॥ ३४ ॥

‡ 'कूर्मोन्नतः कूर्मवदुन्नतः, अवेदन इत्यल्पव्यथः, अशीघ्रजन्मेति चिरजः मन्दानुसारीत्यर्थः, अरक्तः पाण्डुरः' (आ० द०)—

§ 'तालुमध्ये उक्तलिङ्गं शोफं रक्तार्बुदं विद्यात् । मांससंघातमाह—दुष्टमित्यादि । अत्र केचित् "दुष्टं मांसं श्लेष्मणा नीरुजं वा ताल्वन्तःस्थम्" इति पठन्ति' (आ० द०) ॥ ३५ ॥

ताल्वर्बुदमाह—पद्माकारमित्यादि । पद्माकारमिति पद्मकर्णिकाकारम् । तथाच भोजः,–"उपर्येव भवेन्नद्धो यथा पद्मस्य कर्णिका । पार्श्वतश्चाङ्कुरैर्दीर्घैर्नासा चाप्यवसीदति ॥ श्लेष्मरक्तसमुत्थानं तत्ताल्वर्बुदसंज्ञितम्"–इति । रक्तजत्वाल्लोहितम् । प्रोक्तलिङ्गमिति पूर्वोक्तरक्तार्बुदतुल्यलिङ्गमित्यर्थः ॥ ३५ ॥—

*नीरुक् स्थायी कोलमात्रः कफात् स्या-
न्मेदोयुक्तात् पुप्पुटस्तालुदेशे ॥ ३६ ॥
शोषोऽत्यर्थं दीर्यते चापि तालुः
श्वासश्चोग्रस्तालुशोषोऽनिलाच्च ।
पित्तं कुर्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ॥ ३७ ॥

(सु. नि. अ. १६)

पुप्पुटमाह—नीरुगित्यादि । पुप्पुटस्तालुदेशे इति तालुपुप्पुटः । तालुशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः । 'तालुशोषस्तु पित्तात्' इति केचित् पठन्ति, पित्तस्यापि शोषकत्वात् । केचित्तु वक्ष्यमाणं 'पित्तं कुर्यात्' इति पदमत्रापि संबध्य श्वासश्चोग्र इति चकारं भिन्नक्रमेण योजयित्वा विभक्तिविपरिणामं च कृत्वा पित्तं तालुशोषं कुर्यादिति व्याचक्षते । किंत्वयं भोजेऽपि वातादेव पठितः । यदुक्तं,–"तालुशोषो भवेद्वातात्"–इत्यादि ॥ ३६ ॥ ६७ ॥

†गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसं च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाऽङ्कुरै-
र्निहन्त्यसून् व्याधिरयं हि रोहिणी ॥ ३८ ॥

(सु. नि. अ. १६)

कण्ठगतास्तु रोहिण्यादयः सप्तदशोच्यन्ते, तत्र पञ्चानां रोहिणीनां सामान्यसंप्राप्तिमाह—गलेऽनिल इत्यादि । सर्वरोहिण्यः सन्निपातजाः, उत्कर्षाद्वातजादिव्यपदेशः ।

---

* 'स्थायी स्थिरः, कोलमात्रः कोलसमः 'पुप्पुटः' इति तालुनि देशे पुप्पुटस्तालुपुप्पुटः, तालुशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः । तालुशोषमाह–शोष इत्यादि । तालुन्यत्यर्थं शोषः, तथा तालु दीर्यते, तथोग्रः श्वासो भवति, सोऽनिलोत्थस्तालुशोषो ज्ञेयः । वाग्भटेन तु वातपित्ताभ्यां तालुशोषः पठितः । तथाहि–"वातपित्तज्वरायासैस्तालुशोषस्तदाह्वयः"–इति' (आ० द०) ॥ ३६ ॥ ३७ ॥

† 'गलेऽनिलो वृद्धः, तथा पित्तकफौ मूर्च्छितौ विदग्धौ, मांसं प्रदूष्य, तथा शोणितं प्रदूष्य, गलोपसंरोधकरैरङ्कुरैरसून्निहन्ति, अयं व्याधिः रोहिणीसंज्ञो ज्ञेयः । अस्मिन् पाठे तु संख्या वातपित्तकफसंबन्धिक्रियापदं च न विद्यते । तस्मादन्ये "गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक्समस्ताश्च तथैव शोणितम् । प्रदूष्य मांसं गलरोधिनोऽङ्कुरान्सृजन्ति यान् साऽसुहरा तु रोहिणी"–इति पठित्वा सुश्रुते एकदोषजत्वमित्याहुः । पृथगिति तिस्रः, समस्तादेका, एका शोणितात्, एवं पञ्च रोहिण्यः । असुहराः प्राणहराः' (आ० द०) ॥ ३८ ॥

अन्ये तु 'पृथक् समस्ताश्च तथैव शोणितं' इति पठित्वा सुश्रुते एकदोषजत्वमप्याहुः। भोजेऽप्युक्तं,–"वातपित्तकफा रक्तमेकशः सर्वशोऽपि वा। कण्ठं यदा निषेवन्ते"–इत्यादि। निहन्त्यसूनित्यनेन यद्यपि सामान्येनासाध्यत्वमुक्तं तथाऽपि सप्ताहादिना पृथग्दोषत्रयजानामनुक्रमेणासाध्यत्वं, एवं रक्तजाया अपि, सन्निपातजायास्तु जन्मनैवासाध्यत्वम्। तदुक्तं भोजेन,–"तालुः शुष्यति कण्ठश्च वातेनायाम्यते यदा। कण्ठेऽस्यान्नं प्रसज्येत सप्ताहात् स जहात्यसून्॥ उष्यते चूष्यते पित्तात् धूप्यते परिदह्यते। अङ्गारैरिव जह्यात् स प्राणानाशु चतुर्दिनात्"–इति। "कफादन्तर्बहिः शोथः श्वासः कण्ठश्च बाध्यते। यस्य सोऽसून् त्यजेद्रोगी त्र्यहाद्रोहिणिपीडितः॥ लक्षणं पित्तरोहिण्या तुल्यं शोणितजन्मनः। सर्वदोषकृता या तु सर्वलिङ्गसमन्विता। असाध्यां तां विजानीयाद्रोहिणीं सन्निपातजाम्। एषा सद्यो मारयति तिस्र आद्याः क्रियां विना"–इति क्वचित्। भोजे 'अन्या सद्यो मारयति' इति पाठः, तदा रक्तजायामप्यसाध्यत्वमायाति; किंत्वियं साध्यैव, यदुक्तं,–"लेख्याश्चतस्रो रोहिण्यः" (सु. सू. अ. २५)–इति। तथा,–"साध्यानां रोहिणीनां तु हितं शोणितमोक्षणम्" (सु. चि. स्था. अ. २२)–इत्यनेन रक्तजाया अपि चिकित्सोक्ता। किंच गलगतेष्वेकैव रोहिणी सन्निपातजा 'रोहिणी गले' इत्यनेनासाध्योक्ता। भोजे तु "तिस्र आद्याः क्रियां विना" इत्यभिधानं त्रिदोषजत्वेन प्राधान्यमभिप्रेत्य, खरनादेऽपि सन्निपातजाया एव सद्योमारकत्वमुक्तम्। यदाह,–"सद्यस्त्रिदोषजा हन्ति त्र्यहाच्छ्लेष्मसमुद्भवा। पञ्चाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता"–इति॥ ३८॥

*जिह्वासमन्ताद्भृशवेदनास्तु मांसाङ्कुराः कण्ठविरोधिनो[१] ये।
सा रोहिणी वातकृता प्रदिष्टा वातात्मकोपद्रवगाढयुक्ता॥ ३९॥
क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजा तु।
स्रोतो विरोधिन्यचलोद्गता च स्थिराङ्कुरा या कफसंभवा सा ४०
गम्भीरपाकिन्यनिवार्यवीर्या त्रिदोषलिङ्गा त्रितयोत्थिता च।
स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु ४१
(सु. नि. अ. १६)

वातजादिभेदेन रोहिणीलक्षणमाह–जिह्वेत्यादि। जिह्वासमन्तादिति जिह्वायाः सर्वत इत्यर्थः। वातात्मकोपद्रवगाढयुक्तेति वातात्मका उपद्रवाः कम्पविनामसम्भादयस्तैरतिशयमनुगता। त्रिदोषजायामनिवार्यवीर्येति क्रिययाऽपि न निवार्यं वीर्यमस्याः, सद्योमारकत्वादित्यर्थः। त्रितयोत्थितेति दोषत्रयोत्थिता। पित्तलिङ्गाविदेशस्याव्यवहितत्वप्रतीत्यर्थं पित्तरोहिण्यनन्तरं रक्तजाया वक्तुमुचिताया; शेषेऽभिधानमितररोहिण्यपेक्षया सुखसाध्यत्वख्यापनार्थमिति केचित्॥ ३९–४१॥

* 'ये मांसाङ्कुरा जिह्वासमन्ताद्भवन्ति ते भृशवेदनाः, तथा कण्ठनिरोधनाः, सा वातकृता रोहिणी प्रदिष्टा' (आ० द०)॥ ३९–४१॥

१ कंठविरोधिना स्युः इति ख.।

क्रोलास्थिमात्रः कफसंभवो यो ग्रन्थिर्गले यो कण्टकशूकभूतः।
खरः स्थिरः शस्त्रनिपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति ॥४२॥
(सु. नि. अ. १६)

कण्ठशालूकलक्षणमाह—कोलेत्यादि। कण्टकशूकभूत इति कण्टवत् शूकवच्च वेदनाजनकः, भूतशब्द उपमानार्थे; किंवा कण्टकोपलक्षितः शूको जलशूकः, स इव भूतो जातः। कठिनगुडकतया शालूकसमत्वेन कण्ठशालूकम्। शालूकं जलोत्पलकन्दम्॥ ४२॥

*जिह्वाग्ररूपः श्वयथुः कफात्तु जिह्वोपरिष्टादपि रक्तमिश्रात्।
ज्ञेयोऽधिजिह्वः खलु रोग एष विवर्जयेदागतपाकमेनम्॥ ४३॥
(सु. नि. अ. १६)

अधिजिह्विकामाह—जिह्वाग्ररूप इत्यादि। जिह्वोपरिष्टादित्यनेन जिह्वातलजातासुपजिह्वां व्यावर्तयति। अपि रक्तमिश्रादिति न केवलात् कफाद्भवति, किंतु रक्तमिश्रादेव कफादित्यर्थः। अपिरवधारणे। आगतपाकत्वेन पित्तमप्यत्र द्रष्टव्यम्॥ ४३॥

†बलास एवायतमुन्नतं च शोथं करोत्यन्नगतिं निवार्य।
तं सर्वथैवाप्रतिवार्यवीर्यं विवर्जनीयं वलयं वदन्ति॥ ४४॥
(सु. नि. अ. १६)

वलयमाह—बलास एवेत्यादि। बलासः कफः। अन्नगतिमिति अन्नस्य गतिर्येन स्रोतसा सोऽन्नगतिरन्नवहमार्गः, अन्नस्य प्रवेशो वा। कफजोऽप्ययं प्रभावादसाध्यः॥ ४४॥

‡गले तु शोथं कुरुतः प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्मच्छिदं दुस्तरमेनमाहुर्बलाशसंज्ञं निपुणा विकारम्॥ ४५॥
(सु. नि. अ. १६)

बलाशलिङ्गमाह—गल इत्यादि। मर्मच्छिदमिति प्राणायतनहृदयमर्मच्छिदम्॥ ४५॥

वृत्तोन्नतोऽन्तः श्वयथुः सदाहः सकण्डुरोऽपाक्यमृदुर्गुरुश्च।
नाम्नैकवृन्दः परिकीर्तितोऽसौ व्याधिर्बलाशक्षतजप्रसूतः॥ ४६॥
(सु. नि. अ. १६)

एकवृन्दमाह—वृत्तोन्नत इत्यादि। अन्तःश्वयथुरिति गलस्यान्तर्मध्ये। सदाह इति मन्ददाहः, सहशब्द ईषदर्थे। अपाक्यमृदुरिति अपाकी ईषत्पाकी, अमृदुरीष-

---

* 'जिह्वोपरिष्टादित्यत्र 'जिह्वाप्रबन्धोपरि' इति पाठान्तरे, जिह्वाप्रबन्धस्योपरि जिह्वामूलस्योपरिष्टादित्यर्थः' (आ० द०)॥ ४३॥

† अन्नवहस्रोतोऽन्नप्रवेशं वा निवार्य, आयतमुन्नतं शोफं करोति; बुधास्तं सर्वथाऽप्रतिवार्यवीर्यं विवर्जनीयं वलयाख्यं व्याधिं वदन्ति। कफजोऽप्ययं स्थानप्रभावात् स्वभावाच्चासाध्यः' (आ० द०)॥ ४४॥

‡ 'प्रवृद्धौ श्लेष्मानिलौ श्वासरुजाभ्यामुपपन्नं सहितं शोफं कुरुतः, निपुणा धीमन्त एनं विकारं बलाशसंज्ञमाहुः' (आ० द०)॥ ४५॥

न्मृदुः, अन्ये 'अपाकमृदुः' इति पठन्ति, अपाकश्चासौ मृदुश्चेति अपाकमृदुः । बलाशक्षतजप्रसूत इति कफरक्तभव इत्यर्थः ॥ ४६ ॥

समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति ।
तच्चापि पित्तक्षतजप्रकोपाज्ज्ञेयं सतोदं पवनात्मकं तु ॥ ४७ ॥
(सु. नि. अ. १६)

वृन्दमाह—समुन्नतमित्यादि । वृन्दमेव पवनानुविद्धं सतोदं स्यात् । ननु, सप्तदश कण्ठगता उक्ताः; उक्तं हि,–'सप्तदशामयाः कण्ठे'–इति, वृन्देन सहाष्टादश स्युः? उच्यते, एकवृन्दस्यावस्थाविशेष एव वृन्दः, तुल्यस्थानाकृतितो न संख्यातिरेकः; यद्यप्येकवृन्दः कफरक्तजः, वृन्दस्तु पित्तरक्तजः पठितः, तथा वृन्दस्यैव सतोदत्वेन वातात्मकत्वमुक्तं, तथाऽप्येकवृन्दस्यावस्थाविशेपत्वेन वृन्दः प्रच्छन्न एव; यथा कामलायां तद्भिन्नहेतुलक्षणस्यापि हलीमकस्य संग्रहः, यथा वातमदात्ययेन ध्वंसकविक्षेपकयोरत्यन्तामेदेऽपि स एव स्यान्न पुनस्तेन संग्रहः, भोजेऽप्ययमेकवृन्दज एव पठितः । यदाह,–"श्लेष्मरक्तसमुत्थानमेकवृन्दं विभावयेत् । तुल्यस्थानाकृतिर्वृन्दो वृन्दजो रक्तपित्तजः"–इति । वृन्दज इत्येकवृन्दजः । गदाधरस्तु कारणमेदाद्धर्ममेदाच्चोत्पन्नत्वेन चैककार्यकारणयोरमेदप्रसङ्गमभिधाय वृन्दशब्दं छन्दोनुरोधादादिलोपादेकवृन्द एव वर्णयति, तथाच सति समुन्नतमित्यादिना पित्तानुबन्धसहितबहुलरक्तकृतैकवृन्दस्य लक्षणमुच्यते, सतोदं पवनात्मकं चेत्यनेन च वातानुबन्धैकवृन्दलक्षणमिति व्याख्येयम् । परं तु वृन्दजो वृन्द इति भोजवचनेनासंगतमिदं व्याख्यानम् ॥ ४७ ॥

***वर्तिर्घना कण्ठनिरोधिनी या चिताऽतिमात्रं पिशितप्ररोहैः ।**
अनेकरुक् प्राणहरी त्रिदोषाज्ज्ञेया शतघ्नी च शतघ्निरूपा ॥ ४८ ॥
(सु. नि. अ. १६)

शतघ्नीलक्षणमाह—वर्तिरित्यादि । अनेकरुगिति वातपित्तकफजतोददाहकण्ड्वादिवेदनान्वितेत्यर्थः । शतघ्निरूपेति अयःकण्टकाच्छन्ना महती शिला शतघ्नी तत्तुल्या । प्राणहरीत्यसाध्या । भोजेऽप्युक्तं,–"शङ्कुनेव गले विद्धा शतघ्न्येषा न सिध्यति"–इति ॥ ४८ ॥

ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽतिरुग्यः कफरक्तमूर्तिः ।
संलक्ष्यते सक्तमिवाशनं च स शस्त्रसाध्यस्तु गलायुसंज्ञः ॥ ४९ ॥
(सु. नि. अ. १६)

गलायुलक्षणमाह—ग्रन्थिरित्यादि । कफरक्तमूर्तिरिति कफरक्तजः । सक्तमिवेति लग्नमिव, अशनं भुक्तम् ॥ ४९ ॥

---

* 'भोजेऽप्युक्तम् "वातपित्तकफा दुष्टा मांसाङ्कुरसमान्विताम् । मध्यकण्ठचर्या वर्ति जनयन्ति ह्युपेक्षिताः ॥ शङ्कुनेव गले विद्धा शतघ्न्येषा न सिध्यति"–इति' (आ० द०) ॥४८॥

सर्वं गलं व्याप्य समुत्थितो यः शोथो रुजः सन्ति च यत्र सर्वाः ।
स सर्वदोषैर्गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्वजस्य ॥ ५० ॥
(सु. नि. अ. १६)

गलविद्रधिलिङ्गमाह—सर्वमित्यादि । तस्यैव तुल्यः खलु सर्वजस्येति प्रागुक्तस्य विद्रधेः सन्निपातजस्य तुल्य इत्यर्थः । स च स्थानप्रभावेण सन्निपातज एव, चिकित्साभेदार्थं च पुनः पठितः ॥ ५० ॥

शोथो महानन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्यते तु ॥ ५१ ॥
(सु. नि. अ. १६)

गलौघलक्षणमाह—शोथ इत्यादि । वायुगतेर्निहन्तेति अतिमहत्त्वादुदानवायुगतिरोधक इत्यर्थः ॥ ५१ ॥

यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥५२॥
(सु. नि. अ. १६)

स्वरघ्नलक्षणमाह—य इत्यादि । ताम्यमान इति मूर्च्छां गच्छन्, अथवा तमः पश्यन् । श्वसिति प्रसक्तमिति निरन्तरं श्वसिति । शुष्कविमुक्तकण्ठ इति शुष्को नीरसो विमुक्तश्चास्वाधीनः कण्ठो यस्य स तथा । अस्वाधीनता च किमपि गिलितुमशक्यतया बोद्धव्या । अनिलायनेष्विति अनिलमार्गेषु कफरुद्धेषु सत्सु, वायुगतस्रोतसोर्द्वित्वेऽपि बहुवचनं प्रतानबहुत्वात् । श्वसनादिति वातात् ॥ ५२ ॥

*प्रतानवान् यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी प्राणप्रणुत् सर्वकृतो विकारः ॥५३॥
(सु. नि. अ. १६)

मांसतानलिङ्गमाह—प्रतानवानित्यादि । प्रतानवानिति विस्तारवान् । सुकष्ट इति महादुःखप्रदायी, न तु कृच्छ्रसाध्यः, प्राणप्रणुदिति वचनात्; अथवा पाकतः कष्टसाध्यः, समस्तगलोपरोधे तु प्राणप्रणुत् । 'स मांसतानः कथितोऽवलम्बी'—इत्यस्य स्थाने 'स मांसतानेति बिभर्ति संज्ञाम्'—इति पाठान्तरे मांसतानेत्यत्रेतिशब्देन प्रातिपदिकार्थस्योक्तत्वाद्विभक्त्यभावः । 'बिभर्ति संज्ञाम्' इत्यस्य स्थाने 'निरुणद्धि चेद्यम्'—इति कार्त्तिकः । अस्मिन् व्याख्याने स मांसतान इत्यस्यानन्तरं ख्यात इति द्रष्टव्यम् ॥ ५३ ॥

†सदाहतोदं श्वयथुं सुताम्रमन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात् स तु येन शेते ॥ ५४ ॥
(सु. नि. अ. १६)

---

* 'अवलम्बी लम्बनशीलः' (आ० द०) ॥ ५३ ॥

† 'पूतिविशीर्णमांसं दुर्गन्धशटितमांसम्' (आ० द०) ॥ ५४ ॥

विदारीलक्षणमाह—सदाहतोदमित्यादि। वदन इति स्वरूपपरमिदं, अन्तर्गल इत्यनेनैव वदनशब्दस्य लब्धत्वात्। पार्श्वे विशेषात् स तु येन शेते इति स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन्नेव पार्श्वे विदारी भवतीत्यर्थः। विशेषग्रहणादन्यस्मिन् पार्श्वेऽपि संभवोऽस्याः। विदारीसंज्ञा च मांसविदारणेन। भोजेऽप्युक्तं,—"पित्तेन जातो वदने विकारः पार्श्वे विशेषात् स तु येन शेते। स्नायुप्रतानप्रभवो विशेषाद्दाहप्रपाकप्रचुरो विदारी"—इति ॥ ५४ ॥

स्फोटैः सतोदैर्वदनं समन्ताद्यस्याचितं सर्वसरः स वातात्।
रक्तैः सदाहैस्तनुभिः सपीतैर्यस्याचितं चापि स पित्तकोपात्।
अवेदनैः कण्डुयुतैः सवर्णैर्यस्याचितं चापि स वै कफेन ॥ ५५ ॥
(सु. नि. अ. १६)

सर्वसरास्त्रयोऽभिधीयन्ते—स्फोटैरित्यादिना। मुखगतोष्ठादिसर्वस्थानव्यापकतया सर्वसरत्वं ज्ञेयम्। स्फोटैरिति वदनमिति चोत्तरत्र संबन्धनीयम्। आचितं व्याप्तम्। सर्वसरा मुखपाका उच्यन्ते। केचिद्विदेहोक्तरक्तजसर्वसरलक्षणं पठन्ति। यथा,—"रक्तेन पित्तोदित एव चापि कैश्चित् प्रदिष्टो मुखपाकसंज्ञः"—इति। अयं च पैत्तिक एवान्तर्भूत इति नेह दर्शित इति ॥ ५५ ॥

***ओष्ठप्रकोपे वर्ज्याः स्युर्मांसरक्तत्रिदोषजाः।**
दन्तमूलेषु वर्ज्यौ च त्रिलिङ्गगतिशौषिरौ ॥ ५६ ॥
दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः।
जिह्वारोगे वलासस्तु तालव्येष्वर्बुदं तथा ॥ ५७ ॥
स्वरघ्नो वलयो वृन्दो वलासश्च विदारिका।
गलौघो मांसतानश्च शतघ्नी रोहिणी गले ॥ ५८ ॥
असाध्याः कीर्तिता ह्येते रोगा नव दशैव तु।
तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥ ५९ ॥
(सु. नि. अ. १६)

इति श्रीमाधवकरविरचिते माधवनिदाने मुखरोगनिदानं समाप्तम् ॥ ५६ ॥

ओष्ठप्रकोपादिष्वसाध्यानाह—ओष्ठप्रकोपे इत्यादि। त्रिलिङ्गगतिशौषिराविति त्रिदोषजनाडी त्रिदोषजश्च महाशौषिरोऽसाध्यः। रोहिणी गल इति त्रिदोषजा रोहिणी ॥ ५६–५९ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां मुखरोगनिदानं समाप्तम् ॥ ५६ ॥

---

* 'ओष्ठआश्रयः, दन्तमूले द्वौ, दन्तभवेषु त्रयः, जिह्वागतेष्वेकः तालुन्यप्येक एव, स्वरघ्नादयो नव गले, समुदायसंख्या नवदशैवेति। सह दारिणेति विदार्या सह, छन्दोनुरोधाद्दारिणेति निर्देशः, रोहिणी गल इति त्रिदोषजा रोहिणी' (आ० द०) ॥ ५६–५९ ॥

---

१ "वलासश्च विदारिका" इत्यत्र "वलासः सह दारिणा" इति पाठाभिप्रायेण।

अथ कर्णरोगनिदानम्।

*समीरणः श्रोत्रगतोऽन्यथाचरन् समन्ततः शूलमतीव कर्णयोः।
करोति दोषैश्च यथास्वमावृतः स कर्णशूलः कथितो दुराचरः॥१॥
(सु. उ. अ. २०)

मुखरोगे जिह्वाश्रयरोगोऽभिहितः, जिह्वा चेन्द्रियाधिष्ठानं; अत इन्द्रियाधिष्ठानदुष्टिसाम्यात् कर्णरोगनिदानमुच्यते, कर्णशष्कुल्यवच्छिन्नमदृष्टोपगृहीतं श्रोत्रमुच्यते, तत्र यद्यप्येकदेशगतो रोगस्तथाऽप्यवयवेऽपि समुदायोपचारतः कर्णव्यपदेशः। तत्र कर्णशूलं कष्टत्वात् प्रागाह—समीरण इत्यादि। अत्रानयैव संप्राप्त्याऽर्थतो निदानसंचयाद्याक्षिप्तं; यतो निदानात् संचयः, संचयात् प्रकोपः, प्रकोपात् प्रसरः, प्रसरात् स्थानसंश्रयः, ततो व्यक्तिः, ततो भेद इति। कर्णशूलस्य च कष्टत्वं मूर्च्छाद्युपद्रवयोगात्। यदाह विदेहः,—"मूर्च्छा दाहो ज्वरः कासो हृल्लासो वमथुस्तथा। उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः"—इति। अन्यथाचरन्निति प्रतिलोमं चरन्। दोषैरिति कफपित्तरक्तैः, रक्तेऽपि रुजाकर्तृत्वात् सामान्येन दोषव्यपदेशः। यथास्वमावृत इति स्वनिदानकुपितदोषैर्यथास्वीयलक्षणैरावृतो न तु कोपितैर्वायुना; 'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्' इति न्यायात्; यतः स्वतन्त्रकुपिता दोषाः संसर्गभाजो भवन्ति, परतन्त्रकुपितास्त्वनुबन्धरूपा भवन्ति; अथवा यथास्वमिति शूलविशेषणं, यथास्वीयमित्यर्थः। दुराचर इति दुःखेनाचर्यत इति दुराचरः॥ १॥

†कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान्।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते॥ २॥
(सु. चि. अ. २०)

यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति।
शुद्धः श्लेष्मान्वितो वाऽपि बाधिर्यं तेन जायते॥ ३॥

कर्णनादमाह—कर्णस्रोतःस्थित इत्यादि। यदा कर्णस्रोतसि विविधप्रकारेणावस्थितो वायुर्भवति तदा तस्य विविधाभिहननादुक्तविविधशब्दश्रवणं, भेरीमृदङ्गशङ्खा-

---

* 'श्रोत्रगतः श्रोत्रं शष्कुलीपरिच्छिन्नाकाशः, समीरणो वायुः, श्रोत्रगतः श्रोत्रप्राप्तः, अन्यथाचरन्निति प्रतिलोमं चरन् विमार्गग इति वा; चरन् समन्ततः कर्णयोरतीव शूलं करोतीति संबन्धनीयम्। रक्तेऽपि रुजादिकर्तृत्वेन दोषसाम्याद्दोषव्यपदेशः। यथास्वमावृत इति यथास्वमत्र स्वस्य दोषस्यानतिक्रमेण यथास्वम्। स तथाविधो रोगः कर्णशूलः कथितः। किंविशिष्टः? दुरासदो दुर्वारः, 'दुराचरः' इति पाठे दुःखेन आचर्यते उपचर्यत इति दुराचरः' (आ० द०)॥ १॥

† 'प्रणादस्यापीडाकरत्वेऽपि रोगाख्या, तिलकालकवन्मनोदुःखजनकत्वात्। शब्दवहं स्रोतः कर्णशष्कुलीपरिच्छिन्नमाकाशं, तद्गतवातजनितमत्र बाधिर्यं, अपिशब्दाद्रक्तपित्तावरणयोरुपग्रह इति' (आ० द०)॥ २॥ ३॥

---

१ अस्यायमेवेष्टः पाठः।

नामित्युपलक्षणं, तेन भृङ्गारादिशब्दश्रवणं च भवति । यदुक्तं विदेहे,—"शिरोगतो यदा वायुः श्रोत्रयोः प्रतिपद्यते । तदा तु विविधान् शब्दान् समीरयति कर्णयोः ॥ भृङ्गारकौञ्चनादं वा मण्डूककाकयोस्तथा । तन्त्रीमृदङ्गशब्दं वा सामतूर्यस्वनं तथा ॥ गीताध्ययनवंशानां निर्घोषं क्ष्वेडनं तथा । अपामिव पतन्तीनां शकटस्येव गच्छतः ॥ श्वसतामिव सर्पाणां सदृशः श्रूयते स्वनः"—इति ॥ २ ॥ ३ ॥

वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम् ।
करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते ॥ ४ ॥

कर्णक्ष्वेडमाह—वायुरित्यादि । क्ष्वेडमेव व्याकरोति—वेणुघोषोपमं स्वनमिति । ननु, कर्णनादात् कथमस्य भेदः ? उच्यते, कर्णनादे केवलानिलजे नानाशब्दान् शृणोति, अत्र तु वेणुशब्दमेव नियमेन; तथाऽयं पित्तादिसंसृष्टवातजन्य इति । तथाह विदेहः,—"मारुतः कफपित्ताभ्यां संसृष्टः शोणितेन च । कर्णक्ष्वेडं संजनयेत् क्ष्वेडनं वेणुघोषवत्"—इति ॥ ४ ॥

***शिरोऽभिघातादथवा निमज्जतो**
जले प्रपाकादथवाऽपि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्दितः
स कर्णसंस्राव इति प्रकीर्तितः ॥ ५ ॥

(सु. उ. अ. २०)

कर्णस्रावमाह—शिरोऽभिघातादित्यादि । स्रवेद्धि पूयमित्युपलक्षणं, तेन रक्तजले च स्रवत इति मन्तव्यं, शिरोऽभिघातजलमज्जनमात्रेण पूयस्यासंभवात्; अथवा प्रपाकादिति सर्वत्र संबध्यते; तर्हि न पाकात् पृथक् स्राव उक्तः सर्वत्र पाकस्याविशिष्टत्वादिति कार्तिकः । ननु, पाकाद्विद्रधेः स्रावसंभवोऽस्तु, विद्रधौ तु वातेतरदोषस्यापि संभवात् कथमनिलार्दित इत्युक्तं? उच्यते, अतिस्रावेणात्रानिलकोपादनिलार्दितत्वं बोद्धव्यम् ॥ ५ ॥

†मारुतः कफसंयुक्तः कर्णकण्डूं करोति च ।
पित्तोष्मशोषितः श्लेष्मा कुरुते कर्णगूथकम् ॥ ६ ॥
स कर्णगूथो द्रवतां गतो यदा विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो भवेद्विकारः शिरसोऽर्धभेदकृत् ॥७॥

(सु. उ. अ. २०)

कर्णप्रतिनाहमाह—स कर्णगूथो द्रवतामित्यादि । विलायित इति स्नेहस्वेदाभ्यां विलीनीकृतः सन् । घ्राणमुखमिति द्वन्द्वत्वादेकवद्भावः, तेन घ्राणं च मुखं च प्रतिपद्यत इत्यर्थः । अन्ये 'घ्राणमुखात्' इति पठन्ति, तदा घ्राणमुखाच्चासासकाद्यात् प्रति-

* 'शिरोभिघातात्, अथवा जले निमज्जतः, अथवा विद्रधेः कर्णविद्रधेः प्रपाकादनिलार्दितः श्रवणः पूयं स्रवेत्, स कर्णसंस्रावाख्यो रोग उक्तः' (आ० द०) ॥ ५ ॥

† 'यदा स कर्णगूथो विलायित इति स्नेहस्वेदाभ्यां विलीनीकृतो द्रवतां गतः' (आ० द०) ॥ ६ ॥ ७ ॥

पद्यते गच्छतीत्यर्थः। अयं कफजो विकारः, अथवा कर्णगूथशोषे मारुतपित्तव्यापारा- श्रयाणामपि संबन्धोऽस्ति, तेन सन्निपातजोऽयं; तथाच विदेहः;—"कफाद्वा मारुताद्वाऽपि सन्निपातेन वा पुनः"—इति। शिरसोऽर्धभेदकृदिति अर्धावभेदशिरोरोगकृत् ॥ ६ ॥ ७ ॥

*यदा तु मूर्च्छन्त्यथवाऽपि जन्तवः
सृजन्त्यपत्यान्यथवाऽपि मक्षिकाः।
तद्व्यञ्जनत्वाच्छ्रवणो निरुच्यते
भिषग्भिराद्यैः क्रिमिकर्णको गदः ॥ ८ ॥
(सु. उ. अ. २०)

क्रिमिकर्णकमाह—यदेत्यादि। यदा तु मूर्च्छन्ति उच्छ्रिता भवन्ति। जन्तवः क्रिमयः क्रिमिमूर्च्छनं च मांसशोणितकोथे सति ज्ञेयं, तदन्तरेण क्रिमीणामसंभवात्। अपत्यानीति डिम्भकान्। तद्व्यञ्जनत्वादिति क्रिमिलक्षणत्वात्। श्रवणो निरुच्यत इति—क्रिमिकर्णको गद इति आश्रयाश्रितयोरभेदोपचाराच्छ्रवणः क्रिमिकर्णको गदो भण्यते। श्रवणशब्दः पुंलिङ्गोऽप्यस्तीत्यस्मादेव निर्देशात् प्रतीयते। अयं विकारस्त्रिदोषजो मन्तव्यः। तथाच निमिः,—"श्लेष्मपित्तजलोन्मिश्रे कोथे शोणितमांसजे। मूर्च्छन्ति जन्तवस्तत्र कृष्णास्ताम्राः सितारुणाः ॥ भक्षयन्तीव ते कर्णं कुर्वन्तो विविधा रुजः। क्रिमिकर्णं तु तं विद्यात् सन्निपातप्रकोपजम्"—इति ॥ ८ ॥

†पतङ्गाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि।
अरतिं व्याकुलत्वं च भृशं कुर्वन्ति वेदनाम् ॥ ९ ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते।
कीटे चरति रुक् तीव्रा निष्पन्दे मन्दवेदना ॥ १० ॥
(सु. उ. अ. २०)

कर्णप्रविष्टपतङ्गकीटादिलिङ्गमाह—पतङ्गा इत्यादि। शतपद्य इति कारण्डिकाः। निष्पन्द इति स्थिरे ॥ ९ ॥ १० ॥

‡क्षताभिघातप्रभवस्तु विद्रधिर्भवेत्तथा दोषकृतोऽपरः पुनः।
सरक्तपीतारुणमस्रमास्रवेत् प्रतोदधूमायनदाहचोषवान् ॥ ११ ॥
(सु. उ. अ. २०)

कर्णविद्रधिमाह—क्षताभिघातप्रभवस्त्वित्यादि।—क्षतप्रभवोऽभिघातप्रभवश्च, क्षताभिघातप्रभवयोरागन्तुकत्वादेकत्वं, एवं वातादिजस्यापि दोषजत्वादेकत्वम्। सरक्तपीतारुणमस्रमास्रवेदिति अस्रमास्रावं, सरक्तपीतारुणवर्णत्वं, चास्रावस्य वातपित्तकफसंभवात् ॥ ११ ॥

---

* 'सूक्ष्मक्रिमय इति यावत्। मक्षिका मम्मणाख्या नीलवर्णाः। आद्यैर्भिषग्भिर्विदेहादिभिः' (आ० द०) ॥ ८ ॥

† 'निस्तुद्यते भ्राजनेनेव' (आ० द०) ॥ ९ ॥ १० ॥

‡ 'धूमायनं धूमोद्गमनमिव वेदनाविशेषः, चोष आचूष्यत इव वेदनाविशेषः। दोषविद्रधेर्लक्षणं तैरेव ज्ञातव्यम्' (आ० द०) ॥ ११ ॥

*कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत् ।
कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ॥ १२ ॥
(सु. उ. अ. २०)

कर्णपाकलक्षणमाह—कर्णपाक इत्यादि । कोथविक्लेदकृदिति कोथः पूतिभावः, विक्लेद आर्द्रता । ननु, कर्णगूथलक्षणे पित्तेन शोषणमुक्तं, तत्कथमार्द्रता? नैवं, एवंविकारजनककर्मसहकारिणा द्रवांशोद्रिक्तेन पित्तेनार्द्रता, तत्र त्वेतद्विपरीतत्वेन शोषः ॥ १२ ॥

†पूयं स्रवति पूति वा स ज्ञेयः पूतिकर्णकः ।

पूतिकर्णलक्षणमाह—पूयमित्यादि । पूतीति क्रियाविशेषणं, वाशब्दोऽत्र समुच्चये, तेनावेदनत्वं सवेदनत्वं वा घनस्राविस्त्वं च समुच्चीयते । घनस्रावनियमाच्च कर्णस्रावादस्य भेदः । तथाचोक्तं सुश्रुते,—"स्रोतः स्थिते श्लेष्मणि पित्ततेजसा विलीयमाने भृशसंप्रतापिते । अवेदनो वाऽथ सवेदनो वा घनं स्रवेत् पूति च पूतिकर्णः"—इति । (सु. उ. तं. अ. २०) पूतिमान् कर्णः पूतिकर्णः ॥—

कर्णशोथार्बुदार्शांसि जानीयादुक्तलक्षणैः ॥ १३ ॥

इदानीं संख्यापूरणार्थं कर्णगतशोथार्बुदार्शसामतिदेशेन लक्षणमाह—कर्णशोथेत्यादि । कर्णशोथाश्चत्वारो वातपित्तकफरक्तजत्वेन; एवमर्शश्चतुर्विधं, सहजसन्निपातजार्शसोः सन्निपातागन्तुजशोथयोश्चात्रासंभूतिराधारप्रभावात् । अर्बुदं च सप्तविधं वातपित्तकफरक्तमांसमेदःसिरानिमित्तभेदात्; सिराजस्य वातजावरुद्धस्यात्र पृथग्गणनं शालाक्यसिद्धान्तसंवादादिति कार्तिकः । यथा सुश्रुत एव कर्णरोगानन्तरं "दोषैस्त्रिभिस्तैः पृथगेकशश्च ब्रूयात्तथाऽर्शांसि तथैव शोथान् । शालाक्यसिद्धान्तमवेक्ष्य चापि सर्वात्मकं सप्तममर्बुदं तु—" (सु. उ. तं. अ. २२) इति नासारोगेऽभिधास्यति, तथेहापि युज्यते; तेन रक्तजस्य पित्तसमानलिङ्गत्वात् पित्तजेऽन्तर्भावः, तथाऽऽगन्तुजस्यापि रक्तपित्तलिङ्गत्वात् पित्तज एवान्तर्भावः, तेन शोथः सन्निपातजोऽत्रागणनीयः, एवं सहजरक्तजयोर्दोषज एवान्तर्भावात् सन्निपातजमर्शोऽपृथग्गणनीयं, अर्बुदं च सन्निपातजं सप्तमिति, एवमेभिः सहाष्टाविंशतिः सुश्रुतोक्ताः कर्णरोगा भवन्ति ॥ १३ ॥

‡नादोऽतिरुक् कर्णमलस्य शोषः स्रावस्तनुश्चाश्रवणं च वातात् ।
शोथः सरागो दरणं विदाहः सपीतपूतिस्रवणं च पित्तात् ॥ १४ ॥
वैश्रुत्यकण्डूस्थिरशोथशुक्लस्निग्धस्रुतिः स्वल्परुजः कफाच्च ।
सर्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राधिकदोषवर्णः ॥ १५ ॥
(च. चि. अ. १६)

---

* 'कर्णविद्रधिपाकात्, अथवाऽम्बुपूरणात् कर्णपाको जायते' (आ० द०) ॥ १२ ॥

† 'यद्यपि शोफादयः प्राङ्निर्दिष्टाः, तथाऽपि कर्णरोगसंग्रहार्थं साध्यासाध्यविभागार्थं च पुनर्निर्दिष्टाः' (आ० द०) ॥ १३ ॥

‡ 'स्रुतिः स्रावः, स्निग्धा स्नाव' (आ० द०) ॥ १४ ॥ १५ ॥

इदानीं चरकोक्तं कर्णरोगचतुष्टयं वातपित्तकफसन्निपातजभेदादाह—नादोऽतिरुगित्यादि । अश्रवणमिति अशब्दश्रुतिः । वैश्रुत्यमिति विरुद्धश्रवणम् ॥ १४ ॥ १५ ॥

*सौकुमार्याच्चिरोत्सृष्टे सहसाऽतिप्रवर्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ।
कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः ॥ १६ ॥
(सु. चि. अ. २५)

कर्णावयवत्वात् कर्णपाल्यास्तद्विकारानाह—सौकुमार्यादित्यादि । सौकुमार्याद्धेतोश्चिरं वर्धनेन त्यक्ते सहसा च वर्धयितुमारब्धे कर्णे शोथः, परिपोटवान् मनाक्त्वगवदरणवानित्यर्थः ॥ १६ ॥

गुर्वाभरणसंयोगात्ताडनाद्धर्षणादपि ।
शोथः पाल्यां भवेच्छ्यावो दाहपाकरुजान्वितः ॥ १७ ॥
रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः ।
(सु. चि. अ. २५)

उत्पातलक्षणमाह—गुर्वित्यादि । श्यावत्वं व्याधिप्रभावात्, पित्तरक्तयोः श्यावत्वाजनकत्वात्, किंवा वातानुबन्धादत्र श्यावत्वम् ॥ १७ ॥—

†कर्णं बलाद्वर्धयतः पाल्यां वायुः प्रकुप्यति ॥ १८ ॥
कफं संगृह्य कुरुते शोथं स्तब्धमवेदनम् ।
उन्मन्थकः सकण्डूको विकारः कफवातजः ॥ १९ ॥
संवर्ध्यमाने दुर्विद्धे कण्डूपाकरुजान्वितः ।
शोथो भवति पाकश्च त्रिदोषो दुःखवर्धनः ॥ २० ॥
(सु. चि. अ. २५)

उन्मन्थकमाह—कर्णमित्यादि । स्तब्धत्वं वातकृतं, कण्डूः कफात्, इति वातकफलिङ्गम् ॥ १८–२० ॥

---

* 'अत्र डल्हणाभिप्रायः—कर्णे चिरोत्सृष्टे बहुकालमुपेक्षिते सहसा झटिति प्रवर्धिते सति सौकुमार्यात् पाल्यां शोफः सरुगित्यादिलक्षणयुक्तः स्यात्, स वातात्परिपोटको रोगः स्यात्, चिरोत्सृष्टत्वे सौकुमार्यं हेतुः' (आ० द०) ॥ १६ ॥

† कर्णं बलाद्वर्धयतः पाल्यां वायुः कोपं याति, स वायुः कुपितः सन् कफं संगृह्य स्तब्धं तथाऽवेदनं शोफं कुरुते, स कफवातज उन्मन्थकाख्यो रोगः स्यात् । स किंलक्षणः? सकण्डूकः कण्डूयुक्तः, दुःखवर्धनमाह—संवर्धमाने इत्यादि । कर्णे दुर्विद्धे दैवकृतच्छिद्रमतिक्रम्य विद्धे संवर्धमाने सति कण्ड्वादियुक्तः शोफो भवति, पाकश्चात्र दोषत्रयोत्थः । दुःखवर्धनात् दुःखवर्धनको नाम रोगः' (आ० द०) ॥ १८–२० ॥

---

१ एतच्च 'संवर्धमाने' इति पाठाभिप्रायेण

*कफासृक्कृमिमयः क्षुद्राः सर्षपाभा विसर्पिणः ।
कुर्वन्ति पाल्यां पिडकाः कण्डूदाहरुजान्विताः ॥ २१ ॥
कफासृक्कृमिसंभूतः स विसर्पन्नितस्ततः ।
लिहेत् सशष्कुलीं पालीं परिलेहीति स स्मृतः ॥ २२ ॥
(सु. चि.अ. २५)

इति श्रीमाधवकरविरचिते माधवनिदाने कर्णरोगनिदानं समाप्तम् ॥ ५७ ॥

परिलेहिनमाह—कफासृगित्यादि । स विसर्पन्निति स इति पिडकात्मको विकारः; 'विसर्पोन्वितः' इति पाठान्तरे विसर्पेणान्वितः । लिहेदिति निर्मांसीं करोति आच्छादयेद्वा ॥ २१–२२ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां कर्णरोगनिदानं समाप्तम् ॥ ५७ ॥

अथ नासारोगनिदानम् ।

†आनह्यते यस्य विशुष्यते च प्रक्लिद्यते धूप्यति चापि नासा ।
न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत्तमपीनसेन ।
तं चानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥ १ ॥
(च. चि. अ. २६)

इन्द्रियाधिकरणविकाराधिकारान्नासारोगनिदानम् । तत्रादावपीनसमाह—आनह्यत इत्यादि । आनह्यत इत्यावध्यते, वातशोषितकफेन । प्रक्लिद्यते आर्द्रीभवति । धूप्यतीति सन्तापमनुभवति, दिवादेराकृतिगणत्वात् धूप्यतीति रूपम् । गन्धरसानिति गन्धान् सुरभ्यसुरभीन्, आवद्धत्वेन नासायाः; नासारोगारम्भकदोषेण रसनाया अपि दुष्टेः रसान् मधुरादींश्च वेत्ति । तं चानिलश्लेष्मभवमिति वातकफजम् । ननु, अन्यत्र पित्तकफजोऽसदृशलिङ्गश्च पठ्यते, तद्यथा,—"मस्तुलुङ्गोचितः श्लेष्मा यदा पित्तादिदह्यते । तदासृक् पिच्छिलं नासा बहुसिंहाणकं स्रवेत् ॥ सकण्डूदाहपाकं च तं तु विद्यादपीनसम्"—इति, तत् कथं न विरोधः? नैवं, संप्राप्तिविशेषेणास्य तथाभाव इति कार्तिकः । तन्त्रान्तरप्रत्ययात् पित्तसंबन्धो लिङ्गविशेषश्चात्र बोद्धव्य इत्यर्थः । गदाधरस्तु तत्संवादात् 'अनलश्लेष्मभवं' इति पठित्वा श्लेष्मपित्तज एव न्याय्य इत्याह । प्रतिश्यायसमानलिङ्गमिति कफवातजप्रतिश्यायतुल्यलिङ्गम् ॥ १ ॥

दोषैर्विदग्धैर्गलतालुमूले संमूर्च्छितो यस्य समीरणस्तु ।
निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम् ॥ २ ॥
(सु. उ. अ. २२)

---

* 'लिहेदिति निर्मांसीं करोति उत्सादयति वा' (आ० द०) ॥ २१ ॥ २२ ॥
† 'तत्रैकत्रिंशन्नासारोगाः' (आ० द०) ॥ १ ॥

पूतिनस्यमाह—दोषैरित्यादि । दोषैरिति पित्तकफरक्तैः, रक्तस्यापि दोषतुल्यरूपत्वाद्दोषत्वम् । विदग्धैरिति पित्तश्लेष्मणोः सरक्तयोरूष्मणा विदग्धलवणाम्लरसपाकेन पूतिभावमापन्नैः । संमूर्च्छित इति उच्छ्रायं नीतः । निरेतीति समीरण एव, अन्यस्य कर्तृपदस्याभावात् । तं पूतिनस्यमिति नासिकाभवो नस्यः, पूतिर्नस्यो वायुर्यत्र तं पूतिनस्यम् । इहैव विदेहः,—"कफपित्तमसृङ्मिश्रं संचितं मूर्ध्नि देहिनाम् । विदग्धमूष्मणा गाढं रुजां कृत्वाऽक्षिशङ्खजाम् ॥ ततः प्रस्यन्दते घ्राणात् सरक्तं पूतिपीतकम् । पूतिनस्यं तु तं विद्याद् घ्राणकण्ठज्वरप्रदम्"—इति ॥ २ ॥

*घ्राणाश्रितं पित्तमरूंषि कुर्याद्यस्मिन् विकारे बलवांश्च पाकः ।
तं नासिकापाकमिति व्यवस्येद्विक्लेदकोथावथवाऽपि यत्र ॥ ३ ॥
(सु. उ. अ. २२)

नासापाकमाह—घ्राणाश्रितमित्यादि । अरूंषीति व्रणान् । यस्मिन् विकार इति यस्यां विकृतौ सत्याम् । व्यवस्येत् जानीयात् । विक्लेद आर्द्रता, कोथः पूतिभावः ॥ ३ ॥

दोषैर्विदग्धैरथवाऽपि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम् ॥ ४ ॥
(सु. उ. अ. २२)

दोषागन्तुजं पूयरक्तमाह—दोषैरित्यादि । विदग्धैरिति पित्तरक्ताधिकत्वाद्विरुद्धां परिणतिं प्राप्तैः, ललाटाभिघातेन वा पाकं प्राप्तैः । तैस्तैरिति प्रहारपीडनादिभिः ॥४॥

घ्राणाश्रिते मर्मणि संप्रदुष्टो यस्यानिलो नासिकया निरेति ।
कफानुजातो बहुशोऽतिशब्दस्तं रोगमाहुः क्षवथुं विधिज्ञाः ॥ ५ ॥
(सु. उ. अ. २२)

क्षवथुर्दोषागन्तुभेदाद्द्विविधो भवति; तत्र दोषजं आमाह—घ्राणाश्रित इत्यादि । मर्मणीति शृङ्गाटके, 'नस्तकयोः' इति पाठान्तरे नासापुटयोः, 'तदाश्रितः सन्' इति शेषः ॥ ५ ॥

†तीक्ष्णोपयोगादभिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा ।
सूत्रादिभिर्वा तरुणास्थिमर्मण्युद्घाटितेऽन्यः क्षवथुर्निरेति ॥ ६ ॥
(सु. उ. अ. २२)

आगन्तुजमाह—तीक्ष्णोपयोगादित्यादि ।—तीक्ष्णोपयोगाद्राजिकादितीक्ष्णद्रव्यसेवनात् । भावान् कटूनिति कटूनि द्रव्याणि । अभिजिघ्रतो भृशं जिघ्रतः । अर्कनिरीक्षणाद्वा कफविलयनकरात् । तरुणास्थिमर्मणीति तरुणास्थि नासावंशास्थि तदेव मर्म तस्मिन् फणामर्मणीत्यर्थः, अभिघातादिना मर्मव्यथाजनकत्वात्; अथवा तरुणास्थि च मर्मणि च शृङ्गाटके, द्वन्द्वैकवद्भावनिर्देशात् । उद्घाटिते चालिते । अन्य आगन्तुजः ॥ ६ ॥

---

* 'अरूंषि व्रणान्, यस्मिन्निति यस्मिन्विकारे, इह्यौ दर्शनं गतौ' (का० द०) ॥ ३ ॥
† 'उद्घाटितेऽर्धचालिते, दोषजागन्तुरेक एव गणनीयः' (का० द०) ॥ ६ ॥

---

१ 'अथवाऽपि यत्र' इत्यत्र 'अथ यत्र दृष्टौ' इति पाठाभिप्रायेन ।

*प्रभ्रश्यते नासिकया तु यस्य सान्द्रो विदग्धो लवणः कफस्तु ।
प्राक्संचितो मूर्धनि सूर्यतप्तस्तं भ्रंशथुं रोगमुदाहरन्ति ॥ ७ ॥
(सु. उ. अ. २२)

भ्रंशथुमाह—प्रभ्रश्यत इत्यादि । प्रभ्रश्यते गलति । विदग्धो लवण इति स्वरूपाख्यानं विदग्धत्वादेव कफस्य लवणत्वसिद्धेः । प्राक्संचित इत्यनेन संचयपूर्वकं कोपं दर्शयति, हेतुभूयस्त्वेन चयमन्तरेणापि कोपदर्शनात् । यदुक्तं,—"न केवलं चयं प्राप्य दोषाः कुप्यन्ति देहिनाम् । अन्यतोऽपि हि कुप्यन्ति हेतुबाहुल्यतो बलात्"—इति ॥७॥

†घ्राणे [1]भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः ।
नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिं तु तं दीप्तमुदाहरन्ति ॥ ८ ॥
(सु. उ. अ. २२)

दीप्तमाह—घ्राणे भृशमित्यादि । प्रदीप्तेवेति प्रज्वलितेव ॥ ८ ॥

उच्छ्वासमार्गं तु कफः सवातो रुन्ध्यात् प्रतीनाहमुदाहरेत्तम् ।
(च. चि. अ. २६)

प्रतीनाहमाह—उच्छ्वासमार्गमित्यादि ॥—

‡घ्राणाद्घनः पीतसितस्तनुर्वा दोषः स्रवेत् स्रावमुदाहरेत्तम् ॥ ९ ॥
(च. चि. अ. २६)

नासास्रावमाह—घ्राणादित्यादि । दोष इति कफः ॥ ९ ॥

§घ्राणाश्रिते स्रोतसि मारुतेन गाढं प्रतप्ते परिशोषिते च ।
कृच्छ्राच्छ्वसेदूर्ध्वमधश्च जन्तुर्यस्मिन् स नासापरिशोष उक्तः ॥१०॥
(सु. उ. अ. २२)

नासाशोषमाह—घ्राणाश्रिते स्रोतसीत्यादि । अत्र च वायुकृतस्रोतःशोषणेन तद्गतश्लेष्मशोषो बोद्धव्यः, प्रतप्त इत्यनेन पित्तमपि गम्यते, प्रतपनस्य पित्तमन्तरेणासंभवात् । तथाच कश्चित् पठति,—"घ्राणाश्रिते श्लेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च"—इति । प्रतप्त इत्यस्य स्थाने 'प्रदीप्ते' इति पाठान्तरे स एवार्थः । कृच्छ्राच्छ्वसेदूर्ध्वमधश्च यस्मिन्निति कष्टेनोच्छ्वासनिःश्वासौ करोति यत्रेत्यर्थः ॥ १० ॥

शिरोगुरुत्वमरुचिर्नासास्रावस्तनुः स्वरः ।
क्षामः ष्ठीवत्यथाभीक्ष्णमामपीनसलक्षणम् ॥ ११ ॥

* 'पित्तनप्त इति सुश्रुतपाठः' (आ० द०) ॥ ७ ॥

† 'विदेहेऽस्य लक्षणम्—"धूमायते यदा नासा चलत्कुप्यति दीप्यते । निश्चरेत्तम उच्छ्वासस्तं व्याधिं दीप्तमादिशेत्"—इति' (आ० द०) ॥ ८ ॥

‡ 'अस्य लक्षणं विदेहे—"स्रोतःशृङ्गाटके श्लेष्मा चितः क्लेदित ऊष्मणा । निशेषात्स्यन्दते रात्रौ नासास्रावं तु तं विदुः"—इति' (आ० द०) ॥ ९ ॥

§ 'वैदेहेऽस्य लक्षणम्—"पित्तवातौ यदा घ्राणे कफरक्ते विशोषयेत् । यदा स्यादुच्छ्वसेन्नासा तस्य शुष्कं विधीयते ॥ कृशशुष्कावचूर्णेन नासाशोषं तु तं विदुः"—इति' (आ० द०) ॥१०॥

१ प्राक्संभृशन् इति ख. ।

आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
स्वरवर्णविशुद्धिश्च परिपक्वस्य लक्षणम् ॥ १२ ॥

चिकित्साभेदार्थं पीनसस्यामपक्वलक्षणमाह—शिरोगुरुत्वमित्यादि । तनुरघनः । स्वरः क्षाम इति अविस्पष्टं वचनम् । ष्ठीवत्यभीक्ष्णमिति मुहुर्मुहुर्नासिकया श्लेष्माणं निरस्यतीत्यर्थः । आमरसान्वितेन दोषेण शिरोगुरुत्वादयः । 'आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति' इत्यादि पक्वलक्षणम् । आमलिङ्गैः शिरोगुरुत्वादिभिरन्वितः श्लेष्मा निमज्जति लीनो भवति । अयमर्थः—श्लेष्मा तावल्लीनो भवति, आमलिङ्गान्यपि लीनानि भवन्ति, तथाच "तनुत्वमामलिङ्गानाम्" इति सुश्रुतः । 'न सज्जति' इति पाठान्तरे न सक्तो भवति, न तिष्ठतीति यावत्, । तदामलिङ्गान्वितः स्तोकेनामलिङ्गेनान्वितः । घनः स्त्यानः । खेषु नासारन्ध्रेषु, 'स्थितः' इति शेषः, व्यक्त्यपेक्षया बहुवचनम् । स्वरविशुद्धिः स्वरभेदाभावः, वर्णविशुद्धिः प्रकृतिसवर्णता ॥ ११ ॥ १२ ॥

***संधारणाजीर्णरजोतिभाष्यक्रोधर्तुवैषम्यशिरोभितापैः ।**
प्रजागरातिस्वपनाम्बुशीतैरवश्यया मैथुनबाष्पधूमैः ।
संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्तु ॥ १३ ॥
(च. चि. अ. २६)

चयं गता मूर्धनि मारुतादयः पृथक् समस्ताश्च तथैव शोणितम् ।
प्रकुप्यमाणा विविधैः प्रकोपणैस्ततः प्रतिश्यायकरा भवन्ति हि ॥
(सु. उ. अ. २४)

प्रतिश्यायः पञ्चविधो भवति, वातपित्तकफसन्निपातरक्तजभेदात्; तस्य निदानं द्विविधं, एकं सद्योजनकं तच्च बलवत्त्वेन चयं नापेक्षत एव; अपरं चयादिक्रमेण जनकं, चयादिक्रमोत्पन्नश्च दोषो गरीयान् सकलशरीरसंभावनया बद्धमूलत्वात् । तत्र सद्योजनकनिदानपूर्विकां तस्य संप्राप्तिमाह—संधारणेत्यादि ।—संधारणं पुरीषादिवेगधारणं, रजो धूलिः, शिरोभितापः शिरोऽभितप्यते येन स शिरोभितापो धूमादिः; रजोधूमादयश्च नासाप्रविष्टाः सन्तो हेतवः । अतिस्वपनं दिवास्वपनमित्यर्थः । अवश्यया तुषारेण । संस्त्यानदोषे शिरसीति घनीभूतश्लेष्मणि शिरसि । सुश्रुतेनापि सद्योजनकं निदानं पठितं; तद्यथा,—"नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतमतिप्रतापः । संधारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तम्" (सु. उ. तं. अ. २४)—इति । चयादिक्रमेण जनकमपि दोषं दर्शयन्नाह—चयं गता इत्यादि । चयं गता इति सामर्थ्यात् स्वे स्वे स्थाने, "स्वस्थानवृद्धिर्दोषाणां चय इत्यभिधीयते"—इति वचनात् । तथैव शोणितमिति चयं गतम् । ननु, यदि स्वस्थानस्थिता दोषा-

* 'मारुतादय इति वातपित्तश्लेष्माण एते तथैव शोणितमपि चयं गतं, ततो मूर्ध्नि प्रतिश्यायकरं भवतीति योज्यम् । अथवा–सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सरक्ताः, सर्वत्रैतत्कार्यदर्शनात् । तत इति प्रकोपविशेषात् प्रसरादनन्तरम् । तथा चरकः–"घ्राणमूले स्थितः श्लेष्मा रुधिरं पित्तमेव च । मारुताध्मातशिरसः श्यायते मारुतं प्रति ॥ प्रतिश्यायस्ततो घोरो जायते देहकर्षणः"–इति' (आ० द०) ॥ १३ ॥ १४ ॥

तत् कथं मूर्ध्नि प्रतिश्यायसंभवः ? इत्याह—प्रकुप्यमाणा विविधैः प्रकोपणैरिति ।— विविधैरिति बलवद्विग्रहदिवास्वप्नादिभिः । प्रकोपविशेषश्च प्रसरः । यदुक्तं,—"प्रकुपितानां पर्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति" (सु. सू. स्था. अ. २१)—इति । अत एव, "चयप्रकोपप्रशमाः पित्तादीनां यथाक्रमम्"—इत्यत्र प्रकोपमात्रमुपात्तम् । एतेन प्रसरेण शिरःसंप्राप्ता दोषाः प्रतिश्यायकराः । अन्ये तु चयं गता मूर्धनीति यथास्थितमेव योजयन्ति, उदानवायोरूर्ध्वगतित्वाच्छिरस्यपि संभवात्, त्वक्सिराश्रितत्वात् पित्तासृजोः कफस्य च निसर्गतः शिरोऽवस्थितेः शिरसि चय इति । तत इति प्रकोपविशेषात् प्रसरादनन्तरम् । प्रतिश्याय इति वातं प्रत्यभिमुखं श्यायो गमनं कफादीनां यत्र स प्रतिश्यायः । 'श्यैङ्' गतौ, इत्यस्य प्रयोगः । तथाच चरकः,—"घ्राणमूले स्थितः श्लेष्मा रुधिरं पित्तमेव वा । मारुताध्मातशिरसः श्यायते मारुतं प्रति" (च. चि. स्था. अ. ८) इति ॥ १३ ॥ १४ ॥

क्षवप्रवृत्तिः शिरसोऽतिपूर्णता
स्तम्भोऽङ्गमर्दः परिहृष्टरोमता ।
उपद्रवाश्चाप्यपरे पृथग्विधा
नृणां प्रतिश्यायपुरःसराः स्मृताः ॥ १५ ॥
(सु. उ. अ. २४)

तस्य पूर्वरूपमाह—क्षवप्रवृत्तिरित्यादि । उपद्रवाश्चाप्यपरे इति उपद्रवास्तत्कालभाविनो रोगाः, नतु पारिभाषिकाः पश्चात्कालभाविनः; ते च घ्राणधूमायनमन्थादयः । यदाह विदेहः,—"पूर्वरूपाणि दृश्यन्ते प्रतिश्याये भविष्यति । घ्राणधूमायनं मन्थः क्षवथुस्तालुदारणम् ॥ कण्ठध्वंसो मुखस्रावः शिरसः पूरणं तथा"—इति । पुरःसरा इति पूर्वरूपाणि ॥ १५ ॥

*आनद्धा पिहिता नासा तनुस्रावप्रसेकिनी ।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥ १६ ॥
क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च ।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके ॥ १७ ॥
उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके ।
कृशोऽतिपाण्डुः संतप्तो भवेत्तृष्णाभिपीडितः ॥ १८ ॥
सधूममग्निं सहसा वमतीव स मानवः ।
घ्राणात् कफः कफकृते शीतः पाण्डुः स्रवेद्बहुः ।
शुक्लावभासः शुक्लाक्षो भवेद्गुरुशिरा नरः ॥ १९ ॥
कण्ठताल्वोष्ठशिरसां कण्डूभिरभिपीडितः ।
(सु. उ. अ. २४)

* 'आध्माता पूरितेवेति यावत् । तथा गलताल्वोष्ठशोषादयो भवन्ति, निस्तोदः शूलव्यधनव्यथा, श्लैष्मिकमाह—सधूममित्यादि । शुक्लावभासः श्वेतवपुः, शूनाक्ष उच्छूननयनः' (आ० द०) ॥ १६–१९ ॥

१ 'प्रकोप्यमाणा विविधैः' इति पाठान्तरम् । अयमेव पाठो ज्यायान्, अन्तर्भावितण्यर्थकल्पने गौरवात् । २ एतच्च—'शुक्लावभासः शूनाक्षः' इति पाठाभिप्रायेण ।

वातादिप्रतिश्यायलिङ्गान्याह—आनद्धेत्यादि। आनद्धा विबद्धा। पिहिता सपिधानेव। निस्तोदः सूचिव्यधनवद्व्यथा। शङ्खयोरिति भ्रूपुच्छान्तयोः। सपीतक इति ईषत् पीतः। पित्तप्रतिश्यायवान् मानवः कृशो भवति। अतिपाण्डुर्धूमवरः। उष्णाभिपीडित इति उष्णगुणेनाभिपीडित इत्यर्थः॥ १६-१९॥—

*भूत्वा भूत्वा प्रतिश्यायो यस्याकस्मान्निवर्तते॥ २०॥
संपक्वो वाऽप्यपक्वो वा स सर्वप्रभवः स्मृतः।
(सु. उ. अ. २४)

सन्निपातजमाह—भूत्वेत्यादि। भूत्वा भूत्वेति वीप्सया पुनः पुनः संभवं दर्शयति। अन्यतमदोषस्य कालादिनाऽनवधारितेन बलहानेर्निवृत्तिः, अकस्मात् प्रवृत्तिरप्यसम्यङ्निवृत्तदोषस्य कालादिना बललाभात्। अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि, तथाऽपि सर्वप्रभवबलात् प्रत्येतव्यानि। असाध्यश्चायं दुष्टतां गतः सन्, "नृणां दुष्टप्रतिश्यायस्त्वसाध्यः सर्वजः स्मृतः"—इति विदेहवचनात्॥ २०॥—

प्रक्लिद्यते पुनर्नासा पुनश्च परिशुष्यति॥ २१॥
पुनरानह्यते वाऽपि पुनर्विव्रियते तथा।
निश्वासो वाऽतिदुर्गन्धो नरो गन्धान् न वेत्ति च॥ २२॥
एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम्।
(सु. उ. अ. २४)

एकदोषस्यापि दुरुपचाराद्दोषद्वयानुबन्धेन दुष्टतां गतस्य दोषत्रयसंबन्धसाम्येन सन्निपातजानन्तरं लिङ्गमाह—प्रक्लिद्यते पुनर्नासेत्यादि। आनह्यत इति विबध्यते। विव्रियत इति विगतावरणा भवतीत्यर्थः। क्लेदशोषपिधानविवरणानि नैककालं भिन्नदोषजानि बोद्धव्यानि, तेन विरोधो नोद्भावनीयः। एवमिति इत्थम्भूतलिङ्गं दुष्टप्रतिश्यायं परस्परविरुद्धोपक्रमदोषसंबन्धात् कृच्छ्रसाध्यं जानीयात्। अयं च पञ्चानामेवावस्थान्तरतयाऽनन्यत्वान्न षष्ठः। ननु, अवस्थान्तरत्वेऽप्यभिष्यन्दाद्धिमन्थ इव भिन्नो भविष्यति? न, तद्वद्वातादिजत्वेनानिर्देशात्॥ २१॥ २२॥—

रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्तते॥ २३॥
ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीडितः।
दुर्गन्धोच्छ्वासवदनो गन्धानपि न वेत्ति सः॥ २४॥
(सु. उ. अ. २४)

रक्तजलिङ्गमाह—रक्तज इत्यादि। उरोघातप्रपीडित इति उरोघातस्तन्त्रान्तरपठितलक्षणः, तेन प्रकर्षेण पीडितः। तद्यथा,—"उरःक्षतमुरःस्तम्भः पूतिकर्णकफोरसः। सकासः सज्वरो ज्ञेय उरोघातः सपीनसः"—इति। अत्र पित्तप्रतिश्यायलिङ्गान्यपि बोद्धव्यानि, तुल्यत्वात् पित्तरक्तयोः। तथाच क्वचित् पठ्यते,—"पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः"—इति॥ २३॥ २४॥

---

* 'केचित् 'सर्वप्रभवः स्मृतः' इत्यस्यायेऽपिकं पादद्वयं पठन्ति, तच्च—"लिङ्गानि चैव सर्वेषां पीनसानां च सर्वजे" इति सर्वजे प्रतिश्याये सर्वेषां वातादिजानां पीनसानां लिङ्गानि भवन्तीति योज्यम्' (आ० द०)॥ २०॥—

सर्वे एव प्रतिश्यााया नरस्याप्रतिकारिणः ।
दुष्टतां यान्ति कालेन तदाऽसाध्या भवन्ति हि ॥ २५ ॥
मूर्च्छन्ति चात्र क्रिमयः श्वेताः स्निग्धास्तथाऽणवः ।
क्रिमितो यः[1] शिरोरोगस्तुल्यं तेनास्य लक्षणम् ॥ २६ ॥
(सु. उ. अ. २४)

अप्रतिक्रियया कालान्तरेण सर्वे एव दुष्टप्रतिश्याया भवन्ति, ते चासाध्या इत्याह— सर्वे एवेत्यादि । मूर्च्छन्ति चात्र क्रिमय इति अत्रेति एषु, बहुवचनान्तात्त्रल्प्रत्ययविधिः; अन्ये तु प्रत्यासन्नत्वाद्रक्तज एव क्रिमिमूर्च्छनं वदन्ति । श्वेता इति कफाधिकत्वात् प्रतिश्यायस्य सर्वत्र कफजा एव श्वेतक्रिमयो भवन्ति । क्रिमितो यः शिरोरोगस्तुल्यं तेनास्य लक्षणमिति क्रिमिजशिरोरोगेणेह तुल्यं लिङ्गं, तच्च 'निस्तुद्यते यस्य शिरोऽतिमात्रम्'—इत्यादिना वक्ष्यमाणम् ॥ २५ ॥ २६ ॥

बाधिर्यमान्ध्यमघ्रत्वं घोरांश्च नयनामयान् ।
शोथाग्निसादकासांश्च वृद्धाः कुर्वन्ति पीनसाः ॥ २७ ॥
(सु. उ. अ. २४)

अतः परमपरान् विकारान् प्रवृद्धाः प्रतिश्यायाः कुर्वन्ति, तानाह—बाधिर्यमित्यादि । घोरानयनामयानित्यभिधानादेवान्ध्ये लब्धे विशेषेण तत्करत्वप्रतिपादनार्थमान्ध्यग्रहणम् । अघ्रत्वमिति न जिघ्रतीत्यघ्रस्तस्य भावोऽघ्रत्वम् । 'घ्रा' गन्धोपादाने, इत्यस्मात् 'सुपि स्थः' इत्यत्र योगविभागात् कप्रत्यये[2] ॥ २७ ॥

*अर्बुदं सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्विधम् ।
चतुर्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः ॥ २८ ॥
(सु. उ. अ. २४)

इति श्रीमाधवकरविरचिते माधवनिदाने नासारोगनिदानं समाप्तम् ॥ ५८ ॥

सुश्रुते नासारोगा एकत्रिंशदुक्ताः, अत्राप्यपीनसमारभ्य प्रतिश्यायपर्यन्तेन पञ्चदशोक्ताः, शेषसंख्यापूरणायापरान् षोडश नासारोगानाह—अर्बुदं सप्तधेत्यादि । एकैकदोषरक्तमांसमेदःसंभवत्वेन षडर्बुदानि, शालाक्यसिद्धान्तेन सन्निपातजमधिकं, एवं सप्त । तथाच विदेहः,—"सर्वलिङ्गं रुजायुक्तमर्बुदं विधि सर्वजम्"—इति । शोथाश्चत्वारो वातपित्तकफसन्निपातजभेदात्, एवमर्शोऽपि चतुर्विधं, रक्तपित्तं चतुर्विधमपि रक्तपित्तत्वसामान्यादेकत्वेन गणनीयं, तेन न संख्यातिरेकः । अर्बुदादीनां तत्र तत्रोक्तानामत्राभिधानं शालाक्योक्तसंख्यापूरणार्थमाश्रयप्रभावेणातिरिक्तलिङ्गादिख्यापनार्थं च ॥२८॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां नासारोगनिदानं समाप्तम् ॥ ५८ ॥

---

* 'एवमर्शोऽपि चतुर्विधं', सहजरक्तजयोरर्शसोर्दोषजेऽन्तर्भावः । घ्राणार्शोऽर्बुदयोर्ग्रन्थान्तरे भेद उक्तः, तद्यथा—"शिरोललाटतालूनां गौरवं दुःखनिद्रता । अर्शसामर्बुदानां च दोषैः श्लेषाकृतिः समा ॥ अर्शांसि गोस्तनाकाराण्यर्बुदं कोलसंमितम्"—इति' (आ० द०) ॥ २८ ॥

---

[1] 'क्रिमिजो यः शिरोरोगः' इति पाठान्तरम् । [2] अघ्रत्वं घ्राणेन्द्रियदुष्टया इति क. ।

अथ नेत्ररोगनिदानम् ।

*उष्णाभितप्तस्य जले प्रवेशाद्दूरेक्षणात् स्वप्नविपर्ययाच्च ।
स्वेदाद्रजोधूमनिषेवणाच्च छर्देर्विघाताद्वमनातियोगात् ॥ १ ॥
द्रवात्तथाऽन्नान्निशि सेविताच्च विण्मूत्रवातक्रमनिग्रहाच्च ।
प्रसक्तसंरोदनकोपशोकाच्छिरोऽभिघातादतिमद्यपानात् ॥ २ ॥
तथा ऋतूनां च विपर्ययेण क्लेशाभिघातादतिमैथुनाच्च ।
बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकाराञ्जनयन्ति दोषाः ॥ ३ ॥
(सु. उ. अ. १)

इन्द्रियाधिष्ठानगतविकारपारिशेष्यान्नेत्ररोगाभिधानम् । एते च नयनरोगा वातपित्तकफरक्तसन्निपातागन्तुजाः सन्तः षट्सप्ततिः । यदाह सुश्रुतः,–"तैस्त्रिभिस्त्रिंशदुक्तास्ते कफेनाप्यधिकास्त्रयः । रक्तजाः षोडश प्रोक्ताः सर्वजाः पञ्चविंशतिः । बाह्यौ पुनर्द्वौ च तथा रोगाः षट्सप्ततिः स्मृताः" (सु. उ. तं. अ. १) इति। षट्सप्ततिश्चैते रोगा आश्रयभेदेन सुश्रुतेनैव विभक्ताः । यदाह,–"नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः । शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥ सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु । द्वौ च बाह्याश्रयावन्यावनिमित्तनिमित्तजौ ॥ षट्सप्ततिर्नेत्ररोगाः संग्रहेण प्रकीर्तिताः" (सु. उ. तं. अ. १) इति । नेत्रप्रमाणं च सुश्रुतेनैवोक्तम्, "विद्याद् द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसंमितम् । द्व्यङ्गुलं सर्वतः सार्धं भिषङ्नयनबुद्बुदम्" (सु. उ. तं. अ. १)–इति। द्व्यङ्गुलबाहुल्यं विस्तारेण, अन्तः स्वाङ्गुष्ठोदरसंमितं, द्व्यङ्गुलं सर्वतः सार्धमायामेन । अन्ये द्व्यङ्गुलबाहुल्यमिति यदुक्तं तत्र द्व्यङ्गुलमाननियमं स्वाङ्गुष्ठोदरसंमितमित्यनेनाहुः । अयमर्थः,–स्वेनाङ्गुष्ठोदरेण संमितं द्व्यङ्गुलबहुलं, द्व्यङ्गुलं सर्वतः सार्धमिति चायामविस्ताराभ्यां बोद्धव्यमिति । ननु, यद्यर्धतृतीयाङ्गुलायामं नेत्रं तर्हि "द्व्यङ्गुलायतं च नयनम्" (सु. सू. स्था. अ. ३५)–इत्यातुरोपक्रमणीयोक्तं विरुध्यते ? नैवं, वर्त्ममण्डलं गृहीत्वा गणनयाऽर्धतृतीयाङ्गुलं, तद्विरहात् द्व्यङ्गुलायतमिति न विरोधः । नयनरोगहेतुमाह—उष्णाभितप्तस्येत्यादि ।—उष्णेनातपादिना सन्तप्तदेहस्य जलावगाहनात्, शीतावृतदेहस्योर्ध्वगतेनोष्मणा नयनतेजसोऽभिभवाच्चक्षूरोगोदयः । स्वेदाद्रजोधूमनिषेवणाच्चेति घर्मरजोधूमानां नयनसंबन्धानां हेतुत्वम् । छर्देर्विघाताद्वान्तिवेगविघातात् । वमनातियोगादतिवान्तेः । विण्मूत्रवातक्रमनिग्रहात् विण्मूत्रवातानां क्रमेण शनैः शनैर्निग्रहाद्वेगविधारणात् । प्रसक्तसंरोदनशोककोपादिति प्रसक्तं निरन्तरं कृतसंरोदनादेरित्यर्थः । ऋतुविपर्ययेण एकर्तुचर्याया अन्यर्तौ करणेन । क्लेशाभिघातात् क्लेशः कायादिदुःखं; तेनाभिसंबन्धात् बाष्पनि-

---

* 'यथा मध्यन्दिनोल्कापातः सौरकिरणेनाभिभूयते । दूरेक्षणात् दूरावलोकनात्, स्वप्नविपर्ययात् रात्रिजागरणाद्दिवास्वप्नाच्च, क्लेशाभिघातात् क्लेशः कामादिदुःखं, तेन संबन्धात्; सूक्ष्मवस्त्ववलोकनात्, एतैर्हेतुभिर्नेत्ररोगा जायन्ते' (आ० द०) ॥ २ ॥

---

१ यथामध्यंदिनोल्कापातः सूर्यकिरणेनाभिभूयते इति क. २ किंवा क्लेशो मनःखेदः तेन अभिहननं दुःखमेव इति क. ।

प्रह्लादश्रुवेगधारणात् । यदुक्तं,—"आनन्दजं वाऽप्यथ शोकजं वा नेत्रोदकं प्राप्तमसुञ्चतो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन"—इति । नयनरोगसंप्राप्तिश्च सुश्रुते पठ्यते,—"सिरानुसारिभिर्दोषैर्विगुणैरूर्ध्वमाश्रितैः । जायन्ते नेत्रभागेषु रोगाः परमदारुणाः" (सु. उ. तं. अ. १) इति ॥ १–३ ॥

वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरः सर्वनेत्रामयाकरः ॥ ४ ॥

सामान्यपूर्वकत्वाद्विशेषस्य, तथा सर्वनयनरोगहेतुत्वाच्च, आदौ सर्वनयनगतमभिष्यन्दमाह—वातादित्यादि । घोर इति दुःसहवेदनः । सर्वनेत्रामयाकर इति सर्वेषां नेत्ररोगाणामधिमन्थादीनामाकर उत्पत्तिकरत्वादाकरः स्थानम् । अत एवाह सुश्रुतः—"प्रायेण सर्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः"—(सु. उ. तं. अ. १)—इति ॥ ४ ॥

***निस्तोदनस्तम्भनरोमहर्षसंघर्षपारुष्यशिरोऽभितापाः ।**
विशुष्कभावः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति ॥ ५ ॥
(सु. उ. अ. ६)

वाताभिष्यन्दरूपमाह—निस्तोदनेत्यादि । निस्तोदनं सूचीव्यधनवद्व्यथा, स्तम्भनं जडिमा, संघर्षः करकरिका, पारुष्यं रूक्षता, शिरोऽभितापः शिरोव्यथा । विशुष्कभावो दूषिकारहितत्वं, न त्वास्रावरहितत्वं, शिशिराश्रुतेत्युक्तेः ॥ ५ ॥

दाहप्रपाकौ शिशिराभिनन्दा धूमायनं बाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति ॥ ६ ॥
(सु. उ. अ. ६)

पैत्तिकलक्षणमाह—दाहप्रपाकावित्यादि । प्रपाकः प्रकृष्टपाकः । शिशिराभिनन्दा शीतेच्छा । धूमायनं धूमस्योद्गमनम् । बाष्पसमुच्छ्रयो बाष्पबाहुल्यम् ॥ ६ ॥

उष्णाभिनन्दा गुरुताऽक्षिशोथः कण्डूपदेहावतिशीतता च ।
स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति ॥ ७ ॥
(सु. उ. अ. ६)

कफजलिङ्गमाह—उष्णाभिनन्देत्यादि । उपदेहः पिचटबाहुल्यम् । शीतता नेत्रस्य । पिच्छिल इति स्रावविशेषणम् । कफाभिपन्ने कफयुक्ते । नयने चक्षुषि । भवन्ति जायन्ते ॥ ७ ॥

ताम्राश्रुता लोहितनेत्रता च नाड्यः समन्तादतिलोहिताश्च ।
पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति ॥ ८ ॥
(सु. उ. अ. ६)

रक्ताभिष्यन्दलक्षणमाह—ताम्राश्रुतेत्यादि । पित्तस्य लिङ्गानीति पित्ताभिष्यन्दलिङ्गानि ॥ ८ ॥

---

* 'सदर्पः वालुकापूरिता इव करकरिका' (आ० द०) ॥ ५ ॥

*वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् ।
तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः ॥ ९ ॥
(सु. उ. अ. ६)

अधिमन्थानामभिष्यन्दजत्वमाह—वृद्धैरित्यादि । तावन्त इति अभिष्यन्दैर्वातपित्तकफरक्तजैश्चत्वारोऽधिमन्थाः प्रत्येतव्याः । तीव्रवेदना इति सामान्यलक्षणम् । वेदनाशब्दश्चात्र व्यथामात्रवाची, तेन वातिकाभिष्यन्दाद्वातिक एवाधिमन्थस्तीव्रवातजनिततोदादिसकलवेदनः, एवं पित्तजकफजरक्तजाश्चाधिमन्थाः प्रत्येतव्याः ॥ ९ ॥

उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा ।
शिरसोऽर्धं च तं विद्यादधिमन्थं स्वलक्षणैः ॥ १० ॥
(सु. उ. अ. ६)

अस्यापरं सामान्यलक्षणमाह—उत्पाट्यत इत्यादि । शिरसोऽर्धमित्यत्र पूर्वक्रिये संबध्येते, तेन शिरसोऽर्धमुत्पाट्यते तथा निर्मथ्यते चेत्यर्थः । शिरसोऽर्धे च वेदना व्याधिप्रभावात् । स्वलक्षणैरिति यथोक्तवाताद्यभिष्यन्दलक्षणैः । स चाधिमन्थः स्यन्दात्मकः ॥ १० ॥

हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधीमन्थो रक्तजः पञ्चरात्रात् ।
षड्रात्राद्वातिको वै निहन्यात् मिथ्याचारात् पैत्तिकः सद्य एव ॥११॥
(सु. उ. अ. ६)

यावता कालेन मिथ्याचाराद्दृष्टिं हन्ति तमाह—हन्यादित्यादि । सद्य एवेति श्लेष्मणि सप्तरात्रस्योक्तत्वात् सद्यःशब्देनात्र त्रिरात्रमुक्तं, वैद्यके हि सद्यःशब्दस्य त्रिरात्रसप्तरात्रवाचित्वेन दृष्टत्वात् । कालावधिरत्र व्याधिस्वभावात् ॥ ११ ॥

उदीर्णवेदनं नेत्रं रागशोथसमन्वितम् ।
घर्षनिस्तोदशूलाश्रुयुक्तमामान्वितं विदुः ॥ १२ ॥
(सु. उ. अ. ६)

लङ्घनप्रलेपादिविधानार्थमञ्जनादिनिषेधार्थं च, नेत्ररोगस्य सामत्वलक्षणमाह—उदीर्णवेदनमित्यादि । उदीर्णवेदनमुद्गतबहुवेदनम् । घर्षः करकरिका । लङ्घनादिविधानार्थमञ्जनादिनिषेधार्थं च तन्त्रान्तरम्,—"स्वेदः प्रलेपस्तिक्ताद्यं धूमो दिनचतुष्टयम् । लङ्घनं चाक्षिरोगाणामामानां पाचनानि षट् ॥ अञ्जनं सर्पिषः पानं कषायं गुरुभोजनम् । नेत्ररोगेषु सामेषु स्नानं चापि विवर्जयेत्"—इति ॥ १२ ॥

मन्दवेदनता कण्डूः संरम्भाश्रुप्रशान्तता ।
प्रसन्नवर्णता चाक्ष्णोः संपक्वं दोषमादिशेत् ॥ १३ ॥
(सु. उ. अ. ६)

* 'वृद्धैर्वृद्धिंगतैः अप्रतिक्रियमाणत्वात् । तीव्रा वातजा एव सर्वा निस्तोदादिवेदनाः' (आ० द०) ॥ ९ ॥

१ 'दोषभेदेन कालावधिमाह—हन्यादित्यादि' इति पाठान्तरम् ॥

निरामलक्षणमाह—मन्देत्यादि । संरम्भाश्रुप्रशान्ततेति संरम्भः शोथस्तस्य, अश्रुणो नेत्रजलस्य च प्रशमः ॥ १३ ॥

*कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसंनिभः ।
संरम्भी पच्यते यस्तु नेत्रपाकः स शोथजः ।
शोथहीनानि लिङ्गानि नेत्रपाके त्वशोथजे ॥ १४ ॥
(सु. उ. अ. ६)

सशोथपाकलिङ्गमाह—कण्डूपदेहाश्रुयुत इत्यादि । पक्वोदुम्बरसंनिभ इति लोहितः । संरम्भीति शोथवान्; कार्तिकस्तु महारम्भवानित्याह; शोथस्त्वनुक्तोऽपि गम्यते, तत्प्रधानत्वात् पाकस्य, उत्तरत्र शोथहीनानीत्यस्याभिधानाच्च । अयं त्रिदोषजः, एवमशोथपाकश्च ॥ १४ ॥

उपेक्षणादक्षि यदाऽधिमन्थो वातात्मकः सादयति प्रसह्य ।
रुजाभिरुग्राभिरसाध्य एष हताधिमन्थः खलु नाम रोगः ॥ १५ ॥
(सु. उ. अ. १६)

हताधिमन्थलक्षणमाह—उपेक्षणादित्यादि । अयं रोगो विदेहे दृष्ट्युत्क्षेपलक्षण एकः, अन्यः सकलनयनशोषलक्षणः पठ्यते । तद्यथा,—"अन्तर्गतः सिराणां तु यदा तिष्ठति मारुतः । स तदा नयनं प्राप्य शीघ्रं दृष्टिं निरस्यति ॥ तस्यां निरस्यमानायां निर्मन्थन्निव मारुतः । नयनं निर्ममत्याशु शूलतोदाधिमन्थनैः"—इति । इदं दृष्टिनिर्गमलक्षणम् । अत एवैतस्मिन्नर्थे सुश्रुते केचित् पठन्ति,—"अन्तः सिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् । हताधिमन्थं जनयेत्तमसाध्यं विदुर्बुधाः—इति । विदेह एव सकलाक्षिशोषः पठ्यते,—"अथवा शोषयेदक्षि क्षीणतेजोबलादयम् । तत्पद्ममिव संशुष्कमवसीदति लोचनम् ॥ हताधिमन्थं तं विद्यादसाध्यं वातकोपतः"—इति । अतः शोषार्थे उपेक्षणादक्षीत्यादि श्लोकोऽवगन्तव्यः । सादयतीति शोषयति । रुजाभिरुग्राभिरिति रुजाभिस्तोदादिभिर्महतीभिरुपलक्षितः ॥ १५ ॥

वारंवारं च पर्येति भ्रुवौ नेत्रे च मारुतः ।
रुजश्च विविधास्तीव्राः स ज्ञेयो वातपर्ययः ॥ १६ ॥
(सु. उ. अ. १६)

वातपर्ययलिङ्गमाह—वारंवारमित्यादि । पर्यायेण क्रमेण कदाचिद्भ्रुवि, कदाचिल्लोचने, वायुस्तीव्रां रुजां करोतीति वातपर्ययार्थः ॥ १६ ॥

यत् कूणितं दारुणरूक्षवर्त्म संदह्यते चाविलदर्शनं यत् ।
सुदारुणं यत् प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि ॥ १७ ॥
(सु. उ. अ. १६)

शुष्काक्षिपाकमाह—यत्कूणितमित्यादि । कूणितमिति निमीलितम् । दारुणं कठिनं रूक्षं च वातशोषाद्वर्त्म यस्य तद्दारुणरूक्षवर्त्म । संदह्यते सदाहं भवति । आविलदर्शन-

* 'अथ शोथरहितानि नेत्रपाकलक्षणानि जानीयात्' (आ० द०) ॥ १४ ॥

१ रागाश्रिग्रथितत्वात् इति क. ।

माकुलदर्शनम् । सुदारुणं कृच्छ्रोन्मीलनम् । प्रतिबोधने उन्मेषणे । सुदारुणं सुकठिनमिति गदाधरः । शुष्काक्षिपाकोपहतं तदक्षीति तच्छुष्केणाक्षिपाकेनोपहतमक्षीत्यर्थः । अयं रोगः सरक्तवातजन्यः । यदाह करालः,–"कूणितं खरवर्माक्षि कृच्छ्रोन्मीलाविलेक्षणम् । सदाहं सास्रजाद्वाताच्छुष्कपाकान्वितं वदेत्"–इति ॥ १७ ॥

यस्यावटुः कर्णशिरोहनुस्थो मन्यागतो वाऽप्यनिलोऽन्यतो वा ।
कुर्याद्रुजं वै भ्रुवि लोचने च तमन्यतोवातमुदाहरन्ति ॥ १८ ॥

(सु. उ. अ. १६)

अन्यतोवातमाह—यस्येत्यादि । अवटुर्घाटा । मन्ये ग्रीवापार्श्वसिरे । अन्यतो वेति उक्तप्रदेशादितरत्र पृष्ठे, सप्तम्यर्थे तसिः । अन्यत्र वातस्य कारणस्यावस्थानं, अन्यत्र लोचने भ्रुवि च रुजां करोतीत्यन्यतोवातः । विदेहेऽप्युक्तम्,–"मन्ययोरन्तरे वायुरुत्थितः पृष्ठतोऽपि वा । करोति भेदं निस्तोदं शङ्खे चाक्ष्णोर्भ्रुवोस्तथा । तमाहुरन्यतोवातं रोगं दृष्टिविदो जनाः"–इति ॥ १८ ॥

श्यावं लोहितपर्यन्तं सर्वं चाक्षि प्रपच्यते ।
सदाहशोथं सास्रावमम्लाध्युषितमम्लतः ॥ १९ ॥

(सु. उ. अ. ६)

अम्लाध्युषितमाह—श्यावमित्यादि । श्यावमीषन्नीलम् । अम्लत इत्यम्लभोजनात् । अम्लाध्युषितमिति पित्ताध्युषितं, कारणे कार्योपचारात् ॥ १९ ॥

अवेदना वाऽपि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः ।
मुहुर्विरज्यन्ति च याः स तादृग्व्याधिः सिरोत्पात इति प्रदिष्टः॥२०॥

(सु. उ. अ. ६)

सिरोत्पातमाह—अवेदना वाऽपीत्यादि । अक्षिराज्य इति अक्षिसिराः । विरज्यन्तीति विरक्ता भवन्ति, विशेषरक्ता भवन्तीत्यर्थः । रक्तजोऽयम् ॥ २० ॥

***मोहात्सिरोत्पात उपेक्षितस्तु जायेत रोगस्तु सिराप्रहर्षः ।**
ताम्राभमस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुं च ॥ २१ ॥[१]

(सु. उ. अ. ६)

सिराप्रहर्षमाह—मोहादित्यादि । अयमपि रक्तजः इति सर्वगताः ॥ २१ ॥

†निमग्नरूपं तु भवेद्धि कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै ।
स्रावं स्रवेदुष्णमतीव यच्च तत् सव्रणं शुक्ल(क्र)मुदाहरन्ति ॥२२॥

(सु. उ. अ. ५)

सन्धिवर्त्मशुक्लकृष्णदृष्टिगतेषु मध्ये प्राधान्याद्दृष्टिगतेषु वक्तुमुचितेषु स्वल्पवक्तव्यतया दृष्टिमण्डलप्रत्यासत्त्या कृष्णगतविकाराभिधानम् । तत्र सव्रणशुक्ललक्षणमाह—

* 'ताम्रमरुणम्, अच्छं निर्मलम् । प्रगाढमित्यतिशयेन अभिवीक्षितुं द्रष्टुं न शक्नोतीत्यर्थः (आ० द०) ॥ २१ ॥

† 'अथ कृष्णगताश्चत्वारः' (आ० द०) २२ ॥

[१] 'एतच्च–'ताम्राच्छमस्रम्' इति पाठाभिप्रायेण ।

निमग्नरूपमित्यादि। रूपग्रहणमाभासनिषेधार्थं, तेन निमग्नरूपमेव। यत् सूच्येवेत्युपमानं वर्तुलत्वख्यापनाय सूचीव्यधनवच्छेदनादर्शनाय च। स्रावं स्रवेदुष्णमिति स्रवेदुष्णमित्येतावतैव लब्धे स्रावे पुनः स्रावग्रहणं निरन्तरस्रावं लक्षयति। अतिशब्दस्तूष्णेन संबध्यत इति कार्तिकः। उष्णस्रावता रक्तात्मकत्वात्। शुक्लस्यात्र चात्यन्तरुग्बोद्धव्या, सव्रणत्वात्। यदाहाव्रणलक्षणे सुश्रुतः,—"नातिरुगश्रुयुक्तम्" (सु. उ. तं. अ. ५)—इति। तत् सव्रणं सक्षतं, क्षते तु रुजा युक्तैव, नयने तु सुकुमारे विशेषेणोदाहरन्ति विदेहप्रभृतयः। विदेहेऽप्युक्तं,—"रक्तराजीनिभं कृष्णे छिन्नाभं यच्च लक्ष्यते। सूच्यग्रेणेव तच्छुक्लमुष्णाश्रुस्रावि सव्रणम्"—इति॥ २२॥

दृष्टेः समीपे न भवेत्तु यच्च न चावगाढं न च संस्रवेद्धि।
अवेदनं वा न च युग्मशुक्लं तत् सिद्धिमायाति कदाचिदेव॥२३॥
(सु. उ. अ. ५)

असासाध्यतया निर्दिष्टस्यावस्थावशेन पाक्षिकीं सिद्धिमाह—दृष्टेः समीप इत्यादि। क्षतं हि स्वभावत एव संश्रयोद्घातकरं, अतो दृष्टिसमीपे न साध्यं, उक्तविपर्ययात्तु दृष्टिसमीपेऽपि सुखसाध्यमव्रणम्। न चावगाढमेकत्वग्गतम्। विपर्ययात्त्ववगाढमप्यव्रणं सिध्यति। अत एवाव्रणे वक्ष्यति—गम्भीरजातमिति। न च संस्रवेदिति न चात्यर्थं स्रवेत्, संशब्दस्यातिशयार्थत्वात्। अवेदनं मन्दवेदनं, रक्तस्य कफानुगतात्; वातानुगमादतिवेदनं तु न सिध्यति। युग्मं च क्षतशुक्लं कदाऽपि न सिध्यति॥ २३॥

स्यन्दात्मकं कृष्णगतं सचोषं शङ्खेन्दुकुन्दप्रतिमावभासम्।
वैहायसाभ्रप्रतनुप्रकाशमथाव्रणं साध्यतमं वदन्ति॥ २४॥
(सु. उ. अ. ५)

इदानीमव्रणशुक्ललक्षणमाह—स्यन्दात्मकमित्यादि। स्यन्दात्मकमभिष्यन्दनिमित्तकं, सर्वेषामक्षिरोगाणामभिष्यन्दनिमित्तत्वेऽपि चास्य नियमप्रतिपादनार्थमभिधानम्। वैहायसाभ्रप्रतनुप्रकाशमिति विहायसि स्थितं वैहायसं, 'तस्य निवासः' इत्यण्, विहायो नभः, आकाशस्थिताभ्रवत् प्रतनुप्रकाशमित्यर्थः। एतेनाच्छत्वं प्रतिपाद्यते। शुक्लत्वं तु शङ्खेन्दुकुन्दप्रतिमावभासमित्यनेनैव लब्धम्। वैहायसाभ्रग्रहणं सजलाभ्रव्यवच्छेदार्थं, तद्धि प्रायः पार्वतं भवतीति कार्तिकः। साध्यतमं सुखसाध्यम्। ननु, गम्भीरजातमित्यादिना कृच्छ्राभिधानेन? तद्विपर्ययेण सुखसाध्यत्वावगतिः सेत्स्यति, तत् साध्यतमाभिधानेन? नैवं, असत्यत्र साध्यतमाभिधाने उभयत्रापि कृच्छ्रत्वभ्रान्तिः स्यादतस्तदभिधानम्॥ २४॥

***गम्भीरजातं बहुलं च शुक्लं चिरोत्थितं चापि वदन्ति कृच्छ्रम्।**
विच्छिन्नमध्यं पिशितावृतं वा चलं सिरासूक्ष्ममदृष्टिकृच्च।
द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितं चापि विवर्जनीयम्॥२५॥
(सु. उ. अ. ५)

* 'सिरारक्तमिति सिरा हि चलाः, अतस्तदाश्रितं शुक्लमपि चलमेव। सव्रणं त्रित्वग्गतं चासाध्यमिति ज्ञेयम्। लोहितमन्तत इति प्रान्तेषु लोहितं व्रणाकारेण। चिरोत्थितं चिरकालजम्' (आ० द०)॥ २५॥

अव्रणस्यैवावस्थाभेदेन कृच्छ्रत्वमाह—गम्भीरजातमित्यादि। गम्भीरजातं द्वित्रिल-ग्नगतम्। बहुलं प्रततुनोऽश्राद्धनम्। अव्रणस्यैवावस्थाभेदेनासाध्यत्वमाह—विच्छिन्नम-ध्यमित्यादि। विच्छिन्नमध्यं विदीर्णमांसत्वात् सच्छिद्रं, निम्नमिति यावत्; तद्विपर्ययं तु पिशितावृतमुन्नतमांसरूपतया। चलमित्यनवस्थितम्। सिरासूक्ष्ममिति सिरावृतत्वात् सूक्ष्मं; अन्ये 'सिरासक्तं' इति पठन्ति, व्याचक्षते च—सिरासक्तं यतस्ततश्चलं, सिराणां चलत्वात्; सिरा हि मत्स्यवत् परिवर्तमाना मुहुर्मुहुश्चलन्ति; अन्ये 'सिराशुक्लं' इति पाठान्तरं व्याचक्षते; सिराभिः शुक्लं, सिराशुक्लं सिराशुक्लत्वहेतुकं; न हि सिराभवनं शुक्लत्वे हेतुरिति **गदाधरः**। अदृष्टिकृदिति दर्शनाभावकारि, दृष्टेः समीपे न भवेदि-त्यस्य विपर्ययोऽयम्। द्वित्वग्गतं द्विपटलाश्रितं, एतदपरलिङ्गसहितमसाध्यं, न तु केवलं; द्वित्वग्गतस्य कृच्छ्रत्वाभिधानात्। लोहितमन्ततश्चेति मध्ये शुक्लमन्ते लोहितं, व्रणाकारेण ॥ २५ ॥

उष्णाश्रुपातः पिडका च नेत्रे यस्मिन् भवेन्मुद्गनिभं च शुक्लम्।
तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत्तित्तिरिपक्षतुल्यम् ॥ २६ ॥
(सु. उ. अ. ५)

न केवलमेवंविधं परमसाध्यं किंत्वन्यादृशमपीत्यत आह—उष्णाश्रुपात इत्यादि। पिडका च नेत्र इत्यन्तं द्वित्वग्गतशुक्ले। तथाऽऽह **विदेहः**—"एकत्वग्गतमेवं स्याद्वि-त्वग्गतमिदं भवेत्। चोषोष्णत्वावदाहास्तु तृष्णा च पिडकोद्गमः"—इति। मुद्गनिभं च शुक्लमित्याकारेण, एतद्वित्वग्गतम्। तथाच **विदेहः**,—व्यक्तमुद्गफलाकारं शुक्लं द्वित्व-ग्गतं भवेत्"—इति। द्वित्रित्वग्गतस्याव्रणशुक्लस्य कृच्छ्रत्वे एतत् पिडकोद्गममुद्गफलाकार-त्वेनैवासाध्यत्वं बोध्यम्। अन्ये पुनः सव्रणशुक्लस्य विच्छिन्नमध्यमित्यादिकमसाध्यल-क्षणं वर्णयन्ति। अत्र पक्षे द्वित्वग्गतमिति केवलमेवासाध्यलक्षणं, एतच्च चावगाढमि-त्यस्य विपर्ययः। लोहितमन्ततः उष्णाश्रुपातः पिडका चेत्यादि द्वित्वग्गतशुक्ललक्षण-मिति। किंत्वियमत्रासङ्गतिः—विच्छिन्नमध्यं सच्छिद्रं, तद्यदि सच्छिद्रत्वं सव्रणशुक्लस्या-भ्युपगम्यते, तदा निम्नरूपमित्यनेनैव सिद्धत्वात् पुनरुक्तं स्यात्, किंच सव्रणशुक्लान-न्तरमस्य पाठो विफलः स्यात्। अन्ये तु सव्रणाव्रणशुक्लविषयं सामान्यमसाध्यलक्षण-मेतदाहुः; यथायोग्यतया क्वचिल्लिङ्गान्तरयोगेन च व्यवस्थेति च वर्णयन्ति। असाध्यत्वं **विदेहादन्येषां** मतेनाह—केचिदित्यादि। तित्तिरिपक्षतुल्यमिति शबलं, एतच्चानिषेधाद-नुमतम् ॥ २६ ॥

***श्वेतः समाक्रामति सर्वतो हि दोषेण यस्यासितमण्डलं च।**
तमक्षिपाकात्ययमक्षिरोगं सर्वात्मकं वर्जयितव्यमाहुः ॥ २७ ॥
(सु. उ. अ. ५)

इदानीमक्षिपाकात्ययमाह—श्वेत इत्यादि। दोषेण यः कृतः श्वेतः स समाक्रामति। सर्वात्मकं त्रिदोषजं; अन्ये तु स्यन्दात्मकमिति पठित्वा अभिष्यन्दात्मकमाहुः। तदा सर्वेषामभिष्यन्दमूलत्वाद्विशेषार्थमभिधानम् ॥ २७ ॥

---

* 'कृष्णमण्डलं सर्वतः समाक्रामति' (मा० ६०) ॥ २७ ॥

*अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः ।
विगृह्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत् ॥२८॥
(सु. उ. अ. ५)

अजकाजातमाह—अजापुरीषप्रतिम इत्यादि । अजापुरीषप्रतिमः शुष्काजपुरीषतुल्यः सलोहित ईषल्लोहितः । विगृह्य कृष्णमिति स्वोच्छ्रायेण कृष्णदेशं महत्त्वाद्विच्छिद्य । प्रचय इति प्रकृष्टश्चय उद्गम इति यावत् । अजकाया मेदोवत् संश्रयस्तृतीयपटलगतत्वेन मेदसः प्रचयो बोद्धव्यः । तथाच विदेहः,—"कृष्णेऽक्ष्णोर्यद्भवेच्छुक्लं छागलीविट्समप्रभम् । सान्द्रपिच्छिलरक्तास्रं त्रिलागमजकेति सा"—इति ॥ इति कृष्णजाः ॥ २८ ॥

†प्रथमे पटले दोषा यस्य दृष्ट्यां व्यवस्थिताः ।
अव्यक्तानि स रूपाणि कदाचिदथ पश्यति ॥ २९ ॥
(सु. उ. अ. ७)

कृष्णाश्रितत्वाद्दृष्टिमण्डलस्य दृष्टिजा उच्यन्ते । दृष्टिप्रमाणं तु सुश्रुतेनोक्तं,—"मसूरदलमात्रां तु पञ्चभूतप्रसादजाम्"—(सु. उ. तं. अ. ७)—इति । अत्र मसूरदलमात्रामिति मसूरार्धदलमात्रां, तथाच निमिः,—"पञ्चभूतात्मिका दृष्टिर्मसूरार्धदलोन्मितिः"—इति । ननु, एवं तर्हि विरुध्यते, यदाह स एव पुनः,—"नेत्रायामत्रिभागं च कृष्णमण्डलमुच्यते । कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविदो जनाः" (सु. उ. तं. अ. १)—इति, अत्र कृष्णसप्तमभागत्वेन दृष्टेरुक्तत्वात् । उच्यते, कृष्णसप्तमभागत्वेनापि मसूरार्धदलप्रमाणा दृष्टिरित्येक एवार्थः । ननु, एवमातुरोपक्रमणीयोक्तं 'द्व्यङ्गुलायतं नयनं, नयनत्रिभागपरिमाणा तारका, नवमस्तारकांशो दृष्टिमण्डलम्' (सु. सू. स्था. अ. ३५)—इति विरुध्यते । उच्यते, तत्र मण्डलाभिधानेन मण्डलसहिताया दृष्टेरुक्तिः, अत्र तु मण्डलरहिताया इति; मतभेदाद्वा न विरोधः, तारकानवमांशो दृष्टिरिति शल्यमतं, तारकासप्तमांशो दृष्टिरिति शालाक्यसिद्धान्तेन । ननु एवं तर्हि 'दृष्टिश्च रोमकूपाश्च न वर्धन्ते' (सु. शा. स्था. अ. ४)—इति शारीरोक्तं विरुध्यते, यतः कृष्णसप्तमभागत्वेन दृष्टेरुक्तत्वात् कृष्णवृद्ध्या तद्वृद्धेः संभवात् । नैवं, अत्रान्तरवत्र बहु वर्धत इत्यभिप्रायेणोक्तं दृष्टिर्न वर्धत इति । दृष्ट्यां च चत्वारि पटलानि । रसरक्ताश्रयं बाह्यं, द्वितीयं मांससंश्रयं, तृतीयं मेदःसंश्रयं, चतुर्थं कालकास्थिसंस्थितम् । तथा च सुश्रुतः,—"तेजोजालश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् । मेदस्तृ-

---

* 'अभ्युपैति समन्तादागच्छति । समणशुक्लममगशुक्लमक्षिपाकात्ययः अजकाजातः एवं कृष्णगताश्चक्षूरोगाश्चत्वारः । इति कृष्णजाः' (आ० द०) ॥ २८ ॥

† 'तथाच विदेहः—"यथा दोषाः प्रकुपिताः प्राप्य रूपवहे सिरे । दृष्टेरन्तरमाद्यं तु पटलं समभिद्रुताः ॥ एकैकमनुपद्यन्ते पर्यायात्पटलान्तरम्" इति' (आ० द०) ॥ २९ ॥

---

१ दृष्टेः अजकादीनां—दृष्टि हंतत्त्वात् इति क. ।

तीयं पटलमाश्रितं लस्थि चापरम् । पञ्चमांशसमं दृष्टेस्तेषां बाहुल्यमिष्यते" (सु. उ. तं. अ. १)-इति । अत्र तेजःशब्देन रक्तं, जलशब्देन च रसो व्याख्यातः । तेषु पटलेषु बाह्यादिभेदेनाधिष्ठानविशेषप्रभावाद्दोषाणां लिङ्गविशेषमाह—प्रथमे पटल इत्यादि । प्रथमे पटले सर्वाभ्यन्तरे पटले कालकास्थिसंश्रये; न तु बाह्ये, तत्र प्रथमं दोषलिङ्गानुपलब्धेः; यदि तु कुष्ठादिवद्बाह्यं प्रथमं प्रदूष्याभ्यन्तरे दोषानुप्रवेशः स्यात्तदा प्रागेव रोगस्तत्रोपलभ्येत, न चैवं दृश्यते । तथाच विदेहः,—"दृष्टेरन्तरमाद्यं तु पटलं समभिद्रुताः" इत्यारभ्य "एकैकमनुपद्यन्ते पर्यायात् पटलान्तरम्"—इति । प्रथमे पटल इत्यादिग्रन्थात् पूर्वं केचित् "सिराभिरभिसंप्राप्य विगुणोऽभ्यन्तरे भृशम्" (सु. उ. तं. अ. १)-इति श्लोकार्धं संप्राप्तिरूपं पठन्ति सुश्रुते, तच्च "सिरानुसारिभिर्दोषैः (सु. उ. तं. अ.)"—इत्यनेनैव गतार्थमित्यनार्षं टीकाकारैर्व्याख्यातम् । रूपाणीति रूपवन्ति द्रव्याणि । कदाचिदथ पश्यतीत्यनेनात्राधिष्ठानविशेषाद्दोषस्याल्पबलता उक्ता भवति । अव्यक्तरूपाण्यपि वक्ष्यमाणभ्रमरारुण-वर्णादियुक्तानि - वातेन, पित्तेनादित्यखद्योतादिपीतनीलवर्णानि, कफेन सितवर्णानि, रक्तेन रक्तवर्णानि, सन्निपातेन चित्रवर्णानि, एवं द्वितीयतृतीयचतुर्थपटलेष्वपि व्याख्येयम् ॥ २९ ॥

***दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ।**
मक्षिकामशकांश्चापि जालकानि च पश्यति ॥ ३० ॥
मण्डलानि पताकांश्च मरीचीन् कुण्डलानि च ।
परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि च ॥ ३१ ॥
दूरस्थानि च रूपाणि मन्यते स समीपतः ।
समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् ॥ ३२ ॥
यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ।
(सु. उ. अ. ७)

द्वितीयपटलगतस्य लिङ्गमाह—दृष्टिर्भृशं विह्वलतीत्यादि । विह्वलति पुनः पुनरसम्यग्रूपं गृह्णाति तथाऽविद्यमानान् मक्षिकादीन् पश्यति; अथवा मक्षिकेत्यादिना विह्वलत्वमेव व्याक्रियते । जालकानि जालान्येव । मरीचीनिति रश्मीन् । परिप्लवानिति मण्डूकादीनां परि सर्वतः प्लवान् गतीः । विविधानिति ऊर्ध्वाधस्तिर्यग्गतश्लेष्मादिदोषवर्णेन नानाविधान्, अन्ये परिप्लवान् विविधानिति नानावर्णान् जलप्लवानित्याचक्षते । गोचरविभ्रमादिति विषयभ्रान्तेः । सूचीपाशं न पश्यतीति सतोऽपि सूक्ष्मस्यानुपलम्भः; सूचीपाशं सूचीरन्ध्रं, पाशं वा गुणम् ॥ ३०—३२ ॥—

ऊर्ध्वं पश्यति नाधस्तात्तृतीयं पटलं गते ॥ ३३ ॥

* द्वितीयं पटलं मांसरक्ताश्रयम् । तथा मक्षिकादीन्यप्यसन्ति यथादोषवर्णानि पश्यति, अथवा वर्षं वृष्टिः, अभ्रं मेघः, तमोऽन्धकारः, यत्नवान् कृतयत्नोऽपि (आ० द०) ॥ ३०—३२॥

१ असमर्था भवति इति क. ।

महान्त्यपि च रूपाणि छादितानीव चाम्बरैः।
कर्णनासाक्षिहीनानि विकृतानीव पश्यति ॥ ३४ ॥
यथादोषं च रज्येत दृष्टिर्दोषे बलीयसि।
(सु. उ. अ. ७)

तृतीयपटलगतस्य लिङ्गमाह—ऊर्ध्वं पश्यतीत्यादि। ऊर्ध्वं दर्शनाभिधानादधोदर्शनस्य निषेधसिद्धौ तदभिधानं स्वरूपानुवादार्थम्। ननु पार्श्वयोरीषद्दर्शनार्थं किमित्येतन्न भवति? उच्यते, ऊर्ध्वाधोगतलेनैव पार्श्वस्य परिग्रहादिति कार्तिकः। यदेतद्रूपं पश्यति तत् कीदृशमित्यत आह—महान्त्यपीत्यादि। छादितानीव चाम्बरैरिति आवृतानीव वस्त्रैः। 'अम्बरे' इति पाठान्तरे आकाशे छादितानि केनापि। विकृतानीवेति छिन्नकरपादादीनि। अत्र रागप्राप्तिमाह—यथादोषं च रज्येत दृष्टिर्दोषे बलीयसीति, अस्यार्थः—यथायथं दोषवर्णैररुणपीतसितादिभिर्युज्यते दृष्टिः, रागश्चात्र वर्णमात्रवचनः। अत एव वक्ष्यति–'कफात् सितः शोणितजः सरक्त' इति। दोषे बलीयसीति रक्तमांसमेदःसहाये बलवति दोषे, अन्यथा तु तृतीयेऽपि रागो न भवतीति व्यभिचारः सूच्यत इति गदाधरः। ननु तृतीये कथं रागवर्णनं, बाह्यपटलेनावृते दर्शनासंभवात्? न चाश्मरीवर्णाभिधानवदायुर्वेदप्रामाण्यार्थं भविष्यतीति, अश्मर्या उत्तरकालमाकृष्टौ तथा प्रतीतेः, इह तु न तादृक्। उच्यते, तृतीयपटलगतस्य दोषस्य तथास्वभावाद्बाह्ये रागोपलब्धिः, तृतीयपटलादारभ्य रागोदयः। यदाह विदेहः,—"'यथास्वं रज्यते दृष्टिर्दोषैस्त्रिपटलस्थितैः। चतुर्थपटलप्राप्तैर्मण्डलं रज्यते तु तैः"—इति ॥ ३३ ॥ ३४ ॥—

*अधःस्थिते समीपस्थं दूरस्थं चोपरिस्थिते ॥ ३५ ॥
पार्श्वस्थिते तथा दोषे पार्श्वस्थं नैव पश्यति।
समन्ततः स्थिते दोषे संकुलानीव पश्यति ॥ ३६ ॥
दृष्टिमध्यस्थिते दोषे महद्ध्रस्वं च पश्यति।
द्विधा स्थिते द्विधा पश्येद्बहुधा चानवस्थिते ॥ ३७ ॥
दोषे दृष्ट्याश्रिते तिर्यक् स एकं मन्यते द्विधा।
(सु. उ. अ. ७)

अधुनाथ ऊर्ध्वमेवं यथाप्रदेशं दृष्टौ दोषावस्थाने यथा न पश्यति यादृग्वा पश्यति तथा दर्शयितुमाह—अधःस्थित इत्यादि। समीपस्थं दूरस्थं चेति नैव पश्यतीति संबन्धः। समन्तत इति सर्वतः। संकुलानीवेति अन्यान्यरूपेणैव मिश्राणि। अनवस्थित इति अनियतावस्थान इत्यर्थः ॥ ३५–३७ ॥

* 'दृष्टिमण्डलाधोभागस्थिते दोष इत्यर्थः; तथोपरिस्थिते दोषे दूरस्थं च नैव पश्यतीति संबन्धः' (आ० द०) ॥ ३५–३७ ॥

*तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः ॥ ३८ ॥
रुणद्धि सर्वतो दृष्टिं लिङ्गनाशमतः परम्।
अस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ ३९ ॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः।
निर्मलानि च तेजांसि भ्राजिष्णून्यथ पश्यति ॥ ४० ॥
(सु. उ. अ. ७)

चतुर्थपटलगतमाह—तिमिराख्य इत्यादि। आन्ध्योत्पादकतया तिमिरसाधर्म्यात्तिमिराख्यः, दोषो रोगः, "दोषा अपि रोगाख्यां लभन्ते" इत्यागमात्; स एव रोगः सर्वतो दृष्टिरोधाल्लिङ्गनाश उच्यते लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्गमिन्द्रियं दर्शनशक्तिः, तन्नाशोऽस्मिन्निति लिङ्गनाशः। लिङ्गनाशमतः परं 'वदन्ति' इति शेषः। अस्मिन्नपि तमोभूत इति भूतशब्दः सादृश्ये, रूपस्यानुपलम्भादन्धकारसदृशे। नातिरूढे नातिवृद्धे, अतश्चन्द्रादित्यादीनि भास्वन्ति वस्तूनि पश्यति। अन्तरीक्षे चेत्यस्योपादानं भूमेस्तमोमयत्वात्, तत्र च तमोऽभिभवात्तादृशस्य चक्षुषो दर्शनाशक्तेः ॥ ३८–४० ॥

†स एव लिङ्गनाशस्तु नीलिका काचसंज्ञितः।
(सु. उ. अ. ७)

तस्यैव लिङ्गनाशस्य संज्ञान्तरमाह—स एव लिङ्गनाशस्त्वित्यादि। यस्तृतीयपटलस्थितः काचसंज्ञितो दोषः स एवोपेक्षया चतुर्थे पटले पुनर्लिङ्गनाशो नीलिका च। तुशब्दः पुनरर्थे। कुतः पुनरयमृजुरेव ग्रन्थो न लगति—नीलिकाकाचाभ्यां पर्यायाभ्यां संज्ञितो नीलिकाकाचसंज्ञित इति; नैवं, तन्त्रान्तरे तृतीयपटलस्थिते दोषे काचाभिधानात्। यदाह **निमिः**,—"काच इत्येष विज्ञेयो याप्यस्त्रिपटलोत्थितः। चतुर्थपटलप्राप्तो लिङ्गनाशः स उच्यते ॥ प्रत्याख्येयश्च कफजो व्याधिः साध्यस्तु तद्विदा"–इति। अत्रापि तत्प्रत्ययात्तृतीयपटलस्थस्य काचसंज्ञा, चतुर्थपटलप्राप्तस्य प्रत्याख्येयत्वं प्रत्येतव्यम्। यत्पुनर्लिङ्गनाशोपादानं तत्सकलपर्यायज्ञानार्थम्। **गदाधरस्तु** 'नीलिकाविशेषिता काचसंज्ञा नीलिकाकाचसंज्ञा' इत्याह; एतेन तृतीयपटलस्थदोषे काचसंज्ञा, चतुर्थे तु सा नीलिकया विशिष्यते इति फलति। एकजातीयतया त्रिचतुःपटलयोरपि रोगाणां षड्त्वमेव, नतु द्वादशत्वं; तेन न संख्यातिरेकः। इदमिदानीं चिन्त्यते—तृतीयपटलस्थे दोषे काचसंज्ञा तिमिरसंज्ञा च, तर्हि कथं न षट्संख्याहानिः? काचात्तिमिरस्य भिन्नत्वात्, उक्तं च 'षड् लिङ्गनाशाः' इति; अथ मन्यसे, तिमिरात् काचो न भिद्यते, तस्यावस्थान्तरत्वादिति; न, तद्विपरीतसाधकत्वाद्धेतोः; यतोऽभिष्यन्दसिरोत्पाताभ्यामधिमन्थसिराहर्षयोरवस्थान्तरत्वेऽपि भिन्नत्वं प्रतीयते। उच्यते–भवत्वेवं, यद्यवस्थान्तरत्वेऽपि विशिष्टनामप्राप्तिस्तयोरिवास्य

* 'चतुर्थः कालकास्थिश्रितः; तिमिरसाधर्म्यात्तिमिराख्यः, अतश्चन्द्रादित्यादीनि भास्वन्ति पिण्डीभूतानि ज्वलन्तीव पश्यति' (आ० द०) ॥ ३८–४० ॥

† 'एकजातीयतया तृतीयचतुर्थपटलगतानां रोगाणां तिमिरकाचनीलकाचसंज्ञा; तद्गतामपि षड्त्वमेव, न तु द्वादशत्वम्। संख्यातिरेकेणैव षड्लिङ्गनाशा इति' (आ० द०) ॥

प्रथमनामपरित्यागात् स्यात्; न चैवं, 'तिमिराख्यः स वै दोषः' इत्यभिधानात्, तथाच 'तिमिरे रागिणि'—इति वचनात्; तस्मान्नास्यावस्थान्तरे पूर्वनामपरित्यागः, ततस्तिमिरात् काचस्यावस्थान्तरत्वेऽप्यनन्यत्वं साधु, यथा—सत्यपि यौवनत्वे यज्ञदत्तस्य न स्वाभिधेयहानिः, अतो न संख्यातिरेकप्रसंग इति ॥—

*वातेन चापि रूपाणि भ्रमन्तीव च पश्यति ॥ ४१ ॥
आविलान्यरुणाभानि व्याविद्धानीव मानवः ।
पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ॥ ४२ ॥
नृत्यतश्चैव शिखिनः सर्वं नीलं च पश्यति ।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ॥ ४३ ॥
(पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रमेवाभ्रसंप्लवम् ।)
सलिलप्लावितानीव परिजाड्यानि मानवः ।
पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ॥ ४४ ॥
स सितान्यपि कृष्णानि पीतान्यपि च मानवः ।
सन्निपातेन चित्राणि विप्लुतानीव पश्यति ॥ ४५ ॥
बहुधा च द्विधा चापि सर्वाण्येव समन्ततः ।
हीनाधिकाङ्गान्यपि तु ज्योतींष्यपि च भूयसा ॥ ४६ ॥
(सु. उ. अ. ७)

दोषविशेषेण रूपविशेषदर्शनमाह—वातेनेत्यादि । अविशेषेण यदुक्तमेतद्वाते तत् सर्वपटलेषु संबध्यते, तुल्यत्वाद्व्याधेः । व्याविद्धानीव कुटिलानीव । खद्योतो ज्योतिरिङ्गणः, शक्रचाप इन्द्रधनुः, गुणान् रूपाणि, आदित्यादीनां रूपाणीतीत्यर्थः । शिखिनो मयूरान् । सलिलप्लावितानीव परिजाड्यानीति सलिलप्लवनेनैव स्तिमितानीत्यर्थः । सितानीति श्वेतानि । ननु, रक्तेन कथं सितानीत्युच्यन्ते? श्लेष्मणा सितरूपस्य दर्शितत्वात् । नैवं, सितान्यपि कृष्णानि पीतानि पश्यतीति व्याख्यानाददोषः; स इति मानवः । रक्तेन कृष्णपीतदर्शनं पित्तसधर्मकत्वाद्रक्तस्य । चित्राणीति नानावर्णानि । विप्लुतानीवेति विपरीतानि । विपरीतत्वमेव विवृणोति—बहुधेत्यादि । अयमर्थः—सन्निपातेन पूर्वप्रकारेण बहुविधानि द्विविधानि वा सर्वाणि द्रव्याणि पश्यति, तृतीयपटले हीनाधिकाङ्गान्यपीति गदाधरः ॥ ४१–४६ ॥

पित्तं कुर्यात् परिम्लायि मूर्च्छितं पित्ततेजसा ।
पीता दिशस्तु खद्योतान् भास्करं चापि पश्यति ॥ ४७ ॥
विकीर्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव वा ।
(सु. उ. अ. ७)

* कफेन रूपमाह—गौराणीत्यादि । श्वेतचामरशुभ्राणि शुभ्रमेघसदृशानि । असूक्ष्माणि स्थूलानि । व्यभ्रे चैवाभ्रसंप्लवमिति अनभ्रे आकाशे मेघोन्नतिं पश्यति' (मा० द०) ॥ ४१–४६ ॥

१ हरितान्यथ इति ख. ।

पित्तेनापरं परिम्लायिसंज्ञकं तिमिरमाह—पित्तं कुर्यादित्यादि। परिम्लायीति परिम्लायि तिमिरं; एतच्च रक्तमूर्च्छितपित्तकृतं पीतं नीलं बोद्धव्यम्। यदाह सात्यकिः,-"एवमेवं तु विज्ञेया नीलाः पित्तसमुत्थिताः। रक्ताः पित्तोत्थिताः पीताः"—इति। अत्र वचने काचा इति विशेष्यत्वेन बोद्धव्यम्। मूर्च्छितं पित्ततेजसेति पित्तस्य तेजो रक्तं, प्रसादरूपत्वात्; तेन मिश्रितम्। अन्ये तु 'रक्ततेजसा' इति पठन्ति, रक्तस्य तेजो वलं रक्ततेजः; केचित् 'भक्ततेजसा' इति पठन्ति, भक्तस्य अन्नस्य तेजसा प्रसादेन रसेनेत्यर्थः; रक्ततेजसेत्यत्रापि रक्तार्थं तेजो रक्ततेज इति रस एवाभिधातुं शक्यते, पित्ततेजसेत्यत्रापि पित्तार्थं तेजः पित्ततेजः; पित्तशब्देन समानत्वेन तत्प्रसादत्वेन च रक्तमभिधाय पूर्वं एवार्थः कर्तुं शक्यते। तथाच विदेहः,-"पित्तं रक्तप्रसादेन मूर्च्छयित्वा च मारुतम्"—इत्यारभ्य "एष याप्यः स्मृतः काचो म्लायीनाम्ना शरीरिणाम्"—इति। इदं त्वन्यत्र रक्तपित्ताभ्यां पठ्यते। यदुक्तं,-"विदधाति परिम्लायि पित्तं रक्तेन संगतम्। तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम्"—इति, अत्रापि यदि रक्तशब्देन रक्तार्थं यत्तद्रक्तमिति कुत्सया रसोऽभिधीयते, तदा पूर्वेण सह समानार्थमेवैतद्वचनं स्यादिति। परिम्लायिरोगे तिमिरवतः पुंसो रागग्रहणे लिङ्गमाह—पीता दिश इत्यादि। विकीर्यमाणानिति आच्छाद्यमानान्। याप्यश्चायं, तथाहि सात्यकिः—"तृतीयं पटलं प्राप्तं तिमिरं रागि जायते। अरागि तिमिरं साध्यमाद्यं पटलमाश्रितम्॥ कृच्छ्रं द्वितीये रागि स्यात्तृतीये याप्यमुच्यते"—इति॥ ४७॥—

वक्ष्यामि षड्विधं रागैर्लिङ्गनाशमतः परम्॥ ४८॥

(सु. उ. अ. ७)

वातादिभेदेन षड्विधं तिमिरमभिधाय रागैः षड्विधमाह—वक्ष्यामि षड्विधं रागैरित्यादि। सर्वानुगां तिमिरसंज्ञां विहाय लिङ्गनाशसंज्ञया कीर्तनं रागप्रकर्षप्राप्तेः॥ ४८॥

***रागोऽरुणो मारुतजः प्रदिष्टो म्लायी च नीलश्च तथैव पित्तात्।**
कफात् सितः शोणितजः सरक्तः समस्तदोषप्रभवो विचित्रः॥४९॥

(सु. उ. अ. ७)

वातादिरागोद्देशमाह—रागोऽरुण इत्यादि। म्लायी च नीलश्च तथैव पित्तादिति म्लायी पीतनीलो वर्णः। ननु, शेषे परिम्लायि पठितं तत् कथमधुना वातरागानन्तरं तस्योक्तिः? नैवं, रागकाले वायुरप्यत्रांशेन व्याप्रियते इति प्रतिपादनार्थमिति कार्तिकः। पैत्तिकरूपद्वयस्यैकत्राभिधानेन लाघवं स्यादिति युक्तं, यत्तु प्रागेव न कृतं तदेकविकारशङ्कानिरासार्थम्॥ ४९॥

अरुणं मण्डलं दृष्ट्यां स्थूलकाचारुणप्रभम्।

(सु. उ. अ. ७)

* 'विचित्रो नानावर्णः' (आ॰ द॰)॥ ४९॥

१ अत्र विदेहः इति क.।

उद्देशक्रमेण वातिकरागस्यैव विशिष्टलक्षणमाह—अरुणं मण्डलमित्यादि । अरुणं मण्डलं कीदृशं भवतीत्यत आह—स्थूलकाचारुणप्रभमिति ।—स्थूलकाचस्येव अरुणा प्रभा यस्य तत्तथा; एतेन बाहुल्यमरुणत्वं च प्रतिपाद्यते । काचोऽत्रारुणो विवक्षितः ॥

*परिम्लायिनि रोगे स्यान्म्लायि नीलं च मण्डलम् ॥ ५० ॥
दोषक्षयात् स्वयं तत्र कदाचित् स्यात्तु दर्शनम् ।
(सु. उ. अ. ७)

परिम्लायिनो विशिष्टलिङ्गमाह—परिम्लायिनीत्यादि । अत्र गदाधरस्तु 'रक्तजं मण्डलं दृष्टौ स्थूलकाचानलप्रभम्'–इति पठित्वा एतदपि परिम्लायिलक्षणमाह, व्याचष्टे च–बाहुल्येन स्थूलकाचस्येव वर्णतोऽनलस्येव प्रभा यस्य तत्तथेति, अनलप्रभत्वेन पीतं मण्डलं भवति, पीतं चेषन्नीलं बोद्धव्यं, 'म्लायि नीलं च मण्डलम्'- इत्यभिधानात्, तथा 'पित्तान्मण्डलमानीलं कांस्याभं पीतमेव च–' इत्युक्तं, आनील-मीषन्नीलमित्यर्थः । म्लायीति म्लानमिति कार्तिकः । दोषक्षयादिति कर्मक्षयात्, सत्यपि दोषरूपत्वे दर्शनसद्भावात् । ननु, किं तर्हि दोषरूपं तादृशमेवावतिष्ठते उत क्षीणं वा ? तत्र न तावदाद्यः पक्षः, दोषाणां कृतकार्याणां तथात्वे दर्शनस्यासंगतत्वात्; अथ द्वितीयस्तदा दोषस्यैव क्षयादित्यापतितं किमिति कर्मक्षयादिति स्वीक्रियते ? नैवं; विना दोषप्रतीकारं दर्शनोदयाद्विकारस्वभावादिति कार्तिकः । अन्ये तु कालवशाद्वातादिदोषस्यैव क्षयात् कदाचिद्दर्शनं स्यादित्याहुः; यतः कालादिजमपि विशेषं क्वचिल्लक्षणत्वेन पठत्येव, दोषशब्देन च कर्मणोऽभिधानमप्रसिद्धं; किंवा दोषक्षये एव कदाचित् कर्मक्षयो हेतुरिष्यतां, कर्मणश्च कदाचित् क्षयो वैचित्र्यात् । अथात्रैव कुत एवं ? उच्यते, अस्यैवंविधकर्मजन्यत्वादिति । गदाधरपाठे रक्तजमित्यत्र रक्तमित्युपलक्षणं, तेन रक्तपित्तजम् ॥ ५० ॥—

†अरुणं मण्डलं वाताच्चञ्चलं परुषं तथा ॥ ५१ ॥
पित्तान्मण्डलमानीलं कांस्याभं पीतमेव च ।
श्लेष्मणा बहुलं पीतं शङ्खकुन्देन्दुपाण्डरम् ॥ ५२ ॥
चलत्पद्मपलाशस्थः शुक्लो विन्दुरिवाम्भसः ।
मृज्यमाने च नयने मण्डलं तद्विसर्पति ॥ ५३ ॥
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् ।
दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे ।
यथास्वं दोषलिङ्गानि सर्वेष्वेव भवन्ति हि ॥ ५४ ॥
(सु. उ. अ. ७)

* 'परिम्लायिनि तिमिरे दोषक्षयात् कदाचित्तत्र दर्शनं भवतीत्याह–दोषक्षयादिति । कालादिना वातादिदोषस्यैव क्षयात्; अन्ये कर्मसहचरितवातादिदोषक्षयात्' (आ० द०) ॥ ५० ॥

† 'तेषामेव मण्डलगतरागमाह–अरुणमित्यादि । श्लेष्मणा बहुलमित्यादिकफलक्षणे बहुलं घनम् । कमलपत्रस्थजलबिन्दुसदृशं, मृज्यमाने नेत्रे तन्मण्डलं प्रसरति' (आ० द०) ॥५२–५४॥

रागोऽरुणो मारुतज इत्यादिसूत्रं पूर्वोक्तं विवृणोति—अरुणं मण्डलं वातादित्यादि । पित्तान्मण्डलमानीलमिति आनीलमीषन्नीलं पीतमेव, तेन रक्तसंबन्धे सति कांस्याभम् । पीतमेव चेति रससंबन्धे पीतमेव, कांस्याभमापाण्डुपीतमित्यर्थः । केचिदत्र कफजे पठन्ति,—'संकुचत्यातपेऽत्यर्थं छायायां विस्तृतो भवेत्'—इति । शोणितजे प्रवालेत्यादौ प्रवालं स्वनामख्यातं तदाभं, पद्मपत्राभं च रक्तपद्मपुष्पदलाभम् । त्रिदोषजे चित्र इत्यत्र यथास्वं वातादिवर्णविभेदेन चित्रत्वं बोद्धव्यं, यथास्वमित्यस्य वक्ष्यमाणस्यात्रापि संबन्धात्; तेनायमर्थः—यथायथं वातादीनां वर्णभेदेन चित्रवर्णो भवति, उद्देशोक्तवर्णचित्रत्वे साक्षादेतादृशविवरणाभाव इति विशेषः । यथास्वं दोषलिङ्गानीत्यस्याभिधानं न्यायसिद्धस्यैवार्थस्य द्योतनार्थम् । दोषलिङ्गानि वातादीनां क्रमेणारुणादिलिङ्गान्युक्तेषु ज्ञातव्यानि ॥ ५१–५४ ॥

***षड् लिङ्गनाशाः षडिमे च रोगा दृष्ट्याश्रयाः षट् च षडेव वाच्याः ।**
(सु. उ. अ. ७)

अतःपरमुक्तवक्ष्यमाणविकारयोः संख्याभिधानार्थमाह—षडित्यादि । षड्लिङ्गनाशा इत्युक्तानुवादोऽयं । षडिमे च रोगा इति पित्तविदग्धदृष्ट्यादयो वक्ष्यमाणाः । ननु, उक्तानुवादो युक्तः, वक्ष्यमाणानां पुनः किमर्थं संख्योक्तिः ? नैवं, पित्तकफविदग्धदृष्ट्यवस्थान्तराभ्यां दिवान्धरात्र्यन्धाभ्यां संख्याधिक्यनिरासार्थं, अत एव षडेवेत्यवधारणं कृतं, षट् च षडेवेति मिलित्वा द्वादश, अमुं च ग्रन्थं केचिदत्र संग्रहे[१] न पठन्त्येव ॥—

†पित्तेन दुष्टेन सदा तु दृष्टिः पीता भवेद्यस्य नरस्य किंचित् ॥ ५५ ॥
पीतानि रूपाणि च तेन पश्येत् स वै नरः पित्तविदग्धदृष्टिः ।
प्राप्ते तृतीयं पटलं तु दोषे दिवा न पश्येन्निशि चेक्षते सः ॥ ५६ ॥
रात्रौ च शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत् ।
(सु. उ. अ. ७)

पित्तविदग्धदृष्टिलिङ्गमाह—पित्तेनेत्यादि । दृष्टिः पीता भवेदिति प्रथमद्वितीययोः पटलयोरिति गम्यते, यतः परतः 'प्राप्ते तृतीयं पटलं'—इत्यभिधास्यति । ननु, यद्येवं कथं तिमिरादस्याः पार्थक्यं ? उच्यते—तृतीयपटलप्राप्तिमन्तरेण वर्णासद्भावात् । एतच्च सति वर्णे पटलान्तरगतदोषलिङ्गभावात् प्रत्येतव्यम् । अस्मिन्नेव व्यवस्थाने तादृक्स्वरूपो दोषः कथमन्यविकारं करोतीति नाशङ्कनीयं, तज्जनककर्मणो भिन्नत्वेन

* 'पित्तविदग्धदृष्टिरित्यादिना दिवान्धः, तथा नर इत्यादिना रात्र्यन्धः, तथा धूमदर्शी ह्रस्वजात्यनकुलान्ध्यगम्भीरसंज्ञा इति दृष्टिरोगाः वक्ष्यमाणाः षट्; पूर्वोक्ताः षट् लिङ्गनाशा दिवान्धादयो वक्ष्यमाणाः षड्विकाराः, एवं दृष्ट्याश्रया रोगा द्वादश ज्ञेयाः' (आ० द०) ॥

† 'पित्तविदग्धदृष्टेरवस्थान्तरं दिवान्धमाह—प्राप्त इत्यादि । रात्रौ तु शीतानुग्रहाद्रूपाणि पश्येत्' (आ० द०) ॥ ५५ ॥ ५६ ॥

१ 'अमुं ग्रन्थं केचित्संग्रहे पठन्ति' इति पा० ।

सामग्रीभेदात् । अयं दिवान्धः, दिवा न पश्येदिति वचनात् । तानीति रूपाणि । दोषे पित्ते ॥ ५५ ॥ ५६ ॥—

***तथा नरः श्लेष्मविदग्धदृष्टिस्तान्येव शुक्लानि तु मन्यते सः ॥ ५७ ॥**
त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्यानुगृहीतदृष्टिः पश्येत्तु रूपाणि कफाल्पभावात् ॥५८॥
(सु. उ. अ. ७)

श्लेष्मविदग्धदृष्टिलिङ्गमाह—तथा नरः श्लेष्मविदग्धदृष्टिरित्यादि । एतां च प्रथम-द्वितीयपटलाश्रितः श्लेष्मा जनयति; परतः 'त्रिषु' इत्युक्तेः । तानीति रूपाणि । त्रिषु स्थितोऽल्प इत्यनेन दिवादर्शनं प्रत्यानुकूल्यं ख्याप्यते, यदि ह्यनल्पदोषः स्यात्तदा दिवाऽपि दर्शनं न भवेदेव । दोषोऽत्र कफः, तस्यैव प्रक्रान्तत्वात्; अयं नक्तान्धः ॥ ५७ ॥ ५८ ॥

†शोकज्वरायासशिरोभितापैरभ्याहता यस्य नरस्य दृष्टिः ।
धूम्रांस्तथा पश्यति सर्वभावान् स धूमदर्शीति नरः प्रदिष्टः ॥ ५९ ॥
(सु. उ. अ.७)

धूमे(म्र)दर्शिनो लिङ्गमाह—शोकज्वरायासेत्यादि । शोकादिभिः कारणैः कुपितेन पित्तेनाभ्याहता उपहता दृष्टिरिति प्रत्येतव्यं, अस्य सुश्रुते रोगसंग्रहे पैत्तिकगणेऽभि-धानात् । अयं च रोगो बाह्यपटलस्थेन दोषेण जन्यत इति गदाधरः, तृतीयपटला-श्रितदोषेणेति कार्तिकः । दिवा धूम्रान् पश्यति, न तु नक्तं; तदा पित्तस्य क्षीणत्वा-दिति व्याख्यानयन्ति ॥ ५९ ॥

यो ह्रस्वजाड्यो दिवसेषु कृच्छ्राद्ध्रस्वानि रूपाणि च तेन पश्येत् ।

ह्रस्वजाड्यलक्षणमाह—यो ह्रस्वजाड्य इत्यादि । तेन ह्रस्वजाड्येन ह्रस्वानि रूपाणि दिवा यः पश्येत् स ह्रस्वजाड्या इति योजना । अत्र दोषो दृष्टिमध्यगतः । यदुक्तं,— "दृष्टिमध्यगते दोषे महद्ध्रस्वं च पश्यति"—इति । अयं पैत्तिकः ॥—

विद्योतते यस्य नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत् ॥ ६० ॥
चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः ।

नकुलान्ध्यसंज्ञमाह—विद्योतते यस्येत्यादि । नकुलस्य यद्वद्यथा दृष्टिर्विद्योतते वर्णेन प्रतिभासते तथाऽस्येत्यर्थः । अतः सर्वदृष्टिमण्डलगतो रागः सदोषवर्णश्च

* 'यः श्लेष्मविदग्धदृष्टिः स तानि रूपाणि शुक्लानि पश्यति, अत्रापि प्रथमद्वितीयपटला-श्रितत्वं बोद्धव्यम् । अवस्थान्तरं राज्यन्धमाह-त्रिष्वित्यादि । त्रिषु पटलेषु स्थितोऽल्पदोषो नक्तान्ध्यं जनयति, रात्रौ न पश्यतीत्यर्थः । सूर्यानुग्रहाद् कफाल्पभावाद् स दिवाऽनुपश्यति' (आ० द०) ॥ ५७ ॥ ५८ ॥

† 'ससधूमैकान् धूमेन सह वर्तन्त इति सधूमकास्तान्पदार्थान्पश्यति, द्वितीयपटलाश्रितेन दोषेणेति कार्तिकः' (आ० द०) ॥ ५९ ॥

१ शोकादिविदग्ध दृष्टिलिंगमाह इति क. । २ "धूम्रांस्तथा" इत्यत्र "सधूमकान्" इति पाठाभिप्रायेण ।

दोषाभिपन्नेत्यत्र[1] दोषशब्दस्याविशेषितत्वादभिशब्दस्याभिव्याप्त्यर्थस्य प्रयोगात्। एतौ ह्रस्वजाड्यनकुलान्ध्यौ चतुःपटलस्थितदोषजन्यौ सरागौ न साध्यौ। तथाच विदेहः,—"नक्तमन्धास्तु चत्वारो ये पुरस्तात् प्रकीर्तिताः। तेषामसाध्यो नकुलो ह्रस्वजाड्यस्तथैव च ॥ विशेषेण भवेयातां द्वौ चतुःपटलाश्रितौ। तौ च संप्राप्तरागत्वादसाध्यौ परिकीर्तितौ"—इति। एतौ च राज्यन्धौ, प्रत्येतव्यौ दिवा ह्रस्वचित्ररूपदर्शनाभिधानेन रात्रावदर्शनप्रतीतेः। विदेहेन तु नक्तान्धत्रित्वेऽपि चत्वार इत्युक्तं, नक्तान्धबाहुल्येन दिवान्धेऽपि तत्प्रयोगात्; छत्रिणो गच्छन्तीतिवत् ॥ ६० ॥—

*दृष्टिर्विरूपा श्वसनोपसृष्टा संकोचमभ्यन्तरस्तु याति ॥ ६१ ॥
रुजावगाढा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः ।

गम्भीरिकालक्षणमाह—दृष्टिरित्यादि। विरूपा विकृता। श्वसनोपसृष्टा वातोपगता, संकोचमभ्यन्तरतस्तु यातीति अन्तःसंकोचमेति निमज्जतीत्यर्थः, 'संकुच्यतेऽभ्यन्तरतश्च याति' इति पाठान्तरेऽप्ययमेवार्थः,[2] इयमविशेषोक्तिः। सकलपटलगतवातजन्या असाध्या, सुश्रुते गम्भीरिका तथेति निर्देशात् ॥ ६१ ॥—

†बाह्यौ पुनर्द्वाविह संप्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च ॥ ६२ ॥
निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनः सः ।
सुरर्षिगन्धर्वमहोरगाणां संदर्शनेनापि च भास्करस्य ॥ ६३ ॥
हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः ।
तत्राक्षि विस्पष्टमिवावभाति वैदूर्यवर्णा विमला च दृष्टिः ॥ ६४ ॥

तदेवं शारीरान् द्वादश दृष्टिगतविकारानभिधाय सनिमित्तानिमित्तभेदादागन्तू बाह्यजौ नयनविकारौ (लिङ्गनाशौ) दर्शयन्नाह—बाह्यौ पुनर्द्वाविहेत्यादि। संप्रदिष्टौ कथितावौपद्रविकाध्याये 'तथा बाह्यौ पुनर्द्वौ' (सु. उ. तं. अ. १.)—इत्यादिना। बहिर्भवौ बाह्यौ, आगन्तू इत्यर्थः। तत्र सनिमित्तं दर्शयन्नाह—निमित्ततस्तत्रेत्यादि। शिरोऽभितापादिति शिरो अभि सर्वतस्तप्यते येन विषकुसुमगन्धवाहिपवनस्पर्शादिना[3]

---

* 'अन्तः संकुच्यत इति अन्तः संकुच्यते निमज्जतीत्यर्थः' (आ० द०) ॥ ६१ ॥

† 'तत्र तयोर्मध्ये निमित्ततः कथ्यत इत्यर्थः। रक्ताभिष्यन्दनिदर्शनैरिति गदाधरः। सन्निपाताभिष्यन्दलक्षणैरिति कार्तिकः। अभिघातजमाह—विदीर्येत इति; विदीर्येते द्विधा भवति, सीदति म्लानीभवति, हीयते हीना भवति, अभिघातो लगुडलोष्टादिजः। अनिमित्तजमाह—सुरर्षीत्यादि। एतेषां संदर्शनेन हन्येत। नयनोपघातमन्तरेण दर्शनशक्तिमात्रमुपहतमिति दर्शयन्नाह—तत्राक्षीत्यादि। विस्पष्टं प्रसन्नम्। विमला दोषजनिततिमिररागजनितकाचादिरहिता। ननु, कथमिन्द्रियस्य भौतिकस्यादुष्टस्यापि शक्तिनाशः? उच्यते,—देवादयोऽष्टौ भौतिकेन्द्रियमदूषयन्त एव शक्तिमुपघ्नन्ति। वातिकः, पैत्तिकः, श्लैष्मिकः, रक्तजः, सान्निपातिकः, परिम्लायी, एवं षड्लिङ्गनाशाः; दिवान्धः, राज्यन्धः, धूमदर्शी, ह्रस्वजाड्यः, नकुलान्धः, गम्भीरिका, एवमपरे दृष्टिरोगाः षट्, एवं द्वादश। बाह्यावपरौ द्वौ सनिमित्तानिमित्तजौ, एवं चतुर्दश दृष्टिरोगाः' (आ० द०) ॥ ६२–६४ ॥

---

१ 'दोषस्याभिशब्दविशेषितत्वात्, अभिशब्दस्य व्याप्त्यर्थत्वात्' क.। २ अस्य "संकुच्यतेऽभ्यन्तरतस्तु याति" इत्येव मुख्यः पाठः। ३ तृतीयान्त एवासेष्टः पाठः।

स शिरोऽभितापस्तस्मात्, तेनं समस्तशिरस उपतापाज्जयनगतरुधिराधिककोपो दृष्टेरपि शक्तेर्व्याघातः । अभिष्यन्दनिदर्शन इति रक्ताभिष्यन्दलिङ्ग इति गदाधरः, सुश्रुते रोगसंग्रहे सर्वजगणे द्वयोरप्येतयोः पाठात्; सन्निपातजाभिष्यन्दलक्षण इति कार्तिकः । अनिमित्तमाह—सुरर्षिगन्धर्वेत्यादि । अनुपलभ्यमानविशिष्टसुरादिदर्शननिमित्तमाहुः । संदर्शनेन सम्यग्दर्शनेन, हन्येत हन्तुं संभाव्येत, न त्ववश्यं हन्येतेत्यभिप्रायः । (दृष्टिरिति दर्शनमुपलब्धिरित्यर्थः, न तु दृष्टिमण्डलं, अस्यादृष्टिगतविकारत्वात् । लिङ्गनाशप्रयोगश्चात्र रूपग्रहणाभावसामान्यान्न तु रूढ्या, तस्य चतुर्थपटलस्थतिमिर एव रूढत्वात् ।) तेचेदं दर्शनं किमभिष्यन्दवत् सकलगोलकोपघातकं तिमिरत्वाद्दृष्टिमात्रोपघातकं वेति शङ्कानिरासार्थमाह—तत्राक्षीत्यादि । विस्पष्टमिवेति पूर्वावस्थातो विशेषेण प्रसन्नमिव गोलकावच्छिन्नं चक्षुरवभासते । दृष्टिरपि वैडूर्यवर्णा श्यावा दृष्टिः प्रकृतिवर्णेत्यर्थः । विमलेति विगतकाचादिमला । अयं तात्पर्यार्थः—पूर्वावस्थातः शक्तिमात्रमुपहन्यते, यतो देवादयो ह्यवयवमदूषयन्त एव शक्तिमात्रमुपघ्नन्ति । यदुक्तं चरके,—"देवादयोऽष्टौ हि महानुभावा न दूषयन्तः पुरुषस्य देहम् । विशन्त्यदृश्यास्तरसा यथैव छायातपौ दर्पणसूर्यकान्तौ" (च. चि. स्था. अ. ९)-इति । (एतौ च बाह्यजौ दृष्ट्याधानविरूपणीयतया दृष्टिगतावेव, अत एव तदधिकारनिर्दिष्टौ, शारीराभिप्रायेण द्वादशविधत्वमुक्तं, तेन न संख्यातिरेकः,) द्वावप्येतावसाध्यौ ॥ ६२–६४ ॥

(इति दृष्टिगताः ॥)

*प्रस्तार्यर्म तनुस्तीर्णं श्यावं रक्तनिभं सिते ।

अथ मण्डलगतनिदानाभिधानपारिशेष्याद् दृष्टिगतानन्तरं शुक्लमण्डलवर्त्मपक्ष्ममण्डलगतानां निदानाभिधानावसरप्राप्तौ वर्त्मादिमण्डलप्रतियोगितया शुक्लमण्डलस्यान्तर्गतत्वात् सौकुमार्येणानन्तरं कृत्वा च निदानोद्देशारम्भः । तत्र प्रस्तारिशब्दाभिधानस्यार्मणो लक्षणमाह—प्रस्तारीत्यादि । प्रस्तारीति लक्ष्यं, शेषं लक्षणम् । तनु अबहलम् । स्तीर्णं विततम् । (श्यावमीषन्नीलम् । रक्तनिभं रक्तवर्णम् । अत्र श्यावरक्तयोर्विरोधात् समुच्चयाभावेन विकल्पः । अत एवाह निमिः,—"समन्ताद्विस्तृतः श्यावो रक्तो वा मांससंचयः । सन्निपातेन दोषाणां प्रस्तार्यर्म तदुच्यते"—इति । गदाधरेणेषन्नीललोहितवर्णसमुच्चय एव दर्शितः । सिते शुक्लभागे) ॥—

* 'चतुर्दशदृष्टिजानन्तरमदूरत्वेन शुक्लजा उच्यन्ते, तत्र प्रस्तार्यर्मलक्षणमाह—प्रस्तारीत्यादि, विस्तीर्णं प्रस्तारि, प्रसरयुक्तमित्यर्थः । श्यावं सशुक्लं कृष्णं, रक्तमीषल्लोहितं, सिते शुक्ले, अर्थान्नयनस्येति पूरणीयम्' (आ० द०)

१ 'तेन शिरोगतरक्तकोपाद्दृष्टिव्याघातः' इति क. । २ अयं पाठः क. पुस्तके नोपलभ्यते । ३ 'नयनोपघातव्यतिरेकेण दृष्टिमात्रस्य हननं दर्शयन्नाह'—इति क. । ४ 'देवादयोऽष्टौ हि शरीरोपघातव्यतिरेकेण शक्तिमात्रमुपघ्नन्ति' क. । ५ अयं पाठः क. पुस्तके नोपलभ्यते । ६ 'दृष्टिजानन्तरमदूरत्वेन शुक्लजानाह'—इति क. । ७ 'प्रस्तारीति अन्वर्थिकनामद्योतनार्थमुक्तम् । श्यावं रक्तनिभमिति ईषन्नीललोहितं; वाशब्दोऽत्र वा द्रष्टव्यः, तेन श्यावं रक्तं वेत्यर्थः । सिते शुक्ले, अर्थान्नयनस्येति पूरणीयम् । त्रिदोषजमिदम्' क. ॥

सश्वेतं मृदु शुक्लार्म शुक्ले तद्वर्धते चिरात् ॥ ६५ ॥

शुक्लार्मलक्षणमाह—सश्वेतमित्यादि । सश्वेतं किंचिच्छ्वेतम् । मृदु कोमलं । परतो वक्ष्यमाणं मांसमिति पदं सिंहावलोकनन्यायेन संबन्धनीयम् । सशब्दस्याधिकस्योपादानं सम्यक् श्वेतत्वप्रतिपादनार्थमिति कार्तिकः । शुक्ले शुक्लमण्डले । चिरात् चिरकालेन तद्वर्धते, कफजत्वात् ॥ ६५ ॥

***पद्माभं मृदु रक्तार्म यन्मांसं चीयते सिते ।**

रक्तार्मलक्षणमाह—पद्माभमित्यादि । पद्माभमरुणपद्मपत्रनिभम् । मृदु कोमलं, सिते शुक्लमण्डले । चीयते वृद्धिमुपैति, एतद्रक्तजम् ॥—

पृथु मृद्वधिमांसार्म बहलं च यकृन्निभम् ॥

अधिमांसार्मलक्षणमाह—पृथ्वित्यादि । पृथु विततं, विस्तीर्णमित्यर्थः । बहलं स्थूलम् । लोहितत्वेन यकृन्निभं, श्याववर्णसंबन्धोऽप्यत्र ज्ञेयः, यथाऽऽह सुश्रुतः—"विस्तीर्णं मृदु बहलं यकृत्प्रकाशं श्यावं वा तदधिकमांसजार्म विद्यात्"—इति । अत्र श्यावं वेति वाशब्दः समुच्चये, तेन श्यावं लोहितं चेत्यर्थः । एतच्च त्रिदोषजं, सुश्रुते त्रिदोषजप्रकरणे पठितत्वात् ॥—

स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नाय्वर्म पञ्चमम् ॥ ६६ ॥

स्नाय्वर्मलक्षणमाह—स्थिरमित्यादि । स्थिरं कठिनम् । मांसाढ्यं बहुमांसम् । शुष्कमविस्रावि । इदं च प्रस्तार्यर्मोद्भवम् । तथा च निमिः—"प्रस्तारिणोऽर्मणः स्रावं निरुणद्धि यदाऽनिलः । विना स्रावं विशुष्कं तत्स्नाय्वर्मेति प्रकीर्तितम्"—इति । इदं तु सन्निपातजमपि साध्यम् ॥ ६६ ॥

†श्यावाः स्युः पिशितनिभाश्च बिन्दवो ये
शुक्त्याभाः सितनियताः स शुक्तिसंज्ञः ।

शुक्तिकालक्षणमाह—श्यावा इत्यादि । श्यावाः पाण्डुश्यामाः, पिशितनिभा इति नियमेन भणिताः, (तेन पिशितस्येव नियमेन भा दीप्तिर्येषां ते तथा, सा च प्रभा श्यावेति समभिव्याहारेण श्याववर्णैव; नत्वत्र मांसस्योपमानत्वं पिशितनिभशब्दोऽभिधत्ते वक्ष्यमाणार्जुने रुधिरोपमशब्दवत्, मांसात्मकत्वादेव शुक्तिकायाः ।) सितनियता इति सिते शुक्लमण्डले नियताः; शुक्त्याभा जलशुक्तिनिभाः, वर्णसाम्यात्; अत एव शुक्तिसंज्ञः, अयं पित्तजः । अत्र वाग्भटः,—"पित्तं कुर्यात् सिते बिन्दूनसितश्यावपीतकान् । मलाक्तादर्शतुल्यं वा सर्वं शुक्लं सदाहरुक् ॥ रोगोऽयं शुक्तिकासंज्ञः सशकृद्भेदतृड्ज्वरः" (वा. उ. तं. अ. १)—इति ॥—

---

* 'यन्मांसं चीयत इति मांसमुपचयमुपैति' । (आ० द०)

† 'असितसिताः असितैश्च सिताश्चासितसिताः । अयं पित्तजः' (आ० द०)

---

१ 'पिशितनिभा इति मांसपिण्डतुल्याः' इति क. । २ ( ) एतच्चिह्नान्तर्गतः पाठः कपुस्तके नोपलभ्यते । ३ "सितनियताः" इत्यत्रेदृशपाठाभिप्रायेण ।

एको यः शशरुधिरोपमश्च विन्दुः
शुक्लस्थो भवति तमर्जुनं वदन्ति ॥ ६७ ॥
(सु. उ. अ. ४)

अर्जुनलक्षणमाह—एक इत्यादि। एक एव सन् यः शशरुधिरवल्लोहितो विन्दुरूपश्च विकारस्तमर्जुनं वदन्तीत्यर्थः। उक्तं च कल्याणविनिश्चये,-"शक्रगोपनिभं शुक्लेऽर्जुनं रक्तप्रकोपत."-इति। एतेन विन्दुरूपत्वे नियमो नास्तीति ज्ञेयम्। अत एव रविगुप्ते,-"कृष्णभागे सितं विन्दुं शुक्लं विद्यात् कफात्मकम्। रक्तं च शुक्लभागस्थमर्जुनं शोणितोद्भवम्"-इति ॥ ६७ ॥

श्लेष्ममारुतकोपेन शुक्ले पिष्टं समुन्नतम्।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसंनिभम् ॥ ६८ ॥
(सु. उ. अ. ४)

पिष्टकलक्षणमाह—श्लेष्ममारुतकोपेनेत्यादि। पिष्टमिति लक्षणपदम्। पिष्टवदिति आलेपनपिष्टतुल्यं श्वेतत्वेन। पुनः पिष्टकमिति लक्ष्यपदम्। समुन्नतमुच्छूनम्। मलाक्तादर्शसंनिभमिति धूल्यादिम्रक्षितदर्पणतुल्यम्। अयं कफवातजः, अतः कफेनाच्छतया, वातेन किंचिच्छयावतया मलाक्तदर्पणनिभत्वमस्येत्यर्थः ॥ ६८ ॥

जालाभः कठिनसिरो महान् सरक्तः
संतानः स्मृत इह जालसंज्ञितस्तु।

सिराजाललक्षणमाह—जालाभ इत्यादि। अनुलोमविलोमसिरानिचयरचितनिरन्तरविवरगवाक्षीभावात् जालस्येव आभा आकृतिर्यस्य स तथा। कठिनसिर इत्यनेन सिराणामेव संतानोऽयं विकार इति दर्शयति। सरक्त ईषल्लोहितः। संतनोति आच्छादयतीति संतानः, बहुलवचनात् कर्तरि घञ्। अत्र विन्दुशब्दोऽनुवर्तनीयः, स सर्वत्र विशेष्यः। जालसंज्ञित इत्यत्र 'सिरापूर्वं' इति शेषः, तेन सिराजालसंज्ञित इत्यर्थः। अयं च रक्तजः ॥—

*शुक्लस्थाः सितपिडकाः सिरावृता या-
स्ता ब्रूयादसितसमीपजाः सिराजाः।
(सु. उ. अ. ४)

सिराजपिडकालक्षणमाह—शुक्लस्था इत्यादि। सितपिडका इति सितवर्णाः पिडकाः। सिरावृताः सिराव्याप्ताः। असितसमीपजा इति कृष्णभागाभ्यर्णशुक्लजाः। सिरापरिवृतत्वात्सिराजाः, नतु साक्षात्सिराजाता इति गदाधरः। अयं च त्रिदोषजः, त्रिदोषजसाध्यप्रकरणे सुश्रुतेन पठितत्वात् ॥—

* 'सिराभिरावृताः, वास्तुस्थितसिरापरिवृतत्वेन सिराजाः। पिडका इति शेषः' (आ० द०)

१ 'अनुलोमविलोमस्थितसिराविरचितबहुविवरत्वेन' क.। २ 'व्याप्नोति' क.।

*कांस्याभोऽमृदुरथ वारिबिन्दुकल्पो
विज्ञेयो नयनसिते बलाससंज्ञः ॥ ६९ ॥
(सु. उ. अ. ४)

बलासग्रथितलक्षणमाह—कांस्याभ इत्यादि । कांस्यस्येवाभा दीप्तिर्यस्य स तथा सित इत्यर्थः, वारिबिन्दुरिवोच्छूनत्वात् । अमृदुः कठिनः, कफानिलजत्वात् । तथा च विदेहः,—"मारुतोत्पीडितः श्लेष्मा शुक्लभागे व्यवस्थितः । जलबिन्दुरिवोच्छूनो ह्यमृदुः कफसंभवः ॥ बलासग्रथितं नाम तं शोथं वृत्तमादिशेत्"—इति । ('कोषाभ' इति कश्चित् पठति, कोषो मांसकुड्मल तदाभस्तदाकारः; एतावताऽत्यर्थमुच्छूनत्वं प्रतिपाद्यते, वारिबिन्दुकल्प इति चेषदुच्छूनताऽपि, नयनसिते शुक्लभागे इत्यर्थः । बलाससंज्ञ इत्यत्र ग्रथितशब्दलोपः, तेन बलासग्रथित इति संज्ञा । अत्र सिरोत्पातसिराहर्षौ वाग्भटेन पठितौ । तथा हि,—"रक्तराजीनिभं शुक्ले उष्यतेऽपि सवेदनम् । अशोथाश्रूपदेहं च शिरोत्पातः सशोणितम् ॥ उपेक्षितः सिरोत्पातो राजीस्ता एव वर्धयन् । कुर्यात् सास्रं सिराहर्षं तेनाक्ष्युद्वीक्षणाक्षमम्" (वा. उ. तं. अ. १०)—इति ॥ ६९ ॥

पक्वः शोथः सन्धिजो यः सतोदः स्रवेत् पूयं पूति पूयालसाख्यः ।
(सु. उ. अ. २)

अथ मण्डलगतनिदानाभिधानपारिशेष्याद्वर्त्ममण्डलगतनिदानाभिधाने प्राप्ते कनीनिकासन्ध्यादीनां वर्त्ममण्डलाभियोगितयाऽन्तर्गतत्वेनान्तरङ्गत्वात् सन्धिगतनिदानोद्देशारम्भः । ते च सन्धयः षट् । यदाह सुश्रुतः,—"पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः । शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतस्तथा ॥ कनीनिकागतो ज्ञेयः षष्ठश्चापाङ्गगः स्मृतः" (सु. उ. तं. अ. १)—इति । नासासमीपनेत्रान्तः कनीनिका; चक्षुःपुच्छस्याधो नेत्रान्तोऽपाङ्गः । तत्र पूयालसलक्षणमाह—पक्व इत्यादि । सन्धिज इति कनीनिकासन्धिजः । यदाह विदेहः,—"शोथक्लेदसमाविष्टं तोदभेदसमाकुलम् । पूयालसं तु तं विद्यात् सन्धौ कानीनिके व्रणम्"—इति । अयं त्रिदोषजः, सुश्रुतेऽसाध्यत्रिदोषजप्रकरणे पठितत्वात् ॥—

*'अयमर्थः—अत्युच्छूनो वा मनागुत्सन्नो वा । शुक्लत्वं कफजत्वादेव लभ्यते । बलाससंज्ञ इत्यत्र पदेऽपि पदैकदेशप्रवृत्तेर्ग्रथिताऽनभिधानम् । एवं प्रस्तार्यर्म १ शुक्लार्म २ रक्तार्म ३ अधिमांसार्म ४ स्नाय्वर्म ५ शुक्तिका ६ अर्जुनः ७ पिष्टकः ८ सिराजालः ९ सिराजः १० बलासग्रथितः ११ इत्येकादश नयनामयाः शुक्लभागजा रोगाः । एवं शुक्लजा एकादश ॥ ६९ ॥ इति शुक्लजाः ॥

१ 'कोषाभ' इति पाठपक्षे कोषो मांसकोषः, तत्तुल्यः, एतेनात्युच्छूनत्वं प्रतिपाद्यते । अयमर्थः—अत्युच्छूनो मनागुच्छूनो वा, शुक्लत्वं कफजत्वादेव लभ्यते । अन्ये तु पठन्ति—'संतानो भवति सिरावृतः सिते यो बिन्दुर्वा स तु निरुजो बलाससंज्ञः' इति । अत्र संतानो मांसोत्सेधरूपा संहतिः । २ 'कनीनिकादिसन्धीनां शुक्लभागप्रत्यासत्याऽनन्तरं सन्धिगतानाह'—इति क. । ३ निमीः इति क. ।

ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकी कण्डूप्रायो नीरुजस्तूपनाहः ॥ ७० ॥

(सु. उ. अ. २)

श्लेष्मोपनाहलक्षणमाह—ग्रन्थिरित्यादि । नाल्प इति महान् । अपाक ईषत्पाकः; अत एव सुश्रुतेऽल्पस्रावः पठितः । दृष्टिसन्धाविति कृष्णदृष्टिमण्डलयोः सन्धावित्यर्थः । कण्डूप्रायः कफप्राबल्यात् । नीरुजोऽल्परुज इत्यर्थः । तथाच विदेहः,—"वायुः श्लेष्माणमादाय दृष्टिसन्धौ व्यवस्थितः । अरुणं कठिनं ग्रन्थिं जनयेदल्पवेदनम् ॥ श्लेष्मोपनाहं तं विद्यात्, स्रावान् वक्ष्याम्यतः परम्"—इति । वातश्लेष्मजन्यत्वेऽपि श्लेष्मप्राबल्यात् श्लेष्मोपनाहव्यपदेशः । आश्रयप्रभावादरुणत्वमत्र ॥ ७० ॥

***गत्वा सन्धीनश्रुमार्गेण दोषाः कुर्युः स्रावान् लक्षणैः स्वैरुपेतान् ।**
तं हि स्रावं नेत्रनाडीति चैके तस्या लिङ्गं कीर्तयिष्ये चतुर्धा ॥ ७१ ॥

(सु. उ. अ. २)

चतुर्णां स्रावाणां संप्राप्तिमाह—गत्वा सन्धीनित्यादि । सन्धीनिति बहुवचननिर्देशात्सर्वनेत्रान्तर्गताश्चत्वारः सन्धयो गृह्यन्ते । अश्रुमार्गेणेति अश्रुवाहिन्यौ धमन्यौ अश्रुमार्गः 'द्वे चाश्रुवाहिन्यौ' (सु. शा. स्था. अ. ९)–इति सुश्रुतः, अश्रुवहधमनीभ्यामित्यर्थः । ननु, यद्यश्रुवहधमनीभ्यां गत्वा दोषाः स्रावानापादयन्ति, तत्कथं सिरानुसारिमिर्दोषैः' इत्याद्युक्ता संप्राप्तिर्न व्याहन्यते, सिराधमन्योरन्यत्वात् । उच्यते—सामान्यविशेषत्वात् संप्राप्त्यभिधानद्वयस्य; पूर्वा संप्राप्तिः सामान्यं, इतरा च विशेष इति न विरोधः । अथवा "सिराधमनीस्रोतसामविभागः" (सु. शा. स्था. अ. ९) इति परकीयमतेन सिराधमन्योरैक्यादविरोधः । अस्मिन्नर्थे संप्राप्त्युक्त एवार्थो निष्पन्नीक्रियते । नेत्रनाडीति चैक इति वदन्तीति शेषः, अनिषेधादनुमतमिदम् । (दोषाः संनिपातश्लेष्मरक्तपित्तात्मकाः । लक्षणैर्दोषलक्षणैः । उपेतान् परीतानिति । गदाधरेण 'लक्षणैः' इत्यस्य स्थाने 'सर्वतः' इति पठितं, दोषाः परीतान् स्वलक्षणैरित्यर्थविशेषादधिगन्तव्यम् । चतुर्धेति सान्निपातिककफरक्तजपित्तजत्वभेदात्; वातजस्तु स्रावो नास्त्येव, व्याधिस्वभावात्; पित्तजगण्डवत्) ॥ ७१ ॥

पाकात् सन्धौ संस्रवेद्यस्तु पूयं पूयास्रावोऽसौ गदः सर्वजस्तु ।

(सु. उ. अ. २)

चतुर्विधस्रावमध्ये पूयास्रावलक्षणमाह—पाकादित्यादि । सर्वजस्त्रिदोषज इत्यर्थः । अस्य प्रत्याख्येयत्वादग्रेऽभिधानं, यद्यप्यन्येऽपि स्रावा असाध्यत्वेनोक्तास्तथाऽपि याप्या बोद्धव्याः । 'पाकः' इति पाठे पाकः संस्रवेत् पाकवान् शोथः स्रवेदित्यर्थः, उपचारात्; पाकस्य क्रियामात्रत्वात् ॥—

* 'कानीनानिति कनीनसन्धिजान्; कनीनसन्धिश्च नासामनु नेत्रान्तः । तं नेत्रनाडीमित्येवेति मतान्तरम्' (आ० द०) ॥ ७१ ॥

१ ( ) एतच्चिह्नमध्यस्थः पाठः क-पुस्तके नोपलभ्यते । २ 'कानीनान् तं' इति पाठाभिप्रायेण ।

श्वेतं सान्द्रं पिच्छिलं[1] यः स्रवेत्तु श्लेष्मस्रावोऽसौ विकारो मतस्तु।
(सु. उ. अ. २)

श्लेष्मस्रावलक्षणमाह—श्वेतमित्यादि सान्द्रं घनम् ॥ ७२ ॥

*रक्तस्रावः शोणितोत्थो विकारः स्रवेदुष्णं तत्र रक्तं प्रभूतम्।
(सु. उ. अ. २)

रक्तस्रावलक्षणमाह—रक्तस्राव इत्यादि। रक्तकृतः स्रावो रक्तस्रावः ([2]रक्तस्राव इत्यनेनैव स्रवेदित्यस्य लब्धत्वात्तदुक्तिर्निरन्तरस्रावप्रतिपादनार्थमिति कार्तिकः न चैतत् प्रभूतमित्यनेन गतार्थं, अनिरन्तरतयाऽपि प्रभूतस्रावसंभवात्)। रक्तस्राव। इत्यनेनैव रक्तजत्वे सिद्धे शोणितजो विकार इति यदुच्यते तदत्यन्तकुपितरक्तजत्वप्रतिपादनार्थम्। कार्तिकस्त्वाह—पित्तलिङ्गपरिग्रहार्थं, पित्तेन सह तुल्यत्वाद्रक्तस्य। तथाच क्वचित् पाठः 'रक्तस्रावः पित्तलिङ्गैरुपेतः' इति ॥—

हरिद्राभं पीतमुष्णं जलाभं पित्तात्स्रावः संस्रवेत् सन्धिमध्यात् ॥
(सु. उ. अ. २)

जलस्रावपर्यायस्य पित्तस्रावस्य लक्षणमाह—हरिद्राभमित्यादि। हरिद्राभं पीतलोहितं बोद्धव्यं, परतः पीतमित्यस्योक्तेः (जलाभमिति जलवत् स्वच्छम्। उष्णमिति सर्वत्रैव संबध्यते। केचित् 'पीतं' इत्यस्य स्थाने 'नीलं' इति पठन्ति। यत्तु 'जलाभं' इत्यस्य स्थाने 'जलं वा' इति तदसंगतं, सुश्रुतेनोद्देशावसरे जलस्रावनामतयाऽस्योद्देशात्, तद्धि नाम जलवदास्रावोऽस्येति योगतः समावेशितम्। यदा तु 'जलं वा' इति पाठः स्यात्तदा कदाचिज्जलाभता स्यादिति न सर्वत्र योगव्याप्तिरिति) सन्धिमध्यादित्यविशेषोक्तेः सर्वसन्धिमध्यादिति बोद्धव्यम्। ननु, वातजस्रावः कुतो नोक्तः, वातेन स्रावाभावादिति चेत्; नैवं, वाताभिष्यन्दे शिशिराश्रुतेत्युक्तेर्वातजोऽपि स्रावो दर्शितः। उच्यते, विशिष्टेऽक्षिप्रदेशे केवलवायोः स्रावजनकत्वं संबन्धितव्यमभिधानात्[3]। विदेहेऽपि चत्वार एवोक्ताः,—"सन्निपातात् कफाद्रक्तात् पित्तात् स्रावोऽक्षिसन्धिषु"—इति ॥ ७३ ॥

†ताम्रा तन्वी दाहशूलोप[4]पन्ना
रक्ताज्ज्ञेया पर्वणी वृत्तशोथा।
जाता सन्धौ कृष्णशुक्ले-

* 'रक्तस्रावः शोणितोत्थ इति ग्रहणं प्रभूतस्रावसूचनार्थम्। पुनः स[5]रक्तमुष्णमिति यत्तत्प्रकुपितरक्तजत्वप्रतिपादनार्थम्'। (आ० द०)

† 'ताम्रा अरुणा, तन्वी सूक्ष्मा, वृत्तशोफा वर्तुलाकारशोथा'। (आ० द०)

१ "पिच्छिलम्" इत्यत्र "नीरुजम्" इति पाठान्तरम्। २ एतच्चिह्नमध्यस्थः पाठः क. पुस्तके नोपलभ्यते। ३ 'विशिष्टे क्वचिदक्षिप्रदेशे केवलस्य वायोरस्रावजनकत्वमनभिधानाद्बोद्धव्यम्' क.। ४ दाहपाकोपपन्ना, ज्ञेया वैद्यैः पिडका पर्वणीका ॥ इति ख.। ५ "रक्तस्रावः शोणितोत्थः सरक्तमुष्णं नाल्पं संस्रवेन्नातिसान्द्रम्" इति पाठाभिप्रायेण।

तदेवमसाध्यानां चतुर्णां स्रावाणां लक्षणमभिधाय पर्वणीलक्षणमाह—ताम्रेत्यारभ्य कृष्णशुक्ल इत्यन्तेन। इयं रक्तजा कफानिलजा च, रक्तजत्वमत्र सुश्रुते दर्शितमाधिक्येन ॥—

ऽलजी स्या-
त्तस्मिन्नेव ख्यापिता पूर्वलिङ्गैः ॥ ७४ ॥
(सु. उ. अ. २)

अलजीलक्षणमाह—अलजी स्यादित्यादि। तस्मिन्नेवेति शुक्लकृष्णसन्धौ, पूर्वलिङ्गैः पर्वणीलक्षणैरुपेतेत्यर्थः। ननु, एवं सति स्थानलक्षणयोरभेदेनानयोरभेदः स्यादिति चेत्; नैवं, तनुत्वस्थूलत्वाभ्यां पर्वणिकालज्योर्भेदात्। तथाच विदेहः,—"शुक्लकृष्णान्तसन्धौ तु चीयन्तेऽसृक्कफानिलाः। पर्वणीपिडका तैस्तु जायते त्वङ्कुरोपमा॥ ताम्रा सदाहचोपोष्णपीतकाश्रुसमाकुला। कफपित्ते तु संमूर्च्छ्य सह रक्तेन मारुतः॥ शुक्लकृष्णान्तसन्धौ तु जनयेद्गोस्तनाकृतिम्। पिडकामलजीं तां तु विद्धि तोदाश्रुसंकुलाम्"—इति। कार्तिकस्त्वभेदानुपपत्तिं शङ्कमानः पूर्वलिङ्गैरित्यन्यथा व्याचष्टे—पूर्वोक्तायाः प्रमेहपिडकाया अलज्या लिङ्गैरित्यर्थः। इयं त्रिदोषजा असाध्या च ॥ ७४ ॥

*क्रिमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्युः क्रिमयः सन्धिजाताः।
नानारूपा वर्त्मशुक्लान्तसन्धौ चरन्त्यन्तर्लोचनं दूषयन्तः ॥ ७५ ॥
(सु. उ. अ. ३)

क्रिमिग्रन्थिलक्षणमाह—क्रिमिग्रन्थिरित्यादि। (प्रथमं वर्त्मशुक्लयोः सन्धौ भूत्वा क्रमेण वर्त्मनः पक्ष्मणश्च सन्धिजाताः संभावितं प्राप्ताः क्रिमयो यत्र कण्डूं कुर्युः स क्रिमिग्रन्थिः। स चायं क्रिमिग्रन्थिर्वर्त्मशुक्लयोः सन्धौ भवति, तथैव भूत्वा अन्तर्लोचनं नयनस्याभ्यन्तरं चरन्ति भक्षयन्ति, दूषयन्तः सन्त इत्यर्थः। अत्रैव विदेहः,—"वर्त्मशुक्लस्य सन्धौ तु ग्रन्थिः पित्तकफात्मकः। ऊष्मणा पच्यते गाढं तत्र मूर्च्छन्ति जन्तवः॥ सुसूक्ष्मजातचरणा वर्त्मपक्ष्मसमाश्रयाः। ततस्ते पूयसंसृष्टाः पतन्ति क्रिमयस्तथा॥ लक्षणैर्विविधैर्युक्ताः सन्निपातसमुत्थिताः। क्रिमिग्रन्थिं तु तं विद्याद्देहिनां नेत्रदूषणम्"—इति। कार्तिकस्त्वन्यथा पठित्वा व्याचष्टे—)वर्त्मनः पक्ष्मणश्चापि कण्डूं कुर्युरित्यभिधानात् क्रिमिग्रन्थिः पक्ष्मवर्त्मसन्धौ भवतीति गम्यते, कथ-

* 'वर्त्मनः पक्ष्मणश्च कण्डूं कुर्युरित्युक्तेः क्रमिग्रन्थिः पक्ष्मवर्त्मसन्धावेव प्रतीयते। तेनायमर्थः—क्रमयो वर्त्मनः पक्ष्मणश्च सन्धिजाताः सन्तः कण्डूं कुर्वन्ति, तथा वर्त्मशुक्लान्तःसन्धौ भूत्वाऽन्तर्नयनं दूषयन्तश्चरन्ति। अयं सन्निपातजः। एवं पूयालसः, श्लेष्मोपनाहः, सन्निपात श्लेष्मरक्तपित्तजाश्चत्वारः स्रावाः, पर्वणीका, अलजी, क्रमिग्रन्थिरिति नवसंख्या एते सन्धिजाः॥ ७५ ॥ इति सन्धिगताः॥

१ 'अन्ये तु पूर्वलिङ्गैरित्यनेन प्रमेहपिडकाकथितैरलजीलिङ्गैरिति ब्रुवते, सुश्रुते प्रमेहनिदाने रक्ताश्रितेत्यादिलिङ्गैः ख्यापिता याऽलजी तद्वदियमपीत्यर्थः। तेन स्थानसाम्येऽपि भिन्नलक्षणतया पर्वणीतो विलक्षणत्वम्'—इति क.। २ () एतच्चिह्नान्तर्गतः पाठः क. पुस्तके नोपलभ्यते।

मन्यथाऽन्यत्रावस्थितैः क्रिमिभिरन्यत्र कण्डूर्जन्यते इति । एतच्च न सम्यक्, वर्त्म-शुक्लान्तःसन्धाविति विरोधप्रसंगात् ॥ ७५ ॥

***अभ्यन्तरमुखी ताम्रा बाह्यतो वर्त्मनश्च या ।**
सोत्सङ्गोत्सङ्गपिडका सर्वजा स्थूलकण्डुरा ॥ ७६ ॥

(सु. उ. अ. ३)

अथ सन्धिगतरोगाभिधानानन्तरं पारिशेष्याद्वर्त्मशुक्लान्तःसन्धावित्यत्र वर्त्म-निर्देशेन तद्गतरोगनिदानारम्भः । नयनगोलकावरकं निमेषोन्मेषाश्रयं पटलद्वयं वर्त्म उच्यते । सुश्रुते प्रथमोद्दिष्टत्वेनोत्सङ्गपिडकालक्षणमाह—अभ्यन्तरमुखीत्यादि । वर्त्मन एवाभ्यन्तरे मुखं यस्याः सा तथा । (ननु, कथं बाह्यत इति ? उच्यते, वास्तूत्सेधेन बहिरप्युन्नततया दर्शनाद्बाह्यत्वं, न तु बाह्यमुखत्वेन) । बाह्यत इति सप्तम्यर्थे तसिल्, एवं वर्त्मन इत्यत्रापि । इयं विदेहसंवादादधरवर्त्मान्तर्जाता बोध्या । ताम्रा ताम्रवर्णा । सोत्सङ्गा सा उत्सङ्गा उत्सङ्गिनी, अर्श आदित्वादच् । उत्सङ्गपिडकेति उत्सङ्गे क्रोडे बह्वयः पिडका यस्याः सा । (अन्ये तु सोत्सङ्गा क्रोडीकृतपूया । उत्सङ्गपिडकेति नामेदम् । तत्रापि कुक्कुटाण्डरसपूयता चकाराद्बोद्धव्या) स्थूलकण्डुरेति स्थूला चासौ कण्डुरा चेति कर्मधारयः, कण्डुरा कण्डुमती, दोषाणां कफप्राबल्यात् । चकारेणात्र विदेहोक्तकाठिन्यादिसंगृहीतम् । तथाच विदेहः,—"वर्त्मोत्सङ्गेऽधरे जन्तोः सन्निपातात् प्रजायते । अभ्यन्तरमुखी स्थूला बाह्यतश्चापि दृश्यते । पिडका पिडकाभिश्च चिताऽन्याभिः समन्ततः । उत्सङ्गपिडका नाम कठिना मन्दवेदना ॥ सा प्रभिन्ना स्रवेत् स्रावं कुक्कुटाण्डरसोपमम्"—इति । सर्वजेति सन्निपातभवा ॥ ७६ ॥

वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकाबीजप्रतिभाः कुम्भीकाः सन्निपातजाः ॥ ७७ ॥

(सु. उ. अ. ३)

कुम्भीकालक्षणमाह—वर्त्मान्त इत्यादि । पिडका इति बहुवचननिर्देशाद्बह्वयः, भिद्यन्ते विदीर्यन्ते तथा स्रवन्ति च । ध्माता इति भिद्यमानाः स्वयमेव पूर्णोदरा भवन्तीति ध्माताः । कुम्भीकाबीजप्रतिमा इति कुम्भीका कच्छदेशोद्भवा दाडिमफलाकारफला लता, तद्बीजेन प्रतिमा यासां ता इत्यर्थः; अन्ये 'कुम्भीकबीजसदृशा' इति पठन्ति, तत्र कुम्भीकः कुम्भाडुलता, तद्बीजमपि दाडिमफलबीजाकारं; तत्सदृशाः पिडका उच्यन्ते । कुम्भीशब्दात् 'इवे प्रतिकृतौ' इति कन् । एषा त्रिदोषजा असाध्या च ॥ ७७ ॥

* 'सन्धिजानन्तरं वर्त्मजा उच्यन्ते, तत्र वर्त्मोत्सङ्गिनीमाह—अभ्यन्तरमुखीत्यादि' (आ० ८०) ॥ ७६ ॥

१ 'इति कार्तिकः । तेनायमर्थः—वर्त्मनः पक्ष्मणश्च सन्धौ जाताः सन्तः कण्डूं कुर्वन्ति । तथा वर्त्मशुक्लान्तसन्धौ भूत्वाऽन्तर्नयनं दूषयन्तश्चरन्ति । अयं सन्निपातजः । यदाह तिमिः—वर्त्मशुक्लेत्यादि क. । २ 'बाह्यत इत्यभिधानाद्वास्तूत्सेधेन बाह्यतोऽप्युपलभ्यते' क. ।

*स्राविण्यः कण्डुरा गुर्व्यो रक्तसर्षपसंनिभाः।
रुजावत्यश्च पिडकाः पोथक्य इति कीर्तिताः॥ ७८॥
(च. उ. अ. ३)

पोथकीनां लक्षणमाह—स्राविण्य इत्यादि। स्राविण्यो बहुस्रावाः। गुर्व्य इति गौरवयुताः। रुजावत्य इति रक्तसंबन्धात् कफजा अपि वेदनान्विताः॥ ७८॥

पिडका या खरा स्थूला सूक्ष्माभिरभिसंवृता।
वर्त्मस्था शर्करा नाम स रोगो वर्त्मदूषकः॥ ७९॥
(सु. उ. अ. ३)

वर्त्मशर्करालक्षणमाह—पिडका येत्यादि। खरा खरस्पर्शा। सूक्ष्माभिरभिसंवृतेति सूक्ष्माभिः प्रकरणात्पिडकाभिर्वेष्टिता। अत्रैव विदेहः,—"सुसूक्ष्मपिडकाकीर्णा या स्थूला पिडका खरा। जायते सन्निपातात्तु वर्त्मशर्करिकेति सा"—इति॥ ७९॥

एर्वारुबीजप्रतिमाः पिडका मन्दवेदनाः।
श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते॥ ८०॥
(सु. उ. अ. ३)

अर्शोवर्त्मलक्षणमाह—एर्वारुबीजेत्यादि। एर्वारुः ग्रीष्मकर्कटी। श्लक्ष्णा अकर्कशा। वर्त्मस्था इत्यविशेषिताभिधानादन्तर्बहिश्च वर्त्मनो भवतीति गम्यते। इयं सन्निपातजा। तथाच निमिः,—नीरुजा कठिना वर्त्मपक्ष्मान्तर्बाह्यतोऽपि वा। पिडका सन्निपातेन तदर्शोवर्त्म निर्दिशेत्" —इति॥ ८०॥

दीर्घाङ्कुरः खरः स्तब्धो दारुणोऽभ्यन्तरोद्भवः।
व्याधिरेषोऽभिविख्यातः शुष्कार्शो नाम नामतः॥ ८१॥
(सु. उ. अ. ३)

शुष्कार्शोलक्षणमाह—दीर्घाङ्कुर इत्यादि। खरः कर्कशः। स्तब्धः कठिनः, शुष्कत्वात्। दारुणः बहुदुःखदत्वात्। अभ्यन्तरोद्भव इति वर्त्माभ्यन्तरस्थितः। अभिविख्यातः कथितः। नामतः प्रसिद्धितः। सन्निपातजमिदम्। अत्र विदेहः—"वर्त्माभ्यन्तरगतं त्वर्शः शुष्कं स्थूलं च दारुणम्। जायते सन्निपातेन तच्छुष्कार्शः प्रकीर्तितम्"—इति॥ ८१॥

†दाहतोदवती ताम्रा पिडका वर्त्मसंभवा।
मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका॥ ८२॥
(सु. नि. अ. ३)

अञ्जननामिकालक्षणमाह—दाहतोदवतीत्यादि। इयं रक्तजा॥ ८२॥

---

* 'कण्डुराः कण्डूयुक्ताः' (आ० द०)॥ ७८॥

† 'या वर्त्मसंभवा पिडका दाहादिलक्षणा भवति साऽञ्जननामिका ज्ञेया, इयं रक्तजा साध्या च' (आ० द०)॥ ८२॥

वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः ।
सवर्णाभिः स्थिराभिश्च विद्याद्बहुलवर्त्म तत् ॥ ८३ ॥
(सु. उ. अ. ३)

बहुलवर्त्मलक्षणमाह—वर्त्मोपचीयत इत्यादि । सवर्णाभिस्त्वक्समानवर्णाभिः एतत् सन्निपातादेव ॥ ८३ ॥

कण्डूमताऽल्पतोदेन वर्त्मशोथेन यो नरः ।
न स संछादयेदक्षि यत्रासौ वर्त्मबन्धकः ॥ ८४ ॥
(सु. उ. अ. ३)

वर्त्मबन्धकलक्षणमाह—कण्डूमतेत्यादि । वर्त्मशोथेनोपलक्षितो नरः स चक्षुर्न संछादयेत् सम्यक् छादयितुं न शक्नुयादित्यर्थः । एष सन्निपातजः ॥ ८४ ॥

*मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च ।
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः ॥ ८५ ॥
(सु. उ. अ. ३)

क्लिष्टवर्त्मलक्षणमाह—मृद्वल्पवेदनमित्यादि ।—रक्तजत्वेऽप्यस्याल्पवेदनत्वमधिककफदूषितत्वाद्रक्तस्य । (वर्त्मेति विदेहदर्शनाद्वर्त्मद्वयं ग्राह्यं, अत एव समं युगपदेवेत्यर्थः । अकस्मादित्यहेतोरनियमेनैवेत्यर्थः । ताम्रमित्यनेनोपात्तेऽपि लौहित्ये रक्तमित्युपादानं हेत्वनियमप्रयुक्तं कादाचित्कं लौहित्यमिति द्योतयति । अत्रैव विदेहः,—"श्लेष्मदुष्टेन रक्तेन क्लिष्टं मांसमिवोभयम् । बन्धुजीवनिभं वर्त्म क्लिष्टवर्त्म तदुच्यते"—इति । अन्ये सममनुच्छूनं यावदित्याचक्षते । अत्र पक्षे क्लिष्टत्वं वेदनातियोगादवगन्तव्यम् ॥ ८५ ॥

†क्लिष्टं पुनः पित्तयुतं शोणितं विदहेद्यदा ।
ततः क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः ॥ ८६ ॥
(सु. उ. अ. ३)

वर्त्मकर्दमलक्षणमाह—क्लिष्टं पुनरित्यादि । (क्लिष्टमिति प्रागुक्तस्य कर्तृत्वेनायमर्थः—क्लिष्टं क्लिष्टवर्त्मैव यदा पित्तलाभ्यासादधिकपित्तं सच्छोणितं विदहेद्विरुद्धदाहेन संयोजयेत्तदा क्लिष्टत्वमापादयति, संक्लेदत्वमापन्नं वर्त्म वर्त्मकर्दम उच्यत इति

---

* 'समं त्वेककालं रक्तं लोहितं भवति परमकस्मादनियमात् । एतत्कफरक्तजम्' (आ० द०) ॥ ८५ ॥

† 'प्रागुक्तलक्षणमेव वर्त्म पित्तमिलितं शोणितं कर्तृभूतं यदा विदहेत् दूषयेत्, कफदुष्टे एव रक्ते पित्तलस्योपासनात् पित्तमधिकं तद्वृत्तं, ततः क्लिन्नत्वमापन्नमिति आर्द्रतां गतं वर्त्मकर्दम उच्यते । 'कृष्णत्वमापन्नं' इति पाठान्तरे कृष्णत्वं हि शोणितविदाहेनैव । अयं पित्ताधिकसन्निपातजः' (आ० द०) ॥ ८६ ॥

---

१ भवेद्बंधः सवर्त्मनः इति ख. । २ 'न संछादयेदिति सशोथत्वाद्यथावन्नयनं न पिदधाति' इति क. । ३ 'यद्वर्त्मद्वयं सममेककालं रक्तं भवति तत् क्लिष्टवर्त्म । एतत्कफरक्तम्' क. ।

योर्ज्यम्।) 'ततः कृष्णत्वमापन्नं' इत्यन्ये पठन्ति। तत्र कृष्णत्वं शोणितविदाहेनैव। एवं च सति कृष्णत्वेन कर्दमसंज्ञासमावेशोऽपि घटते इति। कार्तिकस्त्वन्यथा व्याचष्टे—शोणितमिति कर्तृपदं, तेन शोणितं पित्तयुक्तं कर्तृभूतं, यदा पूर्वोक्तं क्लिष्टमेव विदहेदित्यादि सर्वमपरं समानं पूर्वेण। अस्यैं तु सुश्रुते यत् सान्निपातिकत्वमुक्तं तत् कफपित्तरक्तारब्धत्वात्; वातकरणत्वस्याश्रुतेः॥ ८६॥

*यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम्।
तदाहुः श्याववर्त्मेति वर्त्मरोगविशारदाः॥ ८७॥
(सु. उ. अ. ३)

श्याववर्त्मलक्षणमाह—यद्वर्त्म बाह्यत इत्यादि। बहिरन्तश्च श्यावत्वं वातकृतम्। अत्रैव शूनं च जायत इत्यस्यान्ते 'सवेदनं सकण्डु च ह्यल्पक्लेदि त्रिदोषजम्'—इत्यपि केचित् पठन्ति तदप्युपपन्नं; कफात् कण्डूः, अल्पक्लेदि पित्तात्, सवेदनं वातात्। अत्रैव विदेहः,—"दुष्टः श्लेष्मा मरुत् पित्तं वर्त्मनोश्चीयते यदा। अग्निदग्धनिभं श्यावं श्याववर्त्मेति तद्विदुः"—इति। अत्र वाताधिकत्वं बोद्धव्यम्॥ ८७॥

†अरुजं बाह्यतः शूनं वर्त्म यस्य नरस्य हि।
प्रक्लिन्नवर्त्म तद्विद्यात् क्लिन्नमत्यर्थमन्ततः॥ ८८॥
(सु. उ. अ. ३)

प्रक्लिन्नवर्त्मलक्षणमाह—अरुजमित्यादि। अरुजमल्परुजम्। बाह्यतः शूनमिति बहिः शोथयुक्तम्। क्लिन्नमत्यर्थमन्तत इति अन्तत उपान्ते क्लेदवत्। गदाधरस्तु क्लिन्नमन्तरिति विवृणोति। एतच्च चक्षुष्येण पिल्लाख्यया पठितम्। तथा हि,—"भृशं प्रक्लिद्यते वर्त्म कण्डूमन्मन्दवेदनम्। विद्यात् प्रक्लिन्नवर्त्मेति तत् पिल्लं सन्निपातजम्"—इति। यद्येवं कथं विदेहेऽक्लिन्नवर्त्म पिल्लाख्यया निर्दिश्यते। यथा,—"प्रक्षालितेऽथवा मृष्टे आनह्येत पुनः पुनः। अपरिक्लिन्नवर्त्मेति तत्पिल्लमिति निर्दिशेत्"—इति, किंच सुश्रुते प्रक्लिन्नवर्त्म श्लेष्मसंग्रहे पठितं, पिल्लं च सन्निपातजगणे; तत्कथं प्रक्लिन्नवर्त्म पिल्लमिति संगतं? उच्यते—अक्लिन्नवर्त्मैव पिल्लं, तस्य सन्निपातजत्वात्, न तु प्रक्लिन्नवर्त्म, तस्य कफात्मकत्वात्; यदि तु प्रक्लिन्नवर्त्मैव कफोल्वणसन्निपातजं पिल्लत्वेनाभ्युपगम्यते, एतत् ख्यापनाय च तस्य कफजसर्वगणयोर्निवेशः कृत इति स्वीक्रियते, तदा सन्निपातजगणे पित्तेनाक्लिन्नवर्त्म न परिगृहीतं स्यात्; ततस्तदपरिग्रहे षट्सप्ततित्वोपसंहारो नेत्ररोगाणां न घटते, पञ्चसप्ततेरभिधानात्, पिल्लस्य प्रक्लिन्नवर्त्म-

---

* 'एतद्वाताधिकदोषत्रयजन्यम्' (आ० द०)॥ ८७॥

† 'क्लिन्नमत्यर्थमिति अत्यन्तं क्लेदवत्, गदाधरस्तु क्लिन्नमन्तरिति विवृणोति; तत्र मध्ये क्लेदवदित्यर्थः। तत्पिल्लं वक्ष्यमाणक्लिन्नवर्त्मनोऽवस्थान्तरमवगन्तव्यम्' (आ० द०)॥ ८८॥

---

१ 'पूर्वोक्तलक्षणमेव वर्त्म शोणितं कर्तृ विदहेद्दूषयति। पित्तयुतमिति कफदुष्टमपि रक्तं पित्तकृद्व्याभ्यासात् पित्तमधिकं जातं, ततः क्लिन्नत्वमापन्नमिति आर्द्रतामापन्नं वर्त्मकर्दम इत्युच्यते' क.। २ 'तदा क्लिन्नत्वेनापि कर्दमानुकारो बोद्धव्यः' क.। ३ 'न तु कृष्णत्वमात्रेणायं पित्ताधिकसन्निपातजः' क.।

स्वरूपत्वेनापृथक्त्वात् । ननु, एवं तर्हि कथं 'विद्यात् प्रक्लिन्नवर्त्मेति तत् पिल्लं सन्निपातजम्'-इति समर्थयितव्यं ? उच्यते, (अस्यायमर्थः प्रत्येतव्यः—यदा तदेव प्रक्लिन्नवर्त्म श्लेष्मात्मकमेव सद्वातपित्ताभ्यां विशेषकाभ्यामुपनिरुध्यते तदा सन्निपातजं सदपरिक्लिन्नवर्त्मार्थान्तरमासादयत् पिल्लमित्यभिधीयते, तथा चोभयोरप्यविरोधः, उभाभ्यामेवापरिक्लिन्नवर्त्मन एव पिल्लाख्यत्ववर्णनादिति । अयं च वाग्भटे कफोत्क्लिष्टाख्यतया निरुद्धः,) किंच यदि प्रक्लिन्नवर्त्म पिल्लं तत्पृथक्त्वेन चाक्लिन्नवर्त्म अभविष्यत्, तदास्यौपद्रविके सुश्रुतो दोषात्मकत्वेन साध्यादिभेदेन चाभिधानमकरिष्यत्, न च कृतं, तस्मादक्लिन्नवर्त्मनोऽवस्थान्तरमिति ॥ ८८ ॥

*यस्य धौतान्यधौतानि संबध्यन्ते पुनः पुनः ।
वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म तत् ॥ ८९ ॥
(सु. उ. अ. ३)

अपरिक्लिन्नवर्त्मनो लक्षणमाह—यस्य धौतानीत्यादि । एतद्वाग्भटे पिल्लाख्यम् । संबध्यन्ते अन्योन्यं लग्नानि भवन्तीत्यर्थः । तदिदं संबद्धत्वं किं पूर्यसंपर्कादेव, तथा च प्रक्लिन्नत्वमेव स्यात्तदर्थमाह—अपरिपक्वानीति । एतदेव पिल्लाख्यम् । अन्यत्र कश्चिच्च पिल्लाख्यमन्यथा पठितं,–"पित्तश्लेष्मप्रकोपेण वर्त्मान्तः परिपाच्यते । ताम्रं निर्लोम तच्चापि विशिष्टं पिल्ललक्षणम्"–इति । एतदनादृतं, टीकाकृद्भिरव्याख्यातत्वात् । वाग्भटेन कुकूणकादीनामष्टादशानां पिल्लाख्या कृता । वर्त्मानीति बहुवचनं नेत्रद्वये वर्त्मचतुष्टयत्वेन संगच्छते तेन नेत्रद्वयगत एवायं व्याधिरिति कार्तिकः ॥ ८९ ॥

†विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य न मील्यते ।
एतद्वातहतं वर्त्म जानीयादक्षिचिन्तकः ॥ ९० ॥
(सु. उ. अ. ३)

वातहतवर्त्मलक्षणमाह—विमुक्तसन्धीत्यादि । विमुक्तो विश्लिष्टो वर्त्मशुक्लगतः सन्धिर्यस्मात् तत्तथा, स्थानच्युतसन्धि । निश्चेष्टं निमेषोन्मेषरहितम् । सन्धिविश्लेषादेव तदाश्रयाणां निमेषोन्मेषकारिणीनां सिराणामपि विश्लेषेण निमेषोन्मेषरहितत्वमित्यभिप्रायः । अत एवोक्तं न मील्यते न संकुचतीत्यर्थः । 'निमील्यत' इति पाठान्तरं, तत्र निमीलितमेव तिष्ठतीत्यर्थः । इदं युक्तं, दृष्टत्वात् । एतच्च साध्यं, सुश्रुतेऽसाध्यप्रकरणे पठितत्वादिति ॥ ९० ॥

---

* 'यस्य वर्त्मानि बहिरन्तश्चापरिक्लिन्नानि तथापि संबध्यन्ते आनह्यन्ते, पिच्छोपदेहेन संलग्नानि भवन्तीत्यर्थः । पक्वान्यपि धौतानि पूयेनावद्धानि भवन्तीति तन्निरासायाह–अपरिपक्वानीति । धौतान्यधौतानीति कोऽर्थः ? पुनः पुनः प्रक्षालितानि' (आ० द०) ॥ ८९ ॥

† 'अक्षिचिन्तक इति शालाक्यसिद्धान्तवादी, विमुक्तसन्धि स्वस्थानच्युतसन्धि' (आ० द०) ॥ ९० ॥

---

१ 'अस्यायमर्थः प्रत्येतव्यः—तत्प्रक्लिन्नवर्त्मनोऽवस्थान्तरमक्लिन्नवर्त्म अवस्थावशाद्यदा विशेषवातपित्तसंश्लेषादस्पष्टं भवति तदा सन्निपातजं सत्पिल्लाख्यं भवति; नतूक्तस्वरूपं, तादृशस्य तैर्लिङ्गैः कफजत्वात्, एतेन प्रक्लिन्नवर्त्मनोऽवस्थान्तरमक्लिन्नवर्त्म, तत्पिल्लतया निर्दिश्यते, अन्यथा चक्षुष्येण विरोधो दुर्वारः' इति क. ।

*वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् ।
आचक्षीतार्बुदमिति सरक्तमविलम्बितम् ॥ ९१ ॥
(सु. उ. अ. ३)

अर्बुदलक्षणमाह—वर्त्मान्तरस्थमित्यादि ।—वर्त्मनोऽभ्यन्तरस्थं, बाह्येऽप्युन्नतत्व-दर्शनाद्विषमम् । ग्रन्थिभूतं ग्रन्थिरूपेण स्थितम् । अवेदनमिति ईषदर्थे नञ्, तेन ग्रन्थिरिवाल्पवेदनमित्यर्थः, वेदना च वातानुबन्धेनैव । सरक्तमिति किंचिद्रक्तं, पित्तानुबन्धात् । अविलम्बितं शीघ्रजन्मेत्यर्थः । केचिदत्र क्रियाविशेषणं ब्रुवते, तेनायमर्थः—अविलम्बितं शीघ्रमाचक्षीतार्बुदमिति; किं त्वेतन्न सङ्गतं, अस्य, व्याख्यानस्य निष्प्रयोजनत्वात् । अन्ये तु 'अवलम्बितं' इति पठन्ति । एतत् सन्निपातजम् (अपाकि च, तच्च कैफेन) ॥ ९१ ॥

†निमेषिणीः सिरा वायुः प्रविष्टः सन्धिसंश्रयाः ।
प्रचालयति वर्त्मानि निमेषं नाम तद्विदुः ॥ ९२ ॥
(सु. उ. अ. ३)

निमेषलक्षणमाह—निमेषिणीरित्यादि । निमेषिणीः निमेषकारिकाः सिराः । सन्धिसंश्रया इति वर्त्मशुक्लगता इत्यर्थः । अयमसाध्यो वातजः । चक्षुष्येण चोन्मेषणीः सिरा इत्युक्तं; यदाह;—"उन्मेषणीः सिरा वायुः प्रविश्य चावतिष्ठते । अत्यर्थं चालयेद्वर्त्म निमेषः स न सिध्यति"—इति ॥ ९२ ॥

यः स्थितो वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः ।
तद्रक्तजं शोणितार्शश्छिन्नं छिन्नं प्रवर्धते ॥ ९३ ॥
(सु. उ. अ. ३)

शोणितार्शोलक्षणमाह—यः स्थित इत्यादि । अङ्कुराकारो मांसोच्छ्रयोऽङ्कुरः । एतदसाध्यं,तथा च विदेहः,—''वायुः शोणितमादाय सिराणां प्रमुखे स्थितः । जनयत्यङ्कुरं ताम्रं वर्त्मनि च्छिन्नरोहणम् ॥ तच्छोणितार्शोऽसाध्यं स्याद्रक्तक्षाव्यथ नीरुजम्''—इति ॥ ९३ ॥

अपाकी कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः ।
लगणो नाम स व्याधिर्लिङ्गतः परिकीर्तितः ॥ ९४ ॥
(सु. उ. अ. ३)

* 'अर्बुदलक्षणमाह—वर्त्मनोरित्यादि । विषममवर्तुलं, अविलम्बिमस्रस्तं, शीघ्रजन्मेत्यन्ये । अन्ये 'अविलम्बि च' इति पाठान्तरं पठन्ति । एतत् सन्निपातात् । आचक्षीत कथयेत्' (आ० द०) ॥ ९१ ॥

† 'व्यानो वायुः, सिराः प्रविष्टो वर्त्मानि चालयति विसंस्खलयति' (आ० द०) ॥ ९२ ॥

१ 'विषमं वर्तुलं' क. । २ अयं पाठः क. पुस्तके नोपलभ्यते । ३ "वर्त्म" इति क. । ४ 'वर्त्मस्थो योऽभिवर्धेत' क. । ५ तद्रजं शोणितात्सर्वं छिन्नं छिन्नं प्रवर्धते । ६ 'सकण्डुः पिच्छिलः कोलसंस्थानो लगणस्तु सः' क. ।

लगणलक्षणमाह—अपाकीत्यादि । अपाकित्वादिकं श्लेष्मारब्धत्वादेव । तथा च सात्यकिः,—"वर्त्मोपरिष्टाद्यो ग्रन्थिः कठिनो न विपच्यते । नीरुजो लगणो नाम रोगः श्लेष्मसमुद्भवः"—इति ॥ ९४ ॥

*त्रयो दोषा बहिःशोथं कुर्युश्छिद्राणि वर्त्मनोः ।
प्रस्रवन्त्यन्तरुदकं बिसवद्बिसवर्त्म तत् ॥ ९५ ॥
(सु. उ. अ. ३)

बिसवर्त्मलक्षणमाह—त्रयो दोषा इत्यादि । बहिःशोथमिति बहिरुच्छूनत्वं यथा भवति तथा वर्त्मनोश्छिद्राणि दोषास्त्रयः कुर्युरित्यर्थः । तानि छिद्राणि अन्तर्मुखान्येव, यदाह—प्रस्रवन्त्यन्तरुदकमिति । छिद्राणीति बहुवचननिर्देशाद्बहुमुखानि, अत्रापि दोषाः कुर्युरिति संबन्धः । अत एव बिसवन्मृणालवत्, तच्चानेकच्छिद्रयुक्तं भवति तद्वत् । अत्रैव चन्द्रिकाकारः सुश्रुते पठति—"शूनं यद्वर्त्म बहुभिः श्लक्ष्णैश्छिद्रैः समन्वितम् । वर्त्मान्तरे बिसमिव बिसवर्त्मेति तत् स्मृतम्"—इति । सात्यकिरप्याह,—"बिसस्योपाचितस्येव बहुमांससिरामुखम् । बिसवर्त्मेति जानीयाद्दुश्चिकित्स्यं त्रिदोषजम्"—इति ॥ ९५ ॥

†वाताद्या वर्त्मसंकोचं जनयन्ति मला यदा ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः ॥ ९६ ॥
(सु. उ. अ. ३)

कुञ्चनलक्षणमाह—वाताद्या इत्यादि । मला इत्यस्याभिधानं दुष्टत्वप्रतिपादनार्थं, यतो मलिनीकरणान्मला इत्युच्यन्ते । कुञ्चनं च कस्यापि तन्त्रस्य माधवकरेण लिखितं न सौश्रुतं, तेन सुश्रुतोक्तषट्सप्ततिसंख्या न हीयते, एवं वक्ष्यमाणेऽपि पक्ष्मशाते बोद्धव्यम् ॥ ९६ ॥

प्रचालितानि वातेन पक्ष्माण्यक्षि विशन्ति हि ।
घृष्यन्त्यक्षि मुहुस्तानि संरम्भं जनयन्ति च ॥ ९७ ॥
असिते सितभागे च मूलकोषात् पतन्त्यपि ।
पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः ९८ ॥
(सु. उ. अ. ३)

---

* शोथं कुर्युः, छिद्राण्यपि कुर्युरिति संबध्यते । बिसवदिति बिसं मृणालं यथाऽनेकच्छिद्रमभ्यन्तरस्थिते जले सति स्रवति, तद्वत् । 'प्रस्रवति' इति पाठे तद्बिसवर्त्म प्रस्रवतीति संबध्यते' (आ० द०) ॥ ९५ ॥

† 'यदाह सुश्रुतः—"उत्संगिन्यपि कुम्भीका पोथकी वर्त्मशर्करा । तथाऽर्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका ॥ बहलं वर्त्म यच्चापि व्याधिवर्त्मविबन्धकः । क्लिष्टकर्दमवर्त्माख्यौ श्याववर्त्म तथैव च ॥ प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतं च यत् । अर्बुदं निमिषश्चापि शोणितार्शश्च यत्स्मृतम् ॥ लगणश्च बिसग्रामा च पक्ष्मकोपस्तथैव च । एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः"—इति (आ० द०) ॥ ९६ ॥

पक्ष्मकोपलक्षणमाह—प्रचालितानीत्यादि । प्रचालितानि प्रकर्षेण चालितानि, प्रतीपीकृतानीत्यर्थः । पक्ष्माणि वर्त्मरोमाणि वातचालितानि सन्ति नेत्रं प्रविशन्ति अन्तर्मुखानि वर्त्मन इत्यर्थः । तान्यसिते कृष्णमण्डले, सितभागे शुक्लमण्डले वा अक्षि घृष्यन्ति घर्षयन्तीत्यर्थः । अत एव संरम्भं शोथं जनयन्ति । मूलकोपात् पक्ष्मकोपात्, पतन्त्यपीति 'पक्ष्माणि' इति शेषः, अपिशब्दान्न पठन्ति च । त्रिदोषजश्चायं, प्रचालने वातमात्रकारणत्वमुक्तं; तथा च चन्द्रिकाकारः पाठान्तरं पठति—"पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च । निर्वर्तयन्ति पक्ष्माणि तैर्घृष्टं चाक्षि दूयते ॥ उद्धृतैरुद्धृतैः शान्तिः पक्ष्मभिश्चोपजायते"—इति । अत्र पक्ष्माशयो वर्त्म । विदेहोऽप्याह—"यस्य वातसंवन्धेन दोषाः प्रकुपितास्त्रयः"—इत्यादिनेति । कल्याणविनिश्चये उपपक्ष्म पठ्यते,—"पक्ष्मोपरोधो वातेन कोठोऽन्तर्मुखरोगवान् । रोमैरन्तर्मुखैरन्यदुपपक्ष्म मलैस्त्रिभिः"—इति । उपपक्ष्मणि यादृशी पूर्वसिद्धा तादृश्यपराऽन्तर्मुखी पक्ष्मपङ्क्तिरिति भेदः, अस्य पक्ष्मोपरोधविशेषत्वात् समानचिकित्सत्वाच्च पृथगिहानभिधानम् ॥ ९७ ॥ ९८ ॥

वर्त्मपक्ष्माशयगतं पित्तं रोमाणि शातयेत् ।
कण्डूं दाहं च कुरुते पक्ष्मशातं तमादिशेत् ॥ ९९ ॥
(नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः ।
शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥ १ ॥
सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु ।
बाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ ॥ २ ॥)
(सु. उ. अ. १)

इति श्रीमाधवकरविरचिते माधवनिदाने नेत्ररोगनिदानं समाप्तम् ॥ ५९ ॥

पक्ष्मशातलक्षणमाह—वर्त्मेत्यादि । पक्ष्माशयोऽत्र पक्ष्ममूलं, शातयेदुन्मूलयेदित्यर्थः । अयं च कफपैत्तिकः, कण्डूदाहवत्त्वात् । अत्र कृच्छ्रोन्मीलनं वाग्भटः पठति—"रोगान् कुर्युश्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः । सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम् ॥ पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमश्रु च । विमर्दनात् स्याच्च शमः कृच्छ्रोन्मीलं वदन्ति तम्" (वा. उ. स्था. अ. ८)—इति । अस्य चकारेण संग्रहः । पक्ष्मणां वर्त्माश्रयत्वादयमपि वर्त्मरोग एव । इति वर्त्मगता एकविंशतिर्व्याधयः समाप्ताः ॥ ९९ ॥ इति वर्त्मगताः ।

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां नेत्ररोगनिदानं समाप्तम् ॥ ५९ ॥

---

१ 'मूलस्थानात्' क. । २ 'कण्डूरत्र पित्तदूषित[illegible]'—इति क. ।

अथ शिरोरोगनिदानम् ।

*शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैः ॥ १ ॥
(सु. उ. अ. २५)

अथ कर्णनासानेत्राणामधिष्ठानत्वेन शिरसो नयनरोगानन्तरं शिरोरोगनिदानारम्भः । शिरोरोगाश्चैकादश, तत्र कारणभेदेन शिरोरोगभेदं दर्शयन्नाह—शिरोरोगास्त्वित्यादि । वातपित्तकफैरित्युक्ते गम्यत एव त्रिभिरिति, तत्कथं तदुक्तिः ? उच्यते—सर्वेषां शिरोरोगाणां सन्निपातजत्वख्यापनार्थं, वातादिभेदश्चोत्कर्षात्; तदुक्तं शालाक्ये,—"सर्व एव शिरोरोगाः सन्निपातसमुत्थिताः । औत्कट्याद्दोषलिङ्गैस्ते कीर्तितास्त्विद्विदा दश"-इति । त्रिभिः सन्निपातेनेति पदद्वयेन प्रकृतिविकृतिसमवेतसन्निपातद्वयमाहुरन्ये । अत्र पक्षे सन्निपातजत्वादेकत्वगणनया न संख्यातिरेकः; त्रिभिरिति पदं पृथक्त्वद्योतनार्थमिति गदाधरः । क्षयेणेति असृग्वसादीनां क्षयेण; क्षयजोऽयं धातुक्षयजनितवातकोपेन सहसाकृतवातजन्यत्वेनाचयपूर्वकः, वातजस्तु संचयप्रकोपजनित इति भेदः; अत एवानुपशयोऽप्यस्य संस्वेदनादिना शुक्र्स्येयकृदेवोपन्यस्तः । शिरोरोगशब्देन शिरोगतशूलरूपा रुजाऽभिधीयते, तेन सूर्यावर्तानन्तवातार्धावभेदकशङ्खकैरित्यभिधानमुपपद्यते अन्यथा तेषामेव शिरोरोगत्वात्तैः शिरोरोगा जायन्त इत्यसंगतं स्यात् ॥ १ ॥

† यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैः प्रशमश्च यत्र शिरोऽभितापः स समीरणेन ॥ २ ॥
(सु. उ. अ. २५)

वातिकशिरोरोगलक्षणमाह—यस्यानिमित्तमित्यादि । अनिमित्तमतर्कितनिमित्तं, वायोर्विषमक्रियत्वात्; तेन निमित्तानुपङ्गिणा कालादिनेत्यर्थः । निशि चातिमात्रमिति रात्रौ शीतेन वायोराधिक्यान्महती रुजा भवति, शीतयोनित्वाद्वायोः । बन्धोपतापैरिति बन्धो बन्धनं वस्त्रादिभिः, उपतापः स्वेदादिभिः, व्यक्त्यपेक्षया बहुवचनं, एतेनोपशयो दर्शितः । शिरोऽभितापः शिरोरुजा ॥ २ ॥

* 'क्षयेणेति असृग्वसादीनां क्षयेण क्षयजः; तथैव चेति चकारेण तन्त्रान्तरोक्तोऽनन्तवात उपलभ्यते' (आ० द०) ॥ १ ॥

† 'अत्र तीव्रा इत्यभिधानात् पित्तेन मध्या, कफेन मन्दा रुजः । बन्धप्रतापैरितिबन्ध उष्णीषादिना, प्रतापः स्वेदेन' (आ० द०) ॥ २ ॥

१ 'शिरःसंश्रितान् अयेणादिरोगानभिधायोर्ध्वजत्रुगतपारिशेष्यादाश्रयभूतशिरोरोगनिदानम्' क. । २ 'तत्किमर्थं पुनरभिधानं' क. । ३ 'द्योतनार्थं क. । ४ 'शुद्धिकृदेवोपन्यस्तः' क. । ५ 'अलक्षितनिमित्तं' क. । ६ 'बन्धोपतापैरित्यवयवबहुत्वाद्बन्द्वे बहुवचनम्' क. । ७ "सूर्यावर्तार्धभेदाभ्यां शङ्खकेन तथैव च" इति पाठान्तरम् । असाम्यमेवेदः पाठः ।

*यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूप्यति चाक्षिनासम् ।
शीतेन रात्रौ च भवेच्छमश्च शिरोऽभितापः स तु पित्तकोपात् ३
(सु. उ. अ. २५)

पित्तजलक्षणमाह—यस्योष्णमङ्गारचितमित्यादि । अङ्गारचितं यथैवेति ज्वलदङ्गाराच्छन्नमिवेत्यर्थः । धूप्यति धूमायते धूमपूर्णमिव भवतीत्यर्थः । धूप्यतीति दिवादेराकृतिगणत्वात् । अक्षि च नासा चेत्यक्षिनासं, प्राण्यङ्गत्वादेकवद्भावः । उपशयं दर्शयति—शीतेन रात्रौ चेत्यादि ॥ ३ ॥

†शिरो भवेद्यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमं च ।
शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात् ॥ ४ ॥
(सु. उ. अ. २५)

श्लेष्मजलक्षणमाह—शिरो भवेदित्यादि । कफोपदिग्धमिति कफलिप्तम् । गुरु गौरवयुतम् । प्रतिष्टब्धं बद्धमिव । हिमं हिमस्पर्शम् । शूनाक्षिकूटमिति वदनविशेषणम् । तथा हि चरकः,—'शिरो मन्दरुजं तेन गुरु स्तिमितभारिकम्' (च. सू. स्था. अ. १७)—इति । अत्रापि स्वेदादिनोपशयो ज्ञेयः ॥ ४ ॥

‡शिरोऽभितापे त्रितयप्रवृत्ते सर्वाणि लिङ्गानि समुद्भवन्ति ।
(सु. उ. अ. २५)

सान्निपातिकलक्षणमाह—शिरोऽभिताप इत्यादि । सर्वाणि लिङ्गानि अनन्तरोक्तानि वातादिलिङ्गानि । (अयं च सन्निपातो विकृतिविषमसमवेतो ज्ञेयः, अन्यथा सर्वेषामेव शिरोरोगाणां त्रिदोषजत्वात् पृथगभिधानं व्यर्थं स्यात्, अस्य च विकृतिविषमसमवेतत्वं कारणभेदाज्ज्ञेयं, न तु विरुद्धलक्षणतया; स चायं कारणभेद उत्कटसर्वदोषजत्वादेव विज्ञेयः । यथा त्रिदोषजे राजयक्ष्मणि स्वरभेदादिजनकानां वातादीनामुत्कटत्वमिति । उक्तं हि चरके,—"वाताच्छूलं भ्रमः कम्पः पित्ताद्दाहो मदस्तृषा । कफाद्गुरुत्वं तन्द्रा च शिरोरोगे त्रिदोषजे" (च. सू. स्था. अ. १७)—इति ॥—

रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च ॥ ५ ॥
(सु. उ. अ. २५)

रक्तजलक्षणमाह—रक्तात्मक इत्यादि । पित्तसमानलिङ्ग इति पित्तजशिरोरोगतुल्यलक्षणः । पैत्तिकलिङ्गाधिकमिह स्पर्शासहत्वम् ॥ ५ ॥

---

* 'नासा धूमावृता भवति । शिर इति पित्तं संतापयतीत्यर्थः' (आ० द०) ॥ ३ ॥

† 'प्रबद्धं बद्धमिव' (आ० द०) ॥ ४ ॥

‡ 'सन्निपातजमाह—शिर इत्यादि । त्रितयप्रवृत्ते दोषत्रयसंभूते, उक्तवातादिलिङ्गानां मुहुर्मुहुर्भवनात्' (आ० द०)

---

१ 'दह्यति' क. । २ 'कफलिप्तमिव प्रस्तुतमिति यावत्' क. । ३ () एतच्चिह्नमध्यस्थः पाठः क-पुस्तके नोपलभ्यते । ४ "धूमवती च नासा" इति पाठाभिप्रायेण । ५ "प्रबद्धं च तथा हिमं च" इति पाठाभिप्रायेण ।

***असृग्वसाश्लेष्मसमीरणानां शिरोगतानामिह संक्षयेण ।**
क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम् ।
संस्वेदनच्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति ॥ ६ ॥
(सु. उ. अ. २५)

क्षयजलक्षणमाह—असृगित्यादि । वसासृजोः सर्वदेहस्थितत्वाच्छिरसि स्थितिः, श्लेष्मणश्च स्थानमेव शिरः, उदानवायोरूर्ध्वगतित्वाच्छिरस्यवस्थानं, तेषां क्षयेणोग्ररुजत्वं व्याधिप्रभावात्; यतो वृद्धे वायावुग्ररुजा युज्यते न तु क्षीणे, यदुक्तं;—"वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते । कर्मणः प्राकृताद्धानिः" (च. सू. स्था. अ. १८)—इति । अन्यैः पुनरयं पाठः सुश्रुते स्वीकृतः, यथा—'वसाबलासक्षयसंभवानाम्' इति । युक्तश्चायं पाठः, वातक्षये हि कफवृद्धौ कफजः शिरोरोगः स्यात्, "वृद्धिर्वाऽपि विरोधिनाम्" (च. सू. स्था. अ. १८) इति वचनात् । किं चैतस्य चिकित्साया-मुक्तं,—'पाने नस्ये च सर्पिः स्याद्वातघ्नमधुरैः शृतम्'—इति । ततश्च समीरणपाठो न सङ्गतः, न हि क्षीणे वायौ शमनमुक्तं, अपि तर्हि वर्धनविधिः; यदुक्तं,—'क्षीणा वर्धयितव्याः' (सु. चि. स्था. अ. ३३)—इति । वसा देहस्नेहस्योपलक्षणं, तेन मेदोमज्जशुक्रमस्तिष्काण्यप्यवरुध्यन्ते, तेषां देहस्नेहत्वात् । पित्तमांसादिक्षयजस्तु चयादिकं-मजक्षयकृतवातशिरोरोग एवावरुध्यते, इति गदाधरः । शिरोभितापः शिरोरुजा । संस्वेदनच्छर्दनधूमनस्यैः कफक्षयः, नागरादितीव्रधूमेन वसामस्तिष्कादिक्षयः, सिरामोक्षादिभिरसृक्क्षयः, अत एवैतैः संस्वेदनादिभिः क्षयजस्य वृद्धिः । अयं विदेहेऽपि पठ्यते—"भ्रमति तुद्यते शून्यं शिरो विभ्रान्तनेत्रता । मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके"—इति । चक्षुष्योऽप्याह,—"स्त्रीप्रसंगादभिघातादथवा देहकर्मणा । क्षिप्रं संजायते कृच्छ्रः शिरोरोगः क्षयात्मकः ॥ वातपित्तात्मकं लिङ्गं व्यामिश्रं तत्र लक्षयेत्"—इति ॥ ६ ॥

निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः ।
घ्राणाच्च गच्छेत् सलिलं सपूयं शिरोभितापः क्रिमिभिः स घोरः
(सु. उ. अ. २५)

क्रिमिजमाह—निस्तुद्यत इत्यादि । निस्तुद्यते सूचीभिरिव तुद्यते । संभक्ष्यमाणमित्यत्र 'क्रिमिभिः' इति शेषः, प्रकरणात् । स्फुरतीव मनाक् चलतीव । घ्राणाच्चेति चकारो भिन्नक्रमेण सलिलमित्यत्र संबध्यते, तेन सलिलं पूयं च गच्छेत् तथा क्रिमयश्च कदाचिन्निर्गच्छन्तीति, तथाच चरकः,—"क्रिमीणां दर्शनेन च" (च. सू. स्था. अ. १७)—इति ॥ ७ ॥

सूर्योदयं या प्रति मन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढा ।

* 'शिरसोऽभिताप इति शिरोरुजा । संस्वेदनच्छर्दनतीव्रनस्यैः कफस्य क्षयः' (आ० द०) ॥ ६ ॥

१ 'क्षीणा जहति स्वं लिङ्गम्'—इति क. । २ 'यतः क्षीणे वर्धनं कर्तव्यं' क. । ३ 'रुधिरं' क. । ४ 'घ्राणाच्च गच्छेदित्यत्र चकारेण क्रमयश्च गच्छन्तीति द्रष्टव्यं' क. । ५ अयमेव तदिष्टः पाठः ।

विवर्धते चांशुमता सहैव सूर्यापवृत्तौ विनिवर्तते च।
सर्वात्मकं कष्टतमं विकारं सूर्यापवर्तं तमुदाहरन्ति ॥८॥
(सु. उ. अ. २५)

सूर्यावर्तलक्षणमाह—सूर्योदयमित्यादि। सूर्योदयं प्रति लक्षीकृत्य या रुगक्षिभ्रुवं समुपैतीति संबन्धः। अक्षिभ्रुवाविति पाठान्तरे प्राण्यङ्गत्वेन प्रातिकवद्भावस्याभावः, नासिकास्तनयोरितिवल्लक्षणव्यभिचारात्। सूर्योदये प्रातर्मन्दं मन्दं यथा स्यात्तथा रुजां समुपैति, अंशुमता च सूर्येण सह गाढा यथा भवति तथा वर्धते। अयमर्थः—यथा सूर्यो वर्धते तथा वेदना प्रवृद्धा भवति, सूर्यस्यापवृत्तौ सायाह्ने विनिवर्तते शाम्यतीत्यर्थः; 'गाढा' इत्यत्र 'गूढा' इति पाठान्तरं, तदा सूर्यापगमे गूढा रात्रौ लीनेत्यर्थः। सर्वात्मकमिति सन्निपातजम्। व्याधिस्वभावाच्च कालविशेषनियमः। कष्टतमं कृच्छ्रसाध्यम्। ननु, अयं सुश्रुते वातपित्ताभ्यां पठ्यते, तद्यथा—"आवर्तसंज्ञः स तु सूर्यपूर्वो व्याधिर्मतः पित्तसमीरणाभ्याम्। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च" (सु. उ. तं अ. २५)—इति। तत्कथं सर्वजत्वं? उच्यते—सुश्रुते औत्कर्ष्येण व्यपदेश इति न विरोधः। ननु, एवं कथं रात्रौ वायुसमानगुणशीतप्रादुर्भावे वेदनालीनता, दिवसस्याद्यन्तयोर्मन्दरुक्त्वं च? उच्यते—अत्रापि पित्तस्य प्रबलतमलात्। यत्तु चिकित्सायां शिरीषमूलपिप्पलीमूलवचावपीडायभिहितं तद्व्याधिप्रत्यनीकत्वात्। अथ वातपित्तजत्ववर्णनेन विशिष्टकालभवने हेतुर्दर्शितो भवति। यतो वातपित्तयोः शीतोष्णात्मकत्वात्। पूर्वाह्णे सूर्यवृद्धिक्रमेण स्रोतसां संकोचकमादवरुद्धमार्गयोर्वेदनाकरत्वं, पराह्णे निवर्तमाने सूर्ये तु स्रोतसां विवृतत्वात् स्वमार्गव्याघातविरहेण वेदनाया अजनकत्वमिति युक्तः कालविशेषनियमः। तथाचाह निमिः,—"सूर्यसोमात्मकौ नित्यं स्वहेतू पित्तमारुतौ। कुर्वाते वेदनां तीव्रां दिनात् पूर्वाह्ण एव तु ॥ आदित्यतेजसा युक्ते निवृत्तेऽपि च भास्करे। स्रोतसां विवृतत्वाच्च ततः श्लेष्माधिगच्छति ॥ उद्वृत्तो मातरिश्वा च स्वमार्गं प्रतिपद्यते। तस्मान्मध्यदिनादूर्ध्वं वेदनाऽत्र प्रशाम्यति"—इति। वातपित्तजत्वमस्याधिकत्वेन व्यपदेश इति न्यायात्; तेन पूर्वेण समं न विरोधः। विदेहे सूर्यावर्तविपर्ययोऽपि पठ्यते,—"तत्र वातानुगं पित्तं चितं शिरसि तिष्ठति। मध्याह्ने तेजसाऽर्कस्य तद्विवृद्धं शिरोरुजम् ॥ करोति पैत्तिकीं घोरां संशाम्यति दिनक्षये। अस्तंगते प्रभाहीने सूर्ये वायुर्विवर्धते[1] ॥ पित्तं शान्तिमवाप्नोति ततः शाम्यति वेदना। एष पित्तानिलकृतः सूर्यावर्तविपर्ययः"—इति। अयमत्र सूर्यावर्त एवान्तर्भावनीयः, चातुर्थिके चातुर्थिकविपर्ययवत् ॥८॥

दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटासु रुजां सुतीव्राम्।
कुर्वन्ति योऽक्षिभ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु ॥९॥
गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान्।
अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम् ॥१०॥
(सु. उ. अ. २५)

---

[1] 'वायुर्निवर्तते' क.।

अनन्तवातलक्षणमाह—दोषा इत्यादि। मन्या ग्रीवाशिराद्वयं, तां संपीड्य; घाटासु ग्रीवापश्चाद्भागेषु, दोषास्त्रय एव रुजां वेदनां सुतीव्रां कुर्वन्ति, तथा अक्षिभ्रुवि शङ्खदेशे च स्थितिमारब्धवलं यो विशेषतः करोति, तथा गण्डपार्श्वे कम्पं हनुग्रहादिकं च यः करोति, तमनन्तवातमुदाहरन्तीति योज्यम्। गण्डस्य कपोलस्य, पार्श्वे एकदेशे। हनुग्रहो वातव्याधिविशेषः। अमुं च सुश्रुते अन्यतोवातेनैव तुल्यत्वादनन्तवातं परित्यज्य दश शिरोरोगा अभिहिताः[1], एवं तन्त्रान्तरेऽपि 'कीर्तितास्त्विह दश'—इत्यभिधानं माधवकरेण तु त्रिदोषजत्वेन तदधिककम्पहनुग्रहलिङ्गयोगाच्च केवलवातजादन्यतोवाताद्विलक्षण एवायमिति अनन्तवातोऽधिकः पठितः, भेदो हि भेदवतां कारणभेदाद्विरुद्धधर्माध्यासाच्च भवतीति ॥ ९ ॥ १० ॥

*रूक्षाशनात्यध्यशनप्राग्वातावश्यमैथुनैः।
वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥ ११ ॥
केवलः सकफो वाऽर्धं गृहीत्वा शिरसो बली।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्धेऽतिवेदनाम् ॥ १२ ॥
शस्त्रारणिनिभां कुर्यात्तीव्रां सोऽर्धावभेदकः।
नयनं वाऽथवा श्रोत्रमतिवृद्धो विनाशयेत् ॥ १३ ॥

अर्धावभेदलक्षणमाह—रूक्षाशनेत्यादि।—अध्यशनमजीर्णे भोजनम्। अवश्यायेति अवश्यायो हिममुच्यते, छन्दोऽनुरोधेन यकारलोपो ह्रस्वत्वं चेति व्याचक्षते। कदाचित् सश्लेष्मवातजत्वमिति विकल्पं दर्शयति—केवल इत्यादि। शस्त्रारणिनिभां शस्त्रच्छेदनिभामरणिनिभां च, अरणिरग्न्युत्थापनकाष्ठयन्त्रं, तस्य मन्थनवत् पीडा[2]; किंवा अरणिना करणेनाग्निरेवोच्यते, तेनाग्निनिभां वेदनाम्। सुश्रुते त्वयं त्रिदोषजः पठितः। तद्यथा,—"यस्योत्तमाङ्गं रुजतेऽर्धमात्रं सतोदभेदभ्रममोहशूलैः। पक्षाद्दशाहादथवाऽप्यकस्मात्तमर्धभेदं त्रितयाद्व्यवस्येत्" (सु. उ. तं. अ. २५)-इति। अत्र तु केवलोऽनिलः सकफो वेत्यौत्कर्ष्यादभिधानं, 'सोऽर्धभेदः कफानिलात्' इति विदेहेऽप्येवं बोद्धव्यम्। अयमुपेक्ष्यमाणो नयनादिकं हन्यादित्याह—नयनमित्यादि। अत्रैव विदेहः,—"शिरसोऽन्यतरे पार्श्वे कुपितो मारुतो यदा। श्लेष्मणा रुध्यते जन्तोस्तोदस्फुटनदालनैः ॥ शूलावदारणैर्गाढमर्धं तदवरुध्यते। नयनं चावदीर्येत सोऽर्धभेदः कफानिलात् ॥ तथा त्र्यहात् स पञ्चाहात् पक्षान्मासाच्च देहिनाम्"—इति। सुश्रुते 'पवनात् सपित्तात्' इति केचित् पठन्ति। तेन वातपित्तजत्वमस्य। सात्यकिना 'वायुः शिरःशङ्खभ्रूनेत्रमवगृह्य' इत्यादिना वातजत्वमस्य दर्शितम्। अन्ये तु सन्निपाताधिकारात् सन्निपातजं पठन्ति, तथाच सुश्रुतः—"त्रितयाद्व्यवस्येत्" (सु. उ. तं. अ. २५) इति। व्याधिस्वभावादचिरानुबन्धकत्वं सान्निपातिकत्वेऽपि ॥११–१३॥

---

* 'अवश्यायो निशाजलम्' (मा० द०) ॥ ११–१३ ॥

---

१ 'सुश्रुतेन नेत्ररोगोक्तान्यतोवातेन सह तुल्यत्वादस्य एनमपठित्वा दश शिरोरोगा अभिहिताः' क.। २ 'अरणिरग्न्युत्पादमन्थानकाष्ठयन्त्रं, तत्कृतमन्थननिभां वेदनां करोति' क.।

*रक्तपित्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः।
तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम्॥ १४॥
स शिरो विषवद्वेगी निरुध्याशु गलं तथा।
त्रिरात्राज्जीवितं हन्ति शङ्खको नामतः परम्।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्याय समाचरेत्॥ १५॥

इति श्रीमाधवकरविरचिते माधवनिदाने शिरोरोगनिदानं समाप्तम्॥ ६०॥

शङ्खकलक्षणमाह—रक्तपित्तानिला इत्यादि। दुष्टाश्चयादिमन्तः। मूर्च्छिता अन्योन्यमेकीभूताः। कफोऽप्यत्र बोद्धव्यः, तथाच सुश्रुतः—"शङ्खाश्रितो वायुरुदीर्णवेगः कृतानुतापः कफपित्तरक्तैः" (सु. उ. तं. अ. २५)—इति। [1](मारकत्वमाह—त्रिरात्राज्जीवितं हन्तीति। कुशलेनोपक्रमे क्रियमाणे त्रिरात्रात् परतो जीवत्येवेत्यत आह—परं त्र्यहाज्जीवतीति। अत्र अहःसंबन्धिनी रात्रिरुपलक्ष्यते, तेन त्रिरात्रात् परं जीवतीत्यर्थः। तत् किमस्य त्रिरात्राभ्यन्तरे साध्यत्वमसाध्यत्वं वेत्यत आह—भैषज्यमित्यादि। तदनेन त्रिरात्राभ्यन्तरे विकल्पितासाध्यत्वं, त्रिरात्रात् परमसाध्यत्वं दर्शितम्। तत्रैव विदेहः,—"चीयते तु तदा पित्तं शङ्खयोरनिलाचितम्। निरुणद्धि ततो मर्म परिपूरितमुल्बणम्॥ ततः शङ्खौ प्ररुज्येते दह्येते इव वह्निना। सूचीभिरिव तुद्येते निकृत्येते इवासिना॥ शङ्खको नाम शिरसि व्याधिरेषः सुदारुणः। तृष्णामूर्च्छाज्वरकरस्त्रिरात्रात् परमन्तकृत्॥ कुशलेन तूपक्रान्तस्त्रिरात्रादेव जीवति"—इति)॥ १४॥ १५॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां शिरोरोगनिदानं समाप्तम्॥ ६०॥

अथासृग्दरनिदानम्।

विरुद्धमद्याध्यशनादजीर्णाद्गर्भप्रपातादतिमैथुनाच्च।
यानाध्वशोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च।
तं श्लेष्मपित्तानिलसंनिपातैश्चतुष्प्रकारं प्रदरं वदन्ति॥ १॥

स्त्रीपुंसां साधारणान् विकारानभिधाय पुंप्रतिनियतस्योपदंशादेरुक्तत्वात् स्त्रीनियतरोगाभिधानम्। तत्र च योनिव्यापत्तिविशेषेऽप्यार्तवप्रवृत्तिसद्भावात् प्रथमं दुष्टार्तवप्रवृत्तिस्वरूपं प्रदरमाह—विरुद्धेत्यादि। विरुद्धमद्यं दुष्टमद्यं अथवा विरुद्धं संयोगा-

* 'पित्तेत्यादि। मूर्च्छिताः प्रवृद्धाः। त्रिरात्रात्परतो जीवितं हन्ति। त्रिरात्रं कुशलवैद्याधिष्ठिते जीवति। त्र्यहादिति त्र्यहं प्राप्य। एवं सुश्रुतोक्ता दश शिरोरोगा उक्ताः, अनन्तवातस्त्वत्राधिकः' ॥ १४॥ १५॥

---

१ 'विमूर्च्छिता विशेषेण वृद्धा इत्यर्थः' क.। २ (.) एतच्चिह्नमध्यस्थः पाठः क. पुस्तके नोपलभ्यते। ३ "रक्तपित्त—" इत्यत्र "पित्तरक्त—" इति पाठाभिप्रायेण।

दिविरुद्धं, मद्यं च खरूपतः । अजीर्णादपक्वभोजनात् । अतिकर्षणात् लङ्घनाद्यतियोगेन क्षीणधातुत्वात् । तं श्लेष्मपित्तानिलसन्निपातैरित्यत्र श्लेष्मणोऽभिधानं श्लेष्मजेऽपि वेदनासूचनार्थम् ॥ १ ॥

असृग्दरं भवेत् सर्वं साङ्गमर्दं सवेदनम् ।

तस्य सामान्यरूपमाह—असृग्दरमित्यादि । सवेदनं सशूलं, असृग् दीर्यते च्यवते यस्मिन्नित्यसृग्दरं, तन्त्रान्तरमत्र,—"तदेवातिप्रसङ्गेन प्रवृत्तमनृतावपि । असृग्दरं विजानीयात् पुरस्ताद्दुक्तलक्षणम्" (सु. शा. स्था. अ. २)—इति । तदेवेति आर्तवम् ॥—

***तस्यातिवृत्तौ[२] दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा ।**
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥ २ ॥
(सु. शा. अ. २)

आर्तवातिप्रवृत्तौ उपद्रवानाह—तस्यातिवृत्तौ दौर्बल्यमित्यादि । रोगाश्च वातजा इति आक्षेपककम्पादयः ॥ २ ॥

†आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु ।
सपीतनीलासितरक्तमुष्णं पित्तार्तियुक्तं भृशवेगि पित्तात् ॥ ३ ॥
रूक्षारुणं फेनिलमल्पमल्पं वातार्ति वातात् पिशितोदकाभम् ।
सक्षौद्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात् ॥ ४ ॥
तं चाप्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्वीत भिषक् चिकित्साम् ।
शश्वत् स्रवन्तीमास्रावं तृष्णादाहज्वरान्विताम् ।
क्षीणरक्तां दुर्बलां च तामसाध्यां विनिर्दिशेत् ॥ ५ ॥

श्लैष्मिकादिभेदेन विशेषलक्षणान्याह—आममित्यादि । आममामरसानुविद्धम् । सपिच्छाप्रतिममिति पिच्छा शाल्मल्यादिनिर्यासः, तत्सदृशं पिच्छिलमित्यर्थः, सशब्द ईषदर्थे । पुलाकतोयप्रतिमं प्रक्षालितपललतोयसदृशं, अन्ये पुलाकं गवेधुकमाहुः । पित्तार्तियुक्तं दाहचिमिचिमादियुक्तम् । भृशवेगि बहुवेगि । वातार्ति तोदादिलक्षणम् । पिशितोदकाभं मांसप्रक्षालनजलसदृशम्[३] । सक्षौद्रसर्पिर्हरितालवर्णमिति नानावर्णत्वं त्रिदोषकोपादेव । क्षौद्रवर्णं मनाक्पिलं, सर्पिर्वर्णं विलीनघृतवत् किञ्चिदरुणं च, मज्जप्रकाशं मज्जा अस्थिस्नेहः तत्समं, कुणपं शवगन्धि । तच्चाप्यसाध्यमिति चिकित्सानिवृत्त्यर्थम् ॥३–५ ॥

* 'अतिप्रवृत्तौ अतिप्रवृद्धौ दौर्बल्यादयः' (आ० द०) ॥ २ ॥

† 'सपिच्छाप्रतिमं सद्यस्सुतशाल्यादिमण्डतुल्यं पिच्छिलमित्यर्थः । पुलाकतोयप्रतिमं गवेधुकान्नवारिवत्, अन्ये पुलाकं तुच्छधान्यमाहुः' (आ० द०) ॥ ३–५ ॥

१ 'श्लैष्मिकेऽतिप्रवृत्तिबोधार्थम्' क. । २ 'तस्यातिवृद्धौ' क. । ३ 'तुच्छधान्यप्रक्षालनजलसदृशम्' क. ।

*मासान्निष्पिच्छदाहार्ति पञ्चरात्रानुबन्धि च।
नैवातिबहुलात्यल्पमार्तवं शुद्धमादिशेत्॥ ६॥
शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम्।
तदार्तवं प्रशंसन्ति यच्चाप्सु न विरज्यते॥ ७॥

(सु. शा. अ. २)

इति श्रीमाधवकरविरचिते माधवनिदानेऽसृग्दरनिदानं समाप्तम्॥ ६१॥

विशुद्धार्तवलक्षणमाह—मासादित्यादि। निष्पिच्छदाहार्तीति अपिच्छिलमदाहम-शूलादिवेदनं, एतेन विकृतवातादिलिङ्गरहितमित्यर्थः। पञ्चरात्रानुबन्धीति पञ्चरात्रं प्रभूतप्रवृत्त्याऽनुबध्नातीत्यर्थः। अल्पप्रवृत्त्या पञ्चरात्रात् परतोऽप्यनुबध्नाति। तदुक्तं हारीते,—'षोडशदिवसान्यृतुकालः'—इति। विदेहेऽप्युक्तम्,—"स्त्रीणामृतुर्भवति षोडश-वासराणि"—इति। शशासृगित्यादिना वर्णद्वयं वातादिप्रकृतिभेदात्। यच्चाप्सु न विरज्यत इति येनार्तवेन रञ्जितं वस्त्रमप्सु प्रक्षालितं सल्लोहितं न भवति तद्विशुद्धम्। तथाच हिरण्याक्षः,—"सुरेन्द्रगोपसङ्काशं स्निग्धं च मधुगन्धि च। अपिच्छिलमशीतं च यद्वासो न विरञ्जयेत्" इति॥ ६॥ ७॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायामसृग्दरनिदानं समाप्तम्॥ ६१॥

अथ योनिव्यापन्निदानम्।

†विंशतिर्व्यापदो योनौ निर्दिष्टा रोगसंग्रहे।
मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्तवेन च॥ १॥
जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक्।

(च. चि. अ. ३०)

स्त्र्यधिकारानुवृत्तेः प्रदुष्टार्तवकार्यत्वाच्च योनिव्यापन्निदानमाह—विंशतिरित्यादि। रोगसंग्रह इति अष्टोदरीये, चरकोक्तत्वादस्य वाक्यस्य। मिथ्याचारेण असम्यगाहारा-चारेण, चरवेगविभक्षणार्थत्वात्। प्रदुष्टेनार्तवेनेति वातादिदुष्टरजसेत्यर्थः। तेन, वन्ध्यादिष्वार्तवदुष्टिरपि कारणं भवति। बीजदोषान्मातापित्रोरारम्भकबीजदोषात्। दैवात् प्राक्तनाधर्मकारणात्, दैवस्य सर्वत्र कारणत्वे सिद्धेऽत्र विशेषेण कारणत्व-मुक्तम्॥ १॥—

---

* 'यच्चाप्सु न विरज्यत इति यदार्तवं कर्पटगतं सदप्सु जलेषु संयुज्यमानेषु न विवर्णं भवति। अयमर्थः-यत् धौतं सत् वासो न विरञ्जयति' (आ० द०)॥ ६॥ ७॥

† 'योनिप्रवृत्तत्वादसृग्दरस्यानन्तरं योनिव्यापन्निदानमाह-विंशतिरित्यादि। व्यापदो रोगाः। दैवादित्यादि दैवं सर्वत्र साधारणं विशिष्टदुष्टकारणादर्शने सति कार्यदर्शनादुन्नेयम्' (आ० द०)॥ १॥—

---

१ 'निर्दोषत्वाद्दाहपित्तादिरहितम्' क.। २ 'उद्भूतप्रवृत्त्या पञ्चरात्रं, ततः परं स्वल्पप्रवृत्त्या तु षोडशदिनानि' क.।

*सा फेनिलमुदावर्ता रजः कृच्छ्रेण मुञ्चति ॥ २ ॥
वन्ध्यां नष्टार्तवां विद्याद्विप्लुतां नित्यवेदनाम्।
परिप्लुतायां भवति ग्राम्यधर्मेण रुग्भृशम् ॥ ३ ॥
वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता।
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥ ४ ॥
(सु. उ. अ. ३८)

वातिका आह—सा फेनिलमित्यादि। सा योनिः फेनवदार्तवं मुञ्चति। उदावर्तेति ऊर्ध्वमावर्तः समन्ताद्वर्तनं वायोर्यत्र सा तथेति, अर्शआदित्वादच्। विप्लुतामिति विप्लुतां. वातवेदनया विप्लुतत्वात्। नित्यवेदनामतिकुपितेनैव वातेनेति। परिप्लुतायामिति परि सर्वतो वातविकारेण प्लुतत्वात् परिप्लुतासंज्ञा। परिप्लुतायां वाह्याभ्यन्तरवातवेदनाभियुक्तायाम्। 'ग्राम्यधर्मेण रुग्भृशम्' इत्यत्र 'ग्राम्यधर्मे रुचिर्भृशम्' इति पाठान्तरं, तत्र रुचिरभिलापः; ग्राम्यधर्मे मैथुने। वातलेत्यादि योनिविशेषणं, वातलया सह पञ्च योनिव्यापदः। वातलायाः पृथगभिधानं वातलायां विशेषेण वातवेदनाप्रादुर्भावार्थम्। एवं पित्तलादिष्वपि बोद्धव्यम्। चतसृष्विति उदावर्तावन्ध्याविप्लुतापरिप्लुतासु ॥ २–४ ॥

सदाहं क्षीयते रक्तं यस्यां सा लोहितक्षया।
सवातमुद्गिरेद्बीजं वामिनी रजसा युतम् ॥ ५ ॥
प्रस्रंसिनी स्रंसते च क्षोभिता दुष्प्रजायिनी।
स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंक्षयात् ॥ ६ ॥
अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥ ७ ॥
(सु. उ. अ. ३८)

पैत्तिका आह—सदाहमित्यादि। क्षीयते रक्तमिति अतिप्रवृत्त्या रक्तस्य क्षयः। वामिन्युद्गिरेद्बीजमिति शुक्रं शुद्धमपि वमतीत्यर्थः। प्रस्रंसिनी स्रंसत इति स्वस्थानाच्च्यवते निःसरतीति यावत्। अत एव "क्षीरस्विन्नां प्रवेशयेत्, (सु. उ. तं. अ. ३८)" इति चिकित्सितम्। क्षोभिता विमर्दिता। दुष्प्रजायिनी दुःखप्रसवा। रक्तसंक्षयादार्तवस्य वायुना क्षयात्। यद्यपि सर्वस्यैवापत्यस्य नाशस्तथाऽपि पुत्रस्य प्राधान्यात् पुत्रघ्नीति व्यपदेशः। पित्तलया सह पञ्च पित्तजाः। दाहपाकेत्याद्युपलक्षणं, तेन नीलपी-

* 'पूर्वं योनेर्विंशतिर्व्यापद उक्तास्तासूदावर्तामाह—सा फेनिलमित्यादि। उद् ऊर्ध्वमासमन्तात् वृत्ता वर्तुला योनिर्यत्र सा तथा। 'उदावर्ता' इति पाठान्तरम्। तत्राप्ययमेवार्थः। सा योनिः फेनिलमार्तवं मुञ्चति। वन्ध्यामाह—नष्टमार्तवं रजो यस्यां सा तथा। नित्यवेदनां वातजनिततोदवन्ध्यादिनानावेदनायुक्ताम्। "ग्राम्यधर्मेऽरुचिः" इति पाठान्तरम्। तत्रारुचिरनभिलापः। वातलेति योनिविशेषणम्' (आ० द०) ॥ २–४ ॥

१ 'उदावृत्ता' क.। २ 'उदावृत्तेति ऊर्ध्वं आसमन्ताद्वृत्तं वर्तुलं यत्र वायुना सा तथा, उदावर्तेति पाठेऽप्ययमेवार्थः, क.।

स्नावितार्तवा च भवतीत्यर्थः । यदुक्तमन्यत्र,—"व्यापन्नवणकट्वम्लक्षाराद्यैः पित्तजा भवेत् । दाहपाकज्वरोष्णार्ता नीलपीतासितार्तवा"—इति । आद्यास्विति रक्तक्षयावामिनीप्रस्रंसिनीपुत्रघ्नीषु ॥ ५–७ ॥

*अत्यानन्दा न सन्तोषं ग्राम्यधर्मेण गच्छति ।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते ॥ ८ ॥
मैथुनेऽचरणा पूर्वं पुरुषादतिरिच्यते ।
बहुशश्चातिचरणा तयोर्बीजं न विन्दति ॥ ९ ॥
श्लेष्मला पिच्छिला योनिः कण्डूग्रस्ताऽतिशीतला ।
चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रयो भवेत् ॥ १० ॥
(सु. उ. अ. ३८)

श्लैष्मिका आह—अत्यानन्देत्यादि । ग्राम्यधर्मेण मैथुनेन । कर्णिन्यां कर्णिकेति कर्णिका मांसकन्दाकारग्रन्थिः । मैथुनेऽचरणा पूर्वं पुरुषादतिरिच्यत इति अचरणा सम्यङ्मैथुनाचरणात् पूर्वं प्रथमं, पुरुषादतिरिच्यते विरमति, तेन बीजं न गृह्णाति । अत्राचरणशब्देनोपचारात्तद्वती स्त्री भण्यते । बहुशश्चातिचरणेति बहुशो मैथुनाचरणादतिचरणा, सा च श्लेष्मजनितकण्डूभिराजगेव (?) बहुमैथुनाचरणाद्बीजं न धत्ते । अत उक्तं—तयोर्बीजं न विन्दतीति ।—तयोरिति अचरणातिचरणयोः । श्लेष्मलायामतिशीतलेत्युपलक्षणं, तेन वेदनादिकमपि ज्ञेयम् । तथाच तन्त्रान्तरे,—"कफोऽभिष्यन्दिभिर्वृद्धो योनिं चेद्दूषयेत् स्त्रियः । स कुर्यात् पिच्छिलां शीतां कण्डूग्रस्तां सवेदनाम्"—इति ॥ ८–१० ॥

†अनार्तवाऽस्तनी षण्ढी खरस्पर्शा च मैथुने ।
अतिकायगृहीतायास्तरुण्यास्त्वण्डली भवेत् ॥ ११ ॥
विवृता च महायोनिः सूचीवक्त्राऽतिसंवृता ।
सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा ॥ १२ ॥
चतसृष्वपि चाद्यासु सर्वलिङ्गोच्छ्रयो भवेत् ।
पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः ॥ १३ ॥
(सु. उ. अ. ३८)

इति श्रीमाधवकरविरचिते माधवनिदाने योनिव्यापन्निदानं समाप्तम् ॥ ६२ ॥

---

* 'बहुशो मैथुनाचरणादतिचरणा, सा च श्लेष्मजनितकण्डूयोगाद्बहुमैथुनाचरणादतिचरणा, बीजं गर्भाङ्कुरजननं न लभते । श्लेष्मानुबन्धत्वमाह—चतसृष्वपीत्यादि । अत्यानन्दाकर्णिन्यचरणातिचरणाख्या । एवं श्लेष्मानुबन्धिन्यः पञ्च' (आ० द०) ॥ ८–१० ॥

† 'अण्डलीमाह—अतिकायो बृहन्मेहनपुरुषः, तेन गृहीताया इति अप्रगल्भायाः अण्डली अण्डवन्निःसृता योनिः । अतिशयेन सूचीवत्संकीर्णमुखी संवृता । चतसृष्वपि, सर्वलिङ्गानुबन्धमाह—चतसृष्विति ।—षण्ढ्यण्डलीविवृतासूचीवक्त्रासु । त्रिदोषजाः पञ्च' (आ० द०) ॥११–१३॥

---

१ अस्याग्रे क. पुस्तके 'अयमर्थः—यावत्पुरुषस्तु सुखं नाप्नोति तावदसौ विरमति' इत्यधिकमुपलभ्यते । २ 'इयं पुरुषादतिरिच्यते पश्चाद्भवति, तेन बीजं न गृह्णाति' क. । ३ 'अण्डिनी' क. । ४ 'सर्वलिङ्गनिदर्शनं' इति ख.

सान्निपातिका आह—अनार्तवेत्यादि । अनार्तवा रजःशून्या । अस्तनी ईषत्स्तनी । अतिकायगृहीताया महामेहनेन गृहीतायाः । अण्डली अण्डवन्निःसृता योनिः । विवृता महायोनिरतिविवृतमुखी । सूचीवक्त्राऽतिसंवृता सूचीरन्ध्राऽतिसङ्कटमुखी । सर्वलिङ्ग-समुत्थानेति सर्वदोषलिङ्गानां समुत्थानं यत्र सा तथा । अन्ये त्वाहुः—सर्वदोषसमु-त्थाना सर्वदोषहेतुजेत्यर्थः । चरकोक्ता अधिका रक्तयोन्यादयः सुश्रुतोक्तानामदूरान्त-रत्वेनाववोद्धव्याः ॥ ११—१३ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां योनिव्यापन्निदानं समाप्तम् ॥ ६२ ॥

अथ योनिकन्दनिदानम् ।

दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ॥ १ ॥
पूयशोणितसंकाशं निकुचाकृतिसंनिभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥ २ ॥
(सु. उ. अ. ८)

योन्याश्रयत्वाद्योनिकन्दनिदानमाह—दिवास्वप्नादित्यादि । नखदन्ताद्यैरित्यत्रादि-शब्दात् कण्टकादिपरिग्रहः । वाताद्याः कुपिता इति यथानिदानं प्रत्येकं वातादयः कुपिताः । निकुंचाकृतिसंनिभमिति वर्तुलमित्यर्थः; अस्यानन्तरं गुडकमिति द्रष्टव्यं, तेन नपुंसकलिङ्गता सता भवति । कन्दः प्रायेण जरन्नारीयोनिगतो निकुचाकारो रोगः ॥ १ ॥ २ ॥

*रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम् ॥ ३ ॥
नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः ॥ ४ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने योनिकन्दनिदानं समाप्तम् ॥ ६३ ॥

वातजादिभेदेन रूपमाह—रूक्षमित्यादि । नीलपुष्पप्रतीकाशमिति अतसीकुसुम-वर्णम् । कफजेऽपि नीलता व्याधिप्रभावादेव; अन्ये तु पैत्तिकलक्षण एव संवध्नन्ति, योग्यत्वात् ॥ ३ ॥ ४ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां योनिकन्दनिदानं समाप्तम् ॥ ६३ ॥

---

* 'तच्चतुर्थे मासि संयावरूपतया अनभिव्यक्तदृष्टाङ्गतया सुश्रुतेन स्रावपक्षे निक्षिप्तम्' (आ० द०) ॥ २ ॥

---

१ 'लिकुचाकृतिसन्निभं' क. । २ 'लकुचाकृति वर्तुलं' 'गुडकं' इति शेषः, तेन 'नपुंसक-लिङ्गता भवति' क. ।

अथ मूढगर्भनिदानम्।

भयाभिघातात्तीक्ष्णोष्णपानाशननिषेवणात्।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत्॥ १॥

योनि[1]स्थानविकारानुवृत्तेः स्त्रीरोगनिदानारम्भः। तत्र गर्भपातनिदानमाह—भयाभिघातादित्यादि। एतच्चोपलक्षणं, तेनान्येऽपि सुश्रुतोक्ता ग्राम्यधर्मयानवाहनपतनस्खलनादयो बोद्धव्याः। पततीति स्रंसमाने, तेन स्रावपातयोरपि सशूलं रक्तदर्शनं भवति, एतत्तु पूर्वरूपमिति दर्शयति॥ १॥

आचतुर्थात्ततो मासात्प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥ २॥

एतयोः कालभेदमाह—आचतुर्थादित्यादि। गर्भविद्रव इति अनतिघनावयवत्वेन विशेषेण द्रवरूपतया गर्भविद्रवो भण्यते; स्रावो नातिघनत्वात्, पातस्तु घनत्वात्। यत्तु भोजेऽभिहितं;—"आतृतीयात्ततो मासाद्गर्भः स्रवति शोणितम्। ऊर्ध्वं संघात[2]भूतस्तु गर्भः पतति योषिताम्"—इति। संघात[3]भूतः कोमलाङ्गः, पिण्डितावस्थ इत्यर्थः। अत एव सुश्रुते चतुर्थमासेऽप्यदृढत्वात् स्रावः कथितः। स्थिरशरीरस्येति कठिनशरीरावयवस्य। पञ्चमषष्ठयोरिति सप्तमे अनुगुण[4]जनने जीवदर्शनायोक्तं, विगुण[5]जनने तु सप्तमादिमासेष्वपि गर्भपातः। अन्ये तु पञ्चमषष्ठयोरेव पातः, सप्तमादिषु दोषवैगुण्याद्विप्रसव इति आचार्यप्रामाण्याद्व्यवहाराच्च मन्यन्ते॥ २॥

*गर्भोऽभिघातविषमाशनपीडनाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन।

गर्भस्याकालपाते निदानपूर्वकं दृष्टान्तमाह—गर्भोऽभिघातेत्यादि। पक्वं द्रुमादिवेति दृष्टान्तेनैव दर्शयति यथा वृन्तलग्नं पक्वफलमभिघातेनाकाल एव पतति, तथोक्तहेतुभिरकाले गर्भपातः॥—

†मूढः करोति पवनः खलु मूढगर्भं
शूलं च योनिजठरादिषु मूत्रसङ्गम्॥ ३॥

उचितप्रसवकाले यथा मूढो गर्भः स्यात्तदाह—मूढः करोतीत्यादि। मूढो व्यासक्तगतिः, शूलं च योनिजठरादिषु 'करोति' इति शेषः; मूत्रसङ्गमित्यत्र करोतीति संबध्यते॥ ३॥

---

* 'पूर्णसर्वावयवस्तु प्रभवः समुचितकाले'॥—(आ० द०)—

† 'यथा मूढो गर्भो भवति तदाह—मूढ इत्यादि। मूढो व्यासक्तगतिः, मूढगर्भं करोति,' (आ० द०)॥ ३॥

---

१ 'योनिस्थानसाम्यादधिकारानुवृत्तेः' क.। २ 'संघातभूतस्तु' क.। ३ 'संघातभूतः' क.। ४ 'अनुगुणपवने' क.। ५ 'विगुणपवने' क.।

*भुग्नोऽनिलेन विगुणेन ततः स गर्भः
संख्यामतीत्य बहुधा समुपैति योनिम्।
द्वारं निरुध्य शिरसा जठरेण कश्चित्
कश्चिच्छरीरपरिवर्तितकुब्जदेहः ॥ ४ ॥
एकेन कश्चिदपरस्तु भुजद्वयेन
तिर्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः।
पार्श्वापवृत्तगतिरेति तथैव कश्चि-
दित्यष्टधा गतिरियं ह्यपरा चतुर्धा ॥ ५ ॥

विगुणानिलत्वादसंख्येयत्वेऽपि विशिष्टा अष्टौ गतीराह—भुग्नोऽनिलेनेत्यादि। भुग्नो विगुणीकृतः। बहुधेति कथितप्रकारादप्यधिकं दर्शयति। द्वारं निरुध्य शिरसेत्येकः प्रकारः, शिरसा विपुलेन द्वारं योनिमुखं पिधाय लग्नो भवतीत्यर्थः। जठरेण कश्चिदित्यपरः, जठरेणोदरेण योनिद्वारं पिधाय सक्तो भवतीत्यर्थः। कश्चित् शरीरपरिवर्तितकुब्जदेह इति शरीरपरिवर्तनेन कुब्जदेहः कश्चित् सक्तो भवति, अनेनान्तःकुब्जपृष्ठकुब्जयोः परिग्रहः[1]। एकेनेति बाहुना, अयं चतुर्थः। तिर्यग्गत इति अर्गलायमानः। कश्चिदवाङ्मुखोऽन्य इति ग्रीवाभङ्गादधः संलग्नः[2]। पार्श्वापवृत्तगति-रेति पार्श्वभङ्गेन विगुणीकृतः[3] पार्श्वनत इति यावत्। एतीति स्वस्थानादपैति, तथैवेति अवाङ्मुखः सन्। सुश्रुतेऽप्यष्टधा गतिरेव पठ्यते। यथा,—"कश्चिद्द्वाभ्यां सक्थिभ्यां योनिमुखं प्रपद्यते, कश्चिदाभुग्नैकसक्थिरेकेन सक्थ्ना, कश्चिदाभुग्नसक्थिशरीरः स्फिग्देशेन तिर्यगागतः, कश्चिदुदरपृष्ठपार्श्वानामन्यतमेन योनिद्वारं पिधायावतिष्ठते, अन्तःपार्श्वाप्रवृत्तशिराः कश्चिदेकेन बाहुना, कश्चिदाभुग्नशिरा बाहुद्वयेन, कश्चिदाभुग्न-मध्यो हस्तपादशिरोभिः, कश्चिदेकेन सक्थ्ना योनिमुखमभिप्रपद्यतेऽपरेण पायुम्" (सु. नि. स्था. अ. ८)-इति ॥ ४ ॥ ५ ॥

†संकीलकः प्रतिखुरः परिघोऽथ बीज-
स्तेपूर्ध्वबाहुचरणैः शिरसा च योनिम्।

* 'विगुणानिलयोगादसंख्येयां गतिमाह—भुग्न इत्यादि। भुग्नो विपरीतीकृतः। तत्र व्यवहारयोग्यानष्टौ प्रकारानाह—द्वारमित्यादि। विपुलेन शिरसा योनिमुखं पिधाय लग्नो भवति, इत्येकः प्रकारः। अपरो ध्मातेन जठरेणोदरेण योनिकुब्जमुखं पिधाय सक्तो भवतीति द्वितीयः प्रकारः। कश्चित् शरीरपरिवर्तनेन विपरीतवर्तनेन कुब्जदेहः सक्तो भवति, अनेन चान्तःकुब्जपृष्ठकुब्जयोः परिग्रहः, अयं तृतीयः प्रकारः। कश्चिदेकेन बाहुनेति चतुर्थः प्रकारः। अपरो बाहुद्वयेनेति पञ्चमः प्रकारः। एवमष्टधा गतिर्भवति। गर्भस्य चतुरः प्रकारान् पुनराह—अप्यपराश्चतुर्धेत्यादि। संकीलकादिभेदेन अपरा वक्ष्यमाणाश्चतुःप्रकाराः' (आ० द०) ॥ ४ ॥ ५ ॥

† 'तेन हस्तपादैर्बहिर्गतैः प्रतिखुर उच्यते, स प्रतिखुरः कायसंगी निरुद्धकायो भवति।

१ 'अनेन सहजकुब्जत्वग्रहणं' क.। २ 'ग्रीवाभङ्गादन्तर्लग्नः' क.। ३ 'विगुणीभूतो रतिद्वारं गच्छति' क.।

सङ्गी च यो भवति कीलकवत् स कीलो
दृश्यैः खुरैः प्रतिखुरं स हि कायसङ्गी।
गच्छेद्भुजद्वयशिराः स च वीजकाख्यो
योनौ स्थितः स परिघः परिघेण तुल्यः॥ ६॥

इत्यष्टविधा गतीः प्रदर्श्य चतुःप्रकारेण ये गतिविशेषाः कथितास्तानाह—संकीलक इत्यादि। सम्यक् कीलवत् संकीलकः, स्वार्थे कन्। तेनोर्ध्वबाहुचरणशिरोभिः कीलवल्लग्नो योन्यां संकीलकः। पृष्ठेन योन्यां तथैतद्विपरीतेन दृश्यैर्हस्तपादशिरोभिः प्रतिखुरः, खुरसाधर्म्यात्; खुरशब्देन हस्तपादावुच्येते। गच्छेद्भुजद्वयशिरा इति भुजद्वयोपहितं शिरो यस्य स तथाभूतः सन् यो गच्छेत् स बीजकः कायसङ्गी। भोजेऽप्येता गतयः पठ्यन्ते। तथाहि,—"ऊर्ध्वबाहुशिरःपादो रुन्ध्याद्योनिमुखं तु यः। प्रतिकीलोपमस्थित्या स च कीलकसंज्ञितः॥ अधस्तात् पार्श्वतो वाऽपि तथैवाकुञ्चितोऽपि वा। यो निःसृत्य मुखं योनेर्ज्ञेयः प्रतिखुरस्तु सः॥ योनिद्वारात्तु निर्गच्छेद्यश्चैकः सशिरोभुजः। तमाहुर्वीजकं नाम मूढगर्भचिकित्सकाः॥ योनिमावृत्य यस्तिष्ठेत् परिघो गोपुरं यथा। तथाऽन्तर्गर्भमायान्तं विद्यात् परिघसंज्ञितम्"—इति॥ ६॥

अपविद्धशिरा या तु शीताङ्गी निरपत्रपा।
नीलोद्धतसिरा हन्ति सा गर्भं स च तां तथा॥ ७॥
(सु. नि. अ. ८)

असाध्यमूढगर्भगर्भिण्योर्लक्षणमाह—अपविद्धशिरा या त्वित्यादि। अपविद्धशिरा शिरो धारयितुमशक्तेत्यर्थः, अवनतशिरा इति गदाधरः। निरपत्रपा लज्जाशून्या। नीलोद्धतसिरा इति नीलवर्णा उद्गता कुक्षौ यस्याः सा तथा। स चेति गर्भः॥ ७॥

*गर्भास्पन्दनमावीनां प्रणाशः श्यावपाण्डुता।
भवेदुच्छ्वासपूतित्वं शूनताऽन्तर्मृते शिशौ॥ ८॥
(सु. नि. अ. ८)

मृतगर्भलक्षणमाह—गर्भास्पन्दनमित्यादि। अस्पन्दनं निश्चलत्वं, जीवतो गर्भस्यावयवचलनं भवति। आवीनां प्रणाशः प्रसववेदनानामभावः, अथवा आवीशब्देन प्रसवलिङ्गान्युच्यन्ते, तानि च मूत्रकफप्रसेकादीनि, तेषां नाशः। शूनतेति उच्छूनता अन्तर्गतस्य मूढगर्भस्याध्मापनेन॥ ८॥

परिघमाह—यो योनिमावृत्य तिष्ठेत्स परिघः। परिघेण तुल्य इति परिघोऽर्गलादण्डः (आ० द०)॥ ६॥

* 'अथ गर्भिणीरक्षार्थं मृतस्य मूढगर्भस्य परिपीड्याकर्षणार्थं लक्षणमाह—गर्भेत्यादि। शूनतेति उद्धतता मृतस्य गर्भस्याध्मापनेन' (आ० द०)॥ ८॥

---

१ 'भागुरुतः कीलकः' संशब्दप्रयोगश्छन्दोऽनुरोधात्' क.। २ 'योनिं प्रति दृश्यैः खुरैः प्रतिखुरः' क.। ३ 'भुजद्वयोः पिहितं' क.। ४ 'अधः पार्श्वगतो वाऽपि' क.। ५ 'योन्यन्तर्गर्भमायातं' क.। ६ 'मृतमूढगर्भस्य परिपाट्याकर्षणार्थं लक्षणमाह—' क.।

*मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च निपीडितः ॥ ९ ॥

तस्यान्तर्गतस्य मानसागन्तुदुःखव्याधिभेदेन द्विविधं मरणहेतुमाह—मानसागन्तुभिरित्यादि । उपतापैः दुःखैः ॥ ९ ॥

†योनिसंवरणं सङ्गः कुक्षौ मक्कल्ल एव च ।
हन्युः स्त्रियं मूढगर्भा यथोक्ताश्चाप्युपद्रवाः ॥ १० ॥
(सु. नि. अ. ८)

(वायुः प्रकुपितः कुर्यात् संरुध्य रुधिरं स्नुतम् ।
सूताया हृच्छिरोबस्तिशूलं मक्कल्लसंज्ञकम् ॥ १ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने मूढगर्भनिदानं समाप्तम् ॥ ६४ ॥

अपरमसाध्यगर्भिणीलक्षणमाह—योनिसंवरणमित्यादि । योनिसंवरणं तन्त्रान्तरपठितो रोगः । तथाहि,—"वातलान्यन्नपानानि ग्राम्यधर्मं प्रजागरम् । अत्यर्थं सेवमानाया गर्भिण्या योनिमार्गगः ॥ मातरिश्वा प्रकुपितो योनिद्वारस्य संवृतिम् । कुरुते रुद्धमार्गत्वात् पुनरन्तर्गतोऽनिलः ॥ निरुणद्ध्याशयद्वारं पीडयन् गर्भसंस्थितिम् । निरुद्धवदनोच्छ्वासो गर्भश्चाशु विपद्यते ॥ बद्धां संरुद्धहृदयां नाशयत्याशु गर्भिणीम् । योनिसंवरणं विद्याद्व्याधिमेनं सुदारुणम् ॥ अन्तकप्रतिमं घोरं नारभेत चिकित्सितम्" इति । सङ्गः कुक्षाविति योनिसंवरणे प्रतिनिवृत्तो वायुर्गर्भाशयं यदा निरुणद्धि तदा गर्भः कुक्षौ सक्तो भवति स उच्यते—सङ्गः कुक्षाविति । मक्कल्लो रक्तमारुतजः शूलविशेषः । यद्यपि प्रसूतायाः शूलं मक्कल्लमुक्तं सुश्रुते,—"प्रजातायाश्चोत्तरकालं तीक्ष्णैरविशोधितं रक्तं मक्कल्लं करोति" (सु. शा. अ. १०)—इति, तथाऽपि प्रजातायाश्चेति चकारेणाप्रजाताया अपि शूलं मक्कल्लमिति । यथोक्ताश्चाप्युपद्रवा इति यथोक्ता ये ये उक्तास्ते पुनराक्षेपकश्वासादयः ॥ १० ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां मूढगर्भनिदानं समाप्तम् ॥ ६४ ॥

---

* 'तस्यान्तर्गतस्य मानसागन्तुदुष्टव्याधिभेदेन द्विविधं हेतुमाह—मानसेत्यादि । उपतापैरिति दुःखैः, तथाऽऽगन्तुभिरपि पीडितः' (आ० द०) ॥ ९ ॥

† 'योनिसंवरणे सति प्रतिनिवृत्तो वायुर्गर्भाशयद्वारं यदा रुणद्धि, तदा गर्भः कुक्षौ सक्तो भवति स उच्यते—सङ्गः कुक्षाविति । मक्कल्लो रक्तमारुतजः शूलविशेषः । यथोक्ताश्चाप्युपद्रवास्ते च पुनराक्षेपककासश्वासादयः । "पूतिगन्धि तथास्वेदो जिह्वा तालु च शुष्यति । वेपते भ्राम्यति तथा जीवितं चोपरुध्यते ॥ एतैर्लिङ्गैर्विजानीयान्मूढगर्भं चिकित्सकः" ॥ मक्कल्लमाह—वायुः प्रकुपित इत्यादि' (आ० द०) ॥ १० ॥ ११ ॥

अथ सूतिकारोगनिदानम् ।

अङ्गमर्दो ज्वरः कम्पः पिपासा गुरुगात्रता ।
शोथः शूलातिसारौ च सूतिकारोगलक्षणम् ॥ १ ॥

क्रमप्राप्तत्वात् सूतिकारोगनिदानारम्भः—अङ्गमर्द इत्यादि । सूतिकारोगलक्षणमिति सूतिकारोग एव लक्षणं, अङ्गमर्दादिव्यतिरिक्तस्य रोगस्यानभिधानात् । एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्त इत्यर्थः ॥ १ ॥

*मिथ्योपचारात् संक्लेशाद्विषमाजीर्णभोजनात् ।
सूतिकायाश्च ये रोगा जायन्ते दारुणास्तु ते ॥ २ ॥
ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः ।
तन्द्रारुचिप्रसेकाद्याः कफवातामयोद्भवाः ॥ ३ ॥
कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रितः ।
ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः ॥ ४ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने सूतिकारोगनिदानं समाप्तम् ॥ ६५ ॥

सूतिकारोगनिदानमाह—मिथ्येत्यादि । संक्लेशादिति संक्लिश्यते उक्लिश्यते दोषोऽनेनेति संक्लेशो दोषजनकमन्नम् । विषमाजीर्णभोजनादिति विषमभोजनादजीर्णभोजनाच्च । ज्वरातीसारादीनामङ्गमर्दादिभ्यः पृथक् पुनरुपादानं रोगाधिक्यं कृच्छ्रत्वमुपद्रवत्वं च ख्यापयितुम् । कफवातामयोद्भवा इति तन्द्रारुचिप्रसेकाद्या इत्यस्य विशेषणं मन्यन्ते केचित्, अन्ये सर्वस्य ज्वरातिसारादेः । कफवातजे विकारे सति येषामुद्भवस्ते कफवातामयोद्भवा ज्वरातीसारादयः कृच्छ्रसाध्या इत्यर्थः । ते सर्वे सूतिकानाम्नेति ते ज्वरातीसारादयः सर्वे सूतिकाभवत्वेनाश्रयाश्रितयोरभेदोपचारात् सूतिकानाम्नोच्यन्ते; ते चाप्युपद्रवाः ते उपद्रवाश्च भवन्ति उक्तानां रोगाणामन्यतमं प्रधानीकृत्य ॥ २–४ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां सूतिकारोगनिदानं समाप्तम् ॥ ६५ ॥

अथ स्तनरोगनिदानम् ।

सक्षीरौ वाऽप्यदुग्धौ वा प्राप्य दोषः स्तनौ स्त्रियाः ।
प्रदूष्य मांसरुधिरं स्तनरोगाय कल्पते ॥ १ ॥

सूतिकारोगाधिकारात् स्तनरोगा उच्यन्ते । पारिभाषिकस्तनरोगसंप्राप्तिमाह—सक्षीरौ वाऽपीत्यादि । सक्षीरौ गर्भवत्याः, अदुग्धौ वेति दोहदायोगेन प्रसूतायाः, स्तनौ प्राप्येति विवृतधमनीमुखेनाविश्य, स्तनरोगशब्देन स्तनकोप इति प्रसिद्धो रोग उच्यते ॥ १ ॥

---

*'मिथ्योपचारादिभिः सूतिकाया ये रोगा जायन्ते ते सूतिकारोगा इत्युच्यन्ते' (आ० द०) ॥ २–४ ॥

पञ्चानामपि तेषां हि रक्तजं विद्रधिं विना ।
लक्षणानि समानानि बाह्यविद्रधिलक्षणैः ॥ २ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने स्तनरोगनिदानं समाप्तम् ॥ ६६ ॥

तेषां वातपित्तकफसन्निपातागन्तुजानामतिदेशेन लक्षणमाह—पञ्चानामपीत्यादि । एतत् सुबोध्यम् । आगन्तुस्तनरोगोऽभिघातेन शल्येन च । रक्तजस्यासंभवो व्याधिस्वभावात् ॥ २ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां स्तनरोगनिदानं समाप्तम् ॥ ६६ ॥

अथ स्तन्यदुष्टिनिदानम् ।

(*विशस्तेष्वपि गात्रेषु यथा शुक्रं न दृश्यते ।
सर्वदेहाश्रितत्वाच्च शुक्रलक्षणमुच्यते ॥ १ ॥
†तदेव चेष्टयुवतेर्दर्शनात्स्मरणादपि ।
शब्दसंश्रवणात्स्पर्शात्संहर्षाच्च प्रवर्तते ॥ २ ॥
सुप्रसन्नं मनस्तत्र हर्षणे हेतुरुच्यते ।
आहाररसयोनित्वादेवं स्तन्यमपि स्त्रियाः ॥ ३ ॥
‡तदेवापत्यसंस्पर्शाद्दर्शनात्स्मरणादपि ।
ग्रहणाच्च शरीरस्य शुक्रवत्संप्रवर्तते ।
स्नेहो निरन्तरस्तत्र प्रस्रवे हेतुरुच्यते ॥ ४ ॥
§गुरुभिर्विविधैरन्नैर्दुष्टैर्दोषैः प्रदूषितम् ।
क्षीरं मातुः कुमारस्य नानारोगाय कल्पते ॥ १ ॥

---

* अदृश्यस्यापि स्तन्यस्य प्रसिद्धोपमानेन प्रवर्तने हेतुं दर्शयन्नाह–विशस्तेष्वित्यादि । शुक्रलक्षणं स्तन्यमुच्यत इति शेषः । कुत इत्याह–यथा शुक्रं विशस्तेषु छिन्नेष्वपि गात्रेषु न दृश्यते, तस्माद्धेतोः । द्वितीयं हेतुमाह–सर्वदेहाश्रितत्वादिति । शुक्रवत्समस्तशरीराश्रितत्वात्' (आ० द०) ॥ १ ॥

† 'शुक्रदृष्टान्तेन स्तन्यस्याभ्यन्तरदर्शनं प्रतिपाद्य तेनैव दृष्टान्तेन बहिःप्रवर्तनं प्रतिपादयन्नाह–तदित्यादि । तदेव शुक्रं प्रवर्तते बहिर्निःसरति । संहर्षात् विशिष्टसंकल्पलक्षणात् । संहर्षे हेतुचतुष्टयं निर्दिशन्नाह–इष्टयुवतेरित्यादि । इष्टयुवतिदर्शनादिहेतुचतुष्टयेन यः संहर्षः, स सुप्रसन्न एव मनसि भवतीति मनसोऽपि प्रसन्नस्य कारणत्वं दर्शयन्नाह–सुप्रसन्नेत्यादि । तत्र हर्षणे हेतुः सुप्रसन्नमीर्ष्यादनभिभूत मन उच्यते । शुक्रेण सह प्रस्तुतस्य स्तन्यस्य साधर्म्याद्धेतुं दर्शयन्नाह–आहारेत्यादि । पूर्वं स्तन्यमपि स्त्रियाः प्रवर्तते, शुक्रमाहाररसयोनित्वात्प्रवर्तते, स्तन्यमपि तथा, तस्मात्प्रवर्तते' (आ० द०) ॥ २ ॥ ३ ॥

‡ 'ननु शुक्रमाहाररसयोन्यपि संहर्षात्कारणात्प्रवर्तते, अत्र च किं कारणमित्याह–तदेवेत्यादि । तदेव स्तन्यं शुक्रवत् संप्रवर्तते । अपत्यसंस्पर्शादिकारणचतुष्टयेऽपि स्नेहो मूलकारणमिति तदेव दर्शयन्नाह–स्नेह इत्यादि । प्रस्रवे स्तन्यस्रवणे; अत्रापि चत्वारो हेतवः परमिष्टयुवतिस्थानेऽत्रापत्यग्रहणं, मूलहेतुहर्षस्थाने स्नेहः, प्रसन्नस्थाने निरन्तरः' (आ० द०) ॥ ४ ॥

§ 'प्रदूषितं धात्र्याः क्षीरं कुमारस्य नानारोगाय कल्पते । नानारोगानुत्पादयतीत्यर्थः' (आ० द०) ॥ १ ॥

---

१ 'धात्र्याः' क. ।

स्तनाश्रितत्वेन स्तन्यदुष्टिमाह—गुरुभिर्विविधैरित्यादि । गुरुभिरन्नैर्हेतुभूतैर्ये दुष्टा दोषास्तैः प्रदूषितम् ॥ १ ॥

कषायं सलिलप्लावि स्तन्यं मारुतदूषितम् ।
कट्वम्ललवणं पीतराजीमत् पित्तसंज्ञितम् ॥ २ ॥
कफदुष्टं घनं तोये निमज्जति सपिच्छलम् ।
द्विलिङ्गं द्वन्द्वजं विद्यात् सर्वलिङ्गं त्रिदोषजम् ॥ ३ ॥

स्तन्यदुष्टिलक्षणमाह—कषायमित्यादि । सलिलप्लावीति सलिले यदुत्प्लवते लाघवात् तत् सलिलप्लावि । एतदुपलक्षणं, तेन तनुत्वाद्यपि बोद्धव्यम् । कट्वम्ललवणमिति कटु तिक्तं, तिक्तेऽपि कटुशब्दप्रवृत्तेरिति वदन्ति । पीतराजीमदिति पीतरेखायुक्तं, तत्रापि नीललोहिताश्च राज्यो ज्ञेयाः । निमजति पित्तदुष्टसंज्ञितम् । संज्ञितमित्यत्र संयुतमिति पाठान्तरम् । तोये निमजति गुरुत्वात् । अतिमाधुर्याद्यपि बोध्यम् । प्रसन्नस्य तु साधारणं मधुरपाण्डुत्वम् । अभिघातेनापि स्तन्यं दुष्टं संभवत्येव, किंतु तस्य वातिकस्तन्यलक्षणैरेव संग्रहणं कर्तव्यम् । स्तन्यस्वरूपं च सुश्रुतेनोक्तम् । तद्यथा,—"रसप्रसादो मधुरः पक्वाहारनिमित्तजः । कृत्स्नदेहात् स्तनौ प्राप्तः स्तन्यमित्यभिधीयते" (सु. नि. स्था. अ. १०) इति ॥ २ ॥ ३ ॥

अदुष्टं चाम्बुनिक्षिप्तमेकीभवति पाण्डुरम् ।
मधुरं चाविवर्णं च प्रसन्नं तत् प्रशस्यते ॥ ४ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने स्तन्यदुष्टिनिदानं समाप्तम् ॥ ६७ ॥

अविकृतस्तन्यमाह—अदुष्टमित्यादि । अम्बुनिक्षिप्तमेकीभवति सर्वात्मना जलेन सहैकीभवतीति बोध्यं, वातादिदुष्टस्याप्येकदेशेनैकीभावोपलम्भात् । अविवर्णमिति अविद्यमानवातादिदुष्टवर्णनम् । एतत् समदोषप्रकृतिक्षीरस्य प्रसन्नस्य लक्षणम् । अन्ये त्वविवर्णमित्यत्र नञ् ईषदर्थे, तेन यद्वातादिप्रकृतिवर्णानुविद्धमपि पाण्डुरमल्पदुष्टत्वाद्गृह्णन्ति । केचित् पाण्डुरस्थाने 'सर्वशः' इति पठन्ति, तदा सर्वात्मना जलेन सहैकीभवतीति व्यक्तोऽर्थः । अत्र पक्षे अविवर्णमित्यनेनैवादुष्टशुक्लवर्णता ज्ञेया । प्रसन्नं प्रकृतिस्थम् ॥ ४ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां स्तन्यदुष्टिनिदानं समाप्तम् ॥ ६७ ॥

अथ बालरोगनिदानम् ।

*वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः ।
क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः ॥ १ ॥
स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान् ।
तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन् ॥ २ ॥
कफदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् ।

---

* 'तथा श्लेष्मरोगयुक्तः, निद्रया पीडितः, जडः अपविद्धाङ्गः, शूनवक्त्राक्षः सशोफमुखनयनः' (भा० द०) ॥ १-३ ॥

निद्रान्वितो जडः शूनवक्त्राक्षश्छर्दनः शिशुः ॥ ३ ॥
द्वन्द्वजे द्वन्द्वजं रूपं सर्वजे सर्वलक्षणम्।

बालरोगाणां दुष्टस्तन्येन संभवात्तदनन्तरं तानाह—वातदुष्टमित्यादि। वातगदातुर इति वक्ष्यमाणक्षामस्वरादियुक्तः। तृष्णालुरिति तृष्णावान्। लालालुरिति लालास्रावयुक्तः। छर्दन इति स्तन्यवान्तिकरः॥ १–३ ॥—

*शिशोस्तीव्रामतीव्रां च रोदनाल्लक्षयेद्रुजम् ॥ ४ ॥
स यं स्पृशेद्भृशं देशं यत्र च स्पर्शनाक्षमः।
तत्र विद्याद्रुजं, मूर्ध्नि रुजं चाक्षिनिमीलनात् ॥ ५ ॥
कोष्ठे विबन्धवमथुस्तनदंशान्त्रकूजनैः।
आध्मानपृष्ठनमनजठरोन्नमनैरपि ॥ ६ ॥
वस्तौ गुह्ये च विण्मूत्रसंगत्रासदिगीक्षणैः।
स्रोतांस्यङ्गानि सन्धींश्च पश्येद्यत्नान्मुहुर्मुहुः ॥ ७ ॥

शिशोर्वक्तुमक्षमस्यान्तर्गतवेदनाज्ञानोपायमाह—शिशोरित्यादि। तीव्रां रुजं बहुरोदनात्, अतीव्रामल्परोदनाल्लक्षयेत् ॥ ४–७ ॥

†कुकूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि।
जायते तेन तन्नेत्रं कण्डूरं च स्रवेन्मुहुः[१] ॥ ८ ॥
शिशुः कुर्याल्ललाटाक्षिकूटनासावघर्षणम्।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः ॥ ९ ॥

बालानामेव दुष्टस्तन्यपानाद्वर्त्मरोगमाह—कुकूणक इत्यादि। कुकूणकः 'कोथ' इति ख्यातः। स्रवेन्मुहुरिति पिच्छिलस्रुतियुक्तं भवतीत्यर्थः। न वर्त्मोन्मीलनक्षम इति न वर्त्मचालनपटुः॥ ८ ॥ ९ ॥

‡मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः ॥ १० ॥
युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम्।
रोगं परिभवाख्यं च युञ्ज्यात्तत्राग्निदीपनम् ॥ ११ ॥

---

* 'अतिरोदनेन किंचिद्रोदनेन च रुजं पीडां विद्यादित्यर्थः। स शिशुर्यं देहदेशं भृशमत्यर्थं स्पृशेत्, यत्र च देहदेशे स्पर्शनाक्षमः स्यात्स्पर्शं न सहते, तत्र देहदेशे वेदनां जानीयात्, अक्षिनिमीलनात् नेत्रयोः संकोचनाच्छिरसि पीडां विद्यात्, जिह्वौष्ठदशनादिभिर्बालस्य हृदि पीडां विद्यात्, विबन्धादिभिराध्मानादिभिश्च कोष्ठे रुजं विद्यात्, वस्तौ गुदे च विण्मूत्रयोः। सङ्गेन तथा त्रासेन दिगीक्षणेन च बालस्य रुजं विद्यात्' (आ० द०) ॥ ४–७ ॥

† 'क्षीरदोषात्कुकूणको नाम रोगः शिशूनामेव वर्त्मनि जायते, न महतां पुंसाम्। तथा च वाग्भटः—"कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः"—इति। कुत्सिते कूणिते निमीलिते नेत्रे यस्माद्रोगादसौ कुकूणकः, लोके कोथय इत्याख्यातः। तेन कुकूणकेन नेत्रं कण्डूयुक्तं जायते। तथा तन्नयनं स्रवेन्मुहुरिति पिच्छिलस्रुतियुक्तं भवतीत्यर्थः ललाटादिमर्दनं कुर्यात्' (आ० द०) ॥ ८ ॥ ९ ॥

‡ 'कुमारो गर्भिण्या मातुः प्रायो बाहुल्येन स्तन्यं पिबन् कासादिभिस्तथा कोष्ठवृद्ध्या युज्यते युक्तो भवति' (आ० द०) ॥ १० ॥ ११ ॥

---

१ 'शूनः शुक्लाक्षः' क.।

पारिगर्भिकमाह—मातुरित्यादि। पिबन्नपीति अपिशब्दादपिबन्नपि। तमाहुः, पारिगर्भिकमिति पारिगर्भिकोऽहिण्डीति ख्यातः; तस्यैव परिभवाख्य इति नामान्तरं बालं परिभवतीति परिभवः, स एव आख्या यस्य तम्। उपशयेनापि तज्ज्ञान-माह—युक्त्यादित्यादि॥ १०॥ ११॥

*तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्।
तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते॥ १२॥
तालुपातः स्तनद्वेषः कृच्छ्रात् पानं शकृद्द्रवम्।
तृडक्षिकण्ठास्यरुजा ग्रीवादुर्धरता वमिः॥ १३॥

तालुकण्टकमाह—तालुमांस इत्यादि। अस्यैव लक्षणं तालुपात इत्यादि। तालुपात इत्यभ्यन्तरे तालुनोऽधःपातः। कृच्छ्रात् पानमित्यत्र 'स्तन्यस्य' इति शेषः। शकृद्द्रवं भिन्नपुरीषता। ग्रीवादुर्धरता ग्रीवाया दुःखेन धारणम्। वमिः स्तन्यस्य वान्तिः॥ १२॥ १३॥

विसर्पस्तु शिशोः प्राणनाशनो वस्तिशीर्षजः।
पद्मवर्णो महापद्मनामा दोषत्रयोद्भवः॥ १४॥
शङ्खाभ्यां हृदयं याति हृदयाद्वा गुदं व्रजेत्।

महापद्मनामानं विसर्पमाह—विसर्पस्त्वित्यादि। वस्तिशीर्षज इति वस्तिजः शीर्षजश्च, शीर्षं शिरः। पद्मवर्ण इति लोहितपद्मवर्णः। शङ्खाभ्यां हृदयं यातीति शीर्षजः। पद्मपत्रतुल्यवर्णतां मुखतालुनि वहिर्देशे वेति वदन्ति। हृदयाद्गुदं यातीति वस्तिजः, ऊर्ध्वं हृदयं गत्वा गुदं यातीत्यर्थः। अत्र पद्मसवर्णता वस्तिदेशे गुदे च। वाशब्दश्चात्र व्यवस्थितविकल्पवचनः॥ १४॥—

क्षुद्ररोगे च कथिते त्वजगल्यहिपूतने॥ १५॥

अन्यौ द्वौ विकारौ बालानां भवतस्तावाह—क्षुद्रेत्यादि। स्निग्धा सवर्णेत्यादिनाऽज-गल्लिका, कण्डूयनादित्यादिनाऽहिपूतना॥ १५॥

ज्वराद्या व्याधयः सर्वे महतां ये पुरेरिताः।
बालदेहेऽपि ते तद्वद्विज्ञेयाः कुशलैः सदा॥ १६॥

अन्येऽपि विकारा बालानां संभवन्तीत्यतिदेशेन तानाह—ज्वराद्या इत्यादि। पुरे-रिता इति पूर्वोक्ताः। ते तद्वदिति ते ज्वरादयस्तादृशा ज्ञेयाः। कुशलैरिति विज्ञैः॥ १६॥

क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव वा॥ १७॥
ऊर्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते।
भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चासकृत्॥ १८॥

---

* 'कण्टकाकारत्वेन तालुकण्टकः, निम्नता गर्ताकारता। तालुपातमाह—तालुपात इत्यादि। तालुपाताख्यो रोगः, तालुनः पतनं स्रंसो यत्र रोगे स तथा' (आ० द०)॥ १२॥ १३॥

क्षामोऽति निशि जागर्ति शूनाक्षो भिन्नविट्स्वरः ।
मांसशोणितगन्धिश्च न चाश्नाति यथा पुरा ॥ १९ ॥
सामान्यं ग्रहजुष्टानां लक्षणं समुदाहृतम् ।

प्रायेण शौचभ्रंशादिना स्कन्दग्रहादयो नव बालेष्वावेशं कुर्वन्त्यतस्तत्परिज्ञानाय सामान्यलक्षणमाह—क्षणादुद्विजते बाल इत्यादि । एते ग्रहाः पूजार्थं बालान् हिंसन्ति । यदुक्तं सुश्रुते,—"धात्रीमात्रोः प्राक् प्रदिष्टापचाराच्छौचभ्रष्टान् मङ्गलाचारहीनान् । त्रस्तान् हृष्टांस्तर्जितान् क्रन्दितान् वा पूजाहेतोर्हिंस्युरेते कुमारान्" (सु. उ. तं. अ. २७)–इति । उद्विजत इत्युद्विग्नो भवति; उद्विग्नो विह्वलः, न तु बिभेतीत्यर्थः, त्रस्यतीत्यनेन पौनरुक्त्यप्रसंगात् । कूजत्यार्तनादं करोति । भ्रुवौ क्षिपतीति भ्रूभङ्गं रचयति । दन्तौष्ठमित्यत्र क्षिपतीति संबध्यते । क्षिपति खादति, धातूनामनेकार्थत्वात् । भिन्नविट्स्वर इति भिन्नविट् भिन्नशकृत्, भिन्नस्वरः स्वरभेदवान् । *मांसशोणितगन्धिरिति विस्रगन्धि । न चाश्नाति यथा पुरेति पूर्ववन्न भक्षयतीत्यर्थः* ॥ १७–१९ ॥—

*एकनेत्रस्य गात्रस्य स्रावः स्पन्दनकम्पनम् ॥ २० ॥
ऊर्ध्वं दृष्ट्या निरीक्षेत वक्रास्यो रक्तगन्धिकः ।
दन्तान् खादति वित्रस्तः स्तन्यं नैवाभिनन्दति ॥ २१ ॥
स्कन्दग्रहगृहीतानां रोदनं चाल्पमेव च ।

सामान्यलिङ्गमभिधाय विशेषग्रहलिङ्गमाह–एकनेत्रस्येत्यादि । एकनेत्रस्य वामस्य दक्षिणस्य वा स्रावोऽश्रुस्रुतिः प्रभावात्, गात्रस्य स्रावो घर्मयुक्तगात्रतेत्यर्थः । स्पन्दनकम्पनमिति स्पन्दनं मनाक् चलनं, कम्पनं महता वेगेन वेपनं; स्पन्दनं कम्पनं वा भवतीत्यर्थः । वक्रास्यो वक्रमुखः । रक्तगन्धिक इत्येतत् सामान्यलक्षणलब्धमप्यतिशयार्थमुक्तं; एवमन्यत्रापि सामान्यलक्षणे पुनरुक्ते व्याख्येयम् ॥ २०–२१ ॥—

नष्टसंज्ञो वमेत् फेनं संज्ञावानतिरोदिति ।
पूयशोणितगन्धित्वं स्कन्दापस्मारलक्षणम् ॥ २२ ॥

स्कन्दापस्मारलक्षणमाह— नष्टेत्यादि । नष्टसंज्ञो मूर्छितः सन् फेनं वमति, तथा संज्ञावान् सन्नतिरोदिति ॥ २२ ॥

स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
स्रास्रावव्रणपरिपीडितः समन्तात् ।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥ २३ ॥

* 'स्कन्दोऽत्र स्कन्दविनोदार्थं रुद्रेण सृष्टो ग्रहः, न पुनर्भगवान् कार्त्तिकेयः' (आ० द०) ॥ २० ॥ २१ ॥—

१ 'हृतान् त्रस्तान् तर्जितान् ताडितांश्च' क. । २ 'त्रस्यतीत्यस्योपात्तत्वात्' क. ।

शकुनीलक्षणमाह—स्रस्ताङ्ग इत्यादि। स्रस्ताङ्ग इति अङ्गस्रंसव्यथावान्। भयचकित इति भयहेतुर्भयं भयानकमुच्यते, ततश्चकितः, असति भयहेतौ त्रस्यतीत्यर्थः। विहङ्गगन्धिरिति विहङ्गस्येव गन्धो यस्य स तथा, उपमानाच्चेति समासान्त इप्रत्ययः। विहङ्गशब्देन जलचरा मांसादाश्च पक्षिणो गृह्यन्ते, विस्रगन्धित्वात्। हिरण्याक्षेऽप्युक्तं,—"संस्रावदाहपाकार्तैर्व्यथितः स्फोटैर्भयान्वितः। स्रस्ताङ्गो विस्रगन्धिः स्याच्छकुन्या पीडितः शिशुः"—इति। सास्रावव्रणपरिपीडित इति स्फोटैरेव विदीर्णैर्व्रणरूपमापन्नैः परिपीडितः स्फोटैश्च प्रचिततनुरिति नवनवैः स्फोटैर्व्याप्ततनुः। क्षत इत्यभिभूतः॥ २३॥

*व्रणैः स्फोटैश्चितं गात्रं पङ्कगन्धं सवेदसृक्।
भिन्नवर्चा ज्वरी दाही रेवतीग्रहलक्षणम्॥ २४॥
अतीसारो ज्वरस्तृष्णा तिर्यक्प्रेक्षणरोदनम्।
नष्टनिद्रस्तथोद्विग्नो ग्रस्तः पूतनया शिशुः॥ २५॥
छर्दिः कासो ज्वरस्तृष्णा वसागन्धोऽतिरोदनम्।
स्तन्यद्वेषोऽतिसारश्च अन्धपूतनया भवेत्॥ २६॥
वेपते कासते क्षीणो नेत्ररोगो विगन्धिता।
छर्द्यतीसारयुक्तश्च शीतपूतनया शिशुः॥ २७॥
प्रसन्नवर्णवदनः सिराभिरभिसंवृतः।
मूत्रगन्धी च बह्वाशी मुखमण्डिकया भवेत्॥ २८॥
छर्दिस्प(स्य)न्दनकण्ठास्यशोषमूर्च्छाविगन्धिताः।
ऊर्ध्वं पश्येद्दशेद्दन्तान् नैगमेयग्रहं वदेत्॥ २९॥
ग्रस्तोऽन्धाक्षः स्तनद्वेषी मुह्यते चानिशं मुहुः।
तं बालमचिराद्धन्ति ग्रहः संपूर्णलक्षणः॥ ३०॥

इति श्रीमाधवकरविरचिते माधवनिदाने बालरोगनिदानं समाप्तम्॥ ६८॥

रेवतीग्रहलक्षणमाह—व्रणैरित्यादि। व्रणैः पुराणैः, स्फोटैरविदीर्णैर्नूतनैः, चितं व्याप्तम्। गात्रं पङ्कगन्धं सवेदसृगिति गात्रमिति कर्तृपदं, पङ्कगन्धं शटितकर्दमगन्धं, समासविधेरनित्यत्वादिप्रत्ययो न[1] भवति। पूतनालक्षणमाह—अतीसार इत्यादि। ग्रस्त इति गृहीत इत्यर्थः॥ २४–३०॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां बालरोगनिदानं समाप्तम्॥ ६८॥

* 'पङ्कगन्धं कर्दमगन्धमसृक् सवेद्। पूतनाग्रस्तलक्षणमाह–अतीसार इत्यादि। तिर्यक् वामदक्षिणनेत्रप्रान्तस्यावलोकनं, उद्विग्नो व्यग्रचित्तः। अन्धपूतनया ग्रस्तमाह–छर्दिरित्यादि। वसाया मांसस्नेहस्य गन्धवान्। शीतपूतनाग्रस्तलक्षणमाह–वेपत इत्यादि। सुगमम्। मुखमण्डलिकाग्रस्तलक्षणमाह–प्रसन्नेत्यादि। सिराभिरसंवृत उद्गतसिराः, मूत्रगन्धीति बस्तमूत्रगन्धः, बह्वाशी बहुभक्षणशीलः। नैगमेयग्रस्तलक्षणमाह–छर्दिरित्यादि। स्पन्दनं लालास्रावः, अथवा घर्माम्बुस्रावः। साध्यासाध्यलक्षणमाह–ग्रस्तोऽन्धाक्ष इत्यादि' (आ० द०)॥ २४–३०॥

[1] 'समासान्तविधेरनित्यत्वादुपमानाच्चेतीप्रत्ययो न भवति' क०।

अथ विषरोगनिदानम्।

***स्थावरं जङ्गमं चैव द्विविधं विषमुच्यते।**
मूलाद्यात्मकमाद्यं स्यात् परं सर्पादिसंभवम्॥ १॥

पारिशेष्याद्विषरोगनिदानमुच्यते—स्थावरमित्यादि। विषादजनकत्वाद्विषं, तच्च द्विविधं स्थावरं जङ्गमं च। मूलाद्यात्मकमिति आद्यं स्थावरं मूलादिरूपं दशविधं, यदुक्तं सुश्रुते, "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च। निर्यासो धातवश्चैव कन्दश्च दशमः स्मृतः"(सु. क. स्था. अ. २)-इति। तत्र क्लीतकाश्वमारकगुञ्जासुगन्धगर्गरकरघाटविद्युच्छिखानन्ताविजयानीत्यष्टौ मूलविषाणि, विषपत्रिकालम्बासुदारुकरम्भमहाकरम्भाणि पञ्च पत्रविषाणि, कुमुद्वतीरेणुकाकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचर्मरीभगन्धासर्पघातिनन्दनसारपाकानि द्वादश फलविषाणि, वेत्रकादम्बवल्लीजकरम्भमहाकरम्भाणि, पञ्च पुष्पविषाणि, अन्त्रपाचककर्तरीयशैलेयकरम्भनन्दनकरघाटवराटकानि सप्त त्वङ्निर्याससारविषाणि, कुमुदघ्नीस्नुहीजालक्षीरीणि त्रीणि क्षीरविषाणि, फेनाश्मभस्म हरितालं च द्वे धातुविषे कालकूटवत्सनाभसर्षपकपालकर्दमकवैराटकमुस्तकमहाविषप्रपौण्डरीकमूलकहलाहलश्रृङ्गिमर्कटकानि त्रयोदश कन्दविषाणि, एतानि प्राणहराणि, एवं पञ्चपञ्चाशत् स्थावराणि विषाणि भवन्ति। एषां च व्याधपुलिन्दादिभ्यो व्यक्तिज्ञानं कर्तव्यम्। परं सर्पादिसंभवमिति परं जङ्गमं, तच्च षोडशाभिधानं—दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्तवमुखसंदंशपर्दितगुदास्थिपित्तशूकशवभेदात्। पर्दितं पायुकृतः कुत्सितशब्दः, 'पर्द' कुत्सिते शब्दे, इत्यस्य प्रयोगात्। तत्र दृष्टिनिःश्वासविषा दिव्याः सर्पाः, भौमाः सर्पा दंष्ट्राविषाः, मार्जारमर्कटव्याघ्रादयो दंष्ट्रानखविषाः, पिच्चिटकौण्डिन्यादयो मूत्रपुरीषविषाः, मूषिकाः शुक्रविषाः, वृश्चिकवरट्युचिटिङ्गादय आराविषाः, लूता लालार्तवविण्मूत्रशुक्रमुखसंदंशविषाः, चित्रशीर्षकशतदारुकशारिकादयो मुखसन्दंशदंष्ट्रापर्दितगुदपुरीषविषाः, विषहतास्थिमत्स्यास्थिप्रभृतयोऽस्थिविषाः, शकुलीमत्स्यादयः पित्तविषाः सूक्ष्मतुण्डभ्रमरादयः शूकविषाः, कीटसर्पदेहा गतासवः शवविषाः। एषां च सुश्रुतस्य कल्पस्थाने विस्तरो द्रष्टव्यः॥ १॥

निद्रां तन्द्रां क्लमं दाहमपाकं लोमहर्षणम्।
शोथं चैवातिसारं च जङ्गमं कुरुते विषम्॥ २॥

तत्र जङ्गमविषस्य बह्वधिष्ठानत्वेन प्राधान्यात् सर्ववेगानुगतं सामान्यलिङ्गमाह—निद्रामित्यादि। एतत् सुबोध्यम्॥ २॥

स्थावरं च ज्वरं हिक्कां दन्तहर्षं गलग्रहम्।
फेनच्छर्द्यरुचिश्वासं मूर्च्छां च कुरुते भृशम्॥ ३॥

* 'मूलाद्यात्मकमिति आद्यं प्रथमं अदनीयमाद्यमित्यन्ये। स्थावरं मूलादिस्वरूपं दशविधम्। यदुक्तं सुश्रुते—"दशाधिष्ठानमाद्यं स्याद्द्वितीयं षोडशाश्रयम्"-इति' (आ० द०)॥ १॥

१ "आरशब्देनात्र वृश्चिकादिलाङ्गूलस्थितः कण्टको भण्यते, तस्य च स्थूलशूकरूपत्वाच्छूकग्रहणेनैव ग्रहणं, अत एव दृष्टिनिःश्वासेत्यादिसूत्रे पृथङ्नोदाहृतमारग्रहणम्" इति डल्हणः।

स्थावरस्य सामान्यलिङ्गमाह—स्थावरं चेत्यादि। फेनच्छर्दिरिति फेनस्य छर्दिः ॥३॥

*इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः।
जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान् ॥ ४ ॥
न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च।
अपार्थं बहु संकीर्णं भाषते चापि मूढवत् ॥ ५ ॥
हसत्यकस्मात् स्फोटयत्यङ्गुलीर्विलिखेन्महीम्।
वेपथुश्चास्य भवति त्रस्तश्चान्योन्यमीक्षते ॥ ६ ॥
विवर्णवक्त्रो ध्यामश्च नखैः किंचिच्छिनत्त्यपि।
आलभेतासनं दीनः करेण च शिरोरुहम् ॥ ७ ॥
वर्तते विपरीतं च विषदाता विचेतनः।

(सु. क. अ. १)

विषदातृलक्षणमाह—इङ्गितज्ञ इत्यादि। अभिप्रायसूचकमीहितमिङ्गितं तज्ज्ञो वैद्यो वाचा क्रियया मुखवैकृत्यादिना च विषदातारं जानीयात्। एभिर्वक्ष्यमाणलक्षणैः। न ददात्युत्तरं पृष्ट इति स्वीयासत्कर्मजनितव्यामोहात्। अपार्थमित्यनर्थकम्। संकीर्णमित्यस्फुटम्। हसत्यकस्मादिति अहेतोरपि हसति। भयजवायुजनितपर्वव्यथापनोदनायाङ्गुलीः स्फोटयति। क्रियान्तरकरणसूचनाय महीं विलिखति। भीतः सन् प्रत्येकं वीक्षते, ध्याम इति दग्धसमवर्णः किंचित्तृणादिकं, वर्तते विपरीत इति वारंवारं परिवर्त्य तिष्ठति ॥ ४–७ ॥—

†उद्वेष्टनं मूलविषैः प्रलापो मोह एव च ॥ ८ ॥
जृम्भणं वेपनं श्वासो मोहः पत्रविषेण तु।
[१]मुष्कशोथः फलविषैर्दाहोऽन्नद्वेष एव च ॥ ९ ॥
भवेत् पुष्पविषैश्छर्दिराध्मानं श्वास एव च ॥
त्वक्सारनिर्यासविषैरुपयुक्तैर्भवन्ति हि ॥ १० ॥
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः।
फेनागमः क्षीरविषैर्विड्भेदो गुरुगात्रता ॥ ११ ॥
हृत्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि।
प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत् ॥ १२ ॥

(सु. क. अ. २)

* 'अवनीपतेः परिकर्मिणो विषमवचारयन्तीति तेषां विषदातॄणां लक्षणमाह—इङ्गितज्ञ इत्यादि। त्रस्तश्चान्योन्यमीक्षत इति स्वपापकर्मोपलम्भभयेनान्योन्यमीक्षते। विवर्णवक्त्रो मलिनवक्त्रवर्ण इति डल्हणः' (आ० द०) ॥ ४–७ ॥

† 'मुष्कयोः श्वयथुः। पुष्पविषलक्षणमाह—भवेदित्यादि। त्वक्सारेत्यादि त्वग्विषैः सारविषै-'

१ 'मुखशोथः' इति क.।

मूलादिविषाणां प्रमादादुपयुक्तानां प्रत्येकं लक्षणमाह—उद्वेष्टनमित्यादि । उद्वेष्टनं दण्डविमर्दनवद्व्यथा । मूलविषैरित्यध्याहार्यम् ; एवं पत्रादीनामुक्तानां यावत्संख्याकानामेकं सामान्यलक्षणमवगन्तव्यम् । प्रायेण कालघातीनीति एतानि नव मूलादिविषाणि कालान्तरेण मारकाणि भवन्तीत्यर्थः । कन्दविषं तु त्रयोदशविधमतितीक्ष्णत्वात्पाणादिविकारकारित्वात् प्रयोगात्तत्क्षणेन मारकम् ॥ ८–१२ ॥

*सद्यः क्षतं पच्यते यस्य जन्तोः स्रवेद्रक्तं पच्यते चाप्यभीक्ष्णम् ।
कृष्णीभूतं क्लिन्नमत्यर्थपूति क्षतान्मांसं शीर्यते चापि यस्य ॥ १३ ॥
तृष्णा मूर्च्छा ज्वरदाहौ च यस्य दिग्धाहतं तं पुरुषं व्यवस्येत् ।
लिङ्गान्येतान्येव कुर्याद्मित्रैर्व्रणे विषं यस्य दत्तं प्रमादात् ॥ १४ ॥
सपीतं मूत्रधूमाभं पुरीषं योऽतिसार्यते ।
फेनमुद्वमते चापि विषपीतं तमादिशेत् ॥ १५ ॥

विषलिप्तशस्त्रहतस्य लिङ्गमाह—सद्य इत्यादि । पच्यते चाप्यभीक्ष्णमिति सद्यस्तावत् पच्यते पश्चादपि पुनः पुनः पाकमेति ॥ १३–१५ ॥

†वातपित्तकफात्मानो भोगिमण्डलिराजिलाः ।
यथाक्रमं समाख्याता, द्यन्तरा द्वन्द्वरूपिणः ॥ १६ ॥

स्थावरजङ्गमविषाणां जङ्गमेष्वतितीक्ष्णत्वेन सर्पविषे वाच्ये तदाश्रयान् सर्पानाह—वातपित्तकफात्मान इत्यादि । भोगी फणी, मण्डली मण्डलवद्रथाङ्गलाङ्गलादिरूपमण्डलयुक्तः, राजिलश्चित्रैर्लेखायुक्तः, एते यथाक्रमं वाताद्यात्मानो वातादिप्रकृतयः । व्यतिकरजान् सर्पान् दर्शयति—द्व्यन्तरा द्वन्द्वरूपिण इति ।—द्वयोरन्तरं विशेषो येषु ते तथा । यथा—फणिना मण्डलिन्यां गोनसा जाताः, मण्डलिना गोनसेन च फणिन्यां कृष्णसर्पाः, एवमन्येऽपि जातिसंकरा ऊह्याः । व्यन्तरा इति पाठे स एवार्थः, विशब्दस्य पर्यायत्वात् ; तथा 'विभवान्महानाकाशः' इत्यत्र व्याख्यातं, विभवादिति द्विभावात्, द्विभावश्च सर्वमूर्तद्रव्यैः संयोगः सर्वत्रोपलम्भश्चेति । द्वन्द्वरूपिण इति द्वयोः फणिमण्डलिनोर्वातपित्तप्रकृत्योर्यत् प्रकृतित्वं तन्मिलितप्रकृतित्वमेषामित्यर्थः, वातपित्तप्रकृत्योरथवा द्वयोर्यद्दोषयो रूपं तद्रूपमित्यर्थः ॥ १६ ॥

दंशो भोगिकृतः कृष्णः सर्ववातविकारकृत् ।
पीतो मण्डलिजः शोथो मृदुः पित्तविकारवान् ॥ १७ ॥
राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः ।
पाण्डुः स्निग्धोऽतिसान्द्रासृक् सर्वश्लेष्मविकारकृत् ॥ १८ ॥

निर्यासविषैः पृथक् त्रिभिः । पारुष्यं खरस्पर्शत्वं मुखस्यैव, कफसंस्रवः श्लेष्मास्रावः । क्षीरविषलक्षणमाह—फेनेत्यादि । मुगमम् । धातुविषमाह—हृदित्यादि । धातुविषैः हरितालादिकैः (आ० द०) ॥ ८–१२ ॥

* 'दिग्धाहतं विषलिप्तशस्त्रहतम् । शत्रुभिर्व्रणसंचारितविषलक्षणमाह—लिङ्गानीत्यादि । एतान्येव पूर्वोक्तानि, अमित्रैः शत्रुभिः, व्रणे शस्त्रव्रणे, प्रमादात् अनवधानात्' (आ० द०) ॥ १३–१५ ॥

† 'द्वन्द्वरूपिण इति द्वयोर्भावः; तद्वन्त इत्यर्थः' (आ० द०) ॥ १६ ॥

भोगिप्रभृतिकृतदंशेषु वातादीनां लिङ्गमाह—दंशो भोगिकृत इत्यादि। सर्ववातविकारकृदित्यनेनैव कृष्णत्वे सिद्धे तदुक्तिरवश्यंभावित्वख्यापनार्थं, एवमुत्तरत्रापि पीताद्यभिधानम् ॥ १७ ॥ १८ ॥

*अश्वत्थदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु।
याम्ये च दष्टाः परिवर्जनीया ऋक्षे सिरामर्मसु ये च दष्टाः ॥ १९ ॥

विशिष्टदेशादिदष्टस्यासाध्यत्वमाह—अश्वत्थेत्यादि। याम्ये चेति भरण्याम्। ऋक्षे नक्षत्रे। मर्मस्विति आशुघातिषु। याम्ये चेति चकारेणार्द्राश्लेषामघामूलकृत्तिकानां ग्रहणम्। यदुक्तमन्यत्र—"चैत्यायतनवल्मीकश्मशानेषु चतुष्पथे। आर्द्राश्लेषामघामूलकृत्तिकाभरणीषु च। पञ्चम्यां सन्ध्ययोर्दंशे मर्मस्वाशुहरेषु च। दष्टाः कथंन जीवन्ति यदि दूतादिसंपदः"—इति ॥ १९ ॥

†दर्वीकराणां विषमाशुघाति सर्वाणि चोष्णे द्विगुणीभवन्ति।

दर्वीत्यादि। दर्वीकराणां विषमाशु हन्ति अश्वत्थादौ विशेषेण दर्वीकराणामाशुमारकं, दर्वीकराः फणिनः। सर्वाणि चोष्णे द्विगुणीभवन्तीति उष्णसंयोगे सति सर्वाणि विषाणि स्वरूपतो द्वैगुण्यं भजन्ते; 'सर्वाणि चोक्तानि यथाक्रमेण' इति पाठान्तरे अयमर्थः—सर्वाणि भोगिमण्डलिराजिलविषाणि यथाक्रमेण यथोद्दिष्टक्रमेणोक्तान्यश्वत्थादिष्वाशुघातीनि। दर्वीकरविषस्य पृथगुपादानं विशेषार्थम् ॥—

अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु बुभुक्षितेषु ॥ २० ॥
क्षीणक्षते मेहिनि कुष्ठयुक्ते रूक्षेऽबले गर्भवतीषु चापि।

एवमपरेष्वप्याशुघातित्वं संभवति, तानाह—अजीर्णेत्यादि। अजीर्णपित्तातपपीडितेष्विति अजीर्णिनि दोषत्रयप्रकोपात्, पित्तातपपीडितयो रौक्ष्यात्, बालवृद्धयोरसंपूर्णक्षीणधातुत्वेन विषवेगासहत्वात्, बुभुक्षितेष्विति पित्तवृद्ध्योष्णदेहत्वात्, क्षीणक्षत इति क्षतक्षीणे बहुलवातदुष्टेः, मेहिनि दोषत्रयप्रकोपात्, कुष्ठयुक्ते रक्तादिदोषात्, रूक्षे वातकोपात्, अबले क्लेशासहत्वात्, गर्भवतीषु गर्भेणोत्क्षिप्तदोषत्वात्, एषु विषमाशुघातीति ॥ २० ॥—

शस्त्रक्षते यस्य न रक्तमेति राज्यो लताभिश्च न संभवन्ति ॥ २१ ॥
शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्जयेत्तम्।
जिह्मं मुखं यस्य च केशशातो नासावसादश्च सकण्ठभङ्गः ॥ २२ ॥
कृष्णः सरक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वं च विवर्जनीयः।
वर्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्ध्वमधश्च यस्य ॥ २३ ॥

* 'याम्ये इत्यत्र "पित्र्ये" इति पाठः। पित्र्ये मघायां। ये च मर्मसु दष्टाः स्युस्तेऽपि त्याज्या इति' (आ० द०) ॥ १९ ॥

† 'सर्वाणि चोष्णे त्रिगुणीभवन्तीति उष्णसंयोगे सर्वाणि विषाणि स्वरूपतो त्रैगुण्यं भजन्ते ॥' (आ० द०)—

१ असाध्यमेवेदं पाठः।

दंष्ट्रानिपाताश्चतुरश्च यस्य तं चापि वैद्यः परिवर्जयेच्च ।
उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाऽप्यथवा विवर्णम् ॥ २४ ॥
सारिष्टमत्यर्थमवेगिनं च ज्ञात्वा नरं कर्म न तत्र कुर्यात् ।

इदानीं सर्वथा वर्जनीयमाह—शस्त्रक्षत इत्यादि । राज्यो लताभिश्चेति राज्यो लेखा लताभिस्ताडनाच्च भवन्ति । तदुक्तमालम्बायने,—"नैति रक्तं क्षताद्यस्य लताघातैर्न राजिकाः । न लोमहर्षः शीताद्भिर्वर्जयेत्तं विषार्दितम्"—इति । जिह्मं वक्रं, स्तब्धमिति कार्तिकः । केशशात इति कर्षणात् केशोत्पाटः । कण्ठभङ्गो ग्रीवाया अविधारणम् । हन्वोः स्थिरत्वं हनुद्वयस्य स्तब्धत्वम् । वर्तिर्घनेति लालारूपा वर्तिः । रक्तं स्रवेदूर्ध्वमधश्च यस्येति मुखनासागुदादिभ्यः शोणितस्रावः । दंष्ट्रानिपाताश्चतुरश्चेति चत्वार इति प्राप्ते चतुर इति निर्देश आगमविधेरनित्यत्वात्, यथा "अग्रतश्चतुरो वेदा" इत्यादि । उन्मत्तमत्यर्थमुपद्रुतमिति उन्मत्तमत्यर्थमुन्मादवन्तं, उपद्रुतं ज्वरातिसारादिभिरत्यर्थमुपद्रुतम् । हीनस्वरं वक्तुमसमर्थम् । विवर्णं कृष्णवर्णम् । सारिष्टं नासाभङ्गादियुक्तम् । अवेगिनं गर्मनादिवेगरहितं, विण्मूत्रादिवेगरहितमिति कार्तिकः ॥ २१–२४ ॥—

जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा ॥ २५ ॥
स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ।
(सु. क. अ. २)

स्थावरजङ्गमविषमेव जीर्णत्वादिभिर्विशेषैर्दूषीविषसंज्ञां लभते; तदाह—जीर्णमित्यादि । विषघ्नौषधिभिरिति अगदादिभिः । दावाग्निवातातपशोषितं वेति दावाग्निर्वनाग्निः । स्वभावतो वा गुणविप्रहीनमिति स्वभावादेव किमपि विषं व्यवायिविकाशिप्रभृतिषु दशसु गुणेषु मध्ये एकद्वित्र्यादिगुणहीनं यदि भवति तदा दूषीविषतामुपैति ॥ २५ ॥—

***वीर्याल्पभावान्न निपातयेत्तत् कफान्वितं वर्षगणानुबन्धि ॥ २६ ॥**
तेनार्दितो भिन्नपुरीषवर्णो वैगन्ध्यवैरस्ययुतः पिपासी ।
मूर्च्छां भ्रमं गद्गदवाग्वमिं च विचेष्टमानोऽरतिमाप्नुयाद्वा ॥ २७ ॥
(सु. क. अ. २)

गुणहीनतामेव कार्येण दर्शयति—वीर्याल्पभावादित्यादि । न निपातयेदिति न मारयति सद्यश्चिरेण वा । कफान्वितमिति कफान्वितं सत् मन्दीभूतौष्ण्यादिगुणं न मारयति । वर्षगणानुबन्धीति अपाकाच्चिरस्थायि । तेनार्दितो भिन्नपुरीषवर्ण इति तेन दूषीविषेणार्दितो, भिन्नशब्दोऽत्र पुरीषवर्णाभ्यां प्रत्येकमभिसंबध्यते, भिन्नवर्णो विवर्णः । वैगन्ध्यवैरस्ययुत इति विरुद्धगन्धमुखवैरस्ययुक्तः । विचेष्टमानो विरुद्धां चेष्टां कुर्वन्, अरतिमसुखं लभते ॥ २६ ॥ २७ ॥

* 'तद्वीर्यस्याल्पत्वात्तेन गररूपेण ये दोषा भवन्ति, तान्दर्शयन्नाह–तेनेति । तेन गररूपेण विषेण पीडितो भिन्नपुरीषवर्णादिकः स्यात्' (आ० द०) ॥ २६ ॥ २७ ॥

१ 'मनघायनेऽप्युक्तम्' क. । २ 'प्रथमादिवेगरहितं' क. । ३ 'गररूपेण पीडितः' क. ।

आमाशयस्थे कफवातरोगी, पक्काशयस्थेऽनिलपित्तरोगी ।
भवेत् समुद्ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥ २८ ॥
(सु. क. अ. २)

स्थानविशेषेण विशिष्टलिङ्गमाह—आमाशयस्थ इत्यादि । कफावृतत्वेन वातकोप आमाशये, तेन कफवातरोगीत्युक्तम् । अनिलपित्तरोगीति पक्काशये दुष्टवातसंबन्धेन प्रत्यासन्नस्याशयस्थस्य पित्तस्य कोपः । भवेत् समुद्ध्वस्तशिरोरुहाङ्ग इति अत्राङ्गशब्दात् परं रुहशब्दो द्रष्टव्यः, तेनायमर्थः—समुद्ध्वस्तशिरोरुहाङ्गः, शिरोरुहाः केशाः, अङ्गरुहं लोम, तदुक्तमालम्बायने,—"सीदन्ति केशलोमानि तस्मिन् पक्काशयं गते"—इत्यादि । विलूनपक्षस्तु यथा विहङ्ग इति मुण्डितपक्षशकुनिसदृशः, एतत् पक्काशयगतस्यैव लिङ्गम् ॥ २८ ॥

स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान् ।
कोपं च शीतानिलदुर्दिनेषु यात्याशु, पूर्वं शृणु तस्य रूपम् ॥२९॥
(सु. क. अ. २)

तस्य रसादिधातुगतस्य लिङ्गमाह—स्थितं रसादिष्वित्यादि । यथोक्तान् करोति धातुप्रभवान् विकारानिति सुश्रुते व्याधिसमुद्देशीयाध्यायोक्तानश्रद्धादीन् करोति; कोपं च शीतानिलदुर्दिनेषु यातीति कफसंबन्धाच्छीतादौ काले कोपं याति । पूर्वं शृणु तस्य रूपमिति पूर्वरूपं शृण्वित्यर्थः ॥ २९ ॥

निद्रागुरुत्वं च विजृम्भणं च विश्लेषहर्षावथवाऽङ्गमर्दम् ।
ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठजन्म ॥ ३० ॥
मांसक्षयं पादकरप्रशोथं मूर्च्छां तथा छर्दिमथातिसारम् ।
दूषीविषं श्वासतृषाज्वरांश्च कुर्यात् प्रवृद्धिं जठरस्य चापि ॥ ३१ ॥
(सु. क. अ. २)

तदेवाह—निद्रेत्यादि । विश्लेषहर्षाविति विश्लेषो गात्रस्य शैथिल्यं, हर्षो रोमहर्षः । एतानि वातकफजानि लिङ्गानि । तत इति पूर्वरूपादनन्तरम् । अन्नमदाविपाकाविति अन्नमदः अन्ने भुक्ते मदो हर्षः अन्नमदः, कार्तिकस्त्वन्नविक्षेपणमन्नमदमाह, अन्नमदो रसाजीर्णमिति गदाधरः; अविपाकोऽन्नस्यापाकः । पादकरप्रशोथमिति पादे करे च प्रकृष्टं शोथं करोति । 'मूर्च्छां तथा छर्दिमथातिसारं' इत्यस्य स्थाने 'प्रलेपकं छर्दिं इत्यादि पाठान्तरे प्रलेपकं स्वेदप्रवृत्त्या पिच्छिलं गात्रं, ज्वरविशेषं वा ॥ ३० ॥ ३१ ॥

उन्मादमन्यज्जनयेत्तथाऽन्यदानाहमन्यत्क्षपयेच्च शुक्रम् ।
गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान्विकारांश्च बहुप्रकारान् ॥ ३२ ॥
(सु. क. अ. २)

तदेव नानाप्रकारं यद्यत्करोति तत्तदाह—उन्मादमन्यदित्यादि । क्षपयेच्च शुक्रमिति षाण्ढ्यं करोतीत्यर्थः । तांस्तानिति विसर्पविस्फोटकादीन् ॥ ३२ ॥

---

१ 'प्रलेपकत्वेन स्वेदप्रवृत्त्या गात्रलिप्तत्वं' क. ।

*दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ।
यस्मात् संदूषयेद्धातून् तस्माद्दूषीविषं स्मृतम् ॥ ३३ ॥
साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम् ।
दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः ॥ ३४ ॥
(सु. क. अ. २)

दूषीविषस्य निरुक्तिमाह—दूषितमित्यादि । देशकालान्नदिवास्वप्नैरिति देशः प्रचुरानिलशीतवृष्टिरनूपादिः, कालः शीतानिलदुर्दिनादिः, अन्नं सुरातिलकुलत्थादि, तैर्दूषितं कोपितं, अभीक्ष्णशः पुनःपुनः । धातुदूषकत्वेन दूषीविषम् । संयोगजं विषं द्विविधं; एकं सविषाविषसंयोगकृतं कृत्रिमसंज्ञं, अपरं निर्विषद्रव्यकृतं गरसंज्ञम् । यदाह वृद्धकाश्यपः,—"संयोगजं च द्विविधं तृतीयं विषमुच्यते । गरः स्यादविषं तत्र सविषं कृत्रिमं[1] मतम्" इति । अत एव रसायने चरकः,—"दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे"—इति ॥ ३३ ॥ ३४ ॥

सौभाग्यार्थं स्त्रियः स्वेदं रजो नानाङ्गजान् मलान् ।
शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्[2] ॥ ३५ ॥
तैः स्यात् पाण्डुः कृशोऽल्पाग्निर्गरश्चास्योपजायते ।
मर्मप्रधमनाध्मानं हस्तयोः शोथलक्षणम् ॥ ३६ ॥
जठरं ग्रहणीदोषो यक्ष्मा गुल्मः क्षयो ज्वरः ।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गानि दर्शयेत् ॥ ३७ ॥

तद्द्वयमपि दर्शयितुमाह—सौभाग्यार्थमित्यादि ।—स्त्रियः सौभाग्यार्थं शत्रुप्रयुक्ता वा सविषजन्तूनां स्वेदं, रजश्चूर्णं, नानाङ्गजान् नानागरकरान् मलान्, अन्नादौ ददाति । तैरिति स्वेदरजःप्रभृतिभिः । गरश्चास्येति अपाकाज्जठरावस्थितस्वेदादिरेव गरः, अत एव तस्योदरामयः; किंवा वक्ष्यमाणमर्मप्रधमनादिलक्षणो व्याधिर्गरः । मर्मप्रधमनं मर्मव्यथा । शोथलक्षणमिति शोथ एव लक्षणं, जठरमुदरम् । अन्यस्य व्याधेर्लिङ्गानि दर्शयेदिति अन्यस्य विस्फोटादेर्लिङ्गं दर्शयति ॥ ३५–३७ ॥

†यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदविन्दवः ।
तस्माल्लूतास्तु भाष्यन्ते संख्यया ताश्च षोडश ॥ ३८ ॥
(सु. क. अ. २)

संप्रति लूतानां घोरविषयत्वप्रतिपादनार्थमैतिह्यमाह—यस्माल्लूनं तृणमित्यादि । इति किल श्रुतिः,—'विश्वामित्रो नरपतिः कामधेनोर्बलात्कारग्रहेण मुनिसत्तमं वशिष्ठं

---

* 'अन्नस्योपलक्षणत्वाद्व्यवायव्यायामक्रोधादयोऽपि ग्राह्याः; आत्मवतः पथ्याशिनः । क्षीणस्य क्षीणधातोः' (आ० द०) ॥ ३३ ॥ ३४ ॥

† 'यस्मात् कारणान्मुनेः प्रस्वेदविन्दवो लूनं तृणं प्राप्ताः, तस्माल्लूता भाष्यन्ते, "तासामष्टौ कृच्छ्रसाध्या वर्ज्यास्तावत्य एव तु"—इति । मतान्तरेणोत्पत्तिरन्यथा वर्ण्यते—"अन्ये वदन्ति मुक्तस्य दुष्टस्यान्नस्य मूर्च्छनात् । संभवन्ति विषस्फोटा ये लूताकीटलक्षणाः ॥ यथास्वं धारयन्तस्ते लूताकीटास्तु कीर्तिताः"—इति' (आ० द०) ॥ ३८ ॥

---

१ 'कृत्रिमं' क. । २ 'प्रयच्छन्त्यन्नमाश्रितान्' क. ।

कोपयांचकार, कुपितेन तेनान्तर्ज्वलदविरलकोपानलज्वलितं कुकुलयुगलमिव वहल-पाटलं लोचनद्वयं वहता भगवान् रविरवलोकितः । ततस्तस्य भ्रुकुटिभयङ्करललाट-तटप्रसन्दी खेदबिन्दूत्करः प्रचण्डतरः प्रत्यासन्नलूनतृणे धेन्वर्थं संभृते निपतितो लूताऽभूत्'–इति । तास्तु षोडश । यदाह सुश्रुतः,–"त्रिमण्डला तथा श्वेता कपिला पीतका तथा । लालामूत्रविषा रक्ता कठिना चाष्टमी स्मृता । सौवर्णिका लाजवर्णा जालिन्येकपदी तथा । कृष्णाऽग्निवर्णा काण्डा च मालागुण्यष्टमी मता" (सु. क. स्था. अ. ८)–इति ॥ ३८ ॥

*ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः ॥ ३९ ॥
पिडका विविधाकारा मण्डलानि महान्ति च ।
शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा ॥ ४० ॥
सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम् ।

(सु. क. अ. २)

तासां सामान्यदंशलक्षणमाह—ताभिर्दष्ट इत्यादि । दंशकोथ इति दंशदेशे पूतिभाव इत्यर्थः । प्रवृत्तिः क्षतजस्येति रक्तस्य प्रवर्तनम् । सर्वलूतानामिति असाध्याष्टविधसौवर्णिकादिलूतानामेव सामान्यलक्षणं ज्ञेयम् । यतस्त्रिमण्डलादीनामष्टानां कृच्छ्रसाध्यत्वं, ताभिर्दष्टे शिरोदुःखमित्यादिना सामान्यलक्षणमभिधाय सौवर्णिकाद्यनन्तरमेतत् पठितवान् सुश्रुतः । माधवकरेण तु षोडशानां लूतानां सामान्यलक्षणमेतदित्यभिप्रायेण पठितमिति ॥ ३९ ॥ ४० ॥

दंशमध्ये तु यत् कृष्णं श्यावं वा जालकाचितम् ॥ ४१ ॥
ऊर्ध्वाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् ।
दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्दिशेत् ॥ ४२ ॥

(च. चि. अ. २५)

त्रिमण्डलाद्योऽष्टौ दूषीविषास्तासां लक्षणमाह—दंशमध्ये त्वित्यादि । ऊर्ध्वाकृतीति ऊर्ध्वगस्वरूपं, अन्ये 'दग्धाकृति' इति पठन्ति, तद्व्यक्तार्थम् । दूषीविषाभिरिति कालान्तरप्रकोपिविषाभिः । दष्टमिति दंशम् ॥ ४१–४२ ॥

†शोथः[1] श्वेताः सिता रक्ताः पीता वा पिडका ज्वरः[2] ।
प्राणान्तिकाश्च[4] जायन्ते श्वासहिक्काशिरोग्रहाः ॥ ४३ ॥

(च. चि. अ. २५)

---

* 'कृच्छ्रसाध्यत्वमष्टविधत्रिमण्डलादिलूतानाम् । "ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना । भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः"–इति' (आ० द०) ॥ ३९–४० ॥

† अन्ये "श्वेताः सिता रक्ताः पीताश्च" इति पठन्ति । तत्र पिडका ज्वरश्च' (आ० द०) ॥ ४३ ॥

---

१ 'शोथाः' क. । २ 'सपिडकाज्वराः' क. । ३ सर्पाणामेव विण्मूत्रकीटांसु कीटजातास्तु । दूषीविषाः प्राणहरा इति संक्षेपतो मताः ॥ इति. ख. । ४ 'प्राणान्तिकाभिः' क. ।

सौवर्णिकादीनामष्टानामसाध्यानां प्राणहराणां सामान्यलक्षणमाह—शोथ इत्यादि । प्राणान्तिका इति प्राणहराः ॥ ४३ ॥

आदंशाच्छोणितं पाण्डुमण्डलानि ज्वरोऽरुचिः ।
लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्दिते ॥ ४४ ॥
(च. चि. अ. २५)

आखुदूषीविषलक्षणमाह—आदंशादित्यादि । आदंशाच्छोणितमित्यत्र 'गलति' इति शेषः । आखवः शुक्रविषाः । यदुक्तं,–'शुक्रं पतति यत्रैषां शुक्रस्पृष्टैः स्पृशन्ति यत्' (सु. क. स्था.अ. ७)–इति ॥ ४४ ॥

मूर्च्छाङ्गशोथवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः ।
शिरोगुरुत्वं लालासृक्छर्दिश्चासाध्यमूषिकैः ॥ ४५ ॥
(च. चि. अ. २५)

प्राणहरमूषिकलक्षणमाह—मूर्च्छेत्यादि । अङ्गशोथेति मूषिकाकार एवाङ्गशोथो ज्ञेयः । यदुक्तमन्यत्र,–'चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः" (सु. क. स्था. अ. ७)–इति । शब्दाश्रुतिः बाधिर्यं, अन्ये 'मन्दारुचिः' इति पठन्ति । असाध्यमूषिकैः मारणात्मकैः ॥ ४५ ॥

*काार्ष्ण्यं श्यावत्वमथवा नानावर्णत्वमेव वा ।
मोहोऽथ वर्चसो भेदो दष्टे स्यात् [१]कृकलासकैः ॥ ४६ ॥
(च. चि. अ. १३)

कृकलासदष्टलिङ्गमाह—कार्ष्ण्यमित्यादि । वर्चसो भेदोतिसारः ॥ ४६ ॥

†दहत्यग्निरिवादौ च भिनत्तीवोर्ध्वमाशु च ।
वृश्चिकस्य विषं याति दंशे पश्चात्तु तिष्ठति ॥ ४७ ॥
दष्टोऽसाध्यश्च हृद्घ्राणरसनोपहतो नरः ॥
मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसून् ॥ ४८ ॥
(च. चि. अ. २५)

वृश्चिकविषलिङ्गमाह—दहत्यग्निरिवेत्यादि । वृश्चिकः स्वनामख्यातः, स च आराविषः । दष्टोऽसाध्यश्च । हृद्घ्राणरसनोपहतो नर इति यदा हृदयनासाजिह्वोपघातो भवति तदा तद्दष्टो न साध्यः । मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसूनित्यादिनाऽयमपरोऽसाध्यप्रकारः । 'दष्टोऽसाध्यैस्तु' इति पाठपक्षेऽसाध्यैः सद्यःप्राणहरैर्वृश्चिकैर्दष्टो यथोक्तलिङ्गो भवति । चरकेऽप्ययमेव पाठः ॥ ४७ ॥ ४८ ॥

‡विसर्पः श्वयथुः शूलं ज्वरश्छर्दिरथापि च ।
लक्षणं कणभैर्दष्टे दंशश्चैवा[२]वसीदति ॥ ४९ ॥

कणभदष्टलिङ्गमाह—विसर्प इत्यादि । कणभः कीटविशेषः ॥ ४९ ॥

* 'कृकण्टकः कृकलासः' (आ० द०) ॥ ४६ ॥
† 'ऊर्ध्वमुपरिष्टादाशु याति पश्चाच्च दंशे तिष्ठति' (आ० द०) ॥ ४७ ॥ ४८ ॥
‡ 'विशीर्यते गलति' (आ० द०) ॥ ४९ ॥

१ "स्याच्च कृकण्टकैः" इति पाठाभिप्रायेण । २ "दंशश्चैव विशीर्यते" इति पाठान्तरम् ।

*हृष्टलोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्तिमान् ।
दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते ॥ ५० ॥

उच्चिटिङ्गदष्टलिङ्गमाह हृष्टरोमेत्यादि ॥ ५० ॥

†एकदंष्ट्रार्दितः शूनः सरुजः पीतकः सतृट् ।
छर्दिर्निद्रा च सविषैर्मण्डूकैर्दष्टलक्षणम् ॥ ५१ ॥
मत्स्यास्तु सविषाः कुर्युर्दाहं शोथं रुजं तथा ।
कण्डूं शोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः ॥ ५२ ॥

सविषमण्डूकादिदष्टलिङ्गमाह—एकदंष्ट्रार्दित इत्यादि ।—स्वभावादेकया दंष्ट्रया कृतो दंशो भवति ॥ ५१ ॥ ५२ ॥

‡विदाहं श्वयथुं तोदं स्वेदं च गृहगोधिका ।

गृहगोधिकादष्टलिङ्गमाह—विदाहमित्यादि । गृहगोधिका ज्येष्ठी, अन्ये तु भ्रामरकमाहुः । अत्र वक्ष्यमाणं कुर्यादिति संबन्धनीयं, तेन विदाहादीनां कर्मत्वम् ॥—

दंशे स्वेदं रुजं दाहं कुर्याच्छतपदीविषम् ॥ ५३ ॥

शतपदीदष्टलक्षणमाह—दंशे इत्यादि । कुर्याच्छतपदीविषमिति शतपदी काणुण्डिका ॥ ५३ ॥

कण्डूमान् मशकैरीषच्छोथः स्यान्मन्दवेदनः ।
असाध्यकीटसदृशमसाध्यं मशकक्षतम् ॥ ५४ ॥

मशकदष्टलिङ्गमाह—कण्डूमानित्यादि । असाध्यकीटसदृशमिति असाध्यकीटलूतादिभिः समलक्षणमिति । असाध्यं मशकक्षतमिति । पञ्चसु मशकेषु मध्ये पार्वतीयमशकक्षतमसाध्यम् । यदाह सुश्रुतः,—"पार्वतीयैस्तु कीटैश्च प्राणहरैस्तुल्यलक्षणम्" (सु. क. स्था. अ. ८)–इति ॥ ५४ ॥

सद्यःप्रस्राविणी श्यावा दाहमूर्च्छाज्वरान्विता ।
पिडका मक्षिकादंशे तासां तु स्थगिकाऽसुहृत् ॥ ५५ ॥

मक्षिकादष्टलिङ्गमाह—सद्य इत्यादि । तासां च स्थगिकाऽसुहृदिति तासां सुश्रुतोक्तषण्मक्षिकाणां मध्ये स्थगिका प्राणहरेत्यर्थः ॥ ५५ ॥

§चतुष्पद्भिर्द्विपद्भिश्च नखदन्तविषं च यत् ।
शूयते पच्यते चापि स्रवति ज्वरयत्यपि ॥ ५६ ॥

चतुष्पद्भिरिति चतुष्पादा व्याघ्रादयः । द्विपादा वनमानुषवानरादयः ॥ ५६ ॥

---

* 'उच्चिटिङ्गनाम्ना वृश्चिकेन दष्टः पुमान्, हृष्टरोमा कण्टकितदेहः, स्तब्धमेहनः, तथा भृशार्तियुक्तः । शीतोदकेनेवाङ्गानि सिक्तानि मन्यते । सुश्रुतस्तु उच्चिटिङ्गं कीटविशेषमाह' (आ० द०) ॥ ५० ॥

† 'सविषमत्स्यलक्षणमाह–मत्स्या इत्यादि । सुगमम् । सविषजलौकादष्टलक्षणमाह–कण्डूमित्यादि । कुर्युरिति पूर्वक्रियया संबन्धः' (आ० द०) ॥ ५२ ॥

‡ 'गृहगोधिका ब्राह्मणीति लोके' (आ० द०)—

§ 'तैर्यत् नखक्षतं दन्तक्षतं च, तत्[१] शूयते शोफयुक्तं भवति, तथा पच्यते, तथा स्रवति, तथा ज्वरयति (आ० द०) ॥ ५६ ॥

---

१ "पूयते" इत्यत्र "शूयते" इति पा० ।

*श्वशृगालतरक्ष्वृक्षव्याघ्रादीनां यदाऽनिलः ॥
श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः ॥ ५७ ॥
तदा प्रस्रस्तलाङ्गूलहनुस्कन्धोऽतिलालवान् ।
अव्यक्तबधिरान्धश्च सोऽन्योन्यमभिधावति ॥ ५८ ॥
प्रमूढोऽन्यतमस्त्वेषां खादन्विपरिधावति ॥
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणां सविषेण तु ॥ ५९ ॥
सुप्तता जायते दंशे कृष्णं चातिस्रवत्यसृक् ॥
दिग्धविद्धस्य लिङ्गेन प्रायशश्चोपलक्षितः ॥ ६० ॥
†येन चापि भवेद्दष्टस्तस्य चेष्टां रुतं नरः ॥
बहुशः प्रतिकुर्वाणः क्रियाहीनो विपद्यति ॥ ६१ ॥
दंष्ट्रिणा येन दष्टश्च तद्रूपं यस्तु पश्यति ॥
अप्सु चादर्शबिम्बे वा तस्य तद्रिष्टमादिशेत् ॥ ६२ ॥
त्रस्यत्यकस्माद्योऽभीक्ष्णं दृष्ट्वा स्पृष्ट्वाऽपि वा जलम् ॥
जलत्रासं तु तं विद्याद्रिष्टं तदपि कीर्तितम् ॥ ६३ ॥

* 'अत्र केचित् विषाधिकारसामान्यात् श्वापदानां व्याघ्रादीनां भल्लूकानां च विषलक्षणं भणन्ति । तदाह–श्वेत्यादि । श्वा कुक्कुरः, शृगालः प्रसिद्धः तरक्षुर्मृगशत्रुर्व्याघ्रविशेषः, 'जरख(ख) इति लोके, ऋक्षो भल्लूकोऽतिलोमशः, ऋच्छ इति लोके प्रसिद्धः । आदिश-ब्दाद्वृकचित्रादयो हिंस्राः पशवो ग्राह्याः । श्वादीनां यदा अनिलो वायुः श्लेष्मप्रदुष्टः सन्, संज्ञावहाश्रितः संज्ञावहस्रोतोगतः संज्ञां सम्यग्ज्ञानं मुष्णाति हरति । सम्यग्ज्ञानहरणाच्च कीदृशो भवतीत्याह—तदेत्यादि । प्रस्रस्तं स्थानच्युतं, लाङ्गूलं वालधिः, मेहनं च । प्रस्रस्त-शब्दो लाङ्गूलादिभिः प्रत्येकं संबन्धनीयः । अतिलालावान् अतिशयेन लालास्रावयुक्तः । अव्यक्तबधिरोऽन्धश्च न व्यक्तो बधिरोऽन्धो वेत्यर्थः । अन्योन्यमभिधावति परस्परं दष्टुमभिधावति । हनुस्कन्धस्थाने 'चूनस्कन्धः' इति केचित्पठन्ति । 'प्रमूढोऽन्यतमस्त्वेषां खादन्विपरिधावति' इत्यत्रोत्तरार्धं केचित्पठन्ति । एषां मध्येऽन्यतमः एकतमः प्रमूढः सन् खादन् विशेषेण परिधावति । तेनेति दंष्ट्रिणा । सुप्तता बाधिर्यम् । उपलक्षितो युक्त इत्यर्थः' (आ० द०) ॥ ५७–६० ॥

† 'इदानीं श्वादिदष्टस्य रिष्टमाह–येनेत्यादि । चेष्टां क्रियां, [1]रुतं शब्दं बहुशोऽनेकवारं, प्रतिकुर्वाणोऽनुकुर्वन्, क्रियाहीनः स्वकीयकायादिव्यापाररहितः । इदानीमपरमप्यरिष्टं निर्दिशन्नाह–दंष्ट्रिणेत्यादि । तद्दंष्ट्रिरूपदर्शनमरिष्टं मरणलक्षणम् । पुनरपरमरिष्टं निर्दिश-न्नाह–त्रस्यतीत्यादि । अकस्माज्जलत्रासहेतुं विना, अपिशब्दात् श्रुत्वाऽपि जलत्रासरोगं जानीयात्तस्येति संबन्धः । रिष्टमित्यादि तदपि जलत्रसनमरिष्टं मरणं कीर्तितम् । एतच्चा-रिष्टं दष्टस्य । अत्रार्थे तन्त्रान्तरे,–"व्याधितेन श्वादिना दष्टस्य श्लेष्मा कुपितः स्रोतोवाहि-नीर्धमनीरनुप्रविश्य संज्ञानाशमापादयति । ततो नरः स्पृष्ट्वा श्रुत्वा च जलं त्रस्यति, तद्रिष्टं जानीयात्"–इति । एवमदष्टस्यापि जलत्रासो रिष्टमेवेति दर्शयन्नाह–अदष्ट इत्यादि । अस्मिन्नर्थे तन्त्रान्तरे–"अदष्टस्यापि जन्तोर्हि जलत्रासो भवेद्यदि । तस्यारिष्टं हि भिषजो ब्रुवते विषचिन्तकाः ॥ जलं विना जलत्रासो जायते श्लेष्मसंचयात्" इति । अथ चोक्तम्– "बुद्धिस्थानं यदा श्लेष्मा केवलः प्रतिपद्यते । तदा बुद्धौ निरुद्धायां श्लेष्मणाऽधिष्ठितो

१ ह्रस्वता छन्दोऽनुरोधेन ।

अदष्टो वा जलत्रासी न कथंचन सिद्ध्यति ॥
प्रसुप्तो वोत्थितो वाऽपि स्वस्थस्त्रस्तो न सिद्ध्यति ॥ ६४ ॥
*प्रशान्तदोषं प्रकृतिस्थधातुमन्नाभिकामं सममूत्रविट्कम् ।
प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम् ॥६५॥

इति श्रीमाधवकरविरचिते माधवनिदाने विषनिदानं समाप्तम् ॥ ६९ ॥

विषातुरः कीदृशो निर्विषो भवतीति दर्शयितुमाह—प्रशान्तदोषमित्यादि । अत्राभिकाममित्यनेन प्रकृतिस्थाग्नितोक्ता । यदाह चरकः,–"प्रायेणोपहताग्नित्वात् सपिच्छमतिसार्यते । आप्नोति चास्य वैरस्यं न चान्नमभिनन्दति"–इति । सममूत्रविट्कमिति अक्षीणानतिरिक्तमूत्रपुरीषम् । अन्ये 'समसूत्रजिह्वं' इति पठन्ति, तदाऽयमर्थः–सममविकृतं सूत्रं जिह्वा च यस्य स तथा, एतेन विषजुष्टा जिह्वा न रसबोधिनी भवति, सूत्रमपि जिह्वायां विषप्रभावेण वैकृतं भवतीति प्रतिपादयति । जिह्वाग्रहणेनैव सूत्रग्रहणे सिद्धे तस्य च रसग्रहणे अनुगुणत्वप्रतिपादनार्थं पृथगुपादानम् । अनेन श्लोकेन "समदोषः समाग्निश्च" (सु. सू. स्था. अ. १५)—इत्यादिश्लोकस्य सकल एवार्थः उपबद्धः ॥ ६५ ॥

इति श्रीकण्ठदत्तकृतायां मधुकोशव्याख्यायां विषनिदानं समाप्तम् ॥ ६९ ॥

सूक्तिमुक्तावलीग्रन्थे[1] गुरुणा यत्र गुम्फितम् ॥
मया समस्तमग्रन्थि तद्गिरा शुद्धियुक्तया[2] ॥ १ ॥

गुणनिधिगुरुवद्धे दाम्नि वाग्मालतीनां परमपरिमलश्रीधाम्नि लब्धावलम्बम् ॥
स्फुरति वचनकुन्दं मन्दसौरभ्यलेशाद्वचनमपि मदीयं किंचिदेतत् कदाचित् ॥ २ ॥

इति श्रीविजयरक्षितश्रीकण्ठदत्तविरचिता मधुकोशव्याख्या समाप्ता ॥

नरः ॥ जाग्रत्सुप्तोऽथवाऽऽत्मानं मज्जन्तमिव मन्यते । सलिलात्त्रस्यति तदा जलत्रासं तु तं विदुः ॥ श्लेष्मघ्नं तत्र कर्तव्यं शोधनं शमनानि च । आहारस्य विधानेन यावत्स प्रकृतिं व्रजेत्"–इति । अयं जलत्रासः कुपितकफस्य भवतीति रिष्टं न भवति । अत एवाऽत्र चिकित्सोपदेशः । दष्टस्य तु रिष्टमेव, तथा स्वस्थस्य जाग्रतो वा जलमन्तरेण त्रासो रिष्टमेवेति दर्शयन्नाह—प्रसुप्त इत्यादि । सुगमम्' (आ० द०) ॥ ६१–६४ ॥

* 'प्रसन्नदोषं स्वभावस्थितवातादिकम् । प्रकृतिस्थधातुमिति दधतीति धातवो रसादयो मलादयश्च । अन्नाभिकामं भोजनाभिलाषं, अन्ये "सममूलजिह्वम्" इति पठन्ति, तदायमर्थः–सममविकृतं मूलं जिह्वा च यस्य स तथा । एतेन विषदुष्टजिह्वा रसवेदिनी न भवति, मूलमपि जिह्वावत् विषप्रभावेण विकृतं भवतीति प्रतिपादयति । जिह्वाग्रहणेनैव मूलग्रहणे सिद्धे, तस्य रसग्रहणेऽर्थगुणत्वप्रतिपादनार्थं पृथगुपादानम् । वैद्योऽवगच्छेदविषं मनुष्यमिति उक्तलक्षणः पुरुषोऽविषो भवति, विपरीतलक्षणस्तु विषातुरः । तथाहि—"प्रवृद्धदोषाऽप्रकृतिस्थधातुमनन्नकाङ्क्षं हतमूलजिह्वम् । विरुद्धवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेत्सविषं मनुष्यम्" । इदं सविषाविषलक्षणमिति' (आ० द०) ॥ ६५ ॥

---

१ 'गुम्फ' क. । २ 'शुद्धमुक्तया' क. ।

अथ विषयानुक्रमणिका।

ज्वरोऽतिसारो ग्रहणी चार्शोऽजीर्णं विसूचिका।
अलसश्च विलम्बी च क्रिमिरुक्पाण्डुकामलाः ॥ १ ॥
हलीमकं रक्तपित्तं राजयक्ष्मा उरःक्षतम्।
कासो हिक्का सह श्वासैः स्वरभेदस्त्वरोचकः ॥ २ ॥
छर्दिस्तृष्णा च मूर्च्छाद्या रोगाः पानात्ययादयः।
दाहोन्मादावपस्मारः कथितोऽथानिलामयः ॥ ३ ॥
वातरक्तमूरुस्तम्भ आमवातोऽथ शूलरुक्।
पक्तिजं शूलमानाह उदावर्तोऽथ गुल्मरुक् ॥ ४ ॥
हृद्रोगो मूत्रकृच्छ्रं च मूत्राघातस्तथाऽश्मरी।
प्रमेहो मधुमेहश्च पिडकाश्च प्रमेहजाः ॥ ५ ॥
मेदस्तथोदरं शोथो वृद्धिश्च गलगण्डकः।
गण्डमालाऽपची ग्रन्थिरर्बुदः श्लीपदं तथा ॥ ६ ॥
विद्रधिर्व्रणशोथश्च द्वौ व्रणौ भग्ननाडिके।
भगन्दरोपदंशौ च शूकदोषस्त्वगामयः ॥ ७ ॥
शीतपित्तमुदर्दश्च कोठश्चैवाम्लपित्तकम्।
विसर्पश्च सविस्फोटः सरोमान्त्यो मसूरिकाः ॥ ८ ॥
*क्षुद्रास्यकर्णनासाक्षिशिरःस्त्रीबालकामयाः।
विषं चेत्ययमुद्दिष्टो रुग्विनिश्चयसंग्रहः ॥ ९ ॥

†सुभाषितं यत्र यदस्ति किंचित्तत्सर्वमेकीकृतमत्र यत्नात्।
विनिश्चये सर्वरुजां नराणां श्रीमाधवेनेन्दुकरात्मजेन ॥ १० ॥

यत्कृतं सुकृतं किंचित्कृत्वैवं रुग्विनिश्चयम्।
मुञ्चन्तु जन्तवस्तेन नित्यमातङ्कसन्ततिम् ॥ ११ ॥

इति श्रीमाधवकरविरचितं माधवनिदानं समाप्तम् ॥

---

* 'अस्मिन् ग्रन्थे रोगसंग्रहमाह—ज्वरातिसारावित्यादि ग्रहण्यश्चतस्रः। एकस्मिन्नजीर्णनिदाने विसूचिकालसविलम्बिका ज्ञेयाः। पानात्ययादयः पानविभ्रमादयः। पिडकाप्रमेहोक्ताः। मेदोदोषो मेदोरोगः। उपदंशो मेढ्ररोगः, त्वगामयः कुष्ठरोगः। रोमान्तो मसूरिकाभेदः। आस्यं मुखम्। रुग्विनिश्चये अयमुद्देशः' ॥ ९ ॥

† 'ग्रन्थकारः स्वपक्षमाह–सुभाषितमित्यादि। सुगमम्' (आ० द०) ॥ १० ॥ ११ ॥

---

१ एतादृशपाठाभिप्रायेण। अयमेव पाठमङ्गीकरोति।

परिशिष्टम् ।

अथ स्नायुकनिदानम् ।

शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत् ।
भिनत्ति तत्क्षते तत्र सोष्म स्नायुं विशोष्य च ॥ १ ॥
कुर्यात्तन्तुनिभं जीवं वृत्तं श्वेतद्युतिं बहिः ।
शनैः शनैः क्षताद्याति छेदात्कोपमुपैति च ॥ २ ॥
तत्पाताच्छोथशान्तिः स्यात्पुनः स्थानान्तरे भवेत् ।
स स्नायुकेति विख्यातः क्रियोक्ताऽत्र विसर्पवत् ॥ ३ ॥
बाह्वोर्यदि प्रमादेन त्रुट्यते जङ्घयोरपि ।
संकोचं खञ्जतां चैव छिन्नतन्तुः करोत्यसौ ॥ ४ ॥

वातेन श्यावरूक्षः सरुगथ दहनान्नीलपीतः सदाहो-
ऽथ श्वेतः श्लेष्मणा स्यात्पृथुगरिमयुतोऽथ द्विदोषो द्विलिङ्गी ।
रक्तेनारक्तकान्तिः समधिकदहनोऽथाखिलैः सर्वलिङ्गो
रोगोऽसावष्टधेत्थं मुनिभिरभिहितः स्नायुकस्तन्तुकीटः ॥ ५ ॥

इति स्नायुकनिदानं समाप्तम् ।

अथ फिरङ्गरोगनिदानम् ।

फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत् ।
तस्मात्फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः ॥ १ ॥
गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽङ्गसंसर्गात्फिरङ्गिण्याः प्रसंगतः ॥ २ ॥
व्याधिरागन्तुजो ह्येष दोषाणामत्र संक्रमः ।
भवेत्तल्लक्षयेत्तेषां लक्षणैर्भिषजां वरः ॥ ३ ॥
फिरङ्गस्त्रिविधो ज्ञेयो बाह्य आभ्यन्तरस्तथा ।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे ॥ ४ ॥
तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्परुक् ।
स्फुटितो व्रणवद्वैद्यैः सुखसाध्योऽपि सो मतः ॥ ५ ॥
सन्धिष्वाभ्यन्तरः स स्यादामवात इव व्यथाम् ।
शोफं च जनयेदेष कष्टसाध्यो बुधैः स्मृतः ॥ ६ ॥

कार्श्यं बलक्षयो नासाभङ्गो वह्नेश्च मन्दता ।
अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी ॥ ७ ॥
बहिर्भवो भवेत्साध्यो नवीनो निरुपद्रवः ।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः ॥ ८ ॥
बहिरन्तर्भवश्चापि क्षीणस्योपद्रवैर्युतः ।
व्याप्तो व्याधिरसाध्योऽयमित्याहुर्मुनयः पुरा ॥ ९ ॥

इति फिरङ्गरोगनिदानं समाप्तम् ।

अथ सोमरोगनिदानम् ।

स्त्रीणामतिप्रसङ्गेन शोकाच्चापि श्रमादपि ।
अतिसारकयोगाद्वा गरयोगात्तथैव च ॥ १ ॥
आपः सर्वशरीरस्थाः क्षुभ्यन्ति प्रस्रवन्ति च ।
तस्यास्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति हि ॥ २ ॥
प्रसन्ना विमलाः शीता निर्गन्धा नीरुजः सिताः ।
स्रवन्ति चातिमात्रं ताः सा न शक्नोति दुर्बला ॥ ३ ॥
वेगं धारयितुं तासां न विन्दति सुखं क्वचित् ।
शिरःशिथिलता तस्या मुखं तालु च शुष्यति ॥ ४ ॥
मूर्च्छा जृम्भा प्रलापश्च त्वग्रूक्षा चातिमात्रतः ।
भक्ष्यैर्भोज्यैश्च पेयैश्च न तृप्तिं लभते क्वचित् ॥ ५ ॥
संधारणाच्छरीरस्य ता आपः सोमसंज्ञिताः ।
ततः सोमक्षयात् स्त्रीणां सोमरोग इति स्मृतः ॥ ६ ॥

इति सोमरोगनिदानं समाप्तम् ।

अथ शीतलानिदानम् ।

देव्या शीतलयाऽऽक्रान्ता मसूर्यः शीतला बहिः ॥
ज्वरयेयुर्यथा भूताधिष्ठितो विषमज्वरः ॥ १ ॥
ताश्च सप्तविधाः ख्यातास्तासां भेदान्प्रचक्ष्महे ॥
ज्वरपूर्वा बृहत्स्फोटैः शीतला बृहती भवेत् ॥ २ ॥
सप्ताहान्निःसरत्येव सप्ताहात्पूर्णतां व्रजेत् ॥
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम् ॥ ३ ॥

वातश्लेष्मसमुद्भूता कोद्रवा कोद्रवाकृतिः ॥
तां कश्चित्प्राह पक्वेति सा तु पाकं न गच्छति ॥ ४ ॥
जलशूकवदङ्गानि सा विध्यति विशेषतः ॥
सप्ताहाद्वा दशाहाद्वा शान्तिं याति विनौषधम् ॥ ५ ॥
ऊष्मणा तूष्मजारूपा सकण्डूः स्पर्शनप्रिया ॥
नाम्ना पाणिसहा ख्याता सप्ताहाच्छुष्यति स्वयम् ॥ ६ ॥
चतुर्थी सर्षपाकारा पीतसर्षपवर्णिनी ॥
नाम्ना सर्षपिका ज्ञेयाऽभ्यङ्गमत्र विवर्जयेत् ॥ ७ ॥
किञ्चिदूष्मनिमित्तेन जायते राजिकाकृतिः ॥
एषा भवति बालानां सुखं शुष्यति च स्वयम् ॥ ८ ॥
कोद्रवज्जायते षष्ठी लोहितोन्नतमण्डला ॥
ज्वरपूर्वा व्यथायुक्ता ज्वरस्तिष्ठेद्दिनत्रयम् ॥ ९ ॥
स्फोटानां मेलनादेषा बहुस्फोटाऽपि दृश्यते ॥
एकस्फोटे च कृष्णा च बोद्धव्या चर्मजाभिधा ॥ १० ॥

इति शीतलानिदानम् ।

अशीतिवातरोगनामानि ।

अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः ।
आक्षेपको हनुस्तम्भ ऊरुस्तम्भः शिरोग्रहः ॥ १ ॥
बाह्यायामोऽन्तरायामः पार्श्वशूलं कटिग्रहः ।
दण्डापतानकः खल्ली जिह्वास्तम्भस्तथाऽर्दितम् ॥ २ ॥
पक्षाघातः क्रोष्टुशीर्षो मन्यास्तम्भश्च पङ्गुता ।
कलायखञ्जता तूनी प्रतितूनी च खञ्जता ॥ ३ ॥
पादहर्षो गृध्रसी च विश्वाची चापबाहुकः ।
अपतानो व्रणायामो वातकण्टोऽपतन्त्रकः ॥ ४ ॥
अङ्गभेदोऽङ्गशोषश्च मिन्मिनत्वं च कल्लता ।
प्रत्यष्ठीलाऽष्ठीलिका च वामनत्वं च कुब्जता ॥ ५ ॥
अङ्गपीडाऽङ्गशूलं च संकोचस्तम्भरूक्षताः ।
अङ्गभङ्गोऽङ्गविभ्रंशो विड्ग्रहो बद्धविट्कता ॥ ६ ॥
मूकत्वमतिजृम्भा स्यादत्युद्गारोऽन्त्रकूजनम् ।
वातप्रवृत्तिः स्फुरणं सिराणां पूरणं तथा ॥ ७ ॥
कम्पः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता ।
निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः ॥ ८ ॥

अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः ।
अनवस्थितचित्तत्वं काठिन्यं विरसास्यता ॥ ९ ॥
कषायवक्त्रताऽऽध्मानं प्रत्याध्मानं च शीतता ।
रोमहर्षश्च भीरुत्वं तोदः कण्डू रसाज्ञता ॥ १० ॥
शब्दाज्ञता प्रसुप्तिश्च गन्धाज्ञत्वं दृशः क्षयः ।

चत्वारिंशत्पित्तरोगनामानि ।

अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिताः ॥ ११ ॥
धूमोद्गारो विदाहः स्यादुष्णाङ्गत्वं मतिभ्रमः ।
कान्तिहानिः कण्ठशोषो मुखशोषोऽल्पशुक्रता ॥ १२
तिक्तास्यताऽम्लवक्त्रत्वं स्वेदस्रावोऽङ्गपाकता ।
क्लमो हरितवर्णत्वमतृप्तिः पीतगात्रता ॥ १३ ॥
रक्तस्रावोऽङ्गदरणं लोहगन्धास्यता तथा ।
दौर्गन्ध्यं पीतमूत्रत्वमरतिः पीतविट्कता ॥ १४ ॥
पीतावलोकनं पीतनेत्रता पीतदन्तता ।
शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता ॥ १५ ॥
कोपश्च गात्रसादश्च भिन्नविट्कत्वमन्धता ।
उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च ॥ १६ ॥
तमसो दर्शनं पीतमण्डलानां च दर्शनम् ।
निःसरत्वं च पित्तस्य चत्वारिंशद्रुजः स्मृताः ॥ १७ ।

विंशतिश्लेष्मरोगनामानि ।

कफस्य विंशतिः प्रोक्ता रोगास्तन्द्राऽतिनिद्रता ।
गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥ १८ ॥
श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता ।
श्वेताङ्गवर्णता शैत्यमुष्णेच्छा तिक्तकामिता ॥ १९ ॥
मलाधिक्यं च शुक्रस्य बाहुल्यं बहुमूत्रता ।
आलस्यं मन्दबुद्धित्वं तृप्तिर्घर्घरवाक्यता ॥ २० ॥
अचैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः ।